India. (39—55) Princes of the royal blood. Royal priest (पुरोहित), Ministers and Secretaries. Tributaries (मण्डलाधिप). Heroes: minor chiefs (सामन्तराज), Wrestlers (साधक). Other officers, their dresses and seats. (56—70) Etiquette during Durbars: what may not be done. (71—88) Musicians, dancers, heralds etc., their seats, dresses, service etc. How to receive foreigners etc.

II Chapter. The whole chapter deals with magic and mesmerism. Many interesting and easy prescriptions given and fully explained, to produce the most astounding phenomena.

III Chapter. This chapter deals with literature. Kavya, varieties thereof. Things to be described therein. The author; qualities needed for writing a kavya; letters (Varnas), Moras (Gana). Stanzas (vrtta)–varieties thereof. 7 kinds of poets. *Vritti–lakshana–Sthayi bhava–Satvika bhava–Vyabhichari bhava–Dosa*; principal and minor *Bhavas* in each Rasa. Derivative *rasas* and contrary *rasas*.

IV Chapter. (4—17) The Hero (नायक). Varieties of heroes. (18—20) The Jester. (विदूषक). Servant (चेट). Friend (विट). Personal attendant (पीठमर्द). (21—26) Qualities of a hero. (27—43) Heroine (नायिका); qualities & kinds of heroines. (44—58) Ornaments to be worn on the person of the heroine. (59—83) *Riti, Guna, Vrtti* and *paka* in a kavya. (84—130) Defects (दोष's) in literary works of various kinds.

V Chapter. (4—29) Varieties of Kavyas. चित्रालङ्कार. बन्ध, its varieties, प्रहेलिका, मात्राच्युतक, बिन्दुच्युतक, वर्णच्युतक etc. (30—100) अर्थालङ्कार.

VI Chapter. Acting (Natya). Varieties thereof. 10 kinds of plays (दशरूपक's) described. Their characteristics and parts (अङ्ग). Abhinaya (gesticulations of the various limbs).

VII Chapter. (3—20) पुंसवन. Its rites etc. सीमन्तोन्नयन and जातकर्म. A daughter or a son should not be born after 3 sons or 3 daughters respectively. नामकरण, आन्दोलन (putting in the cradle). (21—50) अन्नप्राशन, कर्णवेध (earboring), निष्क्रमण, चन्द्रदर्शन, जीविकानिर्णय, उपवेशन—suitable time for each of these ceremonies. Ornaments for children. (51—68) चूडाकर्म, अक्षराभ्यास. In what particular parts of the body and on what occasions should the teacher punish the pupil. Food of the pupil; conduct while with the *Guru* (गुरुकुलवास). (69—82) उपनयन to the 1st 3 classes. Training of *Ksatriya* boys. गुरुदक्षिणा. (83—123) Marriage, *Lagna* (auspicious hour). Pandal. Religious ceremonies; giving away of the bride. *Dowry* to be given by the bride's father procession of the newly married couple, etc.

VIII Chapter. This treats of astronomy and astrology. The 12 *Bhavas* and their owners. केन्द्र, त्रिकोण and other technical terms. The results of the different houses (राशि) occupied by the owners of the 12 Bhavas. Auspicious, inauspicious and *maraka* explained. Who are good and bad for each Rasi. *Yogakaraka* and *maraka* planets for each Rasi. *Stri-Jataka.*

IX and X Chapters. Palmistry; explained separately for men and women.

XI Chapter. (4—16) *Airavata*; the eight elephants guarding the eight quarters of the world. Their origin and the forests where they were born. (17—39) The good and bad points of elephants, their qualities, height and varieties. How to measure them. Those fit for riding. (40—93) 18 kinds of mixed breed, their varieties and characteristics and colour of the body. (94—125) Average life of elephants and their sense of duty. Elephants fit for royal use. (126—200) Life-period of elephants; place for examining and training elephants. Their hair. skin, jaws, tail, eyes, breast, curls etc. (201—208) Rut (मदोदक); places wherefrom it flows.

its smell etc. (209—213) Female elephants. (214—223) The *Mahout.* The need of elephants in the army. Forecasting the fate of the battle by the movements of elephants.

XII Chapter. (2—10) Seven kinds of horses. (11—14) Mules. Their origin and their varieties. (15—32) Story of how the horses had wings and how after a curse the wings were lost and the strength thereof was transferred to the legs. (33—41) Nature of horses. How to find it out. (42—66) 8 characteristics. A knowledge thereof; shoulder, back, legs etc., tests, measurements etc. (67—81) Height, varieties, and good and bad points according to height. Five chief colours; mixed colours. (82—102) Horse fit for sacrifice (आश्वमेधिकतुरग), पञ्चकल्याण, अष्टमङ्गल, मल्लिकाक्ष etc. Bad horses; their characteristics. (103—107) गन्धाश्व, place of origin of गन्ध. Various sounds of neighing; what they signify. Horses fit for warfare. (108—183) Curls (आवर्त); their names and results. (184—188) Teeth. How to ascertain age by examining them. (189—210) सामुद्रिक by examining the mouth in horses. (211—221) Travelling. Omens by horses.

XIII Chapter. (1—138) Qualities of horses born in the 54 countries and all other details about them. (139—143) 32 qualities to be chiefly found in horses. (144—159) How to ride. How to control horses of various kinds. Where and when to beat horses. (160—182) 5 kinds of motions. Superiority of the horse in the animal kingdom. (183—187) What all may be kept near stables and what not etc. (188—193) Chariots. Varieties thereof. (194—249) Bullocks etc.; their characteristics. Their curl marks, body, colour, hoofs and tail; treatment for diseases. Cows.

XIV Chapter. (3—10) When Sivappa Nayaka was ruling, one day he spoke to his younger brother regarding the chief of *Belur*, who had rebelled against the Imperial throne, and the desirability of putting him down. (11—12) Sivappa Nayaka went to Belur and beseiged the fort. (13—85) कोटाचक्रविधान. Astrology in its relation to warfare. (86—101) Various kinds of forts and how to win them. (102—110) Sivappa Nayaka conquered the fort of Belur. Hearing this, Sri Ranga Raya, the Imperial representative, came to Belur to see Sivappa and gave him many titles, honours, an elephant by name रामबाण, pearls, शंख, चक्र and a Royal umbrella by name जगज्झम्पा. Sivappa handed over Belur to Sri Ranga Raya. (111—145) On the banks of the तुङ्गभद्रा he built and gave to Brahmins an *agrahara* by name Sivarajapura and caused many sacrifices to be performed by them. He built many forts in the Kerala country and repaired many forts, lakes, wells, temples etc., and endowed the most important 16 *Siva Ksetras* in India. He repaired and improved the temples at Keladi and Kollur. (146—149) He kept his younger son Somasekhara under Venkatappa Nayaka, crowned his eldest son Bhadrappa Nayaka and devoted himself to spiritual matters.

XV Chapter. This chapter expounds the chief principles of *yoga Sastra.* (1—5) *Mantra, Laya, Hatha, Raja* and *Saiva* are the 5 kinds of yogas. The mantra to be repeated by those desirous of salvation. (6—14) *Angas* of yoga are 6 or 8 according to different opinions. The essential qualities that ought to exist in a Yogin. All this comes under *mantra* yoga. (15—65) *Hatha yoga.* Different kinds of postures (आसन) described. The nature of कुण्डलिनी. The acquisition of the 8 supernatural powers (अष्टसिद्धि). सुषुम्ना—its nature and motion. The principles of प्राणायाम or breathing exercises. इडा, पिङ्गला and सरस्वती. 72 thousand नाडी's; 4 of them are chief ones. Of these प्राण is the most important. The action of the 5 inner *vayus.* 5 other outer *Vayus.* (66—135) Building of *mathas.* The postures of the Yogin. His food; foods acceptable

and to be avoided, Qualities thereof. हसमन्त्र, प्रत्याहार, धारणा and समाधि. Means to control वायु (breath). खेचरीमुद्रा; how to attain it. The qualities to be found in Yogins. Who deserve real *mukti*. The qualities observable in a *Mahatman*. तारकब्रह्ममन्त्र. (136—165) His attention towards the outer world. शाम्भवीमुद्रा, षण्मुखीमुद्रा and जीवन्मुक्तिस्वरूप. (166—190) जीवपूजा method. The importance and usefulness of yoga practice. (191—192) Venkatappa nayaka was ruling the kingdom with his two nephews.

VIII KALLOLA.

I Chapter. (4—17) The coronation of Bhadrappa nayaka. His administration. (18—50) The king should decide cases impartially in consultation with learned Brahmins. When he cannot do so in person, one of the Brahmins must be made to preside. Cause of action. How to take statements. Procedure. How to find out the guilty party. How to decide where there is a conflict of authorities. How to decide when witnesses are not available. Land-rights; necessity of written documents. Invalid documents. Theft. (51—65) Treasure troves. Procedure. Debts. When are minor sons or the widow bound to liquidate the debts of the father or husband respectively. (66—74) Certain castes of men are bound to pay the debts of their wives. The inheritor is bound to pay the debts on the property inherited. Order of succession. In joint liability any one of the parties is liable. (75—134) Suits regarding animals, grains, cloths, liquids, etc. Limitation. Interest. Fines. Witnesses; who are exempt from giving evidence. Punishment for giving false evidence. How to balance conflicting evidence. When are documents to be renewed. Ordeals. Oaths. (135—167) Division of property; when the father is living and after his death. Which property is to be included and which not. Ancestral and self-acquired property. Women's share. Shares of children if of the same caste as the parent and if of other caste; disqualifications to inherit. Childless woman's share. स्त्रीधन. (168—268) Boundary disputes. Water disputes. Punishment for using abusive language. Mischief of various kinds. Cruelty to animals. Arrest on suspicion, how such a one is to be dealt with. Death penalty. Punishment for revealing State secrets and offences against State. Disloyalty. Cheating. Punishment to be appropriate to age and caste. Transportation. Cases relating to women.

II Chapter. (2—11) Bhadrappa nayaka sent his army to the east, when some of the chiefs were found to encroach upon his kingdom and defeated them; personally defeated the chiefs of शीर्य (Sira) and returned his principality to him. The Sultan of Bijapur who came to help the Sirya chief also made peace with Bhadrappa nayaka and went back. (12—20) Then in *Tirtharajapura* and *Ramachandrapura*, he made liberal charities, built the agraharas of *Sivaramapura* (in his father's name), *Venkatapura* (in his uncle's name) and Bhadrarajapura (in his own name), gave endowments to the God कृष्ण of Udipi, कुमारस्वामिन् of सुब्रह्मण्य, शङ्करनारायण of कोटेश्वर, his own family Goddess मूकाम्बा at कोल्लूरु and built मठ's for lingayat Gurus. He trained his younger brother Somasekhara nayaka in archery and handed over the administration to him. (21—142) Persons fit to learn archery. Implements of war suited to the four varnas. 7 ways of fighting according to the various implements of war. When to begin the study of archery.

Practising aim. Length of the Bow. Classes thereof: names of the different varieties. Bow-string. Its length. Three kinds of arrows. How to make the arrows unbreakable. Varieties of arrows. Implements in relation to different parts of the body of the enemy. Posture in shooting arrows. Distance between the position of the shooter and the thing shot. (143—180) Tests of expert shooting of various kinds.

III Chapter. The whole of this chapter deals with wrestling (मल्लयुद्ध). Three kinds of wrestlers. Their food. Various kinds of exercises and stratagems in wrestling. Danger spots (आयस्थान). Their various names. Daily conduct of wrestlers. Strength at different ages. Wrestling matches. Presents to combatants.

IV Chapter. (3—16) Cock fighting. Cocks; their colour, form etc. as an index to their capacity. Cocks classified. (17—38) Their food. Various motions as index. Their feathers. When the feathers sprout and when they fall down; what classses win. Other classes of fowls. How to pacify the defeated cock. (39—64) लावक (Redspur fowl); varieties thereof. When they lay their eggs. Their crossing and breeding. Their fighting; judging strength by the size of their head. (65—73) Parrots etc. are intended for pleasure. Their varieties. Royal parrots (राजकीर). Their colours and food. (74—83) Sheep and goats. Detailed information about them. (84—86) Dogs.

V Chapter. Administration of Somasekhara. His charities. Erection of a matha, tank, and public garden. Marriage with Channambika. (14—20) Advice to Channamba by Somasekhara regarding the method of righteous government. (21—99) How to prepare विभूति (sacred ashes) and how to use the same etc.

VI Chapter. (1—32) Varieties of रुद्राक्ष. Its greatness. How to wear it and in what places, and how many and by what people. 1 to 14 faces of the Rudraksa. (33—83) Rosary (जपमाला). Name according to the number of beads contained therein. Merit accruing according to the place of performing *Japa*. The importance and value of Japa. How to prepare a *Japamala* and how to wear it. Merit according to the kind of beads used for the rosary. (84—91) 2 kinds of worship (उपासना). सगुण and निर्गुणपूजा. Nature of सगुणमूर्ति. (92—97) Seat (Asana); seats of various kinds. Their advantages and disadvantages etc.

VII Chapter. The whole of this chapter treats of *Siva puja* and its greatness and importance. Death of Somasekhara nayaka and the adoption and coronation of Basavappa nayaka (compiler of S. T. Ratnakara) etc.

VIII Chapter. (1—7) Channamaji's method of government. Marriage of Basavappa nayaka. (8—28) The Emperor Aurangazib tries to destroy Ramaraja (son of Sivaji) and pursues him. Channamaji shelters him, opposes the Moslem army and drives it away. Hearing this, Aurangazib honours her greatly. She also brings under cortrol the neighbouring minor chieftains. (29—75) Gifts to *Mukambika*. Erection of *Channambapuri* & various temples. Her charities etc. Devotion to Siva. Its greatness. (76—97) Advice to Basavappa nayaka by Channammaji.

IX KALLOLA.

I Chapter. (3--8) *Pindanda* and the nature thereof. The Body of those who perform meritorious acts and that of sinners. Why souls are born as men. (9—25) 4 kinds of life, viz., उद्भिज्ज (vegetable), अण्डज (egg-born), स्वेदज (sweat-born), and जरायुज (womb-born). From seed sprouts अङ्कुर. Its further growth. Use as food. How the five prime *Vayus* in the body distribute the food in the different parts of the body. 12 kinds of excretions (मल); their places. (26—31) How liquids are converted into various kinds of matter, which go to form the body. Semen is created in the body according to the kind of food taken. (32—170) The origin of life in the womb and further details regarding it. पिण्डाण्ड (body) described as a miniature Brahmanda (universe).

II Chapter. Disgust of the world (संसार). Details thereof.

III Chapter. (3—18) 36 prime principles (तत्त्व). The characteristics of a wordly man (संसारिन्). 5 mental and 5 physical organs. Their characteristics. (18—87) Three kinds of अहङ्कारसृष्टि. Creation of the 5 elements. Special characteristics of each element. *Prakrti Tattva.* The various Tattvas and their creation. (88—144) The three ways (मार्ग) viz. वर्ण, पद and मन्त्र. जीवप्रभेद. The nature of बन्ध and the result thereof. Pure and impure ways. The creation from the highest शिव to the lowest पृथिवी. पञ्चीकरण, मायासृष्टि (illusion). The goal of those who are in search of शिवतत्त्व.

IV Chapter. (6—11) 6 kinds of philosophy (दर्शन). Vaisnava philosophy is of 3 kinds viz., वैखानस, पाञ्चरात्र and भागवत. साङ्ख्य is of 2 kinds, gnostic and agnostic. (12—20) Many other sciences required for earning a living. *Vaidika Matas* (paths) are 6. Their authors. Definition of *Laukika* and *Vaidika* and their difference. (21—111) *Mimamsa*, *Vaisesika* and *Nyaya* philosophies briefly explained.

V Chapter. (1—87) *Sankhya*, *yoga* and *vedanta* philosophies explained in brief.

VI Chapter. Non-vedic religions viz., *Jaina*, *Bauddha* and *carvaka*. Their chief characteristics.

VII Chapter. Differences of *Diksha*. Characters of गुरु, शिष्य and ऋत्विक्. Proper time and place for दीक्षा. The method of diksha stated in detail.

VIII Chapter. Method of Diksha continued. Mantapa (hall). What it should be like. Mode of performing *Linga puja*. Greatness of *Guru*. Necessity of outward observances. Instruments of music liked by Siva.

IX Chapter. *Satsthala Jnana* explained.

Genealogy of the author and date of compilation of the work.

श्रीः

श्री केळदी बसवराजविरचित

शिवतत्त्वरत्नाकरान्तर्गत विषयसूचिका.

विचित्रनानाविषयाभिरामे मनोज्ञबन्धेऽत्तमहाप्रबन्धे ।
वेद्यावबोधार्थमहं प्रमेयसंक्षेपमुद्देशमुखेन कुर्वे ॥

ग्रन्थेऽस्मिन्नव कल्लोला श्चित्रार्थरचनाश्रयाः ।
कल्लोलेषु तरंगास्तु नवस्वष्टोत्तरं शतम् ॥ १ ॥
कल्लोले प्रथमे तत्र तरंगास्सप्तसम्मिताः ।
द्वितीयेऽष्टतरंगास्तु तृतीये सप्त सम्मिताः ॥ २ ॥
चतुर्थे द्वादशमिता स्ते पंचदश पंचमे ।
कल्लोले त्वत्र षष्ठे तु तरंगास्सप्तविंशतिः ॥ ३ ॥
सप्तमे पंचदश ते त्वष्टसंख्यास्स्युरष्टमे ।
कल्लोले नवसंख्याकास्तरंगा नवमे स्फुटाः ॥ ४ ॥
इत्थमष्टोत्तरशतं तरंगा इह कीर्त्तिताः ॥
वेदागमान्तर्गतसर्वविद्याः
प्रोक्तास्तु नाम्ना प्रथमे तरंगे ।
उक्ता द्वितीयेऽत्र समासतोऽर्थाः
पूर्वोक्तविद्यासमुपाश्रयास्तु ॥ ॥ ५ ॥
अनादिभक्ताख्यनिरंजनजंगमयोरपि ।
स्वरूपमेतत्सृष्टिश्च तृतीये कथितं द्वयम् ॥ ६ ॥
शून्याख्यनिष्कलमहापदपूर्वलिंग-
रूपं च सृष्टिरपि तज्जनता चतुर्थे ।
स्यात्पंचमे प्रणवनामकलिंगरूपं
प्रोक्तं तदा रचितवर्णकलाभिदाश्च ॥ ७ ॥
नादश्च तत्त्वत्रितयं द्विपंचा-
शन्मूर्तिभेदा अपि षष्ठ उक्ताः ॥
ततो विराडादिकमूर्तितत्त्व-
पंचीक्रियास्सप्तमसंस्थितास्तु ॥ ८ ॥

कालाग्निरुद्रलोकश्च द्वात्रिंशन्नरका अपि ।
कूश्माण्डभुवनं चापि कीर्तितं ज्ञेयमष्टमे ॥ ९ ॥
तरंगे नवमे नानायातनाश्चात्र कीर्तिताः ।
पाशानां दशमे तत्तद्रोगहेतुत्वमीरितम् ॥ १० ॥
एकादशे तु पातालसप्तकं हाटकेशितुः ।
भुवनं चावनितलादधस्थं संप्रकीर्तितम् ॥ ११ ॥
द्वादशे तु सुमेरुस्तद्वलयत्रितयं तथा ।
शिखरत्रितय चान्यत्प्रोक्तं दिविषदाश्रयम् ॥ १२ ॥
त्रयोदशे तु तत्कीलकेसराचलविस्तृतिः ।
जम्बूद्वीपाश्रया उक्ता नवखण्डाश्चतुर्दशे ॥ १३ ॥
ततः पंचदशे प्रोक्ताःसप्तद्वीपास्ससागराः ।
सहिरण्यतमोभूमिगर्भोदकजलाशयाः ॥ १४ ॥
षोडशे कथिता लोका ग्रहमेघसमाश्रयाः ।
भेदा ग्रहाणां तत्रापि प्रोक्ता मेघभिदोद्भवाः ॥ १५ ॥
उक्तं सप्तदशे गर्भोत्पत्तिस्तत्प्रसवादिकम् ।
अष्टादशे गुह्यकानां गन्धर्वाप्सरसां तथा ॥ १६ ॥
विद्याधराणां लोकाश्च खेरथ गतिस्तथा । ॥ १७ ॥
एकोनविंशे कालस्य भेदो ग्रहगतिस्तथा
ध्रुवलोको राशिचक्रभ्रमणं च समीरितम् ।
विंशे तरंगे स्वर्लोकमहर्लोकावुदीरितौ ॥ १८ ॥
एकविंशे ततो ब्रह्मविष्णुलोकौ प्रकीर्तितौ ।
द्वाविंशे स्कंदलोकोमाशिवलोकाः प्रकीर्तिताः ॥ १९ ॥

ततो भरतखण्डान्तः कन्याद्वीपव्यवस्थिताः ।
उक्ता देशास्त्रयोविंशे सर्वतस्समवस्थिताः ॥ २० ॥
चतुर्विंशे प्रदानादिपुण्यनद्यस्तरंगके ।
षडुत्तराश्च पंचाशद्देशाः पुण्यस्थलानि च ॥ २१ ॥
पंचविंशे तु सौरादिमानानि युगसंहतिः ।
चन्द्रसूर्यान्वयोत्पन्नक्षत्रियाणां च संततिः ॥ २२ ॥
षड्विंशे तु चतुर्वर्णवर्णिधर्मप्रपंचनम् ।
सप्तविंशे तरंगे तु गृहस्थाश्रमवर्तिनाम् ॥ २३ ॥
वनस्थानां यतीनां च सदाचाराः प्रकीर्तिताः ।
अष्टाविंशे तु सामान्यधर्मा अत्याश्रमस्तथा ॥ २४ ॥
एकोनत्रिंशके स्थूलसूक्ष्माणां चैव पापिनाम् ।
प्रायश्चित्तं च कृच्छ्राणां लक्ष्म चान्द्रायणस्य च ॥
त्रिंशे नन्दीश्वरस्योक्तं स्वेच्छाविर्भावखेलनम् ।
पट्टाभिषेचनं चैव तदुद्वाहोत्सवस्तथा ॥ २५ ॥
एकत्रिंशे तु बसवेश्वरवृत्तान्त ईरितः ।
द्वात्रिंशे कलिधर्माणां कृतमत्र प्रपंचनम् ॥ २६ ॥
त्रयस्त्रिंशे तथोत्पातभेदास्तच्छान्तयस्तथा ।
चतुस्त्रिंशे नरपतिसिंहासनसमुद्भवः ॥ २७ ॥
पंचत्रिंशे वयस्तम्भः कालवंचनमेव च ।
मृतसंजीवनं चैव पादुकासिद्धिरेव च ॥ २८ ॥
अदृश्यकरणं चैव परकायप्रवेशनम् ।
कुटजाद्रावतिख्याता मणिमन्त्रादिसिद्धयः ॥ २९ ॥
षट्त्रिंशे मल्लनाम्नस्तु संपद्देशेषु वर्णिताः ।
चौडप्पनायके तद्वद्रामेशानुग्रहस्तथा ॥ ३० ॥
सप्तत्रिंशे तथा स्वप्नशुभाशुभफलानि च ।
अष्टत्रिंशे निधेश्चिह्नमंजनं च तदर्थकम् ॥ ३१ ॥
नीतिस्साधारणी चैव तरंगे प्रतिपादिता
एकोनचत्वारिंशे तु सदाशिवमहीपतेः ॥ ३२ ॥
विजयः केरळीयानां मायोपायविधिस्तथा ।
चत्वारिंशे राजगुणाः करादानविधिस्तथा. ॥ ३३ ॥
दुर्गाणां लक्षणं चैव षड्बलानां विवेचनम् ।
अथैकचत्वारिंशे च शक्तीनां त्रितयं तथा ॥ ३४ ॥
संकण्णनायकस्यापि चरित्रं चोपवर्णितम् ।
द्विचत्वारिंशके प्रोक्तं फलं तु शकुनाश्रयम् ॥ ३५ ॥
त्रिचत्वारिंशके प्रोक्ता यात्रा संकण्णभूपतेः ।
खड्गानां जातिनामानि देवता स्तत्फलानि च ॥ ३६ ॥
चतुश्चत्वारिंशके तु प्रतिष्ठा देवताश्रया ।
भूपरीक्षा शिलायाश्च गर्भः प्रासादलक्षणम् ॥ ३७ ॥
लक्षणं देवगेहस्य लिंगमानं च कीर्तितम् ।
पंचचत्वारिंशके तु विधिः पट्टाभिषेचने ॥ ३८ ॥
सन्धिविग्रहयानानि सभेदान्युदितानि तु ।
षट्चत्वारिंशके प्रोक्तमासनं द्वैधमाश्रयः ॥ ३९ ॥
सामदाने भेददण्डावित्युपायास्तु कीर्तिताः ।
सप्तचत्वारिंशके तु स्वरशास्त्रं मुहूर्तगम् ॥ ४० ॥
शिवालिखितशास्त्रं च योगिन्यादिबलं तथा ।
अष्टचत्वारिंशकेऽत्र रचना व्यूहगोचरा
बालानां योधने चापि क्रमः प्रोक्तः परस्परम् ॥
प्रोक्तमेकोनपंचाशे नीतिस्सप्तांगलक्ष्म च ।
पंचाशे पुरनिर्माणवास्तुगेहादिलक्ष्म च ॥ ४० ॥
तरंगे त्वेकपंचाशे नाट्यशालापरिक्रिया ॥
भित्तेरालेपनं चैव चित्रवर्तिविधिस्तथा ॥ ४१ ॥
दशतालादिभेदश्च मूर्तिसूत्रभिदा अपि ।
द्विपंचाशे तु भरतनाट्यसाधनविस्तरः ॥ ४२ ॥
त्रिपंचाशे तु शीर्षभ्रूदृष्टितारापुटक्रियाः ।
नासाहनुक्रिया श्चोष्ठकन्धरासंश्रयाः क्रियाः ॥ ४३ ॥
चतुःपंचाशके हस्तकर्म हस्तक्रिया तथा ।
प्रचारो हस्तयोश्चापि संयुतायुतभेदयोः ॥ ४३ ॥
उक्ताश्च पंचपंचाशे वक्षःपार्श्वोदरक्रियाः ।
ऊरुपादक्रियाश्चैव चारीस्थानकमण्डलम् ॥ ४४ ॥
षट्पंचाशे तु नादादिनवकं गमकावधि ।
सप्तपंचाशके जातिमुख्यांगनवकं तथा ॥ ४५ ॥
ततष्षष्टितमे तेषां चिकित्सावर्धनं तथा ।
विचित्रकरणं चैव ततः पवनखेलनम् ॥ ४६ ॥
निष्पत्तिश्चततोऽन्येषां दशधा दोहनं तथा ।
एकषष्टितमे कामशास्त्रे वामदृशां तथा ॥ ४७ ॥
जातिःस्वभावश्च गुणा देशधर्माश्च कीर्तिताः ।
यद्द्विषष्टितमे बाह्यरतं करणभेदनम् । ॥ ४८ ॥

वशीक्रिया च वक्षोजयोनिसंस्कार एव च ।।
यौवनस्थैर्ययोगश्च वेंकटक्ष्मापवर्तनम् ॥ ४९ ॥
यत्त्रिषष्टितमे त्वत्र भवनस्नानयोस्तथा ।
पादुकालेपयोश्चैवमुपभोगा श्चतुर्विधाः ॥ ५० ॥
चतुष्षष्टितमे गन्धद्रव्याणां प्रतियोजनम् ।
पंचषष्टितमे वस्त्रभूषामाल्योपभुक्तयः ॥ ५१ ॥
तथैव षट्षष्टितमे रत्नानामुद्भवाकराः ।
आकारे तारतम्यं च तथा रत्नाश्रया गुणाः ॥ ५२ ॥
दोषाश्च तद्गतास्तेषां फलान्येषां परीक्षणम् ।
सप्तषष्टितमे सूपशास्त्रे पाकोऽन्नगोचरः ॥ ५३ ॥
तथा सूपस्य शाकस्य पाकस्तेमनयूषयोः ।
अष्टषष्टितमे प्रोक्तं भक्ष्यलेह्योपदंशकम् ॥ ५४ ॥
एकोनसप्ततितमे भोज्ये विषपरीक्षणम् ।
पादाभ्यंगश्च तांबूलशय्याधूपोपभुक्तयः ॥ ५५ ॥
शयनं च प्रबोधश्च प्रातर्मंगलवीक्षणम् ।
तरंगे सप्ततितमे आयुर्वेदप्रपंचनम् ॥ ५६ ॥
सूत्रं शारीरमादानं निदानं च चिकित्सनम् ।
अथैकसप्ततितमे तत्तद्द्रव्याश्रया गुणाः ॥ ५७ ॥
रसमात्राः पूर्णचन्द्रोदयप्रभृतयस्तथा ।
द्विसप्ततितमे प्रोक्तं रसस्योत्पत्तिवैभवम् ॥ ५८ ॥
तत्संग्रहप्रकारश्च तत्तद्द्रव्यगुणागुणाः ।
महारसोपरसयोश्शक्तिस्साधारणाख्ययोः ॥ ५९ ॥
उत्पत्तिश्च स्वरूपं च तेषां सामर्थ्यमेव च ।
त्रिसप्ततितमे प्रोक्ताः सूतेऽष्टादश संस्क्रियाः ॥ ६० ॥
तच्चतुस्सप्ततितमे शाला सूतक्रियोचिता ।
पुटयन्त्रविभेदाश्च मूषाद्यं करणं तथा ॥ ६१ ॥
यत्पंचसप्ततितमे गारुडे सर्पसंभवः ।
सर्पाणां जातिभेदाश्च तेषां दंशभिदा अपि ॥ ६२ ॥
कारणान्यपि तद्दंशे विषव्याप्तिश्च धातुषु ।
दूतचेष्टाविशेषैश्च जीवनाजीवनिर्णयः ॥ ६३ ॥
षट्सप्ततितमे मन्त्रागदं द्रव्यागदं तथा ।
वीरभद्रमहीपालचरित्रं चात्र वर्णितम् ॥ ६४ ॥
यत्सप्तसप्ततितमे लक्ष्म सिंहासनाश्रयम् ।
आस्थाने चामरादीनामुपभोगश्च वर्णितः ॥ ६५ ॥
ततोऽष्टसप्ततितमे इन्द्रजालक्रियाविधिः ।
स्तम्भः खड्गस्य चाग्नेश्च जलस्य च समीरितः ॥ ६६ ॥
एकोनिताशीतितमे विभेदाः काव्यगोचराः ।
ततो वर्णगणच्छन्दःषट्प्रत्ययविचारणा ॥ ६७ ॥
ततः कवीनां भेदाश्च भेदाश्शब्दार्थगा अपि ।
शृंगाराद्या नवरसा रत्याद्याः स्थायिनस्तथा ॥ ६८ ॥
विभावा अनुभावाश्च सात्विकाश्चारिणस्तथा ।
अथाशीतितमे प्रोक्ता नेतृनायकयोर्गुणाः ॥ ६९ ॥
रीतिर्वृत्तिश्च शय्या च गुणा दोषाश्च काव्यगाः ।
एकाशीतितमे प्रोक्तं लक्ष्मालंकारगोचरम् ॥ ७० ॥
यद्द्व्यशीतितमे प्रोक्तं लक्ष्मरूपकसंश्रयम् ।
यत्त्र्यशीतितमे पुत्रभोगे वर्णार्थसंग्रहः ॥ ७१ ॥
गर्भाधानं पुंसवनं सीमन्तोन्ननादि च ।
जातक्रिया नामकर्म तथान्नप्राशनं परम् ॥ ७२ ॥
चूडाकर्म कलारम्भोपनयोपयमास्तथा ।
चतुरभ्यधिकाशीतितमे होराख्यशास्त्रकम् ॥ ७३ ॥
पंचाशीतितमे पुंसां लक्ष्माष्टांगसमाश्रयः ।
षडशीतितमे त्वत्र गजाश्वारोहणक्रमः
सप्ताशीतितमेत्वत्र गजोत्पत्तिभुवस्तथा ॥ ७४ ॥
तेषां मानानि जातीनां भेदाः प्रकृतयस्तथा ।
अंशसंभूतिरेषां च दण्डस्यापि च कल्पना ॥ ७५ ॥
अष्टाशीतितमेऽश्वानां जन्म लक्ष्मांगसंश्रयम् ।
आवर्ता गन्धवर्णाश्च स्वरप्रकृतयस्तथा ॥ ७६ ॥
तेषामायुःपरिज्ञानं तच्चेष्टाश्च शुभाशुभाः ।
ततस्त्वेकोननवतितमेऽश्वानां पृथक्पृथक् ॥ ७७ ॥
चतुरुत्तरपंचाशद्देशसंभूतिलक्षणम् ।
अश्वानां शिक्षणं चैव तेषां गतिभिदा अपि
रथगोरक्षतच्चेष्टा तत्फलं गोचिकित्सनम् ।
शिवभूपस्य नवतितमे वृत्तं जयाश्रयम् ॥ ७९ ॥
कोटाचक्रविधिश्चैव दुर्गसाधनकर्म च ।
तथा षोडशदानानि कोटिदीपस्य वैभवम् ॥ ८० ॥
तरंगेत्वेकनवतितमे योगो यमस्तथा ।
नियमश्चासनं प्राणायामप्रत्याहृती यथा ॥ ८१ ॥

ध्यानं धृतिस्समाधिश्चेत्यष्टांगान्युदितानि हि ।
तरंगे तु द्विनवतितमे लेखादिरूपकम् ॥ ८२ ॥
पदं च व्यवहाराणां धर्मनिर्णयसाधनम् ।
अनन्तरं त्रिनवतितमे भद्रमहीपतेः ॥ ८३ ॥
चरितं चापचक्रादि लक्ष्मतद्विश्रमक्रमः ।
चतुष्टयाधिनवतितमे मल्लविनोदनम् ॥ ८४ ॥
तद्भेदास्तच्छ्रमस्तेषां पोषणं तज्जयस्तथा ।
तरंगे पंचनवतितमे कुक्कुटलावयोः ॥ ८५ ॥
जातिभेदाः पोषणं च योधनं च तयोर्मिथः ।
शुकच्छागाश्रयं लक्ष्म लक्ष्मचापि शुनां तथा ॥ ८६ ॥
ततः परं षण्णवतितमे प्रोक्तं तरंगके ।
सोमशेखरभूपस्य चरित्रमतिचित्रकृत् ॥ ८७ ॥
विभूतिसंग्रहे चैव विधानमुपवर्णितम् ।
ततश्च सप्तनवतितमे रुद्राक्षवैभवम् ॥ ८८ ॥
तद्धारणक्रमस्तस्मिन् तत्फलं दैवतान्यपि ।
तथैव जपमालाया मणिसंख्या जपक्रमः ॥ ८९ ॥
ततः परेऽष्टनवतितमे लिंगार्चनक्रमः ।
तथैव चैकोनशततमे चन्नाम्बिकाश्रयम् ॥ ९० ॥
चरितं चैव महिमा तद्दानोत्कर्ष एव च ।
ततश्शततमे चैव तरंगे वर्ण्यसंग्रहः ॥ ९१ ॥
पाकश्शुक्लतयान्नस्य रतेर्भावाश्रयं फलम् ।
गन्धवर्णफलं शुक्ले बिन्दुसंख्याफलं तथा ॥ ९२ ॥
योगकाला गृहीते तु गर्भे तत्काललक्षणम् ।
स्त्रीपुंगर्भाववोधश्च गर्भिण्या त्याज्यकर्म च ॥ ९३ ॥
अस्थिरोममितिः पिण्डे धातूनामपि सम्मितिः ।
षड्भावसंभवश्चैव देहे चक्रस्थितिस्तथा ॥ ९४ ॥
ततस्त्वेकोत्तरशततमे संसारहेयता ।
तरंगे द्युत्तरशततमे तत्रव्यवस्थितिः ॥ ९५ ॥
प्रमेयं त्र्युत्तरशततमे मीमांसकाश्रयम् ।
काणादन्यायशास्त्रीयप्रमेयं च प्रकीर्तितम् ॥ ९६ ॥
चतुश्शततमे सांख्ययोगवेदान्तसंश्रयः ।
ततः पंचोत्तरशततमे चार्वाकबुद्धयोः ॥ ९७ ॥
जैनस्य च मतं तेषां प्राप्यस्थानानि च क्रमात् ।
तथा षडुत्तरशततमे दीक्षाश्रयाभिधाः ॥ ९८ ॥
गुरुशिष्यर्त्विजां लक्ष्म देशकालौ च तत्कृते ।
ततस्सप्तोत्तरशततमे मण्डपलक्षणम् ॥ ९९ ॥
तथा दीक्षाविधानं च लिंगस्य च समर्पणम् ।
तरंगेऽष्टोत्तरशततमे लिंगार्चनक्रमः ॥ १०० ॥
विहितो वीरशैवानां षट्स्थलोद्बोध एव च ।
एवमष्टोत्तरशततरंगेष्वर्थसंग्रहः ॥
ग्रन्थेऽस्मिन् पद्यसंख्या तु सहस्राणि त्रयोदश ॥ १०१ ॥

इति विषयसूचिका

श्रीः

श्रीशिवतत्वरत्नाकरे

प्रथमः कल्लोलः

पार्वतीफणिबालेन्दु भस्ममन्दाकिनीयुता
पवर्गरचितामूर्तिरपवर्गप्रदायिनी ॥

अथ प्रथमस्तरंग.

श्रियै नश्शिवलिंगं स्यात्सर्वादि गुरु निर्मलम्
अन्तर्याम्यखिलाधारं सच्चिदानन्दविग्रहम् ॥ १ ॥
भुजंगकलितस्रजं वरमतंगजत्वग्युजं
कपर्दधृतचन्द्रकं पदकमार्गकोपेन्द्रकम् ।
स्फुरद्विधिकपालकं ज्वलननेत्रयुक्फालकं
गलप्रकटमेचकं शिवमुपास्महे मोचकम् ॥ २ ॥
त्रिलोकपरिरक्षिणी खलसमूलसंशिक्षिणी
श्रिताभिमतपूरिणी श्रुतिशिरोऽन्तसञ्चारिणी ।
जगत्प्रलयसाक्षिणी करुणगर्भितावेक्षिणी
शिवस्य चरणाम्बुजे प्रियतमाऽवतान्नोस्य हि ॥ ३ ॥
यद्रूपमास्थाय शिलादनाम्ने तपोधनाय प्रससाद शंभुः ।
यस्यानुगाश्च प्रमथास्समस्ताः वन्दामहे नान्दिनामिन्दुगौरम् ॥

दक्षाध्वरध्वंसनदक्षशक्तिः
श्रुतेष्टविश्राणनसानुरक्तिः ।
करान्तरान्दोलितचन्द्रहासः
स वीरभद्रोऽस्तु मुदे सहासः ॥ ५ ॥

जातस्तत्पुरुषाह्वयाद्वदनतो यो रेवणस्सिद्धराट्
किंचाघोरमुखाच्चयोमरुळुसिद्धेशः प्रसिद्धोऽभवत् ।
जज्ञे कामदवामदेववदनाद्यः [1]पण्डिताचार्यकः
सद्योजातमुखोदितोऽप्यवतु मां यश्चैकरामो गुरुः ॥ ६ ॥
आसीदुज्जयिनीपति र्मरुळुसिद्धेशो गुरुः प्रस्फुर-
त्पादेशोऽथ वसन्तदेवमहितश्रीमाह्लिकाद्यर्जुनौ ।
वीरश्चेन्नपरस्ततो गुरुपदस्वामी वसन्तस्तत-
स्तस्मादुन्नतचेन्नवीरविभुरित्याचार्यपारम्परी ॥ ७ ॥
यत्कर्णतालप्रसरत्समीरवरांकुराभ्यवहारतृप्ताः ।
भूषाभुजंगा विलसन्ति यस्य सोऽयं दिशेद्विघ्नशमं गजास्यः ॥
शुभगुणनिकुरुम्बामिन्दुजिद्वक्त्रबिम्बां
पुलिनजयिनितम्बां पल्लवाभौष्ठबिम्बाम् ।
कृतनमदवलम्बां दत्तसारोक्तिगुम्भां
करसदमृतकुम्भां नौम्यहं शारदाम्बाम् ॥ ९ ॥
गुणैरशेषै रवधूतदोषै-
रवाप्तपोषैर्जनदत्ततोषैः ।
या वासभूमिः परिचीयते स्म
तां चेन्नमाम्बां जननीं नतोऽस्मि ॥ १० ॥
सोमशेखरपदं स्फुटमुद्यत्
सर्वमंगलतयाऽजनि यस्मिन् ।
काममाश्रितजनाय दिशन्तं
कल्पसालमिव तं प्रणतोऽस्मि ॥ ११ ॥
नीतिं नीतिपरा विलोक्य सुकलाभेदान्विनोदार्थिनः
तन्त्राण्यत्र च तान्त्रिकास्सुमहिता[1]न्भोगांश्च[2]भोगेप्सवः ।
मोक्षं वाऽपि मुमुक्षवो बत जना जानन्त्विति प्रेक्षया
ग्रन्थस्सोऽयमुदाररीतिरधुना निर्मातुमारभ्यते ॥ १२ ॥
[3]व्यत्यासयोजित पदाऽप्यपरिस्फुटाऽपि
संभिन्नवर्णरचनाऽप्युदितार्थिताऽपि ।

---

[1]पूजिता

[1] and [2] यो. [3] वृत्या.

एषा कृतिर्मधुरबालकगीरिवार्यैः
नेया विमृश्य विबुधैरनवद्यभावम् ॥ १३ ॥
निजफणितिविशेषैस्तोषयन्तोऽपि लोकान्
न वचनरचनायां सादराः किं परेषाम् ।
स्वफलसलिलपूरैः प्रीणयन्सन्नपीक्षोः[1]
न भवति जलसेके किन्वसौ केरवृक्षः ॥ १४ ॥
आख्यान्तु दूषणलवानिह केऽपि लोकाः
किं तावताऽस्य विदितास्सुगुणा गळन्ति ।
चन्द्रः कलंकित इतीह गिरा तदीया
निश्शेषलोकपरितोषकता व्यपैति ॥ १५ ॥
कामं वसन्त्विह परश्शतदूषणानि
सन्तस्तथापि सुगुणान्परमाद्रियन्ते ।
ग्राहादिघातुकदुरासदसत्त्वपूर्णं
रत्नाकरं जगति वार्धिमुदाहरन्ति ॥ १६ ॥
दोषालोकमुहुस्समाहितदृशः प्रायः परेषां कृतौ
दृष्ट्वा तद्गुणजातमन्तरधिकं सन्तापमाविभ्रतः ।
निन्दान्यद्य किमु स्तवानि किमिति प्रव्यक्तचिन्ताद्वयी
सन्धिप्रस्फुटदौस्थ्यदूनहृदया ये सन्ति तेभ्यो नमः ॥ १७ ॥
लोकानां तु हिताय सारकेलदीसिंहासनाधीश्वरो
गौरीनाथकृपार्जिताखिलकलापाण्डित्यविभ्राजितः ।
कुर्वेऽहं वसवेन्द्रभूमिरमणो रत्नाकराख्यां कृतिं
सर्वं प्रेक्ष्य च वाक्प्रपञ्चमसकृत्पुत्र! त्वमाकर्णय ॥ १८ ॥
सर्वज्ञसर्वविनियामकविश्वभर्तृ
भास्वन्महेश्वरसमन्वितशक्तिजातम् ।
जानीहि वर्णपदमन्त्रमयं च नाम
रूपं जगद्भुवनतत्त्वकलास्वरूपम् ॥ १९ ॥
नानाभूपाललीलाजयसमुपनतानेकलोकप्रतीत-
प्रौढस्तोत्रैकपात्रं विरुदचयमतीवोन्नतं त्वं बिभर्षि ।
श्रीमद्राजाधिराज! स्फुरदखिलकलासारवेदिन्निदानीं
स्वामिन्! प्रख्यातकीर्ते! नृपकुलतिलक! श्रोतुमिच्छामि शंस
वस्तुजातं चक्षुरादि बहिरिंद्रियगोचरम् ।
यदस्ति तत्समस्तं च कस्माज्जातं कियद्विधम् ॥ २१ ॥

[1] सन्व्यपेक्षो.

किम्प्रमाणं च किंरूपमेतन्मह्यं निरूपय ।
श्रीसोमशेखर! कुमार! कुमारभावं
सौन्दर्यसन्मतिमुखैस्सुगुणैर्बिभर्षि ।
कोऽप्येष शंकरकृपाकलितात्प्रभावा-
दास्ते विवेकविभव स्तव मञ्जुलोऽयम् ॥ २२ ॥
सम्यक् पृष्टं त्वया पुत्र! बुद्धिस्ते सूक्ष्मदर्शिनी ।
या पुनर्दुर्विबोधेऽस्मिन्विषये संप्रवर्तते ॥ २३ ॥
आकर्णयोत्तरं तस्य यज्ज्ञातुमभिकांक्षसे ॥ २४ ॥
विद्यास्समस्तास्समवेक्ष्य भूयः
[1]संगृह्य चार्थानिह पद्यरूपैः ।
वचोनिगुम्भै शिवतत्त्वरत्ना-
कराभिधानां कृतिमारचय्य ॥ २५ ॥
स्वामिन्! दृष्ट्वाखिला विद्याः कृतिरेषा वितन्यते ।
इत्युदीरितमेतर्हि ता विद्याः का वदस्व मे ॥ २६ ॥
समाकर्णय यत्पृष्टं तद्ब्रवीमि कुमार ते ।
अष्टादश महाविद्याः प्रथमं परिकीर्तिताः ॥ २७ ॥

अष्टादश महाविद्याः

अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥ २८ ॥
आयुर्वेदो धनुर्वेदो गान्धर्वं चार्थशास्त्रकम् ।
उपवेदास्ततः[2] प्रोक्ताश्चत्वारस्तदनन्तरम् ॥ २९ ॥
अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम् ।
आदिकर्ता कविःसाक्षाच्छूलपाणिरिति श्रुतिः ॥ ३० ॥

वेदाः

ऋग्यजुस्साम चाथर्वेत्ये[3]तद्वेदचतुष्टयम् ।
अथोपनिषदो वेदशिरस्त्वेनाभिसम्मताः ॥ ३१ ॥

उपनिषदः

श्रीरुद्रबृहदारण्य श्वेताश्वतरमुण्डकाः ।
कैवल्यकालाग्निरुद्रौ कठवल्ली च बाष्कलः ॥ ३२ ॥
हंसः परमहंसश्च ब्रह्मनारायणावपि ।
कात्यायनो ब्रह्मबिन्दुरारुण्यमृताबिन्दुकाः ॥ ३३ ॥
पञ्चब्रह्म च जाबालस्तेजोबिन्दुश्च मुद्गलः ।
बोधायनीयचर्चीचश्रवणं च पराक्रमः ॥ ३४ ॥

[1] संमृश्य. [2] इमे. [3] त्यपि.

प्राच्यश्च शौनकीयं च शिवसंकल्पमेव च ।
आसुरायणमैत्रायणीयवाजसनेयकम् ॥ ३५ ॥
सांख्यायनीयमित्याद्या स्तथोपनिषदः स्मृताः ।

वेदांगानि.

वेदांगानि षडेतानि शिक्षा व्याकरणं तथा ॥ ३६ ॥
निरुक्तं ज्योतिषं कल्पदछन्दोवि[1]स्तृति रित्यपि ।

उपांगानि.

मीमांसा न्यायशास्त्रं च पुराणं स्मृतिरेव च ॥ ३७ ॥
चत्वार्येतान्युपांगानि बहिरंगानि षट् तथा ।
आयुर्वेदोऽर्थवेदश्च धनुर्वेद स्तथैव च ॥ ३८ ॥
गान्धर्ववेद इत्येवमुपवेदाश्चतुर्विधाः ।

मींमासा न्याये स्मृतिकर्तारश्च.

मीमांसा द्विविधा प्रोक्ता पूर्वोत्तरविभेदतः ॥ ३९ ॥
तर्कोऽपिद्विविधो न्यायः काणादश्चेति सम्मतः ।
प्रधानस्मृतयश्चाष्टादशोपस्मृतयस्तथा ॥ ४० ॥
ऐते तासां प्रणेतारो वेदमार्गानुसारतः ।
मनुर्बृहस्पतिर्दक्षो गौतमोऽथयमोऽगिंराः ॥ ४१ ॥
योगीश्वरः प्रचेताश्च शातातपपराशरौ ।
संवर्तोशनसौ शंखलिखितावत्रिरेव च ॥ ४२ ॥
विष्णवापस्तम्बहारीता धर्मशास्त्रप्रवर्तकाः ।
एते ह्यष्टदश प्रोक्ता मुनयो नियतव्रताः ॥ ४३ ॥
अष्टादशापि स्मृतयस्तन्नामपरिचिह्निताः ।

उपस्मृतिकर्तारः

जाबालिर्नाचिकेतश्च स्कन्दो लौगाक्षिकश्यपौ ॥ ४४ ॥
व्यासस्सनत्कुमारश्च शन्तनुर्जनकस्तथा ।
ऋतुः कात्यायनश्चैव जातुकर्ण्यः कपिञ्जलः ॥ ४५ ॥
बोधायनश्च काणादो विश्वामित्रस्तथैव च ।
पैठीनसिर्गोबिलश्चेत्युपस्मृतिविधायकाः ॥ ४६ ॥
अष्टादशोपस्मृतयः कर्तृनामभिरंकिताः ।
अष्टादश पुराणानि तेषां नामानि [2]संश्रुणु ॥ ४७ ॥

1) चिति. 2) च्च.

अष्टादश पुराणानि.

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
षष्ठं तु नारदीयं च मार्कण्डेयं तु सप्तमम् ॥ ४८ ॥
आग्नेयमष्टमं चैव भविष्यन्नवमं स्मृतम् ।
दशमं ब्रह्मकैवर्तं लैंगमेकादशं स्मृतम् ॥ ४९ ॥
वाराहं द्वादशं चैव स्कान्दं चैव त्रयोदशम् ।
चतुर्दशं वामनं च कौर्मं पञ्चदशं स्मृतम् ॥ ५० ॥
मात्स्यं च गारुडं चैव ब्रह्माण्डं च ततः परम् ।
अष्टादश पुराणानि ह्युपपूर्वाण्यनन्तरम् ॥ ५१ ॥

उपपुराणानि.

आद्यं सनत्कुमारोक्तं नारसिंहं ततःपरम् ।
स्कान्दसंज्ञं कुमारेण कथितं तदनन्तरम् । ॥ ५२ ॥
चतुर्थं शिवधर्माख्यं पुराणं नन्दिनेरितम् ।
तथा दुर्वास[1]सा प्रोक्तं नारदीयं ततःपरम् ॥ ५३ ॥
कापिलं मानवं चैव तथैवोशनसेरितम् ।
ब्रह्माण्डं च ततः पुण्यं वारुणाख्यं ततःपरम् ॥ ५४ ॥
ततः कालीपुराणाख्यं कालकण्ठं च नामतः ।
ततो वासिष्ठलैंगाख्यं नाम्ना माहेश्वरं च तत् ॥ ५५ ॥
ततः साम्बपुराणाख्यं सुसूक्ष्ममितिचेरितम् ।
पाराशरं च मारीचं भार्गवाख्यं ततःपरम् ॥ ५६ ॥
सर्वाण्युपपुराणानि ब्रह्मज्ञान[1]कराणि वै ।
यदार्थानुगताएवं विद्याह्यष्टादशेरिताः ॥ ५७ ॥

आगमाः

अथागमानामुद्देशः शिवोक्तानां वितन्यते ।
त्रिपदार्थं चतुष्पादं प्राह तन्त्रं जगत्पतिः ॥ ५८ ॥
सूत्रेणैकेन संग्रह्य प्राह विस्तरतः प्रभुः ।
कामिकादिप्रभेदेन तद्भिन्नं बहुधैवहि ॥ ५९ ॥
कामिकाद्या वातुलान्ताश्शिवेनोक्ताश्शिवागमाः ।
सिद्धान्ता इति विज्ञेया उपभेदसमन्विताः ॥ ६० ॥
कामिकं योगजं चिन्त्यं कारणंत्वजितं तथा ।
दीप्तं सूक्ष्मं सहस्रं च ह्यंशुमत्सुप्रभेदकम् ॥ ६१ ॥

1) प.

विजयं चैव विश्वासं स्वायंभुवमथानलम् ।
वीरं च रौरवं चैव भाकुट्टं विमलं तथा ॥ ६२ ॥
चन्द्रज्ञानं च बिम्बं च प्रोद्गीतं ललितं तथा ।
सिद्धं संतानशर्वोक्तं पारमेश्वरमेव च ॥ ६३ ॥
किरणं वातुलं त्वेता अष्टाविंशतिसंहिताः ।
एवमन्यानि तन्त्राणि शिवप्रोक्तान्यनेकशः ॥ ६४ ॥
महामाया शंबरं च योगिनीजालशम्बरम् ।
तत्वशंबरकं चैव भैरवाष्टकमेव च ॥ ६५ ॥
बहुरूपाष्टकं चैव यामलाष्टकमेवच ।
चन्द्रज्ञानं वासुकिं च महासम्मोहनं तथा ॥ ६६ ॥
महोच्छिष्टं महादेवं वातुलं वातुलोत्तरम् ।
हृद्भेदं मातृभेदं च गुह्यतन्त्रं च कामिकम् ॥ ६७ ॥
कलापादं कलासारं तथान्यत्कुब्जिकामतम् ।
मायोत्तरं च वीणाख्यं त्रोतलं त्रोतलोत्तरम् ॥ ६८ ॥
पञ्चामृतं रूपभेदं भूतोड्डामरमेव च ।
कुलासारं कुलोड्डीशं कुलचूडामणिं तथा ॥ ६९ ॥
सर्वज्ञानोत्तमं चैव महाशिवमतं तथा ।
महालक्ष्मीमतं चैव सिद्धयोगीश्वरीमतम् ॥ ७० ॥
कुरूपिकामतं चैव रूपिकामतमुत्तमम् ।
सर्ववीरमतं चैव विमलामतमुत्तमम् ॥ ७१ ॥
पूर्वपश्चिमदाक्षिण्यमुत्तरं च निरुत्तरम् ।
तन्त्रं वैशेषिकं ज्ञानं वीरयोगं तथापरम् ॥ ७२ ॥
आरुणेशं मोहनेशं विशुद्धेश्वरमेव च ।
एवमेतानि तन्त्राणि तथान्यान्यपि कोटिशः ॥ ७३ ॥
[1]भवेनोक्तानि देवेश! सर्वज्ञानकराणि वै ।
वैखानसं पाञ्चरात्रं तथा भागवताभिधम् ॥ ७४ ॥
वैष्णवं दर्शनं त्रेधा तत्तन्त्रज्ञै रुदीरितम् ।
खिलं खिलाधिकारं च पूर्वतन्त्रं तथोत्तरम् ॥ ७५ ॥
वासाधिकरणं ज्ञेयं तथा चित्राधिकारणम् ।
प्रतिग्रहाधिकारे च मुन्युक्तास्त्वष्टसंहिताः ॥ ७६ ॥
प्रथमं चोत्तरं तन्त्रं विष्णुतन्त्रमतः परम् ।
आत्रेयं तु ततःप्रोक्त मिति तन्त्रचतुष्टयम् ॥

[1]भवतो

सन्तानं काश्यपीयं च तर्को ज्ञानं जयस्तथा ।
वीरसंज्ञानसानन्दा विजया विजिता तथा ॥
सत्यमांगीरसं चैव पञ्चकाण्डं तथापरम् ।
एवमाद्यास्तु बहुधा सन्ति वैष्णवसंहिताः ।
तन्त्राण्यथ चतुष्षष्टिसंख्याकान्यधुना ब्रुवे ॥
नानाप्रयोगकारीणि महाश्चर्यकराणि च ॥ ७७ ॥
चतुष्षष्टिकलाविद्यामूलभूतान्यमूनि हि ।
अव्याजपालिनीतन्त्रं राज्यलक्ष्मीप्रसादकम् ॥ ७८ ॥
सर्वसाम्राज्यतन्त्रं च द्वितीयं परिकीर्तितम् ।
अंगारगमनातन्त्रं राज्योपांगेशि तन्त्रकम् ॥ ७९ ॥
श्रीबालराजतन्त्रं च चामरद्वंन्द्वतन्त्रकम् ।
प्रहर्षराजतन्त्वं च धीरतन्त्वं तथैवच ॥ ८० ॥
ग्रामपालनतन्त्वं च जीविनीतन्त्रमेवच ।
मित्रलक्ष्मीप्रयोगंच दुर्गपालनतन्त्रकम् ॥ ८१ ॥
प्राणलक्ष्मीप्रयोगंच प्र[1]थालक्ष्मीप्रयोगकम् ।
तोयलक्ष्मीप्रयोगंच गन्धलक्ष्मीप्रयोगकम् ॥ ८२ ॥
पुष्पलक्ष्मीप्रयोगंच कामरूपाख्यतन्त्रकम् ।
कला[2]जीवनिकातन्त्रं कुञ्जकंबलतन्त्रकम् ॥ ८३ ॥
कनकाख्यप्रयोगंच बोधिनीतन्त्रमेवच ।
सत्यलक्ष्मीप्रयोगंच पादुकातन्त्रमेवच ॥ ८४ ॥
प्राज्ञलक्ष्मप्रियोगंच खेटकं तु तथैवच ।
चापतन्त्रं लेपतन्त्वं शल्यतन्त्रं तथैवच ॥ ८५ ॥
भीमलक्ष्मीप्रयोगंच मणिस्थानप्रयोगकम् ।
पातालगमनं तन्त्रं मर्दिनीतन्त्रमेवच ॥ ८६ ॥
स्फुलिंगलक्ष्मीतन्त्वंच शंखमर्दलतन्त्रकम् ।
चक्रायुधं प्रयोगंच भैरवादिप्रयोगकम् ॥ ८७ ॥
गजवाजिमहातन्त्रं तथागोरक्षतन्त्रकम् ।
सूपतन्त्वं लेखतन्त्वं पृथिवीतन्त्रमेवच ॥ ८८ ॥
ऐश्वर्यलक्ष्मीतन्त्रंच शुल्कतन्त्रं तथैवच
मिश्रलक्ष्मीप्रयोगंच जीविनीतन्त्रमेवच । ॥ ८९ ॥
गिरितन्त्रं वन्यतन्त्वं स्थानापत्यप्रयोगकम् ॥
श्रीसर्वदर्शी[3]नीतन्त्रं विघ्नविच्छेदतन्त्रकम् । ॥ ९० ॥
लसद्धारततंत्रंच श्रृंगवाद्यप्रयोगकम् ॥ ९१ ॥

[1] भा. [2] ज. [3] ण्डि.

नरवाहनतन्त्रं च स्ताम्भिनीतन्त्रमेव च ।
दाहिनीमारिणीतन्त्रं द्वेषिणीतन्त्रमेव च ॥ ९२ ॥

आकर्षणोच्चाटनं च [1]तोषिणीतन्त्रमेवच ।
श्रीसर्वदाण्डिनीतन्त्रं मन्त्रयन्त्राखिलात्मकम् ॥ ९३ ॥

स्मृतमात्रेण सिध्यन्ति राज्यलक्ष्मीप्रसादतः ।
आख्यातानि चतुःषष्टितन्त्राण्येवं तु नामतः ॥ ९४ ॥

एवं नामानि विद्यानामाख्यातानि यथाक्रमम् ।
वेदागमानुसारेण प्रवृत्तानामनेकधा ॥ ९५ ॥

[1] शो.

इति
श्रीमदनाद्यनन्त सकलतत्त्वोत्तीर्ण षड[1]र्थोपादान
बिन्दुकारण चिदम्बर शक्तिसमन्वित परमेश्वर
प्रसादासादित शिवाद्वैतविद्या विशारद
श्रीमत्केळदिबसवराजेन्द्र
विरचित वेदागमान्तर्गत विविधविद्या
तन्त्रसारभूत *शिवतत्त्वरत्नाकरे*
प्रथमकल्लोले *सकलविद्योद्देशो*
नाम प्रथमस्तरंगः

[1] ध्वो.

श्रीः

श्रीशिवतत्त्वरत्नाकरे

द्वितीयस्तरंगः

नानाविधानां विद्यानां नामसंश्रवणे गुरो! ।
तत्स्वरूपावगमने वर्तते मेऽधिका स्पृहा ॥ १ ॥
तासां स्वरूपमाख्याहि विद्यानां बहुवर्त्मनाम् ।
शृणु पुत्र! ब्रवीम्येतत् तव प्रश्नो यदर्थकः ॥ २ ॥
ऋग्वेदो रुरुवर्णश्च कुञ्चितश्मश्रुकेशवान् ।
विभक्तकण्ठः पद्माक्षो द्यरत्निमितविग्रहः ॥ ३ ॥
ऋग्वेदस्यास्य भेदास्तु सप्तधा परिकीर्तिताः ।
यजुर्वेदः कृशःस्थूलः ताम्रवर्णः कपालभृत् ॥ ४ ॥
श्वेतवर्णः काञ्चनाक्षः पञ्चारत्निप्रमाणकः ।
भेदाष्षडुत्तराशीतिसंख्या स्तस्य प्रकीर्तिताः ॥ ५ ॥

1 धृक्.

सामवेदश्शुचिः क्षौमी शुचिवासाश्चदण्डधृत् ।
नित्यस्रग्वी चर्मवांश्च षडरत्निप्रमाणकः ॥ ६ ॥

आदित्यवर्णो भेदास्तुसहस्रं तस्य कीर्तिताः ।
अथर्वणाख्यो वेदस्तु कृष्णवर्णसमन्वितः ॥ ७ ॥

कामरूपः क्षुद्रकर्मा स्वदारपरितोषितः ।
परदाररतस्तस्य नवभेदाः प्रकीर्तिताः ॥ ८ ॥

विध्यर्थवादसन्मन्त्रनामधेयाविभेदतः ।
सर्वेषामेव वर्णानां वेदा एव विबोधकाः ॥ ९ ॥

स्वतःप्रवर्तयन्धर्मं राजाज्ञेव विधिः स्मृतः ।
विहितार्थस्तावकःस्यादर्थवादाभिधानवान् ॥ १० ॥

तन्त्रमन्त्रास्त्वनुष्ठेयस्यार्थस्य प्रतिबो[1]धकाः ।
नामांशोऽयं तु यागादिकर्मणामभिधायकः ॥ ११ ॥
वेदाः पुनर्द्विधा पूर्वोत्तरभागविभेदतः ।
तत्र पूर्वतरोभागः कर्मणां प्रतिपादकः ॥ १२ ॥
भवेदुत्तरभागस्तु तत्रोपनिषदाह्वयः ।
ब्रह्मणो बोधकत्वेन ब्रह्मकाण्डमितीरितम् ॥ १३ ॥
भस्मरुद्राक्षमुख्यानां धारणं ज्ञानदायकम् ।
ब्रह्मस्वरूपमपि च बोधयन्मोक्षसाधनम् ॥ १४ ॥
एवं चतुर्णां वेदानामुपवेदचतुष्टयम् ।
ऋग्वेदस्यायुषो वेदोयजुषो धनुराह्वयः ॥ १५ ॥
साम्नो गान्धर्ववेदः स्यादर्थशास्त्रमथर्वणः
हेतुलिंगौषधस्कन्धैरायुरारोग्यसाधनम् ॥ १६ ॥

आयुर्वेदः

आयुर्वेदः परिज्ञेयो धर्माद्यर्थैस्त्रिभिर्नरैः ।

धनुर्वेदः

धनुर्वेदो भवत्यत्र परिपन्थिनिरासकः ॥ १७ ॥

गान्धर्ववेदः

सप्तस्वरप्रभेदो हि सामगान्धर्ववेदयोः ।

अर्थशास्त्रम्.

अर्थवेदोऽन्नपानादिप्रधानमखतत्परः ।
दक्षिणाऽज्यपुरोडाशचरुसंपादनादिभिः ॥ १८ ॥
तत्फलं हि चतुर्वर्गपुरुषार्थ इति स्मृतम् ।

षडंगलक्षणानि

शिक्षादीनां षडंगानां स्मृता वेदोपयोगिता ॥ १९ ॥
शिक्षा शिक्षयति व्यक्तं वेदोच्चारणलक्षणम् ।
वक्ति व्याकरणं तस्य संहितापदलक्षणम् ॥ २० ॥
वक्ति तस्य निरुक्तं तु पदनिर्वचनं स्फुटम् ।
ज्योतिश्शास्त्रं वदत्यत्र कालं वैदिककर्मणाम् ॥ २१ ॥
क्रमः कर्मप्रयोगाणां कल्पसूत्रेण कथ्यते ।
मन्त्राक्षराणां संख्योक्ता छन्दोविचितिषु स्फुटम् ॥ २२ ॥
छन्द पादौ करौ कल्पं [2]मुखं व्याकरणं स्मृतम् ।
शिक्षा घ्राणं ज्योतिषं दृक् निरुक्तं श्रोत्रमुच्यते ॥ २३ ॥

[1] पादका. [2] तेषां व्याकरणं मुखम्.

उपांगानि.

चतुर्णामप्युपांगानामुपयोगोंगवत्स्मृतः ।
मीमांसा तत्र वेदार्थ [1]विचारणपरायणा ॥ २४ ॥
सा पुनर्द्विविधा पूर्वोत्तरा चेति विभेदतः ।
पूर्वा तु कर्ममीमांसा कर्मणां प्रतिपादनात् ॥ २५ ॥
अपरा ब्रह्ममीमांसा ब्रह्मणस्तु विचारणात् ।
न्यायो युक्त्या पदार्थानां तत्त्वनिर्धारणार्थकः ॥ २६ ॥
स पुनः द्विविधो न्यायः काणादश्चेति विश्रुतः ।
गौतमेनप्रणीतस्तु न्यायशब्देनकीर्तितः ॥ २७ ॥
काणादस्तु कणादेन मुनिना संप्रकीर्तितः ।
शिवप्रसादाद्व्यासेन प्रणीतानि सविस्तरम् ॥ २८ ॥
वेदेषु नष्टशाखार्थभासकानि विशेषतः ।
अष्टादशपुराणानि प्रधानानि समाख्यया ॥ २९ ॥
कथारूपेण महता पुरुषार्थैकसाधनम् ।
भवत्युपपुराणानां तथाष्टादशसंख्यया
तथैवमुनिभिश्चान्यैः प्रणीतानि महात्मभिः ॥ ३० ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति लक्षणैस्संयुतानि हि ॥ ३१ ॥
वर्णाश्रमानुरूप्येणधर्माधर्मविभाजकम् ।
धर्मशास्त्रमनुष्ठेय धर्माणां च नियामकम् ॥ ३२ ॥
वेदानुगानां विद्यानां स्वरूपमिति कीर्तितम् ।
अथागमस्वरूपं तु समासेन निगद्यते ॥ ३३ ॥
आगताश्शिववक्त्रेभ्यो गताश्च गिरिजामुखम् ।
मताश्च वासुदेवेन यत्तदागमनामकाः ॥ ३४ ॥
क्रियापादो योगपादश्चर्याज्ञानाख्यपादकौ ।
नानाविधेष्वागमेषु पादाश्चत्वार ईरिताः ॥ ३५ ॥
क्रियापादे नित्यकर्माण्यात्मनां पशुताक्षयः ।
शिवताया अभिव्यक्तिरित्यादिः प्रतिपाद्यते ॥ ३६ ॥
श्रीकण्ठेशोपदिष्टार्थाः श्वेताद्या अष्टविंशतिः ।
योगाचार्यास्सशिष्याश्च योगश्चापि चतुर्विधः ॥ ३७ ॥
योगपादो मन्त्रलयहठराजाभिधानवान् ।
ईश्वरे चित्तसन्धानरूपश्च प्रतिपाद्यते ॥ ३८ ॥

[1] प्रविचार.

लक्षणं जपमालायाः स्कन्दनन्द्यादिकस्य च ।
चर्यापादे तु कथितं प्रायश्चित्तादिकर्म च ॥ ३९ ॥
ज्ञानपादे पतिपशुपाशास्तु त्रय ईरिताः ।
पतिःकुण्डलिनी माया पशुःपाशस्ततः परम् ॥ ४० ॥
दीक्षेति च पदार्थाष्षडागमेषु प्रकीर्तिताः ।
प्रधानागमसंभूतास्सन्त्यसंख्या उपागमाः ॥ ४१ ॥
तेषु केचिन्मतानां तु बहूनां स्युः प्रवर्तकाः ॥
अन्ये तु मूलतां यान्ति चतुष्षष्टिकलाअपि ॥ ४२ ॥

चतुष्षष्टिकलाः

कलास्ताः कथयाम्यद्य समाहितमनाः शृणु ।
अथेतिहासागमौ च काव्यालंकारनाटकम् ॥ ४३ ॥
गायकत्वं कवित्वं च कामशास्त्रं दुरोदरम् ।
देशभाषालिपिज्ञानं लिपिकर्म च वाचनम् ॥ ४४ ॥
गणकव्यवहारौ च स्वरशास्त्रं च शाकुनम् ॥ ४५ ॥
सामुद्रिकं रत्नशास्त्रं गजाश्वरथकौशलम् ।
मल्लशास्त्रं सूपकर्म भूरुहाणां च दोहदम् ॥ ४६ ॥
गन्धवादो धातुवादः खनिवादो रसस्य च ।
बिलवादोऽग्निसंस्तंभो खड्गस्तम्भो जलस्य च ॥ ४७ ॥
वाचस्तम्भो वयस्तम्भो वशाकर्षणमोदनम् ।
विद्वेषणोच्चाटने च मारणं कालवंञ्चनम् ॥ ४८ ॥
परकायप्रवेशश्च पादुकासिद्धिरेव च ।
वाक्सिद्धिर्घुटिकासिद्धिरैन्द्रजालिकमेव च ॥ ४९ ॥
अञ्जनं परदृष्टेश्च वञ्चनं स्वरवञ्चनम् ।
मणिमन्त्रौषधादीनां सिद्धयश्चोरकर्म च ॥ ५० ॥
चित्रलोहाश्ममृद्दारु वेणुचर्माम्बरक्रियाः ।
अदृश्यकरणं दन्तिकरणं मृगयाविधिः ॥ ५१ ॥
वाणिज्यं पाशुपाल्यं च कृषिरासवकर्म च ।
लावककुक्कुटमेषादियुद्धकारककौशलम् ॥ ५२ ॥
चतुष्षष्टिकलास्त्वेता विद्वद्भिःपरिकीर्तिताः ।
प्राधान्येन कलास्त्वेता गण्यन्ते पण्डितोत्तमैः ॥ ॥ ५३ ॥

इति

श्रीमदनाद्यनन्त सकलतत्त्वोतीर्ण षड[1]र्थोपादान
विन्दुकारण चिदम्बर शक्तिसमान्वित परमेश्वर
प्रसादासादित शिवाद्वैतविद्या विशारद
श्रीमत्केलदिबसवराजेन्द्र
विरचित वेदागमान्तर्गत विविधविद्या
तन्त्रसारभूत *शिवतत्वरत्नाकरे*
प्रथमकल्लोले *सकलविद्योद्देशो*
नाम द्वितीयस्तरंगः

[1] ध्वो.

श्रीः

श्रीशिवतत्त्वरत्नाकरे

तृतीय स्तरंगः

स्वामिन्! नामप्रपञ्चस्य वेदादेः कारणं परम् ।
शिवएवेति कथितं भगवन्! पूर्वमेव हि ॥ १ ॥
द्दश्यस्यार्थप्रपञ्चस्य किं पुनः कारणं मतम् ।
तन्मे कथय सर्वज्ञ! सर्वशास्त्रविनिश्चितम् ॥ २ ॥
आकर्णय कुमार! त्वं यत्प्रश्नयसि सम्प्रति ।
वीरशैवानुसारेण सर्वमावेदयामि तत् ॥ ३ ॥
श्रीमन्महानादिभक्तः स्वप्रकाशोऽद्वितीयकः ।
योऽसौ ब्रह्मेति संप्रोक्तः शिवतत्त्वार्थवेदिभिः ॥ ४ ॥
तस्मात्स्वयं प्रादुरभूत् सनिरंञ्जनजंगमः ।
तच्छिखायां शून्यलिंगं संजातं विश्वकारणम् ॥ ५ ॥
तस्मान्निष्कललिंगंतु संजातं स्वेच्छया पुनः ।
तस्मान्निष्कललिंगाच्च महालिंगमभूत्स्वयम् ॥ ६ ॥
तस्मात्प्रणवलिंगन्तु सृष्ट्युन्मुखमजायत ।
एतस्माच्छिवतत्त्वं तु सादाख्यं च ततोऽभवत् ॥ ७ ॥
तस्मान्महेश्वरो जातस्तस्माद्रुद्रसमुद्भवः ।
तस्माज्जनार्दनो जातस्तस्माज्जातः पितामहः ॥ ८ ॥
पितामहात्समुद्भूतं जगदेतच्चराचरम् ।
आदावनादिभक्तस्य लक्षणं वच्मि ते क्रमात् ॥ ९ ॥
यदस्ति तत्परं ब्रह्मतदनादि भजेद्यतः ।
तस्मादनादिभक्तोऽयमित्युक्त स्तत्त्ववेदिभिः ॥ १० ॥
लिंगं जंगम आदिःस्याद्भक्तश्चानादिरूपकः ।
अंगं लिंगमिति प्रोक्तं प्राणो जंगम उच्यते ॥ १२ ॥
लिंगजंगमयोरैक्यस्वरूपो भक्त उच्यते ।
जंगमो लिंगरूपस्याल्लिंगं जंगमरूपकम् ॥ १३ ॥

लिंगजंगमसंयोगोऽनादिभक्तस्य लक्षणम् ।
लिंगजंगमभक्ताश्च त्रयस्त्वेकस्वरूपकाः ॥ १४ ॥
देहः प्राणस्तथाऽत्मा चेत्यागमान्वयनिर्णयः ।
नित्यं पूर्णं चिदानंदं सद्रूपं ब्रह्म कीर्तितम् ॥ १५ ॥
यदेवाखण्डरूपं स्यादेतद्भक्तस्य लक्षणम् ।
गुरुर्लिंगं चरश्शेषः पादांभश्चैकरूपकम् ॥ १६ ॥
अलघुर्यद् वृहद्वस्तुपरिपूर्णं गुरुः स्मृतः ।
द्दश्यं लीनं जगद्यस्मिन् सन्नित्यं लिंगमुच्यते ॥ १७ ॥
स्वयंप्रकाशरूपश्च सच्चिजंगम इष्यते ॥
सौख्यं शतगुणाधिक्यं प्रसादोऽयं विशिष्यते ॥ १८ ॥
एतेषां स्वरसापूरैस्सरसीकृताचिद्विदम् ।
एतत्पादोदकं विद्यात्तद्रूपो भक्तउच्यते ॥ १९ ॥
आचारो गुरुसम्बन्धो निष्ठा ताल्लिंगसंयुता ।
सुज्ञानं जंगमश्चैव प्रत्यक्षं च प्रसादकः ॥ २० ॥
तत्तदेकरसं चैव पादोदकमिदं श्रृणु ।
इदं चानादिभक्तस्य पंचाचारस्वरूपकम् ॥ २१ ॥
तस्य रूपान्तरेणैवं षड्विधाचारलक्षणम् ।
अखण्डः पूर्णनित्ये च चित्प्रकाशं प्रकीर्तितम् ॥ २२ ॥
परानन्दं चिद्रसं च षड्विधं भक्तलक्षणम् ।
पूर्णं नित्यं चित्प्रकाशं परानन्दं च चिद्रसम् ॥ २३ ॥
अखण्डत्वमुमादेवी षड्विधं गुरुलक्षणम् ।
नित्यं पूर्णं चिदाकाशं परानन्दं च चिद्रसम् ॥ २४ ॥
श्रृणु देव्या ह्यखण्डत्वं षड्विधं [1] लिंगलक्षणम् ।
चित्प्रकाशं पूर्णनित्ये परमानन्दचिद्रसाः ॥ २५ ॥

---

[1] रासीत्.

[1] चर.

अखण्डत्वं महादेवी[1] षड्विधं चरलक्षणम् ।
परमानन्दपूर्णे च नित्यत्वं चित्प्रकाशकम् ॥ २६ ॥
चिद्रसं स्यादखण्डत्वं षड्विधं शेषलक्षणम् ।
चिद्रसं पूर्णनिलेये च चित्प्रकाशं मम प्रिये! ॥ २७ ॥
परानन्दमखण्डत्वं षड्विधं तीर्थलक्षणम् ।
इदं तस्य पृथङ्मि[2]श्र षड्विधाचारलक्षणम् ॥ २८ ॥
गुरुर्लिंगं चरश्चैव प्रसादः पादवारि च ।
भूतिरुद्राक्षमन्त्राश्च भक्तांगमिति कथ्यते ॥ २९ ॥
भूतिः परानुभूतिर्हि स्नानं तत्रावगाहनम् ।
त्रिपुण्ड्रं त्रिगुणाभावो ह्यलिंगं लिंगमेव च ॥ ३० ॥
मनोमुखानि चाक्षाणि रुद्राक्षाणि विधाय वै ।
चतुर्दशक्रमाद्धार्याण्येतद्रुद्राक्षधारणम् ॥ ३१ ॥
पञ्चषड्विधतत्त्वानि न क्षरन्ते समासतः
यस्यां पञ्चाक्षरी सा च स्वयमेव षडक्षरी ॥ ३२ ॥
इत्यष्टावरणं तस्य तन्वष्टकमितीरितम् ।
आचारपंचकं रूपषट्कमावरणाष्टकम् ॥ ३३ ॥
तन्वष्टकं स्वस्व रूपादभिन्नं तस्य बिभ्रतः ।
भवेदनादिभक्तस्य स्वरूपमिदमेव हि ॥ ३४ ॥
सर्वकारणरूपश्च सर्वतत्त्वपरं तथा ।
अनादिभक्तरूपं तु सदोदितमिदं शृणु ॥ ३५ ॥
भक्तो निरोधे निजभावरूपिणि
निराश्रयानन्द निवासदायिनि ॥
निर्देहके निर्विषये निरिन्द्रिये
निष्केवने नित्यपदे विराजिते ॥ ३६ ॥
इदं चानादिभक्तस्य स्वरूपं परिकीर्तितम् ।
तस्य कारणमूर्तीनामाश्रयत्वमथोच्यते ॥ ३७ ॥
पश्चिमेऽनादिभक्तस्य हृदि भाति निरञ्जनः ।
शिखायां शून्यलिंगन्तु ब्रह्मरन्ध्रे चिदम्बरम् ॥ ३८ ॥
भ्रूमध्ये शिवशक्तिश्च कण्ठे पंचैव शक्तयः ।
कलापञ्चकमेवं स्यान् मुखपंचकमेव च ॥ ३९ ॥
सादाख्यपञ्चकं नादपञ्चकं मूर्तिपञ्चकम् ॥ ४० ॥

[1] वि. [2] नारि.

अनाहते तस्य भाति चेश्वराष्टकमेव च ।
मणिपूरकचक्रस्य पंचविंशतिमूर्तयः ॥ ४१ ॥
स्वाधिष्ठाने तस्य चैकादश रुद्राः प्रकीर्तिताः ।
तस्याधारे विराडन्तर्यामी हैरण्यगर्भकः ॥ ४२ ॥
ब्रह्मणो नव भेदाश्च विष्णोश्च दश मूर्तयः ।
एवं ह्यनादिभक्तस्य चिद्ब्रह्माण्डनिवासिनः ॥ ४३ ॥
त्र्यशीतिमूर्तयः प्रोक्ता नियम्या विश्वयोनयः ।
एवं ह्यनादिभक्तस्य लक्षणं परिकीर्तितम् ॥ ४४ ॥
भक्तस्य पश्चिमहृदि स्थितो योऽनादिजंगमः ।
तस्य स्वरूप मधुना समासेन प्रकाश्यते ॥ ४५ ॥
पश्चादनादिभक्तस्स हृच्चित्पद्मान्तरे सदा ।
चिन्मण्डलत्रयोपेतं प्रणवासनमध्यगः ॥ ४६ ॥
निरञ्जन स्तत्प्रणवस्वरूपोऽत्र निगद्यते ।
निराकृतं रंजनं यन्माया मोहविजृम्भितम् ॥ ४७ ॥
[1]एकस्वरूपसिद्धेन स भवेद्धि निरंजनः ।
तदेव निष्कलं ब्रह्म निर्विकल्पं निरंजनम् ॥ ४८ ॥
निःसङ्गं निरवग्रहं निरशनं निष्कारणं निष्फलं ।
निस्संगं निरुपाधिकं निरुपमं निष्प्रक्रियं निश्चलम् ॥
निष्पुण्यं निरनुग्रहं निरधिकं निर्वासनं निर्वहं ।
निर्भेद्यं निरघं निरञ्जनपदं चैतंभजे जंगमम् ॥ ४९ ॥
आद्यन्तरहितं ज्योतिरनादि प्रभुर व्ययम् ।
अनादेशो ह्ययातश्च जंगमस्यान्निरंजनः ॥ ५० ॥
इदं तस्य निरालम्बस्वरूपं समुदीरितम् ।
चतुर्वेदाश्च तद्गर्भे पुराणं तस्य मध्यमम् ॥ ५१ ॥
योगिनो मुनयः सर्वे जंगमांघ्रिं समाश्रिताः ।
तस्य देहे समस्तानि भुवनानि चतुर्दश ॥ ५२ ॥
पादयो रतलं विन्द्यात्पादोर्ध्वे वितलं तथा ।
जंघयो स्सुतलं ज्ञेयं जानुदेशे महातलम् ॥ ५३ ॥
तलातलं तदूरौ च गुह्यस्थाने रसातलम् ।
कटिबन्धे तु पातालं सप्तलोका इतीरिताः ॥ ५४ ॥
भूलोको नाभिमध्ये तु भुवर्लोकोऽस्य चोदरे ।
हृदये चापि स्वर्लोको जनोलोकस्तु कन्धरे ॥ ५५ ॥

[1] येन.

ताल्वोश्चापि तपोलोकः सत्यलोको ललाटके ।
महर्लोकस्तस्य मूर्ध्नि चतुर्दश समीरिताः ॥ ५६ ॥
ब्रह्माण्डं मुकुटं तस्य वदनं गगनं [1]शृणु ।
तद्बाहवो दिशः सर्वा नेत्रे चन्द्रदिवाकरौ ॥ ५७ ॥
शरीरं व्योमरूपं च पातालं पादपंकजम् ।
करस्थले शून्यलिंगं मेघास्सर्वे [2]क्रियामयाः ॥ ५८ ॥
(चन्द्रज्योत्स्नाविभूतिश्च वेदास्सर्वे क्रियामयाः)
नक्षत्राणि च पुष्पाणि रुद्राक्षाः कुलपर्वताः ।
सागरो जलपात्रं च कन्था सृष्टिमयं जगत् ॥ ५९ ॥
आसनं पृथिवी तस्याप्यहोरात्रं गुहा मठः ।
त्रिकालज्ञानसौभाग्यमृतव ष्षट् स्थलं प्रिये ! ॥ ६० ॥
शेषस्तस्य कटीसूत्रं ज्ञानमुद्रा च वाङ्मयी ।
मेरुर्दण्डो गुणं सूत्रं गोत्रं शिवकुलं भवेत् ॥ ६१ ॥
वनस्पतिश्च लोमानि एवमेतानि पार्वति! ।
इदं तस्य तु साकारं स्वरूपं परिकीर्तितम् ॥ ६२ ॥
एतस्माज्जंगमादेव शून्यलिंगमभूत्स्वयम् ।
तल्लिंगेन समुद्भूतं सर्वमेतदतः शृणु ॥ ६३ ॥

1) स्मृतम्. 2) जडाश्शुभाः

संजातं मकुटे शून्यं शून्याजातं चिदम्बरम् ।
चिदम्बराच्च चिच्छक्तिः परा शक्तिरभूत्ततः ॥ ६४ ॥

(आदिशक्तिरभूत्तस्या इच्छाशक्तिरभूत्ततः)
तस्यास्सहस्रकांशे च ज्ञानशक्तिसमुद्भवः ॥ ६५ ॥

तस्यास्सहस्रकांशे च सादकोटिसमुद्भवः ।
तस्य तस्य सहस्रांशे पञ्चसादाख्यसंभवः ॥ ६७ ॥

तेषां सहस्रकै रंशैर्जातो माहेश्वर स्स्वयम् ।
तस्य कोटिसहस्रांशे विग्रहः पंचविंशतिः ॥ ६८ ॥

तदंशसंभवो रुद्र स्तस्माज्जातो जनार्दनः ।
जनार्दनसहस्रांशो ब्रह्मा लोकपितामहः ॥ ६९ ॥

पितामहाच्चसंजातं जगत् स्थावरजंगमम् ।
अनादिजंगमोत्पन्नसृष्टिक्रम इतीरितः ॥ ७० ॥

इति

श्री *शिवतत्वरत्नाकरे* प्रथमकल्लोले *अनादिभक्त निरंजन जंगमसृष्टिक्रमवर्णनं* नामतृतीयस्तरगंः

श्रीः

श्रीशिवतत्त्वरत्नाकरे

चतुर्थ स्तरंगः

अनादिभक्ताद्यासृष्टिर्या निरञ्जनजंगमात् ।
[1]प्रपितामहपर्यन्तं ते द्वे पूर्वं प्रदर्शिते ॥ १ ॥

शून्यलिंगादिसृष्टीनां क्रमः स्वामिन्निरूप्यताम् ।
यत्पृष्टवान् कुमार! त्वं तस्योत्तरमहं ब्रुवे ॥ २ ॥

1) प्राक्.

ज्वलत्कालानलाभासा तटित्कोटिसमप्रभा ।
तस्य चोर्ध्वशिखा सूक्ष्मा चिद्रूपा परमाकरा ॥ ३ ॥
तस्यां शिखायामचलं शून्यलिंगमजायत ।
तस्माच्छिरस उत्पन्न मादिजंगमरूपिणः ॥ ४ ॥
शून्यलिंगमिति ख्यातं सर्वकारणकारणम् ।
आदिमध्यान्तशून्यत्वं चिह्नं लिंगस्य यस्य तत् ॥ ५ ॥

शून्यालिंग मिति प्रोक्तमागमज्ञै रनामयम् ।
तनुशून्यं मनश्शून्यं भावनाभोगवर्जितम् ॥ ६ ॥

कामक्रोधादिशून्यं च शून्यनामेतिकीर्तितम् ।
अथ निष्कलालिंगस्य स्वरूपमुपवर्ण्यते ।
शून्यलिंगस्य मध्ये तु निष्कलस्य समुद्भवः ॥ ७ ॥

न विद्यन्ते कला यत्र तन्निष्कलमुदाहृतम् ।
लिंगचिह्नं निष्कलत्वं यस्य तत्तादृशं भवेत् ॥ ८ ॥

अलक्ष्य मद्वयं शून्यममूर्तं पर मव्ययम् ।
अनामाव्याकुलं सिद्धमनाद्यं शिवमुच्यते ॥ ९ ॥

तत्त्वातीतं, परातीतं परतत्त्वं परात्परम् ।
निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ॥ १० ॥

तल्लिंगेन समुद्भूतं सर्वतत्त्वमतः शृणु ।
निष्कलस्यान्तरे त्वासीदादिमूर्तिसमुद्भवः ।
आदिमूर्तिसमाख्यात्तु परशक्तिसमुद्भवः ।
परशक्तिसमाख्याच्च नादबिन्दुसमुद्भवः ॥ १२ ॥

नादबिन्दुसमाख्याच्च सादाख्यानसमुद्भवः ।
सादाख्यानसमाख्याच्च इच्छाशिवसमुद्भवः।
इच्छाशिवसमाख्याच्च ईश्वरात्मसमुद्भवः ।
ईश्वरा[1] ख्यसमाख्याच्च क्रियारुद्रसमुद्भवः ॥ १३ ॥

क्रियारुद्रसमाख्याच्च विष्णुलक्ष्मीसमुद्भवः ।
विष्णुलक्ष्मीसमाख्याच्च ब्रह्मवाणीसमुद्भवः ॥ १४ ॥

ब्रह्मवाणी समाख्याच्च सर्वजीवसमुद्भवः ।
उदितं निष्कलं लिंगं संग्रहेण ततःपरम् ॥ १५ ॥

प्रोच्यतेऽथ महालिंगस्वरूपं श्रुतिचोदितम् ।
महनीयं पूज्यतरं लिंगं लक्ष्म च यस्य तत् ॥ १६ ॥

तन्महालिंगमित्युक्तं वरिष्ठैर्वविशारदैः ।
नादःस्यान्निष्कलगुरुर्बिन्दुःस्याच्छून्यलिगकम् ॥ १७ ॥

निरंजनो जंगमोऽयं कलारूप इतीरितः।
त्रिभिरेतैस्समायुक्तं महालिंगमभूत्स्वयम् ॥ १८ ॥

महालिंगमिदं देवि! मनोतीतमगोचरम् ।
निर्नाम निर्गुणं नित्यं निरंजननिरामयम् ॥ १९ ॥

1) त्म.

निर्मलं निष्कलं ज्ञेयं निर्भेद्यं निरुपाधिकम् ।
अद्वैतानन्दमक्षीणमसादृश्यमिदं शृणु ॥ २० ॥

परानन्दात्मकं लिंगं केवलं सन्निरंजनम् ।
ज्ञानात्मकं सर्वगतं योगिनां हृदये स्थितम् ॥ २१ ॥

गोळकं परतत्त्वं च चिन्मयं सद्विलासकम् ।
शरण्यं सर्वतत्त्वानां लिंगाकारेण वर्तते ॥ २२ ॥

नादो लिंगमिति ज्ञेयं बिन्दुः पीठमुदाहृतम् ।
नादबिन्दुयुतं रूपं लिंगाकारमिहोच्यते ॥ २३ ॥

बिन्दुश्शक्तिः शिवो नादः कला संयोगएवच
शिवशक्त्योर्भवेद्योगे जगत्सृष्ट्यर्थकारणम् ॥ २४ ॥

तत्पराशक्तिरित्युक्ता पीठिका सैव नान्यथा ।
सर्वस्योत्पत्तिहेतुत्वात्प्रथमं लिंगमुच्यते ॥ २५ ॥

प्रसवित्री तु शक्तीनां पराशक्तिस्तु पीठिका ।
शिवतत्त्वं परानन्दं परं लिंग मुदीरितम् ॥ २६ ॥

आद्यन्तशून्य ममलं परिपूर्णमेकं
सूक्ष्मं परात्परमनामयमप्रमेयम् ।
भावैकगम्यमपि[1] तं शिवतत्त्वमाहुः
चिच्छक्तिसंस्फुरणरूपमहात्मलिंगम् ॥ २७ ॥

चराचरात्मकमिदं गम्यते यत्र लीयते ।
उत्पाद्यते यतो भूय स्तल्लिंगं परमिष्यते ॥ २८ ॥

ब्रह्माण्डकोटय स्तस्य निर्मातु र्लिंगरूपिणः ।
शिवस्य कुक्षिजलधौ जायन्ते बुद्बुदोपमाः ॥ २९ ॥

ब्रह्मविष्ण्वादयस्सर्वे देवा वेदादय स्तथा ।
लीयमानास्तु गम्यन्ते तल्लिंगं ब्रह्मकेवलं ॥ ३० ॥

दक्षिणे लीयते ब्रह्मा वामतश्च जनार्दनः ।
हृदये चैव गायत्री सर्वे देवोत्तमास्तथा ॥ ३१ ॥

परं गूढं शरीरस्थं लिंगं क्षेत्रमनादिमत् ।
यदाद्यमैश्वरं तेजः तल्लिंगं पञ्चसंज्ञिकम् ॥ ३२ ॥

अवर्णो वर्णसंयुक्तो विरूपो विश्वरूपधृत् ।
परमात्मा परं ब्रह्म कश्चिद्देवोऽस्ति चिच्छिवः ॥ ३३ ॥

मन्त्राध्वा च पदाध्वा च वर्णाध्वा चेतिशब्दतः ॥
भुवनाध्वा च तत्त्वाध्वा कलाध्वेति च विश्रुतः ॥ ३४ ॥

1) जडं.

जगत्यां भुवनाध्वानं पदाध्वानं च पंकजे ।
वर्णाध्वानं च वृत्ते तु कलाध्वानं च पंकजे ॥ ३५ ॥
तत्वाध्वानं पट्टि[1]कायां मन्त्राध्वानं प्रधारिके ।
एवं षडध्वकं न्यस्य सर्वमन्त्रात्मकं शिवम् ॥ ३६ ॥
आदिप्रणवपीठं स्यादकारो मध्यमेवच ॥
उकारो गोमुखं चैव मकारो वर्तुलं तथा ।
नालो बिन्दुर्महातेजा नादश्चाखण्डलिंगकम् ।
नकारश्चादिपीठं च मकारो मध्यमेव च
शिकारो वर्तुळं चैव वाकारो गोमुखं तथा ॥
यकारो बिन्दुरेवंस्यात्प्रणवो लिंगमुच्यते ।
नमेति पीठसंयुक्तं शिकारो मध्यमेवच ॥ ३८ ॥
वाकारो गोमुखं चैव यकारो वर्तुलं तथा ।
ओंकारो गोलकस्थानं लिंगं षड्वर्णरूपकं ॥ ३९ ॥
वृत्तं च गोळकं भावे प्राणस्स्यान्मध्यगोमुखे ।
इष्टं पीठं त्रिधा चैकं तत्त्वत्रय मुदाहृतम् ॥ ४० ॥
आचारं गौरवं वृत्ते मध्ये लिंगं व्यवस्थितम् ।
गोमुखे चरलिंगं च प्रसादो वर्तुले तथा ॥ ४१ ॥
गोलकं च महद्रूपमिष्टं षड्विधमीरितम् ।
यद्भक्तनिष्ठा निजलिंगपीठे
मध्ये प्रसादे च सगोमुखेच ।
यत्प्राणलिंगे शरणश्चवृत्ते
चित्ते निजैक्यं त्विति षट् स्थलानि ॥ ४२ ॥
बिन्दुमध्यगतो नादो नादमध्ये तु मूर्तयः ।
मूर्तिमध्यगतं तत्त्वं तत्त्वमध्यगतश्शिवः ॥ ४३ ॥
मूलमन्त्रस्वरूपाय मूल[2]मन्त्रस्वरूपिणे ।
मूलप्रकृतिरूपाय मूलस्तम्भाय शंभवे ॥ ४४ ॥

[1] त्ति. [2] मन्त्रात्मरूपिणे.

लीलया संगतस्साक्षादुमापति रितीरितः ।
लीलया रहितस्साक्षात्स्वयम्भूरिति कथ्यते ॥ ४५ ॥

शिवस्तु ब्रह्मचैवोक्तः शक्ति[1]र्वेदांगमुच्यते ।
शिवशक्तिसमायोगो जगत्सृष्ट्यर्थकारणम् ॥ ४६ ॥

पराशक्तिस्तस्य चिन्तासहस्रांशेन जायते ।
तच्छक्तेस्तु सहस्रांशादादिशक्ति समुद्भवः ॥ ४७ ॥
(तच्छक्तेस्तु सहस्रांशाद्ज्ञानशक्तिसमुद्भवः)
तच्छक्तेस्तु सहस्रांशात् क्रियाशक्तिसमुद्भवः ।
एषा वै पंचधा शक्तिःनिष्कला चेति कीर्तिता ॥ ४८ ॥
क्रिया कर्मेति यद्ज्ञेयं तस्मात्कर्मेति नामतः ।
लिंगपीठप्रकारेण कर्मसादाख्यलक्षणम् ॥ ४९ ॥
चत्वारि कर्तृरूपादिकेवलं नादउच्यते ।
लिंगं शिवइति ज्ञेयं शक्तिः पीठमुदाहृतम् ॥ ५० ॥
योनि लिंगप्रकारेण जगत्सृष्ट्यर्थकारणम् ।
तथा संयोगभावश्च कर्मतत्त्वमुदाहृतम् ॥ ५१ ॥
तस्मान्नादात्मकत्वं च सर्वकारणकारणम् ।
सदाशिव इति प्रोक्तं सर्वशास्त्रेषु निश्चितम् ॥ ५२ ॥
अस्मिन् प्रकरणे सम्यक् शून्यनिष्कललिंगयोः ।
महालिंगस्य चोक्तोऽभूत्क्रमः सृष्टिस्वरूपयोः ॥ ५३ ॥

इति श्री *शिवतत्वरत्नाकरे*
प्रथमकल्लोले
शून्यनिष्कलमहालिंगादि
सृष्टिक्रमनिरूपणं
नामचतुर्थस्तरंगः

[1] रेवा

श्रीः

श्रीशिवतत्त्वरत्नाकरे

पञ्चम स्तरंगः

निष्कलाभ्युदिता सृष्टिरनादिर्बहुधा गुरो! ।
विदिताशेषतन्त्रस्य ज्ञानं किल तवाखिलम् ॥ १ ॥
महालिंगसमुद्भूताजाता प्रणवलिंगतः ।
या सृष्टिःसाधुना स्वामिन्! कथनीया [1]त्वयावशात् ॥ २ ॥
वक्ष्येऽहं ते समासेन शिवमन्त्रपरायण! ।
अखण्डगोलकाकारमहातेजस्वरूपिणः ॥ ३ ॥
ऊर्ध्वमुन्नमयत्येष ओंकारो विश्वमात्मनि ।
लीयते गम्यते यत्र लिंगे विश्वं चराचरम् ॥ ४ ॥
महालिंगस्य चिन्तायां जगतां सृष्टिहेतवे ।
पराशक्तिप्रकाशोऽभूत् तस्यास्संयोगतस्स्वयम् ॥ ५ ॥
नादविन्दुकलारूपत्रिविधप्रणवेन तु ।
लिंगमाविरभूदेकमखण्डप्रणवात्मकम् ॥ ६ ॥
ऊर्ध्वमुन्नमयत्येष ओंकारो विश्वमात्मनि ।
लीयते गम्यते यत्र लिंगे विश्वं चराचरम् ॥ ७ ॥
ओंकारएव लिंगं स्यात्सर्वकारणकारणम् ।
ओमिति ब्रह्म परमं लिंगाकारं महेश्वरम् ॥ ८ ॥
सृष्ट्यर्थं सर्वतत्त्वानां लोकस्योत्पत्तिकारणम् ।
शक्तिसंयोगसद्भावं स्वेच्छयाऽचिन्तयच्छिवः ॥ ९ ॥
वेदादिमूलं प्रथमं स्वराणां त्रयोदशस्थं शशिसूर्यबिम्बम् ।
नादात्मकं सुप्तभुजंगरूपं त्रितत्त्वमूलं प्रणवं नमामि ॥ १० ॥
परापरविभागेन प्रणवस्तु द्विधामतः ।
परः परतरं ब्रह्म प्रज्ञाऽऽनन्दादिलक्षणम् ॥ ११ ॥
प्रकर्षेण नवं यस्मात् परं ब्रह्म स्वभावतः ।
अपरः प्रणवस्साक्षात् शब्दरूपस्तुनिर्मलः ॥ १२ ॥

1) कृपावशात्.

प्रकर्षेण नवत्वस्य हेतुत्वात् प्रणवस्स्मृतः ।
परमः प्रणवप्राप्तिहेतुत्वात् प्रणवोऽथवा ॥ १३ ॥
अष्टांगप्रणवे विद्यादोंकारं नादरूपकम् ।
ओंकारप्रभवं विद्यादकारप्रणवं परम् ॥ १४ ॥
अकारप्रणवे विद्यादुकारप्रणवं तथा ।
(अकारोकारसंयोगे मकारप्रणवं तथा)
एवं प्रवृत्तिमार्गेण प्रोक्तं प्रणवपञ्चकम् ॥ १५ ॥
निवृत्तिं वक्ष्यते तेषां स्वरूपमपि गोपितम् ।
अकारं प्रथमं विद्यादुकारन्तु द्वितीयकम् ॥ १६ ॥
तृतीयन्तु मकारञ्च ह्योंकारं च चतुर्थकम् ।
अवाग्जं पंञ्चमं विद्यात् पञ्चप्रणवभेदकम् ॥ १७ ॥
आकारं नादरूपेण जाग्रत्स्थाने निवेशयेत् ।
विन्दुरूपमुकारञ्च स्वप्नस्थाने निवेशयेत् ॥ १८ ॥
(कलारूपं मकारं च सुप्तिस्थाने निवेशयेत् ।)
तुर्यातीते ह्यवाग्जं च शिवरूपं विनिक्षिपेत् ॥ १९ ॥
नकारस्तारकस्थानं मकारो दण्डउच्यते ।
शिकारः कुण्डलाकारो वाकारश्चार्धचन्द्रकः ॥ २० ॥
यकारो विन्दुरूपोऽयमोंकारः पञ्चवर्णकः ।
तारकेऽस्मिन् स्थितो ब्रह्मा विष्णुस्तद्दण्डके स्थितः ॥ २१ ॥
रुद्रश्च कुण्डलाकार अर्धचन्द्रे तथेश्वरः ।
बिन्दौ सदाशिवस्तस्थौ तेजोरूपं कलापदे ॥ २२ ॥
तैलधारानवच्छिन्नं दीर्घं घण्टानिनादवत् ।
अवाग्जं प्रणयस्याग्रं यस्तं वेद स वेदवित् ॥ २३ ॥

1) वद.

तस्मादुच्चारणात्सम्यक् प्रणवस्य शिवात्मनः ।
पातकानि विनश्यन्ति हृदि ध्याते परे शिवे ॥ २४ ॥
मन्त्राणामादिरोंकारश्छन्दसामिव शोभने! ।
येनेदं जगदुत्पन्न मेतद्रूपानुसारिणा ॥ २५ ॥
ओंकारःप्रणवश्चैव ब्रह्मज्ञानं शिवात्मकम् ।
तेजोबीजं निष्कलं स्यात् तारणं निष्कलात्मकम् ॥ २७ ॥
नादो नादादिहृन्नादो वेदादिर्वेदभूरपि ।
मुक्तिबीजं मन्त्रबीजं वर्णबीजं महेश्वरि! ॥ २८ ॥
इत्यष्टादशभेदानि नामानि प्रणवस्य वै ।
अव्यञ्जनमघोषं चाविस्तरं रेफवर्जितम् ॥ २९ ॥
अतालुकण्ठहृन्नासिकोष्ठजं चाक्षरं तथा ।
ओंकारप्रभवा वेदा ओंकारप्रभवास्स्वराः ॥ ३० ॥
ओंकारप्रभवं सर्वं त्रैलोक्यं सचराचरम् ।
प्रणवो हि परं ब्रह्म प्रणवः परमं पदम् ॥ ३१ ॥
साक्षात्परशिवो योऽसावोमित्युक्तोऽद्वितीयकः ।
संख्यातः परमात्मेति तस्मान्नादस्समुत्थितः ॥ ३२ ॥
नादात्संजायते विन्दुर्विन्दोस्संजायते कला ।
कलया जायते शक्तिस्तया संवित्प्रजायते ॥ ३३ ॥
संविदा जायते चित्तं तस्मात्तेजः प्रजायते ।
तद्वै सदाशिवः प्रोक्तस्तस्माज्जातस्स ईश्वरः ॥ ३४ ॥
ईश्वराज्जायते रुद्रस्सृष्टिव्यापारको हरः ।
रुद्रात्प्रजायते विष्णु र्विष्णोर्ब्रह्मा प्रजायते ॥ ३५ ॥
ब्रह्मणो जायते देवि! जगत्सर्वं चराचरम् ।
ओमित्यंगं महेशस्य महतः परमात्मनः ॥ ३६ ॥
वर्णान्यस्य तु सद्यादि मुखानीत्यभिवर्णितम् ।
पञ्चब्रह्ममयान्येतान्युच्यन्ते स्वयमेवच ॥ ३७ ॥
अतओंकार एवोक्तं षडंगब्रह्मलक्षणम् ।
सदैवतं स्यात् षड्वर्णं सबीजं तत्त्वषट्ककम् ॥ ३८ ॥
यकारः परिपूर्णत्वं वाकारो नित्यमेवच ।
आनन्दश्च शिकारस्स्यात् मकारश्चित्स्वरूपकः ॥ ३९ ॥
नकारस्सत्वरूपं च प्रणवो मिश्ररूपकः ।
यकारः परसंज्ञः स्यात् वाकारो गूढमेवच ॥ ४० ॥

शरीरस्थं शिकारस्स्याल्लिंगक्षेत्रमकारकः ।
नकारोऽनादिमद्रूपमोंकारश्च मह[1])स्स्मृतः ॥ ४१ ॥
यकारश्च पराशक्तिर्वाकारश्चादिसांज्ञिका ।
इच्छाशक्ति श्शिकारश्च ज्ञानशक्तिर्मकारकः ॥ ४२ ॥
क्रियाशक्ति र्नकारश्च प्रणवश्चित्स्वरूपकः ।
यकारश्शिवसादाख्यं वाकारस्स्यादमूर्तकम् ॥ ४३ ॥
शिकारो [2])मुक्तिसादाख्यं मकारः कर्तृतामतः ॥
नकारः कर्मसादाख्यं प्रणवो महदुच्यते ॥ ४४ ॥
प्रणवो गोप्यवदन मैशान्यं यार्णमेवच ।
तत्पूरुषं च वाकारः शिकारः स्यादघोरकम् ॥ ४५ ॥
मकारो वामदेवं च सद्योजातं नकारकः
ज्ञानं प्रणवबीजं स्यादाचारश्च नकारकः ॥ ४३ ॥
मकारश्च गुरोर्बीजं शिकारश्शिवलिंगकम् ।
वाकार श्चरबीजं च यकारश्च प्रसादकम् ॥ ४७ ॥
एवं बीजाक्षरज्ञानं दुर्लभं हि वरानने! ।
ओंकार ऐक्यरूपस्स्याद्यकारश्शरणस्तथा ॥ ४८ ॥
वाकारः प्राणलिंगी च प्रसादी च शिकारकः ।
मकारश्च महेशस्स्यात् नकारो भक्त एवच ॥ ४९ ॥
षट्स्थलं चैव षड्वर्णमितिगोप्यं वरानने! ।
प्रणवो भावहस्तश्च ज्ञानहस्तो यकारकः ॥ ५० ॥
वाकार स्सुमनोहस्तश्शिकारो निरहंकृतिः ।
मकारो बुद्धिहस्तश्च चित्तहस्तो नकारकः ॥ ५१ ॥
भावादिहस्तषट्कंच षडक्षरमयं भवेत् ।
ओंकारस्स्यात्परशिवो यकारस्तु सदाशिवः ॥ ५२ ॥
ईश्वरोऽयं च वाकारश्शिकारो रुद्र उच्यते ।
मकारो विष्णुरेव स्याद्ब्रह्मा नार्णमितिक्रमात् ॥ ५३ ॥
सृष्टिमार्गेण जानीयाज्जप्यामेनां विलोमतः ॥
वर्णातीतस्तदोंकारो यकारःस्फटिकोपमः ॥ ५४ ॥
वाकारः श्वेतवर्णाढ्यः शिकारो नीलवर्णभाक् ।
मकारो रत्नसंकाशो नकारः पीतवर्णभाक् ॥ ५५ ॥
समस्तवर्णबीजाढ्यः प्रणवस्सर्वकारणम् ।
व्योमबीजं यकारःस्याद् वाकारो वायुबीजकम् ॥ ५६ ॥

[1]) त्त्व. [2]) मूर्ति.

शिकारो वह्निबीजं स्यान् मकारो जलबीजकम् ।
नकारः पृथिवीबीजं तस्मादेकजगत्प्रसूः ॥ ५७ ॥
प्रणवस्सर्वतत्त्वात्मा स वै परशिवात्मकः ।
यकार ऐश्वरं तत्वं वार्णं माहेश्वरं तथा ॥ ५८ ॥
शिकारः शिवतत्त्वं स्याद् विद्यातत्त्वं तु मस्स्मृतः ।
नकारश्चात्मतत्त्वं स्यादोंकारस्सर्वतत्त्वकः ॥ ५९ ॥
ओंकारः केवलं ज्ञानं यार्णं वेदसहस्रकम् ।
अथर्वणो वकारस्स्याच्छिकारस्सामसञ्ज्ञिकः ॥ ६० ॥
मकारो यजुरेवोक्तो नार्णमृग्वेदसंज्ञकम् ।
तस्मादाम्नायजनकः षडक्षरमहामनुः ॥ ६१ ॥
वेदाः स्वराश्च मन्त्राश्च सर्वेऽप्य[1]स्मात्समुत्थिताः ।
पंच भूतानि सर्वाणि पंच तन्मात्रकाणिच ॥ ६२ ॥
ज्ञानेन्द्रियाणि पंचापि पंचकर्मेन्द्रियाणि च ।
पंचब्रह्माणि पंचैव कृत्यानि सहकारणैः ॥ ६३ ॥
बोध्यानि पंचभिर्वर्णैः पंचाक्षरमहामनोः ।
पंचधा पंचधा यानि प्रसिद्धानि विशेषतः ॥ ६४ ॥
तानि सर्वाणि वस्तूनि पंचाक्षरमयानि हि ।
इति पंचाक्षरीमन्त्रहेतुता प्रणवस्य तु ॥ ६५ ॥
प्रणवांगे द्विपञ्चाशद्वर्णो[2]त्पत्तिकमस्ततः ।
अष्टत्रिंशत्कलोत्पत्तिभेदं वद महेश्वर! ॥ ६६ ॥
यथा तां सकलो देवो निष्कलेन समन्वितः ।
कलामुत्पादयामास सर्वमन्त्रप्रवर्तिकाम् ॥ ६७ ॥
ओंकारो मूर्धमध्यस्थ ओंकारो व्यापकस्तथा ।
ओंकारे प्रथमां रेखां अकारं सृजति प्रभुः ॥ ६८ ॥
नाम्ना नामकलाविद्या सर्ववर्णेष्ववस्थिता ।
रेखां द्वितीयामोंकार उकारं च तथाऽसृजत् ॥ ६९ ॥
प्रतिष्ठापीत्य[3]विज्ञेया उकाराक्षरसंभवः ।
मूर्ध्नि तस्य भवेदेषा सूक्ष्मरेखा निरंजना ॥ ७० ॥
मकारस्साभवेत्तत्र निवृत्तिर्नामतः कलाः ।
त्रिवर्णमक्षरं चैतदोंकारे च प्रजायते ॥ ७१ ॥
हळक्षान्तं त्रिवर्णं च चिदात्मनि तु जायते ।
अआइईउऊकाराश्च ऊऋॠ च लॡ तथा ॥ ७२ ॥

1) प्यत्र. 2) र्णो. 3) नु.

ए ऐ ओ औ अं तु अश्च यकारे तु प्रजायते ।
क खौ ग घौ ङकारश्च च छौ ज झौ ञकारकः ॥ ७३ ॥
टठ वर्णौ तथाह्यस्मिन् वाकारे च प्रजायते ।
डढौणश्च तथौ वर्णौ दधनाः पफ वर्णकौ ॥ ७४ ॥
एतानि दशवर्णानि जायन्तेऽत्र शिकारके ।
बभौ मयरवर्णानि लकारश्चापि वर्णकम् ॥ ७५ ॥
वर्णषट्कं तथाह्यस्मिन् मकारे च प्रजायते ।
वशौ षसौ [1]च वर्णाश्च नकारे च भवन्त्युत ॥ ७६ ॥
इति वर्णाक्षरन्यासः सुसूक्ष्मः कमलानने! ।
प्रणवस्य तरोर्मूलं मकारो नादरूपकः ॥ ७७ ॥
स्कन्धो बिन्दुरुकारस्स्यात् कलाश्शाखा मकारकः ।
स्त्रीरूपाइव पुंरूपास्तथा चोभयरूपकाः ॥ ७८ ॥
सर्वे वै देवतारूपाः प्रत्येकं वर्णरूपकाः ।
प्रकृतिस्सप्तवर्णाणि निकृतिस्तु नवार्णकम् ॥ ७९ ॥
अकारश्च इकारश्च उकारश्चऋकारकः ।
लकारश्चैव लृकारः एकारे ऐसमुद्भवः ॥ ८० ॥
ओकारे औ तथाज्ञेयः क्रमेणैवं समुद्भवः ।
एता वै विकृतिः प्रोक्ता आकारादि नवार्णकाः ॥ ८१ ॥
अकारादि विसर्गान्ता एता वै षोडश स्वराः ।
कलाभेदो ह्ययंप्रोक्तो विकलाभेदकं शृणु ॥ ७२ ॥
ककारादिक्षकारान्ता वर्णाश्च विकलास्स्मृताः ।
ककारश्च गकारश्च चकारश्च जकारकः ॥ ७३ ॥
टकारश्च डकारश्च तकारश्च दकारकः ।
पकारश्च बकारश्च शकारश्च क्षकारकः ॥ ७४ ॥
ऐते द्वादशवर्णाश्च पुल्लिंगा इतिकीर्तिताः ।
खकारश्च घकारश्च छकारश्च झकारकः ॥ ८५ ॥
ठकारश्च ढकारश्च थकारश्च धकारकः ।
फकारश्च भकारच्छ षकारश्च सकारकः ॥ ७६ ॥
एते वै भानुबीजाश्च जायाश्चेति प्रकीर्तिताः ।
शेषं नपुंसकं विद्यात् त्रयोभेदा इति स्मृताः ॥ ७७ ॥
एवमेवच वर्णानामुत्पत्तिस्समुदीरिता ।
ओंकारं नादरूपं च ओंकारं बिन्दुरूपकम् ॥ ७८ ॥

2) ह.

औंकारव्यापिनं विद्यादौंकारो गोप्यमाननम् ।
सद्योजातो नकारश्च वामदेवो मकारकः ॥ ७९ ॥
शिकारोऽघोरसंयुक्तो वाकारः पुरुषस्तथा ।
सदाशिवो यकारश्च पञ्चवक्त्रं प्रकीर्तितम् ॥ ८० ॥
ईशानं पुरुषं चैवमघोरं वामदेवकम् ।
सद्योजातं च पंचैव कलाब्रह्मप्रकीर्तितम् ॥ ८१ ॥
ईशानस्य कलाः पञ्च पुरुषस्य चतुष्कलाः ।
अघोरस्य कलाश्चाष्टौ वामदेवे त्रयोदश ॥ ८२ ॥
सद्योजातस्याष्टकला अष्टत्रिंशत्कला स्मृताः ।
ईशानस्सर्वविद्यानां प्रथसं परिकीर्तितम् ॥ ८२ ॥
ईश्वरस्सर्वभूतानां द्वितीयं परिकीर्तितम् ।
ब्रह्माधिपतिरित्येवं ब्रह्मणोऽधिपतिस्तथा ॥ ८४ ॥
ब्रह्मेत्यन्तं तृतीयं स्याच्छिवो मेऽस्तु चतुर्थकम् ।
सदाशिवोमितिज्ञेयं पञ्चमं त्विति कीर्तितम् ॥ ८५ ॥
एते चेशानरूपाश्च पंचसंख्याः प्रकीर्तिताः ।
तत्पुरुषायविद्महे प्रथमं परिकीर्तितम् ॥ ८६ ॥
महादेवायधीमहि तन्नोचेति द्वितीयकम् ।
रुद्रस्तृतीयामित्युक्तं चतुर्थं तु प्रचोदयात् ॥ ८७ ॥
एवं तत्पूरुषकलाश्चतस्र इति कीर्तिताः ।
अघोरेभ्यस्तथापूर्वं घोरेभ्यश्चाद्वितीयकम् ॥ ८८ ॥
घोरघोरस्तृतीयः स्यात् तरेभ्यश्च चतुर्थकम् ।
सर्वेभ्य.पञ्चमं विद्यात् षष्ठं सर्वमुदाहृतम् ॥ ८९ ॥
सर्वेभ्यश्च नमस्तेऽस्तु सप्तमं चेति कीर्तितम् ।
अष्टमं रुद्ररूपेभ्यश्चघोरस्याष्टकं स्मृतम् ॥ ९० ॥
प्रथंम वामदेवाय ज्येष्ठायेति द्वितीयकम् ।
तृतीयं रुद्रायनमः कालायेति चतुर्थकम् ॥ ९१ ॥
पञ्चमं कलइत्युक्तं ततो विकरणाय षट् ।
सप्तमं बलमित्युक्तमष्टमं विकरणाय च ॥ ९२ ॥
नवमं बलमित्युक्तं दशमं प्रमथनायच ।
सर्वभूतदमनाय नमश्चैकादशं स्मृतम् ॥ ९३ ॥
द्वादशं च मनश्चेति उन्मनाय त्रयोदशम् ।
एतास्त्रयोदश कला वामदेवेति कीर्तिताः ॥ ९४ ॥
सद्योजातं प्रपद्यामि प्रथमं परिकीर्तितत् ।
द्वितीयं सद्योजाताय वैनमश्चेति कीर्तितम् ॥
तृतीयं तु भवेचैव भवेनाति चतुर्थकम् ।
पञ्चमं चानादि भवे षष्ठं चैवभवस्वमाम् ॥ ९५ ॥
सप्तमंच भवोविद्यादुद्भवायाष्टमं भवेत् ।
एवमष्टकलाः प्रोक्ताः सद्योजात उदाहृताः
ईशानादीनि सद्यान्तान्यष्टत्रिंशत्कलाः स्मृताः
एवं तत्स्मृतिमात्रेण मूर्तं सकलरूपधृत् ॥ ९७ ॥
निष्कलं तदभावे तु तस्मात्सकलनिष्कलम् ॥

इति श्री *शिवतत्वरत्नाकरे* प्रथमकल्लोले
प्रणवलिंगस्वरूप तदुत्पन्न
वर्णकलास्वरूपनिरूपणं
नाम पञ्चमस्तरंगः

श्रीः

श्रीशिवतत्त्वरत्नाकरे

षष्ठ स्तरंगः

विश्वात्म[1]प्रभवात्सृष्टिं श्रुत्वा तुष्टोऽस्म्यहं प्रभो! ।
वेदनीयं च यत्तत्त्वं तत्स्वरूपं वदस्व मे ॥ १ ॥
नादादिसृष्टिं ते वच्मि शृणु त्वं प्रियनन्दन! ।
पिण्डमध्यगतः प्राणः प्राणमध्यगतो ध्वनिः ॥ २ ॥
ध्वनिमध्यगतो नादो नादमध्यगतश्शिवः ।
नादो लिंगमयःप्रोक्तो नादो गुरुमयस्तथा ॥ ३ ॥
नादः प्रणवरूपः स्यान्नादस्सादाख्यरूपकः ।
नादश्च ब्रह्मरूपं स्यान्नादस्सर्वत्र तिष्ठति ॥ ४ ॥
नादश्च शिवचैतन्यं नादो निर्मलतत्वकम् ।
तृणकाष्ठाणुरेण्वादिसर्वाचेतनचेतनः ॥ ५ ॥
अक्षरानक्षरात्मा च वेदशास्त्रागमस्मृतिः ।
पुराणादिमहातन्त्रं नादस्सर्वात्मकःस्मृतः ॥ ६ ॥
सप्तस्वरादि विद्याश्च वाद्यवीणादिभेदकम् ।
सर्वं नादमयं प्रोक्तं सुसूक्ष्मं गोपयेत्पुनः ॥ ७ ॥
ततं तन्त्र्यादिवाद्यं च विततं चर्मयोजितम् ।
घनं कांस्यादितालं च सुषिरं वेणुभाषितम् ॥ ८ ॥
इतः परं वदाम्यद्य तत्त्वत्रयमनिन्दितम् ।
तत्त्वं तु त्रिविधं ज्ञेयं तस्य भेदं शृणुष्व च ॥ १० ॥
शिवं सदाशिवं चैव महेशं त्रिविधं स्मृतम् ।
शिवतत्त्वं महासेन! निष्कलं चेतिकीर्तितम् ॥ ११ ॥
सकलं निष्कलं चैव सदाशिवमिहोच्यते ।
महेशं सकलं विद्यात्त्रिविधास्ते भवन्ति हि ॥ १२ ॥
शिवमेकं विजानीयात् सादाख्यं पञ्चधा भवेत् ।
महेशं तु महासेन! पञ्चविंशतिभेदकम् ॥ १३ ॥

[1] प्रणवसृष्टि.

शिवं परात्परं सूक्ष्मं नित्यसर्वगताव्ययम् ।
अनिन्दितमनौपम्य मप्रमाणमगोचरम् ॥ १४ ॥
शुद्धत्वाच्छिवमुद्दिष्टं परादूर्ध्वं परात्परम् ।
व्योमातीतं हि सूक्ष्मं च नित्यं कारणकारणम् ॥ १५ ॥
व्याप्तं सर्वगतं प्रोक्त[1]मक्षयं चाव्ययं भवेत् ।
अमलं चानिन्दितं स्यादनौपम्यमसाम्यकम् ॥ १६ ॥
प्रमाणाद्व्यतिरिक्तत्वादप्रमाणमिति स्मृतम् ।
सकलं निष्कलं चैव सदाशिवमिहोच्यते ॥ १७ ॥
निर्गुणत्वाद्विशेषेण ह्यनामयमिति स्मृतम् ।
सदाशिवस्तथेशश्च ब्रह्मेशश्चेश्वरःस्मृतः ॥ १८ ॥
ईशानश्चेति पञ्चैव तत्त्वभेदाः प्रकीर्तिताः ।
शिवं सदाशिवं ज्ञेयममूर्तं चेश उच्यते ॥ १९ ॥
मूर्तं ब्रह्मेति विज्ञेयं तत्र चैवेश्वरस्स्मृतः ।
ईशानः कर्मसादाख्यं पञ्चसादाख्यमुच्यते ॥ २० ॥
शान्त्यतीता पराशक्तिः तस्याः पर्यायवाचकौ ।
पराशक्तिदशांशेन शिवसादाख्यसंभवः ॥ २१ ॥
पराशक्त्युद्भवत्वाच्च शुद्धत्वाच्छिव उच्यते ।
प्रसादं सूक्ष्मरूपं च ज्योतीरूपमिति स्मृतम् ॥ २२ ॥
विद्युद्रूपमिवाकाशे प्रत्यक्षं सर्वतोमुखम् ।
शिवतत्त्वमिदं प्रोक्तं तत्त्वानामखिलालयम् ॥ २३ ॥
शिवसादाख्यमित्युक्तममूर्तं च ततःशृणु ।
शान्तिश्चैवादिशक्तिश्च तस्याः पर्यायवाचकौ ॥ २४ ॥
आदिशक्तिदशांशेनह्यमूर्तस्य समुद्भवः ।
आदिश[2]क्तिरमूर्तत्वादमूर्तं चेति कीर्तितम् ॥ २५ ॥

[1] मक्षीणं. [2] क्ते.

अमूर्तत्वात्कलाहीनं तद्रूपं लिंगमुद्भवम् ।
सूर्यकोटिप्रतीकाशं ज्योतिःस्तम्भाकृतिस्थितम् ॥ २६ ॥
तस्याभ्यन्तर्गतामूर्तिरमूर्तत्वादगोचरम् ।
एतद्वै लिंगरूपं तु मूलस्तम्भमिहोच्यते ॥ २७ ॥
लिंगात्सर्वं समुत्पन्नं लयस्तस्मिन् प्रकीर्तितः ।
अमूर्तमेवमाख्यातं मूर्तंचापि ततः शृणु ॥ २८ ॥
इच्छाशक्तिश्च विद्या च तस्याः पर्यायवाचकौ ।
तच्छक्तेस्तु दशांशेन मूर्तसादाख्यसंभवः ॥ २९ ॥
इच्छाशक्तेर्गुणत्वाच्च तस्मान्मूर्तमुदाहृतम् ।
मूर्तत्वाच्च कलायुक्तं रूपं चेति प्रकीर्तितम् ॥ ३० ॥
ज्वालाग्नि सदृशप्रख्य दिव्यलिंगाकृतिर्भवेत् ।
तस्यार्धार्धैकभागे तु ह्येकवस्त्रसमन्वितम् ॥ ३१ ॥
त्रिनेत्रं चारुवदनं सर्वावयवसंयुतम् ।
एकमेकाननोपेतं दिव्यलिंगाकृतीरितम् ॥ ३२ ॥
ज्ञानं चेति प्रतिष्ठा च तस्याः पर्यायवाचकौ ।
ज्ञानशक्तिदशांशेन कर्तृसादाख्यसंभवः ॥ ३३ ॥
ज्ञानं कर्तृस्वभावत्वात्कर्तृनामेति कीर्तिनम् ।
ज्ञानं हि शुद्धभावत्वात् स्फटिकाभास उच्यते ॥ ३४ ॥
दिव्यलिंगं महादीर्घं महास्थूलतयान्वितम् ।
तस्य मध्ये स्थिता मूर्ति रीश्वरस्सर्वकारणम् ॥ ३५ ॥
पञ्चमूर्ध चतुर्वक्त्रं नेत्रैर्द्वादशभिर्युतम् ।
चतुरास्यं चतुर्वर्णं वसुश्रोत्रसमन्वितम् ॥ ३६ ॥
अष्टहस्तं द्विपादं च सर्वलक्षणसंयुतम् ॥
शूलं परशुखड्गौ च त्वभयं दाक्षिणे करे ॥ ३७ ॥
पाशनागौ च घण्टा च वरंवै वामहस्तके ।
सर्वावयवसंयुक्तं सर्वाभरणभूषितम् ॥ ३८ ॥
एवं तथैश्वरं प्रोक्तं कर्तृलिंगमिहोच्यते ।
कर्तृसादाख्यमित्युक्तं कर्मसादाख्यमुच्यते ॥ ३९ ॥
निवृत्तिस्स्यात् क्रियाशक्तिस्तस्याः पर्यायवाचकौ ।
क्रियाशक्तिदशांशेन कर्मसादाख्यसंभवः ॥ ४० ॥
क्रिया कर्मेतिविज्ञेया तस्मात्कर्मेतिनामतः ।
लिंगपीठप्रकारेण कर्मसादाख्यसंभवः ॥ ४१ ॥
नादो लिंगमितिज्ञेयं बिन्दुःपीठमुदाहृतम् ।
बिन्दुनादयुतं रूपं लिंगाकारमिहोच्यते ॥ ४२ ॥
लयादिभेदः प्रागुक्तो य उपाधौ शिवस्य तु ।
सबिन्दुरिति मन्तव्य सैवकुण्डलिनी मता ॥ ४३ ॥
चत्वारि कर्तृरूपादि केवलं नादउच्यते ।
लिंगं शिव इति ज्ञेयं पीठं शक्तिरुदाहृता ॥ ४४ ॥
योनिलिंगप्रकारेण जगत्सृष्ट्यर्थकारणम् ।
तथा संयोगभावस्य तत्त्वं कर्मेत्युदाहृतम् ॥ ४५ ॥
बिन्दुमध्यगतो नादो नादमध्ये तु मूर्तयः ।
मूर्तिमध्यगतं तत्त्वं तत्त्वमध्यगतश्शिवः ॥ ४६ ॥
एतत्तत्त्वमयं लिंगं सर्वतत्त्वालयं विदुः ।
लिंगेन जायते तत्त्वं जगत् स्थावरजंगमम् ॥ ४७ ॥
तस्माल्लिंगविशेषेण कर्मरूपमुदाहृतम् ।
कर्मोदये च सृष्टिस्स्यात्कर्मान्ते संहृतिर्भवेत् ॥ ४८ ॥
एतत्तत्त्वस्वरूपं तु सृष्टिस्थितिलयावहम् ।
पंचसादाख्यमेवोक्तं कर्मसादाख्यमुच्यते ॥ ४९ ॥
इत्येवं पंचसादाख्यं लक्षणं समुदीरितम् ।
सादाख्यं पंचधैवोक्त मीश्वराष्टकमेव च ॥ ५० ॥
पंचविंशति माहेशो रुद्रा एकादश स्मृताः ।
त्रिमूर्तिरंग त्रितयं द्विपञ्चाशच्च मूर्तयः ॥ ५१ ॥
(भूम्यां भवो जले शर्वश्चाग्नौ रुद्रस्तथैवच)
वायौ भीमो महादेव स्त्वाकाशे च दिवाकरे ।
उग्रस्सोमश्शशांके च जीवात्मनि महीशितुः ॥ ५२ ॥
एताः पशुपतेश्चाष्टमूर्तयस्स्युरिति श्रुतिः ।
प्रथमं सोमधारी च द्वितीय मुमयासह ॥ ५३ ॥
तृतीयं वृषभारूढं चतुर्थं नर्तकोपमम् ।
वैवाहं पञ्चमं विद्यात् षष्ठं भिक्षाटनं भवेत् ॥ ५४ ॥
कामारिः सप्तमं विद्यात् कालारिश्चाष्टमं तथा ।
नवमं त्रिपुरारिस्याज्जलन्धरवधो दश ॥ ५५ ॥
एकादशमजारिःस्याद् द्वादशं वीरभद्रकम् ।
त्रयोदशहरिध्वंसी त्वर्धनारी चतुर्दशम् ॥ ५६ ॥
किरातः स्यात्पंचदशं कंकाली षोडशं भवेत् ।
चण्डेशानुग्रहश्चैव तथासप्तदशं भवेत् ॥ ५७ ॥

विषापहरणं चैव मष्टादशमिति स्मृतम् ।
चक्रदानस्वरूपं च स्मृतमेकोनविंशकम् ॥ ५८ ॥

विघ्नप्रसादो विंशस्स्यादुमास्कन्दैकविंशकम् ।
द्वाविंशमेकपादं स्यात् त्रयोविंशं सुखावहम् ॥ ५९ ॥

दक्षिणामूर्तिरूपं च चतुर्विंशमितिस्मृतम् !
लिंगोद्भवस्वरूपं तु पंचविंशं प्रकीर्तितम् ॥ ६० ॥

एतेषां तत्त्वसंयुक्त मेकत्रिंशमितिस्मृतम् ।
इतिमाहेशलीलास्तु पञ्चविंशतिरीरिताः ॥ ६१ ॥

शिवो महेश्वरश्शम्भुः श्रीकण्ठो भव ईश्वरः ।
महादेवः पशुपतिर्नीलकण्ठो वृषध्वजः ॥ ६२ ॥

परमेश इमे रुद्रा एकादश समीरिताः ।
इत्येकादशरुद्राणांविभेदाउपवर्णिताः ॥ ६३ ॥

सृष्टिकारणरूपोऽयं भवाख्य इति संस्मृतम् ।
रक्षणार्थे मृडाख्यश्च हरस्संहारकारणम् ॥ ६४ ॥

इति तिस्रो मूर्तयश्च समाख्याताः क्रमादिह ।
द्विपञ्चाशन्मूर्तिरूपास्सादाख्येन समुद्भवाः ॥ ६५ ॥

इति सादाख्यसंभूता सृष्टिस्समुपवर्णिता ॥

इति श्री *शिवतत्वरत्नाकरे*
नादतत्वत्रयद्विपञ्चाश-
न्मूर्ति भेदप्रदर्शनं
नाम षष्ठस्तरंगः

श्रीः

श्रीशिवतत्त्वरत्नाकरे

सप्तम स्तरंगः

गुरो! सादाख्यसंभूता मूर्तिसृष्टिरितीरिता ।
माहेश्वराख्य मूर्त्यंशविलासप्राप्तिसंभवः ॥ १ ॥

विराट् पुरुष इत्युक्तः कीदृग्लक्षणसंयुतः ।
तत्त्वानि च द्विपञ्चाशत् कीदृशानीत्युदीर्यताम् ॥ २ ॥

तत्कुमार! ब्रुवे तुभ्यं यद्ज्ञातु मभिकाङ्क्षसे ।
माहेश्वरांशात् संजज्ञे विराट् पुरुषनामतः ॥ ३ ॥

सहस्रशीर्षा पुरुषस्सहस्राक्षतिरीश्वरः ।
सहस्रनयनो देवः सहस्रचरणश्शिवः ॥ ४ ॥

सहस्रबाहुर्विश्वात्मा त्रिशूली दीप्तलोचनः ।
दंष्ट्राकरालवदनः परब्रह्मात्मकश्शिवः ॥ ५ ॥

ब्राह्मणोऽस्य मुखमासी द्बाहूराजन्यकः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो ह्यजायत ॥ ६ ॥

चन्द्रमा मनसो जातश्चक्षोस्सूर्यो ह्यजायत ।
मुखादिन्द्रश्च अग्निश्च प्राणाद्वायुरजायत ॥ ७ ॥

नाभ्या आसीदन्तरिक्षं शीर्ष्णोद्यौस्समवर्तत ।
पद्भ्यां भूमिर्दिशःश्रोत्रात्तथालोकानकल्पयत् ॥ ८ ॥

जठरे लीयते सर्वं जगत् स्थावरजंगमम् ।
पुनरुत्पद्यते तस्माद् ब्राह्मणाद्यं चराचरम् ॥ ९ ॥

अनादिरुद्रमूर्तिस्तु सृष्टिस्थितिलयाधिपः ।
तत्त्वान्यनेन रुद्रेण जातानीत्युच्यते शृणु ॥ १० ॥

कला विद्या च रागश्च कालो नियतिरेवच ।
भावको बोधकश्चैव ईश्वरश्च सदाशिवः ॥ ११ ॥
शक्तिश्च शिव इत्युक्तं तत्त्वमेकादशं स्मृतम् ।
पृथग्भिन्नानि तत्त्वानि द्विपञ्चाशत्प्रभेदतः ॥ १२ ॥
कला पञ्चविधा जाता अविद्या पञ्चधा पुनः ।
रागश्च त्रिविधः प्रोक्तः कालस्त्रिविध एवच ॥ १३ ॥
नियति ष्षट्प्रकाराच भावको दशधास्मृतः ।
बोधकं द्विविधं भूय ईश्वरस्त्रिविधः स्मृतः ॥ १४ ॥
सदाशिवः पञ्चविधः साशक्तिः पचधाभवेत् ।
शिवतत्त्वं पञ्चविधं द्विपञ्चाशच्च तत्त्वकम् ॥ १५ ॥
शान्त्यतीताच शान्तिश्च विद्याचैव प्रतिष्ठिका ।
निवृत्तिश्चेति पञ्चैव कलाइत्युपवर्णिताः ॥ १६ ॥
तनुरज्ञानमोहौ च माया चावृतमेव च ।
एवं पञ्चविधा विद्या सर्वजीवाश्रिता भवेत् ॥ १७ ॥
रागश्चैव विरागश्च समराग स्त्रिधातथा ।
रागतत्त्वमिति प्रोक्तं कालतत्त्वं ब्रवीम्यहम् ॥ १८ ॥
भूतो भावी वर्तमान इति काल त्रिधामतः ।
आयुः कर्म च वित्तं च विद्या निधनमेव च ॥ १९ ॥
कालतत्वात्सुखं चेति षड्विधा नियतिःस्मृता ।
रतिर्हासश्च शोकश्च क्रोध उत्साह एव च ॥ २० ॥
भयं जुगुप्सितं चैव विस्मयो वीरएवच ।
कारुण्यं चेति कथ्यन्ते भावैकादश भेदतः ॥ २१ ॥
माया निर्मायेति चोक्तं द्विविधं बोधकं तथा ।
सत्वं रजस्तमश्चेति त्रिविधश्चेश्वरःस्मृतः ॥ २२ ॥
शिवन्त्वमूर्तिर्मूर्तिश्च कर्तृकर्मेति पञ्चधा ।
सदाशिव इति प्रोक्तः शक्तिभेदमतः शृणु ॥ २३ ॥
पराशक्ति स्तथादिश्च इच्छाज्ञानं क्रिया तथा ।
शक्तितत्त्वं पञ्चविधमितिगोप्यं मम प्रिये! ॥ २४ ॥
सच चिच तथाऽनन्दो नित्यं पूर्णमिति क्रमात् ।
शिवतत्वं पञ्चविधं तद्भेदं शृणु पार्वति! ॥ २५ ॥
इति रुद्रा द्विपञ्चाशत्तत्वानि क्रमशोऽभवन् ।
संस्तूयमानोदीप्तांगैर्देवैर्मुनिगणैस्तथा ॥ २६ ॥
धृतत्रिपुण्ड्को दिव्यरुद्राक्षैश्चापि भूषितः ।
सततं शुशुभे विष्णुर्भस्मादिग्धतनूलतः ॥ २७ ॥
इन्द्रनीलमयं लिंगं विष्णुः पूजयते सदा ।
विष्णुत्वं प्राप्तवांस्तेन साद्भुतैकं सनातनम् ॥ २८ ॥
यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपिवा ।
अन्तर्बहिश्चतत्सर्वंव्याप्यनारायण स्थितः ॥ २९ ॥
विष्णुमायात्मकामिदं जगत्स्थावरजंगमम् ।
जनार्दनस्यमूर्ध्नोऽपि पञ्चतत्वसमुद्भवः ॥ ३० ॥
तस्य वक्त्राच्च संभूतादेवा दैत्या दिशो दश ।
तद्विष्णोर्जठराच्चैव सर्वलोकसमुद्भवः ॥ ३१ ॥
आदित्या द्वादशविधा इन्द्रश्चन्द्रो मनुस्तथा ।
चराचराणि सर्वाणि बभूवुर्गरुडध्वजात् ॥ ३२ ॥
जनार्दनसहस्रांशाद् ब्रह्मा लोकपितामहः ।
पितामहश्च सकलं जगत्स्थावरजंगमम् ॥ ३३ ॥
कालः कला च नियतिः साक्षान्मायोद्भवानि च ।
कलातत्वाद्रागविद्ये द्वेतत्वे संबभूवतुः ॥ ३४ ॥
पञ्चकंञ्चुकसंयुक्तः प्रकृतिं भोक्तुमुद्यतः ।
अविद्यादि समायुक्तः पूरुषः परिकीर्तितः ॥ ३५ ॥
अथ प्रकृतितत्वं तु क्रमप्राप्तं निरूप्यते ।
तच्च मायोद्भवं यस्मात् कलातः स्थूलतां जगत् ॥ ३६ ॥
अथ प्रकृतितत्वात्तु गुणतत्वमजायत ।
सत्वादीनां समावस्थां प्राप्तस्सत्वगुणात्मकः ॥ ३७ ॥
क्षोभकोऽत्र महातेजाः श्रीकण्ठोऽनन्तविक्रमः ।
प्रबुद्धः परमेशानः शक्तिसंपर्कमात्रतः ॥ ३८ ॥
गुणतत्वात्मिका बुद्धिरभवन्मुनिपुंगव! ।
सच त्रिविध उद्दिष्टः प्रथमस्तत्र तैजसः ॥ ३९ ॥
वैकारिको द्वितीयस्स्यात् तथाभूतादिकोऽपरः ।
सत्वेनोत्कृष्टभावो यःसतैजस इहोच्यते ॥ ४० ॥
वैकृतो रजसोत्कृष्टो भूतादिस्तमसाधिकः ।
तैजसादप्यहंकारान्मनो बुद्धीन्द्रियाणि च ॥ ४१ ॥
पंच कर्मेन्द्रियाणि स्यु रहंकारात्तु वैकृतात् ।
अहंकाराच्च भूतादेर्जाता तन्मात्रसंहतिः ॥ ४२ ॥

महाभूतानि जायन्ते क्रमात्तन्मात्रपञ्चकात् ।
आकाशं पवनस्तेजः तोयं भूरितिसंज्ञया ॥

एतेषां गगनादीनां भूतानां पृथगंशकैः ।
अन्योन्यमेलनात्तत्वान्यभूवन् पञ्चविंशतिः ॥ ४३ ॥
क्रमस्स कथ्यते भूतविभागान्योन्ययोगयोः ।
एकैकं द्विविधं कृत्वा तत्रैकैकं पृथग्दिशेत् ॥ ४४ ॥
निष्ठैकैकं समादाय पुनश्च विभजेद् द्विधा ।
द्विधा विभक्ते तत्रैकं संस्थाप्यान्यं चतुर्विधम् ॥ ४५ ॥
कुर्यादेवं विभागे स्याद् भूतमेकं तु षड्विधम् ।
स्थूलांशान् पञ्चभूतानां पृथगेव विनिक्षिपेत् ॥ ४६ ॥
पञ्चविंशति तत्वानि भूतांशैः पञ्चपञ्चभिः ।
व्योम्नि व्योमांशतो ज्ञानं व्योम्नि वाय्वंशतो मनः ॥ ४७ ॥
व्योम्नि तेजोंशतो बुद्धिर्व्योम्नि चित्तं जलांशतः ।
व्योम्नि क्ष्मांशादहंकार इत्याकाशजपंचकम् ॥ ४८ ॥
वायौ वाय्वंशतो व्यानो वायौ व्योम्नस्समानकः ।
वाया वुदानस्तेजोंशादपानो वाय्ववंशजः ॥ ४९ ॥
वायौ भूम्यंशतःप्राण इति वायुजपंचकम् ।
तेजस्तेजोंशतश्चक्षु स्तेजोव्योमांशतः श्रुतिः ॥ ५० ॥
तेजो वाय्वंशतस्तस्या जिह्वा तेजो जलांशतः ।
तेजो भूम्यंशतो घ्राणमिति तैजसपंञ्चकम् ॥ ५१ ॥
अप्सु स्वांशाद्रसोत्पत्तिश्शब्दोऽप्सु गगनांशतः ।
अप्सु वाय्वंशतस्स्पर्शो रूपमप्सु तु तेजसः ॥ ५२ ॥
अप्सु भूम्यंशतो गंधइत्यप्संभूतपंचकम् ।
भूमौ भूम्यंशतःपायुर्भुवो व्योमांशतस्तु वाक् ॥ ५३ ॥
भूमौ वाय्वंशतः पाणिःपादौ भूमौ तु तेजसः ।
भूमौ जलांशेनोपस्थमिति भूमिजपञ्चकम् ॥ ५४ ॥
व्योम्नो ज्ञानं तथा व्यानश्चक्षुश्च रसपायुकौ ।
वायोर्मनस्समानौ च श्रोत्रं शब्दश्चवागपि ॥ ५५ ॥

तेजसो बुद्ध्युदानौ च त्वक्स्पर्शः पाणिरित्यपि ।
अद्भ्यश्चित्तमपानश्च जिह्वा रूपं च पादकः ॥ ५६ ॥
भूमेरहंकृतिः प्राणो घ्राणो गन्ध उपस्थकम् ।
पंचविंशति तत्त्वानि भूतैरेवं तु जज्ञिरे ॥ ५७ ॥
स्थूलांशः (पञ्चभूतानां ब्रह्माण्डं परिकीर्तितम्)
सूक्ष्मांश एव पिण्डाण्डमिति शास्त्रेषु निश्चयः ।
उदीरितो य एवार्थः पार्वत्यै शंभुना पुरा ॥ ५८ ॥
स एवार्थो मया प्रोक्तस्तत्संवादात्मना स्थितः ॥

इति श्रीमदनाद्यनन्त सकलतत्त्वोत्तीर्ण षडध्वो[1]) पादान बिन्दुकारण चिदम्बरशक्तिसमन्वित परमेश्वरप्रसादासादित शिवाद्वैतविद्याविशारद श्रीमत्केळदि *वसवराजेन्द्र*विरचित वेदागमान्तर्गत विविधविद्यातत्त्वसारभूत *शिवतत्वरत्नाकरे* प्रथमकल्लोले *विराट्पुरुषादि मूर्तित्रयस्वरूप तत्वप्रभेद पंचीकरण विभागप्रदर्शनं*नाम सप्तमस्तरंगः

एवं सप्ततरंगेषु भुवनोदयधामसु ।
नवोत्तरापञ्चशती पद्यानामिह संख्यया ॥
वेदागमपुराणानां सारसंग्रहरूपकम् ।
वीरशैवशिखारत्नं शैवामृत पुराणकम् ॥
दशांगसृष्ट्युद्धरणवाक्यग्रन्थं विलोक्य च ।
तथैव चानादिवीरशैवाचारस्य संग्रहम् ॥
निर्मितोऽयमभूदाद्यः कल्लोलस्सुधियां मुदे ॥
श्रीमत्सद्गुण **सोमशेखर** लसच्चन्नाम्बिकासूनुना
श्रीदीक्षागुरु **चेन्नवीर** करसंजातेन गौरीपतेः ।
भूयः पूर्णकृपाजुषा **वसवराजेन्द्रेण** क्लृसे पुनः
कल्लोलः परिपूरितः कृतिवरे त्वस्मिन्नभूदादिमः ॥

इति श्री **वसवराजीये** प्रथमकल्लोलस्समाप्तः

---

[1]) थों.

श्रीः

श्रीशिवतत्त्वरत्नाकरे

द्वितीयकल्लोले

प्रथमस्तरंगः.

हारीभूतफणीन्द्रमौलिमणिषु च्छायां विलोक्यात्मनो
रुष्टामन्यवधूभ्रमेण दधतीं हन्तुं करस्योद्यमम् ।
छायास्वीदृशचेष्टितासु च तवावष्टम्भ इत्यूचिषीं
बुध्वैतद्विनतां ह्रियाथ गिरिजां श्लिष्यन् शिवः पातु व[1] ।
योगिनामप्यगम्योऽर्थः स्वामिन्! साधु निरूपितः
तवान्तःकरणादर्शे स्वत एव हि बिम्बिताः ॥ १ ॥
दुर्ज्ञेया अपि सिद्धान्ताः प्रतिभान्ति सहस्रशः ।
पूर्वं बहुविधा सृष्टिः कर्तृभेदेन वर्णिता ॥ २ ॥
अधुना भूतसंघानां ब्रह्माण्डस्य प्रपञ्चना ।
तदन्तर्वर्तिनां चैव लोकानां च स्थितिं क्रमात् ॥ ३ ॥
तेषां भेदान्प्रमाणं च दयया मयि कीर्तय ।
त्वया यदनुयुक्तं तदधुना कीर्त्यते शृणु ॥ ४ ॥
पंचविंशति तत्वैस्तु परस्परविमिश्रितैः ।
अचिन्त्यशक्तितश्शम्भुर्ब्रह्माण्डं समजीजनत् ॥ ५ ॥
शतकोटिप्रमाणं च ब्रह्माण्डमिदमुच्यते ।
जालसूर्यमरीचिस्थस्सूक्ष्मो यः परिदृश्यते ॥ ६ ॥
त्रसरेणुरितिख्यात सर्वशास्त्रेषुः सम्मतः ।
रजोवासाग्रविक्षाश्च यूकश्चैव यवोदरम् ॥ ७ ॥
अङ्गुलं तद्विजानीयादष्टधा वृद्धिमाग्भवेत् ।
चतुर्विंशत्यङ्गुलानि हस्तस्तु परिकीर्तितः ॥ ८ ॥
चतुर्हस्तं तु चापस्स्यात् क्रोशस्तद्द्विसहस्रकम् ।
योजनं तच्चतुष्कं चेत्येवं मानविभेदतः ॥ ९ ॥
एतस्य शतकोटिस्तु ब्रह्माण्डे मानमुच्यते ॥
केचिच्चापद्वयं दण्ड. क्रोशस्तद्द्विसहस्रकम् ॥
योजनं तच्चतुष्कं चेत्येवं मानविभेदतः ॥
पंचाशत्कोटिविस्तारं ब्रह्माण्डमिदमूचिरे ।
घनवृत्तसमाकारगोलकाकृति हैमकम् ॥ १० ॥

[1] नः

अथास्य मध्ये कालाग्निः द्वात्रिंशन्नरका[1]स्तथा ।
कूश्मांण्डस्सप्तपातालं हाटकाख्यस्ततः परम् ॥ ११ ॥
भूर्भुवस्स्वर्महस्तस्माज्जनलोकस्तपस्ततः ।
तस्य वैकुण्ठशैवाख्या लोकानेतान् विदु बुधाः ॥ १२ ॥
लोकत्रयं वदन्त्यन्ये पातालं पृथिवीं तथा ।
स्वर्गश्चेति प्रभेदेन लोकांस्तानेव च त्रिधा ॥ १३ ॥
एतेषु नित्यं तिष्ठन्ति [2]स्वर्गलोके तु वेधसः ।
प्रथमो महतस्सर्गो विज्ञेयो ब्रह्मणस्तु यः ॥ १४ ॥
तन्मात्राणां द्वितीयस्तु भूतसर्गस्स उच्यते ।
वैकारिकस्तृतीयस्तु सर्ग ऐन्द्रियक स्तु सः ॥ १५ ॥
इत्येष प्राकृतस्सर्गः संभूतो बुद्धिपूर्वकः ।
मुख्यसर्ग श्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः ॥ १६ ॥
तिर्यक्स्रोतस्तु यःप्रोक्तः तिर्यग्योनिस्स उच्यते ।
तथोर्ध्वस्रोतसष्षष्ठो देवसर्गस्स च स्मृतः ॥ १७ ॥
ततोऽर्वाक्स्रोतसां सर्गस्सप्तमस्स तु मानुषः ।
अष्टमो नु महस्सर्गस्सात्विकस्तामसस्तु सः ॥ १८ ॥
पञ्चैते वैकृतास्सर्गाः प्राकृतास्तु त्रयस्स्मृताः ।
प्राकृता वैकृताश्चैवं कौमारो नवमस्स्मृतः ॥ १९ ॥
इत्येते वै समाख्याता नवसर्गाः प्रजापतेः ।
प्राकृता वैकृताश्चैव जगतो मूलहेतवः ॥ २० ॥
त्रिकालं च त्रिसंध्या च दिवारात्रिचतुष्टयम् ।
वेदा मन्त्राश्च यज्ञाश्च सिद्धयो ज्ञानषट्क्रियाः ॥ २१ ॥
समयाष्षड्गुणाश्चैव स्त्रीपुंसक्लीबकं तथा ।
उत्पत्तिस्थितिसंहारास्सस्यानि च फलानि च ॥ २२ ॥
विद्युदप्सरसो मेघाः क्रिमिकीटसरी[3]सृपाः
चतुष्पादा द्विपादाश्च षट्पदाश्च मृगास्तथा ॥ २३ ॥
अण्डजा स्वेदजाश्चैव उद्भिज्जाता जरायुजाः ।
जलजा नव लक्षाणि स्थावराणां तु विंशतिः ॥ २४ ॥

[1] अपि. [2] सर्गा. [3] कीटकसर्पकाः.

क्रुमयो रुद्रसंख्याका: पक्षिणां दशलक्षकम् ।
त्रिंशल्लक्षाणि पशवश्चतुर्लक्षं तु मानवा: ॥ २५ ॥
चतुरभ्यधिकाशीति लक्षाणि प्राणिजातय: ।
एवं नानाविधा जीवा ब्रह्माण्डान्तर्निवासिन: ॥ २६ ॥
ब्रह्मणोऽण्डस्य विस्तारं शतकोटिसमुच्छ्रयम् ।
विस्तरेण प्रवक्ष्यामि समाहितमना: शृणु ॥ २७ ॥
अध: कटाहस्योच्छ्राय एककोटिक उच्यते ।
तस्योपरि महान् लोक: कालाग्निरितिनामत: ॥ २८ ॥
कोटिषोडशकश्चैव तदुच्छ्राय: प्रकीर्तित: ।
तदन्त: काञ्चनं धाम कालाग्ने: कोटिरेवतु ॥ २९ ॥
यत्रांतकालतीक्ष्णांशुकोटितेजस्तथा विधै: ।
रुद्रैरास्ते वृत्तो देव: कालाग्निरिति विश्रुत: ॥ ३७ ॥
ईश्वर: पिंगल: काल: क्रोधनो ज्वलनश्चल: ।
धनदश्शंकरोऽनन्तपद्मो दिक्ष्वध ऊर्ध्वत: ॥ ३१ ॥
सर्वोर्ध्ववर्ति भूतानां यस्मिन्नुद्वृत्ततेजसा ।
भयमुत्पद्यते शक्त्या संहर्त्र्यां [1]बोधिते [2]प्रभौ ॥ ३२ ॥
तस्य स्वभावतो ज्वाला प्रवृत्ता दशकोटिश: ।
योजनानां तदर्धेन धूमस्सान्द्रोऽति दारुण: ॥ ३३ ॥
कालाग्निभुवनादूर्ध्वं तस्यान्तर्व्यास उच्यते ।
द्वात्रिंशत्कोटयश्चैव योजनानां तत:परम् ॥ ३४ ॥
लक्षाण्यपि चतुश्चत्वारिंशत्परिमितानि तु ।
त्रिंशत्सहस्रकं चैव दशोत्तरशताष्टकम् ॥ ३५ ॥
तत:पुटास्त्रयास्त्रिंशत् प्रत्येकंच तदुच्छ्रय: ।
लक्षाणि नवतिश्चैव द्वात्रिंशच्च सहस्रकम् ॥ ३६ ॥
शतं विंशतिरेकञ्च योजनानामुदीरित: ।
अन्तरालं पुनस्तेषां प्रत्येकं लक्षमेककम् ॥ ३७ ॥
द्वात्रिंन्नरकास्तेतु कीर्त्यन्ते नामतोऽधुना ।
रौरवध्वान्तशीतोष्णतापांबुजमहांबुजा: ॥ ३८ ॥
कालसूत्रोऽष्टमोह्येते नरका इति विश्रुता: ।
सूच्यग्रकालखड्गाश्च क्षुरधारांबरीषकौ ॥ ३७ ॥
तप्तांगारमहादाहौ संतापश्चेतियेमुने!
[3]भ्रमत्यष्टासु बीभत्सा महाशब्दभयानुगा: ॥ ३८ ॥

1) चोदिते. 2) प्रभो. 3) भवन्त्यष्टौ.

लाक्षाप्रलेपमांसादानिरुछ्वसनसोछ्वसा: ।
युग्माद्रिशाल्मलीलोह प्रदीपक्षुत्पिपासिका: ॥ ३९ ॥
क्रुमीणां निचयश्चैव राजान: परिकीर्तिता:
लोहस्तम्भोऽथ विण्मूत्रे तथा वैतरणी नदी ॥ ४० ॥
तामिस्रश्चान्धतामिस्र: कुम्भीपाकश्चरौरव: ।
महापदानुगामी च राजराजेश्वराह्वय: ॥ ४१ ॥
त्रयस्त्रिंशत्पुटे [1]ष्वधं पार्थिवंचार्धमायसम् ।
तन्मध्ये नरका घोरा बहुशस्तमसि स्थिता: ॥ ४२ ॥
तेषां नरकभेदानामष्टाविंशतिकोटय: ।
एतेषां दारुणानान्तु नरकाणां पति: स्थित: ॥ ४३ ॥
कूश्माण्ड इति विख्यात: प्रळयार्कानलद्युति: ।
करालवदन:क्रुद्धो वृत्तकोटरलोचन: ॥ ४४ ॥
टंकपाणिस्तथाभूतैर्भूतैर्भूयोभिरावृत: ।
पापास्त्वेतेषु पच्यन्ते नरा: कर्मानुरूपत: ॥ ४५ ॥
यातनाभिर्विचित्राभिरापापप्रक्षयान्तकम् ।
प्रायश्चित्तोज्झिता दृप्ता निजधर्मपराङ्मुखा: ॥ ४६ ॥
परधर्मरताश्चोरा: पतन्ति नरकाग्निषु ।
महापातकिन: कल्पं तिष्ठन्ति नरकाग्निषु । ॥ ४७ ॥
मन्वन्तरं पातकिनो देवब्रह्मस्वहारिण: ।
उपपातकिनो मर्त्या देवदेवाग्नि यज्वनाम् ॥ ४७ ॥
द्विजगोगुरुधर्माणां निन्दका ब्रह्मणो दिनम् ।
अन्ये चतुर्युगं मर्त्यास्तदर्धं च नराधमा: ॥ ४९ ॥
तिष्ठन्ति नरके घोरे निजपापानुरूप्यत: ।
द्यूतस्त्रीविषयासक्ता ये धर्म [2]विकला: खला: ॥ ५० ॥
पतन्ति तेषु घोरेषु नरकेषु नराधमा: ।
न शृण्वन्ति च ये मूढा: साधूक्तं धर्मगौरवम् ॥ ५१ ॥
प्रत्यंक्ष केन तद्दृष्टं प्रत्युतेति वदन्ति च ।
कामलोभाभिभूताश्च बिडालव्रतिनस्तथा ॥ ५२ ॥
पापिष्ठा: कर्महीनाश्च जिह्वोपस्थपरायणा: ।
यतिनिन्दापरा ये च क्षेत्रतीर्थादिदूषका: ॥ ५३ ॥
पतन्ति तेषु ते मर्त्या: विवशा: पापबन्धना: ।
इहानुभूय निर्दिष्टमायुर्मर्त्यास्स्वयम्भुवा ॥ ५४ ॥

1) री. 2) विमुखा:

निमित्तं किंचिदासाद्य विमुच्यन्ते कलेवरैः ।
लभन्ते ते पुनर्देहं यातनीयं[1] स्वकर्मजम् ॥ ५५ ॥
तन्मात्रगुणसंपन्नं सुखदुःखोपभोगदम् ।
पापाःपापक्षयो यावत् पच्यन्ते नरकाग्निषु ॥ ५६ ॥

1) यातनार्ह.

आ मलप्रक्षयाद्वह्नौ ध्मायन्ते धातवो यथा ।
यावन्तो जन्तवस्स्वर्गभूपातालेषु सर्वतः ॥ ५७ ॥
तावन्त एव घोरेषु सन्त्यधो नरकाग्निषु ।

इति श्रीशिवतत्त्वरत्नाकरे द्वितीयकल्लोले प्रथमस्तरंगः

द्वितीयस्तरंगः.

नरकाणां प्रभेदाः प्राक्संग्रहेण समीरिताः ।
स्वामिन्नेतर्हि तानेव विस्तरेणोपवर्णय ॥ १ ॥
नरकास्तु कियन्तस्ते तेषु वा यातनाश्च काः ।
कीदृशास्तेषु बहुधा दुःखानुभवभागिनः ॥ २ ॥
एतत्सर्वं ममाचक्ष्व श्रोतुमिच्छामि विस्तरात् ।
पुत्र! ते व[1]र्ण्यते सर्वं यच्छ्रोतुमभिकांक्षसे ॥ ३ ॥
अष्टाविंशति रेवोक्ताः क्षिते[2]र्नरककोटयः ।
सप्तमस्य तलस्याधो घोरे तमसि संस्थिताः ॥ ४ ॥
घोराख्या प्रथमा कोटिः सुघोरतलसंस्थिता ।
अतिघोरा महाघोरा घोरघोरा च पंचमी ॥ ५ ॥
षष्ठी तरलताराख्या सप्तमी च भयावहा ।
अष्टमी कालरात्री च नवमी च भयोत्कटा ॥ ६ ॥
दशमी तदधश्चण्डा महाचण्डा ततोऽप्यधः ।
चण्डकोलाहला चान्या प्रचण्डा नरकाधिका ॥ ७ ॥
पद्मा पद्मवती भीमा भीमभीषणनायका ।
कराला विकाराला च वज्रा विंशतिका स्मृता ॥ ८ ॥
त्रिकोणा पंचकोणा च सुदीर्घा परिवर्तुला ।
सप्तभौमाष्टभौमा च दीप्ता यामेति चाष्टमी ॥ ९ ॥
इत्येता नामतःप्रोक्ता घोरा नरककोटयः ।
अष्टाविंशति रेवैताः पापानां यातनात्मनाम् ॥ १० ॥
तासां क्रमेण विज्ञेयाः पंचपंचैकनायकाः ।
प्रत्येकं सर्वकोटीनां नामतस्तान्निबोध मे ॥ ११ ॥

1) र्ण्ये. 2) क्षितौ.

रौरवः प्रथमस्तेषां रुदन्ते यत्र देहिनः ।
महारौरवको यत्र महान्तोऽपि रुदन्ति च ॥ १२ ॥
तमश्शीतं यथाचोष्णं पंचाद्या नायकास्मृताः
सुघोरस्सुतपस्तीक्ष्णः पद्मस्संजीवनश्शतः ॥ १३ ॥
महामांसो विलोमश्च सुभीमश्च कटंकटः ।
तीव्रवेषी करालश्च विकरालः प्रकम्पनः ॥ १४ ॥
महापद्मस्सुपद्मश्च कालवक्रश्च गर्जनः ।
सूचीमुखस्सुनेमिश्च खादकस्सुप्रपीडनः ॥ १५ ॥
कुम्भीपाकस्सुपाकश्च चक्रकश्चातिदारुणः ।
अंगारराशिभवन मसृक्पूयह्रदस्तथा ॥ १६ ॥
तीक्ष्णायस्तुण्डशकुनिर्महासंवर्तकस्तथा ।
सुतप्ताब्जस्सुलेपश्च पूतिमांसो द्रवत्रपु ॥ १७ ॥
उच्छ्वासश्च निरुच्छ्वासोः सुदीर्घः कूटशाल्मली ।
दरीष्टस्सुमहानादप्रभाव स्सुप्रभावनः ॥ १८ ॥
ऋक्षमेषवृकाश्शल्यसिंहव्याघ्रगजाननाः ।
श्वसूकराजमाहिष खरमेषहयाननाः ॥ १९ ॥
ग्रहकुम्भीरनक्रास्याः सर्पकूर्मास्यवायसाः ।
गृध्रोलूकजलूकाश्वशार्दूलकपिकर्कटाः ॥ २० ॥
गन्धकः पूतिवक्त्रश्च रक्ताक्षः पूतिमृत्तिकः ।
कणधूमस्तुषाग्निश्च कृमीणां निचयस्तथा ॥ २१ ॥
अमेध्यश्चाप्रतीकारो रुधिरान्नस्य भोजनम् ।
लालाभक्षमभक्षश्च सर्वभक्षस्सुदारुणः ॥ २२ ॥
जंकट स्सुविलासश्च विकटः कटपूतनः ।
अम्बरीषः कटाहश्च कष्टा वैतरणी नदी ॥ २३ ॥

सुतप्तलोहशयनमेकपादप्रतप्तकम् ।
असितालवनं घोरमस्थिभंगप्रपीडनम् ॥ २४ ॥
1)तिलातसीक्षुयन्त्राणि कूटपाशप्रमर्दनम् ।
महाचुल्ली सुचुल्ली च तप्तलोहमयी शिला ॥ २५ ॥
पर्वतक्षुरधाराख्यं तथा च मलपर्वतः ।
मूत्रविष्ठान्धकूपेषु क्षारकूपेषु पातनम् ॥ २६ ॥
मुसलोलूखलं यन्त्रं शिलाशकललांगलम् ।
तालपत्रासिगहनं महामशकमण्डपम् ॥ २७ ॥
सम्मोहनोऽस्थिभंगश्च तप्तशूलमयो गुडः ।
बहुदुःखं महादुःखं कश्मलं शमलं मलम् ॥ २८ ॥
हालाहलो विरूपश्च सुरूपश्च तमोनुगः ।
एकपादास्त्रिपादश्च तीव्रवीचिश्चरन्तिमः ॥ २९ ॥
अष्टाविंशतिरेवैते क्रमशः पंचकाःस्मृताः ।
कोटिनामानुपूर्व्येण पंचपंचैवनायकाः ॥ ३० ॥
रौरवाद्यं च वीर्यं च शतमेकन्तु सर्वतः ।
चत्वारिंशत्समधिकं महानरकमण्डलम् ॥ ३१ ॥
तेषु पापाः प्रपच्यन्ते नराः कर्मानुरूपतः ।
यातनाभिर्विचित्राभिराकर्म प्रक्षयाद् भृशम् ॥ ३२ ॥
सुगूढं हस्तयोर्बद्ध्वा तप्तशृङ्खलया नराः ।
महावृक्षाग्रशाखासु 2)गम्यन्ते यमकिंकरैः ॥ ३३ ॥
डोलिताश्चाति वेगेन निस्संज्ञा यान्ति योजनम् ।
अन्तरिक्षस्थितानां च लोहभारशतं ततः ॥ ३४ ॥
पादयोर्बध्यते तेषां यमदूतैर्महाबलैः ।
तेन भारेण महता भृशमाताडिता नराः ॥ ३५ ॥
ध्यायन्तस्स्वानि कर्माणि तूष्णीं तिष्ठन्ति विह्वलाः ।
ततस्तप्तैरग्निवर्णै र्लोहदण्डै स्सकण्टकैः ॥ ३६ ॥
हन्यन्ते किंकरैर्घोरै स्समन्तात्पापकारिणः ।
ततःक्षारेण दीप्तेन वह्नेरपि विशेषतः ॥ ३७ ॥
समन्ततः प्रलिप्यन्ते ताम्रेण च पुनः पुनः ।
द्रुतेनात्यन्तलिप्तेन क्षतांगा जर्जरीकृताः ॥ ३८ ॥
पुनर्विधाय चांगानि शिरःप्रभृति च क्रमात् ।
वार्ताकवत्प्रपच्यन्ते तप्ततैले कटाहके ॥ ३९ ॥

1) तीलासुक्षीक्ष · 2) दम्यन्ते.

विष्ठापूर्णे तथाकूपे कृमीणां निचये पुनः ।
मेदोसृक्पूयपूर्णायां वाप्यां क्षिप्यन्ति ते पुनः ॥ ४० ॥
भक्ष्यन्ते कृमिभिस्तीव्रैः लोहतुण्डैश्च वायसैः ।
श्वभिर्दंशैर्वृकैरुग्रैर्व्याघ्रैश्च विकृतैर्नरैः ॥ ४१ ॥
पच्यन्ते मत्स्यवच्चापि प्रदीप्तांगारराशिषु ।
प्रोतास्तीक्ष्णेषु शूलेषु नराः पापेन कर्मणा ॥ ४२ ॥
शैलपीठैरथाक्रम्य घोरैः कर्मभिरात्मजैः ।
तिलवत्संप्रपीड्यन्ते चक्राख्ये नरके नराः ॥ ४३ ॥
पच्यन्ते चातितप्तेषु लोहभाण्डेष्वनेकधा ।
तैलपूर्णकटाहेषु सुतप्तेषु पुनः पुनः ॥ ४४ ॥
सर्वेन्द्रियाणि समथ्य क्रमात्पापेन यातनाः ।
भवन्ति घोराः प्रत्येकं शरीरे तत्कृतेन च ॥ ४५ ॥
ये शृण्वन्ति गुरोर्निन्दां तेषां कर्णः प्रपूर्यते ।
अग्निवर्णैरयःकीलैस्तप्तैस्ताम्रादिकद्रुतैः ॥ ४६ ॥
त्रपुसीसारकूटाद्यैः क्षारेण जतुना पुनः ।
सुतप्ततीक्ष्णतैलेन वज्रलेपेन चान्ततः ॥ ४७
क्रमादापूर्यते कर्णो नरकेषु च यातनाः ।
अनुक्रमेण सर्वेषु भ्रमन्त्येतेषु यातनाः ॥ ४८ ॥
परदारांश्च पश्यन्ति लुब्धास्स्निग्धेन चक्षुषा ।
गुरोः कुर्वन्ति भ्रुकुटिं क्रूरनेत्राश्च ये नराः ॥ ४९ ॥
सूचीभिराग्निवर्णाभिस्तेषां चक्षुः 1)प्रविध्यते ।
क्षाराद्यैश्च क्रमात्सर्वैर्देहे सर्वाश्च यातनाः ॥ ५० ॥
स्पर्शलोभेन ये मूढा संस्पृशन्ति परस्त्रियः ।
तेषां तप्ताग्निवर्णाभि स्सूचीभिर्विध्यते करः ॥ ५१ ॥
ततः क्षारादिकैस्सर्वै शरीरमनुलिप्यते ।
यातनाश्च महाकष्टास्सर्वेषु नरकेषु च ॥ ५२ ॥
परिष्वजन्ति चात्युग्रं प्रदीप्तं लोहशाल्मलिम् ।
हन्यन्ते पृष्ठदेशेषु पुनर्भीमैर्महाबलैः ॥ ५३ ॥
दन्तुरेणातिकुण्ठेन क्रकचेन बलीयसा ।
शिरःप्रभृति पाट्यन्ते घोरैः कर्मभिरात्मजैः ॥ ५४ ॥
तेन तेनैवरूपेण हन्यन्ते पारदारिकाः ।
गाढमालिंग्यते नारी ज्वलन्ती लोहनिर्मिता ॥ ५५ ॥

2) नेत्रं प्रपूर्यते.

पूर्वाकारं ज्वलन्तं तं पूरुषं लोहनिर्मितम् ।
दुश्चारिण्यः स्त्रियो गाढमालिंगन्ति वदन्ति च ॥ ५६ ॥
किं प्रधावसिवेगेनं नते [1]मोहोऽस्ति सम्प्रति ।
लंघितस्ते यथा भर्ता पापं भुङ्क्ष्व तदाधुना ॥ ५७ ॥
लोहकुंम्भे विनिक्षिप्ताः सापिधाने शनैश्शनैः ।
मृद्वग्निना प्रपच्यन्ते स्वपापैरेव मानवाः ॥ ५८ ॥
उलूखलाद्यैः क्षोद्यन्ते प्रपीड्यन्ते शिलासु च ।
क्षिप्यन्ते चान्धकूपेषु दश्यन्ते भ्रमरैर्भृशम् ॥ ५९ ॥
क्रमिभिर्भिन्नसर्वांगाश्शतशो जर्झरीकृताः ।
सुतीक्ष्णक्षुरकूपेषु क्षिप्यन्ते तदनन्तरम् ॥ ६० ॥
महाज्वाले च नरके पापा पच्यन्ति सर्वतः ।
इतस्ततश्च धावन्ति दह्यमाना स्तदर्चिषा ॥ ६१ ॥
पृष्ठेनानीय जंघे द्वे विन्यस्ते स्कन्धयोजिते ।
तयोर्मध्येन चाकृष्य वाहुपृष्ठेन गाढतः ॥ ६२ ॥
वद्ध्वा परस्परं सर्वं सुदृढं पापरज्जुभिः ।
पिण्डवद्वं दशन्त्येनं भ्रमरास्तीक्ष्णलोहजाः ॥ ६३ ॥
मानिनां क्रोधिनां चैव तस्कराणां च दारुणाः ।
पिण्डवद्धास्मृतायाम्यहाज्वाले च यातनाः ॥ ६४ ॥
रज्जुभिर्वेष्टितांगाश्च प्रलिप्ताः कर्दमेन च ।
करीषवत्प्रपच्यन्ते [2]म्रियन्ते तेन ते तथा ॥ ६५ ॥
सुतीक्ष्णक्षारतोयेन कर्कशासु शिलासु च ।
आपापसंक्षयात्पापा घृष्यन्ते चन्दनं यथा ॥ ६६ ॥
शरीराभ्यन्तरगतै [3]स्सन्ततं क्रमिभिर्नराः ।
भक्ष्यन्ते तीव्रवदनै रादेह प्रक्षयाद्भृशम् ॥ ६७ ॥
क्रमीणां निचये क्षिप्ताः पूतिमांसस्य राशिषु ।
तिष्ठन्त्युद्विग्नहृदयाः पर्वता [4]भ्यन्तरार्दिताः ॥ ६८ ॥
सुतप्तवज्रलेपेन शरीरमुपलिप्यते ।
अधोमुखोर्ध्वपादाश्च वृतास्तप्यान्ति वह्निना ॥ ६९ ॥
वदनान्तः प्रविन्यस्तं सुप्रतप्तमयोगुडम् ।
ते खादन्ति पराधीना हन्यमानाश्चमुद्गरैः ॥ ७० ॥

[1] मोक्षोऽस्ति साम्प्रतम्. [2] तथातेन प्रयन्ति [3] सर्वतः [4] भ्यां च ताडिताः

ये शिवारामपुष्पाणि लोभात्संगृह्य पाणिना ।
जिघ्रन्ति मूढमनसो शिरसा धारयन्ति वा ॥ ७१ ॥
[1]आरोप्यते शिरस्तेषां सुतप्तैर्लोहशंकुभिः ।
ततःक्षारेण दीप्तेन तैलताम्रादिभिः क्रमात् ॥ ७२ ॥
शरीरे च महाघोराश्चित्रा नरकयातनाः ।
बहुधोत्पाट्यते जिह्वा येऽसत्याप्रियवादिनः ॥ ७३ ॥
संदंशेन सुतप्तेन प्रपीड्योरासि पादतः ।
मिथ्यागमप्रवक्तुश्च जिह्वाचास्य विनिर्गता ॥ ७४ ॥
क्रोशार्धजिह्वा विस्तीर्णैर्हलैस्तीक्ष्णैः प्रपाट्यते ।
निर्भर्त्सयन्ति ये क्रूरा मातरं पितरं गुरुम् ॥ ७५ ॥
तेषां वज्रजलूकाभिर्मुखमादश्यते यतः ।
ततःक्षारेण ताम्रेण त्रपुणा सिच्यते पुनः ॥ ७६ ॥
द्रुतैरापूर्यतेऽत्यर्थं तप्तलोहैश्च तन्मुखम् ।
इतस्ततः पुनर्धावन् बध्यते यमकिंकरैः ॥ ७७ ॥
ये निन्दन्ति महात्मानमाचार्यं धर्मदेशिकम् ।
शिवभक्तांश्च संमूढाः शिवधर्मं च शाश्वतम् ॥ ७८ ॥
तेषामुरसि कण्ठे च जिह्वायां दन्तसंधिषु ।
तालुन्योष्ठे च नासायां मूर्ध्नि सर्वांगसंधिषु ॥ ७९ ॥
अग्निवर्णास्सुतप्ताश्च त्रिशिखा लोहशंकवः ।
आरोप्यन्ते सुवहुशः स्थानेष्वेतेषु मुद्गरैः ॥ ८० ॥
ततः[2]क्षारेण तप्तेन ताम्रेण त्रपुणा पुनः ।
तप्तलोहादिभिस्सर्वै रापूर्यन्ते समन्ततः ॥ ८१ ॥
यातनाश्च महाचित्राः शरीरस्यापि सर्वतः ।
निश्शेषनरकेष्वेवं भ्रमन्ति क्रमशः पुनः ॥ ८२ ॥
ये गृह्णन्ति परद्रव्यं पद्भ्यां विप्रं स्पृशन्ति च ।
शिवोपकरणांगं च ज्ञानं च लिखितं क्वचित् ॥ ८३ ॥
हस्तपादघनैस्तेप्रामापूर्यन्ते समन्ततः ।
क्षार ताम्रादिभिर्दीप्तैर्दह्यन्ते क्रमशः पुनः ॥ ८४ ॥
नरकेषु च सर्वेषु विचित्रा देहयातनाः ।
भवन्ति बहुशः कष्टाः पाणिपादसमुद्भवाः ॥ ८५ ॥
ये शिवायतनारामवापीकूपमठांगणम् ।
उपद्रवन्ति पापिष्ठा नृपास्तत्र वसन्ति हि ॥ ८६ ॥

[1] आपूर्यते. [2] क्षु.

व्यायामोद्वर्तनाभ्यंगस्नानपानान्नभोजनम् ।
क्रीडनं मैथुनं द्यूतमशौचाद्याचरन्ति हि ॥ ८७ ॥

ते वधैर्विविधैर्घोरैरिक्षुयन्त्रादिपीडनैः ।
निरयाग्निषु पच्यन्ते यावदाचन्द्रतारकम् ॥ ८९ ॥

शिवायतनपर्यन्ते शिवारामे च कुत्रचित् ।
समुत्सृजन्ति ये मूढाः पुरीषं मूत्रमेव वा ॥ ९० ॥

तेषां शिश्नं सवृषणं हन्यते लोहमुद्गरैः ।
सूचीभिर्नेत्रपर्यन्तेष्वाग्निवर्णै स्सकण्टकैः ॥ ९१ ॥

ओरोप्यते गुदे तेषां यावन्मूर्ध्नि विनिर्गतैः ।
ततः[1]क्षारेणमहता ताम्रेण त्र पुणा पुनः ॥ ९२ ॥

द्रुतेनापूर्यते गाढं गुदं शिश्नं च देहिनाम् ।
मनस्सर्वेन्द्रियाणां च यस्मादुक्तं प्रवर्तनम् ॥ ९३ ॥

तस्मादिन्द्रियदुःखेन जायते तत्सुदुःखितम् ।
अन्नपानमदत्तं यै र्मूढैर्नाप्यनुमोदितम् ॥ ९४ ॥

धने सत्यपि ये दानं न च यच्छन्ति तृष्णया ।
अतिथिं चावमन्यन्ते कालप्राप्तं गृहाश्रमे ॥ ९५ ॥

तेजोहनारणे वद्धाः हस्तपादावधारिताः ।
विस्तारितांगा श्शुष्यन्ति तिष्ठन्त्यब्दशतं नराः ॥ ९६ ॥

हस्तपादललाटेषु कीलिता लोहशंकुभिः ।
नित्यं च विकृतं वक्रं कीलकद्वयघाटितम् ॥ ९७ ॥

कृमिभिः प्राणिभिश्चोग्रैर्लोहतुण्डैश्च वायसैः ।
उपद्रवैर्बहुविधैर्मुखमन्तः प्रपीड्यते ॥ ९८ ॥

[2]जिह्वा ततः प्राभिन्नाच गाढं शृंखलया पुनः ।
तिष्ठन्ति लम्बमानाश्च लोहाकारास्सुवर्तुलाः ॥ ९९ ॥

[1] क्षु. [2] जिह्वास्ततः प्रभन्नाश्च.

ततःस्वमांसमुत्कृष्य तिलमात्रप्रमाणतः ।
खादितुं दीयते तेषां सूच्यग्रेण च शोणितम् ॥ १०० ॥

यथानिर्मांसतां प्राप्ताः कालेन बहुधा पुनः ।
ततःक्षारेण दीप्तेन तच्छरीरं प्रलिप्यते ॥ १०१ ॥

भिद्यते वर्षधाराभि श्शुष्यन्ते वायुना पुनः ।
पुनस्तैलेन सिच्यन्ते सुतप्तेन समन्ततः ॥ १०२ ॥

इति चित्रविधैर्घोरैर्मथ्यमानास्स्वकर्मजैः ।
म्रियन्ते नैव पापिष्ठा यावत्पापस्य संक्षयः ॥ १०३ ॥

तस्मात्पापं न कुर्वीत चंचले जीविते सति ।
एवं क्लिष्टा विशुद्धाश्च सावशेषेण कर्मणा ॥ १०४ ॥

ततःक्षितिं समासाद्य जायन्ते देहिनः पुनः ।
स्थावरा विविधाः क्रूरा स्तृणगुल्मादिभेदतः ॥ १०५ ॥

तत्रानुभूय दुःखानि जायन्ते कीटयोनिषु ।
निष्क्रान्ताः कीटयोनिभ्यो जायन्ते पक्षिणः क्रमात् ॥ १०६ ॥

संक्लिष्टाः पक्षिभावेन भवन्ति मृगजातिषु ।
मार्गे दुःखमतिक्रम्य जायन्ते पशुयोनिषु ॥ १०७ ॥

क्रमाद्गोयोनिमासाद्य जायन्ते मानुषे पुनः ।
व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगौरवात् ॥ १०८ ॥

ततो मनुष्यतां प्राप्य तत्तत्पापानुसारतः ।
संयुताः पापचिह्नैश्च वर्तन्ते प्राणिनास्त्विह ॥ १०९ ॥

इति श्रीशिवतत्त्वरत्नाकरे द्वितीयकल्लोले
नरकयातनानुवर्णनं नाम द्वितीयस्तरंगः

तृतीयस्तरंगः

स्वामिन्! पापानुगुण्येन तत्तच्चिह्नैस्समन्विताः ।
भेवयुः प्राणिनो भूमावित्येवमुपवर्णितम् ॥ १ ॥
केषां च कानि पापानां चिह्नानीत्युपवर्ण्यताम् ।
आकर्णय कुमार! त्वं यदभिज्ञातुमीहसे ॥ २ ॥
पूर्वजन्मकृतं पापं व्याधिरूपेण पीड्यते ।
ब्रह्महा क्षयरोगी स्यात् सुरापी श्यावदन्तकः ॥ ३ ॥
सुवर्णचोरः कुनखी दुश्चर्मा गुरुतल्पगः ।
राजघ्नो राजयक्ष्मा स्यात् क्ष्माहर्ता क्षयपाण्डुकः ॥ ४ ॥
ब्रह्मघ्नः क्षयखासीस्यात् क्षयऽस्त्वेवंत्रिधामतः ।
अन्नहर्ता भवेद्गुल्मी धान्यस्तेयी तु दर्दुरः ॥ ५ ॥
शाकहर्ता [1]भवेच्छाकी पिटकी पुष्पहारकः ।
भगिनीगमनान्मर्त्यो जायते बहुमूत्रवान् ॥ ६ ॥
मातृगामी भवेद्यस्तु तस्य लिंगं विनश्यति ।
स्नुषाभिगमनाल्लोके शुक्लमेही भवेन्नरः ॥ ७ ॥
इक्षुमेही भवेत्पापी कन्याभिगमनाद् भुवि ।
विश्वस्ताभिगामी यस्तु रक्तमेही भवेद् भुवि ॥ ८ ॥
सुतागामी भवेद्यस्तु शिश्नशूली भवेद्भुवि ।
राजांगनागो यः कामी कामाद्यो गुरुदारगः ॥ ९ ॥
परांगनायाः पुरुषो जायते चान्त्रवृद्धिमान् ।
गलरोगी भवेत्सोऽपि सदायोऽनृतवाग्भुवि ॥ १० ॥
गण्डमाली भवेन्मर्त्यो ह्यभक्ष्यस्य च भक्षणात् ।
उपजिह्वी भवेन्मर्त्यो दुर्गन्धाघ्राणमात्रतः ॥ ११ ॥
पित्रोस्सुरतमाकर्ण्य बुद्धिपूर्वमतन्द्रितः ।
बधिरत्वमवाप्नोति महान्निन्दाश्रुतौ तथा ॥ १२ ॥
स जात्यन्धो भवेन्मर्त्यः परस्त्रीणामवेक्षणात् ।
अशुचिर्भास्करं पश्येन्न क्षत्राणि तथा ध्रुवम् ॥ १३ ॥
नक्तान्धस्स भवेत्पापी कण्डूतिर्वा भवेदिह ।
[2]ब्रह्मण.श्वासरोधेन ह्यपस्मारी भवेन्नरः ॥ १४ ॥

[1]) च्छोकी. [2]) ब्राह्मणश्वास.

पित्तवान् जायते लोके दुरन्नस्य च भक्षणात् ।
श्लेष्मरोगी भवेल्लोके चैकादश्यन्न भुक्सदा ॥ १५ ॥
अरुचिस्तस्य भवति नित्यहोमं यदि त्यजेत् ।
छर्दिरोगी भवेन्मर्त्यः कूटसाक्ष्यं वदेद्यदि ॥ १६ ॥
हिक्कावान् जायते लोके परेषां सूचको हि यः ।
आन्त्रवृद्धिर्भवेत्तस्य ह्युच्छिष्टान्नस्य भोजनात् ॥ १७ ॥
कर्णशूली भवेल्लोके वृथालापान् शृणोति यः ।
नेत्रशूली भवेन्मर्त्यो हिंसा येन प्रदृश्यते ॥ १८ ॥
स्नानशून्यो भवेन्मर्त्यः शिरश्शूली भवेत्सदा ।
पार्श्वैकशूली भवति देवब्राह्मणदूषकः ॥ १९ ॥
हस्तशूली भवेल्लोके हस्तच्छेदीह्यकारणात् ।
ताम्रस्तेयं यस्तु कुर्याद्रक्तमण्डलवाग्भवेत् ॥ २० ॥
श्वित्री भवेच्छ्वेतवस्त्र रूप्याणां स्तेयकारणात् ।
मन्दवाग्भृतकाध्यायी मूको वागपहारकः ॥ २१ ॥
बन्दिग्रहणजाद्दोषाज्जायते श्वासकासवान् ।
शिरोव्रणी भवेत्सोऽपि ह्यश्वहन्ता तु यो नरः ॥ २२ ॥
कर्णव्रणी भवेत्पापी [1]भक्षकस्य च हिंसनात् ।
मयूरहननान्मर्त्यो जायते कृष्णबिन्दुक ॥ २३ ॥
बकहन्ता तु यो लोके जायते श्वेतबिन्दुकः ।
विसर्पिस्सर्पहननात् काकहन्ता तु कामिलः ॥ २४ ॥
गजचर्मा भवेत्सोऽपि गजो येन निहन्यते ।
यस्तुपारावतं हन्यात् सोऽपि श्वित्रीभवेद्भुवि ॥ २५ ॥
बिडालं नकुलं गृध्रं भरद्वाजं शुकं तथा ।
सुपर्णं चाषकं हत्वा व्रणी सर्वांगसंधिषु ॥ २६ ॥
गन्धस्तेयी च दुर्गन्धो वक्रघ्राणश्च पुष्पहृत् ।
उष्ट्रहन्ता भवेच्छ्वित्री खरहन्ता तु घर्घरः ॥ २७ ॥
कपिलागोनिहन्तास्या दन्तवलयमूलरुक् ।
नीलगोघ्नो भवेन्मर्त्यो वृषसूचकमूलरुक् ॥ २८ ॥

[1]) चषक.

श्वेतगोघ्नो भवेन्मर्त्यो वृषसूचकमूलरुक् ।
आरामे देवतागारे वल्मीके च सभास्थले ॥ १९ ॥
विण्मूत्रे यस्त्यजेज्ज्ञानात्स भूयात्पादशूलवान् ।
।१५। पूयव्रणी भवेन्मर्त्यस्सर्पिषस्तेयसंभवात् ॥ २० ॥
उरोव्रणी भवेन्मर्त्यः परनार्युपगूहनात् ।
।१६। शीतज्वरी भवेन्मर्त्यस्तटाकानां विघातकः ॥ २१ ॥
उष्णज्वरी भवेल्लोके ह्यग्निदाहविघातकः ।
परस्त्रियं नरो दृष्ट्वा कामबाणातुरोऽनिशम् ॥ २२ ॥
।१७। तापज्वरी भवेल्लोक इहवान्यत्र जन्मनि ।
विवाहविघ्नकृल्लोके मृतजायो भवेद्भुवि ॥ २३ ॥
।१८। चातुर्थिकज्वरी भूयात्त्यक्तसंध्यादिकर्मवान् ।
स सन्ततज्वरी भूयात् परसन्तापकृन्नरः ॥ २४ ॥
।१९। ऐकाहिकं द्व्याहिकं वा ज्वरं भजति मानवः ।
गृहदाही भवेल्लोके ह्यत्र वाऽन्यत्र जन्मनि ॥ २५ ॥
२०॥ रजकश्चर्मकारश्च नटो [1]निषद एवच ।
कैवर्तम्लेच्छभिल्लाश्चेत्येते सप्तान्त्यजाः स्मृताः ॥ २६ ॥
२१। एतेषामंगना गच्छन्नूरुमूलव्रणी भवेत् ।
चण्डाल्यभिगमान्मर्त्यो जायतेऽत्र भगन्दरी ॥ २७ ॥
२२। दासीगामी भवेन्मेढ्रव्रणी तस्यान्तरेऽपि वा ।
पञ्चपर्वसु यःपत्नीं व्रजेत्कामातुरो नरः ॥ २८ ॥
२३। सोऽनपत्यो भवेन्मर्त्यः पत्न्या ह्यस्य मृति र्भवेत् ।
कक्षव्रणी भवेन्मर्त्यः परदारकुचग्रहात् ॥ २९ ॥
२४। पूयव्रणी भवेन्मर्त्यः कृमिदुर्गन्धसंयुतः ।
अतीववेदनायुक्तो मधुदुग्धापहारकः ॥ ३० ॥
बालघ्नो मृतपुत्रस्यादौषधादिविभेदनैः ।
२५। आमयावी भवेन्मर्त्यः पञ्चयज्ञविगर्हणात् ॥ ३१ ॥
नेत्रव्रणी भवेन्मर्त्यः रुष्टो दृष्ट्वा तु गोद्विजान् ।
२६। यः पश्येत्सततं लोक इहवान्यत्र जन्मनि ॥ ३२ ॥
फलानां चाथ कोशानां स्तेयी भवति मानवः ।
२७। उद्यागे सति बाहुल्ये फलं नास्तीह तस्य वै ॥ ३३ ॥

[1]ऐन्धनस्य जलस्यापि गोमयस्य तुषस्य च ।
स्तेयी भवति चेल्लोके स भूयात्परसेवकः ॥ ३४ ॥
लवणस्य गुडस्यापि आम्लस्य लशुनस्य वा ।
स्तेयी भवति यो मर्त्यः स तु कुष्ठी भवेद् भुवि ॥ ३५ ॥
व्रतानि परिगृह्यादावसमाप्य विमुञ्चति ।
नरकाननुभूयाशु हीनांगो जायते भुवि ॥ ३६ ॥
मुक्तादिनवरत्नानां स्तेयी भवति मानवः ।
नरकं चानुभूयाथ कुरूपी जायते भुवि ॥ ३७ ॥
उपवासदिने यस्तु दन्तधावनमाचरेत् ।
सोद्यैवान्यभवेवापि दुर्गन्धास्यो भविष्यति ॥ ३८ ॥
यस्त्वौषधप्रयोगाद्यै र्हिंसां मनसि चिंतयेत् ।
वातरोगी भवेल्लोके प्रमेही पर्वसंगमे ॥ ३९ ॥
स पुमान्दन्तरोगी यो विप्रं संपीडयेच्छलैः ।
यो विप्रं पीडयेन्नित्यं जलांतर्मज्जनादिभिः ॥ ॥ ४० ॥
सोऽन्यजन्मनि पापी स्यात्कंपवायुप्रपीडितः ।
अव्रीडां रोगिणीं नारीमन्तर्वर्त्नीं कृतव्रताम् ॥ ४१ ॥
रजस्वलामकामां च नाक्रमेद्वै बलात्पुमान् ।
तेन वै पापशेषेण देहः कृमिमयो भवेत् ॥ ४२ ॥
निन्दकश्शिवभक्तानां कोटिजन्मसु सूकरः ।
सप्तजन्मसु कुष्ठी स्यादन्ते दास्यां प्रजायते ॥ ४३ ॥
पापानां बहुभेदानां यातनाभिभवात्परम् ।
एवमादीनि चिह्नानि सन्ति नानाविधान्यपि ॥ ४४ ॥
सर्वेषामपि पापानामियमेका प्रतिक्रिया ।
[2]स्वर्गागमपुराणादि प्रसिद्धेयमुदीर्यते ॥ ४५ ॥
शिवेतिमंगलं नाम यस्य वाचि प्रवर्तते ।
सप्तजन्मकृतं पापं भस्मी भवति तस्य वै ॥ ४६ ॥
श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः ।
परोपकारः पुण्याय पापाय परपीडनम् ॥ ४७ ॥

इति श्री*शिवतत्वरत्नाकरे* द्वीतीयकल्लोले *दुष्कर्मजन्मरोगादिप्राप्तिदर्शनं* नाम तृतीयस्तरंगः

1) बुरुड.

1) इ. 2) सर्वा.

२८।

चतुर्थस्तरंगः

स्वामिन्नरकनामानो लोकांस्तद्गर्भवासिनः ।
पुटाश्चैवत्रयस्त्रिंशत्तेषां परिमितिस्तथा ॥ १ ॥
तदन्तर्वर्तिनां चैव नरकाणां तथा भिधाः ।
नानाविधास्तत्र तत्र नरकेषु च यातनाः ॥ २ ॥
यातनानंतरं पापचिह्नानामपि संभव ।
उदीरितमभूदेतत्सर्वमेव विशेषतः ॥ ३ ॥
तदूर्ध्ववर्तिलोकानां विस्तारं कथय प्रभो! ।
पुत्र! तत्कथये तुभ्यं यदर्थमयमुद्यमः ॥ ४ ॥
चतुस्त्रिंशत्पुटादूर्ध्वं षड्लक्षाण्यायसं स्थलम् ।
तस्योपरि द्विकोटिं तु जलपूर्तिं विदुर्बुधाः ॥ ५ ॥
तस्यामशीतिलक्षं स्यात्त्रिंशत्साहस्रसंमितम् ।
पार्थिवं तद्विजानीयात्तस्मिन्पातालसप्तकम् ॥ ६ ॥
अधोलोकास्तु पातालं रसातलमहातले ।
तलातलं च सुतलं वितलं चातलं तथा ॥ ७ ॥
शुक्लकृष्णारुणाः पीताश्शर्कराश्शैलकांचनाः ।
भूमयो यत्र मैत्रेय! वरप्रासादशोभिताः ॥ ८ ॥
पातालानामधश्चास्ते वैष्णवी तामसी तमः ।
फणामणिसहस्रेण यश्च विद्योतयन्दिशः ॥ ९ ॥
सर्वान्करोति निर्वीर्यान् हिताय जगतोऽसुरान् ।
मदाघूर्णितनेत्रोऽसौ यस्सदैवैककुण्डलः ॥ १० ॥
किरीटस्रग्धरो भाति साग्निश्श्वेत इवाचलः ।
नीलवासा मदात्सिक्तः श्वेतहारोपशोभितः ॥ ११ ॥
साभ्रगंगाप्रपातोऽसौ कैलासाद्रिरिवोच्छ्रितः ।
लांगलासक्तहस्ताग्रो बिभ्रन्मुसलमुद्धृतम् ॥ १२ ॥
उपाश्रितः स्वयं कान्त्या यो वारुण्या च मूर्तया ।
कल्पांते यस्य वक्त्रेभ्यो विषानलशिखोल्बणाः ॥ १३ ॥
संकर्षणात्मका रुद्रा निष्क्रामन्ति जगत्त्रये ।
आस्ते पातालमूलस्थश्शेषोऽशेषसुरार्चितः ॥ १४ ॥
तस्य वीर्यं प्रभावं च स्वरूपं रूपमेवच ।
नहि वर्णयितुं शक्यं ज्ञातुं वा त्रिदशैरपि ॥ १५ ॥
यस्यैषा सकला पृथ्वी फणामणिशिखारुणा ।
आस्ते कुसुममालेव कस्तद्वीर्यं सहिष्यते ॥ १६ ॥
यदा विजृम्भतेऽनंतो मदाघूर्णितलोचनः ।
तदा चलति भूरेषा साद्रितोया सकानना ॥ १७ ॥
गंधर्वाप्सरसस्सिद्धाः किन्नरोरगचारणाः ।
नांतं गुणानां गच्छन्ति तेनानन्तोऽयमव्ययः ॥ १८ ॥
ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदंतस्सार्वभौमस्सुप्रतीकश्च दिग्गजाः ॥ १९ ॥
अष्टासु दिक्षु भूभारं वहंत्येते हि दिग्गजाः ।
करिण्यो भ्रमुः कपिला पिंगलानुपमाक्रमात् ॥ २० ॥
ताम्रपर्णी सुदंती स्यादंजना चांजनावती ।
एवमष्टौ करिण्यश्च दिगंतेष्वष्टसु स्थिताः ॥ २१ ॥
निवातकवचाद्याश्च दैत्यदानवसेविताः ।
आसते दैत्यपतयः तस्मिन्नेव रसातले ॥ २२ ॥
तक्षकः पद्मकर्कोटशंखपालादिसेवितः ।
फणामणिप्रकाशेन तत्र चास्ते महातले ॥ २३ ॥
तलातलाख्यलोके तु मयोनाम महासुरः ।
अनेकदैत्यसहितो वीतविष्णुभयस्सदा ॥ २४ ॥
आराधितस्य शर्वस्य प्रसादाद्वर्तते सुखम् ।
आस्ते सुतललोके तु बलिर्नाम महासुरः ॥ २५ ॥
नारायणप्रसादेन निर्भयो विगतज्वरः ।
वितलाख्ये महालोके (आस्ते दानवपुंगवः
महाक्रोधो महावीर्यश्शम्भोश्च वरदानतः ।)
अतलाख्ये महालोके बलनामा महासुरः ॥ २६ ॥
आस्ते तथाविधैरेव दैतेयैः परिवारितः ।
अतलाद्योजनानान्तु सहस्रादूर्ध्वभागतः ॥ २७ ॥
हाटकेश्वरलोकोऽस्ति देवोऽस्मिन् हाटकेश्वरः ।
पार्वत्या सह वैधात्रसृष्टिसाहाय्यकोद्यतः ॥ २८ ॥

1) मू.

तद्वीर्यजाता तटिनी तत्रास्ते हाटकाभिधा ।
तदुत्पन्नं सुवर्णं तु विश्रुतं हाटकाख्यया ॥ २९ ॥
दैत्यानां भूषणं जातं मकुटादि विभेदतः ।
तस्योपरिष्टाल्लक्ष्यन्तु योजनानां महातलम् ॥ ३० ॥
सप्तानामपिलोकानां विस्तारात् स्थितिरुच्यते ।
सप्त सन्ति भुवो लोकाः पातालाद्याः क्रमादधः ॥ ३१ ॥
दशसाहस्रमेकैकं विस्तारायामखाततः ।
आद्यं त्वतलमासन्नं पातालं भूतलादधः ॥ ३२ ॥
योजनैर्दशसंख्याकसहस्रैरभिसम्मितम् ।
बलिप्रभृतयो दैत्या वसन्त्यस्मिन् महातले ॥ ३३ ॥
विचित्ररत्नप्रासादगृहमण्टपमण्डिते ।
तदधोवितलं नाम पातालं द्रुपदा स्मृतम् ॥ ३४ ॥
पुलोमप्रमुखैर्दैत्यैर्नागैश्च परिसेवितम् ।
तदधस्सुतलं नाम दशसाहस्रयोजनम् ॥ ३५ ॥
हिरण्याक्षसुतोपेतं सौवर्णसिकतान्वितम् ।
तदधो वितलं नाम पातालं पीतमृत्तिकम् ॥ ३६ ॥
कालनेमिमुखैर्दैत्यपतिभिः परिरक्षितम् ।
तलातलमतःप्राहुररुणावनिशोभितम् ॥ ३७ ॥
प्रह्लादप्रमुखैर्दैत्यैराधिष्ठितमनुत्तमम् ।
ततो रसातलं नाम परिपाण्डुरभूमिकम् ॥ ३८ ॥
यस्मिन् हयग्रीवमुखा निवसन्त्यसुराधिपाः ।
महातलमतः प्रोक्तं सप्तमं नीलभूमिकम् ॥ ३९ ॥
हिरण्याक्षमुखा दैत्या वसन्त्यस्मिन् सुखान्विताः ।
एतेषु नागा रक्षांसि योगिनः कपिलादयः ॥ ४० ॥
गन्धर्वाः पन्नगास्सिद्धाश्चारणाश्च सकिन्नराः ।
तत्रस्था ये महात्मानो मुनिपन्नगराक्षसाः ॥ ४१ ॥
कामरूपधरास्सर्वे विद्याभरणभूषिताः ।
पातालानि विचित्राणि मणिसोपानवन्ति च ॥ ४२ ॥
पातालानां तु मध्ये तु विवराणि सहस्रशः ।
सन्ति रत्नविचित्राणि साप्सरोवनितानि च ॥
तेषु दैत्याश्च शतशो देवसंग्रामनिर्जिताः ।
सकलत्रपरीवारा निवसंत्यकुतोभयाः ॥ ४३ ॥
रसायनानि दिव्यानि सिद्धैस्संसेवितानि च ।
औषधानि विचित्राणि प्रज्वलन्ति दिवानिशम् ॥ ४४ ॥
नैवार्करश्मयस्तेषु पातालेष्वपि सप्तसु ।
तापं कुर्वन्ति शीतं वा निशाकरकरास्तथा ॥ ४५ ॥
रत्नप्रभाभि [1]श्चित्राभिर्भासितानि समन्ततः ।
यान्यन्नपानखाद्याद्यैर्युक्तानि हृदयंगमैः ॥ ४६ ॥
महापुरसहस्राणि सेवितान्यप्सरोगणैः ।
विचित्रमणिसोपानरत्नप्रासादवन्ति च ॥ ४७ ॥
पाताले तलसंज्ञे तु देवो लिंगस्वरूपवान् ।
हाटकेश्वरनाम्ना तु गीयते सिद्धचारणैः ॥ ४८ ॥
पातालानां तु सप्तानामधस्तादजरामरः ।
अनन्तो नागराड् धत्ते ससहस्रशिरा भुवम् ॥ ४९ ॥
नागमूर्ति रचिन्त्यात्मा शिवशक्तिस्सदोन्मुखः ।
कूर्मपृष्ठे पदन्यासं कृत्वा धत्ते भुवः स्थलम् ॥ ५० ॥
कूर्मष्षोडशसाहस्रं तदधस्तान्महाजलम्
रुद्रशक्त्या धृतोऽधस्तात्स्वयमप्युक्तरूपया
शिवश्शंभुः शंकरश्च शितिकण्ठ उमापतिः ॥ ५१ ॥
सर्वेश्वरो नीलकण्ठः क्रमशोलिंगसप्तकम् ।
सप्तस्वपि च लोकेषु स्थितास्संपूज्य भक्तितः ॥
तत्तल्लिंगप्रसादेन स्वाभीष्टानि भजन्ति हि ।
अधः कटाहादारभ्य भूम्या साकं प्रमाणकम् ॥
पंचाशत्कोटिसंख्याकयोजनानीतिनिश्चयः ॥

इति श्रीशिवतत्त्वरत्नाकरे द्वितीयकल्लोले
सप्तपातालकलोकस्वरूपवर्णनं नाम चतुर्थस्तरंगः

1) श्वेताभिः

पञ्चमस्तरंगः

पातालादिकभूम्यन्तलोकभेदान्निरूपितान् ।
आकर्ण्य परमानन्दमविन्दं करुणानिधे! ॥ १ ॥
यथा लोकेषु युष्माकं कीर्तिस्सर्वेषु भासते ।
तथा बुद्धिस्सुसूक्ष्मापि निष्प्रत्यूहं प्रवर्तते ॥ २ ॥
द्रष्टुमेनं महीलोकं सभेदं सस्वरूपकम् ।
अनुग्रहान्मयि स्वामिन्! सर्वमेतन्निरूपय ॥ ३ ॥
साधु नन्दन! यत्पृष्टं त्वया सूक्ष्मधिया पुनः ।
तस्योत्तरं ब्रवीम्यद्य निगमागमसम्मतम् ॥ ४ ॥
कोटिद्वयं त्रिपंचाशल्लक्षाणि च ततः परम् ।
पंचाशच्चसहस्राणि सप्तद्वीपास्ससागराः ॥ ५ ॥
ततोहिरण्मयी भूमिर्दशकोटिप्रमाणतः ।
देवानां क्रीडनार्थाय लोकालोकस्ततः परम् ॥ ६ ॥
पर्वतोवलयाकारो योजनायुतविस्तृतः ।
तस्माद्बाह्यं तमो घोरं दुष्प्रेक्ष्यं जीववर्जितम् ॥ ७ ॥
पंचत्रिंशत्स्मृताः कोट्यो लक्षाण्येकोनविंशतिः ।
चत्वारिंशत्सहस्राणि योजनानि प्रमाणतः ॥ ८ ॥
सप्तसागरमानस्तु गर्भोदस्तदनन्तरम् ।
कोटियोजनमानस्तु कटाहस्संव्यवस्थितः ॥ ९ ॥
ब्रह्माण्डोऽयं कटाहेन संयुक्तो मेरुमध्यतः ।
पंचाशत्कोटयो ज्ञेया दशदिक्षु समन्ततः ॥ १० ॥
जंबूशाकाह्वयौ द्वीपौ कुशक्रौञ्चौ च शाल्मलिः ।
गोमेदः पुष्करश्चेति सप्तद्वीपाः प्रकीर्तिताः ॥ ११ ॥
एते द्वीपास्समुद्रैस्तु सप्तसप्तभिरावृताः ।
लक्षयोजनविस्तारो जम्बूद्वीपः प्रकीर्तितः ॥ १२ ॥
सूर्यबिम्बसमाकारस्तावत् क्षारार्णवावृतः ।
जम्बूद्वीपाद् द्विगुणतः शाकद्वीपस्समन्ततः ॥ १३ ॥
तावता क्षीरतोयेन समुद्रेण परीवृतः ।
कुशद्वीपो द्विगुणतः ततस्तत्परितः स्थितः ॥ १४ ॥
दधितोयेन परितः तावताम्बुधिनावृतः ।
क्रौञ्चस्तद्द्विगुणस्सोऽपि घृततोयेन संवृतः ॥ १५ ॥
ततस्तु शाल्मली द्वीपो द्विगुणस्तावतैव तु ।
इक्षुसारस्वरूपेण समुद्रेण परीवृतः ॥ १६ ॥
गोमेदः परितस्तस्माद् द्विगुणस्तावता वृतः ।
सुरातोयेन दैत्यानां मोहकेनार्णवेन वा ॥ १७ ॥
पुष्करस्तु ततो द्वीपो द्विगुणस्तावता वृतः ।
स्वादुतोयेन रम्येण समुद्रेण समन्ततः ॥ १८ ॥
जम्बूद्वीपस्समस्तानामेतेषां मध्यसंस्थितः ।
तस्यापि मेरुराख्यातो मध्ये कनकपर्वतः ॥ १९ ॥
चतुरशीतिसाहस्रयोजनान्यस्य चोच्छ्रयः ।
प्रविष्टष्षोडशाधस्ताद् द्वित्रिंशन्मूर्ध्नि विस्तृतः ॥ २० ॥
मूले षोडष साहस्रो विस्तारस्तस्यसर्वतः ।
भूपद्मस्यास्यशैलोऽसौ कर्णिकाकारवत् स्थितः ॥ २१ ॥
शरावत्वत् स्थितत्वाच्च द्वात्रिंशन्मूर्ध्नि विस्तृतः ।
हैमीकृतो महेशस्य शुभांगस्पर्शनेन च ॥ २२ ॥
दत्तूरपुष्पसंकाश स्सर्वदेवहिते रतः ।
नेमयः कटकाकारा निर्गतादीप्तिमत्तराः ॥ २३ ॥
पंचविंशतिसाहस्रादुपरिष्टादपिक्षितेः ।
दशसाहस्रविस्ताराः प्रत्येकं चैव मेव हि ॥ २४ ॥
त्रिसहस्रसमुच्छ्राया वलयास्तस्य संस्थिताः ।
नेमिर्या मस्तकोपान्ते लोकपालसमाश्रिता ॥ २५ ॥
चक्रवाटीति तामाहु स्सर्वरत्नप्रभावतीम् ।
तस्य चाष्टसु शृंगेषु पुर्योऽष्टौ समवस्थिताः ॥ २६ ॥
प्राच्यादिष्विन्द्रमुख्यानां नामभिस्तास्समन्विताः ।
नाम्नाऽमरावती पूर्वे पुरी शक्रस्य हेमजा ॥ २७ ॥
तेजोवती पुरी ज्ञेया वह्नेः कमललोहिता ।
पुरी संयमनी याम्या दक्षिणेऽञ्जनसन्निभा ॥ २८ ॥
रक्षोवती निर्ऋतेस्तु नगरी कृष्णलोहिता ।
वारुण्यां शुद्धवत्युक्ता वरुणस्येन्दुवत्सिता ॥ २९ ॥
वायव्ये गन्धवत्युक्ता वायोर्मरकतात्मिका ।
महोदया कुबेरस्य चोत्तरे सर्वरत्नजा ॥ ३० ॥

यशोवती हरस्योक्ता विशदा सुदुरासदा ।
प्रत्येकं षट् सहस्राणि योजनानां प्रकीर्तिताः ॥ ३१ ॥
लोकास्तु लोकपालनामष्टानामपि शोभनाः ।
१६ मेघविघ्नवती चैव सौवर्णी कुसुमावती ॥ ३२ ॥
पुर्योऽमरावती संस्था सुमतिः कामवत्यपि ।
१७ मेघविस्सिद्ध आदित्यास्साध्याश्चाप्सरसः क्रमात् ॥ ३३ ॥
ईशास्तेजोवती पुर्या विश्वकर्ममयाभिधौ ।
१८ रेवती मानवत्याख्ये पुर्याश्रुत्य तिष्ठतः ॥ ३४ ॥
संयमन्यां मातृनन्दा रोहिणी गुणवत्यपि ।
१९ पितृभिश्चापि रुद्रैश्च श्रितैकादशसंख्यया ॥ ३५ ॥
रक्षोवत्यां पिंगला च कृष्णा चैव सुखावती ।
२० गान्धारीति चतस्रस्तु पुरीः कर्मजदेवताः ॥ ३६ ॥
पिशाचप्रमुखाश्चैव समाश्रित्य वसन्ति हि ।
२१ सिद्धसेना हेमसंज्ञा तथासिद्धवतीति च ॥ ३७ ॥
सिद्धवत्यां भूतवसुविद्याधरसमाश्रिता ।
२२ गन्धवत्यां तु सिद्धाख्या किन्नरैस्समधिष्ठिता ॥ ३८ ॥
महोदया या गन्धर्वा चित्राचैव शुभा तथा ।
२३ प्रमदा चित्रवत्येवं पुर्यः पंचमनोहराः ॥ ३९ ॥
तासु चित्ररथश्चैव शारदा तुम्बुरुस्तथा ।
२४ कर्मदेवाश्च गुह्याश्च निवसन्ति क्रमादिह ॥ ४० ॥
यशोवत्यां तु वैकुण्ठप्रजावत्यभिदेवता ।
२५ सर्वकामवती तुष्टाः पुर्यस्तासु क्रमादिह ॥ ४१ ॥
नारायणश्च ब्रह्मा च धन्वन्तरिरितीश्वराः ।
२६ इन्द्र ऐरावतारूढश्शच्या सह विराजितः ॥ ४२ ॥
वज्रपाणिः स्वर्णवर्णो दिव्याभरणभूषितः ।
२७ सप्तहस्तस्सप्तजिह्वो षडक्षो मेघवाहनः ॥ ४३ ॥
स्वाहाप्रियो रक्तवर्णः स्रुक्स्रुवायुधधारकः ।
२८ दण्डायुधो लोहिताक्षो यमोमहिषवाहनः ॥ ४४ ॥
श्यामलासहितो रक्तवर्णो धूम्रमुखस्तथा ।
२९ खड्गचर्मधरो नीलो निर्ऋतिर्नरवाहनः ॥ ४५ ॥
ऊर्ध्वकेशो विरूपाक्षो दीर्घग्रीवा प्रतिप्रभुः ॥
३० नागपाशधरः पीतवर्णो मकरवाहनः ॥ ४६ ॥

वरुणः कालिकानाथो रत्नाभरणभूषितः ।
प्राणिनां प्राणरूपोऽसौ द्विबाहुर्ध्वजपाणिमान् ॥ ४७ ॥
वायुःकृष्णमृगासीनः पूजनीयोऽञ्जनापतिः ।
अश्वासीनः कुन्तपाणिः प्रतप्तस्वर्णसन्निभः ॥ ४८ ॥
कुबेरश्चित्रलेखेशो यक्षगन्धर्वनायकः ।
पिनाकी वृषभारूढो गौरीपतिरनुत्तमः ॥ ४९ ॥
श्वेतवर्णश्चन्द्रमौलिर्नागयज्ञोपवीतधृत् ।
चतुर्दशसहस्राणि योजनानां महापुरी ॥ ५० ॥
मेरोरुपरि विख्याता देवदेवस्य वेधसः ।
तत्रास्ते भगवान् ब्रह्मा विश्वात्मा विश्वभावनः ॥ ५१ ॥
उपास्यमानो योगीन्द्रैर्देवैरिन्द्रपुरोगमैः ।
तत्रदेवेश्वराधीशं विश्वात्मानं प्रजापतिम् ॥ ५२ ॥
सनत्कुमारो भगवानुपास्ते नित्यमेव हि ।
तत्र देवादिदेवस्य शंकरस्यामितौजसः ॥ ५३ ॥
दीप्तमायतनं शुभ्रं पुरस्ताद्ब्रह्मणः स्थितम् ।
दिव्यकान्तिसमायुक्तं चतुर्द्वारं सुशोभनम् ॥ ५४ ॥
संकीर्णं सर्वतश्शुद्धैर्ब्रह्मविद्भिर्निषेवितम् ।
देव्या सह महादेवः शशांकार्काग्निलोचनः ॥ ५५ ॥
रमते तत्र देवेशः प्रमथैः परमेश्वरः ।
तत्र वेदविदश्शान्ता मुनयो ब्रह्म [1]वादिनः ॥ ५६ ॥
(पूजयन्ति महादेवं तापसास्सत्यवादिनः)
तेषां साक्षान्महादेवो मुनीनां भावितात्मनाम् ।
गृह्णाति पूजां गिरिशः पार्वत्या परमेश्वरः ॥
मेरोस्तस्योर्ध्वभागे तु शृंगाणि त्रीणि सन्ति हि ।
मध्यशृंगं ब्रह्मवास ऐशान्यं शंकरस्य च ॥ ५७ ॥
नैर्ऋत्यं वासुदेवस्य हेमशृंगं स्वयंभुवः ।
रत्नजं शंकरस्यापि राजतं केशवस्य च ॥ ५८ ॥
तस्य शैलस्य शिखराः क्षीरधारासमप्रभाः ।
त्रिंशद्बाहुपरीणाहा भीमनिर्घातनिस्स्वनाः ॥ ५९ ॥
पुण्या पुण्यतमैर्जुष्टा गंगा त्रिपथगा शुभा ।
पतत्यजस्रं वेगेन ह्रदे चन्द्रप्रभाभिधे ॥ ६० ॥

[1] चारिणः

तया तूत्पादितः पुण्यः सद्भूदस्सागरोपमः ।
सिद्धगन्धर्वमरुतस्तन्मध्यवलयाश्रिताः ॥ ६१ ॥
दैत्यदानवगन्धर्वास्तस्याधो वलयाश्रिताः ।

इति श्रीशिवतत्त्वरत्नाकरे द्वीतीयकल्लोले
मेरुवर्णनं नाम पञ्चमस्तरंगः

षष्ठस्तरंगः

गुरो! मेरोरूर्ध्वभागे स्थितं सर्वं निरूपितम् ।
अधुना तस्य परितो वर्तमाना महागिरेः ॥ १ ॥
ते के शैलाः? कानि तानि? सरांसि तरवश्च के? ।
स्थानानि कानि तत्रापि? जनाः के? तन्निवासिनः ॥ २ ॥
एतत्सर्वं ममाचक्ष्व भगवन्! मय्यनुग्रहात् ।
कुमार! वर्णये सर्वं यच्छ्रोतुमभिकांक्षसे ॥ ३ ॥
विष्कम्भा रचिता मेरोर्योजनायुतमुच्छ्रिताः ।
(वनैस्सरोभिश्च समं) दिक्ष्वेते केसराचलाः ॥
(पूर्वेतु मन्दरो नाम दक्षिणे गन्धमादनः)
(विपुलः पश्चिमे पार्श्वे) सुपार्श्वश्चोत्तरेस्थितः ॥ ४ ॥
कदम्बस्तेषु जम्बूश्च पिप्पलो वट एव च ।
एकादश शतायामाः पादपा गिरिकेतवः ॥ ५ ॥
जम्बूद्वीपस्य यो जम्बूनामहेतुस्स उच्यते ।
महागजप्रमाणानि जम्ब्वास्तस्याः फलानि वै ॥ ६ ॥
अरत्नीनां शतान्यष्टौ एकषष्ट्यधिकानितु ।
फलप्रमाणं संख्यातमृषिभिस्तत्त्वदर्शिभिः ॥ ७ ॥
पतन्ति भूभृतः पृष्ठे शीर्यमाणानि सर्वशः ।
रसेन तेषां प्रख्याता तस्या जम्बूनदीतिवै ॥ ८ ॥
[1]नदी प्रवर्तते साच पीयते तन्निवासिभिः ।
न स्वेदो न च दौर्गन्ध्यं न जरा नेन्द्रियक्षयः ॥ ९ ॥
तत्पानस्वस्थमनसां जनानां तत्रवर्तते ।
तीरमृत्तद्रसं प्राप्य वायुना सुविशेषिताः ॥ १० ॥
जम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणम् ।
तत्र जम्बूफलरसो नदी भूत्वा प्रसर्पति ॥ ११ ॥

मेरुं प्रदक्षिणीकृत्य जम्बूमूलं विशत्यधः ।
वनं चैत्ररथं पूर्वे दक्षिणे गन्धमादनम् ॥ १२ ॥
वैभ्राजं पश्चिमे तद्वदुत्तरे नन्दनं स्मृतम् ।
अरुणोदं महाभद्रं सशीतोदं [1]समानसम् ॥ १३ ॥
सरांस्येतानि चत्वारि देवभोग्यानि सर्वदा ।
[2]शीताम्भश्च कुमुद्वांश्च करवीमाल्यवांस्तथा ॥ १४ ॥
वैकंको मीणमांश्चैव प्लक्षवांश्चाचलोत्तमः ।
महानिलोऽथ रुचकः सुबिन्दुर्मन्दरस्तथा ॥ १५ ॥
वेणुमांश्च सुमेघश्च निषधो देवपर्वतः ।
इत्येते देवरचिताः सिद्धावासाः प्रकीर्तिताः ॥ १६ ॥
अरुणोदस्य सरसः पूर्वतः केसराचलाः ।
त्रिकूटश्शिखरश्चैव पतंगो रुचकस्तथा ॥ १७ ॥
निषधो वसुधारश्च कलिंग स्त्रिविधश्शुभः ।
समूलो वसुसारश्च कुरवश्चैव सानुमान् ॥ १८ ॥
ताम्राभ्रश्च विशालश्च कुमुदो वेणुपर्वतः ।
एकशृंगो महाशैलो गजशैलः पिशाचकः ॥ १९ ॥
पंचशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः ।
इत्येते देवचरिता उत्कृष्टाः पर्वतोत्तमाः ॥ २० ॥
महाभद्रस्य सरसो दक्षिणे केसराचलाः ।
शशिवासस्सवैडूर्यः कपिलो गन्धमादनः ॥ २१ ॥
जारुधीश्च सुगन्धिश्च त्रिशृंगश्चाचलोत्तमः ।
सुपार्श्वश्च सुपक्षश्च काकः कपिल एव च ॥ २२ ॥
पिञ्जरो भद्रशैलश्च सुरसश्च महाबलः ।
अंजनो मधुमांस्तद्वत् कुमुदो मकुटस्तथा ॥ २३ ॥

1) सरित्.

1) समनसम्. 2) शितान्तश्च. 3) कुरद्री. 4) नीं.

सहस्रशिखरश्चैव पाण्डरः कृष्ण एव च ।
पारिजातो महाशैलः तथैव कपिलादरः ॥ २४ ॥
सुषेणः पुण्डरीकश्च महामेघस्तथैवच ।
एते पर्वतराजानस्सिद्धगन्धर्वसेविताः ॥ २५ ॥
असितोदस्य सरसः पश्चिमे केसराचलाः ।
शंखकूटोऽथ वृषभो हंसो नागस्तथैवच ॥ २६ ॥
कुलाञ्जनश्शक्रशैलो नीलः कनक एवच ।
पुष्पकश्च सुमेघश्च वराहो विरज स्तथा ॥ २७ ॥
मयूरः कपिलश्चैव महाकपिल एवच ।
इत्येते देवगन्धर्वसिद्धचारणसेविताः ॥ २८ ॥
सरसो मानसस्येह चोत्तरे केसराचलाः ।
एतेषां शैलमुख्यानामन्तरेषु यथाक्रमम् ॥ २९ ॥
सन्ति चैवान्तरद्रोण्यः सरांसि च वनानि च ।
वसन्ति तत्र मुनयस्सिद्धाश्च ब्रह्मभाविताः ॥ ३० ॥
प्रसन्नाश्शान्तरजसः सर्वदुःखविवर्जिताः ।
सिताद्रिशिखरे चापि पारिजातवनं शुभम् ॥ ३१ ॥
तत्र शक्रस्य भवनं विपुलं रत्नमण्डितम् ।
स्फटिकस्तंभसंयुक्तं हेमगोपुरशोभितम् ॥ ३२ ॥
तत्राथ देवदेवस्य विष्णोर्विश्वामरेशितुः ।
सुपुण्यं भवनं रम्यं सर्वरत्नोपशोभितम् ॥ ३३ ॥
तत्र राणनाथः श्रीमान् लक्ष्म्या सह जगत्पतिः ।
आस्ते सर्वामरश्रेष्ठैः पूज्यमानस्सनातनः ॥ ३४ ॥
तथा च वसुधारे तु वसूनां रत्नमण्डितम् ।
स्थानानामष्टकं पुण्यं दुराधर्षं सुरद्विषाम् ॥ ३५ ॥
रत्नधारे गिरिवरे सप्तर्षीणां महात्मनाम् ।
सप्ताश्रमानि पुण्यानि सिद्धावासयुतानि तु ॥ ३६ ॥
तत्र हैमं चतुर्द्वारं वज्रनीलादिमण्डितम् ।
सुपुण्यं सुमहत् स्थानं ब्रह्मणोऽव्यक्तजन्मनः ॥ ३७ ॥
तत्रदेवर्षयो विप्रास्सिद्धा ब्रह्मर्षयः परे ।
उपासते सदादेवं पितामहमजं परम् ॥ ३८ ॥
स तैस्संपूजितो नित्यं देव्या सह चतुर्मुखः ।
आस्ते हिताय लोकानां शान्तानां परमा गतिः ॥ ३९ ॥

तथैकश्रृंगशिखरे महापद्मैरलंकृतम् ।
स्वच्छामृतजलं पुण्यं सुगांगं सुमहत्सरः ॥ ४० ॥
जैगीषव्याश्रमं तत्र योगीन्द्रैरुप[1]शोभितम् ।
तत्रासौ भगवान्नित्यमास्ते शक्यैस्समावृतः ॥ ४१ ॥
प्रशान्तदोषैरक्षुद्रैर्ब्रह्मविद्भिर्महात्मभिः ।
शम्भोर्मनोहरश्चैव कौशिकः कृष्ण एव च ॥ ४२ ॥
सुमना देवपादश्च शिष्यास्तस्य प्रधानतः ।
सर्वयोगरताश्शान्ता भस्मोद्धूलित विग्रहाः ॥ ४३ ॥
उपासते महाचार्यो ब्रह्मविद्यापरायणाः ।
तेषामनुग्रहार्थाय यतीनां शान्तचेतसाम् ॥ ४४ ॥
सान्निध्यं कुरुते देवो देव्या सह महेश्वरः ।
अनेकान्याश्रमाणिस्युस्तस्मिन् गिरिवरोत्तमे ॥ ४५ ॥
मुनीनां युक्तमनसां सरांसि सरितस्तथा ।
तेषु योगरता विप्रा याजकास्संयतेन्द्रियाः ॥ ४३ ॥
ब्रह्मण्यासक्तमनसो रमन्ते ज्ञानतत्पराः ।
सुमेघवाहनं स्थानं सहस्रादित्यसन्निभम् ॥ ४७ ॥
तत्रास्ते भगवानिन्द्रः शच्या सह सुरेश्वरः ।
गजशैले तु दुर्गाया भवनं मणितोरणम् ॥ ४८ ॥
आस्ते भगवती दुर्गा तत्र साक्षान्महेश्वरी ।
उपास्यमाना विविधैश्शक्तिभेदैरितस्ततः ॥ ४९ ॥
सुना[2]लस्य गिरेः श्रृंगे नानारत्न[3]समुद्भवः ।
राक्षसानां पुराणिस्युस्सरांसि शतशोद्विजाः ॥ ५० ॥
तदा पुरशतं विप्राश्शतश्रृंगे महाचले ।
स्फटिकस्तंभसंयुक्तं यक्षाणामपि तेजसा ॥ ५१ ॥
श्वेतोदरगिरेः श्रृंगे सुपर्णस्य पुरं शुभम् ।
स तत्र गरुडः श्रीमान् साक्षाद्विष्णुरिवापरः ॥ ५२ ॥
अन्यच्च भवनं पुण्यं श्रीश्रृंगे मुनिसत्तम! ।
तत्र सा परमा शक्तिर्विष्णोरतिमनोरमा ॥ ५३ ॥
अनन्तविभवा लक्ष्मीर्जगत्सम्मोहनोत्सुका ।
अथास्ते देवगन्धर्वसिद्धचारणवन्दिता ॥ ५४ ॥
तत्रैव देवदेवस्य विष्णोरायतनं महत् ।
सरांसि तत्र चत्वारि विचित्रकमलानि च ॥ ५५ ॥

1) सेवितम्. 2) त. 3) समुज्वले.

तथा सहस्रशिखरे विद्याधरपुराष्टकम् ।
रत्नसोपानसंयुक्तं सरोभिश्चोपशोभितम् ॥ ५६ ॥
नद्यो विमलपानीयाश्चित्रनीलोत्पलान्तराः ।
यत्र सालवनं दिव्यं तत्रास्ते शंकरोऽम्बया ॥ ५७ ॥
पारिजाते महाशैले महालक्ष्मीपुरं शुभम् ।
रम्यप्रासादसंयुक्तं घण्टाचामरभूषितम् ॥ ५८ ॥
गन्धर्वकिन्नराकीर्णं मप्सरोनृत्तसंकुलम् ।
गणेश्वरांगनाजुष्टं धार्मिकाणां सुदर्शनम् ॥ ५९ ॥
तत्र सा वसते देवी नित्यं योगपरायणा ।
महालक्ष्मीर्महादेवी त्रिशूलवरधारिणी ॥ ६० ॥
त्रिनेत्रा सर्वशक्त्यौघै स्संवृ[1]त्ता सदसन्मयी ।
सुपार्श्वस्योत्तरे भागे सरस्वत्याः पुरोत्तमम् ॥ ६२ ॥
पांडरस्य गिरेः शृंगे विचित्रद्रुमसंकुले ।
गन्धर्वाणां पुरशतं दिव्यस्त्रीभिस्समन्वितम् ॥ ६२ ॥
तेषु नित्यं मदोत्सिक्ता नरा नार्यस्तथैव च ।
क्रीडन्ति मुदिता नित्यं विलासैर्भोगतत्पराः ॥ ६३ ॥
अंजनस्य गिरेः शृंगे नारीणां पुरमुत्तमम् ।
वसन्ति तत्राप्सरसो रंभाद्या ललितालसाः ॥ ६४ ॥
चित्रसेनादयो यत्र समायान्त्यर्थिनस्सदा ।
अनेकानि पुराणि स्युः कौमुदे देवसत्तमाः ॥ ६५ ॥
रुद्राणां शान्तमनसामीश्वरासक्तचेतसाम् ।
तेषु रुद्रा महायोगान्महेशं समुपासते ॥ ६६ ॥
पिञ्जरस्य गिरेः शृंगे गणेशानां पुरत्रयम् ।
नन्दीश्वरस्य कपिले तत्रास्ते वृषभाधिपः ॥ ६७ ॥

[1] ता.

तथा[1] च दारुके शृंगे देवदेवस्य धीमतः ।
दीप्तमायतनं पुण्यं भास्करस्यामितौजसः ॥ ६८ ॥
तच्छैलोत्तरदिग्भागे चन्द्रस्थानमनुत्तमम् ।
रमते तत्र रम्यात्मा भगवान् शीतदीधितिः ॥ ६९ ॥
अन्यच्च भवनं दिव्यं हंसशैले महर्षयः! ।
सहस्रयोजनायामं सुवर्णं मणितोरणम् ॥ ७० ॥
तत्रास्ते भगवान् ब्रह्मा सिद्धसंघै रभिष्टुतः ।
सावित्र्या सहविश्वात्मा वामदेवादिभिर्युतः ॥ ७१ ॥
तस्य दक्षिणदिग्भागे सिद्धानां पुरमुत्तमम् ।
सनन्दनादयो यत्र वसन्ति मुनिपुंगवाः ॥ ७३ ॥
पञ्चशैलस्य शिखरे दानवानां पुरं वरम् ।
नातिदूरेण तस्याधो दैत्याचार्यस्य धीमतः ॥ ७४ ॥
सुगन्धशैलशिखरे सरिद्भिरुपशोभिते ।
कर्दमस्याश्रमं पुण्यं तत्रास्ते भगवान् ऋषिः ॥ ७४ ॥
तस्यैव पूर्वदिग्भागे किन्नरैश्च निषेविते ।
सनत्कुमारभवनं तत्रास्ते ब्रह्मवित्तमाः! ॥ ७५ ॥
सर्वेष्वेतेषु शैलेषु तथान्येषु मुनीश्वराः ।
सरांसि विमला नद्यो देवानामालयानि च ॥ ७६ ॥
सिद्धलिंगानि पुण्यानि मुनिभिस्थापितान्यपि ।
वनान्याश्रमवर्याणि संख्यातुं नैव शक्नुयाम् ॥ ७७ ॥

इति श्रीशिवतत्त्वरत्नाकरे द्वितीयकल्लोले
केसराचलवर्णनं नाम षष्ठस्तरंगः

[1] चारुजे.

सप्तमस्तरंगः

कृतं सुमेरुतत्कीलकेसराचलवर्णनम् ।
नवखण्डविभागं ते प्रवक्ष्यामीह नन्दन! ॥ १ ॥
त्रयस्तु दक्षिणे ख्याताश्चोत्तरे त्रय एव हि ।
त्रयस्तु मध्यमे ख्याताः पर्वतान्तरितास्तथा ॥ २ ॥
वर्षत्रयं चतुष्कोणं यत्प्राक्प्रत्यक्च मध्यतः ।
मध्यायामोत्तरे द्वे द्वे दीर्घे शेषधनुस्सम ॥ ३ ॥
निषधो हेमकूटश्च हिमवांश्चाचलोत्तमः ।
मेरोरुत्तरतो नीलः श्वेतशृंगीति पर्वताः ॥ ४ ॥
लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापरे ।
सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते ॥ ५ ॥
भारतं प्रथमं वर्षं ततः किम्पुरुषं स्मृतम् ।
हरिवर्षं तथैवान्यन्मेरोर्दक्षिणतः स्थितम् ॥ ६ ॥
रम्यकं चोत्तरं वर्षं तस्यैवानुहिरण्मयम् ।
उत्तराः कुरवश्चैव यथावै भारतं तथा ॥ ७ ॥
नवसाहस्रमेकैकमेतेषां द्विजसत्तमाः! ।
निषधाद्धरिवर्षास्तु याम्यतो हेमकूटकः ॥ ८ ॥
नाम्ना किम्पुरुषः ख्यातो भारतं हिमवद्गिरेः ।
रम्याख्यमुदभून्नीलाद्धिरण्यं श्वेतपर्वतात् ॥ ९ ॥
यदुत्तरं शृंगवतः कुरुवर्षं तदुच्यते ।
नवसाहस्रविस्तारं तावताम्बुधिना वृतम् ॥ १० ॥
पश्चान्माल्यवतः प्राच्यां गन्धमादनशैलतः ।
इलावृतं नीलगिरेर्याम्यतो निषधादुदक् ॥ ११ ॥
भद्राश्वं माल्यवत्प्राच्यां वर्षं भद्रजनाकुलम् ।
सुकेतनं केतुमालं प्रतीच्यां गन्धमादनात् ॥ १२ ॥
वर्षेष्वेतेषु सर्वेषु सप्त सप्त कुलाचलाः ।
नद्यश्च शतशस्तेभ्यस्संभूताश्च द्विजोत्तमाः! ॥ १३ ॥
न तेष्ववस्थाभेदोऽस्ति विवर्तिषु युगादिषु ।
कल्पवृक्षफलाहाराः चिरं जीवन्ति ते जनाः ॥ १४ ॥
युगानुरूपप्रज्ञायुस्तेजोबलसमन्विताः ।
कृशाः क्लिष्टाशना दुःखश्रमार्ता भारते जनाः ॥ १५ ॥

सर्वशः स्वर्गभूमीनां कर्मभूः कारणं यथा ।
भुज्यते द्वीपशैलेषु लोकेषु च शुभाशुभम् ॥ १६ ॥
मेरोश्च पश्चिमे भागे केतुमालो महीधरः ।
जम्बूखण्डस्तु तत्रैव सुमहान्नन्दनोपमः ॥ १७ ॥
आयुर्दशसहस्राणि वर्षाणां तत्र भारत! ।
सुवर्णवर्णाश्च नराः स्त्रियश्चाप्सरसोपमाः ॥ १८ ॥
अनामया वीतशोका नित्यं मुदितमानसाः ।
जायन्ते मानवास्तत्र निष्टप्तकनकप्रभाः ॥ १९ ॥
गन्धमादनशृंगेषु कुबेरस्सहराक्षसैः ।
संवृतोऽप्सरसां संघैर्मोदते गुह्यकाधिपः ॥ २० ॥
गन्धमादनपादेषु परेष्वमरग[1]न्धिकाः ।
एकादश सहस्राणि वर्षाणां परमायुषः ॥ २१ ॥
तत्र कृष्णा नरा राजन्! तेजोयुक्ता महाबलाः ।
स्त्रियश्चोत्पलपत्राभाः सर्वास्सुप्रियदर्शनाः ॥ २२ ॥
नीलात्परतरं श्वेतं श्वे तान्चै रम्यकं परम् ।
वर्षमैरावतं नाम ततः शृंगवतः परम् ॥ २३ ॥
धनुस्संस्थे महाराज! द्वे वर्षे दक्षिणोत्तरे ।
इलावृतं मध्यमन्तु पञ्चवर्षाणि चैव हि ॥ २४ ॥
उत्तरोत्तरमेतेभ्यो वर्षमुत्कृष्यते गुणैः ।
आयुःप्रमाणारोग्यैश्च धर्मतः कामतोऽर्थतः ॥ २५ ॥
समन्वितानि भूतानि तेषु वर्षेषु भारत! ।
एवमेषा महाराज! पृथिवी पर्वतैः श्रिता ॥ २६ ॥
हिमकूटस्तु सुमहान्कैलासो नामपर्वतः ।
यत्र वैश्रवणो राजा गुह्यकैस्सह मोदते ॥ २७ ॥
अस्त्युत्तरेण कैलासं मैनाकं पर्वतं प्रति ।
हिरण्यशृंगस्सुमहान् दिव्यो मणिमयो गिरिः ॥ २८ ॥
तस्य पार्श्वे महद्दिव्यं शुभं काञ्चनवालुकम् ।
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः ॥ २९ ॥

1] ण्डि.

दृष्ट्वा भागीरथीं गंगामुवास बहुलास्समाः ।
यूपा मणिमयास्तत्र वेद्यश्चापि हिरण्मयाः ॥ ३० ॥

तत्रेष्ट्वा तु गतस्सिद्धिं सहस्राक्षो महायशाः ।
सृष्ट्वा भूतपतिर्यत्र सर्वलोकान्सनातनः ॥ ३१ ॥

उपास्यते तिग्मतेजा वृतोभूतै स्समन्ततः ।
नरनारायणौ ब्रह्मा मनुःस्थाणुश्च पञ्चमः ॥ ३२ ॥

तत्र दिव्या त्रिपथगा प्रथमं तु प्रतिष्ठिता ।
ब्रह्मलोकादपक्रान्ता सप्तधा प्रवहत्यसौ ॥ ३३ ॥

वस्वौकसारा नलिनी पावना च सरस्वती ।
जम्बूनदी च शीता च गंगा सिन्धुश्च सप्तमी ॥ ३४ ॥

अचिन्त्या दिव्यसंकल्पाः प्रभावैश्च समन्विताः ।
दृश्यादृश्या च भवति तत्र तत्र सरस्वती ॥ ३५ ॥

एता दिव्यास्सप्तगंगा स्त्रिषु लोकेषु विश्रुताः ।
रक्षांसि वै हिमवति हेमकूटे तु गुह्यकाः ॥ ३३ ॥

सर्पा नागाश्च निषधे गोकर्णे च तपोवनम् ।
देवासुराणां च गृहं श्वेतपर्वत उच्यते ॥ ३७ ॥

गन्धर्वा निषधे शैले नीले ब्रह्मर्षयस्तथा ।
शृंगवांस्तु महाराज! देवानां प्रतिसंचरः ॥ ३८ ॥

इत्येतानि महाभाग! सप्तवर्षाणि भागशः ।
भूतान्युपनिविष्टानि गतिमन्ति ध्रुवाणि च ॥ ३९ ॥

तेषामृद्धिर्बहुविधा दृश्यते दैवमानुषी ।
अशक्या परिसंख्यातुं श्रद्धया [1]र्जवभूषया ॥ ४० ॥

यांस्तु पृच्छसि मां राजन्! दिव्यामेनां शशाकृतिम् ।
पार्श्वे शशस्य द्वे वर्षे उक्ते ये दक्षिणोत्तरे ॥ ४१ ॥

कर्णौ तु नागद्वीपश्च कश्यपद्वीप एव च ।
ताम्रवर्णश्शिरो राजन्! श्रीमान्मलयपर्वतः ॥ ४२ ॥

एष द्वितीयो द्वीपस्तु दृश्यते शशसंस्थितिः ।
दक्षिणेन तु नीलस्य मेरोः पार्श्वे तथोत्तरे ॥ ४३ ॥

उत्तराः कुरवो राजन्! त्रयस्सिद्धनिषेविताः ।
तत्र वृक्षा मधुफला नित्यपुष्पफलोद्गमाः ॥ ४४ ॥

पुष्पाणि च सुगन्धीनि रसवन्ति फलानि च ।
सर्वकालफलास्तत्र केचिद् वृक्षा जनाधिप! ॥ ४५ ॥

अपरे क्षीरिणो नाम वृक्षास्तत्र जनाधिप! ।
ये क्षरन्ति सदा क्षीरं वज्रसारामृतोपमम् ॥ ४६ ॥

वस्त्राणि च प्रसूयन्ते फलान्याभरणानि च
सर्वा मणिमयी भूमि स्सूक्ष्मकांचनवालुका ॥ ४७ ॥

दैवलोकाच्च्युतास्सर्वे जायन्ते तत्र मानवाः ।
तुल्यरूपगुणोपेताः समेषु विषमेषु च ॥ ४८ ॥

मिथुनानि च जायन्ते स्त्रियश्चाप्सरसोपमाः ।
तेषां तत् क्षीरिणां क्षीरं पिबन्त्यमृतसन्निभम् ॥ ४९ ॥

मिथुनं जायतेऽन्हा वै समं तत्र प्रवर्तते ।
तुल्यरूपगुणोपेतं समवेषं तथैव च ॥ ५० ॥

एकैकमनुरक्तंच चक्रवाकसमं प्रभो! ।
निरामया वीतशोका नित्यं मुदितमानसाः ॥ ५१ ॥

दशवर्षसहस्राणि दशवर्षशतानि च ।
जीवन्ति ते महाराज! नचान्योऽन्यं त्यजन्ति वै ॥ ५२ ॥

भेरुण्डा नाम शकुनास्तीक्ष्णतुण्डा महाबलाः ।
तान्निर्हरन्ति हि मृतान् दरीषु प्रक्षिपन्ति च ॥ ५३ ॥

उत्तराः कुरवो राजन्! आख्यातास्ते समासतः ।
मेरोः पार्श्वमहं पूर्वं वक्ष्याम्यथ यथातथम् ॥ ५४ ॥

तत्र पूर्वाभिषेके तु भद्राश्वस्य विशां पते!
भद्रं साल्वनं यत्तु कालाम्रश्च महाद्रुमः ॥ ५५ ॥

कालाम्रश्च महाभाग! नित्यपुष्पफलान्वितः ।
वृक्षस्त्रियोजनोत्सेधः सिद्धवारणसेवितः ॥ ५६ ॥

तत्र ते पुरुषाश्वेतास्तेजोयुक्ता महाबलाः ।
स्त्रियः कुमुदवर्णाश्च सुन्दर्यः प्रियदर्शनाः ॥ ५७ ॥

चन्द्रप्रभाश्चन्द्रवर्णाः पूर्णचन्द्रनिभाननाः ।
चन्द्रशीतलगात्र्यश्च नृत्तगीतविशारदाः ॥ ५८ ॥

दशवर्षसहस्राणि तत्रायुर्भरतर्षभ! ।
कालाम्ररसपानास्ते नित्यसंस्थितयौवनाः ॥ ५९ ॥

दक्षिणेन तु नीलस्य निषधस्योत्तरेण च ।
सुदर्शनो महाराज! जम्बूवृक्षस्सनातनः ॥ ६० ॥

1) नुबुभूषता.

तथा माल्यवतः पृष्ठे दीप्यते तत्र हव्यवाट् ।
नाम्ना संवर्तको नाम कालाग्निर्भरतर्षभ! ॥ ६१ ॥

तथा माल्यवतश्शृंगे पूर्वे पूर्वा तु गण्डिका ।
योजनानां सहस्राणि पंचाशन्माल्यवान् स्मृतः ॥ ६२ ॥

महारजतसंकाशा जायन्ते तत्र मानवाः ।
ब्रह्मलोकाच्च्युतास्सर्वे सर्वे ते ब्रह्मवादिनः ॥ ६६ ॥

तपस्तु तप्यमानास्ते भवन्ति ह्यूर्ध्वरेतसः ।
संरक्षणार्थे भूतानां प्रविशन्ति दिवाकरम् ॥ ६४ ॥

षष्टिस्तानि सहस्राणि षष्टिरेव शतानि च ।
अरुणस्याग्रतो यान्ति परिवार्य दिवाकरम् ॥ ६५ ॥

षष्टिर्वर्षसहस्राणि षष्टिरेव शताति च ।
आदित्यतापतप्तास्ते विशन्ति शशिमण्डलम् ॥ ६६ ॥

दक्षिणेन श्वेतगिरेर्निरपधस्योत्तरेण च ।
वर्षे रमणकं नाम जायन्ते तत्र मानवाः ॥ ६७ ॥

शुक्लाभिजनसंपन्ना स्सर्वे च प्रियदर्शनाः ।
निरामयाश्च ते सर्वे जायन्ते तत्र मानवाः ॥ ६८ ॥

दशवर्षसहस्राणि दशवर्षशतानि च ।
जीवन्ति ते महाराज! नित्यं मुदितमानसाः ॥ ६९ ॥

(दक्षिणेन तु नीलस्य निषधस्योत्तरेण च ।
वर्षे हिरण्मयं नाम यत्र हैरण्वती नदी ॥
यत्र चायं महाराज! पक्षिराट् पतगोत्तमः ।
महाबलास्तत्र सदा राजन्! मुदितमानसाः)
एकादश सहस्राणि वर्षाणां ते जनाधिप!
आयुःप्रमाणं जीवन्ति शतानि दश पंच च ॥ ७० ॥

शृंगाणि वै शृंगवतस्त्रीण्येव मनुजाधिप! ।
[1]एवं मणिमयं तत्र तथैकं रौक्ममद्भुतम् ॥ ७१ ॥

सर्वरत्नमयं चैकं भवनैरुपशोभितम् ।
तत्र स्वयंप्रभा देवी नित्यं वसति [2]शाम्भवी ॥ ७२ ॥

उत्तरेण तु शृंगस्य समुद्रान्ते जनाधिप! ।
वर्षमैरावतं नाम तस्य शृंगवतः परम् ॥ ७३ ॥

न तत्र सूर्यस्तपति न च जीर्यन्ति जन्तवः ।
चन्द्रमाश्च सनक्षत्रै र्ज्योतिर्भूतैरिवावृतः ॥ ७४ ॥

पद्मप्रभाः पद्मवर्णाः पद्मपत्रनिभेक्षणाः ।
पद्मपत्रसुगन्धाश्च जायन्ते तत्र मानवाः ॥ ७५ ॥

अनिष्पन्दा निराहारास्सुगन्धाश्च जितेन्द्रियाः ।
देवलोकाच्च्युतास्सर्वे तथा विरजसो नृप! ॥ ७६ ॥

दश तत्र सहस्राणि वर्षाणां च नराधिप! ।
आयुःप्रमाणं जीवन्ति नरा भरतसत्त! ॥ ७७ ॥

इलावृते पद्मवर्णा जम्बूफलरसाशिनः ।
त्रयोदशसहस्राणि शतवर्षाणि सुव्रत! ॥ ७८ ॥

वर्षे किम्पुरुषे मर्त्याः हेमाभाः प्लक्षभोजनाः ।
दशवर्ष सहस्राणि जीवन्ति स्थिरयौवनाः ॥ ७९ ॥

हरिवर्षे नराश्शुभ्रा इक्षुदण्डरसाशनाः ।
सर्वे द्वादशसाहस्रजीवनाश्च निरामयाः ॥ ८० ॥

त्रयोदशसहस्रायुर्जम्बूफलरसाशनाः ।
मेरुप्रस्थोपलब्धार्थजना वर्षे इलावृते ॥ ८१ ॥

भद्राश्ववर्षे कालम्रभोजनाश्चन्द्रसन्निभाः ।
दशवर्षसहस्रायुर्दुःखरोगभयोज्झिताः ॥ ८२ ॥

वर्षायुतायुर्नीलाब्जद्युतिः पनससारभुक् ।
केतुमाले नरो दिव्यदेहगन्धो निरामयः ॥ ८३ ॥

वर्षे तु रम्यके मर्त्या नैय्यग्रोधफलाशनाः ।
द्वादशाब्दसहस्राणि जीवन्ति च निरामयाः ॥ ८४ ॥

वर्षे हिरण्मये मर्त्या लिकुचाशनवर्धिताः ।
सार्धद्वादशसहस्रजीवना रोगवर्जिताः ॥ ८५ ॥

त्रयोदश सहस्रायुः कल्पवृक्षफलाशनाः ।
युग्मप्रसूतिः कुरुषु नरा रोगभयोज्झिताः ॥ ८६ ॥

सदाशिवो महादेवः कपाली नीललोहितः ।
स्थाणुस्सांबः शंकराख्यो दक्षिणामूर्तिसंज्ञितः ॥ ८७ ॥

एतेऽष्टमूर्तयः खण्डे सर्वदेवानिषेविताः ।
न तेषु वर्षते देवो भौमान्यम्भांसि तेषु वै ॥ ८८ ॥

कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना ।
सर्वेष्वेतेषु वर्षेषु सप्तसप्तकुलाचलाः ॥ ८९ ॥

---

1) कं. 2) शाण्डिली.

नद्यश्च शतशस्तेभ्यस्संप्रसूता द्विजोत्तम!
यदेतद्भारतं वर्षं दक्षिणेन हिमाचलात् ॥ ९० ॥
एतद्बीजमथान्येषां लोकानां द्विजपुंगवाः
कर्मभूमिर्नचान्यत्र संप्राप्तिः पुण्यपापयोः ॥ ९१ ॥
पुण्योपभोग एवोक्ता द्वीपवर्षेषु कृत्स्नशः ।
उत्तरेण महांभोधेर्दक्षिणेन हिमाचलात् ॥ ९२ ॥
नवसाहस्रविस्तारं नवभेदं हिमाह्वयम् ।
महेन्द्रो मलयस्सह्यः शुक्तिमानृक्षपर्वतः । ॥ ९३ ॥
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ।
शतद्रूचन्द्रभागाद्या हिमवत्पादनिस्सृताः ॥ ९४ ॥
वेदस्मृति मुखाश्चाद्याः पारियात्रोद्भवा मुने! ।
नर्मदा सुरसाद्याश्च नद्यो विन्ध्याद्रिनिस्सृताः ॥ ९५ ॥
तापी पयोष्णी निर्विन्ध्याप्रमुखा ऋक्षसंभवाः ।
गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा ॥ ९६ ॥
सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः ।
कृतमाला ताम्रपर्णी प्रमुखा मलयोद्भवाः ॥ ९७ ॥
त्रिसामा ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः ।
ऋषिकुल्या कुमार्याद्याश्शुक्तिमत्पादसंभवाः ॥ ९८ ॥
आसन्नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः ।
एवन्तु नवखण्डोऽयं जम्बूद्वीपः प्रकीर्तितः ॥ ९९ ॥
बहुभिः पर्वतवरैर्नदीभिस्समलंकृतम् ।
जम्बूसंज्ञमिदं द्वीपं सुवृत्तं दर्पणोपमम् ॥ ९९ ॥
लक्षयोजनविस्तारं बहिःक्षारोदवेष्टितम् ।
अन्यूनानातिरिक्ताश्च वर्धन्ते च ह्रसन्ति च ॥ १०१ ॥
उदयास्तमयाद्येषु चन्द्रस्यापो महार्णवे ।
बलाहकोऽथ मैनाकश्चक्रो वृषभपर्वतः ॥ १०२ ॥
चत्वारो बलभिद्वज्रघातभीता जले स्थिताः ।
चक्रमैनाकयोर्मध्ये वायव्यां दिशि पावकः ॥ १०३ ॥
और्वो नाम तुरंगास्यो जलं पात्युद्गिरत्यपि ।
स्थालीस्थमग्निसंयोगादुद्रेकि सलिलं यथा ॥ १०४ ॥
तथेन्दुवृद्धौ सलिलमंम्भोधौ मुनिसत्तम! ।
उदयास्तमयेष्विन्दोः पक्षयोश्शुक्लकृष्णयोः ॥ १०५ ॥
दशोत्तराणि पंचैव त्वंगुलानां शतानि वै ।
अपां वृद्धिक्षयौ दृष्ट्वा समुद्राणां महामुने! ॥ १०६ ॥
समुद्रान्तस्थिताद्वीपा बहवश्चाल्पयोजनाः ।
म्लेच्छप्रायजनाकीर्णा रक्षोभिश्च निषेविताः ॥ १०७ ॥
कन्याद्वीपाद्बहिस्सिन्धोर्वेलानां षट्सहस्रकम् ।
नौसंचारस्समुद्दिष्टः पञ्चाशद्योजनांतरे ॥ १०८ ॥

इति श्री*शिवतत्त्वरत्नाकरे* द्वितीयकल्लोले
नवखण्डविभागवर्णनं नाम सप्तमस्तरंगः.

अष्टमस्तरंगः

नवखण्डात्मकं जम्बूद्वीपं प्रोक्तं त्वया विभो! ।
वक्तव्याश्चापरे द्वीपास्समुद्रैः परिवारिताः ॥ १ ॥
शृणु पुत्र! ब्रवीम्यन्यान् द्वीपान्सागरसंवृतान् ।
तत्रस्थान्प्राणिवर्गांश्च कटाहावधि विश्रुतान् ॥ २ ॥
जम्बूद्वीपाद् द्विगुणितः शाकद्वीपस्समन्ततः ।
शाकस्तत्र महावृक्षः सिद्धगन्धर्वसेवितः ॥ ३ ॥
यत्पत्रवातसंस्पर्शादाह्लादो जायते नृणाम् ।
तत्र पुण्या जनपदा नाकाले म्रियते जनः ॥ ४ ॥
कुत एव हि दुर्भिक्षं? क्षमातेजोयुता हि ते ।
शाकद्वीपेश्वरस्यापि हव्यस्य सुमहात्मनः ॥ ५ ॥
[1]सप्त वै त नयास्तेषां ददौ वर्षाणि सप्तशः ।
जलदश्च कुमारश्च सुकुमारो मणीचकः ॥ ६ ॥
कुसुमोदस्समोदार्कस्सप्तमश्च महाद्रुमः ।
तत्संज्ञान्येव तत्रापि सप्तवर्षाण्यनुक्रमात् ॥ ७ ॥
तथैव पर्वता राजन्! सप्तात्र मणिपर्वताः ।
रत्नाकरास्तथा नद्यः तेषां नामानि संशृणु ॥ ८ ॥
अतीव गुणवत्सर्वं तत्र पुण्ये जनाधिप!
देवर्षिगन्धर्वयुतः प्रथमो मेरुरुच्यते ॥ ९ ॥
प्रागायतो महाराज! मलयो नामपर्वतः ।
यतो मेघाः प्रवर्तन्ते प्रभवन्ति च सर्वतः । ॥ १० ॥
ततः पूर्वेण राजेन्द्र! जलधारो महागिरिः ।
तत्र नित्यमुपादत्ते वासवः परमं जनम् ॥ ११ ॥
यतो वर्षं प्रभवति वर्षाकाले जनेश्वर! ।
ततो गिरी रैवतको यत्र नित्यं प्रतिष्ठितः[2] ॥ १२ ॥
रेवती दिवि नक्षत्रं पितामहकृतो विधिः ।
उत्तरेण तु राजेन्द्र! श्यामो नाम महागिरिः ॥ १३ ॥
नवमेघप्रभः प्रांशुः श्रीमानुज्ज्वलविग्रहः ।
यतः श्यामत्वमापन्नाः प्रजा जनपदेश्वर! ॥ १४ ॥

[1] सप्तैवं. [2] ते.

सर्वेष्वेव महाराज! द्वीपेषु सुगुणान्वित! ।
गौरः कृष्णश्चवर्णौद्वौ तयोर्वर्णान्तरं नृप! ॥ १५ ॥
श्यामो यस्मात्प्रवृत्तो वै तस्माच्छामो गिरि स्मृतः ।
ततः परं महाराज! दुर्गशैलो महोदयः ॥ १६ ॥
केसरी केसरयुतो यतो वातः प्रवायति[1] ।
सुकुमारी कुमारी च नलिनी वेणुका तथा ॥ १७ ॥
इक्षुका धेनुका चैव गभस्तिश्चेति निम्नगाः ।
तासां पिबन्ति सलिलं तेन जीवन्ति जन्तवः ॥ १८ ॥
अनामया वीतशोका रागद्वेषविवर्जिताः ।
मगधा महसाश्चैव मागधा मन्दगास्तथा ॥ १९ ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमेण तु ।
यजन्ति सततं देवं सर्वलोकैकसाक्षिणम् ॥ २० ॥
व्रतोपवासैर्विविधैर्देवदेवं दिवाकरम् ।
तेषां वै सूर्यसायुज्यं सामीप्यं च सरूपता ॥ २१ ॥
सलोकता च राजेन्द्र! जायते तत्प्रासादतः ।
अन्याश्चायुतशस्तत्र क्षुद्रनद्यो महामुने! ॥ २२ ॥
महीधरास्तथा सन्ति शतशोऽथ सहस्रशः ।
जम्बूद्वीपाद् द्विगुणितश्शाकद्वीप स्समन्ततः ॥ २३ ॥
तावता क्षीरतोयेन समुद्रेण परीवृतः ।
क्षीराब्धौ शतसाहस्रैर्योजनानां मिते ग्रहे ॥ २४ ॥
अनन्तशयने विष्णुः शेते मणिमनोहरे ।
शाकात्तु द्विगुणःप्रोक्तो कुशद्वीपोऽग्निसन्निभः
कुशस्तम्भोदेवकृतो वर्तते द्वीपनामकृत् ।
ज्योतिष्मत्तनयैर्गुप्तः खण्डैस्तन्नामभिर्युतः ॥ २६ ॥
उद्भिदो वेणुमांश्चैव सुरथो लवणो धृतिः ।
प्रभाकरोऽथ कपिलस्तन्नाम्ना वर्षपद्धतिः ॥ २७ ॥
तस्यां वसन्ति मनुजास्सह दैतेयदानवैः ।
तथैव देवगन्धर्वा यक्षःकिंपुरुषादयः ॥ २८ ॥
व[1]र्षास्तत्रापि चत्वारो निजानुष्ठानतत्पराः ।
दमिकश्शुष्मिणः स्नेहा मन्देहाश्च महारथाः ॥ २९ ॥

[1] र्णा.

तत्र ते तु कुशद्वीपे ब्रह्मरूपं महेश्वरम् ।
यजन्ते क्षपयन्त्यत्र स्वाधिकारफलप्रदम् ॥ ३० ॥
विद्रुमः पाटलश्चैव हेमाद्रिश्च कुशेशयः ।
विद्रुमोहेमशैलश्च द्युतिमान् पुष्पवांस्तथा ॥ ३१ ॥
कुशेशयो हरिश्चैव सप्तमो मन्दराचलः ।
वर्षाचलास्तु सप्तैते सप्तद्वीपे महामुने! ॥ ३२ ॥
नद्यश्च सप्त तासां तु नामानीमान्यनुक्रमात् ।
[1]भूतपापा शिवा चैव पवित्रा सम्मतिस्तथा ॥ ३३ ॥
विद्युदम्भा महीचान्या सर्वपापहरास्त्विमाः ।
अन्यास्सहस्रशस्तत्र क्षुद्रनद्यस्तथाचलाः ॥ ३४ ॥
दाधितोयेन परितस्तावताम्बुधिनावृतः ।
क्रौञ्चे क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हेमकन्दरे ॥ ३५ ॥
स्कन्देन युध्द्वा सुचिरं चित्रमायी सुमानवान् ।
सशैलस्तस्य दैत्यस्य कान्तिचित्रेण कर्मणा ॥ ३६ ॥
केतुतामगमत्तस्य नाम्ना क्रौञ्चस्स उच्यते ।
द्युतिमत्तनयैस्तुल्यनामवर्षविभेदवान् ॥ ३७ ॥
कुशलो मननो गोष्णुः पीवरश्चा[2]थ कारकः ।
(मुनिश्च दुन्दुभिश्चैव सप्तैतेद्युतिमत्सुताः ।
तत्रापि देव गन्धर्वसेवितास्सुमनोहराः ।
वर्षाचला महाबुद्धे! तेषां नामानि मच्छृणु ।
क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः)
चतुर्थो रत्नशैलश्च स्वाहिनीहयसन्निभः ॥ ३८ ॥
द्वीपावृत्पञ्चमश्चैव तथान्यः पुण्डरीकवान् ।
दुन्दुभिश्च महाशैलो द्विगुणास्ते परस्परम् ॥ ३९ ॥
द्वीपा द्वीपेषु ये शैला यथा द्वीपेषु ते तथा ।
सर्वेष्वेतेषु वर्षेषु वर्षशैलवरेषु च ॥ ४० ॥
निवसन्ति निरातंकास्सह देवगणैः प्रजाः ।
पुष्कराः पुष्कला धन्या स्तिष्याख्याश्च महामुने! ॥ ४१ ॥
ते तत्र नद्यो मैत्रेय! याः पिबन्ति शृणुष्व ताः ।
सप्त प्रधानाश्शतशस्तत्रान्याः क्षुद्रनिम्नगाः ॥ ४२ ॥
गौरी कुमुद्वती चैव सन्ध्यारात्रिर्मनोजवा ।
ख्यातिश्च पुण्डरीकाख्यास्सप्तैता वर्षनिम्नगाः ॥ ४३ ॥

अत्रापि वर्णैर्भगवान् पुष्कराद्यैर्जनार्दनः ।
यागै रुद्रस्वरूपस्थ इज्यते यज्ञसन्निधौ ॥ ४३ ॥
क्रौञ्चतो द्विगुणस्सोऽपि घृततोयेन संवृतः ।
शाल्मलिस्तस्य वर्षाणि सप्तैव तु वपुष्मतः ॥ ४४ ॥
तनुजैस्सहनामानि भिन्नान्यद्रिवरैः पृथक् ।
श्वेतोऽथ हरितश्चैव जीमूतस्सुप्रभस्तथा ॥ ४५ ॥
रोहितो वैद्युतश्चापि मानसश्चापि सप्तमः ।
तत्रापि पर्वतास्सप्त विज्ञेयारत्नयोनयः ॥ ४६ ॥
वर्षाभिव्यञ्जकास्ते तु तथा सप्तैव निम्नगाः ।
कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः ॥ ४७ ॥
द्रोणो यत्र महौषध्यस्स चतुर्थो महीधरः ।
वैकंकः पञ्चमष्षष्ठो महिषस्सप्तमस्तथा ॥ ४८ ॥
कुमुद्वान्पर्वतवरः सरिन्नामानि मच्छृणु ।
यानि तोयानि तृष्णा च चक्रा सिक्ता विमो चिनी ॥ ४९ ॥
निवृत्तिस्सप्तमी तासां स्मृतास्ताः पापशान्तिदाः ।
शाल्मलेये तु वर्णाश्च वसन्त्येते महामुने! ॥ ५० ॥
कपिलश्चारुणः पीतः कृष्णश्चेतिपृथक् पृथक् ।
ब्राह्मणाः क्षत्रिया वैश्याश्शूद्राश्चैव यजन्ति तम् ॥ ५१ ॥
भगवन्तं समस्तस्य विष्णुमात्मानमव्ययम् ।
वायुभूतं मुखश्रेष्ठैर्यज्वानो यज्ञसंस्थितम् ॥ ५२ ॥
देवानामत्रसान्निध्यमतीव सुमनोहरे ।
शाल्मलिश्च महावृक्षो नामनिर्वृत्तिकारकः ॥ ५३ ॥
सहस्रयोजनोच्छ्रायश्शाल्मलेश्शाल्मलिद्रुमः ।
अमराणां प्रियोऽर्काभः सतदाख्यानिबन्धनः ॥ ५४ ॥
ततस्तु शाल्मली द्वीपो द्विगुणस्तावतैव तु ।
इक्षुसारस्वरूपेण समुद्रेण परीवृतः ॥ ५५ ॥
गोमेधो गोपतिर्नाम राजाऽभूद्गोसवोद्यतः ।
याज्योऽभूद्बहूनि कल्यानामौभिध्यानां मनोःकुले ॥ ५६ ॥
स तेषु हरियज्ञाय प्रवृत्तेषु भृगून् गुरून् ।
वव्रे तं गौतमः कोपादशपत्सो गमत्क्षयम् ॥ ५७ ॥
तद्यज्ञवाटे ता गावः प्लुष्टाः कोपाग्निना मुने! ।
तन्मेदसा मही च्छन्ना गोमेधस्स ततोऽभवत् ॥ ५८ ॥

---
1) घृ. 2) न्ध.

सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वराश्च वै ।
ज्येष्ठश्शान्तभयो नाम शिशिरस्तदनन्तरम् ॥ ५९ ॥
सुखोदयस्तथानन्दः शिवःक्षेमक एव च ।
ध्रुवश्च सप्तमश्चैषां प्लक्षद्वीपेश्वराहिते ॥ ६० ॥
पूर्वं शान्तभयं वर्षं शिशिरं सुखदं तथा ।
आनन्दं च शिवं चैव क्षेमकं ध्रुवमेव च ॥ ६१ ॥
मर्यादाकारकास्तेषां तथान्ये वर्षपर्वताः ।
सप्तैव तेषां नामानि श्रृणुष्व मुनिसत्तम! ॥ ६२ ॥
गोमेधश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा ।
सोमकस्सुमनश्शैलो वैभ्राजश्चैव सप्तमः ॥ ६३ ॥
वर्षाचलेषु रम्येषु सर्वेष्वेतेषु चानघ! ।
वसन्ति देवगन्धर्वसाहितास्सततं प्रजाः ॥ ६४ ॥
तेषु पुण्या जनपदाश्चिराच्च म्रियते जनः ।
नाधयो व्याधयो वाऽपि सर्वकालसुखं हि तत् ॥ ६५ ॥
तेषां नद्यश्च सप्तैव वर्षाणान्तु समुद्रगाः ।
नामतस्ताः प्रवक्ष्यामि श्रुताः पापं हरन्ति याः ॥ ६६ ॥
[1]आमतप्ता शिवा चैव विपापा त्रिदिवाकृतिः ।
अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः ॥ ६७ ॥
एता नद्यस्तथाचैव प्रधानास्समुदीरिताः ।
क्षुद्रनद्यस्तथा शैलास्तत्र सन्ति सहस्रशः ॥ ६८ ॥
ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते ।
नैवापसर्पिणी तेषां न चैवोत्सर्पिणी स्थिता ॥ ६९ ॥
नत्वेवास्ति युगावस्था तेषु स्थानेषु सप्तसु ।
त्रेतायुगसमः कालः सर्वदैव महामुने! ॥ ७० ॥
वर्णांश्च तत्र चत्वारस्तान्निबोध वदामि ते ।
आर्यकाः कुरराश्चैव विदंशा खाविनश्च ते ॥ ७१ ॥
विप्रक्षत्रियवैश्यास्ते शूद्राश्च मुनिसत्तम! ।
तस्माद्वीपाद्द्विगुणितः तन्मध्ये सुमहातरुः ॥ ७२ ॥
प्लक्षस्तन्नामसंज्ञोऽयं प्लक्षद्वीपो द्विजोत्तम! ।
इज्यते भगवांस्तत्र त्रैवर्णैरार्यकादिभिः ॥ ७३ ॥
सोमरूपी जगत्स्रष्टा सर्वस्सर्वेश्वरो हरः ।
इत्येवमत्र राजेन्द्र प्लक्षद्वीप उदाहृतः ॥ ७४ ॥

[1] अनु.

समावेष्ट्य स्थितो द्वीपं सुरातोयो महाम्बुधिः ।
तमर्णवं समावृत्य स्थितः पुष्करसंज्ञितः ॥ ७५ ॥
द्वीपो द्विभेदो लक्षाणां चतुष्षष्टिकविस्तरः ।
पुष्कराधिपतेः पुत्रौ सवर्णस्य महात्मनः ॥ ७६ ॥
महापीतो धातकिश्च वर्षे तन्नामनी उभे ।
पुष्करद्वीपमध्ये तु वलयाकारसंस्थितः ॥ ७७ ॥
महामेरुपरीमाणो मानसोत्तरपर्वतः ।
तस्योपरिदिगीशानामिन्द्रादीनां यथाक्रमम् ॥ ७८ ॥
पुर्योऽष्टौ दिक्षु चाष्टासु सन्ति दिव्याप्सरोयुताः
आमानसोत्तरान्मेरोरधितिष्ठन्ति मानवाः ॥ ७९ ॥
मानसोत्तरपश्चार्धे श्वेतद्वीपो हरिप्रियः ।
देवा अपि न तं गन्तुं शक्ता भक्तिविवर्जिताः ॥ ८० ॥
सनन्दनाद्या मुनयस्तत्र गच्छन्त्ययत्नतः ।
महापीतं तथैवान्यद्धातकीषण्ड सञ्ज्ञितम् ॥ ८१ ॥
एकश्चात्र महाभाग! प्रख्यातो वर्षपर्वतः ।
मानसोत्तरसंज्ञोयं मध्यतो वलयाकृतिः ॥ ८२ ॥
योजनानां सहस्राणि ह्यूर्ध्वं पञ्चाशदुच्छ्रितः ।
तावदेवच विस्तीर्णः पर्वतः परिमण्डलः ॥ ८३ ॥
पुष्करद्वीपवलयं मध्येन विभजन्निव ।
स्थितोऽसौ तेन विच्छिन्नं जातं वर्षद्वयं च तत् ॥ ८४ ॥
वलयाकारमेकैकं तयोर्मध्ये तथा गिरिः ।
दशवर्षसहस्राणि तत्र जीवन्ति मानवाः ॥ ८५ ॥
निरामया [1]वीतशोका रागद्वेषविवर्जिताः ।
नैवाधमोत्तमौ तेषां[2] न वध्यवधिका द्विज! ॥ ८३ ॥
नेर्ष्यासूया भयं रोषो दोषा लोभादिका न च ।
महापीतं [3]वहिर्वर्षं धातकी संज्ञमन्ततः ॥ ८७ ॥
मानसोत्तरशैलस्य देवदैत्यादिसेविते ।
सत्यानृते न तत्र स्तः द्वीपे पुष्करसंज्ञिते ॥ ८८ ॥
न तत्र नद्यश्शैला वा द्वीपे वर्षद्वयान्विते ।
समरूपाश्च मनुजा देवास्तत्रैकरूपिणः ॥ ८९ ॥
वर्णाश्रमाचारहीनं दानग्रहणवर्जितम् ।
त्रयीवार्तादण्डनीतिशुश्रूषारहितं च यत् ॥ ९० ॥

[1] विशोकास्ते. [2] षु. [3] महावर्षे.

वर्षद्वयं तु मैत्रेय! भौमस्वर्गोऽयमुत्तमः ।
सर्वस्य सुखदः कालो जरारोगादिवर्जितः ॥ ९१ ॥
पुष्करे धातकी षण्डे महापीते च वै मुने! ।
न्यग्रोधः पुष्करद्वीपे ब्रह्मणःस्थानमुत्तमम् ॥ ९२ ॥
तस्मिन्निवसति ब्रह्मा पूज्यमानस्सुरासुरैः ।
तत्रैव मुनिशार्दूल! शिवनारायणालये ॥ ९३ ॥
वसत्यत्र महादेवो हरोऽथ हरिरव्ययः ।
संपूज्यमानो ब्रह्माद्यैः कुमाराद्यैश्च योगिभिः ॥ ९४ ॥
भोजनं पुष्करद्वीपे तत्र स्वयमुपस्थितम् ।
षड्रसं भुञ्जते विप्र! प्रजास्सर्वास्सदैवहि ॥ ९५ ॥
स्वादूदकेनोदधिना पुष्करः परिवेष्टितः ।
समानः पुष्करस्याब्धिः द्विस्तारे मण्डले तथा ॥ ९६ ॥
एवं द्वीपास्समुद्रैस्तु सप्त सप्तभिरावृताः ।
द्वीपाश्चैव समुद्राश्च समाना द्विगुणाः परैः ॥ ९७ ॥
यादांसि सर्वदा सर्वसमुद्रेषु समानि वै ।
न्यूनातिरिक्तता तेषां कदाचिन्नैव जायते ॥ ९८ ॥
तद्बहिः काञ्चनी भूमिर्नानारत्नद्रुमाचला ।
क्रीडार्थं वेधसा सृष्टा देवानां दशकोटिका ॥ ९९ ॥
लोकालेके बहिस्तस्या लोकालोकनियामकः ।
योजनायुतविष्कम्भस्तुंगश्रृंगपरिच्छदः ॥ १०० ॥
तस्य श्रृंगेषु तिग्मांशुकराश्चन्द्रातपोपमाः ।
वसुदामा शंखपादो हिरण्यः केतुमानपि ॥ १०१ ॥
कर्दमस्य सुतास्तस्य चतुर्दिक्षु समाश्रिताः ।
लोकपालाःस्थितास्तत्र लोकालोके चतुर्दिशि ॥ १०२ ॥
तमः परस्तान्निबिडं लक्षाण्येकोनविंशतिः ।
चत्वारिंशत्सहस्राणि पञ्चात्रिंशच्च कोटयः ॥ १०३ ॥
सप्तविंशतिलक्षाणि कोटिश्चैव समुद्रराट् ।
ब्रह्माण्डोऽयं कटाहेन संयुक्तो मेरुमध्यतः ॥ १०४ ॥
पञ्चाशत्कोटयो ज्ञेया दशदिक्षु समन्ततः ।
ग्रन्थास्तु षट्छतान्येकचत्वारिंशच्च संख्यया ॥ १०५ ॥
तरंगैरष्टभिर्युक्ते कल्लोलेऽस्मिन्द्वितीयके ।
महाभारतवाराहे कौर्मे स्कान्दं च वैष्णवम् ॥ १०६ ॥
कुमारिकाण्डं शैवादि संग्रह्यायं कृतोऽभवत् ॥
श्रीमत्सद्गुणसोमशेखरलसच्चन्नाम्बिकासूनुना ।
श्रीदीक्षागुरुचन्नवीरकरसंज्ञातेन लब्धश्रिया ॥
गौरीभर्तुरनुग्रहाद्बसवराजेन्द्रेण क्लृप्ते पुनः ।
कल्लोलः परिपूरितः कृतिवरेत्वस्मिन्द्वितीयोऽभवत् ॥

इति श्रीशिवतत्त्वरत्नाकरे
शाकद्वीपादिकटाहान्तवर्णनं नामाष्टमस्तरंगः
श्रीः

इति द्वितीय कल्लोलः

श्रीः

श्री शिवतत्त्वरत्नाकरः

अथ तृतीयः कल्लोलः

प्रथमस्तरंगः

अब्धौ शंकरतां विमृश्य तनुजं बालं दिशत्यात्मने ।
सज्वाला हि सरित्समीपनिहितः प्रम्लापितःप्रत्यहम् ।
वृद्धिं नैत्यधुनापि निर्दयमहं प्राप्यार्धमेवाभवं ।
त्वामित्युक्तवतीं प्रियां प्रतिहसन् गौरीपतिःपातु वः ।
साब्धिद्वीपमहामेरुनदीशैलविभागवान् ।
भूगोलस्यास्य विस्तारो गुरो! प्रोक्तस्सविस्तरम् ॥ १ ॥
भवता पाल्यमानस्य लोकस्यास्य विवेचने ।
विशेषो नेक्ष्यते स्वामिन्! अपारकरुणानिधे! ॥ २ ॥
ऊर्ध्वलोकस्य विस्तारं तत्स्वरूपं सविस्तरम् ।
प्रकाशय महातेजः! प्रकाशितजगत्त्रयम् ॥ ३ ॥
नन्दनोदग्रया बुद्ध्या समानान्दयसे हि नः ।
श्रोतुमिष्टं यदेतर्हि तुभ्यं तद्वर्णयाम्यहम् ॥ ४ ॥
तिथिलक्षो भुवर्लोको ध्रुवप्रान्तो महीतलात् ।
तदूनकोटिस्स्वर्लोकः स्वर्गवर्यसमाश्रयः ॥ ५ ॥
महर्द्विकोटिर्यत्रास्ते मरीच्यादिमुनिव्रजः ।
जनोऽष्टकोट्यवच्छिन्नः पितृजह्नुजनालयः ॥ ६ ॥
तपोऽर्ककोटिर्यत्रास्ते महायोगी स नन्दनः ।
भृगुस्सनत्कुमारश्च सनकश्च महातपाः ॥ ७ ॥
ततश्शतधृतेस्स्थानं सत्यलोकस्स्वयंभुवः ।
कामातिशयसंपन्नःकोटयो नव सप्त च ॥ ८ ॥
ततश्चतस्रष्षट् चेति मधुत्रिपुरविद्विषोः ।
स्थाने ज्योतिर्मये चित्रे कोट्यश्चाण्डकटाहकः ॥ ९ ॥
शतकोटिप्रविस्तीर्ण इति ब्रह्माण्डगोलकः ।
भूरादयस्त्रयो लोकाः कृतका इत्युदीरिताः ॥ १० ॥
जनलोकादयो लोकाः त्रयश्चकृतकास्स्मृताः ।
भूरादयस्त्रयोलोकास्सपातालास्सहार्णवाः ॥ ११ ॥
ब्रह्मणो दिनपर्यन्ते संह्रीयन्ते पुनःपुनः ।
अहरादौ च सृज्यन्ते यथापूर्वं मुहुर्मुहुः ॥ १२ ॥
जनलोकादयस्सर्वे लीयन्ते ब्रह्मणः क्षये ।
अतः कृतकसंज्ञास्ते नान्तरा प्रभवन्ति यत् ॥ १३ ॥
शिंशुमारइति प्रोक्तो यादोरूपः प्रजापतिः ।
शिवशक्तिधृतोऽचिन्त्यो महर्लोकादधस्स्थितः ॥ १४ ॥
तदाधारस्थितास्सप्तवायुस्कन्धा महाबलाः ।
आधाराग्रहनक्षत्रविमानानां नृपोत्तम! ॥ १५ ॥
भूमेरुपरि मेघान्तमावहो वायुरुच्यते ।
प्रवहस्सूर्यपर्यन्तमाचन्द्राद्दूर्ध्वतःस्थितः ॥ १६ ॥
ततो नक्षत्रपर्वन्तं संवहः परिकीर्तितः ।
विवहो ग्रहपर्यन्तस्तेभ्यश्चोर्ध्वे परावहः ॥ १७ ॥
सप्तर्षिभ्यस्ततो वायुश्शिंशुमारान्तमूर्ध्वगः ।
बली परिवहो नाम सप्तैते स्कन्धवायवः ॥ १८ ॥
अष्टाविंशतिकोट्यस्तु रज्जवो वायुनिर्मिताः ।
शिंशुमाराश्रयास्सर्वाः प्रतिस्कन्धेषु भागशः ॥ १९ ॥
वातरज्जुनिबद्धानि विमानानि दिवौकसाम् ।
अष्टाविंशतिकोट्यस्तु भ्राम्यन्ते वायुना [1]पुनः ॥ २० ॥
तावत्यस्तारकाः प्रोक्तास्तावत्यो वातरश्मयः ।
सर्वे ध्रुवनिबद्धा वै ग्रहास्ते वातरश्मिभिः ॥ २१ ॥
अनेन भ्राम्यमाणाश्च यथायोगं भ्रमन्ति च ।
भूमेस्सन्निहितास्सन्ति ग्रहलोका अनेकशः ॥ २२ ॥
तत्र ग्रहाश्चबहवस्सन्ति तेषामधीश्वराः ।
खड्गरावणनामानो[2] रुद्रस्तस्युतु शक्तयः ॥ २३ ॥
अष्टस्युश्चूलकुण्डाद्यास्तथा मातृगणादयः ।
परिग्रहा द्वारपालौ प्राचि स्तो रौद्रपिंगलौ ॥ २४ ॥

---

1) नृप. 2) तु.

दक्षिणेतु स्मशानांकभीषणौ पश्चिमे तथा ।
दृढकर्मा भृंगिरिटिर्द्वौवेतालावुत्तरे पुनः ॥ २५ ॥
आमर्दको महाकालश्चत्वारः कोणपालकाः ।
कुम्भकर्णो जातहरो भल्लाटो शोकइत्यपि ॥ २६ ॥
खट्वांग शूल डमरांकुश खड्गचर्म-
घण्टा कपाल शकला भयमुण्डहस्ता ।
सन्ध्याभ्र सन्निभतनुर्बहुभूषणाढ्यो
भूतेश्वरो वसति पञ्चमुखाभिरामः ॥ २७ ॥
अमरासुरनागाश्च यक्षगन्धर्वराक्षसाः ।
हेड्रूकाश्चलनिस्तेजोभस्मकाः पितरः कृशाः ॥ २८ ॥
विनायकाः प्रलापाश्च पिशाचीत्यजयोनिजाः
भूता[1]ख्येति समाख्याता अष्टादश महाग्रहाः ॥ २९ ॥
अपस्मारो द्विजोब्रह्मराक्षसोऽवनिभुग्विशौ ।
वृषलो नीचचण्डालौ व्यन्तराश्च नवग्रहाः ॥ ३० ॥
रुद्रक्रोधोद्भवाश्चैतेऽप्यन्ये च बहवो ग्रहाः ।
ते मन्त्रशास्त्रे संप्रोक्तास्सौरसेन्या महाज्वराः ॥ ३१ ॥
वातकः पैत्तिकश्चाथ श्लेष्मिकस्सान्निपातकः ।
अपस्मारः शृंखलश्च धनुर्धरइति क्रमात् ॥ ३२ ॥
कूश्माण्डश्चण्डवेगश्च तुण्डालो डिण्डिमस्तथा ।
कंकलाश्च कवन्धाश्च वेताला विहगाननाः ॥ ३३ ॥
गुह्यका गारुडा गृध्रा रासभाः किन्नराः परे ।
नग्नाः किम्पुरुषा रण्डाश्चण्डाला बर्बरास्तथा ॥ ३४ ॥
पतंगा बभ्रवश्शुभ्राः नागाः पुण्डाश्च पिंगलाः ।
जटिला जाल्मला दीर्घा निखर्वाः कृष्णयोनिजाः ॥ ३५ ॥
जालका विह्वलाश्चेति व्यन्तराः पूर्वसंस्थिताः ।
चामुण्डा दरहाश्चैव कुम्भीराः कुक्कुटास्तथा ॥ ३६ ॥
मूकाश्चान्धाश्च बधिरा मृगास्या निश्शठाश्शठाः ।
वेचिका लुब्धका लोभ्रास्तथा प्रेताश्च किंकराः ॥ ३७ ॥
परेताः पूतिनासाश्च कृत्तिनासाश्च गोनसाः ।
ऊर्ध्वकेशाः स्फुलिंगाक्षा विद्युजिह्वाः प्लवंगमाः ॥ ३८ ॥

[1] श्चे.

आमर्दा दुर्दुराः क्षुद्राः उच्छिष्टा व्याकुलास्तथा ।
कालाः करालाः कादम्ब्या व्यन्तरा दक्षिणाश्रुताः ॥ ३९ ॥
भेरुण्डास्ताम्रचूडाश्च खर्जूरा जर्जराननाः ।
गोमुखाश्चाथ गोकर्णा स्तूलकर्णास्तथाऽपरे ॥ ४० ॥
एकपादाश्चैकदंष्ट्राश्शण्डकाश्चाथ शण्डिलाः ।
उल्लिंगाश्च कुलिंगाश्च गजास्याश्चर्पटाननाः ॥ ४१ ॥
शेखरास्त्रिशिराश्चान्ये खद्योता वैद्युताः पुनः ।
जीमूतकास्साग्रनखाः विस्रस्ता विस्रकास्तथा ॥ ४२ ॥
धूम्राश्च धूसराश्चैव सरलाः कुटिलास्तथा ।
कुम्भीनसा इति प्रोक्ता व्यन्तराः प्रश्चिमाश्रिताः ॥ ४३ ॥
विश्वरूपा विरूपाश्च बहुरूपाश्च भीषणाः ।
निर्घासाश्चैव निर्भासो वर्तासंवर्तकास्तथा ॥ ४४ ॥
आवर्ताः कीकसाः कुल्या निर्मांसा विकृताननाः ।
मलिना पूयगन्धाश्च पापरूपाः पलाशनाः ॥ ४५ ॥
[2]योगिनीमन्त्रगर्भाश्च सुब्रह्मण्याश्च दक्षिणाः ।
सारस्वतास्सहोत्राश्च सुवस्त्राश्चाग्निरेतसः ॥ ४६ ॥
मदालसा मदोन्मत्ता मदान्धा मदलालसाः ।
विविक्तास्वादुरा श्शान्ता इत्युदग्व्यन्तराश्रिताः ॥ ४७ ॥
प्रत्येकं कान्तिभिन्नास्ते प्रायस्स्वाख्यानलक्षणाः ।
ग्रहाश्मकूपशैलाग्रवनोपवनसानुषु ॥ ४८ ॥
सरिद्वापीसरःकूपतटाकोदन्वतस्तटे ।
संगमे सरिदावर्ते गोकुले शून्यमन्दिरे ॥ ४९ ॥
एकवृक्षे चितास्थाने प्रभ्रष्टे देवतागृहे ।
निधिदेशे रसक्षेत्रे बिलद्वारे चतुष्पथे ॥ ५० ॥
ग्रामसीमान्तरे मातृस्थाने च क्षेत्रतीर्थयोः ।
आरामोद्यानयोस्सौधप्रासादाट्टालकेषु च ॥ ५१ ॥
क्रीडापरा वसन्त्येषु स्थानेष्वन्येषु च ग्रहाः ।
प्रसूतां गर्भिणीं नग्नां ऋतुस्नातां दुराचरीम् ॥ ५२ ॥
आसन्नपुष्पां कामार्तां मद्यमांसाभिकांक्षिणीम् ।
मुह्यमानां विलासाढ्यां रथ्याचत्वारयोस्स्थिताम् ॥ ५३ ॥

[2] योगसामन्तगर्भाश्च.

प्राप्तप्रथमसंभोगां तैलाभ्यक्तामविक्षताम् ।
हृष्टां क्लिष्टां हतां क्रुद्धां हानिनं भीरुशोकिनौ ॥ ५४ ॥
शर्वर्याश्रितमुच्छिष्टं व्याधितं [1]कुसुमाहरम् ।
अलाभमूढं पूर्वाप्तनष्टद्रव्यं वियोगिनम् ॥ ५५ ॥
एकाकिनं कान्ततनुं भूषितं च निरायुधम् ।
ग्रहा गृह्णन्ति स्त्रीपुंसावीदृशावीश्वराज्ञया ॥ ५६ ॥
भूलोकादूर्ध्वभागे तु द्विषड्योजनमात्रतः ।
मेघलोको भवेत्तत्र मेघास्सर्वे वसन्ति हि ॥ ५७ ॥
अथ धूमाग्निवायूनां संयोगात्संभवन्ति ते ।
वारिण्येवतु वर्षन्ति तेषामीशः सहस्रदृक् ॥ ५८ ॥
यज्ञधूमोद्भवं चाभ्रं द्विजानां हितकृत्सदा ।
शवाग्नि धूमसंभूतमभ्रं नैवाहितं सदा ॥ ५९ ॥
अभिचाराग्नि धूमोत्थं भूतनाशाय जायते ।
तस्मादाच्छादयेद्धूममभिचारकृतं नरः ॥ ६० ॥
एकमुद्दिश्य लोकस्य क्षयकृत्स भविष्यति ।
अपां निधानं जीमूताष्षण्मासानिह सुव्रताः ॥ ६१ ॥
वर्षन्ति वारि जगतां हिताय पवनास्पदाः ।
न भ्रश्यन्ति यतोऽभ्राणि मेघा मेहनतस्स्मृताः ॥ ६२ ॥
काष्ठज्योतिश्च वैरिञ्चः पाक्षश्चेति पृथग्विधा ।
आद्यस्तु काष्ठसंयोगादग्नेर्धूमः प्रवर्तितः ॥ ६३ ॥

[1] सकुतूहलम्.

द्वितीयस्तत्र संभूतो विरिंचोछ्वासवायुना ।
भूभृतामथपक्षैस्तु गोप्रजाभिहितैः पट्टः ॥ ६४ ॥
वाह्नेया अथ जीमूतास्ते च प्रवहजाश्शुभाः ।
वैरिञ्चोछ्वासजास्सर्वे प्रवहस्कन्धगास्तथा ॥ ६५ ॥
पक्षजाः पुष्कलाद्यास्तु ते परावह [1]गाम्बुदाः ।
स्वल्पवृष्टिप्रदा दीर्घकालशीतसमीरणाः ॥ ६६ ॥
जीमूताश्च तथाक्षीणा धरापृष्ठ समाश्रिताः ।
अर्धक्रोशे च ते सर्वे जीमूतास्सिद्धवासिनः ॥ ६७ ॥
तेषां हि प्रतिसर्गाणि बहूनि स्युः पयोमुचाम् ।
पक्षजाः कल्पगास्सर्वे पर्वतानां महत्तरा ॥ ६८ ॥
कल्पान्तेऽग्निं च वर्षन्ति रात्रौ नाशाय नारद! ।
यदावै पुष्कलाद्यास्तु वर्षन्ति जलदा जलम् ॥ ६९ ॥
तदार्णवमभूत्सर्वं तत्र शेते गिरीश्वरः ।
आग्नेयानां श्वासजानां पक्षजानां पयोमुचाम् ॥ ७० ॥
सविद्युतां सतोयानां धूमो ह्याप्यायनस्स्मृतः
एवं सर्वे प्रवर्षन्ति काले काले पयोमुचः ॥ ७१ ॥

इति श्रीशिवतत्त्वरत्नाकरे तृतीयकल्लोले
मेघाश्रयग्रहलोकवर्णनं नाम प्रथमस्तरंगः

[1] ना.

द्वितीयस्तरंगः

कस्मिन्काले च के मेघा वर्षन्ति सलिलैर्महीम् ।
किंवा निमित्तमासाद्य तेभ्यो वृष्टिःप्रजायते ॥ १ ॥
एतन्मह्यं समाख्याहि गुरो! मयि कृपा यदि ।
पुत्र! ते कथयाम्येतत् यदर्थस्ते समुद्यमः ॥ २ ॥
कार्त्तिके मार्गशीर्षे वा संक्रान्ते यदि वर्षति ।
मध्यमं जायते सस्यं पौषमासे सुभिक्षदम् ॥ ३ ॥
दीपोत्सवदिने वारौ भौमार्कौ न शुभावहौ ।
गर्जिते कार्त्तिके मासे चतुर्मासेषु वर्षति ॥ ४ ॥
सुभिक्षं जायते तत्र सस्यसम्पत्तिरुत्तमा ।
सर्ववर्णास्तथा मेघा जायन्ते च पृथक् पृथक् ॥ ५ ॥
कुत्र चिचेद्भवेद्वृष्टिः कुत्र चित्स्यादवर्षणम् ।
अभ्राणि श्वेतवर्णानि पीतवर्णानि वा यदि ॥ ६ ॥
कृष्णवर्णो भवेन्मेघस्ताम्रवर्णास्तथापरे ।
कांस्यवर्णो भवेन्मेघस्तथा सिन्दूरसप्रभः ॥ ७ ॥
कार्त्तिके चैव मासे तु स्यादेवं गर्भलक्षणम् ।
यन्नक्षत्रगते चन्द्रे गर्भं ब्रूयाच्च तद्वशात् ॥ ८ ॥
पञ्चोनविंशतौ चैव दिने प्रसवमादिशेत् ।
सितपक्षोद्भवाः कृष्णे कृष्णपक्षोद्भवास्सिते ॥ ९ ॥
निशिजातास्तथा चाह्नि दिवाजातास्तथा निशि ।
सन्ध्याजाताश्च सन्ध्यायां पूर्वजाताश्च पश्चिमे ॥ १० ॥
प्राच्यामपरजाताश्च वर्षन्तीति विदुर्बुधाः ।
एते चान्येच विज्ञेया व्यत्यये मरुतस्तथा ॥ ११ ॥
अश्विन्यां तु सुगर्भे तु सुभिक्षं जायते ध्रुवम् ।
मार्गशुक्लतृतीयादौ मेघा दिनचतुष्टये ॥ १२ ॥
सगर्भा यत्र जायन्ते सुभिक्षं तत्र निश्चितम् ।
मार्गस्य कृष्णपक्षेतु चतुर्थ्यां तु भुजंगमम् ॥ १३ ॥
ऋक्षं भवति मेघाश्च विद्युद्गर्जितसंयुताः ।
आषाढे शुक्लपक्षेतु सततं वर्षणं भवेत् ॥ १४ ॥
पञ्चमे च तथा षष्ठे सप्तमे च तथैव च ।
आश्लेषाचित्रपूर्वासु यदि गर्भः प्रजायते ॥ १५ ॥

आषाढे शुक्लपक्षेतु सततं वर्षणं भवेत् ।
अष्टमी नवमी चैव चित्रास्वातीसमन्विते ॥ १६ ॥
आषाढे शुक्लपक्षेतु जलयोगो भवेद्ध्रुवम् ।
दशम्येकादशी चैव त्वमावास्या विशेषतः ॥ १७ ॥
सर्वलक्षणसंयुक्ता ह्यष्टमी ऋतुसंयुता ।
गर्भो विद्युत्समायुक्तमभ्रं वा यदि जायते ॥ १८ ॥
आषाढे शुक्लपक्षे तु तद्दिने वर्षति ध्रुवम् ।
कार्त्तिकं मार्गशीर्षं च कथितं तव भामिनि! ॥ १९ ॥
पुष्यशुक्लचतुर्थ्यान्तु संजाते विद्युदीक्षणे ।
अभ्रच्छन्नं भवेच्चेष्टं मत्स्यमिन्द्रायुधं तथा ॥ २० ॥
अजपादं प्रयत्नेन अहोरात्रं निरीक्षयेत् ।
सर्वेषामपि चिह्नानाममोघं विद्युदीक्षणम् ॥ २१ ॥
आषाढे शुक्लपक्षे तु सफलं विद्युदीक्षणम् ।
तस्मिन् ऋक्षेतु संप्राप्ते त्वहोरात्रं निरीक्षयेत् ॥ २२ ॥
विद्युन्मेघधनुर्मत्स्येष्वेकोऽपि यदि नो भवेत् ।
न ऋक्षं वर्षते तत्र न काले वर्षति ध्रुवम् ॥ २३ ॥
अनेन ज्ञायते सर्वं वर्षणं चाप्यवर्षणम् ।
विद्युत्संयोगजं गुह्यं न देयं यस्यकस्यचित् ॥ २४ ॥
एकादश्यां तथा ज्ञेयं सहिमं विद्युदीक्षणम् ।
सजलो रोहिणीयोगस्समादेश्यो विचक्षणैः ॥ २५ ॥
आषाढे तद्दिने प्राप्ते रोहिण्यां च जलं बहु ।
पौषस्य पौर्णमासी या तथा कृष्णे द्वितीयका ॥ २६ ॥
मघानक्षत्रसंयुक्ता मेघच्छन्नापि वा तथा ।
निष्पत्तिः सर्वसस्यानां नात्रकार्या विचारणा ॥ २७ ॥
पौषस्य कृष्णसप्तम्यां साभ्रं यदि नभस्स्थलम् ।
सहिमं ज्योतिषां योगमैशान्यां विद्युदीक्षणम् ॥ २८ ॥
श्रवणे शुक्लसप्तम्यां स्वातीयोगे जलं भवेत् ।
निष्पत्तिस्सर्वसस्यानां प्रजाश्च निरुपद्रवाः ॥ २९ ॥
अभ्राणि यदि दृश्यन्ते पतेयुर्जलबिन्दवः ।
अभ्रच्छन्ने जलं स्वल्पं जलपातस्सुवृष्टिदः ॥ ३० ॥

पौषे विद्युदमायां तु श्रवणेन हिमं यदि ।
अभ्रच्छन्नं नभश्चापि सजलं चात्र जायते ॥ ३१ ॥
श्रावणे पूर्णिमायां तु श्रवणे च जलं बहु ।
सुभिक्षं च समादेश्यं तस्मिन्वर्षे न संशयः ॥ ३२ ॥
पौषस्य शुक्लपक्षेतु पूर्णिमा गर्भलक्षणम् ।
पौषस्य कृष्णतिथिषु यदि चेद्गर्भलक्षणम् ॥ ३३ ॥
श्रावणे शुक्लपक्षेतु गर्भभूते च तद्दिने ।
पौषं च कथितं देवि! माघमासमतः शृणु ॥ ३४ ॥
माघस्य शुक्लसप्तम्यां विद्युदभ्रं धनुर्जलम् ।
तुषारश्चैन्द्रचापश्च कौबेरे सर्वदिक्षु वा ॥ ३५ ॥
सन्ध्या नीलारुणा [1]तु स्यात्सुभिक्षं निरुपद्रवम् ।
माघस्य पूर्णिमा पैन्त्या विद्युद्वातसमन्विता ॥ ३६ ॥
श्रावणस्य त्वमायां च मघायां च भवेज्जलत् ।
माघस्य नवमी कृष्णदशम्येकादशी यदि ॥ ३७ ॥
सर्पर्क्षगर्भसंयुक्ता बहु भाद्रपदे जलम् ।
माघमासे त्वमायां च दृश्यन्ते जलदा यदि ॥ ३८ ॥
तद्दिनं च भवेत्तत्र दिव्यगर्भं च जायते ।
भाद्रस्य पूर्णिमायां तु [2]यदि वर्षत्यहर्निशम् ॥ ३९ ॥
फाल्गुने शुक्लसप्तम्यां पूर्णिमायां विशेषतः ।
निवाता गगने मेघा विजला विद्युता युताः ॥ ४० ॥
नभस्यतद्दिने प्राप्ते प्रभूतजलदायकाः ।
निवाता गगने मेघा विजला विद्युता युताः ॥ ४१ ॥
नभस्यतद्दिने प्राप्ते प्रभूतजलदायकाः ।
फाल्गुने कृष्णसप्तम्यामष्टम्यादि [3]चतुर्दिने ॥ ४२ ॥
(चतुर्दश्याममायां वा सगर्भं यदि जायते ।
अश्विनी शुक्लपक्षे तु सप्तम्यादि तिथिष्वपि ॥)
सप्तऋक्षेण संयुक्ताः प्रभूतजलदायकाः।
चैत्रस्य शुक्लपक्षेतु पञ्चमी रोहिणीयुता ॥ ४३ ॥
सप्तम्यां शिवदैवत्यां नवम्यां पुष्यमेवच ।
पूर्णिमासंयुता चित्रा तत्र यत्नाद्विलोकयेत् ॥ ४४ ॥
विद्युत्स्तनितसंयुक्तं प्रतिमासं चतुष्टयम् ।
आषाढं रोहिणी हन्ति यथार्द्रा श्रावणं तथा ॥ ४५ ॥
हन्ति भाद्रपदं पुष्यो हन्याच्चित्रा तथाऽऽश्विनम् ।
एभिस्तु गलितो ऋक्षैर्गर्भः पतति निश्चितम् ॥ ४६ ॥
चैत्रं तु वर्णितं देवि! ज्ञातव्यं दैवचिन्तकैः ।
साभ्रास्सौम्याश्शुभाः प्रोक्ताः पौषास्तुहिनसंयुताः ॥ ४७ ॥
माघामारुतसंयुक्ताः निवाताः फाल्गुनाश्शुभाः ।
चैत्रस्तु बहुरूपो वै दक्षिणानिलसंयुताः ॥ ४८ ॥
सर्वे विद्युत्समायुक्ता गर्भाश्च शुभलक्षणाः ।
विद्युतो लक्षणं वक्ष्ये काले काले शुभावहम् ॥ ४९ ॥
एन्द्री तु जलदा विद्युत् आग्नेयी जलनाशिनी ।
याम्या स्वल्पजला प्रोक्ता नैरृत्याडम्बरान्विता ॥ ५० ॥
यदातदा महद्युद्धं राज्ञां पीडा जनस्य च ।
प्रभूतजलदा विद्युद्वारुणी सस्यदायिनी ॥ ५१ ॥
वातप्रदा तु वायव्या कौबेरी सस्यदायिनी ।
सर्वसस्यकरी विद्युदैशानी क्षिप्रवर्षदा ॥ ५२ ॥
प्रभूतजलदा ज्ञेया भृशं गर्जन्ति ये घनाः ।
विद्युतो मण्डलं चैव चिन्तनीयं सदा बुधैः ॥ ५३ ॥
यतस्सर्वं समादेश्यं प्रथमे विद्युदीक्षणे ।
चक्षुर्भवति मेघानां विद्युन्मार्गप्रदर्शिनी ॥ ५४ ॥
मदोन्मत्ता महामेघा गर्जन्ते विद्युदीरिताः ।
विद्युदीशा न गर्जन्ति वर्षन्ति च जलं बहु ॥ ५५ ॥
यस्मिन्देशे सुभिक्षं स्याद्विद्युत्तत्रैव गच्छति ।
ज्येष्ठमासं प्रवक्ष्यामि शुभाशुभफलावहम् ॥ ५६ ॥
ज्येष्ठशुक्ले तृतीयादौ चन्द्रं पूर्वे निरीक्षयेत् ।
स्वात्यंतानि दशर्क्षाणि श्रूयते गर्जितं यदि ॥ ५७ ॥
ज्ञातव्यं गलितं देवि! नात्रकार्या विचारणा ।
ज्येष्ठस्य पौर्णिमास्यां तु मूले प्रस्रवते यदि ॥ ५८ ॥
मासद्वयमनावृष्टिः छिन्नं भवति भूतलम् ।
भानौ च रोहिणीमध्ये यदि वृष्टिः प्रजायते
मासद्वयमनावृष्टिरीतयश्चापि भैरवाः ।
ज्येष्ठमासमतिक्रम्य पूर्वाषाढादिकेषु वै ॥ ५९ ॥
प्रायेण वृष्टिर्भवति वर्षाकालेऽपि भैरवा ।
ज्येष्ठस्य कृष्णपक्षे तु श्रवणं सधानिष्ठकम् ॥ ६० ॥

[1] स्वैरयात्. [2] यावद्. [3] चतुष्टये. [4] पञ्चम्यां.

सुवृष्टिश्च सुगर्भश्च तथा कालश्शुभो भवेत् ।
वक्ष्यामि रोहिणीयोगं ज्येष्ठाषाढसमुद्भवम् ॥ ६१ ॥
व्यभ्रं चावृष्टिदं चैतत्साभ्रं स्याद्वृष्टिकारणम् ।
सुभिक्षं जलपातेन न चेदेतद्द्वयं भवेत् ॥ ६२ ॥
सुभिक्षं प्रथमे यामे द्वितीये सर्पपीडनम् ।
तृतीये प्रहरे वृष्टिर्मध्यमा तु प्रजायते ॥ ६३ ॥
चतुर्थे [1]खण्डवृष्टिस्स्यात्सर्वसस्यानि पञ्चमे ।
षष्ठे तु मुद्गमाषाद्याः श्रेष्ठधान्यञ्च सप्तमे ॥ ६४ ॥
अष्टमे प्रहरे देवि! विच्छिद्रां वृष्टिमादिशेत् ।
विलोक्य निपुणस्सर्वं वृष्टिकर्मसमुद्भवम् ॥ ६५ ॥
ज्येष्ठमासे त्वमायां तु भानुं रक्तं विलोक्य च ।
तथा चन्द्रमसं वापि द्वितीयायां समागतम् ॥ ६६ ॥
यदोत्तरं शशी याति मध्ये वा दक्षिणं रविः ।
उत्तमं मध्यमं नीचं तं कालं च विदुर्बुधाः ॥ ६७ ॥
आर्द्रायां पतितं तोयं स कालो गदितश्शुभः ।
मृगादिमूलपर्यन्तं ज्येष्ठमासे निरीक्षयेत् ॥ ६८ ॥
निर्मलं च यदा पश्येत् सप्तऋक्षे च वर्षति ।
ज्येष्ठस्तु गदितो देवि! ह्याषाढः कथ्यते शृणु ॥ ६९ ॥
आषाढे स्वातिनक्षत्रे नवम्यां जलसंभवः ।
तत्राभ्रं विद्युदम्भो वा धान्यनिष्पत्तिकारणम् ॥ ७० ॥
आषाढे पूर्णिमारात्रौ यदि चन्द्रो न दृश्यते ।
चतुरोऽपि तथा मासान् जलं वर्षति वासवः ॥ ७१ ॥
यदि वा निर्मलश्चन्द्रः परिवेषयुतो भवेत् ।
ऐन्द्रे वातस्सुभिक्षाय ह्याग्नेये जलनाशनम् ॥ ७२ ॥
याम्ये दुर्भिक्षमादेश्यं नैर्ऋत्यां निर्जलं भवेत् ।
वारुण्यां मध्यमा वृष्टिर्वायव्यां चेतयः स्मृताः ॥ ७३ ॥
कौबेरे शोभनो वात ऐशाने च शुभप्रदः ।
ईदृशं वातचिह्नं तु पूर्णिमायां निरीक्षयेत् ॥ ७४ ॥
वाताय कपिला विद्युदातपायातिलोहिता ।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥ ७५ ॥
बुधजीवसमायोगो बुधशुक्रसमागमः ।
शुक्रजीवसमायोगो जलयोगा इमे स्मृताः ॥ ७६ ॥

परिवेषधनुर्मत्स्यविद्युज्जलदगर्जितैः ।
सन्ध्यारागेण च ज्ञेयमासन्नं वर्षणं बुधैः ॥ ७७ ॥

प्रावृषि शीतकरे भृगुपुत्रात्
सप्तमराशिगते शुभवृष्टिः ।
सूर्यसुतो नवपञ्चमगो वा
सप्तमगश्च जलागमनाय ॥ ७८ ॥

शुचौ कृष्णचतुर्थ्यां तु यदोदयगतः कविः ।
त्रिमासं पक्षसंयुक्तं तदा वर्षति वासवः ॥ ७९ ॥
आषाढे कृष्णपक्षे तु रोहिणीयोग उत्तमः ।
अभ्रं सविद्युदम्भोवा काले निष्पद्यते तदा ॥ ८० ॥
सुवृष्टी रोहिणीयोगे न च पूर्वोत्तरोऽनिलः ।
श्रूयते गर्जितं यत्र तत्र देशे सुभिक्षता ॥ ८१ ॥
आषाढः कथितो देवि! श्रावणं शृणु पार्वति! ।
श्रावणे शुद्धसप्तम्यामस्तं याति दिवाकरे ॥ ८२ ॥
न वर्षेद्यदि पर्जन्यो जलं नास्ति च सर्वदा ।
चित्रास्वाती विशाखासु श्रावणे न जलं यदा ॥ ८३ ॥
वृष्ट्याशां तु तदा त्यक्त्वा नदीतीरमनुव्रजेत् ।
श्रावणे बहुले पक्षे चतुर्थ्यां चेन्न वर्षति ॥ ८४ ॥
पञ्चम्यां वाथ सन्ध्यायां निर्जलं क्षितिमण्डलम् ।
तन्नाशे वारुणे ऋक्षे चतुर्थ्यां चेज्जलं बहु ॥ ८५ ॥
अभ्रच्छन्नं नभश्चैव धनुर्विद्युच्च गर्जितम् ।
एभिश्च लक्षणैर्ज्ञेयं मासेषु प्रतिवर्षणम् ॥ ८६ ॥
दस्रभद्वितयस्थेऽर्के यदि वृष्टिर्भवेत्तदा ।
क्षेमं सुभिक्षमतुलमिति दोषोऽग्निधिष्ण्यगे ॥ ८७ ॥
रोहिणी द्वितयस्थेऽर्के सस्यवृद्धिर्मनोजयः ।
रौद्रनक्षत्रगे सूर्ये यदि वृष्टिर्भवेत्तदा ॥ ८८ ॥
अनर्घताप्यनावृष्टिरिति दोषस्त्वनर्थता ।
आर्द्राप्रवेशे वृष्टिः स्यात्सार्धमासमवर्षणम् ॥ ८९ ॥
दिवार्द्रा सस्यनाशाय रात्रौ सस्याभिवृद्धये ।
सायंकालेऽर्धरात्रे चेन्महार्घबहुवृष्टिकृत् ॥ ९० ॥
आदित्यादिद्विदैवान्तदशर्क्षेषु स्थिते रवौ ।
सस्यवृद्धिस्सुभिक्षं स्याद्विना सिंहप्रवेशनम् ॥ ९१ ॥
मित्रभद्वितयस्थेऽर्के यदिवृष्टिर्भवेत्तदा ।
नृणां व्याधिभयं स्वल्पं सस्यानामीतितो भयम् ॥ ९२ ॥

1) मन्द.

पूर्वाषाढागते भानौ जीमूतैः परिवेष्टिते ।
तुषारानिलयुक्ते वा रूक्षानिलयुतेऽपि वा ॥ ९३ ॥
क्रमादार्द्रादिके वृष्टिरवृष्टिस्तैरसंयुते ।
विश्वापादार्क्षषट्केऽर्के स्थिते वृष्टिर्भवेद्यदि ॥ ९४ ॥
सुवृष्टिः क्षेममारोग्यं नृपास्स्वस्थाश्च सर्वदा ।
रेवतीसंस्थिते सूर्ये यदि वृष्टिर्भवेत्तदा ॥ ९५ ॥
पूर्वाषाढर्क्षभंगस्स्यादार्द्रादिषु न वर्षणम् ।
रेवत्यां यदि वृष्टिः स्याद्दशर्क्षेषु न वर्षणम् ॥ ९६ ॥
एतादृशैर्निमित्तैस्तु जानीयान्मेघवर्षणम् ।
आवर्तश्चैव संवर्तः पुष्करद्रोणकालिकाः ॥ ९७ ॥
कालो नीलो वारुणश्च वाय्वभ्रकरसंज्ञिताः ।
इत्येवं नवसंख्याका महामेघाः प्रकीर्तिताः ॥ ९८ ॥
इत्युमाशिवयोः पूर्वं संवादात्मतयास्थितम् ।
मेघगर्भादिकं सर्वं वृष्टिकारणमीरितम् ॥ ९९ ॥
एतेषामपि मेघानां मेघलोको निवासभूः ।
भूमेर्द्वादशसाहस्रयोजनान्तरसंस्थितः ॥ १०० ॥

इति श्रीशिवतत्त्वरत्नाकरे तृतीयकल्लोले
मेघगर्भादिवर्णनं नाम द्वितीयस्तरंगः

तृतीयस्तरंगः

कथितो मेघलोकोऽथ लोको गुह्यक उच्यते ।
पिचण्डिला स्थूलवक्त्रा मेघगम्भीर निस्स्वनाः ॥ १ ॥
गुह्यकाश्शतशस्तत्र श्यामलांगाश्चलोमशाः ।
न्यायोपार्जितवित्ताश्च गूहयन्ति च ये भुवि ॥ २ ॥
स्वमार्गगा धनाढ्याश्च शूद्रप्रायाः कुटुम्बिनः ।
तत्पुण्यलेशात्सर्वे ते गुह्यकत्वं प्रपेदिरे ॥ ३ ॥
वर्णितो गुह्यको लोको गान्धर्वस्त्वथ कथ्यते ।
भीमसेनोग्रसेनौ च सुपर्णो वरुणस्तथा ॥ ४ ॥
गोपतिर्धृतराष्ट्रश्च सूर्यवर्चास्तु सप्तमः ।
पत्रवानर्कवर्णश्च प्रयुगश्चेति विश्रुतः ॥ ५ ॥
भीमश्चित्ररथश्चैव विख्यातस्सर्वविद्वशी ।
तथाशालिशिला राजन्! धृष्टद्युम्नश्चतुर्दशः ॥ ६ ॥
[1]कविः पञ्चदशस्तेषां नारदश्चैव षोडशः ।
इत्येते देवगन्धर्वा मौनेयाः परिकीर्तिताः ॥ ७ ॥
सिद्धः पूर्णश्च बर्हिश्च पूर्णाशश्च महायशाः ।
ब्रह्मचारी रतिगणः सुपर्णश्चेति सप्तमः ॥ ८ ॥
विश्वावसुश्च भानुश्च सुचन्द्रो दशमस्तथा ।
इत्येते देवगन्धर्वाः प्रापेयाः परिकीर्तिताः ॥ ९ ॥
हाहाहुहूस्तुम्बुराद्या गन्धर्वाश्शतशस्तथा ।
देवानां गायकाश्चेते चारणाः स्तुतिपाठकाः ॥ १०
भूलोके ये तु मनुजा धनलोभेन पार्थिव! ।
स्तुवन्ति नादतत्त्वज्ञा गायन्ति च तदग्रतः ॥ ११ ॥
तत्रास्तधनदानेन गन्धर्वत्वं प्रपेदिरे ।
गीतविद्याप्रभावेन देवर्षिर्नारदो महान् ॥ १२ ॥
मान्यते वैष्णवे लोके श्रीशम्भोश्चापि वल्लभः ।
तुम्बुरुस्तत्प्रभावेन देवानामपिवल्लभः ॥ १३ ॥
नादरूपी शिवस्साक्षान्नादतत्त्वविदौ हि तौ ।
स साक्षाद्गीतशास्त्रज्ञः प्राप्नोति परमं पदम् ॥ १४ ॥
देवानुचरतां प्राप्य क्रमेणैवैति सम्पदम् ।
गन्धर्वाणामयं लोकस्सप्रपञ्चं निरूपितः ॥ १५ ॥
विद्याधराणां लोकोऽथ प्रोच्यते राजपुंगव! ।
चन्द्रापीडाह्वयो राजा तत्रास्ते लोकसत्तमे ॥ १६ ॥

[1] लि:.

विद्याधरैश्च विविधै रसङ्ख्यातैस्समावृतः ।
उक्तो विद्याधरो लोकोऽप्सरोलोकोऽथ कथ्यते ॥ १७ ॥
ऊर्वशी मेनका रम्भा चन्द्ररेखा तिलोत्तमा ।
वपुष्मती कान्तिमती लीलावत्युत्पलावती ॥ १८ ॥
अलम्बुसा गुणवती स्थूतकेशी[1] कलावती ।
कलानिधिर्गुणवती कर्पूरतिलकोर्वरा ॥ १९ ॥
अनंगतिलका चापि तथा मदनमोहिनी ।
चकोराक्षी चन्द्रकला तथा मुनिमनोहरा ॥ २० ॥
ग्रावद्रावा तपोद्वेष्ट्री सुनासा च सुवर्णिका ।
दारुसंजीविनी सुश्रीः क्रतुश्शुल्का शुभानना ॥ २१ ॥
तपश्शुल्का तीर्थशुल्का दानशुल्का हिमावती ।
पञ्चाश्वमेधिका चैव राजसूयार्थिनी तथा ॥ २२ ॥
अष्टाग्निसोमिका तद्वद्वाजपेयशतार्थिनी ।
इत्याद्यप्सरसां श्रेष्ठं सहस्रं षष्टिसम्मितम् ॥ २३ ॥
एतस्मिन्नप्सरोलोके वसन्त्यन्या अपि स्त्रियः ।
गीतज्ञा नृत्यकुशलाः कामकेलिषु कोविदाः ॥ २४ ॥
नानादेशविशेषज्ञा नानाभाषा विशारदाः ।
दिव्यभोगैस्सुसम्पन्नाः स्वेच्छाविधृतविग्रहाः ॥ २५ ॥

मासोपवासादि [2]महाव्रतानि
विधाय युद्धेषु विजित्य शत्रून् ।
तं प्राप्नुयादप्सरसां च लोकं
कामादिकेल्या श्रुतसर्वकालम् ॥ २६ ॥

भूमेर्योजनलक्षे तु मैत्रेय! रविमण्डलम् ।
अथ प्रमाणसंस्थाने सूर्यादीनां शृणुष्व मे ॥ २७ ॥
योजनानां सहस्राणि भास्करस्य रथो महान् ।
ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम! ॥ २८ ॥
सार्धकोटिद्वयं सप्त नियुतान्याधिकानि वै ।
योजनानां तु तस्याक्षः तत्र चक्रः प्रतिष्ठितः ॥ २९ ॥
दशयोजनसाहस्रो विस्तारायाम उच्यते ।
त्रिनाभिमति पंचारे षण्णेमावक्षयात्मके ॥ ३० ॥
संवत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितम् ।
चत्वारिंशत्सहस्राणि द्वितीयोऽक्षो विवस्वतः ॥ ३१ ॥
पंचान्यानि तु सार्धानि स्यन्दनस्य महामुने! ।
द्विगुणश्च रथोपस्थादक्षदण्डप्रमाणतः ॥ ३२ ॥
अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्धयोः ।
ह्रस्वोऽक्षस्तद्युगार्धं च ध्रुवाधारं रथस्यवै ॥ ३३ ॥
द्वितीयेऽक्षेतु तच्चक्रं संस्थितं मानसाचले ।
हयाश्च सप्त च्छन्दांसि तेषां नामानि मे शृणु ॥ ३४ ॥
गायत्री च बृहत्युष्णिग् जगती त्रिष्टुबेव च ।
अनुष्टुप् पंक्तिरित्युक्ताश्च्छन्दांसि हरयो हरेः ॥ ३५ ॥
कल्पादौ संप्रयुक्ताश्च वहन्त्याभूतसंप्लवम् ।
मानसोत्तरशैले तु पूर्वतो वासवी पुरी ॥ ३६ ॥
दाक्षणे तु यमस्यान्या प्रतीच्यां वरुणस्य च ।
उत्तरेणतु सोमस्य तासां नामानि मच्छृणु ॥ ३७ ॥
वस्वौकसारा शक्रस्य याम्या संयमिनी तथा ।
पुरी शुद्धा जलेशस्य सोमस्य च [1]विभावरी ॥ ३८ ॥
काष्ठां गतो दक्षिणतः क्षिप्रं स परिसर्पति ।
मैत्रेय! भगवान् भानुर्ज्योतिषां चक्रसंयुतः ॥ ३९ ॥
अहोरात्रव्यवस्थानकारणं भगवान् रविः ।
देवयानः परः पन्था योगिनां क्लेशसंक्षये ॥ ४० ॥
दिवसस्य रविर्मध्ये सर्वकालव्यवस्थितः ।
सर्वद्वीपेषु राजेन्द्र! निशार्धस्य तु सम्मुखः ॥ ४१ ॥
उदयास्तमयौ चैव सर्वकालं तु सम्मुखौ ।
दिशास्वशेषासु तथा मैत्रेय! विदिशासु च ॥ ४२ ॥
यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः ॥
तिरोभावं तु यत्रैति तदेवास्तमयो रवेः ॥ ४३ ॥
नैवास्तमनमर्कस्य नोदयस्सर्वदा सतः ।
उदयास्तमयाख्यं हि दर्शनादर्शने रवेः ॥ ४४ ॥
शक्रादीनां पुरे तिष्ठन् स्पृशतेव पुरत्रयम् ।
विकर्णौ द्वौ विकीर्णस्थां स्त्रीन्कोणान्दुःपुरे तथा ॥ ४५ ॥
यावत्पुरस्तात्तपति तावत्पृष्ठेऽथ पार्श्वयोः ।
ऋतेऽमरगिरेर्मेरो रुपरि ब्रह्मणस्सभाम् ॥ ४६ ॥
ते ते निरस्तास्तद्भसा प्रतीपमुपयान्तिवै ।
तस्माद्दिश्युत्तरस्यां वै दिवारात्रं सदैव हि ॥ ४७ ॥

[1] ली. [2] ग्रह.

[1] प्रभावरी

सर्वेषां द्वीपवर्षाणां मेरोरुत्तरतो यतः ।
प्रभा विवस्वतो रात्रावस्तं गच्छति भास्करे ॥ ४८ ॥
विशत्यग्निमतो रात्रौ वह्निर्दूरात्प्रकाशते ।
वह्नेः प्रभा तथा भानुं दिनेष्वाविशति द्विज! ॥ ४९ ॥
अतीव वह्निसंयोगादतस्सूर्यः प्रकाशते ।
तेजसी भास्कराग्नेये प्रकाशात्मस्वरूपिणी ॥ ५० ॥
परस्परानुप्रवेशादाप्यायेते दिवानिशम् ।
दक्षिणोत्तरभूम्यर्धे समुत्तिष्ठति भास्करे ॥ ५१ ॥
अहोरात्रं विशत्यम्भस्ततो विशति शर्वरीम् ।
आताम्रा हि भवन्त्यापो दिवानक्तप्रवेशनात् ॥ ५२ ॥
दिनं विशति चैवाम्भो भास्करेऽस्तमुपागते
तस्माच्छुक्लीभवन्त्यापो नक्तमह्नः प्रवेशनात् ॥
एवं पुष्करमध्येतु यदा याति दिवाकरः ।
त्रिंशद्भागस्तु मेदिन्यां तदा मौहूर्तिकी गतिः ॥ ५३ ॥
कुलालचक्रसाम्येन भ्रमत्येव दिवाकरः ।
करोत्यहस्तथा रात्रिं विमुञ्चन्मेदिनीं द्विज! ॥ ५५ ॥
अयनस्योत्तरस्यादौ मकरं याति भास्करः ।
ततः कुम्भं च मीनं च राशे राश्यन्तरं द्विज!
त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिम् ।
प्रयाति सविता कुर्वन्नहोरात्रं ततःपरम् ॥ ५६ ॥
ततो रात्रिः क्षयं याति वर्धते सुदिनं दिनम् ।
ततश्च मिथुनस्यान्ते परां काष्ठामुपागतः ॥ ५७ ॥
राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम् ।
कुलालचक्रपर्यन्तं यथा शीघ्रं प्रवर्तते ॥ ५८ ॥
दक्षिणप्रक्रमे सूर्यस्तथा शीघ्रं प्रवर्तते ।
अतिवेगितया कालं वायुवेगगतिं चरन् ॥ ५९ ॥
यस्मात्प्रकृष्टां भूमिं तु कालेनाल्पेन गच्छति ।
सूर्यो द्वादशभिश्शैघ्र्यान्मुहूर्तैर्दक्षिणायने ॥ ६० ॥
त्रयोदशार्धमृक्षणामह्नां तु चरते द्विज!
मुहूर्तैस्तावदृक्षाणां नक्तमष्टादशैश्चरन् ॥ ६१ ॥
अहो मन्दं चलंस्तद्वदर्को भ्रमति वै यतः ।
कुलालचक्रमध्यस्थो यथा मन्दं प्रसर्पति ॥ ६२ ॥

तथोदगयने सूर्यस्सर्पते मन्दविक्रमः ।
तस्माद्दीर्घेन कालेन भूमिमल्पां तु गच्छति ॥ ६३ ॥
अष्टादशमुहूर्तैस्तु पश्चिमं चोत्तरायणे ।
अहो भवति तत्रापि चरते मन्दविक्रमः ॥ ६४ ॥
त्रयोदशार्धमह्नैव ऋक्षाणां चरते रविः ।
मुहूर्तैस्तावदृक्षाणि रात्रौ द्वादशभिश्चरन् ॥ ६५ ॥
अहो मन्दतरं नाभ्यां चक्रं भ्रमति वै यथा ।
मृत्पिण्ड इव मध्यस्थो ध्रुवो भ्रमति वै तथा ॥ ६६ ॥
कुलालचक्रमध्यस्थो यथा तत्रैव वर्तते ।
ध्रुवस्तथाहि मैत्रेय! तत्रैव परिवर्तते ॥ ६७ ॥
उभयोः काष्ठयोर्मध्ये भ्रमतोर्मण्डलानि तु ।
दिवानक्तंतु सूर्यस्य मन्दा शीघ्रा च वै गतिः ॥ ६८ ॥
मन्दाह्नि यस्मिन्नयने शीघ्रं नक्तं तदा गतिः ।
शीघ्रा गतिर्दिवा यत्र मन्दा नक्तगतिस्तदा ॥ ६९ ॥
एकप्रमाणगे वैषमार्गे याति दिवाकरः ।
अहोरात्रेण यो भुङ्क्ते समस्ता राशयो द्विज! ॥ ७० ॥
षडेव राशीन् सो भुङ्क्ते रात्रावन्यांश्च षड् दिवा ।
राशिप्रमाणजनिता दीर्घह्रस्वात्मता दिने ॥ ७१ ॥
तथा निशायां राशीनां प्रमाणाल्लघुदीर्घता ।
दिनानां ह्रस्वदीर्घत्वं तत्तद्भागेन जायते ॥ ७२ ॥
उत्तरे प्रक्रमे दीर्घा निशि मन्दा दिवागतिः ।
दक्षिणे चायनं सैव विपरीता विवस्वतः ॥ ७३ ॥
उषा रात्रिस्समाख्याता व्युष्टिश्चाप्युच्यते दिनम् ।
प्रोच्यते च तयोस्सन्ध्या उषाव्युष्ट्योर्यदन्तरम् ॥ ७४ ॥
सन्ध्याकाले तु संप्राप्ते रौद्रे परमदारुणे ।
मन्देहा राक्षसा घोरास्सूर्यमिच्छन्ति खादितुम् ॥ ७५ ॥
प्रजापतिकृतश्शापस्तेषां मैत्रेय! रक्षसाम् ।
अक्षयत्वं शरीराणां मरणं च दिनेदिने ॥ ७६ ॥
ततस्सूर्यस्य तैर्युद्धं भवत्यत्यन्तदारुणम् ।
ततो द्विजोत्तमास्तोयं यत् क्षिपन्ति महामुने ॥ ७७ ॥
प्रणवब्रह्मसंयोगाद्गायत्र्या चाभिमन्त्र्य च
दह्यन्ते तेन ते पापा वज्रीभूतेन वारिणा ॥ ७८ ॥

अग्निहोत्रे हूयते या समये प्रथमाहुतिः ।
सूर्यो ज्योतिस्सहस्रांशुस्तया दीव्यति भास्करः ॥ ७९ ॥
ओंकारो भगवान्विष्णुस्त्रिधामा वचसां पतिः ।
तदुच्चारणतस्तेतु विनाशं यान्ति राक्षसाः ॥ ८० ॥
वैष्णवांशः परस्सूर्योऽन्तर्ज्योतिरसङ्क्षयः ।
अभिधायक ओंकारस्तस्य तत्प्रेरकः परः ॥ ८१ ॥
तेन तत्प्रेरितं ज्योतिरोंकारेणाथ दीप्तिमत् ।
आहन्त्यशेषरक्षांसि मन्देहाख्यान्यघानि वै ॥ ८२ ॥
तस्मान्नोल्लंघनं कार्यं सन्ध्योपासनकर्मणाम्
तं हन्ति सूर्यसन्ध्यायां नोपास्तिं कुरुते तु यः ॥ ८३ ॥
ततः प्रयाति भगवान् ब्राह्मणैरभिरक्षितः ।
वालखिल्यादिभिश्चैव प्रभुर्वैखानसैरपि ॥ ८४ ॥

इति श्रीशिवतत्त्वरत्नाकरे तृतीयकल्लोले

गुह्यकादिलोक सूर्यरथगतिवर्णनं नाम तृतीयस्तरंगः

चतुर्थस्तरंगः

सूर्यस्य गत्या संभूतं कालभेदमहं ब्रुवे ।
काष्ठानिमेषा दश पञ्च चैव
त्रिंशच्च काष्ठाः कथिताः कलेति ॥
त्रिंशत्कलाश्चैव भवेन्मुहूर्तो
त्रिंशत्तु ते रात्र्यहनी समे ते ॥ १ ॥
सन्ध्या मुहूर्तमात्रा वै ह्रासे वृद्धौ च वा समा ।
रेखाप्रभृत्यथादित्ये त्रिमुहूर्ते गते तु वै ॥ २ ॥
प्रातस्ततः स्मृतः कालो भागश्चाह्नस्स पञ्चमः ।
तस्मात्प्रातस्तः कालात् त्रिमुहूर्तात्तु संगवात् ॥ ३ ॥
तस्मान्माध्याह्निकात्कालादपराह्ण इति स्मृतः ।
त्रय एव मुहूर्तास्तु कालभागाः स्मृता बुधैः ॥ ४ ॥
अपराह्णे व्यतीते तु कालस्सायाह्न उच्यते ।
दशपञ्च मुहूर्ता वै अहो वैषुवतं स्मृतम् ॥ ५ ॥
वर्धते ह्रसते चैव अयने दक्षिणोत्तरे ।
अहस्तु ग्रसते रात्रिं रात्रिश्च ग्रसते दिनम् ॥ ६ ॥
शरद्वसन्तयोर्मध्ये विषुवं तु विभाव्यते ।
तुलामेषगते भानौ समरात्रं दिनं तु तत् ॥ ७ ॥
कर्किण्यवस्थिते भानौ दक्षिणायनमुच्यते ।
उत्तरायणमित्युक्तं मकरस्थे दिवाकरे ॥ ८ ॥
त्रिंशन्मुहूर्तं कथितमहोरात्रं तु यन्मया ।
तानि पञ्चदश ब्रह्मन्! पक्ष इत्यभिधीयते ॥ ९ ॥
मासः पक्षद्वयेनोक्तो द्वौ मासावृतुरर्कजम् ।
ऋतुत्रयं चाप्ययनं द्वेऽयने वर्षसंज्ञिते ॥ १० ॥
संवत्सरादयः पञ्च चतुर्मासविकल्पिताः ।
निश्चयस्सर्वकालस्य युगमित्यभिधीयते ॥ ११ ॥
संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।
उद्वत्सरस्तृतीयस्स्याच्चतुर्थश्चानुवत्सरः ॥ १२ ॥
वत्सरः पञ्चमश्चात्र कालोऽयं युगसंज्ञितः ।
यश्श्वेतस्योत्तरे शैलः श्रृंगवानिति विश्रुतः ॥ १३ ॥
त्रीणि तस्य तु श्रृंगाणि यैरसौ श्रृंगवान्स्मृतः ।
दक्षिणोत्तरयोश्चैव मध्ये वैषुवतं तथा ॥ १४ ॥
शरद्वसन्तयोर्मध्ये तद्भानुः प्रतिपद्यते ।
मेषादौ च तुलादौ च मैत्रेय! विषुवत्स्मृतम् ॥ १५ ॥
तदा तुल्यमहोरात्रं करोति तिमिरापहः ।
दशपञ्चमुहूर्तं वै तदेतदुभयं स्मृतम् ॥ १६ ॥
प्रथमे कृत्तिकाभागे यथा भास्वांस्तथा शशी ।
विशाखयोश्चतुर्थेऽशे मुने! तिष्ठत्यसंशयम् ॥ १७ ॥
विशाखयोर्यदा सूर्यश्चरत्यंशं तृतीयकम् ।
तदा चन्द्रं विजानीयात्कृत्तिकाशिरसि स्थितम् ॥ १८ ॥

तथैव विषुवाख्यो वै कालः पुण्योऽभिधीयते
तदा दानानि देयानि द्विजेभ्यः प्रयतात्मभिः ॥ १९ ॥
ब्राह्मणेभ्यः पितृभ्यश्च सुखमेतत्तु दानजम् ।
दत्तदानस्तु विषुवे कृतकृत्योऽभिजायते ॥ २० ॥
तपस्तपस्यौ मधुमाधवौ द्वौ
शुक्रश्शुचिश्चायनमुत्तरं स्यात् ।
नभोनभस्यौ च तथेष ऊर्जः
सहस्सहस्याविति दक्षिणं स्यात् ॥ २१ ॥
उत्तरं यदगस्त्यस्य अजवीथ्याश्च दक्षिणम् ।
पितृयानस्स वै पन्था वैश्वानरपथाद्बहिः ॥ २२ ॥
तत्रासते महात्मानः ऋषयो येऽग्निहोत्रिणः ।
भूतारम्भकृतं ब्रह्म शंसन्तो ऋत्विगुद्यताः ॥ २३ ॥
प्रारभन्ते लोककामा स्तेषां [1]लोकस्स दक्षिणः ।
सांतत्ये तपसा चैव मर्यादाभिश्श्रुतेन च ॥ २४ ॥
जायमानास्तु पूर्वे च पश्चिमानां गृहेषु वै ।
पश्चिमाश्चैव पूर्वेषां जायन्ते निधनेष्विति ॥ २५ ॥
एवमावर्तमानास्ते तिष्ठन्त्या भूतसंप्लवम् ।
सवितुर्दक्षिणं मार्गं श्रितास्चा चन्द्रतारकम् ॥ २६ ॥
नागवीथ्युत्तरं यच्च सप्तर्षिभ्यश्च दक्षिणम् ।
उत्तरस्सवितुः पन्था देवयानस्तु स स्मृतः ॥ २७ ॥
तत्र ते वशिनास्सिद्धा विमला ब्रह्मचारिणः ।
सन्ततिं ते जुगुप्सन्ति तस्मान्मृत्युर्जितश्चतैः ॥ २८ ॥
अष्टाशीतिसहस्राणि मुनीनामूर्ध्वरेतसाम् ।
उदक्पन्थानमर्यम्णः स्थित्वा चा भूतसंप्लवम् ॥ २९ ॥
ते संप्रयोगाल्लोकस्य संगमस्य च वर्जनात् ।
इच्छाद्वेषप्रकृत्यादिभूतारम्भविवर्जनात् ॥ ३० ॥
पुनश्च कामसंयोगाच्छन्दादौ दोषदर्शनात् ।
इत्येभिः कारणैश्शुद्धास्तेऽमृतत्वं हि भेजिरे ॥ ३१ ॥
यो रथः पूर्वमुदितो देवस्या [2]शीतदीधितेः ।
सरथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ॥ ३२ ॥
गन्धर्वैरप्सरोभिश्च ग्रामणी [3]राक्षसैस्सह ॥
रक्तवर्णो महातेजा द्विबाहुः [4]पद्मभृद्रविः ॥ ३३ ॥

सप्ताभिस्तुरगैर्युक्ते सप्तरज्जुसमन्विते ।
एकचक्रे रथे तिष्ठन् पादाक्रान्तसरोरुहः ॥ ३४ ॥
माणिक्यकुण्डलधरः पद्मरागकिरीटधृत् ।
रक्ताम्बरधरो रम्यस्सुव्यक्तांगो मनोहरः ॥ ३५ ॥
तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः ।
सुषुम्ना भोगदा विश्वा बोधिनी धरिणी क्षमा ॥ ३६ ॥
प्रभेति द्युमणेरेताः कला द्वादश कीर्तिताः ।
शतत्रयं त्रयस्त्रिंशत्सूर्यस्य किरणाहिताः ॥ ३७ ॥
तावन्त्यो वर्षकिरणास्युरुष्णकिरणा अपि ।
बीजभूतस्तु किरण एक एव प्रकीर्तित : ॥ ३८ ॥
धाता कृतस्थला चैव पुलस्त्यो वासुकिस्तथा ।
रथकृद्ग्राम [1]णिस्चेति तुम्बुरुश्चैव सप्तमः ॥ ३९ ॥
एते वसन्ति वै चैत्रे मधुमासे सदैव हि ।
अर्यमा पुलहश्चैव रथौजाः पुञ्जिकस्थला ॥ ४० ॥
प्रहेतिः कच्छनीरश्च नारदश्च रथे रवेः ।
माधवे तु वसन्त्येते शुक्रसंज्ञे निबोध मे ॥ ४१ ॥
मित्रोऽत्रिस्तक्षको दक्षः पौरुषेयोऽथ मेनका ।
हाहा रथस्वनश्चेति राजन्नेते वसन्ति वै ॥ ४२ ॥
वसिष्ठो वरुणो रम्भा सहजन्यो हुहूस्तथा ।
रथचित्रस्तथा शुक्रो वसन्त्याषाढसंज्ञिते ॥ ४३ ॥
इन्द्रो विश्वावसुस्स्रोत एलापत्रस्तथांऽऽगिराः ॥
प्रम्लोचा च नभस्येते सर्पश्चार्के वसन्ति हि ॥ ४४ ॥
विवस्वानुग्रसेनश्च भृगुरापूरणस्तथा ।
अनुम्लोचश्शंखपालो व्याघ्रो भाद्रपदे तथा ॥ ४५ ॥
पूषा वसुरुचिर्वातो गौतमोऽथ धनञ्जयः ।
सुषेणश्च घृताची च च वसन्त्याश्वयुजे रथे ॥ ४६ ॥
विभावसुर्भरद्वाजो पर्जन्यैरावतौ तथा ।
विश्वाची श्येनजिच्चापि कार्त्तिके चाधिकारिणः ॥ ४७ ॥
ईशकाश्यपताक्ष्यास्तु महापद्मस्तथोर्वशी ।
चित्रसेनस्तथा विद्युन्मार्गशीर्षाधिकारिणः ॥ ४८ ॥
क्रतुर्भगस्तथोर्णायुस्सूर्यः कार्कोटकस्था ।
अरिष्टनेमिश्चैवान्या पूर्वचित्तिर्वराप्सराः ॥ ४९ ॥

[1] पन्था [2] हिम. [3] सर्पराक्षसैः [4] रुदभूद्रविः

[1] णीहेतिस्तु.

पौषमासे वसन्त्येते सप्तार्कस्य रथान्तरे ।
लोकप्रकाशनार्थाय रथरथ्याधिकारिणः ॥ ५० ॥
त्वष्टा च जमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मव्रतोऽथ ऋतुजिद्धृतराष्ट्रश्च सप्तमः ॥ ५१ ॥
माघमासे वसन्त्येते सप्त भास्करमण्डले ।
श्रूयतां चापरे सूर्ये फाल्गुने निवसन्ति हि ॥ ५२ ॥
विष्णुरश्वतरा रम्भा सूर्यवर्चाश्च सत्यजित् ।
विश्वामित्रस्तथा ऋक्षो यज्ञोपेता महामुने! ॥ ५३ ॥
मासेष्वेतेषु मैत्रेय! वसन्त्येते त्रिसप्तकाः ।
सावितुर्मण्डले ब्रह्मा विष्णुशक्त्युपबृंहितः ॥ ५४ ॥
स्तुवन्ति मुनयस्सूर्यं गन्धर्वैर्गीयते पुनः ।
अन्ये तु वालखिल्याश्च मुनयष्षष्टिसम्मिताः ॥ ५५ ॥
सहस्रशस्तस्य रथे वसन्ते सूक्तवाचकाः ।

खव्योमखत्रयखसागरषट्कनाग
व्योमाष्टशून्ययमरूपनगाष्टचन्द्रा ।
ब्रह्माण्डसम्पुटपरिभ्रमणे समन्तात्
अभ्यन्तरे दिनकरस्य करप्रचारः ॥ ५६ ॥
(18712080864000000)

लक्षे दिवाकरस्यापि मण्डलाच्छशिनस्थितः ।
सोमो द्विजेशो द्विभुजो गदावरदपाणिमान् ॥ ५७ ॥
दशाश्वरथगंस्श्वेतश्चात्रिनेत्रसमुद्भवः ।
अष्टाशीतिसहस्राणि विस्तीर्णो योजनानि तु ॥ ५८ ॥
रथस्त्रिचक्रस्सोमस्य कुन्दाभास्तस्य वाजिनः ।
सकृद्युक्ता रथे तस्मिन् वहन्ति स्मायुगाक्षयात् ॥ ५९ ॥
अश्वास्तक्षकवर्णास्ते वहन्ते शंखवर्चसः ।
अजमित्ररथश्चैव वृषो वाजी नरो हयः ॥ ६० ॥
अश्वाख्यस्सप्तधातुश्च हंसो व्योममृगस्तथा ।
इत्येतैर्नामभिस्सर्वैर्दश चन्द्रमसो हयाः ॥ ६१ ॥
एते चन्द्रमसं देवं वहन्ति स्मायुगक्षयात् ।
वामदक्षिणतो युक्ता दश तेन चरत्यसौ ॥ ६२ ॥
सुबन्धुनामकस्तस्य सारथिः परिकीर्तितः ।
अमृता मानदा पूषा तुष्टिः पुष्टीरतिर्धृतिः ॥ ६३ ॥
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरंगदा ।
पूर्णा पूर्णामृताख्या च षोडशेन्दुकलास्स्मृताः ॥ ६४ ॥
प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः ।
विश्वेदेवास्तृतीयां च चतुर्थीं सलिलाधिपः ॥ ६५ ॥
पञ्चमीं तु वषट्कारः षष्ठीं पिबति वासवः ।
सप्तमीमृषयो दिव्यामष्टमीमज एकपात् ॥ ६६ ॥
नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलाम् ।
दशमीं पिबते वायुः पिबत्येकादशीमुमा ॥ ६७ ॥
द्वादशीं पितरस्सर्वे समं प्राश्नन्ति भागशः ।
त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलाम् ॥ ६८ ॥
चतुर्दशीं पशुपतिः पञ्चदशीं प्रजापतिः ।
क्षीणं पीतं सुरैस्सोममाप्याययति दीप्तिमान् ॥ ६९ ॥
मैत्रेयैककलं सन्तं रश्मिनैकेन भास्करः ।
क्रमेण येन पीतोऽसौ देवस्तेन निशाकरः ॥ ७० ॥
आप्याययत्यनुदिनं भास्करो वारितस्करः ।
संभृतं चार्धमासेन तत्सोमस्थं सुधारसम् ॥ ७१ ॥
पिबन्ति देवा मैत्रेय! सुधाहारा यतोऽमराः ।
त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्छ्तानि च ॥ ७२ ॥
त्रयस्त्रिंशत्तथा देवाः पिबन्ति क्षणदाकरम् ।
कलाद्वयावशिष्टस्तु प्रविष्टस्सूर्यमण्डलम् ॥ ७३ ॥
अमाख्यरश्मौ वसति अमावास्या ततस्स्मृता ।
अप्सु तस्मिन्नहोरात्रं पूर्वं वसति चन्द्रमाः ॥ ७४ ॥
ततो वीरुत्सु वसति प्रयात्यर्कं ततः क्रमात् ।
छिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे ॥ ७५ ॥
पत्रं वा पातयत्येकं ब्रह्महत्यां स विन्दति ।
सोमं पञ्चदशे भागे किञ्चिच्छिष्टे कलात्मके ॥ ७६ ॥
अपराह्णे पितृगणा जघन्यं पर्युपासते ।
पिबन्ति द्विलवं कालं शिष्टा तस्य कला तु या ॥ ७७ ॥
सुधामृतमयीं पुण्यां तामिन्द्रः पितरो मुने! ।
पीत्वा तृप्तिमवाप्याग्र्यां पितरस्सन्ति निर्वृताः ॥ ७८ ॥
सोम्या बर्हिषदश्चैवमग्निष्वात्ताश्च ते त्रिधा ।
एवं देवान् सिते पक्षे कृष्णपक्षे तथा पितॄन् ॥ ७९ ॥
वीरुधश्चामृतमयैश्शीतैरपरमाणुभिः ।
वीरुदोषधिनिष्पत्त्या मनुष्यपशुकीटकान् ॥ ८० ॥

आप्यायति शीतांशुः प्रकाशाह्लादनेन च ।
सञ्चारो भानुवत्तस्य समाख्यातः पुरातनैः ॥ ८१ ॥
पूर्णे शतसहस्रे तु योजनानां निशाकरात् ।
नक्षत्रमण्डलं कृत्स्नमुपरिष्टात्प्रकाशते ॥ ८२ ॥
द्विलक्षे चोत्तरे राजन्! बुधो नक्षत्रमण्डलात् ।
बुधस्सोमसुतश्चात्रिगोत्रः पीताम्बरावृतः ॥ ८३ ॥
चतुर्भुजः खड्गचर्मगदावरदपाणिमान् ।
वाय्वग्निद्रव्यसम्भूतो रथश्चन्द्रसुतस्य च ॥ ८४ ॥
पिशंगस्तुरगैर्युक्तस्सोष्टाभिर्वायुवेगिभिः ॥ ८५ ॥
तावत्प्रमाणमार्गे तु बुधस्याप्युशनास्स्थितः ।
शुक्रश्चतुर्भुज श्वेतवर्णश्वेतहयाननः ॥ ८६ ॥
भृगुजो दण्डकरकाक्षमालाभयहस्तवान् ।
सावरूढस्सानुकर्षो युक्तो भूसम्भवैर्हयैः ॥ ८७ ॥
सोपासंगपताकस्तु शुक्रस्यापि रथो महान् ।
ऊर्ध्वं द्विलक्षच्छुक्रस्य भूमिपुत्रस्सुदारुणः ॥ ८८ ॥
भूसुतो रक्तवर्णश्च मेषवाहश्चतुर्भुजः ।
शक्तिशूलगदाखड्गैर्भरद्वाजकुलोद्भवः ॥ ८९ ॥
अष्टाश्वः काञ्चनः श्रीमान् भौमस्यापि रथो महान् ।
पद्मरागारुणैरश्वैस्संयुक्तो वह्निसम्भवैः ॥ ९० ॥
तावत्प्रमाणादुपरि भूपुत्रादंगिरावरः ।
गुरुस्सुवर्णसदृशगात्रस्तुरगवाहनः ॥ ९१ ॥
दण्डाक्षसूत्रकरकवरशोभिचतुर्भुज ।
अष्टाभिः पाण्डुभिर्युक्ते वाजिभिः काञ्चने रथे ॥ ९२ ॥
तिष्ठंस्तिष्ठति वर्षं च राशौ राशौ बृहस्पतिः ।
गुरोरूर्ध्वं द्विलक्षात्तु योजनानां रवेस्सुतः ॥ ९३ ॥
शनिस्सूर्यसुतो गृध्रवाहो नीलांगकाश्यपिः ।
चतुर्भुजश्चापबाणाभयहस्तोल्लसत्करः ॥ ९४ ॥
आकाशसंम्भवै रश्वैश्शबलैस्स्यन्दनं युतम् ।
समारुह्य शनिर्याति मन्दागामी शनैश्चरः ॥ ९५ ॥
भूमेर्नवतिसाहस्रादूर्ध्वं तद्राहुमण्डलम् ।
स्वर्भानोस्तुरगा ह्यष्टौ भृंगाभा धूसरो रथः ॥ ९६ ॥
सकृद्युक्तास्तु मैत्रेय! वहन्त्यविरतं रथम् ।
तथा केतुरथस्याश्वा अष्टौ वै वातरंहसः ॥ ९७ ॥

पलालधूम्रवर्णाभा लाक्षारसनिभारुणाः ।
अप्रदक्षिणगा राहोः केतोश्चापि तथा गतिः ॥ ९८ ॥
सिंहिकातनयो राहुरपिबच्चामृतं पुरा ।
शिरश्छिन्नोऽपि न प्राणैस्त्यक्तोऽसौ ग्रहतां गतः ॥ ९९ ॥
भषट्कान्तर्हितो राहुस्सूर्याचन्द्रमसावुभौ ।
छादयत्युरगाकारो वरदानात्स्वयम्भुवः ॥ १०० ॥
अन्धकारमयो राहुर्मेघच्छन्न इवोत्थितः ।
आच्छादयति सोमार्कौ पर्वकाले ह्युपस्थिते ॥ १०१ ॥
तमोमयेऽस्य तमसो रविरश्मिपलायिनः ।
भूच्छाया चन्द्रबिम्बश्च द्वे स्थाने परिकल्पिते ॥ १०२ ॥
तत्रास्थितस्स्वयं राहुर्वरदानात्स्वयम्भुवः ।
विप्रदत्तहुतांशेन स्वैरमाप्यायितो भवेत् ॥ १०३ ॥
दिग्दाहोल्कामहीकम्पतमोधूमरजांसि च ।
कथयन्त्यागमं राहोः पुरः पर्वण्युपस्थिते ॥ १०४ ॥
ग्रहपञ्चकसंयोगं दृष्ट्वा तु ग्रहणं वदेत् ।
(यदि न स्याद्बुधस्तत्र न तं दृष्ट्वा ग्रहं वदेत्)
अष्टम्यां परिवेषःस्यात्तैले जलगते यदा ॥ १०५ ॥
प्रसारिते विजानीयात्खण्डश्चेत्तत्र मोक्षणम् ।
गणितेन निमित्तैश्च विज्ञेयं ग्रहणं बुधैः ॥ १०६ ॥
सूर्यशुक्रबुधा मासं सार्धमासं क्षितेस्सुतः ।
गुरुर्वर्षं शनिर्वर्षौ सार्धौ द्वौ राहुकेतुकौ ॥ १०७ ॥
सार्धैकवर्षं चन्द्रस्तु सपादद्विदिनं वसेत् ।
योजनानां सहस्रं तु दशान्वितमहः पतेः ॥ १०८ ॥
मण्डलं त्रिगुणैस्तैस्तु योजनैरतिविस्तृतम् ।
तावत्प्रमाणं पादेन हीनं चन्द्रस्य मण्डलात् ॥ १०९ ॥
तत्षोडशांशमानेन मितं भार्गवमण्डलम् ।
तत्पादोनं गुरोस्तस्मात्पादहीनं बुधस्य च ॥ ११० ॥
तत्पादहीनं भौमस्य तथा सूर्यसुतस्य च ।
शतानि पञ्च चत्वारि त्रीणि द्वे चैकमेवच ॥ १११ ॥
ऋक्षाणां कृत्तिकादीनां मण्डलानां क्रमान्मितिः ।
ततश्चोपरिलक्षात्तु रविपुत्रान्महर्षयः ॥ ११२ ॥
तिष्ठन्ति सर्वराशौ ते शतवर्षं वसन्ति च ।
मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरंगिराः ॥ ११३ ॥

वसिष्ठश्च महाभागा ब्रह्मणो मानसास्सुताः ।
सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः ॥ ११४ ॥

संभूतिरनसूया च क्षमा प्रीतिश्च सन्नतिः ।
स्मृतिरुचा क्रमादेताः पत्न्यो लोकस्य मातरः ॥ ११५ ॥

अरुन्धती महापुण्या पातिव्रत्यपरायणा ।
यस्याः स्मरणमूर्जाया गंगास्नानफलप्रदम् ॥ ११६ ॥

ऋषिभ्यस्तु सहस्राणां शतादूर्ध्वं व्यवस्थितः ।
मेढीभूतस्समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः ॥ ११७ ॥

अनेकरचनाव्यग्रहस्ताग्रन्यस्तलोचनः ।
त्रिलोकीमण्टपस्तम्भसन्निभो भाति मध्यतः ॥ ११८ ॥

अखिलान् ज्योतिषां राशीन् तुलया तोलयन्निव ।
सूत्रधार इव व्योमव्यायामपरिमापकः ॥ ११९ ॥

रात्रौ तद्दर्शनं कृत्वा दिनपापैः प्रमुच्यते ।
(तस्य स्मरणमात्रेण वेपन्ते पापराशयः)
शिंशुमाराश्रयः प्रोक्तो यादोरूपः प्रजापतिः ॥ १२० ॥

विष्णुशक्तिर्ध्रुवश्चिन्त्यो भुवर्लोकादधः स्थितः ।
तदाधारस्थितास्सप्त वायुस्कन्धा महाबलाः ॥ १२१ ॥

इति श्रीशिवतत्त्वरत्नाकरे तृतीयकल्लोले
सूर्यादिगतिभेदनिरूपणं नाम चतुर्थस्तरंगः

पञ्चमस्तरंगः

ज्योतिश्चक्रस्वरूपं तु प्रपञ्चेनोपवर्णितम् ।
तदूर्ध्वलोकान् ब्रूमोऽद्य भुवोलोकादिकान् शृणु ॥ १ ॥

तिथिलक्षे भुवर्लोको ध्रुवप्रान्तो महीतलात् ।
आदित्या वसवस्साध्याश्चारणाश्च सकिन्नराः ॥ २ ॥

गन्धर्वा गारुडाश्चापि सिद्धा विद्याधरास्तथा ।
पक्षिणः पन्नगाश्चापि वसुरुद्रेन्द्रमारुताः ॥ ३ ॥

पिशाचयक्षरक्षांसि मुनयः पुण्यकारिणः ।
भुवर्लोके वसन्त्येते सर्वसाधारणे नृप! ॥ ४ ॥

ऊर्ध्वं पञ्चोत्तराशीतिलक्षात्स्वर्लोक ईरितः ।
सुवर्लोके वसन्त्यष्टाविन्द्रादीनां जगन्ति हि ॥ ५ ॥

इन्द्रलोको बहुविधरत्नप्रासादगोपुरः ।
पारिजातमुखाः पञ्च वर्तन्ते कल्पशाखिनः ॥ ६ ॥

तत्रत्यानां तु ते चित्रवासो भूषादिदायिनः ।
चिन्तामणिःस्वयं तेषां चिन्तितार्थप्रदायकः ॥ ७ ॥

कामधेनुसमुत्पन्नं तेषामन्नं चतुर्विधम् ।
ऐरावतश्चतुर्दन्तो वारणस्तत्र वर्तते ॥ ८ ॥

उच्चैश्श्रवा अश्वरत्नमुद्यानमपि नन्दनम् ।
वैजयन्तोऽत्र सौधोऽपि मणिस्तम्भोपशोभितः ॥ ९ ॥

सुधर्माख्यसभामध्ये सहस्रकिरणप्रभे ।
सिंहासने सहस्राक्षो भाति स्वाराज्यमाचरन् ॥ १० ॥

वसवोऽष्टौ तथादित्या द्वादशैकादशेतरे ।
रुद्राः प्रजापतिश्चापिवषट्कारोप्य सोमपाः ॥ ११ ॥

त्रयस्त्रिंशत्सोमपाश्च तावन्तोऽग्न्यादयो दिशाम् ।
पतयस्सप्त षट्त्रिंशत्स्मर्तारो नारदादयः ॥ १२ ॥

तपस्विनस्तथोद्दालश्वेतकेतुमुखा अपि ।
हंसा हरिश्चन्द्रमुखाः परे राजर्षयस्तथा ॥ १३ ॥

अग्निष्टोमादयो यज्ञा ऊर्वश्याद्यप्सरोगणः ।
तत्र चित्ररथाद्यास्तु गन्धर्वा निवसन्ति हि ॥ १४ ॥

आवर्तो द्रोणकालौ च नीलसंवर्तपुष्कलाः ।
वारुणी वायुतमसी नव मेघा इहासते ॥ १५ ॥

प्रवहाद्या वसन्त्यत्र सप्तापि स्कन्धवायवः ।
गर्भाधानप्रभृतयश्चत्वारिंशत्क्रिया अपि ॥ १६ ॥

तत्र स्म्यादीनि बहुधा सन्ति यज्ञायुधान्यपि ।
उक्तान्येतानि सर्वाणि मूर्तान्येव वसन्ति हि ॥ १७ ॥
निष्प्रत्यूहं क्रतुशतं यः प्रवर्तयते पुमान् ।
जितेन्द्रियोऽमरावत्या सहाप्नोति पुलोमजाम् ॥ १८ ॥
तुलापुरुषमुख्यानि महादानानि षोडश ।
ये यच्छन्ति महात्मानस्ते लभन्तेऽमरावतीम् ॥ १९ ॥
अक्लीबवादिनोऽदीनास्संग्रामेष्वपराङ्मुखाः ।
विश्रान्ता वीरशयने तत्र तिष्ठन्ति भूभुजः ॥ २० ॥
अग्निरर्चिष्मतीनाम्नि पुरे सिंहासने शुभे ।
पीतादिशक्तिसंयुक्ते वर्तते सुमहाद्युतिः ॥ २१ ॥
जातवेदास्सप्तजिह्वो हव्यवाहस्ततः परम् ।
वैश्वानरोश्चोदरजस्तथा देवमुखः परः ॥ २२ ॥
कौमारतेजास्तदनु मूर्तिर्विश्वमुखोऽष्टमी ।
हिरण्यगगनारक्ता कृष्णा चैव तु सुप्रभा ॥ २३ ॥
बहुरूपाऽतिरक्ताग्नेस्सात्विक्यो रसना मताः ।
जातवेदसि ये भक्तास्ते वसन्त्यत्र सुव्रताः ॥ २४ ॥
अग्निप्रवेशं ये कुर्युर्दृढसत्वा दृढेन्द्रियाः ।
स्त्रियो वा सत्वसम्पन्नास्ते वसन्त्यग्नितेजसः ॥ २५ ॥
अग्निहोत्ररता विप्रास्तथाग्निब्रह्मचारिणः ।
पञ्चाग्नि व्रतिनो ये वै तेऽग्निलोकेऽग्नितेजसः ॥ २६ ॥
अग्निरेको द्विजातीनां निश्रेयसकरः परः ।
गुरुर्देवो व्रतं तीर्थं सर्वमग्निर्विनिश्चितः ॥ २७ ॥
अपावनानि सर्वाणि वह्निसंसर्गतः क्षणात् ।
पावनानि भवन्त्येव तस्माद्यः पावकः स्मृतः ॥ २८ ॥
याम्ये संयमिनी नाम पुरी तत्र सभान्तरे ।
आसने वर्तते प्राप्तधर्माधर्मविचारकृत् ॥ २९ ॥
तस्य मध्ये धर्मराजो दण्डहस्तो विराजते ।
ये धर्मकर्मनिरतास्तैस्सौम्यो दृश्यते यमः ॥ ३० ॥
धर्मरूपः प्रकृत्यैव निस्संख्यैः पुण्यराशिभिः ।
अयमेव हि पिंगाक्षः क्रोधरक्तान्तलोचनः ॥ ३१ ॥
दंष्ट्राकरालवदनो विद्युज्ज्वलनभीषणः ।
ऊर्ध्वकेशोऽतितिक्ष्णांगः प्रलयांबुदनिस्वनः ॥ ३२ ॥
कालदण्डोद्यतकरो भ्रुकुटीकुटिलाननः ।
धर्मस्तस्यास्ति पुरतः कालो दक्षिणतोऽसिभृत् ॥ ३३ ॥
अधर्मः पृष्ठतो वामे मृत्युर्भीषणपाशभृत् ।
धर्मस्य सविधे त्वग्निष्टोमाद्यानि वसन्ति हि ॥ ३४ ॥
व्रताण्यपि च दानानि सत्राणि विविधानि च ।
तथैव पुण्यकर्माणि मूर्तिमन्ति वसन्तिहि ॥ ३५ ॥
मनोऽनु मन्त्राः प्राणश्च नरोपनसवीर्यवान् ।
चित्तिर्हयनरश्चैव हंसो नारायणस्तथा ॥ ३६ ॥
प्रभवोऽयं विभुश्चैव साध्या द्वादश धर्मज! ।
न्यायो वैशेषिकश्चैव मीमांसा सांख्यमेव च ॥ ३७ ॥
पातञ्जलं च वेदान्तं शैवं वैष्णवमेवच ।
तत्र राजर्षयस्सन्ति ययातिनहुषादयः ॥ ३८ ॥
तत्रर्षयोऽप्यगस्त्याद्याः पुण्योश्वत्थमुखो द्रुमः ।
अग्निष्वात्तादयस्तत्र पितरस्सन्ति सर्वदा ॥ ३९ ॥
वर्तन्तेऽत्र सभामध्ये सर्वे भास्वरमूर्तयः ।
गन्धर्वाश्च महात्मानश्शतशश्चाप्सरोगणः ॥ ४० ॥
एते चान्ये च बहवो धर्मस्य पुरतः स्थिताः ।
कलाकाष्ठादयो मूर्ताः कालस्य पुरतः स्थिताः ॥ ४१ ॥
अधर्माग्रे पञ्च महापातकान्युपपातकैः ।
संकलीकरणाद्यैश्च वर्तन्ते सहनित्यशः ॥ ४२ ॥
तत्र वेदविरुद्धानि चार्वाकादि मतान्यपि ।
मृत्योस्समीपेऽजीर्णादि क्षयान्ता रोगराशयः ॥ ४३ ॥
तत्र नित्यं वसन्त्येते वाताद्या मूर्तिधारिणः ।
त्रिपाद्भस्म प्रहरणो रक्ताक्षस्त्रिशिरा ज्वरः ॥ ४४ ॥
खासः कूर्मांगसंस्थानो दीर्घो दण्डधरः कृशः ।
करेण वादयन् घण्टां विवृताक्षोऽति भीषणः ॥ ४५ ॥
श्वासस्त्रिबाहुपाशाक्षकमण्डलुसमुज्ज्वलः ।
हिक्कारोगः पिशाचीभिः पतन्नुद्बाहुरावृतः ॥ ४६ ॥
राजयक्ष्मा कृशतनुश्शरचापासितर्जिनी ।
दधात्त्रिनेत्रो दंष्ट्राभ्यां दष्टोष्ठो हन्तुमुद्यतः ॥ ४७ ॥
अर्शो रोगः कृशो वक्रः खड्गखेटभृदूर्ध्वदृक् ।
अतिसारोत्रिफलकीकिंकिणीनूपुरी कृशः ॥ ४८ ॥

मूत्राघातामयष्षण्डः कर्तरीवज्रधृत्करः ।
प्रमेहः पाशमुद्यम्य दक्षिणं पाशभीषणः ॥ ४९ ॥
शोभः पार्श्वेक्षणः कुर्वन् पादाघातं सगर्जनः ।
आन्त्रवृद्धिः कृशो नृत्यन्मेदिनीमवलोकयन् ॥ ५० ॥
पाशप्रधारी सततं कपालेन पिबन्मधु ।
गुल्मः कुब्जितसर्वांगो दण्डधारी भयंकरः ॥ ५१ ॥
दधानः किंकिणीमालां बद्धकेशो द्विलोचनः ।
प्लीहाय क्रुद्ग्रहौ द्वौ च वरदाभयधारिणौ ॥ ५२ ॥
कृशांगौ पाशदुष्प्रेक्षौ खड्गदण्डभयंकरौ ।
महोदरामयः स्थूलः क्रूरो महिषपृष्ठगः ॥ ५३ ॥
खड्गचर्मधरः क्लान्तस्तथा पीताम्बरावृतः ।
शोभः पञ्चकरस्तीक्ष्णो दशास्यक्षश्शरचापधृत् ॥ ५४ ॥
दधानः क्षुरिकां पट्टं कुलिशं चांकुशं तथा ।
कुष्ठः कुत्सितसर्वांगस्सर्पयज्ञोपवीतवान् ॥ ५५ ॥
दाहः प्राणहरः क्रुद्धस्त्रिणेत्रः किंकिणीयुतः ।
वायुर्भयंकरः पंगुः पाशी धावन्समन्तत : ॥ ५६ ॥
वि [1]कीर्णकेशः पार्श्वस्थान् भर्त्सयन्नेण वाहनः ।
त्र्यक्षोऽक्षिरोगरतूणीरपाशभृद्वरदोभयः ॥ ५७ ॥
कर्णरोगः क्वणन् घण्टां सकपालो जपन् स्थितः ।
कण्ठरोगः करालास्यो द्विभुजः पाशकुन्तधृत् ॥ ५८ ॥
कपालमालादुर्दर्शः सोष्णीषोवरभूषणः ।
गण्डरोगकरैष्षड्भिश्शंखचक्रगदास्तथा ॥ ५९ ॥
पाशं चापशरान् बिभ्रद्धावन्निम्नशिरा महान् ।
लम्बालकस्तीक्ष्णजिह्वो दण्डरौगो द्विबाहुकः ॥ ६० ॥
भगन्दरगदः प्रांशुश्शीर्णकेशाभिबन्दनः ।
पंगुः पाशांकुशधरः पीठासीनः ककुद्युतः ॥ ६१ ॥
श्रीपदस्त्रिपदः क्रुद्धः पतन् क्षुरधनुर्धरः ।
मुसली दशहस्तश्च खेटदण्डः धनुर्धरः ।
इत्याद्याकृतयो रोगा मृत्योस्सविधवर्तिनः ॥ ६२ ॥
रक्षसो नगरी नीलातत्र नीलविभूषणः ।
नीलाम्बरधरो भाति सभामध्ये तु निर्ऋति ॥ ६३ ॥

[1] शीर्णं

राक्षसा निवसन्त्यस्याममरद्रोहिणस्सदा ।
जातिमात्रेण रक्षांसि स्मृताः पुण्यजना इमे ॥ ६४ ॥
अथ हेतिः प्रहेतिश्च पौरुषेयो वधस्तथा ।
सर्पो व्याघ्रस्तथापश्च वातो विद्युद्दिवाकरः ॥ ६५ ॥
ब्रह्मोपेताश्च विप्रेन्द्रा यज्ञोपेताश्च राक्षसाः ।
ये शूद्राः पुण्यकर्माणस्तेऽप्यत्र निवसन्ति हि ॥ ६६ ॥
पुरे सुखासमाख्याने सुधाशक्ति समन्विते ।
सिंहासनेऽस्ति वरुणश्शतचन्द्रसमप्रभे ॥ ६७ ॥
तक्षको वासुकिश्शेषः कुलिशश्शखंपालक. ।
पद्मश्चैव महापद्मः कर्कोटक इतीरितः ॥ ६८ ॥
कम्बलाश्वतरश्चैलापत्रानन्तधनंजयाः ।
एते तु परिवारास्युर्वरुणस्य जलेशितुः ॥ ६९ ॥
चित्ररत्नप्रभाभास्वदालवालविराजिताः
फलपुष्प [1]भरानम्रास्सन्त्यस्मिन्कल्पशाखिनः ॥ ७० ॥
प्रह्लादो विप्रचित्तिश्च शतशो दैत्यदानवाः ।
लवणाद्यब्धयस्तत्र गंगाद्यास्सरितस्तथा ॥ ७१ ॥
शोणादयो नदास्तत्र ग्राहाद्या जलचारिणः ।
गीतवादित्रनिरता गन्धर्वाप्सरसां गणाः ॥ ७२ ॥
वापीकूप तटाकानां कर्तारो निर्जले वने ।
निर्जले जलदातारः परसन्तापहारिणः ॥ ७३ ॥
तथा नानाप्रकारांश्च विकारानैक्षवान्बहून् ।
गोरसानां प्रदातारस्तथा गोमहीषीप्रदाः ॥ ७४ ॥
निर्भया वारुणे लोके निवसन्ति लसन्ति च ।
वायुर्गन्धवतीनाम्नि पुरे हरिमणीमये ॥ ७५ ॥
पीठे वरे निवसति तस्यै ते परितस्थिताः ।
प्राणोऽपान स्समानश्च व्यानो दानौ तथैवच ॥ ७६ ॥
नागः कूर्मश्च कृकरो देवदत्तो धनंजयः ।
एते दशेतरे चापि प्रवहाद्याश्च वायवः ॥ ७७ ॥
श्वसनस्स्पर्शनो वायुर्मातरिश्वा सदागतिः ।
महाबलाभिधष्षष्ठस्सप्तमोऽनल [2]एवच ॥ ७८ ॥
पृषदश्वो गन्धवहो गरुधवाहानिलाशुगाः ।
रयो यः कर्करश्चैव समीरणसमाधकौ ॥ ७९ ॥

[1] लता [2] वेदनः

मारुतस्स्यात्ससदशो मारुतो नाम योनितः ।
जंगत्प्राणश्च पवनो वातसंज्ञः प्रभञ्जनः ॥ ८० ॥
पवमानो नभस्वांश्च तरस्व्यतिवलस्तथा ।
द्रविडो धवयधाश्च गात्नजोऽप्यधराभिधः ॥ ८१ ॥
ऊर्ध्वदृग्गतिदूरश्च फणिजस्साधकस्तथा ।
विश्वपूरकसंज्ञश्च जगदाश्रय एवच ॥ ८२ ॥
विश्वातिरिक्तसंज्ञोऽस्य सजागर इतीरितः ।
विश्वोदरश्चाग्रजश्च तीव्रकश्च सुरंहकः ॥ ८३ ॥
बीजवर्धनकस्तद्वज्जीवस्स्यात्पुष्कलोद्वहः ।
अञ्जनापतिसंज्ञश्च व्यक्तमूर्तिश्च विश्वगः ॥ ८४ ॥
इति तेऽत्र समाख्याताश्शुभदाश्च मरुद्गणाः ।
संख्याचैकोन पञ्चाशत्सर्वलोकोपकारकः ॥ ८५ ॥
आतपेषु प्रतप्तानां पान्थानां व्यजनादिभिः ।
ये हरन्ति श्रमं तेषां तत्र वासः प्रकीर्तितः ॥ ८६ ॥
कुबेरस्त्वलकापुर्यामास्ते मणिमयासने ।
सिद्धार्थो मणिभद्रश्च सुमना नन्दनो यशः ॥ ८७ ॥
कण्डूतिः पन्नगश्शंखो मणिमान्पद्मरोमकौ ।
सर्वान्नभोजी पिंगाक्षश्चतुरो मन्दराश्रयः ॥ ८८ ॥
प्रद्योतस्सुषचन्द्रश्च मेघवर्णो जयावहः ।
द्युतिमन्केतुमांच्छ्वेतमौलिमांन्विजयाकृतिः ॥ ८९ ॥
पद्मवर्णो मेघवर्णः पुष्पदन्तस्सुदर्शनः ।
पूर्णमानी हिरण्याक्षश्शतजिह्वो बलाहकः ॥ ९० ॥
बलाकविपुलौ पद्मनाभः कुमुदचीरकौ ।
सुगन्ध इत्यमी यक्षास्तेषां राजा धनाधिपः ॥ ९१ ॥
विचित्रा विभ्रमा हंसी भीषणी जनरञ्जिका ।
विशाला मदनी दुष्टा कालकण्ठी महाभया ॥ ९२ ॥
माहेन्द्री शंखिनी चान्द्री मंगला वटवासिनी ।
मेखला सकला लक्ष्मीर्मालिनी विश्वनायिका ॥ ९३ ॥
सुलोचना सुशोभा च कामदा च विलासिनी ।
कामेश्वरी नन्दिनी च स्वर्णरेखा मनोहरा ॥ ९४ ॥
प्रमोदा रागिणी सिद्धा पद्मिनी च रतिप्रिया ।
कल्याणदा कलारक्षा ततश्च सुरसुन्दरी ॥ ९५ ॥
इति षट्त्रिंशदाख्याता यक्षिण्योऽभीष्टसिद्धिदाः ।
विभ्रमो वाहको वीरः कटको रजको रविः ॥ ९६ ॥
सिंहनादो महानादस्सुग्रीवः कर्कटश्शठः ।
विडालाक्षो विडालास्यः कुमारः खचरो भवः ॥ ९७ ॥
मयूरो मंगलो भीमो द्वीपिवक्त्रः खराननः ।
मातंगश्च निशाचारी विषग्राही वृकाननः ॥ ९८ ॥
सैरिभास्यो वाजिमुखः पशुवक्त्रो मृगाननः ।
क्षोभकोमाणिभद्रश्च क्रीडकः सिंहवक्त्रकः ॥ ९९ ॥
(श्येनास्यः कंकवदनः काकास्यो हयवक्त्रकः)
महोदरस्स्थूलशिरा विकृतास्यो वराननः ।
अफालः कुक्कुटास्यश्च मायावी मदनालसः ॥ १०० ॥
मनोहरो दीर्घजंघः स्थूलदन्तो दशाननः ।
सम्मुखः पण्डितः क्रुद्धो वरदास्यस्सुसम्मुखः ॥ १०१ ॥
कपटी कौतुकी कालः कितवः किंकरः खलः ।
भञ्जको भयदः खाद्यस्सर्वगश्चेति चेटकाः ॥ १०२ ॥
चतुष्षष्टि समाख्याताः कुबेरस्य पुरे स्थिताः ।
महापद्मश्च पद्मश्च शंखो मकरकच्छपौ ॥ १०३ ॥
मुकुन्दकुन्दनीलाश्च वरश्च निधयो नव ।
हिमवान्पारियात्रश्च विन्ध्यकैलासमन्दराः ॥ १०४ ॥
मलयो ददुरश्चैव महेन्द्रो गन्धमादनः ।
इन्द्रनीलस्सुनाभश्च मेरुमुख्याश्च पर्वताः ॥ १०५ ॥
एते चान्ये च बहवो मूर्तिमन्तो वसन्ति हि ।
यज्ञार्थं यो धनं सर्वं दरिद्रेभ्यः प्रदाय तु ॥ १०६ ॥
कारयेद्यज्ञमखिलं स तत्र निवसेत्सुखम् ।
पुरे यशोवतीनाम्नि माणिसिंहासने शुभे ॥ १०७ ॥
वामादिशक्तिसंयुक्ते वर्तते परमेश्वरः ।
अघोरास्त्रस्वरूपोऽयमीशानादिममूर्तिभिः ॥ १०८ ॥
शर्वः पशुपतिश्चोग्रो रुद्रश्च भव ईश्वरः ।
महादेवो भीमइति मूर्तयोऽष्टौ वसन्ति हि ॥ १०९ ॥
उमा चण्डेश्वरो नन्दी महाकालो गणेश्वरः ।
वृषो भृंगिरिटिस्स्कन्द इत्यष्टौ सैन्यनायकाः ॥ ११० ॥
असितांगो रुरुश्चण्डः क्रोध उन्मत्त एवच ।
कपाली भीषणश्चैव संहारश्चाष्टभैरवाः ॥ १११ ॥

ब्राह्मी माहेश्वरी चैव कौमारा वैष्णवी तथा ।
वाराही चैव चेन्द्राणी चामुण्डास्सप्त मातरः ॥ ११२ ॥
दिव्ययोगी महायोगी सिद्धयोगी गणेश्वरी ।
पिशाचिनी ढाकिनी च कालरात्रिर्निशाचरी ॥ ११३ ॥
[1]कंकाली रौद्रवेताली हुंकारी भुवनेश्वरी ।
कंकण्टी ताडकी शुक्री यमदूती करालिनी ॥ ११४ ॥
ऊर्ध्वकेशी विरूपाक्षी शुष्कांगी नरभोजिनी ।
फट्कारी वीरभद्रा च धूम्राक्षी कलहप्रिया ॥ ११५ ॥
रक्ताक्षी राक्षसी घोरा विश्वरूपा भयंकरी ।
कामाक्षी चोग्रचामुण्डी भीषणी त्रिपुरान्तकी ॥ ११६ ॥
वीरकौमारिका चण्डी वाराही मुण्डधारिणी ।
भैरवी हस्तिनी क्रोधा दुर्मुखी प्रेतवाहिनी ॥ ११७ ॥
खट्वांगी दीर्घलम्बोष्ठी मालती मन्त्रयोगिनी ।
अर्दिनी चक्रिणी ग्राहकंकाली कालरूपिणी ॥ ११८ ॥
शंखिनी पद्मिनी क्षीरा असंधा च प्रहारिणी ।
लक्ष्मीश्च कामुकी लोला काकदृष्टिरधोमुखी ॥ ११९ ॥

1) कण्टकी.

धूर्जटी मालिनी घोरा कपाली विषभोजिनी ।
चतुष्षष्टि समाख्याता योगिन्यो वरसिद्धिदाः ॥ १२० ॥
योगिन्यस्तु चतुष्षष्टि वीरभद्रामुखा अपि ।
गणेशाभूतमुख्याश्च ग्रहलोकनिवासिनः ॥ १२१ ॥
नित्यं तत्रैव तिष्ठन्ति स्वैरसंचारतत्पराः ।
इति स्वर्लोकसंस्थानि जगन्त्युक्तानि सम्प्रति ॥ १२२ ॥
स्वर्लोकादूर्ध्वभागे तु योजनानां द्विकोटितः ।
महोलोकोऽस्ति तत्रर्षिर्मार्कण्डेयो मृकण्डुजः ॥ १२३ ॥
ऋषिभिस्तु मरीचाद्यैस्सहितः पूजयंच्छिवम् ।
तदेकहृदयस्तत्र वर्तते नित्यनन्दितः ॥ १२४ ॥
महोलोकादष्टकोटियोजनादुपरि स्थितः ।
जनोलोकस्तत्र सन्ति वसिष्ठाद्या महर्षयः ॥ १२५ ॥
पितृभिस्सहिता नित्यं गोत्रभेदप्रवर्तकाः ।

इति श्रीशिवतत्त्वरत्नाकरे तृतीयकल्लोले
सुवर्लोक महोलोक जनोलोकवर्णनं नाम पञ्चमस्तरंगः

षष्ठस्तरंगः

अकारि जनलोकान्तसर्वलोकप्रपञ्चनम् ।
तपो लोकादिकान्लोकानधुना विवृणु प्रभो! ॥ १ ॥
तनुज! श्रूयतामेतन्मनुजानामगोचरम् ।
यदन्वयुज्यतेदानीं दीयते तत्र चोत्तरम् ॥ २ ॥
तदूर्ध्वे तु तपोलोकः कोटयो द्वादशाप्यतः ।
साध्या नाम सुरा यत्र वसन्ति मुनिभिस्सह ॥ ३ ॥
सनत्कुमारस्सनको नारदश्च सनन्दनः ।
सनातनाद्या योगीन्द्रास्तथा तत्र महौजसः ॥ ४ ॥
सत्यलोकस्तदुपरि ह्यष्टकोटिसमुच्छ्रयः ।
ऊर्ध्वे ब्रह्मा चतुर्वक्त्रो ब्रह्मलोके व्यवस्थितः ॥ ५ ॥

सेव्यमानस्सदा देव्या सरस्वत्या विशुद्धया ।
त्रयीमय्या महाम्भोजे दीप्यते स्वेन तेजसा ॥ ६ ॥
दक्षः प्रचेताः पुलहो मरीचिः कश्यपस्तथा ।
आदित्याश्च तथा राजन्! वसवश्चाश्विनौ तथा ॥ ७ ॥
पुलस्त्यश्चक्रतुश्चैव प्रह्लादः कर्दमस्तथा ।
भृगुरत्रिर्वसिष्ठश्च गौतमश्च महाकविः ॥ ८ ॥
अथर्वांगिरसश्चैव वालखिल्या मरीचिपाः ।
मनोविद्यान्तरिक्षं च वायुस्तेजो जलं मही ॥ ९ ॥
शब्दस्स्पर्शश्च रूपं च रसो गन्धश्च भूपते!
प्रकृतिश्च विकारश्च यच्चान्यत्कारणं भुवि ॥ १० ॥

अगस्त्यश्च महाराज! मार्कण्डेयश्च दीप्तिमान् ।
जमदग्निर्भरद्वाजस्संवर्तश्च्यवनस्तथा ॥ ११ ॥
दुर्वासाश्च महाभाग! ऋष्यशृंगश्च धार्मिकः ।
सनत्कुमारो भगवान् योगाचार्यो महातपाः ॥ १२ ॥
असितो देवलश्चैव जैगीषव्यस्तथैव च ।
पुरुषोऽ[1]जातशत्रुश्च महावीरस्तथा मणिः ॥ १३ ॥
आयुर्वेदस्तथाष्टांगो वेदस्तत्र च भारतम् ।
चन्द्रमास्सहनक्षत्रैरादित्यश्च गभस्तिमान् ॥ १४ ॥
वायवः क्रतवश्चैव संकल्पः प्राप्य एवच ।
अर्थो धर्मश्च कामश्च द्वेषो हर्षस्तथा मदः ॥ १५ ॥
आयान्ति तत्र सहिता गन्धर्वाप्सरसां गणाः ।
विशन्ति सप्त चैवान्ये लोकपालाश्च सर्वशः ॥ १६ ॥
शुक्रो बृहस्पतिश्चैव बुधोऽगारक एव च ।
शनैश्चरश्च राहुश्च ग्रहास्सर्वे तथैव च ॥ १७ ॥
मन्त्रो रथन्तरश्चैव हरिमान्वसुमानपि ।
मारुतो विश्वकर्मा च पर्वाण्यपि धरापते! ॥ १८ ॥
तथा पितृगणास्सर्वे मूर्तिमत्यश्च देवताः ।
ऋग्वेदस्सामदवेश्च वेदांगानि च सर्वशः ॥ १९ ॥
ग्रहा यज्ञाश्च सोमश्च दैवतानि च सर्वशः ।
सावित्री दुर्गतरणी वाणी सप्तविधा तथा ॥ २० ॥
वाणी धृति श्श्रुतिश्चैव यज्ञः [1]क्षान्तिर्मतिर्यशः
सामानि स्तुतिगीतानि गाथाश्च विविधा अपि ॥ २१ ॥
भाष्याणि तर्कयुक्तानि देहवन्ति विशां पते! ।
क्षणो लवो मुहूर्तश्च दिवारात्रिश्च भूपते! ॥ २२ ॥
संवत्सराः पञ्च युगास्समारात्रिश्चतुर्विधा ।
कालचक्रं च यद्दिव्यं नित्यमक्षरमव्ययम् ॥ २३ ॥
दनुर्दैत्यदिती चैव विनता सुरसा तथा ।
काला च कारभिर्देवी सरमा चाथ गौतमी ॥ २४ ॥
पृषत्काराश्च ता देव्यस्तत्रासन्देवमातरः ।
रुद्राणी श्रीश्च लक्ष्मीश्च भद्रयष्ठिस्तथा जरा ॥ २५ ॥

पृथ्वी गंगा च देवी श्रीह्रीस्स्वाहा कीर्तिरेवच ।
सुरादेवी शचीदेवी तथा तुष्टिररुन्धती ॥ २६ ॥
सम्पत्तिराशा नियतिः पुष्टिर्देवी रतिस्तथा ।
विश्वे देवाश्च साध्याश्च पितरश्च मनोजवाः ॥ २७ ॥
पितॄणां च गणं विद्धि सप्तैतान्भरतर्षभ! ।
चत्वारो मूर्तिमन्तो वै त्रयश्चाप्यशरीरिणः ॥ २८ ॥
वैराजाश्च महाभाग! अग्निष्वात्ताश्च भूपते! ।
गार्हपत्या नाम परे पितरो लोकविश्रुताः ॥ २९ ॥
सोमपा एकशृंगाश्च अन्वाहार्याः कलास्तथा ।
एते चतुर्षु वर्षेषु भुञ्जते पितरो नृपु ॥ ३० ॥
राक्षसाश्चैव यक्षाश्च गुह्यका दानवास्तथा ।
पुरन्दरश्च देवेन्द्रो धनदो वरुणो यमः ॥ ३१ ॥
महादेवश्च भगवान् सदा गच्छति पर्वसु ।
देवो नारायणस्तत्र ऋषयो देवतर्षयः ॥ ३२ ॥
अष्टाशीति सहस्राणि मुनीनामूर्ध्वरेतसाम् ।
प्रजापतीनां पञ्चाशदृषीणामपि भूमिप! ॥ ३३ ॥
एते चान्ये च बहवस्स्वयम्भुवमुपासते ।
अतिथीनागतान्देवान् दैत्यानपि तथा मुनीन् ॥ ३४ ॥
महाभागानपि तथा ब्रह्मा लोकपितामहः ।
मधुरेण च साम्ना च भगवान्प्रतिगृह्य च ॥ ३५ ॥
नित्यशस्साधुमानार्थैर्युनक्ति मनुजानपि ।
स्थौल्यं सौक्ष्म्यं बालभावो युवत्वं वार्धकं तथा ॥ ३६ ॥
नानाजातिस्वरूपत्वमपृथ्वीभूतरूपता ।
शश्वत्सुगन्धसेवित्वमष्टौ पार्थिव! सिद्धयः ॥ ३७ ॥
पिशाचानां गुणास्त्वेते कथिता स्सिद्धिवेदिभिः
वार्निरासो वार्षु भूमाविव चारो पिपासया ॥ ३८ ॥
वार्धिपानं च निर्वारिस्थाने वारि प्रदर्शनम् ।
ग्रावादिताडने जातेप्यव्रणत्वं करान्तरे ॥ ३९ ॥
सिन्धोस्संधारणं प्राप्तरसता नीरसस्य च ।
अनीरभूतरूपत्वमाप्या अष्टौ हि सिद्धयः ॥ ४० ॥
स्थौल्याद्याष्षोडशैते स्युस्सिद्धयो भुवि रक्षसाम् ।
देहेऽग्न्युत्पादनं वह्निभीतित्यागोऽम्बुत स्थितिः ॥ ४१ ॥

[1] जानपुत्रश्च.

पाणौ तद्धारणं चान्नाद्यतिपाचनकर्म च ।
अप्रयत्नं जगद्दाहः क्ष्मादिभूतत्रयं विना ॥ ४२ ॥
उभाभ्यामेव भूताभ्यां शरीरस्य च धारणम् ।
अतीतानागतार्थानां तत्वतो ह्यवधारणम् ॥ ४३ ॥
दूरशब्दश्रुतिस्सर्ववृत्तान्तावगमस्तथा ।
विना यत्नं दिव्यदृष्टिर्दिव्यसारग्रहस्तथा । ॥ ४४ ॥
दिव्यगन्धग्रहश्चेति ख्यातं षडुपसर्गकम् ।
अग्नेरष्टौ गुणाः ख्याताः पूर्वैष्षोडशभिर्युताः ॥ ४५ ॥
चतुर्विंशतिरेते स्युः यक्षाणामिह सिद्धयः ।
मनोजवत्वं भूतान्तः प्रवेशोऽग्न्यादिधारणम् ॥ ४६ ॥
गुरुत्वं लघुता हस्तानिलधारणमेव च ।
भूमिकम्पनमंगुल्या निर्वाप्यश्चैकदेहता ॥ ४७ ॥
वायोरष्टौ सिद्धयस्तु पूर्वैरेतास्समाहृताः ॥
गन्धर्वाणां सिद्धयस्युरिति वेदविदोविदुः ॥ ४८ ॥
अच्छायत्वमदृश्यत्वं यथेष्टविषयेप्सुता ।
खेचरत्वाद्रिलंघित्वे शैल गर्भीकृतिस्तथा ॥ ४९ ॥
आकाशपिण्डीकरणमशरीरित्वमित्यमूः ।
व्योम्नस्स्युस्सिद्धयोह्यष्टौ पूर्वोक्तैः संयुता इमे ॥ ५० ॥
चत्वारिंशद्गुणाः प्रोक्ता महेन्द्रस्य बुधोत्तमैः ।
यथा कामोपलब्धिश्च यथाकामविनिर्गमः ॥ ५१ ॥
सर्वाभिभूतिस्सकलगुह्यार्थानां प्रदर्शनम् ।
कर्मानुगुणानिर्माणं वशित्वं प्रियदर्शनम् । ॥ ५२ ॥
संसारदर्शनं चेति मानसा अष्टसिद्धयः ।
चत्वारिंशद्गुणैः पूर्वैरेतास्सौम्यस्य सिद्धयः ॥ ५३ ॥

भेदनं ताडनं बन्धो मोचनं ग्रहणं तथा ।
संसारे परिवृत्तिश्च प्रसादोऽनुग्रहस्तथा ॥ ५४ ॥
मृत्युकालजयश्चाष्टावहंकारस्य सिद्धयः ।
पूर्वैं स्सहयुताश्चैता ब्रह्मणो वरसिद्धयः ॥ ५५ ॥
जगतो जननं रक्षा लय इष्टाभ्यधिक्रिया ।
इष्टलोकप्रवृत्तिश्च तुल्यलोकसमुद्भवः ॥ ५६ ॥
शुभाशुभकृती चाष्टौ बुद्धिसिद्धय ईरिताः ।
चतुष्षष्ट्या गुणैर्ब्रह्मा सत्यलोकेऽन्वितस्थितः ॥ ५७ ॥
विष्ण्वादीनां सिद्धयस्तु नृणां वाचामगोचराः ।
सर्वतेजोमया दिव्या ब्रह्मर्षि गणसेविता ॥ ५८ ॥
ब्रह्माश्रयाद्दीप्यमाना कथिता ब्रह्मणस्सभा ।
वैकुण्ठलोकस्तस्योर्ध्वे चतुष्कोट्यन्तरे स्थितः ॥ ५९ ॥
तत्रास्ते भगवान्नित्यं वासुदेवो जगत्पतिः ।
सर्वलोकगुरुः श्रीमान् आदिमूर्तिस्सनातनः ॥ ६० ॥
शंखकौमोदकीपद्मचक्रयुक्तश्चतुर्भुजः ।
सेव्यमानो महालक्ष्म्या ताक्ष्र्येण च महात्मना ॥ ६१ ॥
नीलोत्पलदलश्यामश्श्रीवत्सांकश्चतुर्भुजः ।
मत्स्यः कूर्मो वराहश्च नारसिंहश्च वामनः ॥ ६२ ॥
रामो रामश्च रामश्च बुद्धः कल्कीति वै दश ।
एवं दशावतारैस्तु दुष्टान्संहरति प्रभुः ॥ ६३ ॥
वैष्णवाः कोटिशस्तत्र स्तुवन्तस्तमुपासते ।
पाञ्चरात्रोक्तदीक्षाद्यैस्सर्वे निर्मलमानसाः ॥ ६४ ॥

इति श्रीशिवतत्त्वरत्नाकरे तृतीयकल्लोले
सत्यलोक विष्णुलोकवर्णनं नाम षष्ठस्तरंगः

सप्तमस्तरंगः

श्रीगुरो! विष्णुलोकान्ता लोकास्संप्रति वर्णिताः ।
तस्योपरितनो लोकः कीदृशस्तं वदस्व मे ॥ १ ॥
नन्दनाकर्णय स्वैरं यच्छ्रोतुमभिकाङ्क्षसे ।
पञ्चकोटि तदूर्ध्वन्तु दिव्यं शैवपदं शुभम् ॥ २ ॥
विष्णुलोकात्परं स्थानं कुमारस्य महात्मनः ।
स्वच्छमौक्तिकसंकाशं वरभोगसमन्वितम् ॥ ३ ॥
स्कन्दस्थानात्परं स्थानमुमादेव्याः प्रकीर्तितम् ।
तप्तचामीकरप्रख्यमशेषगुणमण्डितम् ॥ ४ ॥
उमास्थानाच्च परतः स्थानमाद्यमुमापतेः ।
नभसोऽप्यपरे पारे रुद्रलोकस्स्वयंप्रभः ॥ ५ ॥
दिव्यहर्म्यैर्गृहैश्चैव विमानैरतिशोभितः ।
काञ्चनैर्विविधैः शुभ्रैरुपेतश्शयनासनैः ॥ ६ ॥
उद्यानैश्शोभितोरम्यैर्नित्यपुष्पफलद्रुमैः ।
सदा वसन्तसन्तुष्ट-पुंस्कोकिलविराजितैः ॥ ७ ॥
कामरूपधरैर्दिव्यैस्सूर्येन्दुज्वलनप्रभैः ।
गणैरध्युषितो नित्यमसंख्यातैर्महात्मभिः ॥ ८ ॥
स्त्रीजनैर्बहुभिर्दिव्यैः पीनोन्नतपयोधरैः ।
तनूदरैर्बृहच्छ्रोणितटदीप्तात्ममेखलैः ॥ ९ ॥
फुल्लपद्मनिभास्यांघ्रिपाणिभिस्स्निग्धकान्तिभिः ।
वासोभिराञ्चितैः श्लक्ष्णैः कल्पवृक्षसमुद्भवैः ॥ १० ॥
नानाभरणमालाभिर्भूषितैश्चारुलोचनैः ।
सुस्निग्धसूक्ष्मधम्मिल्लरदहस्तांगुलीनखैः ॥ ११ ॥
श्रृंगारादिरसाभिज्ञैर्मनोनयनहारिभिः ।
शोभितः पुरुषैश्चापि भोगिभिः कामरूपिभिः ॥ १२ ॥
रुद्रकन्यास्तथा चान्यास्सालंकारा मनोहराः ।
कृशोदरा विलासिन्यस्सन्ति पीनोन्नतस्तनाः ॥ १३ ॥
ये रुद्रभक्ता राजानो ब्राह्मणाश्च विशस्तथा ।
शिवप्रसादाद्गच्छन्ति तं लोकं श्रद्धयान्विताः ॥ १४ ॥
तन्मध्ये सर्वतोभद्रं योजनायुतविस्तृतम् ।
शिवपीठासनाम्भोजं दीप्यते काञ्चनं सदा ॥ १५ ॥
धर्मादिभिर्महाकायैर्धृतं तत्सिंहरूपिभिः ।
सहस्रार्धमितोत्तुंगकर्णिकं सुमनोहरम् ॥ १६ ॥
विद्येश्वरादिभिर्देवैः कलाभिश्शक्तिभिस्तथा ।
पञ्चवक्त्रस्तदध्यास्ते देव्या सार्धं महेश्वरः ॥ १७ ॥
धर्मात्मा वृषभस्तस्य वाहनोऽग्रे महारवः ।
शेतेऽभिमुखमम्भोजे पूर्णचन्द्रनिभाकृतिः ॥ १८ ॥
उपासते मातृगणास्तथा गोमातरो भवम् ।
वेदास्त्वंगानि शास्त्राणि पुराणस्मृतयस्तथा ॥ १९ ॥
पितासौ सर्वलोकानां माता शक्तिश्शिवा श्रुता ।
राजा च सर्वलोकानां तच्चिह्नैरुपशोभितः ॥ २० ॥
कैलासोऽस्य सभा दिव्या देवर्षिगणसेविता ।
शिवप्रभावसन्दीप्ता मुमृष्टा शिवयोगिभिः ॥ २१ ॥
गन्धर्वा गायकास्तस्य नर्तक्योऽप्सरसस्तथा ।
विद्याधरा वाद्यकरा गणास्तु सहचारणाः ॥ २२ ॥
तस्यासन्मन्त्रिणो वेदाः कलाभिष्षष्टिभिस्सह ।
राज्यं च सुमहत्तस्य भुवनानि चतुर्दश ॥ २३ ॥
सीमादुर्गौ महामेरुः कोशो धर्मस्त्वनुत्तमः ।
विष्णुर्दण्डपतिश्चास्य मित्राणि शिवयोगिनः ॥ २४ ॥
द्वाःपौ नन्दिमहाकालौ युवराजश्च षण्मुखः ।
पुरोहितश्च ब्रह्माभूत् कालज्ञोऽस्य दिवाकरः ॥ २५ ॥
वह्निर्महानसपतिर्गणाधीशोऽस्य हासकृत् ।
महिषी पार्वती ज्ञेया रक्षाकर्ता सुरोत्तमः ॥ २६ ॥
शिवदूत्यस्स्मृतादास्यो लोकपालाश्च नायकाः ।
किंकराश्चेतरे देवाश्शत्रवो भक्तिवर्जिताः ॥ २७ ॥
तद्राज्ये चोररूपेण वर्तन्ते दैत्यदानवाः ।
कालनेमिमुखा राजन्! दुष्टान्तःकरणास्तथा । ॥ २८ ॥
तेभ्यो राज्यस्य रक्षार्थं मन्त्रयित्वा समन्त्रिभिः ।
पृथक् पृथक् स भूतानां चकारैकैकमीश्वरम् ॥ २९ ॥
लोकाधिराज्ये लक्ष्मीशं शक्रं चापि दिवौकसाम् ।
कुबेरं सर्वरत्नानां निधीनां यक्षरक्षसाम् ॥ ३० ॥

प्रह्लादं सर्वदैत्यानां वैनतेयं पतत्रिणाम् ।
वैवस्वतं पितॄणां च वरुणं यादसामपि ॥ ३१ ॥
वासुकिं सर्वनागानां मानुषाणां महीपतिम् ।
यज्ञवेदिं क्रियाकाण्डे ज्योतिर्वारिमुचां रविम् ॥ ३२ ॥
कवीनां मामपि ब्रह्मन्! वृक्षाणां प्लक्षमीश्वरम् ।
संस्थाप्यैतानाधिपतीन् शिक्षारक्षक्षमान्विभुः ॥ ३३ ॥
मोदते मुनिभिस्सार्धं शिवभक्तैर्मनस्विभिः ।
आयुधानि च दिव्यानि चक्रादीनि दिवौकसाम् ॥ ३४ ॥
स एवदत्तवान्पूर्वं विष्ण्वादीनां द्विजोत्तम! ।
पञ्चविंशत्परार्धानि गणानां कामरूपिणाम् ॥ ३५ ॥
निखर्वं चारणानां हि परिवारो जगत्पतेः ।
तस्मात्सर्वाणि भूतानि भवन्ति प्रभवन्ति च ॥ ३६ ॥
लीयन्ते च पुनस्तस्मिन् अनादिनिधने शिवे ।
ये तस्याज्ञामिमां लोके भिन्दन्ति द्विजसत्तम! ॥ ३७ ॥
तेषां नरकवासादिदण्डपातनकारकः ।
योगमायाधरस्त्वेष स्थूलसूक्ष्मादिमूर्तिभिः ॥ ३८ ॥
क्रीडत्येको यथाजोषं ज्ञायतेनाल्पबुद्धिभिः ।
तेजोमयस्य नैवान्तं जग्मतुर्ब्रह्मकेशवौ ॥ ३९ ॥
किंपुनर्लौकिका मूढाः कूपमण्डूक सन्निभाः ।
एषु त्रैलोक्यरक्षार्थं कैलासे भूतलेऽपि च ॥ ४० ॥
पातालेऽपि च सर्वेषु रुद्ररूपी चरत्युत ।
उत्कृष्टे सर्वजातीनां महच्छब्दः प्रयुज्यते ॥ ४१ ॥
तस्मात्समस्तदेवानां महादेवोऽयमुत्तमः ।
यथा तस्मात्समुद्भूतं पुनस्तत्र प्रलीयते ॥ ४२ ॥
अव्यक्तं व्यक्तिमापन्नं काष्ठाद्वह्निर्यथोत्थितः ।
चतुर्दशसु लोकेषु स एवैकः प्रतिष्ठितः ॥ ४३ ॥
तथापि तं न जानन्ति पापा भिन्नधियोऽक्षरम् ।
पापेन कर्मणा नुन्ना नरा निरयपातिनः ॥ ४४ ॥
स्मर्तुमप्यलसा मूढा शिवं स्वर्गप्रदं स्मृते ।
अग्नीषोमस्वरूपेण जगदेतच्चराचरम् ॥ ४५ ॥
[1])जरयत्येक एवासौ विश्वात्मा विश्वतोमुखः ।
स एव देवो बहुधा रूपं कृत्वा जगत्त्रयम् ॥ ४६ ॥
पाति विश्वेश्वरश्शम्भुस्संहरत्यपि लीलया ।
अनेककोटिसाहस्रैस्स्वचिह्नाद्युपलक्षितैः ॥ ४७ ॥
रुद्रसंघैर्जगत्कृत्स्नमापूरितमभूदिदम् ।
एकमेव यदा देवं जगतः परमीश्वरम् ॥ ४८ ॥
शाश्वतं जगतां योनिं तदा योगी विमुच्यते ।
अचिन्त्योऽव्यक्तरूपोऽपि योगिनां हितकाम्यया ॥ ४९ ॥
शिवलोकादिषु ब्रह्मन्! व्यक्तो योगेन तिष्ठति ।
सर्वज्ञो जगतां नाथश्शिवलोके वसन्नपि ॥ ५० ॥
जानाति जगतां वृत्तमशेषेण नृपो यथा ।
स्थाने ज्योतिर्मये चित्रे कोटिश्चाण्डकटाहकः ॥ ५१ ॥
शतकोटिप्रविस्तीर्णं इति ब्रह्माण्डगोलकः ।
ब्रह्माण्डस्य बहिर्भागे वीरभद्रनियन्त्रिताः ॥ ५२ ॥
पालयन्तोऽव तिष्ठन्ते रुद्रास्तु शतसंख्यया ।
कपालीशो ह्यजो बुद्धो वज्रदेहः प्रमदर्नः ॥ ५३ ॥
विभूतिरव्ययश्शास्ता पिनाकी त्रिदशाधिपः ।
इन्द्रवीर्यं समाक्रम्य स्थितास्तत्पूजिता दश ॥ ५४ ॥
अग्नी रुद्रो हुताशी च पिंगलः खादको हरः ।
ज्वलनो दहनो बभ्रुर्भस्मान्तकक्षयान्तकौ ॥ ५५ ॥
आग्नेय्यां संस्थितास्त्वेते पूजितास्तेन रुद्रवत् ।
विधातृधातृकर्तृश्रीकामसर्वनियोक्तृकाः ॥ ५६ ॥
याम्ये दशेशसंयोक्तृहाराश्च यमपूजिताः ।
नैरृतो वारुणो हन्ता क्रूरदृष्टिर्भयानकः ॥ ५७ ॥
ऊर्ध्वशेफा विरूपाक्षो धूम्रो लोहितदंष्ट्रकः ।
एते च निर्ऋतिबलमतिक्रम्य सदा स्थिताः ॥ ५८ ॥
बलोह्यतिबलश्चैव पाशहस्तो महाबलः ।
श्वेतोऽथ जयभद्रश्च दीर्घबाहु [2])र्जलप्रदः ॥ ५९ ॥
सुनामा भैरवश्चैव वरुणेन प्रपूजिताः ।
शीघ्रो लघुर्वायुवेगस्सूक्ष्मस्तीक्ष्णो भयान्तकः ॥ ६० ॥
पञ्चात्मकः पञ्चशिखः कपर्दी मेघवाहनः ।
वायुना पूजितास्त्वेते दशरुद्रा महाबलाः ॥ ६१ ॥
निधीशो रूपवान् धन्यः सौम्यश्शान्तो जटाधरः ।
कामप्रसादो लक्ष्मीशः प्रकाशश्चेन्दुयज्ञपौ ॥ ६२ ॥

1) जीवयत्ये.

2) र्जलान्तकः

कुबेरबलमाक्रम्य स्थिता रुद्रास्त्वमी दश ।
ईशानश्चैव विघ्नेशो ज्ञानवान्मातृपिंगलः ॥ ६३ ॥
भूतपालो बली मिलं वेदागमसुखंकरः ।
ईशानदिशि वर्तन्ते पूजितास्तेन ते दश ॥ ६४ ॥
बलिप्रियो वृषधरो वीरो ग्रसनपालकौ ।
शुभस्सुवीर्यो वृषभः पातालेशश्च लोहितः ॥ ६५ ॥
एते दशावतिष्ठन्ते पाताले पालनोद्यताः ।
अध्यक्षश्च नभोलिप्सुश्शम्भुर्विभुविचक्षणौ ॥ ६६ ॥
विवाहगुणसंवाहस्त्र्यक्षस्त्रिदशवन्दितः ।
ब्रह्माण्डस्योर्ध्वभागस्था दशरुद्रा इमे स्मृताः ॥ ६७ ॥
एवं शतेन रुद्राणां भुवनं परिपाल्यते ।
सन्तीदृशानामण्डानामयुतान्यर्बुदानि च ॥ ६८ ॥
सर्वाण्येवंविधान्येव यादृशं कीर्तितं त्विदम् ।
शम्भुरेतादृशैर्भूरि ब्रह्माण्डैर्भात्यलंकृतः ॥ ६९ ॥
एक एव तदा शम्भुर्ब्रह्माण्डावरणो बभौ ।
द्विषट्ककोटिब्रह्माण्डैः पादे पादे च नूपुरम् ॥ ७० ॥
द्विषट्ककोटि ब्रह्माण्डैः कंकणं करयोर्दधत् ।
शेषः कनिष्ठिकांगुल्यां मुद्रया वलयीकृतः ॥ ७१ ॥
सव्यापसव्योपवीती पृथग्द्विशतकोटिभिः ।
पक्षद्वयस्थैर्ब्रह्माण्डैरंजिते भुजभूषणे ॥ ७२ ॥
पार्श्वद्वयप्रचरितचतुर्विंशतिकोटिभिः ।
ब्रह्माण्डैर्ग्रथितां मालां वक्षस्स्थाने बिभर्ति सः ॥ ७३ ॥
ब्रह्माण्डमेकं नासाग्रे रचितां मूर्ध्नि मालिकाम् ।
ब्रह्माण्डकोटिविंशत्या संदधानः शिरोमणिम् ॥ ७४ ॥
ब्रह्माण्डकोट्या ग्रथितं कटकं करपंकजे ।
ब्रह्माण्डानन्तकोट्यस्तु रोमकूपेषु लीलया ॥ ७५ ॥
फलान्यौदुम्बराणीव हरस्यांगेषु तान्यपि ।
सहस्रकोटयस्सन्ति ब्रह्माण्डास्तिर्यगूर्ध्वगाः ॥ ७६ ॥
तत्र तत्र प्रवर्तन्ते ब्रह्माणो हरयो हराः ।
सर्वाण्येतादृशाण्येव यादृशं कीर्तितं त्विदम् ॥ ७७ ॥
अणिमादिसमृद्धस्य किं न संम्भाव्यते विभोः ।
संकल्पादेव तत्सिद्धैर्वक्तुरेव वचोऽल्पता ॥ ७८ ॥

इतिश्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादनबिन्दुकारणचिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादिताशिवाद्वैतविद्याविशारदश्रीमत्केळदिबसवराजेन्द्रविरचित वेदागमान्तर्गतविविधविद्यातन्त्रसारभूतशिवतत्त्वरत्नाकरे तृतीयकल्लोले शिवलोकादिकटाहान्तवर्णनं नाम सप्तमस्तरंगः

तरंगैस्सप्तभिर्युक्ते कल्लोलेऽस्मिंस्तृतीयके ।
ग्रन्थानां षट्शती पञ्चचत्वारिंशत्समन्विता ॥
महाभारतवाराहे कौर्मे स्कान्दं च वैष्णवम् ।
कुमारी काण्डशैवादि संगृह्यायं कृतोऽभवत् ॥
श्रीमत्सद्गुण सोमशेखरलसच्चन्नाम्बिकासूनुना ।
श्रीदीक्षागुरुचेन्नवीरकरसञ्जातेन लब्धश्रिया ।
गौरीभर्तृरनुग्रहाद्बसवराजेन्द्रेण क्लृप्ते पुनः
कल्लोलः परिपूरितः कृतिवरेत्वस्मिंस्तृतीयोऽभवत् ।

श्रीः

श्रीः

श्रीशिवतत्त्वरत्नाकरे

चतुर्थकल्लोले

प्रथमस्तरंगः

वीक्ष्यास्यं हरिनीलकुट्टिमगतं मातुः पयोजभ्रमात् ।
हर्तुं वाञ्छति विम्बितं हरिमनुप्रेक्ष्य द्रुतं वाञ्छति ॥
विघ्नेशानुजबर्हिभीतिविगलद्बन्धो दराहौ श्लथे ।
संश्लिष्याननचुम्बनोद्यतकरे शम्भुर्हसन्नोऽवतात् ॥ १ ॥

भगवन्! विदिताशेषवेद्यजात! [1]कृपाम्बुधे! ।
ब्रह्माण्डान्तर्गतांल्लोकानबोधं त्वत्प्रसादतः ॥ २ ॥

पुण्या तदापगावच्च गम्भीरा तत्स्थिताब्धिवत् ।
तत्रत्यकल्पतरुभिस्समं सर्वार्थदायिनी ॥ ३ ॥

तत्रत्य पुष्प सुरभिस्तत्सुधामधुरं क्रमात् ।
तद्वायुवेगिनी तद्वत्स्पष्टवर्ण विभागिनी ॥ ४ ॥

उपवेशमयी वाणी मामानन्दं नयन्त्यसौ ।
कालाग्निरुद्रलोकाच्च शिवलोकान्तमीरिते ॥ ५ ॥

संमस्तलोकविस्तारे खण्डे भारतनामनि ।
श्रुतेऽपि सम्प्रति नदीनददेशाद्रिभेदिनी ॥ ६ ॥

प्रपञ्चाच्छ्रवणं चित्रमीहते मधु सम्प्रति ।
सुत! प्रशस्तमप्राक्षीः ब्रुवे तस्योत्तरं शृणु ॥ ७ ॥

भरणात्तु प्रजानां वै मनुर्भरत उच्यते ।
निरुक्तवचनश्चैवं वर्ष तद्भारतं स्मृतम् ॥ ८ ॥

इत स्स्वर्गश्च मोक्षश्च मध्यमश्चाप्यतस्स्मृतः ।
न खल्वन्यत्र मर्त्यानां भूमौ कर्मविधिस्स्मृतः ॥ ९ ॥

तदिदं भारतं वर्षं यस्मिन् स्वायम्भुवादयः ।
चतुर्दशैते मनवः प्रजासर्गं वितेनिरे ॥ १० ॥

दक्षिणं यत्समुद्रस्य हिमनागस्य चोत्तरम् ।
वर्षं तद्भारतं नाम यत्रैषा भारती प्रजा ॥ ११ ॥

भारतस्यास्य वर्षस्य नव भेदान् शृणुष्व मे ।
सहस्रयोजन मितान् प्रत्येकं राजपुङ्गव! ॥ १२ ॥

1) गुणाम्बुधे.

इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गान्धर्वस्त्वथ वारुणः ॥ १३ ॥

अयन्तु नवमस्तेषां कन्या [1]द्वीपस्तु मध्यगः ।
सहस्रयोजनायामस्स तु वर्णाश्रमान्वितः ॥ १४ ॥

अस्मिन्मन्वंतरे तेऽष्टौ द्वीपास्सगरनन्दनैः ।
अन्वेषमाणैस्तुरगं खात्वा जलनिधीकृताः ॥ १५ ॥

सुमाली हेममाली च शम्भुवर्णगिरिस्तथा ।
वैडूर्यो रजतश्चैव मणिश्च मणिमानपि ॥ १६ ॥

एवमष्टौ महाशैलास्समुद्रान्तर्व्यवस्थिताः ।
मर्यादाकारकः क्षिप्तो वर्षाणां सगरात्मजैः ॥ १७ ॥

आयतो यत्कुमारातो द्वीपोऽयं दक्षिणोत्तरः ।
सहस्रयोजनमितः कन्यकाख्योऽतिशोभनः ॥ १८ ॥

तत्ते वर्षे प्रवक्ष्यामि यथाश्रुतमरिन्दम!
महेन्द्रो मलयस्सह्यश्शुक्तिमानृक्ष एव च ॥ १९ ॥

विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ।
तेषां सहस्रशो राजन्! पर्वतास्तु समीपगाः ॥ २० ॥

अभिज्ञातास्सारवन्तो विपुलाश्चित्रसानवः ।
अन्ये तत्रापरिज्ञाता ह्रस्वा ह्रस्वोपजीविनः ॥ २१ ॥

आर्या म्लेच्छाश्च कौरव्यास्तैर्मिश्राः पुरुषा विभो! ।
नदीः पिबन्ति बहुला गंगासिन्धुसरस्वतीः ॥ २२ ॥

गोदावरीं नर्मदाञ्च बहुदाञ्च सरस्वतीम् ।
शतद्रुमिन्दुभागाञ्च यमुनाञ्च महानदीम् ॥ २३ ॥

दृषद्वतीं विपाशां च विपाप्मां तलवालुकाम् ।
नदीं वेत्रवतीं चैव कृष्णवेणीं च निम्नगाम् ॥ २४ ॥

इरावतीं विशस्तां च पयोष्णीं देविकामपि ।
वेदस्मृतीं वेतसिनीं त्रिदिवामिक्षुलामिलाम् ॥ २५ ॥

1) संज्ञ.

करीषिणीं चित्रवर्णों चित्रसेनां च निम्नगाम् ।
गोमतीं धूतपापां च वन्दनां च महानदीम् ॥ २६ ॥

कौशिकीं त्रिदिवां कृत्यां नीचितां लोहितारिणीम् ।
रहस्यां शतकुम्भां च सरयूं च [1]नरेश्वर! ॥ २७ ॥

चर्मण्वतीं चैत्रवतीं हस्तिसोमां दिशां तथा ।
शरावतीं पयोष्णीं च परां भीमरथीं तथा ॥ २८ ॥

कावेरीं कृष्णतारूपां तापीं शतवलीमपि ।
नीवीरां महितां चापि सुप्रयोगां नराधिप! ॥ २९ ॥

पवित्रां कुण्डलां सिन्धुं वन्जुलां पुरमालिनीम् ।
पूर्वाभिरामां वीराञ्च वेणां मेघावतीं तथा ॥ ३० ॥

पलाशिनीं पापहरां माहेन्द्रां पिप्पलावतीम् ।
करीषिणीं सुसप्तां च सुरघां वारिमर्दिनीम् ॥ ३१ ॥

प्ररुघां प्रवरां मेनां मेघां घृतवतीं तथा ।
पुरावतीमनुष्णां च [2]सुलप्यां चार्विं च कौरव! ॥ ३२ ॥

सदानीरामधृष्यां च सुकुमारां महानदीम् ।
सदाक्रांन्तां शिवां चैव तथा वीरवतीमपि ॥ ३३ ॥

हिरण्वतीं चित्रवहां चित्रसेनां च निम्नगाम् ।
रथचित्रां चित्ररथां विश्वामित्रां कपिन्जलाम् ॥ ३४ ॥

उपेन्द्रां बहुलां चैव कुवेरामम्बुवाहिनीम् ।
वैनदीं पिन्जरां क्षीणां प्रवेणां च महानदीम् ॥ ३५ ॥

विदिशां कृष्णवेणीं च ताम्रां च कपिलामपि ।
शैलुषनाम्नीं वेदीञ्च हरिवासां महापगाम् ॥ ३६ ॥

शीघ्रां च विपुलां चापि भरद्वाजां च निम्नगाम् ।
कौशिकीं निम्नगां शोणां बाहूदामथ चन्द्रकाम ॥ ३७ ॥

दुर्गामभिशिलां चैव ब्रह्ममेध्यां रसावतीम् ।
विरजामधिरोहिं च तथा जाम्बूनदीमपि ॥ ३८ ॥

सुनासां तमसीं दासीं सामन्यां वरणामसीम् ।
नीलां धृतकरां चैव पर्णाशां च महानदीम् ३९ ॥

मानवीं वृषभां चैव ब्रह्ममेधां बृहस्पतीम् ।
एताश्चान्याश्च बहूधा महानद्यो जनाधिप! ॥ ४० ॥

सदा नीरमयीं हृष्टां मन्दगां मन्दगामिनीम् ।
ब्रह्माणीं च महा[3]गौरीं दुर्गामपि च भारत! ॥ ४१ ॥

चित्रोपलां चित्ररथामुज्ज्वलां करवाहिनीम् ।
मन्दाकिनीं वैतरणीं कोशा[4]म्वां च महानदीम् ॥ ४२ ॥

1) गणेश्वर. 2) शुलब्यां. 3) सौरीं. 4) ञ्चापि.

शुक्तीमतीं मरुत्तां च पुष्पवत्युत्पलावतीम् ।
लोहित्यां करतोयां च तथैव वृषभंगिनीम् ॥ ४३ ॥

कुमारीमृषिकुल्यां च ब्रह्मकुल्यां च भारत! ।
सरस्वतीं सुपुण्यां च सर्वगंगाश्च भारत! ॥ ४४ ॥

विश्वस्य मातरस्सर्वा स्सर्वाश्चैव महाफलाः ।
तथा नद्यस्त्वप्रकाशाश्शतशोऽथ सहस्रशः ॥ ४५ ॥

इत्येताः सरितो राजन्! समाख्याता दिगाश्रिताः ।
अतऊर्ध्वं जनपदान्निबोध गदतो मम! ॥ ४६ ॥

तत्रामी कुरुपाञ्चालास्साल्वमाद्रेयजांगलाः ।
शूरसेनाः कुलिंगाश्च मौरा मौकास्तथैवच ॥ ४७ ॥

मत्स्याश्मकूटाः कौसल्याः कुन्तलाः काशिकोसलाः ।
चेदयश्च सकारुषा भोजास्सिन्धुपुलिन्दकाः ॥ ४८ ॥

उत्तमाश्च दशार्णाश्च मेखलाश्चोत्कलास्तथा ।
पाञ्चालाः कौशिकाश्चैव ह्येकपृष्ठा युगन्धराः ॥ ४९ ॥

गोधा माद्राः कालिङ्गाश्च काशयोऽपरकाशयः ।
कुकुराश्चैव दाशार्णाः पिन्जलाश्चैव भारत! ॥ ५० ॥

कुन्तयोऽवन्तयश्चैव तथैव वरकुन्तयः ।
[1]गोयन्ता मन्दकः पांड्या विदर्भा रूपवाहिकाः ॥ ५१ ॥

अश्मकाः पांसुराष्ट्राश्च गोपराष्ट्राः करीनकाः ।
आदिराष्ट्रास्सुकुट्टाश्च मल्लराष्ट्रास्तु केरलाः । ॥ ५२ ॥

वनवास्या यवाक्षाश्च चक्रा चक्रभयानकाः ।
विदेहा मलयास्सूक्ष्मा मलदा विजयस्तथा ॥ ५३ ॥

अंगा वंगाः कलिंगाश्च यकृल्लौमान एवच ।
मल्लास्सुधेष्णाः प्राहूतास्तथा महिषवर्षुकाः ॥ ५४ ॥

बाह्लीका वाटधानाश्च आभीराः कारतोयदाः ।
अपरान्ताश्च शूद्राश्च सदूगावाश्चर्मखण्डनाः ॥ ५५ ॥

अटवीशवराश्चैव मारुभूम्यश्च भारत! ।
उपावृत्तानुवृत्ताश्च सुरसाः केकयास्तथा ॥ ५६ ॥

कुन्ताः परान्ता द्वैपेयाः कक्ष्यास्सामुद्रनिष्कुटाः ।
आन्ध्राश्च बहवो राजन्! अन्तर्गिर्यास्तथैवच ॥ ५७ ॥

बहिर्गिर्या मलपदा मागधा मानवर्यदाः ।
अत्युत्तराः प्रावृषयो भार्गवाश्च जनाधिप! ॥ ५८ ॥

पुण्ड्राभोगाः किराताश्च सुधेष्णा यामुनास्तथा ।
शका निषादा निषधास्तथैवावन्तिनैर्ऋताः ॥ ५९ ॥

1) गोमन्ता. 2) पद्रूवाश्चर्मभिण्डकाः.

दुश्शूराः प्रतिमार्स्त्याश्च कुरटाः कुशलास्तथा ।
वीरग्राहाश्शूरकोना रीजका रम्यकोङ्कणाः ॥ ६० ॥
तिलकाः पारशीकाश्च मधुमन्तश्शकुन्तलाः ।
काश्मीरास्सिन्धुसौवीरा गान्धारा दर्शकास्तथा ॥ ६१ ॥
आभिसाराः 2)कुलूताश्च शैवला बहुकातराः ।
दर्विका उत्सवा दर्वा वलजा रणमारकाः ॥ ६२ ॥
बहुकायाश्च कौरव्याः स्सुदामान स्सुवर्णकाः ।
दर्भाः करीशकाश्चैव कुलिन्दो पत्यकास्तथा ॥ ६३ ॥
नानायवोदकाः पार्श्वरोमणः कुशविन्दवः ।
कच्छा गोपालकच्छाश्च लाङ्गलाः करपल्लवाः ॥ ६४ ॥
किरात वर्बरास्सिद्धा विदेहास्ताम्रलिप्तकाः ।
पुलिन्दपुण्ड्रसैरन्ध्राः पार्वतीयाश्च भारत! ॥ ६५ ॥
अथापरे जनपदा दक्षिणे भरतर्षभ! ।
द्राविडाः केरलाः प्राच्या मूषिका वनवासिनः ॥ ६६ ॥
कर्नाटका माहिषका विकल्पा मुषिकास्तथा ।
कर्णिकाः कुन्तलाश्चैव सोद्भिदानल्कारिकाः ॥ ६७ ॥
कोकष्ठिकास्तथा चोडाः कोङ्कणा मालवास्तथा ।
समाङ्गाः कोपनाश्चैव कूकुराङ्गारमाहिषाः ॥ ६८ ॥
त्र्यम्बकाः केकराः प्रेष्ठास्समवेगवशास्तथा ।
तथैव विन्ध्याः पुलकाः पुलिन्दा वल्कलैस्सह ॥ ६९ ॥

1) कीरग्राहा. 2) उलूकाश्च.

माल वामलकाश्चैव तथैवापरवर्णकाः ।
मूलकास्तरवालाश्च श्रुतिजाः पूर्व 1)सृञ्जयाः ॥ ७० ॥
आदिदापाश्शिरालाश्च सूचकास्तनयास्तथा ।
उत्तराश्याः परे म्लेच्छाः क्रूरा भरतसत्तम! ॥ ७१ ॥
यवनाश्चसुकाम्भोजा दारुणा म्लेच्छजातयः ।
सकृद्ग्रहाः कुन्तलाश्च हूणाः पारदगैस्सह ॥ ७२ ॥
तथैव शमठास्स्विन्नास्तथैव दशमालिकाः ।
क्षत्रियाः परिवेषाश्च वैश्यशूद्रकुलानिच ॥ ७३ ॥
शूद्राभीराश्च दरदाः काश्मीराः पशुभिस्सह ।
खशिकाश्च तुखाराश्च वहवो गिरिगह्वराः ॥ ७४ ॥
आत्रेयाश्च भरद्वाजास्तथैव स्तेनपोषकाः ।
औपकाश्चपुलिङ्गाश्च किराता नीचजातयः ॥ ७५ ॥
तोमरा हंसमार्गाश्च तथैव करभञ्जकाः ।
कुलिन्दाः कुलकाश्चैव तङ्गणाः परतङ्गणाः ॥ ७६ ॥
एते चान्ये जनपादाः प्राच्योदीच्यास्तथैवच ।
उद्देशमात्रेण मया देशास्सङ्कीर्तिता इमे ॥ ७७ ॥

इति श्री शिवतत्वरत्नाकरे चतुर्थकल्लोले
सामान्यतो नदीदेशादिवर्णनं नाम प्रथमस्तरङ्गः

1) संजियाः.

अथ द्वितीयस्तरंगः

देशा नाम्ना समाख्याताः कन्याद्वीपान्तरे स्थिताः ।
प्राधान्येनात्र के देशाः प्रसिद्धिं समुपागताः ॥ १ ॥
सर्वेषु तेषु देशेषु धर्मदेशाश्च कीदृशाः? ।
तत्र के पर्वताः पुण्याः प्राधान्यं समुपागताः? ॥ २ ॥
कैः पर्वतैस्समुत्पत्तिः कासां वा सरितामभूत्? ।
नदीषु तासु कासां वा प्राधान्यं पुण्यगौरवात् ॥ ३ ॥
एतत्सर्वं समाख्याहि गुरो! विख्यातविक्रम! ।
नन्दनाकर्णयस्वैतयच्छ्रोतुमभिकाङ्क्षसे ॥ ४ ॥

एते प्रधानदेशास्स्युः कन्याद्वीपान्तरे स्थिताः ।
अङ्गा वङ्गाः कलिङ्गाश्च कर्णाटाश्चैव केरलाः ॥ ५ ॥
कामरूपाश्च गौडाश्च वनवासाश्च कुन्तलाः ।
कोङ्कणा मगधाश्चैव सुराष्ट्रा मालवास्तथा ॥ ६ ॥
लाटा भोटा वराटाश्च शवराः कुकरास्तथा ।
कुरवोऽवन्तयः पाण्ड्या मद्रसिंहलघूर्जराः ॥ ७ ॥
पारशीकाश्च मिथिलाः पञ्चाला श्शौरसेनयः ।
गान्धारा बाह्लिकाश्चैव तौलवास्साल्वपुण्ड्रकाः ॥ ८ ॥

प्राग्ज्योतिषाश्च मत्स्याश्च चेदयो वर्वरास्तथा ।
नेपाल [1]गौलकाश्मीराः कान्यकुब्जाश्च मागधाः ॥ ९ ॥
खुरसाणा महाराष्ट्राः कोसलाः केकयास्ताथा ।
आहिच्छत्रास्त्रिसिङ्गाश्च प्रयागाः करहाटकाः ॥ १० ॥
काम्भोजाश्चैव भोजाश्च चौला हूणाश्चकाशयः ।
षट्पञ्चाशदिमे देशाः प्रसिद्धिं समुपागताः ॥ ११ ॥
कोलाहलश्च वैभ्राजो मन्दरो दर्दुराचलः ।
वावन्धूमो वैद्युतश्च मैनाकस्सुरसस्तथा ॥ १२ ॥
तुङ्गप्रस्थो नागगिरी रोचनः पाण्डुराचलः ।
पुष्पाद्रिश्च जयन्तश्च रैवतः पाण्डुरेवच ॥ १३ ॥
ऋश्यमूकश्च गोमन्तः कूटशैलः कृतस्थलः ।
श्रीपर्वतश्च क्रोशश्च ताराहश्चित्रकूटकः ॥ १४ ॥
कूटजशङ्खवर्णश्च महानागगिरिस्तथा ।
महेन्द्रमुख्याश्च तथा सप्तसङ्ख्याः कुलाचलाः ॥ १५ ॥
एतैर्मिश्रा जनपदा म्लेंच्छाश्चार्याश्च भागशः ।
गङ्गा सरस्वती सिन्धुश्चन्द्रभागा तथा नदी ॥ १६ ॥
यमुना शतरूपा च वितस्तैरावती कुहूः ।
गोमती धूतपापा च वाहुदा च दृषद्वती ॥ १७ ॥
विपाशा देविका चक्षुर्निश्चला गण्डकी तथा ।
कौशिकी च महाभागा नदी कुशिकनन्दिनी ॥ १८ ॥
एताश्चान्याश्च शतशो हिमवत्पादनिस्सृताः ।
वेदस्मृतिर्वेदनदी वृत्रघ्नी सिन्धुवल्लभा ॥ १९ ॥
सुवर्णा नादिनी चैव सदानीरा मही तथा ।
पराशा श्रण्वती लूयी विदशा वेत्रवत्यपि ॥ २० ॥
सिप्रा ह्यवन्ती च तथा पारियात्रोद्भवा इमाः ।
शोणा च सरयूश्चापि नर्मदा सुरसा कृपा ॥ २१ ॥
मन्दाकिनी दशार्णा च चित्रकूटा तथापरा ।
चित्रोपला च तरसा करमोदा पिशाचिका ॥ २२ ॥
तथान्या पिप्पला श्रोणा विपापा वञ्जुला नदी ।
सरोजिनी शुक्तिमती [2]मालिनी त्रिदिवा क्रमात् ॥ २३ ॥
ऋक्षपर्वतसंजाता महानद्य इमास्स्मृताः ।
शीघ्रा पयो[3]र्णी निर्विन्ध्या निषधा वेगवाहिनी ॥ २४ ॥
वेणा वैतरिणी चैव सिनीवाली कुमुद्वती ।
तोया चैव महागौरी दुर्गा चाम्भश्शिवा तथा ॥ २५ ॥

[1] गौड. [2] मंकिनी. [3] पयोष्णी.

विन्ध्यपादप्रसूतास्तु नद्यः पुण्यतमा इमाः ।
गोदावरी भीमरथी कृष्णवेणी तथापरा ॥ २६ ॥
तुङ्गभद्रा सुप्रयोगा वाही कावेर्यथाम्बिका ।
चण्डिका च तथा दिव्या पश्चिमार्णवगामिनी ॥ २७ ॥
सह्यपादविनिष्क्रान्ता इत्येतास्सरिदुत्तमाः ।
कृतमाला ताम्रपर्णी पुष्पजातिस्तथोत्पला ॥ २८ ॥
मलयाद्रिसमुद्भूता नद्यश्शिवजला इमाः ।
इक्षुदा पितृसोमा च त्रिदिवा वंशकरिका ॥ २९ ॥
ऋषिकुल्या चाङ्गुली च महेन्द्रप्रभावा इमाः ।
ऋषिकुल्या कुमारीच मन्दगा मन्दवाहिनी ॥ ३० ॥
कृपापलाशिनी चैव शुक्तिमत्पादनिस्सृताः ।
विश्वस्य मातरस्सर्वास्सर्वपापहरा इमाः ॥ ३१ ॥
अन्यास्सहस्रशस्सन्ति क्षुद्रनद्योऽल्पवारयः ।
प्रावृट्काले प्रवाहाश्च गिरिगह्वरगोचराः ॥ ३२ ॥
धर्मदेशमथेदानीं वासयोग्यं वदामि ते ।
सरस्वती दृषद्वत्योर्देवनद्योर्यदन्तरम् ॥ ३३ ॥
तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ।
कुरुक्षेत्रंच मत्स्याश्च पाञ्चालाश्शौरसेनयः ॥ ३४ ॥
एषब्रह्मर्षिदेशोऽयमार्यावर्तादनन्तरम् ।
हिमवद्विन्ध्ययोर्मध्ये यत्प्राग्विनशनादपि ॥ ३५ ॥
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ।
आ समुद्रात्तु वै पूर्वादा समुद्राच्च पश्चिमात् ॥ ३६ ॥
तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः ।
ब्रह्मावर्तः परो देशः ऋष्यावर्तस्त्वनन्तरः ॥ ३७ ॥
मध्यदेशास्ततोन्यून आर्यावर्त स्त्वनान्तरः ।
कृष्णसारैर्यवैर्दर्भै श्चतुर्वर्णाश्रमैस्तथा ॥ ३८ ॥
समृद्धो धर्मदेशः स्यादाश्रयेरन्विपश्चितः ।
गङ्गाद्वारे प्रयागेच गङ्गासागरसङ्गमे ॥ ३९ ॥
निवासो न विना पुण्यै र्नराणामिह जायते ।
जितामित्रो नृपो यत्र वलवान् धर्मवत्परः ॥ ४० ॥
तत्र नित्यं वसेत्प्राज्ञः कुतः कुनृपतस्सुखम्? ।
पौरास्सुसंयुता यत्र सततं न्यायवर्तिनः ॥ ४१ ॥
यत्र मत्सरिणो लोका स्तत्रवासस्सुखोदयः ।
यस्मिन् कृषीवला राष्ट्रे प्रायशो नातिभोगिनः ॥ ४२ ॥
यत्रौषधान्यशेषाणि वसेत्तत्र विचक्षणः ।
प्रीयमाणा नरा यत्र प्रयच्छेयुरयाचितम् ॥ ४३ ॥

स्वस्थचित्तो वसेत्तत्र कृतकृत्य इवात्मवान् ।
दण्डो यत्राविनीतेषु सत्कारश्च कृतात्मसु ॥ ४४ ॥
सदैव तत्र निवसेद्धर्मशीलेषु साधुषु ।
धनिकः श्रोत्रियो राजा नदी वैद्यश्च पञ्चमः ॥ ४५ ॥
पञ्च यत्र न विद्यन्ते न तत्र दिवसं वसेत् ।
कीकटीष्वपि देशेषु यत्र माहेश्वरो जनः ॥ ४६ ॥
मनाक् प्रपन्नो निवसेत् काशीक्षेत्रसमं हि तत् ।
यस्मिन्देशे वसेन्नित्यं शिवभक्तः क्षमान्वितः ॥ ४७ ॥
सो पि देशो भवेत्पूतः किं पुनस्तस्य बान्धवाः ।
चण्डालवाटिकायां वा शिवभक्तः स्थितो यदि ॥ ४८ ॥
तच्छ्रेणिशिवलोकस्स्यात् तद्गृहं शिवमन्दिरम् ।
रुद्राध्यायी वसेद्यत्र ग्रामे वा नगरेऽपि वा ॥ ४९ ॥
न तत्र क्षुत्पिपासाद्या दुर्भिक्षं व्याधयोऽपि वा ।
अथाष्टषष्ठि क्षेत्राणि पुण्यानि कथयामि ते ॥ ५० ॥
सालग्रामं कुरुक्षेत्रं प्रयागं पद्मनाभकम् ।
पुण्डरीकं माधवं च काञ्ची च पुरुषोत्तमम् ॥ ५१ ॥
वृन्दावनं च श्रीरङ्गं वेदपादनगस्तथा ।
द्वारका च तथाऽयोध्या सह्यपर्वत एवच ॥ ५२ ॥
श्रीपतिश्च तथा पुत्र! नैमिशं कुरुजाङ्गलम् ।
सिंहामलकशैलाख्यमहोबिलमतःपरम् ॥ ५३ ॥
गारुडं चैव गोपालं कोकाख्यं मधुराख्यकम् ।
वैष्णवेषूत्तमं क्षेत्रं त्रयोविंशतिसंज्ञकम् ॥ ५४ ॥
सेतुर्गोकर्णवाल्मीकिगयारण्यं गया तथा।
वृद्धाचलं चाभ्रसभा वातापिक्षेत्रमेवच ॥ ५५ ॥
अगस्त्यभास्करक्षेत्रेऽगस्त्यनाभाख्यमेवच ।
सोमेश्वरश्च भीमेशः कुरुक्षेत्रारुणाचले ॥ ५६ ॥
जम्बेश्वरं कुम्भघोणं नैमिशारण्यमेव च ।
वेमारण्यं कालहस्तीकमलाचल एवच ॥ ५७ ॥
मध्यार्जुनं विरूपाक्षं श्वेतारण्यं हलाहलम् ।
केदारं भद्रपादाश्च काशी चैव त्रियम्बकम् ॥ ५८ ॥
वैयाघ्रपादं साम्बाख्यं पुष्करं स्थाणुसंज्ञकम् ।
शिवगंगा गुहारण्यं रुद्रकोटिर्हिरालयम् ॥ ५९ ॥
श्रीशैलक्षेत्रमित्यादिशिवक्षेत्राण्यनेकशः ।
क्षेत्राण्येतानि वसतां भुक्तिमुक्तिप्रदानिवै ॥ ६० ॥
वाराणस्यां विशालाक्षी मीनाक्षी मधुरापुरे ।
काञ्चीपुर्यां च कामाक्षी लंकायामपि शंकरी ॥ ६१ ॥
महालक्ष्मीः कोल्लपुरे कन्याकुब्जे च कुब्जिका ।
जालन्धरे महादेवी सिंहले सिंहकेश्वरी ॥ ६२ ॥
पर्वते पार्वती चक्रवाट्यां माणिक्यदेविका ।
उज्जयिन्यां महाकाली हिमाद्रौ हिमरूपिणी ॥ ६३ ॥
श्रीशैले भ्रमराम्बा च विन्ध्याद्रौ विन्ध्यवासिनी ।
सुमेरौ सुप्रभादेवी योगिनी योगिनीपुरे ॥ ६४ ॥
काले च काद्रवेयाख्या पूर्णक्षेत्रे च पूर्णिका ।
एवमादीनि शक्तीनां पीठानि सुबहून्यपि ॥ ६५ ॥
स्कन्दाचलं कुमाराद्रिर्हेमकूटस्तथैव च ।
एते स्कान्दा महापुण्या ब्रह्मवर्चसदास्त्रयः ॥ ६६ ॥
जम्बीरशोणना[1]दाख्यो गोमन्ताख्यमतः परम् ।
महीषाख्यनगश्चैव पञ्चमो द्रोणपर्वतः ॥ ६७ ॥
[2]एते भैरवसान्निध्यात्सर्वानुष्ठानसिद्धिदाः ।
चम्पका नैमिशाचैव दण्डका च गुहाह्वया ॥ ६८ ॥
द्वैपायनीया बदरी कदलीति तथाष्टमी ।
एते पुण्यतमा लोके ह्यरण्याः पुण्यसंज्ञकाः ॥ ६९ ॥

इति श्रीशिवतत्त्वरत्नाकरे चतुर्थकल्लोले
प्रधानदशशैलतीर्थक्षेत्रवर्णनं नाम द्वितीयस्तरंगः

1) गाख्यो. 2) एतेवै भैरवस्थानास्सर्वानुष्ठान सिद्धिदाः

अथ तृतीयस्तरंगः

अवादि शतदेशानां नदीनामप्यनेकशः ।
तत्तत्पुण्यदेशानां तीर्थक्षेत्रभुवामपि ॥ १ ॥
श्रीमद्भिर्नामतो भेदाः क्रमादेषां पृथक्पृथक् ।
के के नृपाः कदा क्षोणीमेनां प्रागशिषन्प्रभो! ॥ २ ॥
एतन्मह्यं समाचक्ष्व यद्यस्त्यस्मिन्जने दया ।
भोः पुत्र! चित्रमेतत्ते ब्रवीम्यवहितः शृणु ॥ ३ ॥
ब्रह्मणोऽभून्मरीचिस्तु तस्माज्जातोऽथ कश्यपः ।
तस्माद्विवस्वांस्तस्माच्च वैवस्वतमनुर्महान् ॥ ४ ॥
तमारभ्य च राजानो बुधान्ताः क्ष्मामपाल्यन् ।
उदितस्सूर्यवंशोऽयं चन्द्रवंशोऽथ कथ्यते ॥ ५ ॥
ब्रह्मणोऽत्रिस्समुत्पन्नस्तस्माच्चन्द्रस्ततो बुधः ।
तस्मात्पुरूरवा जात एवमा जनमेजयम् ॥ ६ ॥
विक्रान्तास्त्वथ राजानो गोपायन्ति स्म भूतलम् ।
उभयेऽमी च राजन्या भव्यकीर्तिपराक्रमाः ॥ ७ ॥
शकाधिपतयस्सन्तो रक्षन्ति स्मातिधार्मिकाः ।
पुत्र! त्वं शृणु सम्यक्तान् कथयामि यथाक्रमम् ॥ ८ ॥
कालेषु केषु चित्तत्र केचिदेव महीभृतः ।
तं कालभेदं दुर्ज्ञेयमादौ ते वर्णये शृणु ॥ ९ ॥
तीक्ष्णस्सूच्याब्जपुष्पस्य दळभेदस्त्रुटिर्भवेत् ।
तच्चलं लवइत्युक्तं तत्त्रिंशच्च निमेषकः ॥ १० ॥
निमेषैश्चाष्टविंशत्या कालो गुर्वक्षरस्ततः ।
दशगुर्वक्षरोच्चारकालः प्राणोऽभिधीयते ॥ ११ ॥
षड्भिः प्राणैर्विनाडी स्यात् तत्षष्ट्या नाडिकास्मृता ।
नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्षते ॥ १२ ॥
पञ्चघ्नैस्त्रिदिनैः पक्षः पक्षौ द्वौ मास इष्यते ।
ऋतुर्मासद्वयं तत्र त्रिभिस्तैरयनं स्मृतम् ॥ १३ ॥
तद्द्वयं वत्सरश्चैव नवभेदो महामुने! ।
ब्राह्मं दैवं तथा पित्र्यं प्राजापत्यं गुरोस्तथा ॥ १४ ॥
सौरं च सावनं चान्द्रमार्क्षं मानानि वै नव ।
तेषां विभागमपि मे निबोध मुनिपुंगव! ॥ १५ ॥
दर्शावधिं मासमुशन्ति चान्द्रं
सौरं तथा भास्करराशिभोगात् ।
त्रिंशाद्दिनं सावनमाहुरार्याः
नाक्षत्रमिन्दोर्भगणभ्रमैश्च ॥ १६ ॥

निखिलग्रहचारश्च संक्रान्तेः कालनिर्णयः ।
दिनरात्रिप्रमाणं च सौरमानेन गृह्यते ॥ १७ ॥
वृद्धेर्विधानं स्त्रीगर्भमृतिसूतकनिर्णयः ।
ग्रहाणां मध्यमा भुक्तिस्सावनेनैव गृह्यते ॥ १८ ॥
भचक्रभ्रमणं मेघगर्भो नक्षत्रमानतः ।
उपवासव्रतोद्वाहयात्राक्षौरोपनायनम् ॥ १९ ॥
तिथिपर्वादि निखिलं चान्द्रमानेन गृह्यते ।
उदेति यस्मिन्नक्षत्रे प्रवासोपगतो गुरुः ॥ २० ॥
तस्मात्संवत्सरो मासाद्बार्हस्पत्यः प्रगण्यते ।
कार्त्तिकादि समाज्ञेयाद्विद्विनक्षत्रचारिणः ॥ २१ ॥
त्रिभिर्भाद्रपदं ज्ञेयं फाल्गुनाश्वयुजौ तथा ।
यदामाघस्य शुक्लस्य प्रतिपच्चोत्तरायणम् ॥ २२ ॥
सहोदयप्रविष्टाभिस्सोमार्कौ प्रतिपद्यतः ।
प्रथमस्सोऽग्निदैवत्यो नाम्ना संवत्सरस्स्मृतः ॥ २३ ॥
यदा माघस्य शुक्लस्य त्रयोदश्यामुदग्रविः ।
युक्ते चन्द्रमसा रौद्रे वासवं प्रतिपद्यते ॥ २४ ॥
द्वितीयस्सोऽर्कदैवत्यः प्रोच्यते परिवत्सरः ।
कृष्णे माघस्य दशमीं वासवादौ दिवाकरे ॥ २५ ॥
चान्द्रं तृतीयं संप्राहुरिदावत्सरकं बुधाः ।
सप्तमीं माघशुक्लस्य वासवादौ दिवाकरे ॥ २६ ॥
चतुर्थमिन्द्रदैवत्यं तमाहुरनुवत्सरम् ।
यद्युत्तरायणं कृष्णे चतुर्थ्यां तपसो भवेत् ॥ २७ ॥
उद्वत्सरस्स विज्ञेयः पञ्चमो मृत्युदैवतः ।
नियतं पञ्चमस्यान्ते तथैव स्यात्सहोदयः ॥ २८ ॥
सावनं चापि सौरञ्च नाक्षत्रं चान्द्रमेव च ।
चत्वार्येतानि मानानि यैर्युगं प्रविभज्यते ॥ २९ ॥
मासैर्द्वादशभिर्वर्षं दैवं तदह उच्यते ।
सुरासुराणामन्योन्यमहोरात्र्योर्विपर्ययः ॥ ३० ॥
मानुषेणैव मानेन पितॄणां दिनमेककम् ।
शतत्रयेण वर्षाणां षष्ट्या च द्विजसत्तम! ॥ ३१ ॥
मनुष्यसंख्यया वर्षो देवानामिह गण्यते ।
इति दिव्येन मानेन चतुर्युगविकल्पनम् ॥ ३२ ॥
चत्वारि तु सहस्राणि युगानां कृतमुच्यते ।
तत्र तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥ ३३ ॥

सहस्रत्रितयं दैवं त्रेतायुगमुदाहृतम् ।
तत्र तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥ ३४ ॥

सहस्रद्वितयं दैवं वर्षाणां द्वापरं स्मृतम् ।
तत्र तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥ ३५ ॥

कलिस्सहस्रवर्षं तु दिव्याब्दानां द्विजर्षभ! ।
तत्र तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥ ३६ ॥

तद्द्वादश सहस्राणि चतुर्युगमुदाहृतम् ।
तेषां च सप्ततिस्सैका मन्वन्तरमिहोच्यते ॥ ३७ ॥

इत्थं युगसहस्रेण भूतसंहारकारकः ।
कल्पो ब्राह्ममहः प्रोक्तं तावती तस्य शर्वरी ॥ ३८ ॥

परमायुश्शतं तस्य तयाहोरात्रसंख्यया ।
इति दैवेन मानेन युगादिपरिकल्पना ॥ ३९ ॥

मानुषेणाथ मानेन तेषां कॢप्तिरिहोच्यते ।
खखाभ्रवसुनेत्राद्रि शशिनः कृतवत्सराः a) ॥ ४० ॥

त्रेताभ्रखखऋत्वंकलोचनेन्दुस्सकथ्यते । b)
द्वापराब्दा वियत्पूर्णपूर्णाब्धिरसकुञ्जराः c) ॥ ४१ ॥

कलिसंवत्सराः पूर्णव्योमाभ्रद्विवह्निसागराः । d)
(महायुगाब्दाः पूर्णाभ्रचतुष्कद्वित्रिसागराः e))
महायुगैर्महाशैलैर्मनुस्तैरर्णवेन्दुभिः ॥ ४२ ॥

अहः पद्मोद्भवस्योक्तं निशाप्येतावती मता ।
दिनैस्तैस्त्रिंशता मासस्तेऽब्दो द्वादश ते शतम ॥ ४३ ॥

ब्रह्मणः परमायुस्तदिति शास्त्रविनिश्चितम् ।
खखाभ्रगजनेत्राद्रिचन्द्रास्सन्धिर्मनोस्स्मृतः ॥ ४४ ॥

खसप्तद्वित्रिवार्धिश्च कल्पकालः प्रकीर्तितः । f)
खचतुष्कं च नेत्राब्धिः कल्पसन्धिः प्रकीर्तितः g) ॥ ४५ ॥

खत्रयं गजनागाक्षि कृतसन्धिप्रमाणकम् । h)
खत्रयं ऋतुचन्द्राजि त्रेतासन्धिः प्रकीर्तितः i) ॥ ४६ ॥

खत्रयं गतिवेदाश्च द्वापरे सन्धिसंज्ञकम् । j)
खत्रयं नेत्रशैलाश्च कलिसन्धिः प्रकीर्तितः k) ॥ ४७ ॥

हरिश्चन्द्रो नलो राजा पुरुकुत्सः पुरूरवाः ।
सगरः कार्तवीर्यश्च कृताख्ये शकभूभृतः ॥ ४८ ॥

a) 1728000. b) 1296000. c) 864000. d) 432000. e) 4320000. f) 4320000000. g) 420000. h) 288000. i) 21600. j) 44000. k) 72000.

खत्रयं वसुनागाक्षि हरिश्चन्द्रस्य वत्सराः । a)
तथैव तु नले राज्ञि शककालः प्रकीर्तितः b) ॥ ४९ ॥

खत्रयं च खराद्यक्षि पुरुकुत्सस्य कीर्तितः । c)
खत्रयं नागवार्ध्यक्षि पुरूरवस ईरितः d) ॥ ५० ॥

खत्रयं गजनागाक्षि सगरस्य प्रकीर्तितः । e)
खत्रयं गजवेदाक्षि कार्तवीर्यस्य वत्सराः f) ॥ ५१ ॥

मान्धाता च दिलीपश्च रघुराजोऽज एव च ।
तथा दशरथो रामस्त्रेतायां शकभूभृतः ॥ ५२ ॥

खत्रयं शैलऋत्वब्धिर्मान्धातुश्च प्रकीर्तितः । g)
खत्रयं रसचन्द्राग्निर्दिलीपस्य शकः स्मृतः h) ॥ ५३ ॥

खत्रयं च रसेन्द्वक्षि रघोस्संवत्सरास्तथा । i)
त्रिपूर्णखररूपाक्षीण्यजभूमिपतेस्समाः j) ॥ ५४ ॥

चतुश्शून्यं कुमारास्यं दशस्यंदन वत्सराः । k)
खत्रयं चन्द्ररूपं च रामचन्द्रस्यवत्सराः l) ॥ ५५ ॥

ययातिर्नहुषश्चैव दुष्यन्तश्शन्तनुस्तथा ।
चित्रवीर्यश्च पांडुश्च द्वापरे शकभूभृतः ॥ ५६ ॥

खत्रयं रसरूपाक्षि ययातेश्शकवत्सराः । m)
खत्रयेभेन्दुरूपाणि नहुषस्य तु वत्सराः । n) ॥ ५७ ॥

खत्रयं रसनेत्रेंदुर्दुष्यंतस्य तु वत्सराः । o)
खत्रयं गतिनेत्रेंदुश्शंतनोर्वत्सरास्स्मृताः p) ॥ ५८ ॥

चतुःपूर्णगतीन्दुश्च चित्रवीर्यस्य वत्सराः । q)
तथैव पाण्डुनृपतेर्द्वापरे वत्सरास्स्मृताः r) ॥ ५९ ॥

युधिष्ठिरो विक्रमशालिवानौ
ततो नृपस्स्याद्विजयाभिनंदनः ।
क्रमेण नागार्जुनभूपतिः कलिः
कलौ युगे षट्छकसंज्ञकास्तथा ॥ ६० ॥

गतिवेदाश्च शून्याग्निर्युधिष्ठिरशकः स्मृतः । s)
पञ्चाग्निचंद्रसंख्याका विक्रमे शकवत्सराः t) ॥ ६१ ॥

खत्रयं नागरूपञ्च शालिवाहस्य वत्सराः । u)
खचतुष्केंदुवर्षाणि शको विजयनंदने v) ॥ ६२ ॥

खपञ्चकं गतियुतं नागार्जुनशकस्स्मृतः । w)
रूपाक्षिनागसंख्याकः कलेश्शक उदाहृतः x) ॥ ६३ ॥

a & b) 288000. c) 276000. d) 248000. e) 288000. f) 248000. g) 467000. h) 316000. i & j) 216000. k) 60000. l) 11000. m) 216000. n) 118000. o) 126000. p) 124000. q & r) 140000. s) 3044. t) 135. u) 18000. v) 10000. w) 40000. x) 821.

हरिश्चंद्रो नलो राजा पुरुकुत्सः पुरूरवाः ।
सगरः कार्तवीर्यश्च षडेते चक्रवर्तिनः ॥ ६४ ॥

गयोऽम्बरीषश्शशिविन्दुरंगदः
पृथुर्मरुत्तो भरतस्सुहोत्रः ।
रामो दिलीपश्शिविरंतिदेवौ
ययातिमांधातृभगीरथाश्च ॥ ६५ ॥

एते षोडश संख्याका महाराजाः प्रकीर्तिताः ।
चतुर्वर्णाश्रमाचारान् पालयंतो यथाक्रमम् ॥ ६६ ॥

सर्वे ते क्षत्रधर्मेण रक्षन्ति स्म महीमिमाम् ।
कार्त्तिके शुक्लनवमी तृतीया माधवेऽमला ॥ ६७ ॥

माघे दर्शो नभस्ये तु कामरात्री युगादयः ।
तपो धर्मः कृतयुगे ज्ञानं त्रेतायुगे तथा ॥ ६८ ॥

द्वापरे चाध्वरो धर्मः तिष्ये दानं दया दमः ।
त्रेतायामाब्दिको धर्मो द्वापरे मासिकस्स्मृतः ॥ ६९ ॥

यथाशक्ति चरेत्प्राज्ञस्तदह्ना प्राप्नुयात्कलौ ।
पुष्करं तु कृते सेव्यं त्रेतायां नैमिशं तथा ॥ ७० ॥

द्वापरे तु कुरुक्षेत्रं कलौ गंगां समाश्रयेत् ।
कृते तु मानवा धर्मा त्रेतायां गौतमास्स्मृताः ॥ ७१ ॥

द्वापरे शांखलिखिताः कलौ पाराशरास्स्मृताः ।
कृते त्वस्थिगताः प्राणाः त्रेतायां मांसमाश्रिताः ।
द्वापरे रक्तमापन्नाः कलावन्नं समाश्रिताः ॥ ७२ ॥

गर्भो भवेत्कृते स्मृत्वा त्रेतायां दृष्टिमात्रतः ।
द्वापरे स्पर्शनाद्गर्भःकलौ संसर्गमात्रतः ॥ ७३ ॥

अभिगम्य कृते दानं त्रेतास्वाहूय दीयते ।
द्वापरे याचमानाय सेवया दीयते कलौ ॥ ७४ ॥

ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य शंकरम् ॥ ७५ ॥

कृतत्रेताधिपो विष्णुर्द्वापरे पद्मजोऽधिपः ।
कले रुद्रोऽधिपः प्रोक्तो युगानामीश्वराः क्रमात् ॥ ७६ ॥

चतुस्त्रिद्व्येकपादाढ्यो धर्मः कृतयुगादिषु ।
आयुष्यं च तथाप्नोति प्राणिनां निश्चितं शतम् ॥ ७७ ॥

शतमायुर्मनुष्याणां द्विशतं चैव रक्षसाम् ।
सहस्रं काकफणिनां षट्त्रिंशन्मृगपक्षिणाम् ॥ ७८ ॥

व्याघ्राणां च चतुष्षष्टिश्शतं केसरिदन्तिनाम् ।
भल्लूकानां वानराणां मण्डूकानां शतत्रयम् ॥ ७९ ॥

द्वात्रिंशत्तु तुरंगाणां खराणां पंचविंशतिः ।
लुलायानां तथोष्ट्राणां चतुर्विंशतिसम्मितम् ॥ ८० ॥

षोडशाजाविकानान्तु शुनां द्वादश सम्मितम् ।
हंसानां पंचदशकं कुक्कुटानां समाष्टकम् ॥ ८१ ॥

कपोतानां पंचदश बर्हिणां विंशतिस्तथा ।
मार्जारशशकादीनामायुर्द्वादश वत्सराः ॥ ८२ ॥

मत्स्यकच्छपनक्राणां जलूकानां च विंशतिः ।
मक्षिकामशकादीनां मत्कुणानां त्रिमासकम् ॥ ८३ ॥

स्वेदजक्रिमिदंशानां षण्मासा आयुरुच्यते ।
बभ्रुमूषकपल्लीनां सरटानां दशाब्दकम् ॥ ८४ ॥

जीवेत्पिपीलिका वर्षमित्यमायुर्विनिश्चयः ।
एतच्च द्वापरत्रेताकृतसंज्ञे युगत्रये ॥ ८५ ॥

उत्तरोत्तरभेदः स्यादुक्ताद्द्वित्रिचतुर्गुणम्

इति श्रीशिवतत्त्वरत्नाकरे चतुर्थकल्लोले युगकल्पव्यवस्था शकाधिपतिषोडशमहाराजादिवर्णनं नाम तृतीयस्तरंगः

अथ चतुर्थस्तरंगः

स्वामिन्! शकाधिपतयो महाराजाश्च षोडश ।
चतुर्वर्णाश्रमाचारान् [1]बहुधा प्रत्यपालयन् ॥ १ ॥

इत्याद्यसमभूत्पूर्वं वर्णाः के ते चतुर्विधाः ।
आश्रमाश्च तदाचाराः कीदृशाः कथयस्व तान् ॥ २ ॥

येषां तु पालनं राज्ञां मुख्यधर्म इतीरितम् ।
कुमार! तान्वयं ब्रूमो निश्श्रेयसविधायकान् ॥ ३ ॥

ब्राह्मणाः क्षत्रिया वैश्यास्शूद्राश्चत्वार एव ते ।
वर्णा इति समाख्याता एतेषां ब्राह्मणोऽधिकः ॥ ४ ॥

अध्यापनं चाध्ययनं यजनं याजनं तथा
दानं प्रतिग्रहश्चेति कर्माणि ब्राह्मणस्य षट् ॥ ५ ॥

प्रजानां रक्षणं दानमिज्याध्ययनमेवच ।
रक्षणं सर्ववर्णानां युद्धे शत्रुवधस्तथा ॥ ६ ॥

दुष्टपक्षिमृगाणां च दुष्टानां शासनं नृणाम् ।
अविश्वासश्च सर्वत्र चमूरक्षणमेवच ॥ ७ ॥

सदा संचारितैश्चारैर्लोकवृत्तान्तवेदनम् ।
सदात्मभरणं चैव राज्ञां धर्मस्सनातनः ॥ ८ ॥

पशूनां रक्षणं दानमिज्याध्ययनमेव च ।
वाणिज्यं च कुसीदं च वैश्यस्य कृषिरेव च ॥ ९ ॥

त्रिविधानि तु मानानि विशां वाणिज्यकर्मणि ।
तत्र साधनभूतानि निरूप्यन्ते क्रमादिह ॥ १० ॥

अंगुल्या तुलया चैव प्रस्थेनेतित्रिधा हि तत् ।
तिर्यग्यवोदराण्यष्टौ ऊर्ध्वा हि व्रीहयस्त्रयः ॥ ११ ॥

प्रमाणमंगुलस्योक्तं वितस्तिर्द्वादशांगुला ।
वितस्ती द्वे अरत्निस्स्याच्चतुर्हस्तं भवेद्धनुः ॥ १२ ॥

इत्यंगुली समुद्भूतं प्रमाणं समुदाहृतम् ।
दशार्धगुञ्जाः प्रवदन्ति माषं
माषैस्तथा षोडशभिस्तुनिष्कम् ।
चतुष्कनिष्कं पलमाधकं स्यात्
पलाश्शतं चैव तुलां वदन्ति ॥ १३ ॥

विंशतिस्तु तुलाभारं प्रवदन्ति मनीषिणः ।
तोलनस्य परिज्ञाने तुलामानमिदं मतम् ॥ १४ ॥

[1]) पृथिव्यां

सहस्रं स्यान्मुष्टिमितं द्वे मुष्टी प्रसृतिं विदुः ।
प्रसृत्योर्द्वितयं चैव ह्यञ्जलिः कथ्यते बुधैः ॥ १५ ॥

अञ्जल्योर्द्वितयं चैव कुडुवं परिकीर्तितम् ।
चतुर्भिः कुडुवैः प्रस्थस्तैश्चतुर्भिस्तथाढकम् ॥ १६ ॥

चतुर्भिराढकैर्द्रोणं पञ्चभिस्तैस्तु भारिका ।
मागधं मानमित्युक्तं मानविद्भिस्तु पण्डितैः ॥ १७ ॥

दशांगुलोच्छ्रितं मानं विश्रुतं पञ्चभिस्तु यत् ।
विज्ञेयः पुरुषाहारश्चतुर्भिः कुडुवस्तु तैः ॥ १८ ॥

इति मानं समुद्दिष्टं धान्यनिष्क्रयसाधनम् ॥ १९ ॥

वराटिकानां दशकद्वयं यत्
सा काकिनी ताश्च पणश्चतस्रः ।
ते षोडश द्रव्यमिहावगम्यं
द्रव्यैस्तथा षोडशभिश्च निष्कः ॥ २० ॥

तुल्या यवाभ्यां कथिता त्रिगुञ्जा
वल्लिस्त्रिगुञ्जो धरणं च तेऽष्टौ ।
गद्याणकस्तद्द्वयमिन्द्रतुल्यैः
वल्लैस्तथैको धटकः प्रदिष्टः ॥ २१ ॥

एतत्पद्यद्वयेनोक्तं मानमुत्तरदेशजम्
योक्त्रं दामाविशकटं [1]कूडिकाहलत्या हिका ॥ २२ ॥

लवित्रं पालिका चैव कर्षोपकरणं विदुः ।
अनड्वान् धान्यवृष्टी च सुभूमिश्च चतुष्टयम् ॥ २३ ॥

कृषेः प्राधान्यकं चैतदेकहीनं न वै कृषिः ।
इति वैश्योदिता धर्मास्ससाधनमुदीरिताः ॥ २४ ॥

शुश्रूषणं द्विजगवां देवानां चाप्यमायया
तत्र लब्धेन सन्तोषश्शूद्रप्रकृतयस्त्विमाः ॥ २५ ॥

प्रथमस्त्वाश्रमाणां च व्रती गुर्वग्निसेवकः ।
गृही द्वितीयो वनगस्तृतीयः कृच्छ्रसाधनः ॥ २६ ॥

चतुर्थो भिक्षुरुद्दिष्टस्सर्वसंगविवर्जितः ।
गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम् ॥ २७ ॥

आषोडशाब्दं विप्रस्य कालमाहुश्च गौणकम् ।
गर्भादिकादशेऽब्दे तु राजन्यस्योपनायनम् ॥ २८ ॥

आ द्वाविंशं क्षत्रियस्य कालमाहुर्विपश्चितः
विशश्चोपनयः प्रोक्तो गर्भद्वादशके तथा ॥ २९ ॥

[1]) कूत्रिका.

चतुर्विंशाब्दपर्यन्तं कालो गौणः प्रकीर्त्तितः ।
एतत्कालावधिर्यस्य द्विजस्यातिक्रमेत वै ॥ ३० ॥

सावित्रीपतितं विद्यान्नालपेत्तं कदाचन ।
द्विजोपनयने विप्र! मुख्यकालव्यतिक्रमे ॥ ३१ ॥

द्वादशाब्दं चरेत् कृच्छ्रं पश्चाच्चान्द्रायणं तथा ।
सान्तपद्वितयं कृत्वा यथाकर्म समाचरेत् ॥ ३२ ॥

कार्पासमुपवीतं स्याद्विप्रस्योर्ध्वकृतं त्रिवृत् ।
शणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रकम् ॥ ३३ ॥

मौञ्जी विप्रस्य विज्ञेया धनुर्ज्या क्षत्रियस्य तु ।
आविर्वैश्यस्य विज्ञेया शृणुध्वमजिनं तथा ॥ ३४ ॥

विप्रस्य प्रोक्तमैणेयं रौरवं क्षत्रियस्य तु ।
आजं वैश्यस्य विज्ञेयं दण्डान्वक्ष्ये यथाक्रमम् ॥ ३५ ॥

पालाशो ब्राह्मणस्योक्तो नृपस्यौदुम्बरस्तथा ।
बैल्वो वैश्यस्य विज्ञेयः प्रमाणं शृणुत द्विजाः! ॥ ३६ ॥

विप्रस्य केशमानंस्यादाललाटं नृपस्य तु ।
नासाग्रमानं वैश्यस्य दण्डमाहुर्विपश्चितः ॥ ३७ ॥

तथा वासांसि वक्ष्यामि विप्रादीनां यथाक्रमम् ।
काषायं चैव मांजिष्ठं हारिद्रं परिकीर्त्तितम् ॥ ३८ ॥

उपनीतो द्विजो विप्रः परिचर्यापरो गुरोः ।
वेदग्रहणपर्यंतं निवसेद् गुरुवेश्मनि ॥ ३९ ॥

प्रातस्स्नायी भवेद्वर्णी समित्कुशफलादिकम् ।
गुर्वर्थमाहरेन्नित्यं काल्यं काल्यं मुनीश्वराः! ॥ ४० ॥

यज्ञोपवीतमजिनं दण्डं च द्विजसत्तमाः! ।
नष्टे भ्रष्टे नवं मन्त्राद् धृत्वा भ्रष्टं जले त्यजेत् ॥ ४१ ॥

सायं प्रातश्चाग्निकार्यं यथाचारं जितेन्द्रियः ।
कुर्यात्प्रतिदिनं वर्णी ब्रह्मयज्ञं च तर्पणम् ॥ ४२ ॥

अग्निकार्यपरित्यागी पतितः प्रोच्यते बुधैः ।
ब्रह्मयज्ञविहीनश्च ब्रह्महा परिकीर्तितः ॥ ४३ ॥

देवताभ्यर्चना कार्या शुश्रूषानुदिनं गुरोः !
नित्यं भुञ्जीत भिक्षान्नं नैकान्नादी कदाचन ॥ ४४ ॥

आनीया निन्द्यविप्राणां गृहे भिक्षां जितेन्द्रियः ।
निवेद्य गुरवेऽश्नीयाद्वाग्यतस्तदनुज्ञया ॥ ४५ ॥

वर्णिनो वर्णिनः प्राहुर्भिक्षान्ने नैव केवलम् ।
तस्मादनिन्द्यगेहेषु भिक्षां देहीति याचयेत् ॥ ४६ ॥

भवत्पूर्वं ब्राह्मणस्य भवन्मध्यं नृपस्य तु ।
भवदन्त्यं विशः प्रोक्तं भिक्षाया हरणे वचः ॥ ४७ ॥

मधुस्त्रीमांसलवणं ताम्बूलं दन्तधावनम् ।
उच्छिष्टभोजनं चैव दिवास्वापं च वर्जयेत् ॥ ४८ ॥

छत्रपादुकगन्धांश्च तथा मल्यानुलेपनम् ।
प्रक्षाल्य पादावाचम्य गुरोरभिमुखस्सदा ॥ ४९ ॥

तस्य पादौ च संगृह्य [1]नित्यमध्ययनं चरेत् ।
अष्टकासु चतुर्दश्यां प्रतिपत्पर्वणोस्तथा ॥ ५० ॥

महाभरण्यां विप्रेन्द्राः! श्रवणद्वादशी दिने ।
नभस्येऽपरपक्षे च द्वितीयायां तथैव च ॥ ५१ ॥

शयनोत्थानद्वादश्योश्श्रोत्रिये गृहमागते ।
परिवेषादिके सूर्ये तथा विप्रावमानके ॥ ५२ ॥

सन्ध्यायां गर्जिते मेघे प्रवृद्धे कलहे तथा ।
उल्काऽशनिप्रापाते च वर्षे चाकालिके तथा ॥ ५३ ॥

मान्वादिषु च विप्रेन्द्राः! युगादिषु चतुर्ष्वपि ।
नाधीयीत द्विजः कश्चित्सर्वकामफलेप्सुकः ॥ ५४ ॥

मन्वादींश्च प्रवक्ष्यामि शृणु त्वं सुसमाहितः ।
आश्वयुक्छुक्लनवमी कार्त्तिके द्वादशी सीता ॥ ५५ ॥

तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ।
आषाढशुक्लदशमी सिता माधस्य सप्तमी ॥ ५६ ॥

श्रावणस्याष्टमी कृष्णा तथाषाढी च पूर्णिमा ।
फाल्गुनस्य त्वमावास्या पुष्यस्यैकादशी सिता ॥ ५७ ॥

कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता ।
मन्वादयस्समाख्याताः कृतस्याक्षय्यकारकाः ॥ ५८ ॥

अनध्यायेष्वधीतानां प्रजां प्रज्ञां यशश्रियम् ।
आयुष्यं बलमारोग्यं निकृन्तति यमस्स्वयम् ॥ ५९ ॥

नित्यं नैमित्तिकं काम्यं यच्चान्यत्कर्म वैदिकम् ।
अनधीतस्य विप्रस्य सर्वं भवति निष्फलम् ॥ ६० ॥

शब्दब्रह्ममयो विष्णुर्वेदस्साक्षाद्धरिस्स्मृतः ।
वेदाध्यायी ततो विप्रस्सर्वान्कामान्समश्नुते ॥ ६१ ॥

प्राजापत्यश्च गायत्रो वैदिको नैष्ठिकस्तथा ।
एवं प्रकीर्तिता ब्रह्मचारिणस्ते चतुर्विधाः ॥ ६२ ॥

तेषां चतुर्णां पूर्वोक्ता धर्मास्साधारणास्स्मृताः ॥ ६३ ॥

इति श्रीशिवतत्त्वरत्नाकरे चतुर्थकल्लोले
चतुर्वर्ण्यधर्म, ब्रह्मचारिधर्मवर्णनं नामचतुर्थस्तरंगः

[1] मधीयीत विचक्षणः

अथ पञ्चमस्तरंगः

उक्ताश्चतुर्णो वर्णानामाचारा वर्णिनामपि ।
उदीर्यन्ते गृहस्थानां धर्मास्सम्प्रति तान् शृणु ॥ १ ॥
वेदग्रहणपर्यन्तं वर्णी गुरुकुले वसन् ।
अनुज्ञातस्ततस्तेन कुर्यादग्निपरिग्रहम् ॥ २ ॥
वेदांगानि च वेदांश्च धर्मशास्त्राणि च द्विजः ।
अधीत्य गुरवे दत्त्वा दक्षिणां च भवेद्गृही ॥ ३ ॥
रूपलक्षणसम्पन्नां सुगुणां सत्कुलोद्भवाम् ।
द्विजस्समुद्वहेत्कन्यां सुशीलां धर्मचारिणीम् ॥ ४ ॥
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।
अरोगिणीं भ्रातृमतीमसमानर्क्षगोत्रजाम् ॥ ५ ॥
कुवलयदलकान्तिः स्वर्णगौरद्युतिर्वा
करचरणनखेषुस्निग्धरक्ता तथाक्ष्णोः ।
सममृदुपदयुग्मा स्वल्पभुक्स्वल्पनिद्रा
कमलकुलिशचक्राद्यंकिता पाणिपादे ॥ ६ ॥
अकपिलकचहस्ता चाप्रलम्बोदरास्या
वरणविधिषु कन्या शस्यते शीलसारा ।
बहिरिथ च रुदन्ती जृम्भतेया च सुप्ता
वरणविधिसमेतास्तां बुधा वर्जयन्ति ॥ ७ ॥
गिरितरुतटिनीनां नामभिः पक्षिणां वा
समधिकपरिहीना व्याधिता क्रूरगात्री ।
अधरमधिकलम्बं कोटरं पिंगलं वा
नयनमथ वहन्ती कर्कशं पाणिपादम् ॥ ८ ॥
श्वसिति हसति रोदित्येव या भोजनेऽपि
स्तनमथ पतितोर्ध्वं बिभ्रती श्मश्रुलावा ।
विषमकुचयुगा वा वामना शूर्पकर्णी
कुदशन परुषोक्तिर्दीर्घजंघातिदीर्घा ॥ ९ ॥
पिटकचयचिता वा लोमशा पाणिपार्श्व-
स्तनपरिसरपृष्ठे जंघयोरुत्तरोष्ठे ।
भ्रमणविधिषुयस्याः कम्पते क्ष्मातलं वा
पतति हसनकाले गण्डयोर्वा तरंगः ॥ १० ॥
भवति समधिका वा पादजाङ्गुष्ठयोर्या
तदुपवसतिरन्या हीयते मध्यमा वा ।
पतति भुवि कनिष्ठाऽनामिकावा द्वयं वा
न यदि वरणकल्पे कन्यका वर्जनीया ॥ ११ ॥

विवाहोऽष्ट विधः प्रोक्तो ब्राह्माद्यो मुनिसत्तमाः! ।
पूर्वः पूर्वो वरो ज्ञेयः पूर्वभावे परःपरः ॥ १२ ॥
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः ।
गान्धर्वो राक्षसश्चैव पैशाचस्त्वष्टमो मतः ॥ १३ ॥
ब्राह्मेणैव विवाहेन विवहेद्वैदिकोत्तमः ।
दैवेनाप्यथवा कुर्यात्केचिदार्षं प्रचक्षते ॥ १४ ॥
प्राजापत्यादयो विप्र! विवाहाः पञ्च गर्हिताः ।
अभावे त्वत्र पूर्वेषां कुर्यादेव परान्बुधः ॥ १५ ॥
आनीय चार्चयित्वातु श्रुतशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥ १६ ॥
यज्ञेतु वितते सम्यगृत्विजे कर्म कुर्वते ।
अलंकृतसुतादानं दैवं धर्मं प्रचक्षते ॥ १७ ॥
एकं गौमिथुनं द्वेवा वरादादाय धर्मतः ।
कन्याप्रदानं विधिवदार्षो धर्मस्स उच्यते ॥ १८ ॥
सहोभौ चरतां धर्ममिति वाचानुभाष्य तु ।
कन्या प्रदानमभ्यर्च्य प्राजापत्यो विधिस्स्मृतः ॥ १९ ॥
ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायाश्चैव शक्तितः ।
कन्यापहारस्स्वाच्छिन्यादासुरो धर्म उच्यते ॥ २० ॥
इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च ।
गान्धर्व इति विज्ञेयो विवाहः कामसम्भवः ॥ २१ ॥
हत्त्वा छित्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् ।
प्रसह्य हरते कन्यां राक्षसो विधिरुच्यते ॥ २२ ॥
सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।
स पापिष्ठो विवाहानां पैशाचः प्रथितोऽष्टमः ॥ २३ ॥

प्राजापत्यब्राह्मदैवार्षसंज्ञाः
कालेषूक्तेष्वेव कार्या विवाहाः ।
गान्धर्वो वा राक्षसो वाऽऽसुरो वा
पैशाचो वा सर्वकाले विधेयः ॥ २४ ॥

चतुरो ब्राह्मणस्याद्यान् प्रशस्तान्कवयो विदुः ।
राक्षसं क्षत्रियस्यैवमासुरं शूद्रवैश्ययोः ॥ २५ ॥
एतेषु च विवाहेषु प्रशस्तं स्वानुरूपकम् ।
विवाहं प्राप्य धर्म्योस्तु गृहस्थानां समाश्रयेत् ॥ २६ ॥

तांस्तु धर्मान्समासेन वर्णयामि पुनः श्रृणु ।
देवयज्ञो भूतयज्ञः पितृयज्ञस्तथैव च ॥ २७ ॥

नृयज्ञो ब्रह्मयज्ञश्च पञ्च यज्ञाः प्रकीर्तिताः ।
कुर्यादितान्पञ्चयज्ञान्प्रत्यहं सुसमाहितः ॥ २८ ॥

देवार्चनं ततः कुर्याद्वैश्वदेवं यथाविधि ।
आयान्तमतिथिं सम्यग्गन्धाद्यैश्च प्रपूजयेत् ॥ २९ ॥

वक्तव्या मधुरा वाणी गृहमभ्यागतेऽतिथौ ।
जलान्नकन्दमूलैर्वा गृहदानेन वार्चयेत् ॥ ३० ॥

गृहात्प्रतिनिवर्तेत यतश्चेन्नार्चितोऽतिथिः ।
स तस्मै दुष्कृतं दत्वा पुण्यमादायगच्छति ॥ ३१ ॥

अज्ञातगोत्रनामानमन्यग्रामादुपागतम् ।
विपश्चितोऽतिथिं प्राहुस्तं शम्भुमिव पूजयेत् ॥ ३२ ॥

औपासनं च होतव्यं सायं प्रातर्द्विजातिभिः ।
अयनेविषुवे चैव युगादिषु चतुर्ष्वपि ॥ ३३ ॥

दर्शे चापरपक्षे च श्राद्धं कुर्याद्गृही द्विजः ।
नवधान्ये समायाते गृही श्राद्धं समाचरेत् ॥ ३४ ॥

मन्वादिषु मृताहे च संक्रान्तावष्टकासु च ।
श्रोत्रिये गृहमायाते ग्रहणे चन्द्रसूर्ययोः ॥ ३५ ॥

पुण्यक्षेत्रेषु तीर्थेषु गृही श्राद्धं समाचरेत् ।
वासरेष्वनिषिद्धेषु संविशेदार्तवे स्त्रियम् ॥ ३६ ॥

पुत्रानुत्पाद्य च ऋणं पितृणामपि निर्हरेत् ।
अष्टम्यां चैव संक्रान्तौ व्यतीपाते च पर्वसु ॥ ३७ ॥

वैधृतौ तु चतुर्दश्यामेकादश्यां दिनत्रये ।
एतेषु दिवसेष्वेव न गच्छेदृतुषु स्त्रियम् ॥ ३८ ॥

यदि गच्छेत्स पापी स्यान्मोहद्वा रौरवं व्रजेत् ।
प्रातर्मध्यन्दिने चैव गृहस्थस्स्नानमाचरेत् ॥ ३९ ॥

भृत्यमित्रादिसंयुक्तस्ततो भुञ्जीत वाग्यतः ।
रात्रावपि यथाशक्त्या शयनासनभोजनैः ॥ ४० ॥

कन्दमूलफलैर्वापि यजेदतिथिमागतम् ।
ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ॥ ४१ ॥

सत्यामृताभ्यामपि वा न श्ववृत्त्या कथंचन ।
ऋतमुञ्छशिलं प्रोक्तममृतंस्या दयाचितम् ॥ ४२ ॥

मृतं तु याचितं प्रोक्तं प्रमृतं कृषिरुच्यते ।
सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनम् ॥ ४३ ॥

वृत्तिष्वेतासु महितामेकां वृत्तिमुपाश्रयेत् ।
अग्निष्टोमादिकान्यज्ञान्यथाशक्ति समाचरेत् ॥ ४४ ॥

एवमादि सदाचारा गृहस्थानामुदीरिताः ।
गृही चतुर्विधस्त्वेष प्रथमो वार्तवृत्तिकः ॥ ४५ ॥

यायावरश्च स्वाधीनवृत्तिर्मौनीतिभेदतः ।
दूषितां स्वतनुं दृष्ट्वा पलिताद्यैस्ततः परम् ॥ ४६ ॥

पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ।
भवेत्रिषवणस्नायी नखश्मश्रुजटाधरः ॥ ४७ ॥

अधश्शायी ब्रह्मचारी पञ्चयज्ञपरायणः ।
फलमूलाशनो नित्यं स्वाध्यायनिरतस्सदा ॥ ४८ ॥

वर्जयेद्ग्रामजातानि पुष्पाणि च फलानि च ।
भुञ्जीत षोडश ग्रासान्न कुर्याद्रात्रि भोजनम् ॥ ४९ ॥

अभ्यंगं वन्यतैलेन वानप्रस्थस्समाचरेत् ।
व्यवायं वर्जयेच्चैव निद्रालस्यं च वर्जयेत् ॥ ५० ॥

वानप्रस्थः प्रकुर्वीत तपश्चान्द्रायणादिकम् ।
सहेत शीतवातादि वह्निं परिचरेत्सदा ॥ ५१ ॥

आरण्यकैः पदार्थैस्तु जीविकां समुपाश्रयेत् ।
वानप्रस्थश्चतुर्धास्यादाद्य औदुम्बरो भवेत् ॥ ५२ ॥

वैवासकोऽथ प्रक्षाली पौर्णिमश्चेति भेदतः ।
वनस्थधर्म इत्युक्तो यतीनामथ कथ्यते ॥ ५३ ॥

यदा मनसि वैराग्यं जातं सर्वेषु वस्तुषु ।
तदैव सन्यसेद्विद्वानन्यथा पतितो भवेत् ॥ ५४ ॥

तीर्थाश्रमवनारण्यगिरिपर्वतसागराः ।
सरस्वती भारती च पुरी नामानि वै दश ॥ ५५ ॥

एतानि यतिनामानि तेषामेकं समुद्वहन् ।
वेदान्ताभ्यासनिरतश्शान्तो दान्तो जितेन्द्रियः ॥ ५६ ॥

शमादिगुणसंयुक्तः कामक्रोधविवर्जितः ।
नग्नो वा जीर्णकौपीनो भवेन्मुण्डी यतिर्द्विजः ॥ ५७ ॥

समश्शत्रौ च मित्रे च तथा मानावमानयोः ।
एकरात्रं वसेद्ग्रामे त्रिरात्रं नगरे वसन् ॥ ५८ ॥

भैक्षेण वर्तयेन्नित्यं नैकान्नाशी भवेद्यतिः ।
अनिन्दितद्विजगृहे व्यंगारे भुक्तवर्जिते ॥ ५९ ॥

विवादरहिते चैव भिक्षार्थं पर्यटेद्यतिः ।
भवेत्त्रिषवणस्नायी देवपूजापरायणः ॥ ६० ॥

जपेच्च प्रणवं नित्यं यतात्मा नियतेन्द्रियः ।
आत्मानं चिन्तयेच्चैव नीलग्रीवं जटाधरम् ॥ ६१ ॥
अव्ययं परिपूर्णं च सदानन्दैकविग्रहम् ।
पठेदुपनिषद्वाक्यं वेदान्तार्थं विचिन्तयेत् ॥ ६२ ॥
परध्यानपरोयस्तु यतिर्विगतमत्सरः ।
सयाति परमानन्दं परं ज्योतिस्सनातनम् ॥ ६३ ॥
कुटीचको बहूदश्च हंसः परमहंसकः ।
इति सन्यासिनां भेदाश्चतुर्धा परिकीर्त्तिताः ॥ ६४ ॥
जरयावाऽऽमयाद्यैर्वा संयुक्तो विकलश्चवा ।
कुटिं कृत्वा गृहाभ्याशे वसेद्यस्स कुटीचकः ॥ ६५ ॥
प्रातः प्राह्णे च मध्याह्ने सायाह्ने चा पराह्णके ।
व्रतिवत्स्नाति यो भिक्षुस्सर्वदा स बहूदकः ॥ ६६ ॥
येन केन चिदाच्छन्नो येन केन च वृत्तिमान् ।
यत्र क्वचन शायीच ज्ञानहंसस्स वै स्मृतः ॥ ६७ ॥
बहिस्सूत्रविनिर्मुक्ता अन्तस्सूत्रपरायणाः ।
अशिखादण्डिनस्त्वन्तास्स्मृताः परमहंसकाः ॥ ६८ ॥
कुटीचकश्च सन्यस्य स्वस्थे सद्मनि नित्यशः ।
भिक्षामादाय भुंजीत स्वबन्धूनां गृहेऽथ वा ॥ ६९ ॥
शिखायज्ञोपवीती स्यात्त्रिदण्डस्सकमण्डलुः ।
बहूदकश्च सन्यस्य बन्धुपुत्रादिवर्जितः ॥ ७० ॥
सप्तागारं चरेद्भैक्षमेकान्नं तु परित्यजेत् ।
गोवालरज्जुसम्बद्धत्रिदण्डं शिक्यमुद्धरेत् ॥ ७१ ॥
जलपात्रं पवित्रं च खनित्रं च कृपाणिकाम् ।
शिखां यज्ञोपवीतं च देवताराधनं चरेत् ॥ ७२ ॥
हंसः कमण्डलुं शिक्यं भिक्षापात्रं तथैवच ।
कन्थां कौपीनमाच्छाद्यमंगवस्त्रं बहिः पटम् ॥ ७३ ॥
एकन्तु वैणवं दण्डं धारयेत्परहंसकः ।
परहंसस्त्रिदण्डं च रज्जुं गोवालनिर्मिताम् ॥ ७४ ॥
शिखां यज्ञोपवीतं च नित्यकर्म च संत्यजेत् ।
मुख्यस्तेषां यतिर्योऽसौ ज्ञाननिष्ठस्सुनिस्पृहः ॥ ७५ ॥
द्वितीयस्सत्वनिष्ठश्च तृतीयश्श्रवणस्पृहः ।
चतुर्थो मन्त्रनिष्ठस्स्यात्पञ्चमोनोपपद्यते ॥ ७६ ॥
चतुर्णामपि वर्णानामाश्रमाणां च सर्वदा ।
निष्ठा चतुष्टयं चैतत्प्रायेण न निषिध्यते ॥ ७७ ॥
लिंगनिष्ठातु कर्तव्या लोकसंग्रहकारणात् ।
विज्ञातृज्ञेययोर्यस्तु योगं परमहंसकः ॥ ७८ ॥
सुविजानाति तत्त्वेन लिंगनिष्ठस्स वै भवेत् ।
निष्ठासु तत्परो योगी हंसो वा परमोऽपिवा ॥ ७९ ॥
ज्ञातृविज्ञेययोरैक्यामविजानन् द्विजोत्तम! ।
नत्यजेदात्मनस्सूत्रं बाह्यं ब्रह्मविनिर्मितम् ॥ ८० ॥
सिसृक्षुरेक एवाग्रे समासीनश्शिवस्स्वयम् ।
सृष्ट्वा गुणमयीं मायां सूत्ररूपामिवाकरोत् ॥ ८१ ॥
तया तदात्मकं विष्णुं सृष्ट्वा पालं दिवौकसाम् ।
स्वयं ब्रह्मा भवद्रुद्रो रुद्रश्चास्य क्षयाय सः ॥ ८२ ॥
यज्ञात्मकेन हरिणा ब्रह्मात्मनि शिवेऽव्यये ।
तत्सूत्रमुपवीतत्वाद्ब्रह्मसूत्रमिति स्मृतम् ॥ ८३ ॥
यज्ञेन चोपवीतत्वाद्यज्ञसूत्रं विदुर्बुधाः ।
तदाज्ञयोपवीतत्वाद्ब्रह्मणो ब्रह्मसूत्रकम् ॥ ८४ ॥
तावल्लोकास्त्रयो वेदास्त्रयो देवास्त्रयोऽग्नयः ।
शिवसृष्टास्त्रयो वर्णास्त्रिवृत्सूत्रं समाश्रयेत् ॥ ८५ ॥
तद्ग्रन्थिमाश्रितस्तारस्त्रिमात्रो नादसंयुतः ।
तद्ग्रन्थ्यग्रं च सावित्री वेदमाता शिवाज्ञया ॥ ८६ ॥
एवं द्वादश दैवत्यं ब्रह्मसूत्रं द्विजन्मनाम् ।
त्यक्तैषणत्रयो योगी ह्यात्मानात्मविवेकवान् ॥ ८७ ॥
त्यजेन्मायात्मकं सूत्रं निर्मायः कर्मवर्जितः ।
इति कर्तव्यता लोके ब्रह्मसूत्रधृतो भवेत् ॥ ८८ ॥
तस्य द्वन्द्वेषु सक्तिस्स्यात्संगो बन्धावहस्स्मृतः ।
तस्मात्संगविनिर्मुक्त्यै कार्याकार्यविवेकिना ॥ ८९ ॥
निराशिषा निस्पृहेण त्याज्यं सूत्रं विजानता ।
त्यक्तान्यथा चेत्पतति नरके शाश्वतीस्समाः ॥ ९० ॥
यत्नेनोपनिषन्मात्रं पठेन्नैव विवादयेन् ।
वेदान्तान्छ्रावयेच्छिष्यान्दान्तान्संगविवर्जितः ॥ ९१ ॥
सदाचारांश्च संपृष्टो वदेन्नान्यत्कदाचन ।
वर्जयेदर्थशास्त्रादि लौकिकांश्च प्रयत्नतः ॥ ९२ ॥
चतुर्थकाल आपन्ने भिक्षार्थं पर्यटेद्यतिः ।
तृणाम्बुफलभभक्षो वा पर्णमूलपयोशनः ॥ ९३ ॥
एतेषामेकतो यत्र वर्तते यतिरुत्तमः ।
अथवा करपात्रेण गोमुखेन विशेषतः ॥ ९४ ॥
करपात्रे गृहान् सप्त पर्यटेन्मौनतो यतिः ।
प्रथमं गृहमागत्य नारायणमनुस्मरेत् ॥ ९५ ॥
भिक्षां प्रगृह्य हस्तेन प्रणवेन जलं क्षिपेत् ।
मौनेन भिक्षां प्राश्नीयात्करं न क्षालयेत्तथा ॥ ९६ ॥

गृहमन्यत्समागम्य पूर्ववत्तत्र कारयेत् ।
सप्तमेऽवसथे भिक्षुस्तथैव तु समाचरेत् ॥ ९७ ॥
हस्तप्रक्षालनादीनि तत्रैव तु समापयेत् ।
करकं वैणवं पात्रमलावुं नालिकेरजम् ॥ ९८ ॥
धारयेन्नित्यकर्मार्हं यतिस्सर्वत्र सिद्धिदम् ।
एतेषामप्यभावे तु दारुपात्रं तु धारयेत ॥ ९९ ॥
विरक्तस्य यतेर्भूप! न दण्डो न कमण्डलुः ।
न देवतार्चनं तत्र ध्यानमेकं विशिष्यते ॥ १०० ॥
सहस्रतन्तुभिः प्रोता कन्था शीतनिवारिणी ।
शय्याजिनं वा भूमिर्वा व्याघ्रचर्म विशिष्यते ॥ १०१ ॥
एवमाद्या यतेर्धर्मास्समासेन प्रकीर्तिताः ।
इत्येवमाश्रमाचारान्यः करोति द्विजः क्रमात् ।
स याति परमं स्थानं यत्र गत्वा न शोचति ॥ १०२ ॥

इति श्री शिवतत्वरत्नाकरे चतुर्थकल्लोले
गृहस्थवानप्रस्थसन्यासिधर्मवर्णनं नाम पञ्चमस्तरङ्गः

अथ षष्ठस्तरंगः

वर्णानामाश्रमाणां च सदाचाराः पृथक् पृथक् ।
विशेषतस्समुद्दिष्टा अथ साधारणांस्तु तान् ॥ १ ॥
[1]आचाराणां समस्तानां वर्णयामि सुधीः! शृणु ।
ब्राह्मे मुहूर्त उत्थाय पुरुषार्थाविरोधिनीम् ॥ २ ॥
वृत्तिं संचिन्तयेद्विप्रः कृतकेशप्रसादनः ।
दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ॥ ३ ॥
कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ।
शिरः प्रावृत्य वस्त्रेण महीमाच्छाद्य च तृणैः ॥ ४ ॥
वहन् काष्ठं करेणैकं तावन्मौनी भवेत् द्विजः ।
पथि गोष्ठे नदीतीरे तटाके कूपसन्निधौ ॥ ५ ॥
तथा च वृक्षच्छायायां कान्तारे वह्निसन्निधौ ।
देवालये तथोद्याने कृषिभूमौ चतुष्पथे ॥ ६ ॥
ब्राह्मणानां समीपे च तथा गोगुरुयोषिताम् ।
तुषांगारकपालेषु जलमध्ये तथैव च ॥ ७ ॥
एवमादिषु देशेषु मलमूत्रे न कारयेत् ।
शौचे यत्नस्सदा कार्यश्शौचमूलो द्विजस्स्मृतः ॥ ८ ॥
शौचाचारविहीनस्य समस्तं कर्म निष्फलम् ।
शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा ॥ ९ ॥
मृज्जलाभ्यां बहिश्शुद्धिर्भावशुद्धिस्तथान्तरम् ।
गृहीतशिश्न उत्थाय शौचार्थं मृदमाहरेत् ॥ १० ॥
(गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः ।
अनुच्छिष्टप्रदेशेषु शौचर्थं मृदमाहरेत्)
न मूषकादिखनितां हलोत्कृष्टां तथैव च
वापीकूपतटाकेषु नाहरेद्ब्राह्ममृत्तिकाम् ॥ ११ ॥
शौचं कुर्यात्प्रयत्नेन चादायान्तर्जले मृदम् ।
लिंगे मृदेका दातव्या तिस्रो वामे उभे द्वयो ॥ १२ ॥
अपाने पंच वामे तु दश सप्त तथोभयोः ।
तिस्रस्तिस्रः प्रदातव्याः पादयोर्मृत्तिकाः क्रमात् ॥ १३ ॥
एवं शौचं प्रकुर्वीत गन्धलेपापनुत्तये ।
एतच्छौचं ग्रहस्थानां द्विगुणं ब्रह्मचारिणाम् ॥ १४ ॥
त्रिगुणं तु वनस्थनां यतीनां तु चतुर्गुणम् ।
व्रतस्थानां च सर्वेषां यतिवच्छौचमिष्यते ॥ १५ ॥
एवं शौचं विनिर्वर्त्य पश्चाद्वै सुसमाहितः ।
उदङ्मुखः प्राङ्मुखो वा आचामेत्प्रयतेन्द्रियः ॥ १६ ॥
ततः स्नानं प्रकुर्वीत मार्जनं जलतर्पणम् ।
ततस्सन्ध्यामुपासीत गायत्र्यार्घ्यं रवेः क्षिपेत् ॥ १७ ॥

[1]) आचारानाश्रमस्थानां.

गायत्रीं च जपेत्प्रातस्तिष्ठन्नासूर्यदर्शनात् ।
तथैव सायमासीनो जपेदा ऋक्षदर्शनात् ॥ १८ ॥
उपास्य सन्ध्यां मध्याह्ने क्षिपेदर्घ्यं च पूर्ववत् ।
ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत् ॥ १९ ॥
वानप्रस्थो यतिश्चैव सहस्रादाधिकं जपेत् ।
प्रातर्मध्याह्नयोस्स्नानं वानप्रस्थगृहस्थयोः ॥ २० ॥
यतेस्त्रिषवणस्नानं सकृत्तु ब्रह्मचारिणः ।
नोपास्ते यो द्विजस्सन्ध्यां धूर्तो मर्त्यो ह्यनापदि ॥ २१ ॥
पाषण्डस्सहि विज्ञेयस्सर्वकर्मबहिष्कृतः ।
यदीच्छेत्सर्वपापानि हन्तुं निरवशेषतः ॥ २२ ॥
मौनेनान्नं समश्नीयादगस्त्याशाशिरास्स्वपेत् ।
द्विजो नाभोज्यमश्नीयात्पात्रं नैव परित्यजेत् ॥ २३ ॥
संस्थाप्यचासने पादौ वस्त्रार्धं परिधायवा ।
मुखेन धमितं भुक्त्वा सुरापीत्युच्यते बुधैः ॥ २४ ॥
खादितार्धं पुनः खादेन्मोदकानि फलानि वा ।
प्रत्यक्षलवणाशीतु गोमांसाशी निगद्यते ॥ २५ ॥
पीनायं पायसं भैक्षं घृतं लवणमेव च ।
हस्तदत्तं तु यो भुङ्क्ते तुल्यं गोमांसभक्षणात् ॥ २६ ॥
सूपे वा परमान्ने वा घृतपात्रं यदि क्षिपेत् ।
तद्घृतं सुरया तुल्यं तदन्नं मांसवद्भवेत् ॥ २७ ॥
आपोशने चाचमने पेयद्रव्येषु च द्विजः ।
शब्दं न कारयेद्विद्वान् कुर्याच्चेन्नारकी भवेत् ॥ २८ ॥
पथ्यं हृद्यं च भुञ्जीत वाग्यतोऽन्नमकुत्सयन् ।
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ॥ २९ ॥
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्त उदङ्मुखः ।
पूजयेदशनं नित्यमद्याच्चैदमकुत्सयन् ॥ ३० ॥
पूजितं त्वशनं नित्यं बलमूर्जं प्रयच्छति ।
न चैवात्यशनं कुर्यादस्वर्ग्यं रोगसाधनम् ॥ ३१ ॥
अलाबुं वर्तुलाकारं वृन्ताकं कुन्दसन्निभम् ।
प्राणान्तेऽपि च नाश्नीयान्मसूरान्नं तुषादिकम् ॥ ३२ ॥
वृन्ताकं च कलिंगं च बिल्वोदुम्बरभिस्सटाः ।
उदरे यस्य जीर्यन्ते तस्य दूर[1]तर शिवः ॥ ३३ ॥

1) गत.

अवत्सायाः पयो धेन्वा दशहाभ्यन्तरे च यत् ।
वत्सान्तरप्रस्नविन्याः क्रान्ताया वृषभेण च ॥ ३४ ॥
आविकं कारभं क्षीरमपेयं तद्विवर्जयेत् ।
उत्तरापोशनं कृत्वा पवित्रं तत्र संत्यजेत् ॥ ३५ ॥
कृत्वा द्वादश गण्डूषान् हस्तौ पादौ च मार्जयेत् ।
ततस्त्वाचम्य विप्रेन्द्रश्शास्त्रचिन्तापरो भवेत् ॥ ३६ ॥
सुपूगं च सुपर्णं च सुचूर्णेन समान्वितम् ।
प्रदाय द्विजदेवेभ्यस्ताम्बूलं चर्वयेद् बुधः ॥ ३७ ॥
अखण्डितं च क्रमुकमप्रक्षालितपर्णकम् ।
अशोधितं च यच्चूर्णं शक्रस्यापि श्रियं हरेत् ॥ ३८ ॥
परान्नं नैव भुञ्जीत परवादं च वर्जयेत् ।
पादेन नाक्रमेत्पादमुच्छिष्टं नैव लंघयेत् ॥ ३९ ॥
न संगताभ्यां पाणिभ्यां कण्डूयेतात्मनश्शिरः ।
पूज्यं देवालयं वापि नापसव्यं व्रजेद् द्विजः ॥ ४० ॥
देवार्चा च मनस्स्नानव्रतश्राद्धक्रियादिषु ।
न भवेन्मुक्त केशश्च नैकवस्त्रधरस्तथा ॥ ४१ ॥
सदोपवीतिना भाव्यं सदाबद्धशिखेन च ।
विशिखोऽनुपवीती च यत्करोति न तत्कृतम् ॥ ४२ ॥
केशश्मश्रुनखानां च वृद्धौ क्षौरं तु कारयेत् ।
चतुर्थी नवमी षष्ठी चतुर्दश्यष्टमी तथा ॥ ४३ ॥
अमावास्या च दैवज्ञैः क्षौरकर्मणि नेष्यते ।
सौमेज्य शुक्रसौम्येषु क्षेमारोग्यसुखप्रदः ॥ ४४ ॥
क्षौरं प्रोक्तं विपश्चिद्भिः मृगे पुष्ये पुनर्वसौ ।
ज्येष्ठाश्विनीकरद्वन्द्वरेवतीषु च शोभनम् ॥ ४५ ॥
क्षौरे राजाज्ञया जाते नक्षत्रं नैव शोधयेत् ।
क्षौरकर्मण्यपि स्नायाद्गालितैश्शुद्धवारिभिः ॥ ४६ ॥
अन्यस्त्रियं न गच्छेच्च पैशुन्यं परिवर्जयेत् ।
नापसव्यं व्रजेद्विप्रमश्वत्थं च चतुष्पथम् ॥ ४७ ॥
न वदेत्परपापानि स्वपुण्यं नैव कीर्तयेत् ।
न दुर्जनैस्सहवसेन्नाशास्त्रं शृणुयात्तथा ॥ ४८ ॥
आसनद्यूतगीतेषु द्विजस्तु न रतिं व्रजेत् ।
आर्द्रास्थि च तयोच्छिष्टं शूद्रं च पतितं तथा ॥ ४९ ॥

शूर्पं च भषकं स्पृष्ट्वा सचेलं स्नानमाचरेत् ।
दीपखट्वातनुच्छायां केशवस्त्रनखोदकम् ॥ ५० ॥
अजमार्जाररेणुश्च हन्ति पुण्यं पुराकृतम् ।
शूर्पवातं प्रेतधूमं तथा शूद्रान्नभोजनम् ॥ ५१ ॥
वृषलीपरिषङ्गं च दूरतः परिवर्जयेत् ।
नारीरजः खररजस्तथा सम्मार्जनीरजः ॥ ५२ ॥
वेश्यापादरजश्चैव हन्ति पुण्यं पुरा कृतम् ।
शिरोभ्यंगावशिष्टेन तैलेनांगं न लेपयेत् ॥ ५३ ॥
ताम्बूलमशुचिर्नाद्यात्तथा सुप्तं न बोधयेत् ।
नाशुद्धोऽग्निं परिचरेत्पूज्याश्च गुरुदेवताः ॥ ५४ ॥
न वामहस्तेनैकेन पिबेद्वक्त्रेण वा जलम् ।
नातिक्रमेद्गुरोश्छायां तदाज्ञां न मुनीश्वर! ॥ ५५ ॥
न निन्देद्योगिनो विप्रान् व्रतिनोऽपि यतींस्तथा ।
परस्परस्य मर्माणि न कदाचिद्वदेद्बुधः ॥ ५६ ॥
अभिवादनशीलस्स्याद्वृद्धेषु च यथाक्रमम् ।
ज्ञानवृद्धास्तपोवृद्धा वयोवृद्धा इतित्रयः ॥ ५७ ॥
आध्यात्मिकानि दुःखानि निवारयति यो गुरुः ।
वेदशास्त्रोपदेशेन तं पूर्वमभिवादयेत् ॥ ५८ ॥
असावहमिति ब्रूयाद्द्विजो वै ह्यभिवादने ।
नाभिवाद्याश्च विप्रेण क्षत्रियाद्याः कदाचन ॥ ५९ ॥
नास्तिकं भिन्नमर्यादं कृतघ्नं ग्रामयाजकम् ।
स्तेनं च कितवं चैव कदाचिन्नाभिवादयेत् ॥ ६० ॥
पाषण्डं पतितं व्रात्यं तथा नक्षत्रजीविनम् ।
उन्मत्तं च शठं धूर्तं धावन्तमशुचिं तथा ॥ ६१ ॥
अभ्यक्तशिरसं चैव जपन्तं नाभिवादयेत् ।
तथा स्नानं प्रकुर्वन्तं समित्पुष्पधरं तथा ॥ ६२ ॥
उदपात्रधरं चैव भुञ्जानं नाभिवादयेत् ।
विवादशीलिनं दण्ड्यं वमन्तं जलमध्यगम् ॥ ६३ ॥
भिक्षान्नधारिणं चैव शयानं नभिवादयेत् ।
भर्तृघ्नीं पुष्पिणीं जारां सूतिकां भगपालिनीम् ॥ ६४ ॥
कृतघ्नां च तथा चण्डीं कदाचिन्नाभिवादयेत् ।
सभायां यज्ञशालायां देवतायतनेषु च ॥ ६५ ॥
प्रत्येकं तु नमस्कारो हन्ति पुण्यं पुरा कृतम् ।
कृतेऽभिवादने यस्तु न कुर्यात्प्रतिवन्दनम् ॥ ६६ ॥
नाभिवाद्यस्स विज्ञेयो यथा शूद्रस्तथैव सः ।
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ॥ ६७ ॥
सर्वभूतदयालुत्वं षड्विधं धर्मशासनम् ।
स्नानं रजकतीर्थे च भोजनं गणिकागृहे ॥ ६८ ॥
नापितस्य गृहे क्षौरं हन्ति पुण्यं पुरा कृतम् ।
दीपपात्रस्थितं तैलं तथाभ्यंगावशिष्टकम् ॥ ६९ ॥
कुम्भस्थसलिलस्नानं हन्ति पुण्यं पुरा कृतम् ।
विप्राग्न्योर्विप्रयोश्चैव दम्पत्योर्गुरुशिष्ययोः ॥ ७० ॥
नन्दिशंकरयोश्चैव खरयोरजयोस्तथा ।
गमनं मध्यदेशेतु हन्ति पुण्यं पुरा कृतम् ॥ ७१ ॥
(यत्यन्नं यतिपात्रस्थं यतिभिः प्रेरितं तथा ।
दम्पत्योर्भुक्त शिष्टं च हन्ति पुण्यं पुराकृतम् ॥)
तोरणस्तम्भयोर्मध्ये उच्छिष्टद्वयमध्यतः ।
पापिनोर्मध्यभागे च न गन्तव्यं द्विजातिभिः ॥ ७२ ॥
दिवाकपित्थच्छायायां रात्रावश्वत्थबिम्बतः ।
अहोरात्रं करञ्जस्य न गन्तव्यं द्विजातिभिः ॥ ७३ ॥
वर्ज्यं पर्युषितं पुष्पं तथा पर्युषितं जलम् ।
अन्नं पर्युषितं वर्ज्यमशुद्धं सर्वदा नरैः ॥ ७४ ॥
अप्यशुद्धान्पदार्थांश्च शुद्धान्कृत्वोपयोजयेत् ।
तेषां शुद्धिप्रकारस्तु साम्प्रतं परिकीर्त्यते ॥ ७५ ॥
धनं दानेन शुद्धं स्याद्धान्यं ब्राह्मणभोजनात् ।
पृथ्वी शुद्धिर्वृष्टिकाले सूक्ष्मा भूः प्रोक्षणादिभिः ॥ ७६ ॥
प्रक्षालितानां भाण्डानां स्पृष्ट्वा त्यागो विधीयते ।
गुडोपदंशलवणैः पूरितानां खरादिभिः ॥ ७७ ॥
संस्पर्शे भोजनेऽन्यस्मिन्निक्षेपाच्छुद्धिरिष्यते ।
चण्डालरजकादीनामागमे गृहवर्तिनाम् ॥ ७८ ॥
भाण्डानां स्यात्परित्यागो न द्रव्याणां विसर्जनम् ।
मृत्स्वर्णतृणकाष्ठानां श्वास्थिचण्डालवायसैः ॥ ७९ ॥
स्पर्शने विहितं शौचं सोमसूर्यांशुमारुतैः ।
तैजसानां मणीनां च सर्पस्याश्ममयस्य च ॥ ८० ॥

गण्डूषपादशौचं यः कुर्यात्कांस्यस्य भाजने ।
षण्मासं भुवि निक्षिप्य पुनरंगारमादिशेत् ॥ ८१ ॥
लोहानां दहनाच्छुद्धिर्मृद्गोमयजलैरपि ।
व्रीहयः प्रोक्षणादद्भिश्शाकमूलफलानि च ॥ ८२ ॥
तन्मात्रस्यावहाराद्वा निस्तुषीकरणेन वा ।
गृहदाहे समुत्पन्ने दग्धे च पशुमानुषे ॥ ८३ ॥
अभोज्यस्तद्गतो व्रीहिर्धातुद्रव्यस्य संग्रहः ।
मृण्मयेनावबद्धानामधो भुवि च तिष्ठताम् ॥ ८४ ॥
यवमाष तिलादीनां न दोषो मनुरब्रवीत् ।
न च प्राणिवधो यत्र केवलं गृहदीपनम् ॥ ८५ ॥
तत्र द्रव्याणि सर्वाणि गृह्णीयादविचारयन् ।
निर्यासानां गुडानां च लवणानां तथैव च ॥ ८६ ॥
कुसुम्भकुंकुमानां च कार्पासोर्ण कयोस्तथा ।
सेकात्तु कथिता शुद्धिरित्याह भगवान्यमः ॥ ८७ ॥
और्ण कौशेय कुतप पट्टक्षौमदुकूलजाः ।
अल्पशौचा भवन्त्येते शोषण प्रोक्षणादिभिः ॥ ८८ ॥
तान्येवा शुद्धयुक्तानि क्षालयेच्छो धनैस्स्वकैः ।
धान्यकल्कैस्सुफलजै रसैः क्षारानुगैरपि ॥ ८९ ॥
शोषयित्वा नयेत् किंचित्करै रसम्मार्जयेन्मुहुः ।
पश्चाच्च वारिणा प्रोक्ष्य विनियुंञ्जीत कर्मणि ॥ ९० ॥
लवंगजीरकद्राक्षामरीचादिषु वस्तुषु ।
स्पृष्टेषु सत्सु पूर्वोक्तै श्शुद्धिस्स्यात्पलतः परम् ॥ ९१ ॥
शुण्ठीक्रमुकजातीनां हरिद्रावचयोस्तथा ।
उक्तस्पृष्टौ भवेच्छुद्धिरूर्ध्वं द्विपलमानतः ॥ ९२ ॥
जम्बीरमातुलुंगादि फलानां दशको शतः ।
अधिकं तु परिग्राह्यं ततो न्यूनं तु संत्यजेत् ॥ ९३ ॥
रामठौषधनिर्यासप्रभृतीनां विशेषतः ।
सुवर्णमानतोन्यूनं परित्याज्यं मनीषिभिः ॥ ९४ ॥
पूर्णचन्द्रोदयादीनां प्रोक्षणाच्छुद्धिरीरिता ।
नारायणादितैलानां शुद्धिः पात्रान्तरे धृतौ ॥ ९५ ॥
पटोलीकारवल्ल्यादिवृन्ताकप्रभृतिष्वपि ।
भारमात्रं परिग्राह्यं चण्डालैराहृतेष्वपि ॥ ९६ ॥
कीपथकदलीकेलीकण्टकादिफलेष्वपि ।
एकैकस्यापि न त्यागः पूर्वोक्तस्पर्शनेष्वपि ॥ ९७ ॥
सहस्रजनभोज्यान्नराशावन्त्येन वीक्षिते ।
तद्दृष्टांशं परित्यज्य प्रोक्षणात्तद्विशुध्यति ॥ ९८ ॥
पात्रमध्ये विनिक्षिप्ते केशादिपरिदूषिते ।
तावन्मात्रं समुद्धृत्य प्रोक्षयेद्भस्मवारिणा ॥ ९९ ॥
इति वर्णाश्रमाचारास्समासेन निरूपिताः ।
अन्त्याश्रमाभिधानोऽथ प्रोच्यते पञ्चमाश्रमः ॥ १०० ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
अतिवर्णाश्रमी चेति क्रमाच्छेष्ठा विचक्षण! ॥ १०१ ॥
गृहस्थोऽपि वनस्थस्य यतेः पर्यम्बुजेक्षण! ।
(वानप्रस्थाश्रमस्थोऽपि तथा सन्यासिनो हरे ।)
विद्योत्कर्षबलेनैव गुरुर्भवति नान्यथा ॥ १०२ ॥
अतिवर्णाश्रमी प्रोक्तो गुरुस्सर्वाधिकारिणाम् ।
न तस्यापि भवेच्छ्रेष्ठो यथाऽहं पुरुषोत्तम! ॥ १०३ ॥
अतिवर्णाश्रमी साक्षाद्गुरूणां गुरुरुच्यते ।
यस्य वर्णाश्रमाचारो गलितस्स्वात्मदर्शनात् ॥ १०४ ॥
सवर्णानाश्रमाचारानतीत्य स्वात्मनि स्थितः ।
सोऽतीत्य स्वाश्रमान्वर्णानात्मनैव स्थितः पुमान् ॥ १०५ ॥
योऽतिवर्णाश्रमी प्रोक्तस्सर्ववेदार्थवादिभिः ।
पञ्चाक्षरी परा विद्या शिवज्योतिरवाप्तये ॥ १०६ ॥
ओंकारः प्रणवस्सूक्ष्मो विद्यानां बीजमुत्तमम् ।
तस्मादशेषतत्त्वानि प्रणवेन विशोधयेत् ॥ १०७ ॥
यथा तद्गुणसंख्यानमात्मनं भावयेच्छिवम् ।
शिवीभूतशरीरेऽस्मिन् हंसेनात्मानमानयेत् ॥ १०८ ॥
शिवाग्निभस्ममन्त्रेण समाधाय विशोधयेत् ।
सितेनोद्धूलयेद्देहमाग्निरित्यादिसप्तभिः ॥ १०९ ॥
त्रियायुषं जगदग्नेरिति कुर्यात्त्रिपुण्ड्रकम् ॥ ११० ॥

शिरोललाटश्रुतिकंण्ठबाहु
नाभिप्रदेशेषु षडंगुलानि ।
विचिन्तयेत्स्वात्मति शंभुमीश-
शिवं परं शान्तमुमासहायम् ॥ १११ ॥

भस्मांगमाविष्कृतसर्वदीप्ति
मत्याश्रमाचारमिमं वदन्ति ॥ ११२ ॥

अत्याश्रमोऽयं सर्वेषु चतुर्ष्वप्याश्रमेषु च ।
यः पशुस्स पशुत्वं च व्रतेनानेन संत्यजेत् ॥ ११३ ॥

चिन्तयित्वा तु पूर्वोक्तं हृदयं पद्ममुत्तमम् ।
आत्मानमथ कर्तारं तत्रानलसमप्रभम् ॥ ११४ ॥

मध्ये वह्निशिखाकारं पुरुषं पञ्चविंशकम् ।
ओंकारबोधितं तत्त्वं शाश्वतं शिवमुच्युतम् ॥ ११५ ॥

अव्यक्तौ प्रकृतौ लीनं परं ज्योतिरनुत्तमम् ।
तदन्तः परमं तत्त्वमनाधारं निरञ्जनम् ॥ ११६ ॥

ध्यायीत तन्मयो नित्यमेकरूपं महेश्वरम् ।
विशोध्य सर्वतत्त्वानि प्रणवेनाथवा पुनः ॥ ११७ ॥

संस्थाप्य मयि चात्मानं निर्मले परमे पदे ।
प्लावयित्वाऽऽत्मनो देहं तेनै वज्ञानवारिणा ॥ ११८ ॥

महात्मा मन्मयो भस्म गृहीत्वा ह्यग्निहोत्रजम् ।
तेनोद्धूल्य च सर्वांगमाग्निरित्यादिमन्त्रतः ॥ ११९ ॥

चिन्तयेत्स्वात्मनीशानं परं ज्योतिस्स्वरूपिणम् ।
एष पाशुपतो योगः पशुपाशविमुक्तये ॥ १२० ॥

सर्ववेदान्तसारोऽयमत्याश्रम इति श्रुतिः ।
उद्धूलनं त्रिपुण्ड्रं च ज्ञानांगत्वेन सादरम् ॥ १२१ ॥

आमनन्ति मुनिश्रेष्ठा अथर्वशिरसि स्थितम् ।
व्रतं पाशुपतं यैस्तु सम्यगाचरितं बुधैः ॥ १२२ ॥

तेषां ज्ञानं हि जायेत तेन पाशविमोचनम् ।
उद्धूलनं त्रिपुण्ड्रं च ज्ञानांगत्वेन केवलम् ॥ १२३ ॥

आमनन्ति मुनिश्रेष्ठाश्श्वेताश्वतरशाखिनः ।
अयमत्याश्रमो धर्मो यैस्समाचरितो मुदा ॥ १२४ ॥

तेषामेव शिवज्ञानं संसारोच्छेदकारणम् ।
लिंगं शिवो भवेत्क्षेत्रमंगं संयोगमाश्रयः ॥ १२५ ॥

तस्माल् लिंगांगसंयुक्तो योऽपि सोऽत्याश्रमी भवेत् ।
एतद्वेदशिरोनिष्ठां प्राह पाशुपतं मुने! ॥ १२६ ॥

एतच्छिरोव्रतं प्राहुः केचिदत्याश्रमं बुधाः ।
केचित्तद्व्रतमित्याहुः केचिच्छाम्भवमैश्वरम् ॥ १२७ ॥

ब्रह्माण्डतो निर्गमनाम्युपायो
नास्त्येव शास्त्रेष्वखिलेषु भूप!
व्रतेन वा पाशुपतेन मुक्ति-
र्मृतेन काश्यामपि वाऽऽप्यते सा ॥ १२८ ॥

नान्याश्रमेष्वस्ति विशिष्टमुक्तिः
शैवेऽस्ति मुक्तिः परमा परेषाम् ।
मूढात्मनां मुक्तितया मतानां
सन्यासयोगादि समाश्रितानाम् ॥ १२९ ॥

उपवीतिसहस्राच्च वेदाध्यायी विशिष्यते ।
वेदाध्यायिसहस्राच्च साग्निकस्तु विशिष्यते ॥ १३० ॥

साग्निकानां सहस्रेभ्यो यज्ञयाजी विशिष्यते ।
यज्ञयाजिसहस्रेभ्यस्सोमयाजी विशिष्यते ॥ १३१ ॥

सोमयाजिसहस्रेभ्यस्सत्रयाजी विशिष्यते ।
सत्रयाजिसहस्रेभ्यस्सर्वविद्यार्थपारगः ॥ १३२ ॥

सर्वविद्यार्थवित्कोट्याश्शिवभक्तो विशिष्यते ।
तस्मात्पूज्या नमस्कार्या वर्णाश्रमपरायणैः ॥ १३३ ॥

वर्णाश्रमानतिक्रान्ताश्शिवभक्तिपरायणाः ।
एतेषु शिवभक्तिश्च रुद्राक्षाणां च धारणम् ॥ १३४ ॥

भस्मनोद्धूलनं चापि त्रिपुण्ड्रस्यापि धारणम् ।
पञ्चाक्षरी जपो नित्यं शिवस्याराधनं तथा ॥ १३५ ॥

ध्यानं च शांकरं सत्यं येषु तेऽत्युत्तमास्स्मृताः ।
एवमत्याश्रमः प्रोक्तस्सर्वेषामुत्तमोत्तमः ॥ १३६ ॥

एवं वर्णाश्रमार्हाणां धर्मानामननुष्ठितौ ।
निषिद्धानामनुष्ठानात्प्रायश्चित्ती भवेन्नरः ॥ १३७ ॥

इति श्रीशिवतत्त्वरत्नाकरे चतुर्थकल्लोले **वर्णाश्रमसाधारण धर्मात्याश्रमस्वरूपनिरूपणं** नाम षष्ठस्तरंगः

अथ सप्तमस्तरंगः

वर्णाश्रमामांस्तदाचारन् श्रुत्वा श्रीमदुदीरितान् ।
ज्ञातार्थोऽस्मि गुरो! श्रोतुमन्यदस्ति कुतूहलम् ॥ १ ॥

विहितस्यानुष्ठाने निषिद्धकरणेषु च ।
प्रायश्चित्तार्हता नृणामिति श्रीमद्भिरीरितम् ॥ २ ॥

कस्य वा कर्मण: किं वा प्रायश्चित्तमिति स्मृतम् ।
एतन्मह्यं समाख्याहि गुरो! मयि कृपावशात् ॥ ३ ॥

प्रायश्चित्तमिमं वक्ष्ये पापानामधुना शृणु ।
ब्रह्महा च सुरापी च स्तेयी च गुरुतल्पगः ॥ ४ ॥

महापातकिनस्त्वेते तत्संयोगी च पञ्चमः ।
यस्तु संवत्सरं त्वेतैश्शयनासनभोजनैः ॥ ५ ॥

संवसेत्सह तं विद्यात्पतितं सर्वकर्मसु ।
अज्ञानाद्ब्राह्मणं हत्वा चीरवासा जटी भवेत् ॥ ६ ॥

तस्यैव हतविप्रस्य कपालमपिधारयेत् ।
तदभावे मुनिश्रेष्ठ! कपालं चान्यदेव वा ॥ ७ ॥

तद्द्रव्यं ध्वजदण्डे तु धृत्वा वनचरो भवेत् ।
वन्याहारो भवेन्नित्यमेकवारं मिताशनः ॥ ८ ॥

सम्यक्सन्ध्यामुपासीत त्रिकालं स्नानमाचरेत् ।
स्वाध्यायाध्यापनादीनि वर्जयेत्संस्मरेद्धरिम् ॥ ९ ॥

ब्रह्मचारी भवेन्नित्यं गन्धमाल्यादि वर्जयेत् ।
यदि वन्यैर्न जीवेत ग्रामे भिक्षां समाचरेत् । ॥ १० ॥

शरावपात्रधारीस्याद् द्वारिस्थो विष्णुतत्परः ।
वदेच्च ब्रह्महास्मीति सप्तागाराणि पर्यटेत् ॥ ११ ॥

द्वादशाब्दव्रतं कुर्यादिवं हरिपरायणः ।
ब्रह्महा शुद्धिमाप्नोति कर्मार्हश्चैव जायते ॥ १२ ॥

व्रतमध्ये मृगैर्वापि चोरैर्वापि निपातितः ।
गोनिमित्तं द्विजार्थं व्रा प्राणान्वापि परित्यजेत् ॥ १३ ॥

यद्वादद्याद् द्विजेन्द्रेभ्यो गवामयुतमुत्तमम् ।
एतेष्वन्यतमं कृत्वा ब्रह्महा शुद्धि माप्नुयात् ॥ १४ ॥

दीक्षितं ब्राह्मणं हत्वा द्विगुणं व्रतमाचरेत् ।
दीक्षितं क्षत्रियं हत्वा चरेद् ब्रह्महणो व्रतम् ॥ १५ ॥

आचार्यादिवधे चैव व्रतमुक्तं चतुर्गुणम् ।
हत्वा तु विप्रमात्रं तु चरेत्संवत्सरं व्रतम ॥ १६ ॥

एष विप्रस्य कथितः प्रायश्चित्तविधिर्द्विज! ।
द्विगुणं क्षत्रियस्योक्तं त्रिगुणं तु विशस्स्मृतम् ॥ १७ ॥

ब्राह्मणं हन्ति यश्शूद्रस्तं मौसल्यं विदुर्बुधाः ।
राज्ञैव शिक्षा कर्तव्या शास्त्रेष्वेवं विनिश्चितम् । ॥ १८ ॥

ब्राह्मणीनां वधेत्वर्धं पादस्स्यात्कन्यकावधे ।
वधेत्वनुपानीतानां तथा पादव्रतं चरेत् ॥ १९ ॥

हत्वा तु क्षत्रियं विप्रष्षडब्दं [1]) व्रतमाचरेत् ।
संतत्सरत्रयं वैश्यं शूद्रं हत्वा तु वत्सरं ॥ २० ॥

दीक्षीतस्य स्त्रियं हत्वा ब्राह्मणीं चाष्टवत्सरम् ।
ब्रह्महत्याव्रतं कृत्वा शुद्धोभवति निश्चितम् ॥ २१ ॥

वृद्धातुरस्त्रीबालानामर्धमुक्तं मनीषिभिः ।
गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ॥ २२ ॥

चातुर्वर्ण्यैरपेया स्यात्तथा स्त्रीभिश्च पाण्डिताः ।
क्षीरं घृतं वा गोमूत्रमेतेष्वन्यतमं द्विजाः ॥ २३ ॥

स्नात्वार्द्रवासा नियतो नारायणमनुस्मरन् ।
पक्वाग्निसन्निभं कृत्वा पिबेच्च कुडुवं ततः ॥ २४ ॥

ताम्रलोहेन पात्रेण ह्मायसेनैव वा पिबेत् ।
ताम्रेण वाथ पात्रेण तत्पीत्वा मरणं व्रजेत् ॥ २५ ॥

सुरापी शुद्धिमाप्नोति नान्यथा शुद्धिरिष्यते ।
अज्ञानाच्चलबुद्ध्या तु सुरां पीत्वा द्विजश्चरेत् ॥ २६ ॥

ब्रह्महत्याव्रतं सम्यक्तच्चिह्नपरिवर्जितम् ।
यदि रोगनिवृत्यर्थं मौषधार्थं सुरां पिबेत् ॥ २७ ॥

तस्योपनयनं भूयस्तथा चान्द्रायणद्वयम् ।
सुरासंस्पृष्टमन्नं वा सुराभाण्डोदकं तथा ॥ २८ ॥

सुरापानसमं प्राहुस्तया चार्दस्य भक्षणम् ।
तालं च पानसं चैव द्राक्षाखर्जूरसम्भवम् ॥ २९ ॥

माधुकं शैलमारिष्टमैरेयं नारिकेळजम् ।
गौडी माध्वी सुरा मद्यमेवमेकादश स्मृतम् ॥ ३० ॥

एतेष्वन्यतमं विप्रो न पिबेद्वै कदाचन ।
समक्षं वा परोक्षं वा बलाच्चौर्येण वा तथा ॥ ३१ ॥

1) कृच्छ्र.

परस्वानामुपादानं स्तेयमित्युच्यते बुधैः ।
सुवर्णस्य प्रमाणं तु मन्वाद्यैरभि भाषितम् ॥ ३२ ॥

वक्ष्ये श्रुणुध्वं विप्रेन्द्राः! प्रायश्चित्तोक्तसाधतम् ।
गवाक्षगतमार्तण्डरश्मिमध्ये प्रदृश्यते ॥ ३३ ॥

त्रसरेणुप्रमाणं तु रज इत्युच्यते बुधैः ।
त्रसरेण्वष्टकं लीक्षा तत्त्रयं राजसर्षपम् ॥ ३४ ॥

तद्गौरसर्षपत्रिकं तत्षट्कं यव उच्यते ।
यवत्रयं कृष्णलस्स्यान्मषस्स्यात्तस्य पञ्चकम् ॥ ३५ ॥

माषष्षोडशमानं स्यात् सुवर्णमिति कथ्यते ।
(हृत्वा ब्रह्मस्वमज्ञानाद् द्वादशाब्दं तु पूर्ववत्)
कपालध्वजहीनं तु ब्रह्महत्याव्रतं चरेत् ॥ ३६ ॥

गुरूणां यज्ञकर्तॄणां धर्मिष्ठानां तथैव च ।
श्रोत्रियाणां द्विजानां तु हृत्वा हेमादिकं नरः ॥ २७ ॥

कृतात्मदेहो देहे च संपूर्णं लेपयेद् घृतम् ।
करीषच्छादितो दग्धः स्तेयपापाद्विमुच्यते ॥ ३८ ॥

ब्रह्मस्वं क्षत्रियो हृत्वा वाजिमेधेन शुद्ध्यति ।
आत्मतुल्यसुवर्णं वा दद्याद्वा गोसवं चरेत् ॥ ३९ ॥

ब्रह्मस्वं यस्तु हृत्वा तु पश्चात्तप्तः पुनर्दिशेत् ।
तप्तसान्तपनं कृत्वा द्वादशाहोपवासतः ॥ ४० ॥

शुद्धिमाप्नोति विप्रेन्द्र! ह्यन्यथा पतितो भवेत् ।
रत्नासनमनुष्यस्त्रीधेनुभूम्यादिकेषु च ॥ ४१ ॥

सुवर्णसदृशेष्वेषु प्रायश्चित्तार्धमुच्यते ।
त्रसरेणुसमं हेम हृत्वा कुर्यात्समाहितः ॥ ४२ ॥

प्राणायामद्वयं सम्यक्तेन शुध्यति सत्तमाः! ।
प्राणायामत्रयं कुर्याद् धृत्वा लीक्षाप्रमाणकम् ॥ ४३ ॥

प्राणायामांश्च चतुरो राजसर्षपमात्रतः ।
गौरसर्षपमानं तु हृत्वा हेम विचक्षणैः ॥ ४४ ॥

स्नात्वा च विधिवत्कार्यं गायत्र्यष्टसहस्रकम् ।
यवमानसुवर्णस्य स्तेये मुनिवरोत्तमाः ॥ ४५ ॥

(आसायं प्रातरारभ्य गायत्रीं वेदमातरम् ।
हेमकृष्णलमानं तु हृत्वा सान्तपनं चरेत् ॥
माषप्रमाणहेम्नस्तु प्रायश्चित्तं प्रकथ्यते ।
किंचिन्न्यूनसुवर्णस्य स्तेये मुनिवरोत्तमाः)
गोमूत्रपक्वयवभुगब्देनैकेन शुध्यति ।
संपूर्णस्य सुवर्णस्य स्तेयं कृत्वा मुनीश्वराः! ॥ ४६ ॥

ब्रह्महत्याव्रतं तत्र द्वादशाब्दं समाचरेत् ।
सुवर्णमानान्न्यूने तु रजतस्तेयकर्मणि ॥ ४७ ॥

कुर्यात्सान्तपनं सम्यगथ चान्द्रायणद्वयम् ।
शतादूर्ध्वं सहस्रान्ते प्रोक्तं चान्द्रायणाष्टकम् ॥ ४८ ॥

सहस्रादधिकस्तेये ब्रह्महत्याव्रतं चरेत् ।
कांस्यपित्तलमुख्येषु कान्तसीसादिके तथा ॥ ४९ ॥

सहस्रनिष्कमाने तु पराकं परिकीर्तितम् ।
प्रायश्चित्तं तु रत्नानां स्तेये रजतवत्स्मृतम् ॥ ५० ॥

गुरुतल्पगतानां तु प्रायश्चित्तं प्रचक्ष्यते ।
अज्ञानान्मातरं [1]हृत्वा सपत्नीं मथवापि च ॥ ५१ ॥

स्वयमेव स्वमुष्कंतु छिन्द्यात्पापमुदाहरन् ।
हस्ते गृहीत्वा तन्मुष्कं स गच्छेन्नैरृतीं दिशम् ॥ ५२ ॥

गच्छन्नेवाग्रतस्संस्थं कदाचिन्न विचारयेत् ।
अपश्यन्पृष्ठतो गच्छेत्प्राणान्तमनुशुध्यति ॥ ५३ ॥

मरुत्प्रपतनं वापि कुर्यात्पापमुदाहरन् ।
स्ववर्णोत्तमवर्णस्त्रीगमने त्वधिकारतः ॥ ५४ ॥

ब्रह्महत्याव्रतं कुर्याद्द्वादशाब्दं समाहितः ।
स्वमत्याभ्यसतो गच्छन् सवर्णामुत्तमां च वा ॥ ५५ ॥

करीषवह्निना दग्धो शुद्धिं याति द्विजोत्तम! ।
रेतस्सेकात्पूर्वमेव निवृत्तो यदि मातरि ॥ ५६ ॥

ब्रह्महत्याव्रतं कुर्याद्रेतस्सेकेऽग्निदाहनम् ।
स्ववर्णोत्तमवर्णासु निवृत्तो वीर्यमोचनात् ॥ ५७ ॥

ब्रह्महत्याव्रतं कृत्वा षडब्दं कृच्छ्रमाचरेत् ।
क्षत्रियां पितृभार्यां वा गत्वा विप्रस्सकृन्मुने! ॥ ५८ ॥

ब्रह्महत्याव्रतं कुर्यात्त्रि शब्दान्विष्णुतत्परः ।
वैश्यायां पितृपत्न्यां च षडब्दं कृच्छ्रमाचरेत् ॥ ५९ ॥

गत्वा शूद्रां गुरोर्भार्यां त्र्यब्दं कृच्छ्रं समाचरेत् ॥ ६० ॥

मातुःष्वसारं च पितृष्वसार-
माचार्यभार्यां श्वशुरस्य पत्नीम् ।
आचार्यपुत्रीमथ मातुलानीं
पुत्रीं च गच्छेद्यदि कामतो यः ॥ ६१ ॥

दिनद्वयं ब्रह्महत्याव्रतं कुर्याद्यथाविधि ।
एकस्मिन्नेव दिवसे बहुवारं त्रिवार्षिकम् ॥ ६२ ॥

1) गत्वा.

एकवारे कृते त्वब्दव्रतं कृत्वा विशुद्ध्यति ।
दिनत्रये गतो वह्निदग्धश्शुध्येत नान्यथा ॥ ६३ ॥
चण्डालीं पुल्कसीं चैव स्नुषां च भगिनीं तथा ।
मित्रस्त्रियं शिष्यपत्नीं यस्तु वै कामतो व्रजेत् ॥ ६४ ॥
ब्रह्महत्याव्रतं कुर्यात्षडब्दं मुनिसत्तम! ।
अकामतो व्रजेद्यस्तु त्र्यब्दं कृच्छ्रं समाचरेत् ॥ ६५ ॥
महापातकिसंसर्गप्रायश्चित्तं तु कथ्यते ।
यस्य येन भवेत्संगो ब्रह्महादिचतुर्ष्वपि ॥ ६६ ॥
तत्तद् व्रतं तु निर्वर्त्य शुद्धिमाप्नोत्यसंशयः ।
अज्ञानात्पञ्चरात्रं तु संगमेभिः करोति चेत् ॥ ६७ ॥
कायकृच्छ्रं चरेत्सम्यगन्यथा पतितो भवेत् ।
द्वादशाहं तु संसर्गे महासान्तपनं चरेत् ॥ ६८ ॥
संगं कृत्वार्धमासं तु उपवासान् दशाचरेत् ।
पराकं माससंसर्गे चान्द्रं मासत्रये व्रतम् ॥ ६९ ॥
कृत्वा षण्माससंगं तु कुर्याच्चान्द्रायणत्रयम् ।
किंचित्न्यूनाब्दसंगे तु षण्मासं व्रतमाचरेत् ॥ ७० ॥
अस्य च त्रिगुणं प्रोक्तं ज्ञानात्संगे यथाक्रमम् ।
ग्रामारण्यखरोष्ट्राभिर्मृगमीनाहिमाहिषीः ॥ ७१ ॥
संकलीकरणं प्रोक्तमर्धकृच्छ्रं चरेद्वधे ।
आरण्यपक्षिणो ये च जलजा ये च पक्षिणः ॥ ७२ ॥
क्रिमिकीटादिघातश्च मद्यानुगतभोजनम् ।
फलेक्षुकुसुमस्तेयं मलिनीकरणं विदुः ॥ ७३ ॥
मलिनीकरणे चैवमब्दकृच्छ्रं समाचरेत् ।
निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम ॥ ७४ ॥
असत्यभाषणं चैवमपात्रीकरणं विदुः !
अपात्रीकरणे राजन्नब्दकृच्छ्रं समाचरेत् ॥ ७५ ॥
(ब्राह्मणस्य रुजः कुर्यान्मद्याघ्राणं तथैव च ।
जैह्मं सर्वत्र मर्त्येषु पुरुषेषु च मैथुनम् ॥
जातिभ्रंशकरं प्रोक्तमब्दकृच्छ्रं समाचरेत्)
मण्डूकं नकुलं काकं वराहं मूषकं तथा ।
मार्जाराजालिकशुनो हत्वा वै कुक्कुटं तथा ॥ ७६ ॥
कृच्छ्रार्धमाचरेद्विद्वन्! त्रिकृच्छ्रं चाश्वहा चरेत् ।
तप्तकृच्छ्रं कलिवधे पराकं गोवधे स्मृतम ॥ ७७ ॥
यानशय्यासनाद्येषु पुष्पमालाफलेषु च ।
भक्ष्यभोज्योपहारे च पञ्चगव्यं विशोधनम ॥ ७८ ॥

शुष्ककाष्ठतृणानां च द्रुमाणां च गुडस्य च ।
चर्मवस्त्रामिषाणां च त्रिरात्रं स्यादभोजनम् ॥ ७९ ॥
टिट्टिभं चक्रवाकं च हंसं कारण्डवं तथा ।
उलूकं सारसं चैव कपोतं जालपादुकम् ॥ ८० ॥
शुकं चाषं बलाकं च शिंशुमारं च कच्छपम् ।
एतेष्वन्यतमं हत्वा द्वादशाहमभोजनम् ॥ ८१ ॥
प्राजापत्यव्रतं कुर्याद्रेतोविण्मूत्रभक्षणे ।
चान्द्रायणत्रयं प्रोक्तं शूद्रोच्छिष्टस्य भोजने ॥ ८२ ॥
रजस्वलां च चण्डालां महापातकिनं तथा ।
सूतिकां पतितं चैवमुच्छिष्टं रजकादिकम् ॥ ८३ ॥
स्पृष्ट्वा सचेलं स्नायीत घृतस्य प्राशनं तथा ।
गायत्रीं च विशुद्धात्मा जपेदष्टशतं तथा ॥ ८४ ॥
एतेष्वन्यतमं स्पृष्ट्वा भुञ्जीताज्ञानतो यदि ।
त्रिरात्रोपोषित [1]श्शुध्यै पञ्चगव्यनिषेवणम् ॥ ८५ ॥
दानयज्ञजपादीनां भोजनश्राद्धयोरपि ।
मध्ये श्रुणोति यद्येषां शब्दं कुर्यात्कथं द्विजः ॥ ८६ ॥
उद्वमेद् भुक्तमन्नं च स्नात्वा चोपवसेत्ततः ।
द्वितीयेऽह्नि घृतं प्राश्य शुद्धिमाप्नोति पण्डिताः ॥ ८७ ॥
पापानामाधिकं पापं द्विजदैवतनिन्दनम् ।
न दृष्टा निष्कृतिस्तेषां सर्वशास्त्रेषु सत्तमाः ॥ ८८ ॥
अभक्ष्यभक्षणे [2] चैवमभोज्यानां च भोजने ।
छर्दयित्वा तदन्नं तु पञ्चगव्यं पिबेत्ततः ॥ ८९ ॥
एतत्ते कथितं सर्वं प्रायश्चित्तमिदं मया ।
प्रायश्चित्तेन पूतात्मा मुक्तो भवति पातकैः ॥ ९० ॥
अथ सान्तपनादीनां कृच्छ्राणां लक्ष्म कथ्यते ।
मुण्डस्त्रिषवणस्नायी ह्यधश्शायी जितेन्द्रियः ॥ ९१ ॥
स्त्रीशूद्रपतितैस्साध वर्जयेदपि भाषणम् ।
पवित्राणि जपेच्छक्त्या जुहुयाच्चैव शक्तितः ॥ ९२ ॥
माषान्मसूरमुद्गांश्च परान्नं मैथुनं तथा ।
[3] क्षौरक्षौद्राशननां च लवणस्य फलस्य च ॥ ९३ ॥
भक्षणं नैव कुर्वीत कृच्छ्रचान्द्रायणादीषु ।
श्राद्धं कुर्याद् व्रतान्ते तु गोहिरण्यादिदक्षिणाम् ॥ ९४ ॥
आपोहिष्ठेतिसूक्तं च शुद्धवत्यघमर्षणम् ।
सर्वतस्स्वस्तिमत्यश्च पावमान्यस्तथैवच ॥ ९५ ॥

1) शुध्येत्पञ्चगव्यस्य सेवनात्. 2) विप्रा!: 3) क्षार.

सर्वत्रैव प्रयोक्तव्याः कृच्छ्रादिव्रतकर्मणि ।
कुशाग्रन्त्युदकक्षीरदधिगोमूत्रविड्घृतम् ॥ ९६ ॥

प्राश्यापरेऽह्न्युपवसन् कृच्छ्रं सान्तपनं चरेत् ।
गोमूत्रं ताम्रवर्णायाः श्वेतायाश्चैव गोमयम् ॥ ९७ ॥

पयः काञ्चनवर्णाया नीलायाश्च तथा दधि ।
घृतं च कृष्णवर्णायास्सर्वं कापिलमेव वा ॥ ९८ ॥

अलाभे सर्ववर्णानां पञ्चगव्येष्वयं विधिः ।
गोमूत्रं माषकास्त्वष्टौ गोमयस्यतु षोडश ॥ ९९ ॥

क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्तिताः ।
गोमूत्रवद् घृतस्य स्यात्तदर्धं तु कुशोदकम् ॥ १०० ॥

अन्येन स्वल्पविद्धं वा पिपेद्गव्यं पयस्सकृत् ।
गव्यस्य पयसोऽल्पत्वे गव्यमेव भवेद्दधि ॥ १०१ ॥

दध्नोऽभावे तु तक्रं स्या त्तक्राभावे तु यावकम् ।
एतदेव समभ्यस्तमिति सान्तपनं स्मृतम् ॥ १०२ ॥

पृथक् सान्तपन द्रव्यैष्षडहं चोपवासतः ।
साप्ताहिकस्तु कृच्छ्रोऽयं महासान्तपनस्स्मृतः ॥ १०३ ॥

त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् ।
त्र्यहं दधि त्र्यहं सर्पिस्त्र्यहं क्षीरं ततश्शुचिः ॥ १०४ ॥

महासान्तपनं चैतन्मतान्तरसमाश्रयत् ।
क्रमादेकैकमेतेषां त्रिरात्रमुपयोजयेत् ॥ १०५ ॥

त्र्यहं चोपवसेदन्ते महासान्तपनं विदुः ।
एतान्येव तथा पेयान्येकैकस्य त्र्यहं त्र्यहम् ॥ १०६ ॥

महासान्तपनं नाम श्वपाकामपि शोधयेत् ।
पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः ॥ १०७ ॥

प्रत्येकं प्रत्यहं पीतैः पूर्णकृच्छ्र उदाहृतः ।
तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत् ॥ १०८ ॥

एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः ।
षट्पलं च पिबेदम्भः क्षीरं च त्रिपलं पिबेत् ॥ १०९ ॥

पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रं विधीयते ।
एतैरेव सुशीतैस्स्याच्छीतकृच्छ्र उदाहृतः ॥ ११० ॥

एकभुक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैवायं पादकृच्छ्रः प्राकीर्तितः ॥ १११ ॥

सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः ।
सप्तविंशतिभिर्ग्रासैः परं निरशनं स्मृतम् ॥ ११२ ॥

कुक्कुटाण्डप्रमाणाः स्युर्यथावास्यं विशेत्सुखम् ।
यथाकथंचित्त्रिगुणः प्राजापत्योऽयमुच्यते ॥ ११३ ॥

अयमेवातिकृच्छ्रं स्यात्पाणिपूरान्नभोजनं ।
कृच्छ्रातिकृच्छ्रपसा दिवसानेकविंशतिम् ॥ ११४ ॥

द्वादशाहोपवासश्च पराकः परिकीर्तितः ।
पिण्याकतिलतक्राम्बुसक्तुभिः प्रातिवासरम् ॥ ११५ ॥

एकरात्रोपवासश्च कृच्छ्रस्सौम्योऽयमुच्यते ।
तिथिवृध्या हरेत्पिण्डान् शुक्ले शिख्यण्डसम्मितान् ॥ ११६ ॥

एकैकं ह्रासयेत्कृष्णे पिण्डं चान्द्रायणं त्विदम् ।
यथाकथंचित्पिण्डनां चत्वारिंशच्छतद्वयम् ॥ ११७ ॥

मासेनैवोपयुञ्जीत चान्द्रायणमिदं परम् ।
अष्टावष्टे समश्नीयात्पिण्डान्मध्यन्दिने स्थिते ॥ ११८ ॥

नियतात्मा हविष्यं च यदि चान्द्रायणं चरेत् ।
(चतुरः प्रातरश्नीयाद् ग्रासानतिसमाहितः ।
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं चरेत् ॥)
त्रींस्त्रीन्पिण्डान्समश्नीयन्नियतात्मा दृढव्रतः ॥ ११९ ॥

हविषान्नेन वै मासमृषिचान्द्रायणं भवेत् ।
एकैकं ह्रासयेद् ग्रासं कृष्णे शुक्ले च वर्धयेत ॥ १२० ॥

उपस्पृश्य त्रिषवणमेतच्चान्द्रायणं स्मृतम् ।
एतदाचरणं नृणां सर्वपापविशोधनम् ॥ १२१ ॥

मानसानां वाचिकानां कायिकानां च पाप्मनाम् ।
सकृदाभ्यासतो वाऽपि ज्ञानतो ज्ञानतोऽपि वा ॥ १२२ ॥

क्षुद्राणां महतां चापि कृतानां बहुभेदिनाम् ।
प्रायश्चित्तं भवेदेका सकृच्छिन्नपदस्मृतिः ॥ १२३ ॥

इति श्रीशिवतत्त्वरत्नाकरे चतुर्थकल्लोले
प्रायश्चित्तनिरूपणंनाम सप्तमस्तरंगः

अथाष्टमस्तरंगः

जनमेजयपर्यन्तं द्वापरे सोमवंशजाः ।
सूर्यवंशसमुत्पन्नास्सुमित्रान्ताः कलाविति ॥ १ ॥
उदीरितमभूत्स्वामिन्! कलौ तद्वंशसंभवाः ।
वर्णाश्रमार्हधर्माणां पालनं चक्रिरे नवा ॥ २ ॥
एतन्मह्यं समाख्याहि श्रोतुमस्ति कुतूहलम ।
यापैस्समावृते [1]त्वस्मिन्कलावेते युगे नृपाः ॥ ३ ॥
सर्वान्वर्णाश्रमाचारानसंकरमवर्तयन् ।
तान्ब्रवीम्यधुना पुत्र! राज्ञो धर्मपरायणान् ॥ ४ ॥
सोमवंशसमुत्पन्नान्प्रथमं जनमेजयात् ।
शतानीकस्ततश्चाश्वमेधदत्तोऽभवत्सुतः ॥ ५ ॥
कृष्णस्तस्मादभूदुष्णस्तत [2]श्चित्ररथस्ततः।
[3] द्रष्टृमानभवत्तस्मात्सुषेणोऽस्मात्सुनीतकः ॥ ६ ॥
ततो द्दतो नृचक्षुस्तु तस्मात्सुखबलस्ततः ।
परिप्लवस्सुनयनस्ततो मेधावृतः परम् ॥ ७ ॥
नृपञ्जयस्ततो दूर्वस्तस्मात्तिग्मोऽभवत्ततः ।
शतानीको दुर्दमनस्ततस्तस्माद्वही ततः ॥ ८ ॥
चण्डपाणिस्ततस्तस्मान्निमिस्तु क्षेमकस्ततः ।
कलौ युगे सोमवंशे राज्ञां तु क्षेमकोऽवधिः ॥ ९ ॥
ततः परं भूपतिषु भुवि संकीर्णजातिषु ।
वर्णानामाश्रमाणां च धर्मह्रासः क्रमादभूत् ॥ १० ॥
धर्मप्रवृत्तिं शिथिलां विलोक्य च समन्ततः ।
अवतीर्य दयावश्यो भगवान्बसवेश्वरः ॥ ११ ॥
धर्मं संस्थापयामास सर्वमेव धरातले ।
वीरशैवमतं स्थाप्य प्रकाशनमकारयत् ॥ १२ ॥
तस्याविर्भावमधुना विचित्रं कथयामि ते ।
मिथस्संवादरूपेण पुराणान्तः प्रतिष्ठितम् ॥ १३ ॥
महेश्वरो भवश्शम्भुः पार्वती वल्लभश्शिवः ।
आदिसर्गस्य समये प्रपञ्चस्याखिलस्य च ॥ १४ ॥
रजांसीव स्थूलरूपा रोमकूपेषु मे पुनः ।
सूक्ष्मरूपाश्च जलधौ बुद्बुदावलयो यथा ॥ १५ ॥
अनेकशोऽवतिष्ठन्ते ब्रह्माण्डानां समुत्कराः ।
तस्माद्वोढुं कः क्षमेत मामित्यात्मानमात्मना ॥ १६ ॥
धारयामीति संचिन्त्य वृषो भूत्वा रुरोह तम् ।
अभूत्तदादि वेदान्तवेद्यः श्रीवृषभेश्वरः ॥ १७
वाहनं तस्य देवस्य किमल्पं शंकरोऽपरः ।
अयोनिसम्भवो लोकपावनो गोकुलाधिपः ॥ १८ ॥
द्वितीयश्शम्भुरित्युर्व्यां प्रासिद्धो धर्मविग्रहः ।
वृषभेशस्वरूपं तु प्रोक्तमेतन्मयासुत! ॥ १९ ॥
लीलान्तरं च तस्यैव नन्दिकेश्वरनामकम् ।
तत्प्रवृत्तिमथो वक्ष्ये लैंगे संवादरूपकम् ॥ २० ॥
गते वरेण्ये वरदे सहस्राक्षे शिलादनः ।
आराधयन्महादेवं तपसाऽतोषयद्भवम् ॥ २१ ॥
तदातस्यैवमनिशं तत्परस्य द्विजस्य तु ।
दिव्यवर्षसहस्रं तु गतं क्षणमिवोल्बणम् ॥ २२ ॥
वल्मीकेनावृतांगश्च भक्षितश्च खगैर्मुनिः
भक्षितोऽथ वृकाद्यैश्च भक्षितोऽहि मुखैर्मुनिः ॥ २३ ॥
वक्रसूचिमुखैश्चान्यै राक्षसीभिश्च सर्वतः ।
निर्मांसरुधिरत्वग्वै निर्लेपः कुड्यवत् स्थितः ॥ २४ ॥
अस्थिशिष्टोऽभवत्पश्चात्तममन्यत शंकरः ।
यदा स्मृतो मुनिस्सोयं शंकरेणासुरारिणा ॥ २५ ॥
तदैव मुनिशार्दूल उत्ससर्ज क्लमं द्विजः ।
तप्यतस्तस्य तपसा प्रतुतोष च शंकरः ॥ २६ ॥
तुष्टस्समेत्य प्रोवाच सगणश्चोमया सह ।

ईश्वर उवाच.

किं कार्यं तपसाऽनेन तव तात! महामते! ॥ २७ ॥
ददामि पुत्रं सर्वज्ञं सर्वशास्त्रार्थपारगम् ।
ततः प्रणम्य देवेशं स्तुत्वोवाच शिलादनः ॥ २८ ॥

1) य. 2) श्चै. 3) धृष्ट. 1) न्व.

1)तः.

हर्षगद्गदया वाचा सोमं सोमविभूषणम् ।

शिलादनः ।

भगवन्! देवदेवेश! त्रिपुरार्दन! शंकर ॥ २९ ॥

अयोनिजं मृत्युहीनं पुत्रमिच्छामि सत्तम! ।

ईश्वरः ।

तव पुत्रो भविष्यामि नन्दिनाम्ना त्वयोनिजः ॥ ३० ॥

पिता भविष्यसि मम पितुर्वै जगतां मुने!

एवमुक्त्वा तु स मुनिं प्रणिपत्य स्थितं घृणी ॥ ३१ ॥

सोमस्सोमभृदीशानस्तत्रैवान्तरधीयत ।

नन्दीश्वरः ।

लब्धपुत्रः पिता रुद्रात्प्रीतो मम पिता मुने! ॥ ३२ ॥

यज्ञांकणं चकाराथ यज्ञार्थं यज्ञवित्तमः ।

ततः क्षणादहं शम्भोस्तनुजस्तस्य तेजसा ॥ ३३ ॥

संज्ञातः पूर्वमेवाहं युगान्ताग्नि समप्रभः ॥ ३४ ॥

ववर्षुस्तदा पुष्कलावर्तकाद्या

जगुः किन्नराः खेचराश्चैव सिद्धाः ।

शिलादात्मजत्वं गते मय्यथेन्द्रः

ससर्जाशु वृष्टिं सुपुष्पाम्बुमिश्राम् ॥ ३५ ॥

तं दृष्ट्वा कालसूर्याभं जटामुकुटधारिणम् ।

त्र्यक्षं चतुर्भुजं शान्तं शूलखट्वांगधारिणम् ॥ ३६ ॥

वज्रिणं वज्रदंष्ट्रं च वज्रिणाऽऽराधितं शिशुम् ।

वज्रकुण्डलिनं घोरं नीरदोपमनिस्स्वनम् ॥ ३७ ॥

ब्रह्माद्यास्तुष्टुवुस्सर्वे स्सुरास्सेन्द्रास्सुरेश्वराः ।

नेदुस्समन्ततस्सर्वे ननृतुश्चाप्सरोगणाः ॥ ३८ ॥

मुनीन्द्रा मुनिशार्दूला ऋग्यजुस्सामसम्भवैः ।

स्तोत्रैर्माहेश्वरैस्स्तुत्वा मां प्रणेमुर्महातपाः! ॥ ३९ ॥

ब्रह्मा हरिश्च रुद्रश्च शक्रस्साक्षाच्छिवोऽम्बिका ।

जीवश्चेन्दुर्महातेजाः भास्करः पवनोऽनलः ॥ ४० ॥

ईशानो निऋतिर्यक्षो यमो वरुण एव च ।

विश्वे देवास्तथा रुद्रा वसवश्च महाबलाः ॥ ४१ ॥

लक्ष्मीस्साक्षाच्छची ज्येष्ठा देवी चैव सरस्वती ।

अदितिश्च दितिश्चैव श्रुतिर्लज्जा धृतिस्तथा ॥ ४२ ॥

नन्दा भद्रा च सुरभिस्सुशीला सुमनास्तथा ।

वृषेन्द्रश्च महातेजा धर्मो धर्मात्मजस्तथा ॥ ४३ ॥

आवृत्य मां तथालिंग्य तुष्टुवुर्मुनिसत्तमाः! ।

शिलादोऽपि मुनिर्दृष्ट्वा पिता मे तादृशं तदा ॥ ४४ ॥

प्रीत्या प्रणम्य तुष्टात्मा तुष्टावेष्टप्रदं सुतम् ॥ ४५ ॥

शिलादः ।

भगवन्! देवदेवेश! त्रियम्बक! ममाव्यय! ।

पुत्रोऽसि जगतां यस्मात्त्राता दुखं च किं पुनः ॥ ४६ ॥

रक्षको जगतां यस्मात्पिता मे पुत्र! [1]सुव्रत! ।

अयोनिज! नमस्तुभ्यं जगद्योने! पितामह! ॥ ४७ ॥

पितः! पुत्र! महेशान! जगतां च जगद्गुरो! ।

त्वयाऽहं नन्दितो यस्मान्नन्दी नाम्ना सुरेश्वर! ॥ ४८ ॥

तस्मान्नन्दय मां नन्दिन्! नमामि जगदीश्वर! ।

प्रसीद पितरो मेऽद्य रुद्रलोकं गता विभो! ॥ ४९ ॥

पितामहाश्च भो नान्दिन्! अवतीर्णे महेश्वरे ।

ममैव सफलं लोके जननं जगतां गुरो! ॥ ५० ॥

तुभ्यं नमस्सुरेशान! नन्दीश्वर! महेश्वर! ।

पुत्र! पाहि महाबाहो! देवदेव! जगद्गुरो! ॥ ५१ ॥

पुत्रं त्वामेव नन्दीश! मत्वा यत्कीर्तितं मया ।

क्षम्यतां क्षम्यतां वत्स! वत्स! स्तुत्य! सुरासुरैः ॥ ५२ ॥

एवं स्तुत्वा तु तं बालं प्रणम्य बहुमानतः ।

मुनीश्वरान् स संप्रेक्ष्य शिलाद[2]स्संवृतोऽवदत् ॥ ५३ ॥

शिलादः ।

पश्यध्वं मुनयस्सर्वे! महाभाग्यं ममाव्ययम् ।

नन्दी यज्ञांकणे देवश्चावतीर्णो यतः प्रभुः ॥ ५४ ॥

मत्समः कः पुमान्लोके देवो वा [3]दानवोऽपि वा ।

एष नन्दी यतो जातो यज्ञभूमौ हिताय मे ॥ ५५ ॥

शैलादिः ।

मया सह पिता तुष्टः प्रणम्य च महेश्वरम् ।

उटजं स्वं जगामाथ[4] निधिं लब्ध्वेव निर्धनः ॥ ५६ ॥

यदा गतोऽहमुटजं शिलादस्य महामुनेः ।

तदा वै दैविकं रूपं त्यक्त्वा मानुष्यमास्थितः ॥ ५७ ॥

1) सर्वग. 2) सुव्रतो. 3) मानवो. 4) शु.

मानुष्यमास्थितं दृष्ट्वा पिता मे लोकपूजितः ।
व्यलपद्दुःखितोऽत्यर्थं स्वजनैश्च समावृतः ॥ ५८ ॥
जातकर्मादिकं चैव चकार मम सर्ववित् ।
सालंकायनपुत्रो वै शिलादः पुत्रवत्सलः ॥ ५९ ॥
उपदिष्टा हि तेनैव ऋक् सामयजुषी तथा ।
सामशाखासहस्रं च सांगोपांगं महामुने! ॥ ६० ॥
आयुर्वेदो धनुर्वेदो गान्धर्वो वास्तुलक्षणम् ।
हस्तिनां चरितं चैव नराणां चैव लक्षणम् ॥ ६१ ॥
संपूर्णे सप्तमे वर्षे ततोऽथ मुनिसत्तमौ ।
मित्रावरुणनामानौ तपोयोगबलान्वितम् ॥ ६२ ॥
तस्याश्रमं गतौ दिव्यौ द्रष्टुं मामाज्ञया विभोः ।
ऊचतुस्तं महात्मानौ मां निरीक्ष्य मुहुर्मुहुः ॥ ६३ ॥
तात! नन्द्ययमल्पायुस्सर्वशास्त्रार्थपारगः ।
न दृष्टमेवमल्पायुरस्य वर्षार्धतः परम् ॥ ६४ ॥
इत्युक्तवति विप्रेन्द्रे शिलादः पुत्रवत्सलः ।
मामालिंग्य च दुःखार्तो रुरोदातीव विस्वरम् ॥ ६५ ॥
हा! पुत्र! पुत्र! पुत्रेति पपात च महीतले ।
अहो! विधेर्बलं चैव विधातुश्चेति दुःखितः ॥ ६६ ॥
तस्य चार्तस्वरं श्रुत्वा तदाश्रमनिवासिनः ।
निपेतुर्विह्वलास्सर्वे रक्षां चक्रुश्च मंगलाम् ॥ ६७ ॥
तुष्टुवुश्च महादेवं त्रियम्बकमुमापतिम् ।
हुत्वा त्रियम्बकेनैव मधुनाज्येन संप्लुताम् ॥ ६८ ॥
दूर्वामयुतसंख्याकां सर्पिद्रव्यसमन्विताम् ।
पिता विगतसंज्ञश्च तथा चैव पितामहः ॥ ६९ ॥
निश्चेष्टश्च बभूवासौ मृतवन्निपपात ह ।
मृत्योर्भीतोऽहमचिरात् शिरसा चाभिव[1] न्दितम् ॥ ७० ॥
मृतवत्पतितं साक्षात्पितरं च पितामहम् ।
प्रदक्षिणीकृत्य च तं रुद्रस्याप्यपरोऽभवम् ॥ ७१ ॥
हृत्पुण्डरीकसुषिरे ध्यात्वा देवं त्रियम्बकम् ।
त्र्यक्षं दशभुजं शान्तं पञ्चवक्त्रं सदाशिवम् ॥ ७२ ॥
सरितश्चान्तरे पुण्ये स्थितं मां परमेश्वरः ।
तुष्टोऽब्रवीन्महादेवस्सोमस्सोमार्धभूषणः ॥ ७३ ॥

शिवः ।

वत्स! नन्दिन्! महाभाग! मृत्योर्भीतिः कुतस्तव ।
मयैव प्रेरितौ विप्रौ मत्समस्त्वं न संशयः ॥ ७४ ॥
वत्सैतत्तव देवस्य लौकिकं परमार्थतः ।
नास्त्येव वैदिकं दृष्टं शिलादेन पुरा तव ॥ ७५ ॥
देवैश्च मुनिभि स्सिद्धैर्गन्धर्वैर्दानवोत्तमैः ।
पूजितं च पुरा वत्स दैविकं नन्दिकेश्वर! ॥ ७६ ॥
संसारस्य स्वभावोऽयं सुखदुःखे पुनः पुनः ।
नृणां योगे रतिस्त्याज्या सर्वदैव विवेकिनाम् ॥ ७७ ॥
एवमुक्त्वैव मां साक्षात्सर्वदेवेश्वरेश्वरः ।
कराभ्यां कोमलाभ्यां चोभाभ्यां मां परमेश्वरः ॥ ७८ ॥
पस्पर्श भगवान् रुद्रः प्रणतार्तिहरो हरः ।
उवाच च महादेवस्तुष्टात्मा वृषभध्वजः ॥ ७९ ॥
निरीक्ष्य गणपान् श्रेष्ठान् देवीं हिमवतस्सुताम् ।
मामालोक्य च तुष्टात्मा महादेवस्सुरेश्वरः ॥ ८० ॥

ईश्वरः ।

अमरो जरया त्यक्तो नित्यं दुःखविवर्जितः ।
अक्षयश्चाव्ययश्चैव सपिता ससुहृज्जनः ॥ ८१ ॥
इष्टो मम सदा चैव मम पार्श्वं गतस्सुराः! ।
मद्बलश्चैव भविता महायोगबलान्वितः ॥ ८२ ॥
एवमुक्त्वा च मां देवो भगवान् सगणस्तथा ।
कुशेशयमयीं मालां समुन्मुच्यात्मनस्तथा ॥ ८३ ॥
आबबन्ध महातेजा महादेवो वृषध्वजः ।
तया च मालयाऽतीव शुभया कण्ठसक्तया ॥ ८४ ॥
त्र्यक्षो दशभुजश्चैव द्वितीय इव शंकरः ।
तत एव समादाय हस्तेन परमेश्वरः ॥ ८५ ॥
उवाच ब्रूहि किं तेऽद्य ददामि वरमुत्तमम् ।
ततो जटास्थितं वारि गृहीत्वा हारनिर्मलम् ॥ ८६ ॥
उक्त्वा नन्दी भवेत्येवं ससर्ज वृषभध्वजः ।
तत आदित्यतोया च पूर्णा [1]शीतजला शुभा ॥ ८७ ॥
पद्मोत्पलवनोपेता प्रावर्तत महानदी ।
तामुवाच महादेवो नदीं परमशोभनाम् ॥ ८८ ॥

---

[1] न्य.

[1] सित.

यस्माज्जटोदकादेव प्रवृत्ता त्वं महानदि! ।
तस्माज्जटोदका पुण्या भविष्यसि सरिद्वरा ॥ ८९ ॥
त्वयि स्नात्वा नरः कश्चित् सर्वपापैः प्रमुच्यते ।
ततो देव्या महादेवश्शैलादिनमजः प्रभुः ॥ ९० ॥
सुतस्तेऽयमिति प्रोच्य पादयो [1]स्तस्य पातयत् ।
सामामाघ्राय शिरसि हस्ताभ्यां परिमृज्य च ॥ ९१ ॥
पुत्रप्रेम्णाऽभ्यषिञ्चत्ता स्रोतोभिस्तनुजैस्त्रिभिः ।
पयसा शंखगौरेण देवदेवं निरीक्ष्य सा ॥ ९२ ॥
त्रीणि स्रोतांसि तान्यस्याः स्रोतस्विन्यभवत्तदा ।
नदीं त्रिस्रोतसं देवो भगवानवदद्भवः ॥ ९३ ॥
ननाद नादात्तस्मात्तु सरिदन्या ततोऽभवत् ।
वृषध्वनिरिति ख्याता देवदेवेन सा नदी ॥ ९४ ॥
जाम्बूनदमयं चित्रं [2]सर्वरत्नविभूषितम् ।
त्रिदिवश्च च्युतं दिव्यं निर्मितं विश्वकर्मणा ॥ ९५ ॥
मकुटं च बबन्धेशो मन्मूर्ध्नि वृषभध्वजः ।
कुण्डले च शुभे दिव्ये वज्रवैडूर्यभूषिते ॥ ९६ ॥
आबबन्ध महादेवस्स्वयमेव महेश्वरः ।
मां तथाभ्यर्चितं व्योम्नि दृष्ट्वा मेघैः प्रभाकरः ॥ ९७ ॥
मेघाम्भसाऽभ्यषिञ्चन्मां शैलादिनमथो मुने! ।
तस्याभिषिक्तस्य तदा प्रवृत्तैः स्रोतसे भृशम् ॥ ९८ ॥
यस्मात्सुवर्णं निर्भिद्य नद्येका संप्रवर्तिता ।
स्वर्णोदरेति तामाह महादेवस्त्रियम्बकः ॥ ९९ ॥
जाम्बूनदमयाद्यस्माद् द्वितीया मकुटाच्छुभा ।
प्रादुर्भूता नदी पुण्या प्रोचुर्जाम्बूनदीति ताम् ॥ १०० ॥
एतत्पञ्चनदं नाम जटेश्वरसमीपगम् ।
अथ देवो महादेवस्सर्वदेवपतिर्भवः ॥ १०१ ॥
देवमिवाच शर्वाणीमुमां गिरिसुतामजाम् ।
देवि! नन्दीश्वरं देवमभिषेक्ष्यामि भूतले ॥ १०२ ॥
[3]न गानप्या हरिष्यामि किं वा त्वं मन्यसे शुभे! ।
तस्य तद्वचनं श्रुत्वा भवानी [4]वृषितानना ॥ १०३ ॥
स्मयन्ती वरदं प्राह भवं भूतपतिं विभुम् ।

[1] स्तंन्य. [2] सर्वरत्नमयं शुभम्. [3] गणा. [4] हृ.

देव्युवाच.

सर्वलोकाधिपत्यं च गणेशानां तथैव च ॥ १०४ ॥
सर्वमर्हति देवेश! शैलादिस्तनयो मम ।
ततस्स भगवान् देवस्सर्वलोकेश्वरेश्वरः ॥ १०५ ॥
सस्मार गणपान् दिव्यान् देवदेवो वृषध्वजः ।
स्मरणादेव रुद्रस्य संप्राप्तास्ते गणेश्वराः ॥ १०६ ॥
[1]सहस्रहस्तपादाश्च सहस्रायुधधारिणः ।
त्रि[2]नेत्राश्च महात्मान स्त्रिदशैरभिवन्दिताः ॥ १०७ ॥
कालाग्निकोटिसंकाशा जटामुकुटधारिणः ।
कोटिकोटिगणैस्तुल्यैरात्मनाद्य गणेश्वराः ॥ १०८ ॥
असङ्ख्याता महात्मानस्तत्राजग्मुर्मुदायुताः ।
गायन्तश्च द्रवन्तश्च नृत्यन्तश्च महाबलाः ॥ १०९ ॥
मुखाडम्बरवाद्यानि नादयन्तस्तथैवच ।
रथैर्नागैर्हयैश्चैव वायुमर्कटवाहनाः ॥ ११० ॥
विमानेषु तथा रूढा हेमचित्रेषु वै गणाः ।
भेरीमृदंगवाद्यैश्च पणवानकगोमुखैः ॥ १११ ॥
वादित्रैर्विविधैश्चान्यैः पटहैरेकपुष्करैः ।
भेरीमुरजसन्नाहैराडम्बरकडिण्डिमैः ॥ ११२ ॥
मर्दलैर्दर्दुलैश्चक्रैस्तलघातैरनेकशः ।
वाद्यमानैर्महायोगा आजग्मुर्देवसंसदम् ॥ ११३ ॥
ते गणेशा महासत्त्वास्सर्वदेवेश्वरेश्वराः ।
प्रणम्य देवीं देवं च वचनं चेदमब्रुवन् ॥ ११४ ॥
भगवन्! देव! देवेश! त्रियम्बक! वृषध्वज! ।
किमर्थं च स्मृता देव! ह्याज्ञापय महाद्युते! ॥ ११५ ॥
किं सागरान् शोषयामो यमं वा सह किंकरैः ॥
हन्मो मृत्युसहायं वा सवह्निमथ पद्मजम् ॥ ११६ ॥
बध्वेन्द्रं सहदेवैश्च सहविष्णुं च वायुना ।
आनयामस्सुसंक्रुद्धान् दैत्यान्वादानवैस्सह ॥ ११७ ॥
कस्याद्य व्यसनं घोरं करिष्यामस्तवाज्ञया ।
कस्य वाऽद्योत्सवो देव! सर्वकामसमृद्धिमान् ॥ ११८ ॥
तां स्तथा वादिनस्सर्वान् गणेशान् भवसम्मतान् ।
उवाच देवस्संपूज्य कोटिकोटिगणान्प्रभुः ॥ ११९ ॥

[1] सर्वे सहस्रहस्ताश्च. [2] णे.

ईश्वरः ।
शृणुध्वं यत्कृते यूयमिहाहूता जगद्धिताः ।
श्रुत्वा तु प्रयतात्मानः कुर्वन्तु तदशंकिताः ॥ १२० ॥
नन्दीश्वरोऽयं पुत्रो नस्सर्वेषामीश्वरेश्वरः ।
प्रियोऽग्रनायकश्चैव सेनानीर्वस्सुबुद्धिमान् ॥ १२१ ॥
तमिमं मम सन्देशाद्यूयं सर्वे च सम्मताः ।
सेनान्यमभिषिञ्चध्वं महायोगपतिं पतिम् ॥ १२२ ॥
एवमुक्ते भगवता गणपास्सर्व एव ते ।
एवमस्त्विति संमन्त्र्य संभारानाहरंस्ततः ॥ १२३ ॥
ततश्शिवाश्रयं दिव्यं जाम्बूनदमयं शुभम् ।
आसनं मेरुसंकाशं मनोहरमुपाहरन् ॥ १२४ ॥
नैकस्तम्भमयं चापि चारुचामीकरप्रभम् ।
मुक्तादामावलम्बं च मणिरत्नविभूषितम् ॥ १२५ ॥
स्तम्भैश्च वैडूर्यमयैः किंकिणीजाल संयुतम् ।
प्रवरास्तरसंयुक्तं मण्डपं विश्वतोमुखम् ॥ १२६ ॥
कृत्वा चक्रुश्च तन्मध्ये तदासनवरं शुभम् ।
तस्याग्रतः पादपीठं नीलवज्रावभासितम् ॥ १२७ ॥
चक्रुः पादप्रतिष्ठार्थं कलशौ चास्य पार्श्वगौ ।
संपूर्णौ परमाम्भोभिररविन्दा [1]वृताननौ ॥ १२८ ॥
कलशानां सहस्रं च सौवर्णं राजतं तथा ।
ताम्रजं मृण्मयं चैव सर्वतीर्थाम्बुपूरितम् ॥ १२९ ॥
छत्रं शतशलाकं च जाम्बूनदमयं शुभम् ।
शंखहारेन्दुगौरेण पृष्ठेनापि विराजितम् ॥ १३० ॥
व्यजनं चन्द्रशुभ्रं च हेमदण्डं च चामरम् ।
ऐरावतं सुप्रतीकं गजापेतौ सुपूजितौ ॥ १३१ ॥
मुकुटं काञ्चनं दिव्यं निर्मितं विश्वकर्मणा ।
कुण्डले चामरे दिव्ये वज्रं चैव वरायुधम् ॥ १३२ ॥
जाम्बूनदमयं सूत्रं केयरद्वयमेवच ।
हारं च मणिभिश्चित्रं निर्मितं विश्वकर्मणा ॥ १३३ ॥
सम्भाराणि तथान्यानि विविधानि बहून्यपि ।
[2]सममानिन्युरव्यग्रा गणपा देवसम्मताः ॥ १३४ ॥

ततो देवाश्च सेन्द्राश्च सनारायणकास्तथा ।
मुनयो भगवान्ब्रह्मा नव ब्रह्माण एव च ॥ १३५ ॥
वेदाश्च लोकास्सर्वे ते तत्राजग्मुर्मुदायुताः ।
तेष्वागतेषु सर्वेषु भगवान् परमेश्वरः ॥ १३६ ॥
सर्वकार्यविधिं कर्तुमादिदेश पितामहम् ।
पितामहोऽपि भगवान् नियोगादेव तस्य तु ॥ १३७ ॥
चकार सर्वं भगवानभिषेकं समाहितः ।
अर्चयित्वा ततो ब्रह्मा स्वयमेवाभ्यषेचयत् ॥ १३८ ॥
ततो विष्णुस्ततश्शक्रो ऋषयश्च सहामरैः ।
वासोयुगं तथा दिव्यं गन्धं दिव्यं तथैव च ॥ १३९ ॥
केयूरे कुण्डले चैव मुकुटं हारमेवच ।
छत्रं शतशलाकं च वालव्यजनमुत्तमम् ॥ १४० ॥
दत्तं महात्मना तेन ब्रह्मणा परमेष्ठिना ।
ऋषयस्तुष्टुवुश्चैनं पितामहपुरोगमाः ॥ १४१ ॥
स्तुतवत्सु ततस्तेषु विष्णुस्सर्वजगत्पतिः ।
शिरस्यंजलिमाधाय तुष्टाव च समाहितः ॥ १४२ ॥
प्राञ्जलिः प्रयतो भूत्वा जयशब्दं चकार ह ।
ततो गणाधिपास्सर्वे ततो देवास्ततोऽसुराः ॥ १४३ ॥
एवं स्तुतश्चाभिषिक्तो देवैर्ब्रह्मादिभिस्सह ।
उद्वाहश्च कृतस्तेन नियोगात्परमेष्ठिनः ॥ १४४ ॥
मरुतां च सुता देवी सुयशाख्या बभूव ह ।
लब्धं शशिप्रभं छत्रं तया रत्नविभूषितम् ॥ १४५ ॥
चारुभिश्चामरासक्तहस्ताग्रैः स्त्रीगणैर्युतम् ।
सिंहासनं च परमं तया चाधिष्ठितं मया ॥ १४६ ॥
अलंकृता महालक्ष्म्या, मकुटाद्यैश्च भूषणैः ।
लब्धश्च परमोहारो देव्याः कण्ठगतस्तया ॥ १४७ ॥
वृषेन्द्रश्च सितोनागास्सिंहास्सिंहध्वजस्तथा ।
रथश्च हेम्नो हारश्च चन्द्रबिम्बसमप्रभः ॥ १४८ ॥
अद्यापि दृश्यते कश्चिन्मया नात्रसमः क्वचित् ।
[1]सास्वयं च गृहीत्वा मां तथा सम्बन्धिबान्धवैः ॥ १४९ ॥

[1] ररविन्दाननावृतौ. [2] ते समानिन्यु.

[1] सान्वयं.

आरुह्य वृषमीशानो मया सह गतश्शिवः ।
इत्येवं नन्दिनो वृत्तमाविर्भावादिकं क्रमात् ॥ १५० ॥
विवाहान्तं समाख्यातं समासाद्विस्मयावहम् ॥ १५१ ॥

इति श्रीशिवतत्त्वरत्नाकरे चतुर्थकल्लोले बसवेश्वरावतारान्तर नन्दीश्वराविर्भावादि विवाहान्त वृत्तान्तकथनं नामाष्टमस्तरंगः

अथ नवमस्तरंगः

आविर्भावादिकं वृत्तं नन्दिनस्समुदीरितम् ।
तस्यैव नन्दिनो भूमौ बसवेश्वररूपतः ॥ १ ॥
आविर्भावोऽस्ति यस्तं ते समासाद्वर्णये शृणु ॥ २ ॥

आस्ति प्रशस्तो धरणीधरेन्द्रो
दिश्युत्तरस्यां धृतदेवदेवः
कश्चिद्विपश्चित्कथितप्रभावः
कैलासनामा कलधौतरूपः ॥ ३ ॥

कथाप्रसङ्गैः प्रमथांस्तदीयै
रास्थानसौभाग्यविशेषगर्भैः ।
महेशसेवासुखमात्मनान्तो
विभावयन्तो मुनयोऽप्यतिष्ठन् ॥ ४ ॥

अथा [1] ह्तानामखिलान्तरात्मा
स्वयं विदित्वाऽभिमतं स्वयम्भूः ।
उमासमेतो विजयाजयाभ्यां
महासभामण्डपमाससाद ॥ ५ ॥

पुरान्तको दुर्मदगर्वहन्ता
गिरीन्द्रजा प्राणसखो महेशः
वर्णाश्रमातीत इति व्यतानीत्
कर्णोत्सवं काहलिकानिनादः ॥ ६ ॥

अथाजगामाऽन्तरयन्मुनीन्द्र
स्त्रिलोचना स्थान विदग्धगोष्ठीः ।
मनोज्ञमौर्वीरव मञ्जुलेन
विपञ्चिका पञ्चमनिस्वनेन ॥ ७ ॥

मुनेर्विपञ्चीसुहृदो मुखेन्दौ
कल्याणगीतामृतकौमुदीके ।
निधाय नेत्राणि तथा त्रिणेत्रः
कृतावधानः क्षणमात्रमासीत् ॥ ८ ॥

गानावसाने प्रतिगृह्य पूजां
श्लाघामयीं शम्भुवचोनियुक्तः ।
जगाद भूमौ स विलोकितानि
स्थानानि तत्रोदितमप्युदन्तम् ॥ ९ ॥

देशं समुत्सृज्य तदल्पभक्ति
प्रविश्य कर्णाटमहीविभागम् ।
तत्रापि दृष्ट्वा शिवभक्तिदूरान्
तत्रास चेतस्तरसा मदीयम् ॥ १० ॥

पुनः पुनर्दुर्मतदर्शनानि
भवेयुरित्येव विशङ्कमानः।
महीतलालोकनमन्दहर्ष-
स्सभामिमांसाम्प्रतमागतोऽस्मि ॥ ११ ॥

उद्बुद्धनानाविधभूम्युदन्तं
तपोधनोक्तं तरुणेन्दुचूडः ।
निशम्य देवं वृषभं समीक्ष्य
समाजुहावाननसंज्ञयैव ॥ १२ ॥

द्वितीयशम्भुस्स वृषेश्वरोऽपि
बद्धाञ्जलिर्बोधमयो महात्मा ।
स्थित्वा पुरः किं करणीयमाज्ञा
विधीयतामित्यवदद्विधिज्ञः ॥ १३ ॥

आज्ञापयामास तमम्बिकायाः
पतिस्त्वया शासनमस्मदीयम् ।
प्रकाशनीयं प्रकटापदानै
र्विजित्य भूमौ विमतानशेषान् ॥ १४ ॥

1) त्रि.

महीसुरः कश्चन माधवाख्यो
महीतले मांप्रति पुत्रकाङ्क्षी ।
तपस्यते तद्व्रतमस्य पत्नी
तनोति च त्वद्गतचित्तवृत्तिः ॥ १५ ॥

पुत्रत्वमासाद्य तयोः पृथिव्यां
श्रीवीरमाहेश्वरतन्त्रदार्ढ्याम् ।
विधेहि विद्वन्! विविधै र्विहारैः
प्रहृत्य पाषण्डमतप्रवृत्तान् ॥ १६ ॥

वीरेश्वराद्याः प्रमथेश्वराश्च
क्षितौ क्रमेणैव कृतावताराः ।
प्रत्यक्षसिद्धैरतुलप्रभावैः
स्थिरीकरिष्यन्ति सदा ममाज्ञाम् ॥ १७ ॥

किंचासुरः कश्चन कण्टकाख्य
स्तपोभिरुग्रैः परितोष्य किञ्चित् ।
स्वप्ने समाकल्पितसंविधानो
स्वर्गाधिपत्यं स्वयमाचकांक्षे ॥ १८ ॥

भूतान्यनेकान्यवधीस्त्वमादा
वकारणात्तद्भुवि भूमिपालनः ।
भूत्वा यदा भुक्तकरायुधेन
पातस्तदा तत्पदसिद्धिरस्तु ॥ १९ ॥

आदिष्ट इत्येव मयाऽसुरोऽय-
मासाद्य पृथ्वी मधिकर्द्धिरास्ते ।
प्रवर्तयन्वेदविरोधितन्त्रं
प्राकाशयद्भक्तियुतेषु वैरम् ॥ २० ॥

पापेन धर्मस्तमसा प्रकाश
श्छायाऽऽतपेनाप्यसता सदेवम् ।
प्रयाति शुद्धस्समयः प्रसिद्धिं
दुरात्मना तत्पददूषकेन ॥ २१ ॥

तस्यास्ति राज्ञो बलदेवनामा
दयानिधिः कश्चन दण्डनाथः ।
मामेकदेवं मनसा विदित्वा
मद्भक्तमेवाऽऽकलयन्कुलीनम् ॥ २२ ॥

मत्प्रीतये दानशतं विधाय
कन्यां प्रदातुं किल कांक्षमाणः ।
मां प्रार्थयत्यद्यमदीयभक्त-
हस्ते मदावासतया प्रशस्ते ॥ २३ ॥

भूत्वाऽऽत्मजा भक्तवरस्य तस्य
मनोरथापूरणमारचय्य ।
गंगेयमागच्छति जंगमार्चा-
विधायिनस्ते सहचारिणीति ॥ २४ ॥

गंगाऽवदद्देव! भवत्पदाब्ज-
1)सेवासुखासक्तिमती तथाऽहम् ।
कथं त्वदीयप्रमथस्य सेवा ।
विधिं विधास्ये विविधोपचारैः ॥ २५ ॥

गिरं तदीयां गिरिशो निशम्य
किंचिद्विहस्यादभुतमाबभाषे ।
शेषानशेषान्प्रमथानवेहि
मामेव मन्यस्व महावृषेन्द्रम् ॥ २६ ॥

इत्यद्भुतामीश्वरवाचमार्या
श्रुत्वाऽथ बद्धांजलिराचचक्षे ।
भक्तप्रियत्वात्परमार्थतो वा
प्रभाषसे देव! वदेति सम्यक् ॥ २७ ॥

देवोऽप्यशंसच्छृणु देवि! लोका-
नुत्पाद्य तेषामवलम्बनाय ।
धर्माभिधानः प्रथमो मदंशु
स्संस्थापितस्सज्जनमानसेषु ॥ २८ ॥

एकावशेषे प्रलये पुनर्मां
भेजे वृषाकारगतो मदंशुः ।
आलम्बभूतावयवोऽखिलाना
माम्नायतीर्थागमपद्धतीनाम् ॥ २९ ॥

मया ततोऽभ्येत्य यदीप्सितं त-
द्वृणु त्वमित्युक्तमसौ निशम्य ।
अचञ्चलां मत्पदभक्तिमेव
वव्रेऽथ नम्रे वशिनां पुरोगः ॥ ३० ॥

वैकुण्ठपद्मासनवासवाद्यै
श्शिरोभिरभ्यर्चितशासनेन ।
गाणाधिपत्येन स योजितोऽभू-
त्तदा प्रभृत्येव मया महात्म ॥ ३१ ॥

शिवागमानां च परं रहस्य
महं यथा वेद्मि तथैव वेत्ति ।
तस्मादमुष्यापि ममापि देवि!
भेदस्तु नाम्ना न महामहिम्ना ॥ ३२ ॥

1)सेवासुहेवाकवतीस्तदाहं

आद्यावतारे वृषभस्य नाम भूयादमुष्मिन्त्रसवः किलेति ।
यस्याननाब्जे वसवेति शब्दः प्रवर्तते तत्र वसामि गौरि! ॥ ३३ ॥

किन्त्वाहमस्यानुसरन्नशेष- मात्मीकरिष्याम्यनुबन्धवस्तु ।
लिंगात्मकोऽसून्वसुजंगमात्मा देहं पुनर्देशिकरूपगूढः ॥ ३४ ॥

कल्पे सखा सर्गविधौ सहायो गणाग्रणीर्वृषभृदग्रयायी ।
असावधिष्ठानमनेकवृत्त्या करोति सेवां मम कामरूपः ॥ ३५ ॥

सोऽयं मदंशस्सुमुखस्त्वयाऽपि सम्भावनीयः किमुतेतरेण ।
कुर्यात्ततस्तामपहाय गंगे! शंकमिमां [1]शक्रराजसेवाम् ॥ ३६ ॥

इत्थं प्रशंसन्वृषभेशमीशः प्रयुज्यतां प्रस्तुतकार्यसिद्धयै ।
विलोकयन्तीं वृषभं विशेषात् सभामवैक्षिष्ट सुधांशुमौलिः ॥ ३७ ॥

अथ झडिति शिवाज्ञां कर्तुमत्युच्चनीचे-
ष्वपि जननमवापुश्शम्भुभृत्याः कुलेषु ।
मणय इव महार्घारोहणाम्भोधिशुक्ति-
-ष्वपहतपरिपंथिध्वान्तवृन्दा महोभिः ॥ ३७ ॥

स्वयमपि वृषभेन्द्रश्चारुसौभाग्यसान्द्रः
प्रकटित निजतन्त्र श्शम्भुना दत्तसत्त्वः ॥ ३८ ॥

मधुरसुदरभागं मान्यमालम्ब्य योगं
व्रतकृतपृथुकायाः प्राप मादाम्बिकायाः ॥ ३९ ॥

अथ मादाम्बिका गर्भचिह्नमानन्द [2]मन्थुरा ।
पत्युर्मनोरथफलप्राप्तिकर्णेजपं दधौ ॥ ४० ॥

एवमन्तर्गतानन्दविभ्रमादिवहिर्मुखः ।
निनायाब्दत्रयं तस्या जठरे जगदीश्वरः ॥ ४१ ॥

तद्गर्भभारमुद्वोढुमशक्ता शंकरालयम् ।
गत्वा वृषभदेवस्य स्थिताऽग्रे सा व्यजिज्ञपत् ॥ ४२ ॥

भाग्यवत्यो युवतयो धृत्वा गर्भमनामयम् ।
नवमे मासि सुवते दशमे वात्मजं विभो! ॥ ४३ ॥

त्वत्सेवासक्तचित्तायामप्यगाद्वत्सरत्रयम् ।
एतद्भारापनयनं कुरु मे मास्तु सन्ततिः ॥ ४४ ॥

अस्मिन्नवसरेऽन्योन्यजल्पनासमयान्तरे ।
अचिरादेव ते कार्यसिद्धिरस्त्विति वागभूत् ॥ ४५ ॥

पुष्पगुच्छस्तथैवाशु वृषशृंगान्तरार्पितः ।
पपात षट्पदारावैस्तथास्त्विति वदन्निव ॥ ४६ ॥

प्रसादं साग्रहीत्प्राज्ञा प्रमोदाश्रुमती सती ।
दत्ता वृषभदेवेनेत्युपश्रुतिसमक्षणम् ॥ ४७ ॥

[1] शार्वर. [2] निर्भरा.

सखी जनावृता गेहं गत्वा माधवगेहिनी ।
प्रसादमवदच्छम्भोर्भर्त्रे सा सोऽपि पिप्रिये ॥ ४८ ॥

कालेनाल्पीयसैवाथ बभूव प्रसवोन्मुखी ।
अथाष्टवर्षदेशीयः कश्चिदृष्टस्तया पुरः ॥ ४९ ॥

विष्टम्भयन्निव दिशः क्लिष्टेनाष्टौ स्वतेजसा ।
प्रत्यग्रविद्रुमलताविटपारुणकान्तिभिः ॥ ५० ॥

रुद्राक्षग्रथिताग्राभिर्जटाभिः पञ्चभिर्वृतः ।
त्रिपुण्ड्रच्छद्मसम्प्राप्तत्रिस्रोतःकान्तिबन्धुना ॥ ५१ ॥

कौमुदीगुच्छधौतेन भस्मना भासुरालिकः ।
विकस्वरललाटाक्षिच्छायासच्छायकान्तिना ॥ ५२ ॥

हरिचन्दनक्लृप्तेन तिलकेनापि राजितः ।
रुद्राक्षषट्कसम्बद्धताम्रकुण्डलशोभिना ॥ ५३ ॥

कर्णभूषाद्वयेनोच्चैर्वर्णनीयमुखाम्बुजः ।
अष्टोत्तरेणैकवक्त्र रुद्राक्षाणां शतेन च ॥ ५४ ॥

द्वात्रिंशता च घटितस्फुटोरःकण्ठमालिकः ।
व्याघ्रकृत्तिकृतोड्यानपट्टिकाश्लिष्टमध्यकः ॥ ५५ ॥

कराम्बुरुहनालश्रीवहवेत्रलताकरः ।
विभूतिकुण्डिकारूढभुजाशिखरभासुरः ॥ ५६ ॥

अधोमुखाम्भोरुहान्तर्गतहंसोपमाश्रुते ।
स्फाटिके पादुकाद्वन्द्वे प्रतिष्ठितपदाम्बुजः ॥ ५७ ॥

कृपातरङ्गितालोको दाक्षिण्यललितानन ।
अनुल्बणोज्ज्वलाकारस्सौजन्य मिव चाक्षुषम् ॥ ५८ ॥

अदृष्टपूर्वमतिथिं दृष्ट्वा संदीप्ततेजसम् ।
शरणार्थिन्यस्मि देवेत्यलसा प्रणनाम सा ॥ ५९ ॥

वत्से! वत्सवती भूया इत्याशीर्वादपूर्वकम् ।
विभूतिमलिके दत्वा व्याचचक्षे विचक्षणः ॥ ६० ॥

भद्रे! ऽस्तिहि महाक्षेत्रं नाम्ना कुण्ड [1]लिसङ्गमम् ।
यत्रास्ते रजताद्रिं च विस्मृत्य विषमेक्षणः ॥ ६१ ॥

पवित्रे यत्र गात्राणि त्यजतां किल देहिनाम् ।
कर्णेषु तारकं ब्रह्म व्याहरन्नम्बिकापतिः ॥ ६२ ॥

पल्वलान्यपि तीर्थानि पामरा अपि तापसाः ।
द्रुमाः कल्पद्रुमा यत्र धेनवस्सुरधेनवः ॥ ६३ ॥

तत्राहं कल्पितावासो भिक्षुकश्चन शोभने! ।
त्वत्पुत्रानुग्रहं कर्तुं कृपया समुपागतः ॥ ६४ ॥

[1] कूडलि.

इत्येवं वदतस्तस्य वाक्यमाकर्ण्य तादृशम् ।
सुतं दृष्ट्वा स्वशय्यायां भ्राजमानं ननन्द सा ॥ ६५ ॥

प्रणमन्तमिवाचार्यं शिरोविरचितांजलिम् ।
अर्धोदये तस्य कण्ठे बध्वा लिङ्गात्मकं शिवम् ॥ ६६ ॥

अयं बसवराजाख्यो भक्तिभाण्डगृहं भवेत् ।
अप्रसादीकृतं चास्मै नप्र [1])मेयं कदाचन ॥ ६७ ॥

इत्युक्त्वाऽन्तरधाद्देवस्सर्वान्विस्मापय [2])न्निव ।
वृषेन्द्रे संजाते बसव इति नाम्ना शिवकथा–
सुधासान्द्रे चन्द्रे मधुरमधुरैस्स्वैर्गुणगणैः ।
पपातोर्व्यां कल्पद्रुमकुसुमवृष्टिः परिणता
प्रसादं प्रापाशावलयमपि चित्तैस्सह सताम् ॥ ६८ ॥

तस्योपनययोग्ये तु काले समुपसेदुषि ।
जनको माधवाचार्यो मादाम्बाख्या जनन्यपि ॥ ६९ ॥

उपनेतुमसुं पुत्रमयतेतां महोत्सवैः ।
तदाऽयं पितरौ दृष्ट्वाचचक्षे तादृशोद्यमौ ॥ ७० ॥

शृणुतां पितरौ! प्रेम्णा संगमेशो गुरुर्मम ।
लिंगस्य धारणं वीरशैवदीक्षां च कारयन् ॥ ७१ ॥

अन्वगृह्णात्ततो नार्हं ममोपनयनादिकम् ।
इत्यनन्तरमुन्मुच्य तत्क्षणात्पूर्वमाश्र [3])यम् ॥ ७२ ॥

निर्जगामाग्रजा तस्य नागाम्बा सह निर्ययौ ।
मातुलो बलदेवोऽस्य मन्त्री बिज्जलभूपतेः ॥ ७३ ॥

नागाम्बया सहायान्तमश्रृणोद्बसवेश्वरम् ।
अभिगम्य निजं गेहमानीय मुदितान्तरः ॥ ७४ ॥

ततश्च पुत्रीं गंगाख्यां तस्मै स प्रत्यपादयत् ।
उद्वाहमंगलं प्राप्य संगमेश्वरनामकम् ॥ ७५ ॥

अध्युवास महाक्षेत्रं पवित्रमतिचित्रकृत् ।
अथ याति कियत्काले बलदेवस्स्वयं ततः ॥ ७६ ॥

जामातुर्बसवेशस्य सादृश्यं वृषभेश्वरे ।
विलोकितुमिव प्रायश्शिवसन्निधिमभ्यगात् ॥ ७७ ॥

ततो बिज्जलभूपालस्स्वीयस्य गुणशालिनः ।
जामातरममात्यस्य शुश्राव बसवेश्वरम् ॥ ७८ ॥

तमानेतुं यियासन्स सामाजिकमुखान्नृपः ।
आगमं वेदयामास सोऽपि तं प्रतिनिर्ययौ ॥ ७९ ॥

तावुभौ मिलितौ मध्यमार्गे परमहर्षितौ ।
राजा तस्मै बहुविधानुपहारानकल्पयत् ॥ ८० ॥

तौर्यत्रिकरवाकीर्णास्सर्वा मुखरयन्दिशः ।
सपौरवर्गस्सबलस्सामान्यस्सपरिच्छदः ॥ ८१ ॥

बसवेश्वरमानीय निनाय भवनं प्रति ।
सर्वाधिपत्यं दत्वा तं निजमन्त्रि पदे न्यधात् ॥ ८२ ॥

वासरेषु प्रयातेषु ततः कतिपयेषु तु ।
बिज्जलाख्यो महीपालः पिशुनोक्तिवशंवदः ॥ ८३ ॥

ततान वितथाक्षेपान्प्रतीपानेव भूरिशः ।
येऽप्यस्य महिमोत्कर्षप्रकाशायाभवन्परम् ॥ ८४ ॥

प्रकाशयेयुस्संघर्षान्मुहुः श्रीखण्डसौरभम् ।
सर्वदा गुरुलिंगश्रीजंगमानामभीप्सितम् ॥ ८५ ॥

अर्पयित्वैव सकलांस्तर्पयामास तान्मुहुः ।
मित्राणां दर्शितानेकचित्राणां सहवर्तिनाम् ॥ ८६ ॥

प्रमथानां वीरशैवमतानुगुणतां गताम् ।
प्रकाशयद्रस्थलीविद्यां नर्मशिक्षितदुर्मतः ॥ ८७ ॥

संस्थापयन्नशेषेण शिवधर्मान् क्षिताविह ।
चतुर्विंशतिवर्षाणि भक्तिसाम्राज्यमन्वभूत् ॥ ८८ ॥

अयं नृपश्शिवद्रोहमग्रे विरचयिष्यति ।
जगद्देवब्रह्मदेवनामानौ तस्य निग्रहे ॥ ८९ ॥

बद्धोद्यमौ ममावासः कालेऽस्मिन्नोचितो भवेत् ।
मित्रस्य बिज्जलक्षोणीपतेर्नेक्ष्या विपन्मया ॥ ९० ॥

इत्यालोच्य निजं स्थानं गन्तुमिच्छां चकार सः ।
ततः कतिपयैरेव निजस्थानं गणैस्सह ॥ ९१ ॥

प्रतिष्ठमानमप्राक्षुः परिशिष्टगणेश्वराः ।
देशः को बाऽस्मदावासयोग्यस्स्यात्तं वदस्व नः ॥ ९२ ॥

इति पृष्टो गणानेवं जगाद बसवेश्वरः ।
अग्रे धर्मा धूसरत्वं प्रयास्यन्ति समन्ततः ॥ ९३ ॥

उत्पाताश्च भविष्यन्ति जनानां लयसूचकाः ।
विरूपाक्षप्रसादस्य महिम्ना भुवि विश्रुतम् ॥ ९४ ॥

सिंहासनं नरपते रुद्धविष्यति किञ्चन ।
तद्भक्तिव्यत्ययादेव क्रमात्संकोचमेष्यति ॥ ९५ ॥

अनन्तरं मल्लराष्ट्रे मन्नाम्ना ख्यातिमेयिवान् ।
ममानुग्रहपात्रं च भक्तः कश्चिदुदेष्यति ॥ ९६ ॥

रामेश्वरप्रसादेन तद्वंश्याश्च प्रतिक्षणम् ।
ऐश्वर्यबहुराज्यश्रीबलकीर्तिपराक्रमैः ॥ ९७ ॥

1) दे. 2) न्जनान्, 3) म.

वीरशैवमताचारानाचरिष्यन्ति दीक्षिताः ।
वत्स्यन्ति गुरुलिंगश्रीजंगमेष्वतिभक्तयः ॥ ९८ ॥
तेषां राष्ट्रे कृतयुगधर्मश्च स्थितिमेष्यति ।
तत्र दुर्भिक्षवार्त्ता च नैव श्रोष्यति कश्चन ॥ ९९ ॥
तत्र गत्वा वीरशैवदीक्षामालम्ब्य खेलत ।
इत्येवमुपदिश्यैतान्निजं स्थानमपद्यत ॥ १०० ॥

इति श्रीशिवतत्वरत्नाकरे चतुर्थकल्लोले
बसवेश्वरवृत्तान्तनिरूपणं नाम नवमस्तरङ्गः

अथ दशमस्तरंगः

सम्प्रोक्तं वसवेशस्य स्वेच्छाविर्भावखेलनम् ।
तत्कृतानुग्रहस्यापि क्रमस्स्वामिन्! निरूपितः ॥ १ ॥
आकर्ण्यैतत्प्रमुदितोऽभवं सर्वकलार्णव! ।
यदि वादिपुरो धर्मो धूसरत्वं (समेष्यति
उत्पाताश्च भविष्यन्ति समन्ताद्योजनद्वयम्
एतद्द्वयं) श्रोतुमिच्छा मम संप्रति वर्तते ॥ २ ॥
सप्रपञ्चमतिप्राज्ञ! तद्द्वयं मे निरूपय ।
कुमारानन्यसमान्या गुणास्ते हर्षयन्ति नः ॥ ३ ॥
यदन्वयुज्यतैतर्हि ब्रूमस्तत्रोत्तरं शृणु ।
कलेस्स्थितिं प्रवक्ष्यामि शृणुष्व सुसमाहितः ॥ ४ ॥
धर्मः कलियुगे प्राप्ते त्रिपादो न प्रवर्तते ।
तामसं युगमासाद्य हरिः कृष्णत्वमेति च ॥ ५ ॥
यः कश्चिदत्र धर्मात्मा क्रियायोगरतो भवेत्
नरं धर्मपरं दृष्ट्वा सर्वेऽसूयां प्रकुर्वते ॥ ६ ॥
व्रताचाराः प्रणश्यन्ति ध्यानयज्ञादयस्तथा ।
उपद्रवा भविष्यन्ति ह्यधर्मस्य प्रवर्तनात् ॥ ७ ॥
(असूयानिरतास्सर्वे दम्भाचारपरायणाः ।
प्रजाश्चाल्पायुषस्सर्वा भविष्यन्ति कलौ युगे)
युगधर्मास्समाख्याता स्स्थूलास्संक्षेपतो मुने!
सर्वे धर्माः प्रणश्यन्ति कृष्णे कृष्णत्वमागते ॥ ८ ॥
तस्मात्कलिर्महाघोरस्सर्वपापस्य साधकः
ब्राह्मणाः क्षत्रिया वैश्या श्शूद्रा धर्मपराङ्मुखाः ॥ ९ ॥
घोरे कलियुगे प्राप्ते द्विजा वेदपराङ्मुखाः ।
व्याजधर्मपरास्सर्वे वृथाहंकारदूषिताः ॥ १० ॥
सर्वमाक्षिप्यते नित्यं नरैः पण्डितमानिभिः ।
अहमेवाधिक इति सर्व एव वदन्ति हि ॥ ११ ॥
अधर्मलोलुपास्सर्वे तथा चैव [1]द्विजोत्तमाः ।
अतस्त्वल्पायुषस्सर्वे भविष्यन्ति कलौ युगे ॥ १२ ॥
अल्पायुष्ट्वान्मनुष्याणां न विद्याग्रहणं नृप!
विद्याग्रहणशून्यत्वादधर्मस्सम्प्रवर्तते ॥ १३ ॥
व्युत्क्रमेण प्रजास्सर्वा म्रियन्ते पापतत्पराः ।
ब्राह्मणाद्यास्तथा वर्णास्संकीर्यन्ते परस्परम् ॥ १४ ॥
कामक्रोधपरा मूढा वृथाहंकार [2]पूरिताः ।
बद्धवैरा भविष्यन्ति परस्परवधेप्सवः ॥ १५ ॥
जनास्सर्वे दयाहीना दाक्षिण्यपरिवर्जिताः ।
शूद्रतुल्या भविष्यन्ति तपस्सत्यविवर्जिताः ॥ १६ ॥
उत्तमा नीचतां यान्ति नीचाश्चोत्तमतां गताः ।
राजानो द्रव्यनिरतास्सदा लोभपरायणाः ॥ १७ ॥
धर्मकंचुकसंवीता धर्मविध्वंसकारिणः ।
यो योऽश्वरथ नागाढ्यस्स स राजा भविष्यति ॥ १८ ॥
किंकराश्च भविष्यन्ति शूद्राणां च द्विजातयः ।
धर्मस्त्रीष्वपि यच्छन्ति पतयो जारलक्षणम् ॥ १९ ॥

1) द्विजातयः 2) पीडिताः

द्विष्यन्ति पितरं पुत्रा गुरुं शिष्या द्विषन्ति च
पतिं च वनिता द्वेष्टि कृष्णे कृष्णत्वमागते ॥ २० ॥
लोभाभिभूतमनसस्सर्वे दुष्कर्मशीलिनः ।
परान्नलोलुपा नित्यं भविष्यन्ति द्विजातयः ॥ २१ ॥
परस्त्रीनिरतास्सर्वे परद्रव्यपरायणाः ।
1) मर्त्यामिषेण जीवन्ति दुहन्तश्चाप्यजीविकान् ।
सरित्तीरेषु कुद्दालै रोपयिष्यन्ति चौषधीः ॥ २३ ॥
अत्यल्पानि फलान्यासां भविष्यन्ति कलौ युगे ।
वंश्या लावण्यशीलेषु स्पृहां कुर्वन्ति योषितः ॥ २४ ॥
धर्मविघ्ना भविष्यन्ति स्त्रियश्च पुरुषेषु च ।
प्रायशः कृपणानां च बन्धूनां च तथा द्विजाः ॥ २५ ॥
साधूनां विधवानां च वित्तान्यपहरन्ति च ।
न यक्ष्यन्ति न होष्यन्ति हेतुवा2)दैर्विघूर्णिताः ॥ २६ ॥
अपात्रेष्वेव दानानि कुर्वन्ति च तथा नराः ।
क्षीरोपाधिनिमित्तेन गोषु प्रीतिं प्रकुर्वते ॥ २७ ॥
न कुर्वन्ति तथा विप्रा स्नानशौचादिकाः क्रियाः ।
अकालकर्मनिरताः कूटयुक्तिविशारदाः ॥ २८ ॥
देवानिन्दापराश्चैव विप्रनिन्दापरास्तथा ।
न कस्यचिच्चापि मनो विष्णुभक्तिपरं तथा ॥ २९ ॥
देवपूजापरं 3)दृष्ट्वाऽपहासं सम्प्रकुर्वते ।
नि4)बध्नन्ति द्विजानेव धनार्थं राजकिंकराः ॥ ३० ॥
नाद्रियन्ते च विप्रेन्द्र! कृष्णे कृष्णत्वमागते ।
दानयज्ञजपादीनां विक्रीणन्ति फलं द्विजाः ॥ ३१ ॥
प्रतिग्रहं प्रकुर्वन्ति चण्डालादेरपि द्विजाः ।
शूद्रस्त्रीसंगानिरता विधवासंगलोलुपाः ॥ ३२ ॥
शूद्रान्नपाननिरता भविष्यन्ति कलौ नराः ।
अट्टशूला जनपदाश्शिवशूलाश्चतुष्पदाः ॥ ३३ ॥
प्रमदाः केशशूलिन्यो भविष्यन्ति कलौ युगे ।
1)कुहकाश्च जनास्तत्र हेतुवादविशारदाः ॥ ३४ ॥
पाषण्डिनो भविष्यन्ति चतुराश्रमनिन्दकाः ।
न च द्विजातिशुश्रूषां सर्वधर्मप्रवर्त्तिनीम् ॥ ३५ ॥

1) मत्स्या. 2) दै. 3) दृष्ट्युपहासंप्रकुर्वते 4) बध्नन्ति.

करिष्यन्ति तथा शूद्राः 2)प्रवज्यालिंगिनोऽधमाः ।
काषायपरिवीताश्च जटिला भस्मधूसराः ॥ ३६ ॥
अशौचा वक्रमतयः परपाकान्नजीविनः ।
भविष्यन्ति दुरात्मान श्शूद्राः प्रव्रजितास्तथा ॥ ३७ ॥
उत्कोचजीविनस्तत्र महापापरतास्तथा ।
भविष्यन्त्यथ पाषण्डाः कापाला भिक्षवोऽधमाः ॥ ३८ ॥
धर्मविध्वंसशीलानां द्विजानां राजवल्लभाः ।
शूद्रा धर्मान्प्रवक्ष्यन्ति प्रव्रज्यालिंगिनोऽधमाः ॥ ३९ ॥
गीतवाद्यपरा विप्रा वेदवादपराङ्मुखाः ।
भविष्यन्ति कलौ प्राप्ते शूद्रमार्गप्रवर्तिनः ॥ ४० ॥
हर्तारो न च दातारो भविष्यन्ति कलौ युगे ।
विश्वासहीनाः पिशुना वेददेवद्विजातिषु ॥ ४१ ॥
असंस्कृतोक्तिवक्तारो रागद्वेषपरास्तथा ।
परमायुश्च भविता तदा वर्षाणि षोडश ॥ ४२ ॥
पञ्चमे वाथ षष्ठे वा वर्षे कन्या प्रसूयते ।
सप्तवर्षाष्टवर्षाश्च प्रसूयन्ते तथा नराः ॥ ४३ ॥
स्वकर्मत्यागिनस्सर्वे कृतघ्ना भिन्नवृत्तयः ।
याचकाः पिशुनाश्चैव भविष्यन्ति कलौ युगे ॥ ४४ ॥
परावमाननिरता आत्मस्तुतिपरायणाः ।
परस्वहरणोपायचिन्तकास्सर्वदा जनाः ॥ ४५ ॥
निन्दां कुर्वन्ति सततं पितृमातृकुलेषु च ।
वदन्ति वाचा धर्मांश्च चेतसा पापलोलुपाः ॥ ४६ ॥
छादयन्ति प्रयत्नेन स्वदोषं पापकर्मजम् ।
अपापे दुष्कृतं सम्यग्विवृण्वन्ति नराधमाः ॥ ४७ ॥
धर्ममार्गप्रणेतारं तिरस्कुर्वन्ति पापिनः ।
भविष्यन्ति कलौ प्राप्ते राजानो म्लेच्छजातयः ॥ ४८ ॥
द्विजाश्च क्षत्रिया वैश्या श्शूद्राश्चान्याश्च जातयः ।
अत्यन्त कामिनस्सर्वे संकीर्यन्ते परस्परम् ॥ ४९ ॥
न शिष्यो न गुरुः कश्चिन्नपुत्रो न पिता तथा ।
न भार्या न पतिश्चैव भविता तत्र संकरः ॥ ५० ॥
कलौ च ते भविष्यन्ति धनाढ्या अपि याचकाः ।
रसविक्रयिणश्चापि भविष्यन्ति कलौ युगे ॥ ५१ ॥

1) कु. 2) प्रव्र.

अनावृष्टिभयात्प्रायो गगनासक्तदृष्टयः ।
भविष्यन्ति जनास्सर्वे सदा क्षुद्भयकातराः ॥ ५२ ॥

कलौ [1]सदा भविष्यन्ति स्वल्पभाग्या बहुप्रजाः ।
पतिवाक्यमनादृत्य सदान्यगृहतत्पराः ॥ ५३ ॥

दुश्शीला दुष्टशीलेषु करिष्यन्ति सदा स्पृहाम् ।
परुषानृतभाषिण्यो देहसंस्कारवर्जिताः ॥ ५४ ॥

वाचालाश्च भविष्यन्वि कलौ प्राप्ते च योषितः ।
नगरेषु च ग्रामेषु प्राकाराद्यादिकान् जनाः ॥ ५५ ॥

चोरादिभयभीताश्च काष्ठयन्त्राणि कुर्वते ।
दुर्भिक्षकरपीडाभिरतीवोपद्रुता जनाः ॥ ५६ ॥

गोधूमान्नयवान्नाढ्यान् देशान् प्राप्स्यन्ति दुःखिताः ।
स्वकार्यसिद्धिपर्यन्तं बन्धुत्वं कुर्वते जनाः ॥ ५७ ॥

भिक्षवश्चापि मित्रादिस्नेहसम्बन्धयन्त्रिताः ।
अन्नोपाधिनिमित्तेन शिष्यान् गृह्णन्ति भिक्षवः ॥ ५८ ॥

उभाभ्यामथ हस्ताभ्यां शिरःकण्डूयनं स्त्रियः ।
कुर्वन्त्यो गुरुभर्तॄणामाज्ञां भेत्स्यन्त्यनादृताः ॥ ५९ ॥

पाषण्डालापनिरताः पाषण्डजनसंगिनः ।
यदा द्विजा भविष्यन्ति तदा वृद्धिं गतः कलिः ॥ ६० ॥

अल्पोदकास्तदा मेघा अल्पसस्या च मेदिनी ।
अल्पक्षीरास्तथा गावः क्षीरात्सर्पिर्न जायते ॥ ६१ ॥

एकवर्णा भविष्यन्ति वर्णाश्चत्वार एव च ।
नास्ति वर्णान्तरं तत्र लयं यास्यन्ति मानवाः ॥ ६२ ॥

सीदन्ति सन्तो विलसन्त्यसन्तः परेषु मैत्री स्वजनेषु वैरम् ।
पुत्रा म्रियन्ते जनकश्चिरायुः पश्यन्ति लोकाः कलिकौतुकानि

कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः ।
त्यक्ष्यन्ति हि प्रियान्प्राणान् हीनष्यान्ति स्वकानपि ॥ ६४ ॥

पाषण्डप्रचुरे धर्मे दस्युप्रायेषु राजसु ।
चौर्यानृतवृथाहिंसानानावृत्तिषु वै नृषु! ॥ ६५ ॥

शूद्रप्रायेषु वर्णेषु छागप्रा[1]येषु [2]गोषु च ।
गृहप्रायेष्वाश्रमेषु योगिप्रायेषु बन्धुषु ॥ ६६ ॥

ततश्चानुदिनं धर्मस्सत्यं शौचं दया क्षमा ।
कालेन बलिना राजन्! नक्ष्यत्यायुर्बलं स्मृतिः ॥ ६७ ॥

वित्तमेव कलौ नृणां जन्माचारगुणो[3]दयम् ।
दाम्पत्येऽभिरुचिर्हेतुर्माय़ैव व्यवहारके ॥ ६८ ॥

धर्मन्यायव्यवस्थानां कारणं बलमेवहि ।
स्त्रीत्वमेवोपभोगे स्याद्विप्रत्वे सूत्रमेवहि ॥ ६९ ॥

लिंगमेवाश्रमख्यातावन्यायो वृत्तिकारणम् ।
अवृत्तौ चापि दौर्बल्यं पाण्डित्ये [4]चाफलं वचः ॥ ७० ॥

स्वीकार एव चोद्वाहे शुद्धत्वे स्नानमेव हि ।
उदरम्भरिता स्वार्थे सत्यत्वे धार्ष्ट्यमेवहि ॥ ७१ ॥

दाक्ष्ये कुटुम्बभरणं यशोऽर्थे धर्मसेवनम् ।
एवमाद्याः कलियुगे भविष्यन्ति क्रमेण हि ॥ ७२ ॥

यदा मायानृतं तन्द्रा निद्रा हिंसा विषादनम् ।
शोको मोहो भयं दैन्यं सकलिस्तामसस्स्मृतः ॥ ७३ ॥

एवं कलियुगे धर्मास्सर्वे साम्प्रतमीरिताः ।
शिवपूजापरा ये च शिवनामपरायणाः ॥ ७४ ॥

त एव शिवतुल्याश्च न हि तान्बाधते कलिः ।
न्यूनातिरेकिता सिद्धा कलौ वेदोक्त[5]कारणम् ॥ ७५ ॥

हरस्मरणमेवात्र सम्पूर्णफलदायकम् ।
शिव! शंकर! रुद्रेति नीलकण्ठ! त्रिलोचन ॥ ७६ ॥

इतीरयन्ति ये नित्यं न हि तान्बाधते कलिः ।

इति श्रीशिवतत्त्वरत्नाकरे चतुर्थकल्लोले
कलिधर्मवर्णनं नाम दशमस्तरंगः

---

[1] युगे.

[1] यासु. [2] धेनुषु. [3] दयाः [4] चापलं [5] कर्मणाम्.

अथैकादशस्तरंगः.

एवमेव कलेर्धर्मास्सङ्ग्रहेण निरूपिताः ।
नानाविधांस्तथोत्पातान् कलिदोषसमुद्भवान् ॥

कथयामि समासेन तान्कुमार! निशामय ।
देशाधिपे महाराजे दोषबुद्धिमनुव्रते ॥ २ ॥

अपचारो महानत्र प्रजासु क्षामपीडया ।
व्याधिभिर्वाथ बहुभिरथवा राजपीडया ॥ ३ ॥

उत्पातास्सम्भविष्यन्ति पुरे ग्रामे वनेऽथवा ।
काको मैथुनयुक्तश्चेच्छ्वेतो वा यदि दृश्यते ॥ ४ ॥

राजा वा म्रियते तत्र तदा देशो विनश्यति ।
उलूको वाशते यत्र निपतेद्वा तथा गृहे ॥ ५ ॥

ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ।
प्रासादतोरणाट्टालद्वारप्राकारवेश्मनाम् ॥ ६ ॥

अनिमित्तं तु पतनं दृढानां राजमृत्यवे ।
रजसा [1] वाथ धूमेन दिशो यत्र समाकुलाः ॥ ७ ॥

विवर्णा यत्र दृश्यन्ते ब्राह्मणाश्च विकर्षिणः ।
ऋतवस्तु विपर्यस्ता नरो वा पूज्यपूजितः ॥ ८ ॥

नक्षत्रयोगव्यत्यासस्ते सर्वे भयसूचकाः ।
अग्निर्यत्र न दृश्येत हूयमानेषु शान्तिषु ॥ ९ ॥

पूर्णकुम्भास्स्रवन्त्येव वह्निर्वा विप्रलुप्यते ।
मङ्गल्यास्स्वामिनो यत्र न श्रूयन्ते स्वरास्तथा ॥ १० ॥

वाद्यमाना न वाद्यन्ते वाद्यन्ते चाप्यनाहताः ।
अचलाः प्रचलन्त्येव प्रचला न चलन्ति च ॥ ११ ॥

प्रविशन्ति यदाग्राममारण्या मृगपक्षिणः ।
अरण्यं यान्ति वै ग्राम्यास्स्थलं यान्ति जलोद्भवाः ॥ १२ ॥

स्थलजा वा जलं यान्ति घोरं नाशं विनिर्दिशेत् ।
राजद्वारे पुरद्वारे शिवा यान्त्यशुभप्रदाः ॥ १३ ॥

दिवा रात्रिञ्चरा यान्ति रात्रौ यान्ति दिवाचराः ।
ग्राम्यास्त्यजन्ति ग्रामं वा तच्चोत्पातस्य लक्षणम् ॥ १४ ॥

सन्ध्यासु दीप्तं शान्तं वा शिवा वाशन्ति विस्वरम् ।
मण्डलानि प्रकुर्वन्तस्ते वै मृतिफलप्रदाः ॥ १५ ॥

1) स,

प्रदोषे कुक्कुटो वाशेद्धेमन्ते वापि कोकिलः ।
अर्कोदयेऽर्काभिमुखस्तदा मृत्युभयं भवेत् ॥ १६ ॥

गृहं कपोतः प्रविशेत् क्रव्यादो वा विलीयते ।
मधु वा मक्षिकाः कुर्युर्मृत्युर्गृहपतेर्भवेत् ॥ १७ ॥

प्राकारद्वारगेहेषु तोरणापणवीथिषु ।
केतुछत्रायुधाद्येषु क्रव्यादो निपतेद्यदि ॥ १८ ॥

जायते वाथ वाल्मीको मधु वा दृश्यते यदि ।
स देशो नाशमायाति स्वामी वा म्रियते तदा ॥ १९ ॥

मूषकांञ्छलभान्दृष्ट्वा प्रभूतं क्षुद्भयं भवेत् ।
नरापचारान्नियम मपरज्यन्ति देवताः ॥ २० ॥

नानापराधा [1] देवानामुपसर्गः प्रजायते ।
दिव्यान्तरिक्षभौमाश्च त्रिविधाः परिकीर्त्तिताः ॥ २१ ॥

ग्रहर्क्षवैकृतं दिव्यमान्तरिक्षं निबोध मे ।
उल्कापातो दिशां दाहः परिवेषस्तथैव च ॥ २२ ॥

गन्धर्वनगरं चैव वृष्टिश्च विकृता च या ।
एवमादीनि लोकेऽ [2]स्मिन्नान्तरिक्षाणि निर्दिशेत् ॥ २३ ॥

चरं स्थिरं च लोकेऽस्मिन् भूकम्पमपि भूमिजम् ।
जलाशयानां विकृतं भौममेतद्विनिर्दिशेत् ॥ २४ ॥

भौमे चाथ फलं ज्ञेयं चिरेणैव विपच्यते ।
उभयं मध्यमफलं मध्यकालफलप्रदम् ॥ २५ ॥

अद्भुते तु समुत्पन्ने यदि वृष्टिश्शिवाभवेत् ।
सप्ताहाभ्यन्तरेज्ञेयमद्भुतं निष्फलं भवेत् ॥ २६ ॥

अद्भुतश्च [3] विनष्टश्चेद्विना शान्त्या प्रदृश्यते ।
त्रिभिर्वर्षैस्तु तद्भव्यं सुमहद्भयकारणम् ॥ २७ ॥

राज्ञश्शरीरे लोके च पुरे द्वारे पुरोहिते ।
पाकमायाति पुत्रे च तथा वै कोशवाहने ॥ २८ ॥

ऋतुस्वभावाद्राजेन्द्रा भवन्त्यद्भुतसंज्ञिताः ।
शुभावहाश्च विज्ञेयास्तां च मद्वदतः शृणु ॥ २९ ॥

वज्राशनिमहीकम्पसन्ध्यानिर्घातनिस्स्वनाः ।
परिवेषरजोधूमरक्तास्तार्कमयोदयाः ॥ ३० ॥

1) द्दे. 2) स्मिन्न. 3) विनाश.

द्रुमेभ्योऽन्नरसस्नेहबहुपुष्पफलोद्गमाः ।
गोपक्षिमद्यवृद्धिश्च शिवाय मधुमाधवे ॥ ३१ ॥

तारोल्कपातकलुषंकपिलार्केन्दुमण्डलम् ।
अनग्निज्वलनस्फोटधूमरेण्वनिलाहतम् ॥ ३२ ॥

रक्तपद्मारुणा सन्ध्या नभः क्षुब्धार्णवोपमम् ।
सरितां चाप्सु संशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत् ॥ ३३ ॥

चक्रायुधपरीवेषविद्युच्छुष्मविरोहणम् ।
चलनं चाद्रिगेहाणां वर्षासु न भयावहम् ॥ ३४ ॥

दिव्यस्त्रीभूतगन्धर्वविमाद्भुतदर्शनम् ।
ग्रहनक्षत्रताराणां दर्शनं च दिवाकरम् ॥ ३५ ॥

गीतवादित्रनिर्घोषो वनपर्वतसानुषु ।
सस्यवृद्धिश्च पाण्डुत्वमग्रेऽपां शारदाश्शुभाः ॥ ३६ ॥

शीतानिलतुषारत्वं नर्दनं मृगपक्षिणाम् ।
रक्षोयक्षादिसत्वानां दर्शनं वागमानुषी ॥ ३७ ॥

दिशो धूमान्धकाराढ्यास्सनभोवनपर्वताः ।
उच्चैस्सूर्योदयास्ते च हेमन्ते शोभनास्स्मृताः ॥ ३८ ॥

हिमवातानिलोत्पातविरूपाद्भुतदर्शनम् ।
कृष्णाञ्जनाभमाकाशं तारोल्कापातपिञ्जरम् ॥ ३९ ॥

चित्रगर्भोद्भवः स्त्रीषु गजाश्वमृगपक्षिषु ।
पत्राङ्कुरलतानां च विकाराश्शिशिरे शुभाः ॥ ४० ॥

ऋतुस्वभावेन विनाद्भुतस्य जातस्य दृष्टस्य तु शीघ्रमेव ।
कृत्वागमं शान्तिरनन्तरं तु कार्या यथोक्ता वसुधाधिपेन ॥ ४१ ॥

देवतार्चाः प्रणश्यन्ति वर्षन्ते प्रज्वलन्ति वा ।
आधावन्ति च रोदन्ति प्रस्विद्यन्ति हसन्ति च ॥ ४२ ॥

उत्तिष्ठंति निषेधंति दहंति शमयंति च ।
अधोमुखाश्च तिष्ठंति स्थानात्स्थानं व्रजंति हि ॥ ४३ ॥

वमन्त्यग्निं च वा धूमं स्नेहं रक्तं वसां तथा ।
एवमाद्याश्च दृश्यंते विकारास्साहसोत्थिताः ॥ ४४ ॥

देवायतनचैत्येषु नरो वासं न रोचयेत् ।
राज्ञो वा निधनं तत्र सचदेशो विनश्यति ॥ ४५ ॥

देवस्थानेषु चोत्पतान् दृष्ट्वा देशभयं वदेत् ।
पशूनां रुद्रजं ज्ञेयं नृपाणां लोकपालजम् ॥ ४६ ॥

ज्ञेयं सेनापतीनां च भयं स्कन्दगणेशजम् ।
लोकानां विष्णुवाय्विन्द्रमृत्युकर्मसमुद्भवम ॥ ४७ ॥

विनायकोद्भवं ज्ञेयं गणानां चैव नायके ।
देवदेवे नृपालस्यं देवस्त्रिषु नृपस्त्रियाः ॥ ४८ ॥

वास्तुदेवेषु विज्ञेयं गृहाणामेव नान्यथा ।
देवतार्चाविकारेषु श्रुतिवेत्ता पुरोहितः ॥ ४९ ॥

देवतार्चान्तु गत्वावै स्नातामाच्छाद्य धूपयेत् ।
पूजयेत्तां महाभाग! गन्धमाल्यान्नसम्पदा ॥ ५० ॥

मधुपर्केण विधिवदुपतिष्ठेदनन्तरम् ॥

तल्लिङ्गेन च मन्त्रेण स्थालीपाकं यथाविधि ॥
पुरोधा जुहुयादग्नौ सप्तरात्रमतन्द्रितः ॥ ५१ ॥

विप्राश्च पूज्या मधुरान्नपानैस्सदक्षिणैस्सप्तदिनैर्नरेन्द्र!
अथाष्टमेऽह्निक्षितिगोप्रदानैः स्सकाञ्चनैश्शांतिमुपैति यावत्

अनग्निर्दीप्यते राष्ट्रे भृशमग्निरविस्वरः ।
नदीप्यते चाध्यमानस्सराष्ट्रः पीड्यते नृपः ॥ ५३ ॥

प्रज्वलेदम्बु मांसं वा तदहः स्वामिनो वधः ।
प्रासादे तोरणे चैव वापीवेश्मपुरादिषु ॥ ५४ ॥

एतानि यत्र दह्यन्ते तदहः स्वामिनो वधः ।
विद्युतो वा विदाह्यन्ते तत्रापि नृपतेर्भयम् ॥ ५५ ॥

धूमश्चानग्निजो यत्र यत्र विन्द्यान्महद्भयम् ।
तटिद्विनाभ्रं गगने भयं स्याद्वृष्टिवर्जनात् ॥ ५६ ॥

दिवा सतारं गगने तथैव भयमादिशेत् ।
विकारः स्वायुधानां चेत्तत्र संग्राममादिशेत् ॥ ५७ ॥

त्रिरात्रोपोषितस्तत्र पुरोधा स्सुसमाहितः ।
समिद्भिः क्षीरवृक्षाणां सहस्रेण घृतेन च ॥ ५८ ॥

दद्यात्सुवर्णं च तथा द्विजेभ्यो गां चैव वस्त्राणि तथाऽभयं च ।
एवं कृते पापमुपैति नाशं यदग्निवैकल्यभयं नरेन्द्र! ॥ ५९ ॥

पुरेषु येषु दृश्यन्ते पादपा दैवचोदिताः ।
रुदन्तो वा हसन्तो ता स्रवन्वो वा रसं बहु ॥ ६० ॥

अरोगा वा विना वातं शाखां मुञ्चन्त्यसङ्क्रमम् ।
फलं पुष्पं तथा काले दर्शयंति त्रिहायनाः ॥ ६१ ॥

क्षीरं स्नेहं सुरां रक्तं मधु तोयं स्रवंति च ।
शुष्यन्त्यरोगास्सहसा शुष्का रोहंति वा पुनः ॥ ६२ ॥

उत्तिष्ठंतीह पतिता पतंति च तथोद्धताः ।
तत्र वक्ष्यामि ते राजन्! विपाकं फलमेव च ॥ ६३ ॥

रोदने व्याधिरभ्येति हसने देशविभ्रमः ।
शाखाप्रपतनं कुर्यात्सङ्ग्रामे योधपातनम् ॥ ६४ ॥

बालानां पतनं स्यात्तु बालानां फलपुष्पतः ।
स्वराष्ट्रभेदं कुरुते फलपुष्पं निरंतरम् ॥ ६५ ॥

क्षयं सर्वत्र च क्षीरं स्नेहं दुर्भिक्षलक्षणम् ।
वाहनाशकरं मेध्यं रक्तं संग्राममादिशेत् ॥ ६६ ॥

मधुस्रावे तथा व्याधिः जलस्रावे न वर्षति ।
अरोगशोषणं ज्ञेयं भयदुर्भिक्षलक्षणम् ॥ ६७ ॥

शुष्केषु संप्ररूढेषु वीर्यमन्नं न रोहति ।
उत्थानं पतितानां च भयखेदकरं तथा ॥ ६८ ॥

स्थानात् स्थानस्य गमने देशभङ्गं तदादिशेत् ।
जल्पत्स्वपि च वृक्षेषु रुदत्स्वपि च न क्षयम् ॥ ६९ ॥

पुष्पैः फलैर्वा विकृतै राज्ञो मृत्युं तदादिशेत् ।
अन्येषु चैवं वृक्षेषु वृक्षोत्पाते त्वतंद्रितः ॥ ७० ॥

आच्छादयित्वा तं वृक्षं गन्धमाल्यैर्विभूषयेत् ।
वृक्षोपरि तथा च्छत्रं कुर्यात्कोपप्रशान्तये ॥ ७१ ॥

शिवमभ्यर्चयेद्देवं पशुं चास्मै निवेदयेत् ।
मूले चास्य षडावृत्त्या रुद्रं चैव जपेत्ततः ॥ ७२ ॥

मध्वाज्ययुक्तेन तु पायसेन संपूज्य विप्रांश्च भुवं च दद्यात् ।
गीतेन नृत्तेन तथार्चयेत्तं देवं परं पापविनाशहेतोः ॥ ७३ ॥

अतिवृष्टिरनावृष्टिः दुर्भिक्षादिभयप्रदा ।
अनृता विकृता व्यक्तं वृष्टिर्व्याधिभयाय तु ॥ ७४ ॥

शीतोष्णानां विपर्यासे ऋतूनां रिपुजं भयम् ।
शोणितं वर्षते यत्र तत्र शस्त्रभयं भवेत् ॥ ७५ ॥

अङ्गारपांसुवर्षे तु नगरं तद्विनश्यति ।
मज्जास्थिस्नायुमांसानां जनमारभयं भवेत् ॥ ७६ ॥

पुष्पं फलं तथाप्यन्नं हिरण्यानि भयानि च ।
पांसुजं तु फलानां तु वर्षणे रोगसम्भवः ॥ ७७ ॥

छिद्रं चातिप्रवर्षाय सस्यानामार्तिवर्धनम् ।
विरजस्के रवौ व्यभ्रे यथास्थानं न दृश्यते ॥ ७८ ॥

निरभ्रायां तथा रात्रौ तथा याम्योत्तरेण च ।
इन्द्रायुधं तथा दृष्ट्वा ह्युल्कापातं तथैव च ॥ ७९ ॥

दिग्दाहपरिवेषौ च गन्धर्वनगरं तथा ।
परचक्रे भयं कुर्याद्विशोपस्करमेव च ॥ ८० ॥

सूर्येन्दुपर्जन्यसमीरणानां यागस्तु कार्यो विधिवन्नरेन्द्रैः ।
धनानि गोकाञ्चनदक्षिणाश्च देयाद्विजानामघनाशहेतोः ॥ ८१ ॥

नगरादपसर्पन्ते समीपमुपयांति च ।
नद्यो नदप्रस्रवणा विरसा हि भवंति च ॥ ८२ ॥

विवर्णं कलुषं तत्र फेनवर्जं च सङ्कुलम् ।
क्षीरस्नेहासुरासक्तं वहन्ते चाकुलोदकाः ॥ ८३ ॥

षण्मासाभ्यन्तरे तत्र परचक्रभयं भवेत् ।
जलाशया नदन्त्येव प्रज्वलंति कथंचन ॥ ८४ ॥

प्रचलत्यम्बुजिह्वां च ज्वाला धूमं सृजंति च !
सङ्गीतशब्दाः श्रूयंते जनमारोऽत्र संभवेत् ॥ ८५ ॥

जप्तव्या वारुणा मंत्रास्तैस्तु होमो जपो भवेत् ॥
मध्वाज्ययुक्तं परमान्नमत्र देयं द्विजानां नृप! भोजनार्थम् ।
गावश्च देयाः सितवस्त्रयुक्ता स्तथोदकुम्भास्सकलाघशान्त्यै ॥ ८६ ॥

अकालप्रसवा नार्यः कालातीतप्रजास्तथा ।
अन्यान्यपि च लोकानामनिष्टव्यञ्जनानि च ॥ ८७ ॥

हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः ।
पशवः पक्षिणश्चैव तथैव च सरीसृपाः ॥ ८८ ॥

विनाशं तस्य देशस्य कुलस्यच विनिर्दिशेत् ॥
विवासयेत्तां नृपति स्स्वराष्ट्रात् स्त्रियश्च पूज्याश्च तथा द्विजेन्द्राः ।
दानैस्तथा ब्राह्मणतर्पणैश्च लोके ततश्शांतिमुपैति पापम् ॥ ८९ ॥

एवंविधानि राजेन्द्र! ह्यद्भुतानि भवंति च ।
अन्यान्यपि च लोकानामनिष्टव्यञ्जनानि च ॥ ९० ॥

अमी गणेभ्यो वसवेश्वरेण धर्माः कलेरद्भुतसंभवाश्च ।
निरूपिताः प्राग्भवते प्रदिष्टास्सङ्क्षेपतोऽमी भुवने विचित्राः ॥ ९१ ॥

इति श्रीशिवतत्त्वरत्नाकरे चतुर्थकल्लोले
कल्युत्पातनिरूपणं नाम एकादशस्तरंगः

अथ द्वादशस्तरंगः

उत्पाताः कलिधर्मांश्च संग्रहात्ते निरूपिताः ।
प्राग्ये गणेभ्यो बसवेश्वरेण परिकीर्त्तिताः ॥ १ ॥
सिंहासनं नरपतेर्भवेदत इतीरितम् ।
तत्र मे महती स्वामिन्! शुश्रूषा वर्तते हृदि ॥ २ ॥
तद्वृत्तान्तं विशेषेण मह्यमाख्याहि सर्ववित्! ।
पुत्र! सर्वं ब्रुवे तुभ्यं समाहितमनाः शृणु ॥ ३ ॥
साकेतनगरे नष्टे विद्यारण्यमुनीश्वरैः ।
निर्मितं चक्रनगरं भूपं हरिहरं प्रति ॥ ४ ॥
तस्मिन् पुरवरे रम्ये श्रीदेवी चक्रनायिका ।
सान्निध्यमकरोत्तत्र शतं वर्षसहस्रकम् ॥ ५ ॥
विद्यारण्यमुनीन्द्रस्य वृत्तान्तमधुना ब्रुवे ।
येन व्यधायि नगरी विद्यानगर संज्ञिता ॥ ६ ॥
पुरा विप्रवरः कश्चिच्छिवधर्म इति श्रुतः ।
गृहस्थधर्ममालम्ब्य तस्थौ शीलसमन्वितः ॥ ७ ॥
स च स्त्रीपुत्रपौत्राद्यैर्दारिद्र्येण महीयसा ।
दूयमानमना नित्यं चिन्तयन्समवर्तत ॥ ८ ॥
ततस्स रेवणासिद्धसम्प्रदायप्रवर्त्तिनाम् ।
शंकराचार्यवर्याणां पारम्पर्यक्रमागतम् ॥ ९ ॥
सन्न्यासिनमुपाश्रित्य विनयावनतोऽधिकम् ।
वृत्तान्तमखिलं तस्मै यतये स्वं व्यजिज्ञपत् ॥ १० ॥
स यतिर्विप्रवर्याय श्रीविद्यां षोडशाक्षरीम् ।
इह सौख्यप्रदामन्ते मुक्तिदां समुपादिशत् ॥ ११ ॥
तस्मै श्रीचक्रराजस्य पूजाविधिमपि क्रमात् ।
तस्याभ्यनुज्ञामासाद्य द्विजस्सद्भक्तिपूर्वकम् ॥ १२ ॥
आचचार पुनश्चर्यां स चैकादश संख्यया ।
अथापि देवीमर्चाभिरप्रसन्नां विलोक्य सः ॥ १३ ॥
खिन्नचेता बलाद्दग्धुं श्रीचक्रमुपचक्रमे ।
तदा सा वृद्धमातंगीरूपमास्थाय देवता ॥ १४ ॥
विप्र! भोः! कीदृशं कर्म यतसे कर्तुमरिय ।
इति पृष्टे तया विप्रे निजोदन्तं निवेदिनि ॥ १५ ॥
स्मित्वा तस्यां तु भो! विप्र! त्वमालोकय पार्श्वतः ।
एवं वाचं ब्रुवाणायामुदैक्षत स पार्श्वतः ॥ १६ ॥
एकादश गिरींस्तत्र दह्यमानान्विलोकयन् ।
किमेतदिति तां विप्रः प्रोवाचैषा च सम्प्रति ॥ १७ ॥
एनांसि यानि वृत्तानि प्रागेकादश जन्मसु ।
तानि पर्वतरूपाणि दह्यन्ते पुरतस्तव ॥ १८ ॥
माविजन्मन्यभीष्टं ते सिध्येदित्यभिधाय सा
अन्तर्हिताऽभवत्तस्मिन् समये तदनन्तरम् ॥ १९ ॥
स्वव्यापाराद्धुपरतो गुरोरभ्यर्णमभ्यगात् ।
अवोचदप्युदन्तं स्वं ध्यात्वा च गुरुराह तम् ॥ ३० ॥
अन्यजन्मकृते भूयात्सन्न्यासो भवतो द्विज! ।
यत्र प्रसादश्चक्रेऽस्या भवेदिति समीरितम् ॥ २१ ॥
इत्युक्तेनार्थितस्तेन स सन्न्यासमुपादिशत् ।
विद्यारण्य इति प्रादादाख्यां तस्मै ततःपरम् ॥ २२ ॥
रेवणासिद्धसम्प्राप्तं चन्द्रमौलीशमप्यदात् ।
आख्यच्चानेन लिंगेन तवाभीष्टाप्तिरित्यपि ॥ २३ ॥
अयासीच्च ततो वर्यं बदर्याश्रममप्यसौ ।
श्रृंगिणी सहितस्तत्र व्यासानुग्रहवैभवात् ॥ २४ ॥
त्रिकालज्ञानसम्पत्तिं प्राप विद्याश्च सर्वशः ।
ततो निर्गत्य पम्पाख्यं क्रमात्क्षेत्रं समाश्रयन् ॥ २५ ॥
विरूपाक्षस्य भजनं कुर्वन् तत्र स्थितोऽभवत् ।
विद्यारण्ये विरूपाक्षदेवालयमुपाश्रिते ॥ २६ ॥
चन्द्रमौलीशितुः पूजां समाचरति सर्वदा ।
जातस्स्वप्नो शिवस्तस्मिन् जगादैवमनायकम् ॥ २७ ॥
भूमण्डलमिदं म्लेच्छकिरातायैरुपद्रुतम्
आयास्यतो महान्तौ द्वौ ताभ्यामारचयन्पुरीम् ॥ २८ ॥
विधाय पट्टबन्धं च तत्र स्थापय ताविति ।
अपरेद्युर्यथापूर्वं विरूपाक्षालय ।स्थिते ॥ ३० ॥
नियमं कुर्वति स्वीयं विद्यारण्ययतीश्वरे ।
उज्जयिन्या हरिहरबुक्कनामांकितावुभौ ॥ ३० ॥

वीररुद्रमहीभर्तुः कोशगेहाधिकारिणौ ।
तस्यात्यये विषादेन तीर्थयात्राविधायिनौ ॥ ३१ ॥
योजनादूपतुर्दूरे विरूपाक्षदिदृक्षया ।
यदा स्वप्ने तथा तस्यां रात्रावाचष्ट शंकरः ॥ ३२ ॥
श्रुणुतं भो युवां यातं विरूपाक्षस्य सन्निधिम् ।
अध्यास्ते सुमहान् भिक्षुर्लोकानुग्रहकांक्षया ॥ ३३ ॥
निर्माणं नगरस्यापि कृत्वा वां स्थापयेदिति ।
तत्परेद्यवि मध्याह्ने तयोः स्वं वदमानयोः ॥ ३४ ॥
ब्रुवतोः स्वमुदन्तं च स्वप्नसंभाषणादिकम् ।
भावं बुद्ध्वा निजोदन्तं श्रावयित्वा च तावुभौ ॥ ३५ ॥
संवादात्स्वप्नयोर्मत्वा कार्यस्यावश्यभाविताम् ।
त्रयस्ते नगरारम्भे यावच्चिन्तां वितेनिरे ॥ ३६ ॥
तावत्कश्चिन्मेषपालः शंकरानुग्रहेरितः ।
विदित्वा हृदयं तेषामिदमूचे परं वचः ॥ ३७ ॥
तीरें तु तुंगभद्राया दक्षिणे पर्वते स्थिता ।
महालक्ष्मीरभीष्टं वश्चंसेत्किंच ममाभि धा ॥ ३८ ॥
न ग्राह्योऽनेन चार्थोऽयं समुदीरित इत्यपि ।
निवेदनीयं नो देव्या इत्यस्यानन्तरं त्रयः ॥ ३९ ॥
तल्लक्ष्मीभवनं प्राप्य रचयामासुरर्चनम् ।
देवी साप्यशरीरोत्थवाचा मेषपतौ कृते ॥ ४० ॥
उपहारे वदेयं व इति तान् प्रत्यवोचत ।
मेषपालसमक्षं तेष्वागतेषु पुनस्ततः ॥ ४१ ॥
सोपहारीकृतेर्वार्ता परोक्षामपि च स्वतः ।
तेभ्यः प्रागेव तत्रत्यां स्वमाहात्म्येन शंसति ॥ ४२ ॥
स्वपरोक्षार्थविज्ञाता महानित्यवगम्य तम् ।
तस्योपहारीकृतये सान्त्वयत्सु तदा पुनः ॥ ४३ ॥
तेन चैवं समाचरव्यौ देवानामिष्टसिद्धये ।
अदादसून् दधीचिः प्राग्युष्माकं कार्यसिद्धये ॥ ४४ ॥
वितरेयं शरीरं वो ममैकं कुरुतेप्सितम् ।
त्रयोदश त्वयासाकं ये च स्युर्भाविनो नृपाः ॥ ४५ ॥
ते मदीयाभिधानांका यूयं विख्यातिमाप्नुत ।
इत्युदीर्याथ सविधं देव्याः प्राप्य तिरोहितः ॥ ४६ ॥

तस्यामन्तर्भवं नेष बहिर्न क्वाप्यलक्ष्यत ।
देवता ज्ञापयामास विद्यारण्ययतीश्वरम् ॥ ४७ ॥
त्वया श्रीचक्ररूपेण नगरे निर्मिते सति ।
तत्पुराभ्यन्तरे दृष्टा स्वर्णवृष्टिर्भविष्यति ॥ ४८ ॥
सत्रिपादत्रिघटिकापर्यन्तमिति सोप्यथ ।
अकल्पयत्पुरं रम्यं यथा देव्या समीरितम् ॥ ४९ ॥
ततो हरिहरस्यादौ पट्टबन्धमकारयत् ।
अशिषत्सोऽपि वसुधामनाकलितशात्रवम् ॥ ५० ॥
शिष्टानां पालने पूर्वं दुष्टानां निग्रहे परम् ।
भागं स्वनामधेयस्य सार्थकं स विनिर्ममे ॥ ५१ ॥
विद्यारण्याय बिरुदान्यात्मीयानि च दत्तवान् ।
सम्पदं च सदुत्पन्नां तस्मै पाद्यमिवाब्धये ॥ ५२ ॥
तमारभ्य महीपाला मेषपालोपनामकाः ।
त्रयोदश महीमेतामरक्षन्निति संयुतम् ॥ ५३ ॥
आदौ हरिहरो बुक्कस्ततो हरिहरस्तथा ।
विरूपाक्षस्ततो बुक्कस्ततो देवस्ततः परम् ॥ ५४ ॥
रामराजस्ततः पश्चाद्विरूपाक्षस्ततः परम् ।
देवस्ततो विरूपाक्षस्ततो मारपनायकः ॥ ५५ ॥
ततो रामो विरूपाक्षस्ततो भूपास्त्रयोदश ।
द्वात्रिंशदुत्तरानेते द्विशताब्दान् क्षितौ स्थिताः ॥ ५६ ॥
त्रयोदश नृपालेभ्यः पश्चात्सप्त नृपा इमे ।
प्रौढो द्वादश वर्षाणि दश वीरनृसिंहराट् ॥ ५७ ॥
ततस्साल्वनृसिंहाख्यो द्वादश त्रीनथाच्युतः ।
चत्वारिंशत्ततः कृष्णस्ततो द्वेतु सदाशिवः ॥ ५८ ॥
चतुर्विंशतिवर्षाणि रामराजो महीपतिः ।
एवं सप्तमहीपालास्ततः क्षितिमपालयन् ॥ ५९ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषड्[1]ध्वोपादानविन्दुकारणचिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारदश्रीमत्केळदिबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूतशिवतत्त्वरत्नाकरेचतुर्थकल्लोले नरपतिसिंहासनवृत्तान्तनिरूपणं नाम द्वादशस्तरंगः ॥

1) श्री.

द्विचत्वारिंशदाधिकशतोत्तरसहस्रकम् ।
ग्रन्था रहितरंगाढ्याः कल्लोलेऽस्मिंश्चतुर्थके ॥
श्रीमत्सद्गुणसोमशेखरलसच्चन्नाम्बिकासूनुना
श्रीदीक्षागुरुचन्नवीरकरसंज्ञातेन विद्याब्धिना ।
गौरीनाथपदाब्जभृंगबसवक्षोणीभृता निर्मिते
कल्लोलः परिपूरितः कृतिवरे त्वस्मिंश्चतुर्थोऽभवत् ॥

पुराणस्मृतिसिद्धान्तानितिहासविमिश्रितान् ।
विद्यारण्यकृतिं चैव पितामहसुसंहिताम् ॥
विलोक्यायं विरचितः कल्लोलोऽभूच्चतुर्थकः

सपाप्तश्चायं चतुर्थः कल्लोलः

श्रीः

श्रीशिवतत्त्वरत्नाकरे

पञ्चमकल्लोले

प्रथमस्तरंगः.

उत्संगे वसदंविकेति हि रुषा प्राप्तं जडत्वं शिर-
स्त्वत्स्नानेन जटाभवच्छिरसिजा वैरूप्यमक्ष्णामपि ।
अस्त्यंगे परिदृश्यते मलिनता कण्ठोऽपि गोप्ता न मे
तातस्येति वदन्तमीक्ष्य तनुजं शम्भुर्हसन् पातु वः ॥ १ ॥

विद्यानगरनिर्माणं तत्र सिंहासनोद्भवः ।
तत्र राज्ञां सार्वभौमपदवीसंभवक्रमः ॥ २ ॥

तेषां च संख्यावर्षाणि श्रुत्वाऽत्यानन्दितोऽभवम् ।
देशो गणानां वासार्हो वसवेश्वरकीर्त्तितः ॥ ३ ॥

यश्च मन्नामको भक्तस्तत्र स्यादित्युदीरितः ।
मल्लदेशस्स को वा स्याद्भक्तस्तन्नामकश्च कः ॥ ४ ॥

तद्वंशस्य क्रमः कोवा सर्वमेतान्निरूपय ।
कुमार! वर्णये सर्वं सावधानमनाः शृणु ॥ ५ ॥

रम्यं वनवसादेशकुटजाद्र्योर्यदन्तरम् ।
मल्लदेश इति ख्यातो देशस्सोऽयं समृद्धिमान् ॥ ६ ॥

यत्राश्चर्यकरानेकमण्यौषध्यस्समाश्रिताः ।
वर्तते कुटजाख्योऽद्रिस्सिध्दसंघनिषेवितः ॥ ७ ॥

अस्मिन्नर्थेऽस्ति संवादश्शिवगौर्योस्स कथ्यते ।
यथा काशी त्रिलोकेषु गीयते मत्समाश्रिता ॥ ८ ॥

तथैव सिद्धर्षिगणैर्गीयते तदुपत्यका ।
परितस्सरितो यस्यास्तीर्थायुतशतानि च ॥ ९ ॥

यदंगे मुख्यतीर्थानि निवसंति वरानने!
तेषां नामानि वक्ष्येऽहं शृणु देवि! समासतः ॥ १० ॥

तावत्तदंगविस्तार औन्नत्यं च मयोच्यते ।
पूर्वपश्चिमतो देवि! सार्धयोजनमायतः ॥ ११ ॥

दक्षिणोत्तरमाने तु सार्धद्विक्रोशसम्मिता ।
गजेन्द्राकारवद्भाति मुखतः पृष्ठतः प्रिये! ॥ १२ ॥

पश्चिमाभिमुखत्वाच्च पूर्वभागे तु निम्नता ।
शिखरस्योन्नतत्त्वं तु पञ्चक्रोशमितं प्रिये! ॥ १३ ॥

पृष्ठतः पूर्वभागेतु सार्धक्रोशततस्ततः ।
यन्मुखे वह्नितीर्थं तु नेत्रयोरत्रिभास्करौ ॥ १४ ॥

यत्पार्श्वयोर्वर्षचक्रं तत्कुक्षौ नैव गण्यते ।
ईशान्यां चक्रतीर्थं तु तथाग्नेय्यां तु नाहुषम् ॥ १५ ॥

रजताश्माह्वयं दक्षे नैरृत्यां तु विनायकम् ।
वायव्यां व्याघ्रतीर्थं तु कमण्डलुरथोत्तरे ॥ १६ ॥

यदंगाद्विंशतेर्हस्तादत्रितीर्थं [1] ततस्त्वधः ।
किञ्चित्पश्चिमभागे तु शतबिन्दुं विदुः प्रिये ॥ १७ ॥

तदधः पञ्चपञ्चाशद्धस्तमाने सहस्रकम् ।
[2] काप्याश्मतीर्थं चक्राह्वमत्रिर्व्याघ्रः कमण्डलुः ॥ १८ ॥

शतबिन्दुसहस्राह्वमृषभं वह्निसंज्ञकम् ।
एतानि नव मुख्यानि सर्वसिद्धिकराणि च ॥ १९ ॥

ऋषिभिस्सिद्धसाध्यार्थैरेषु तीर्थेष्वतन्द्रितैः ।
सिद्धयोऽनेकशो लब्धा देवदानवदुर्लभाः ॥ २० ॥

अत्रिश्च वृषभो योगी नागार्जुनविनायकाः [3] ।
वह्निर्व्याघ्रस्तथा ब्रह्मा हरिर्नहुषभूपतिः ॥ २१ ॥

ऐश्वर्यार्थं च सिध्यर्थं सुरा अपि महत्तरम् ।
तपस्तेपुः सुबहुलं कालं कमललोचने! ॥ २२ ॥

वायुर्व्याघ्रस्वरूपेण हरिश्च[4] क्रात्मना स्वयम् ।
नागोऽन्तकस्वरूपेण तपस्तेपुस्सुसिद्धये ॥ २३ ॥

अन्तर्नगरवासी यो हरो गंगाधरः [5] स्वयम् ।
ताण्डवाय प्रवृत्तोऽभूदम्बिकायाः पुरः पुरा ॥ २४ ॥

मूर्ध्नि गंगाप्रवाहस्तु जटाताडनतः प्रिये! ।
शतधा शतबिन्दुः स्यात्सहस्रं च सहस्रधा ॥ २५ ॥

लोकं पुनीतस्तौ देवि! दिव्यसिद्धिप्रदौ नृणाम् ।
अन्ये च तीर्थप्रवरास्सर्वसिद्धिविधायकाः ॥ २६ ॥

---

1) स्ततः. 2) रौप्याश्मतीर्थं. 3) कौ. 4) न्द्रा. 5) क्वचित्.

बहुनात्र किमुक्तेन मया तत्रैव गम्यते ।
तत्र स्थितानां सिद्धानां यथाभिलषितं ददत् ॥ २७ ॥
निवसिष्यामि देव्यस्मिंस्तवानु मतिरस्ति चेत् ।
त्वमपि त्रिषु लोकेषु मातेति बहुधोच्यसे ॥ २८ ॥
संहृत्य मूकनामानं दानवं बहुदर्पितम् ।
इहैव वस मूकाम्बेत्याख्यां प्राप्तवती सती ॥ २९ ॥
इत्युक्त्वान्तर्दधे देवश्शंकरो लोकशंकरः ।
तथा विधाय तन्नाम्ना ख्याताऽवर्तत तत्र सा ॥ ३० ॥
वयसस्तम्भनं कालवञ्चनं मृतजीवनम् ।
पादुकायास्तथा सिद्धिरदृश्यकरणं तथा ॥ ३१ ॥
परकायप्रवेशश्च सिद्धिस्तद्वन्मणेरपि ।
मन्त्रसिद्धिस्ततः सिद्धिरौषधस्येति सिद्धयः ॥ ३२ ॥
इत्येवमादिकास्सिद्धीर्मूकाम्बायाः प्रसादतः ।
[1] संप्राप्य तत्र तिष्ठंति योगिनो मोक्षकांक्षिणः ॥ ३३ ॥
ब्रुवे तासां च सिद्धीनां स्वरूपाणि शृणु क्रमात् ।
कृष्णपक्षे [2] त्रयोदश्यां सन्ध्यायां शाल्मलिद्रुमम् ॥ ३४ ॥
बलिपूजादिकं कृत्वा रक्तसूत्राणि वेष्टयेत् ।
ओं ह्रां ततोमृतस्यंदिन्यमृतं स्रव तत्परम् ॥ ३५ ॥
स्वाहेत्यनेन मन्त्रेण सप्तवारं तु शाल्मलिम् ।
अभिमन्त्र्य कुठारेण निहन्याद्बहुशस्सुधीः ॥ ३६ ॥
तस्य निर्यासमादाय प्रभाते भास्करोदये ।
प्राच्यां भृङ्गशतावर्या गुडूच्या स्वरसैः पृथक् ॥ ३७ ॥
सप्तवारं प्रतिरसं तेन भावनमाचरेत् ।
संपिष्योलूखले कुर्याद् घुटिका बदरैस्समाः ॥ ३८ ॥
प्रतिवासरमेकैकां धारयेद् घुटिकां ततः ।
अह्लां द्विसप्तके याते दन्तकेशनखं पतेत् ॥ ३९ ॥
पुनर्द्विसप्तके याते नूतना रदना नखाः ।
संभवंति ततः केशा भृङ्गपक्षसमत्विषः ॥ ४० ॥
द्व्यष्टवर्षाकृतिर्दृश्यो बलवीर्यसमन्वितः ।
समासहस्रजीवी स्यान्नात्र कार्या विचारणा ॥ ४१ ॥
मूलत्वक्फलपुष्पाणि पत्रमित्यंगपञ्चकम् ।
आहृत्य शाल्मलितरोः सूक्ष्मं चूर्णं तु कारयेत् ॥ ४२ ॥
मधुना सर्पिषा युक्तं बिडालपदमात्रकम् ।
तल्लिहेत्प्रातरुत्थाय मासमेकं मिताशनम् ॥ ४३ ॥

[1] स्थाप्य. [2] चतुर्दश्यां.

मासेन [1] जायेत नरो वलीपलितवर्जितः ।
मासमेतत्प्रयोगेण मत्तेभसदृशो भवेत् ॥ ४४ ॥
जीवत्यब्दसहस्राणि तेजस्वी तरुणाकृतिः ।
नीरोगो वीर्यसम्पन्नो जायते नात्र संशयः ॥ ४५ ॥
सितां रक्तां च पीतां च कृष्णां मुण्डीं चतुर्विधाम् ।
पञ्चम्यां कृष्णपक्षस्य पौर्णमास्यां तु वा निशि ॥ ४६ ॥
रोहिण्यां श्रवणे पुष्ये रेवत्यां वा समुद्धरेत् ।
पञ्चांगानि समाहृत्य च्छायायां परिशोषयेत् ॥ ४७ ॥
सर्पिषा मधुना सार्धं बिडालपदमात्रकम् ।
तच्चूर्णमुपयुंजीत क्षीरपिष्टकभोजनः ॥ ४८ ॥
एकविंशे दिने याते दिव्यदेहो भवेन्नरः ।
मासत्रयप्रयोगेण लोके प्राप्नोत्यदृश्यताम् ॥ ४९ ॥
पञ्चमासप्रयोगेण मोदते विबुधैस्सह ।
मासषट्कप्रयोगेण चिरायुः खेचरो भवेत् ॥ ५० ॥
अमरीं पुष्यनक्षत्रे समूलां पल्लवान्विताम् ।
आदाय शोषयित्वातु श्लक्ष्णं तच्चूर्णमाचरेत् ॥ ५१ ॥
सर्पिषा मधुना सार्धं भक्षयेत्कर्षमात्रकम् ।
गव्यक्षीरसमायुक्तं कुर्यात्स्वल्पान्नभोजनम् ॥ ५२ ॥
सप्ताहे प्रथमे याते विगलन्ति रुजस्स्फुटम् ।
प्राप्ते द्वितीयसप्ताहे दिव्यदेहो भवेन्नरः ॥ ५२ ॥
तृतीये भूतलस्थानि निधानान्यपि पश्यति ।
चतुर्थे षट्पदानीला जायन्तेऽस्य शिरोरुहाः ॥ ५४ ॥
समासहस्रत्रितयं जीवेत्तारुण्यसंयुतः ।
गन्धर्वत्वं पञ्चमे स्याद् गन्धवाहसमागतिः ॥ ५५ ॥
षष्ठे वाचस्पतिप्रख्यः प्रज्ञावान् जायते नरः ।
सप्तमे पूर्णचन्द्राभस्सर्वाह्लादकरो भवेत् ॥ ५६ ॥
अष्टमे सर्वसत्वानां पीयूषं वितरत्यसौ ।
सप्तद्वीपाधिपत्यं च नवमे सप्तके भवेत् ॥ ५७ ॥
भूतं भव्यं भविष्यच्च दशमे वेत्ति सप्तके ।
अश्रुताण्यपि शास्त्राणि जानात्येकादशे नरः ॥ ५८ ॥
द्वादशे सप्तके प्राप्ते द्वितीय इव मन्मथः ।
वशीकरोति सर्वाणि नरनारीमनांस्यपि ॥ ५९ ॥
संवत्सरोपयोगेन समालक्षत्रयं सुखी ।
जरापलितमुक्तांगो जीवत्येव न संशयः ॥ ६० ॥

[1] जायते मर्त्यो.

एवं रसायनं प्रोक्तमथापत्तिकरं नृणाम् ।
इतिप्रोक्तो वयस्स्तम्भः कालवञ्चनमुच्यते ॥ ६१ ॥

पुष्पं फलस्य धूमोऽग्ने वर्षस्य जलदोदयः ।
यथा भविष्यतो लिंगं रिष्टं मृत्योस्तथा ध्रुवम् ॥ ६२ ॥

रूपेन्द्रियस्वरच्छायाप्रतिच्छायाक्रियादिषु ।
अन्येष्वपि च भावेषु प्राकृतेष्वनिमित्ततः ॥ ६३ ॥

विकृतिर्या समासेन रिष्टं तदिह कथ्यते ।
उत्तराभिमुखस्थो यो यद्विजानाति लक्षणम् ॥ ६४ ॥

विमुखस्तु विज्ञेयो सप्त मासान्न जीवति ।
शुद्धं निर्मलमादित्यं [1]नीरश्मिं यदि पश्यति ॥ ६५ ॥

द्विवर्षान्ते क्षयं याति नान्यथा भैरवोदितम् ।
सितं हरितरक्तं वा सशूलं भानुमण्डलम् ॥ ६६ ॥

यः पश्यति सदा सोऽयं वर्षादूर्ध्वं न जीवति ।
रविबिम्बे जले दृष्टे सम्पूर्णे न मृतः क्वचित् ॥ ६६ ॥

खण्डे दिक्षु क्रमान्मृत्यु [2]ष्षट्त्रिद्वित्र्येकमासतः ।
मध्ये छिद्रे दशाहेन तद्दिने धूमसंकुले ॥ ६७ ॥

अरुन्धतीं ध्रुवं सोमं छायां वापि महापथम् ।
यो न पश्यति निस्तेजा वर्षान्ते म्रियते ध्रुवम् ॥ ६८ ॥

सच्छिद्रो दृश्यते चन्द्रस्तथा वा [3]वर्षणे रविः ।
दृश्यते निष्प्रभो वापि यस्यासौ म्रियते ततः ॥ ६९ ॥

सम्पूर्णो वहते सूर्यस्सोमश्चैव न दृश्यते ।
पक्षान्ते जायते मृत्युः कालज्ञाने शिवोदितम् ॥ ७० ॥

यस्यवा स्नातमात्रस्य हृत्पद्मं परिशुष्यति ।
धूमो वा मस्तके चास्ति सप्त मासान्न जीवति ॥ ७१ ॥

कृष्णरक्तानि वस्त्राणि रक्तमाल्यानुलेपनम्
स्वप्ने च लभतेऽकस्मात् षण्मासान्ते न जीवति ॥ ७२ ॥

भक्तिशील गुणत्यागो बुद्धिर्वलमहेतुकम् ।
यस्यैतानि निवर्तन्ते षण्मासान्ते न जीवति ॥ ८३ ॥

अशिरस्कां यदा पश्येदात्मच्छायामथापि वा ।
न कृष्णतारकां पश्येत्षण्मासान्ते न जीवति ॥ ७४ ॥

राक्षसैर्भूतवेतालैः श्वानसूकरगर्दभैः ।
गृध्रैः काकैरुलूकैर्वा महिषैश्च क्रमेलकैः ॥ ७५ ॥

स्वप्ने वेष्टितमात्मानं पश्येदब्दं न जीवति ।
स्वप्ने देहं स्वकं स्थूलं तैलाक्तं वाथ पश्यति ॥ ७६ ॥

1) विरश्मिं. 2) षट्त्रिद्वित्र्येकमासतः 3) दर्पणे.

भीतः क्रुद्धोऽथवा नित्यं मासादूर्ध्वं न जीवति ।
निशि चापं दिवांचोल्काममेघाशनि संभवाम् ॥ ७७ ॥

यः पश्येन्म्रियते सोऽपि षण्मासाच्छंकरोदितम् ।
शंखावर्ते भ्रुवोर्मध्ये गुम्भयोर्मर्मसन्धिषु ॥ ७८ ॥

स्पन्दनं यस्य नैवास्ति मासादूर्ध्वं न जीवति ।
चक्षुषी स्रवतो नित्यं न शृणोत्यपि निश्चितम् ॥ ७९ ॥

दीपगन्धं न जानाति मासार्धं न स जीवति ।
विना शाखाद्रुमं प्रेतं पिशाचं दिव्यपातनम् ॥ ८० ॥

यदि पश्यति च स्वन्पे दश मासान्न जीवति ।
ओष्ठयोर्धूसरत्वं च तालुदेशस्य शुष्कताम् ॥ ८१ ॥

सन्धौ वा भुग्नमायाति षण्मासान्न स जीवति ।
भजन्ते यच्छिरो नित्यं यूका वा मक्षिकादयः ॥ ८२ ॥

त्यजन्ति वाथ नैराश्यात्षण्मासं न स जीवति ।
कालज्ञानमिदं ज्ञात्वा तस्य कुर्वीत वञ्चनम् ॥ ८३ ॥

योगाभ्यासेन मन्त्रैर्वा ध्यानैर्वाथरसायनैः ।
वर्षाण्येकादश ब्रह्मा शरीरे व्याप्यतिष्ठति ॥ ८४ ॥

ततोविष्णुश्च रुद्रश्च देहमावर्तते पुनः ।
ब्रह्मकाले नाभिपद्मे विष्णुकाले हृदम्बुजे ॥ ८५ ॥

कण्ठाब्जे रुद्रकाले तु ध्येयं कालस्य वञ्चनम् ।
कालसंकर्षिणींविद्यामतिरूपां जपेत्ततः ॥ ८६ ॥

कालो विमुखतो याति लक्षजापे कृते सति ।
(ह्रीं स्रं [1] व्रें क्ष्त्रौं [2] प्रौं [3] व्रां क्रों संमोहिनि चण्डे कालसंक–
–र्षिणि नमः)
मन्त्रेणानेन जुहुयात्स्वाहान्तेन [4] यथाविधि ॥ ८७ ॥

कुब्जिकासमगां चाथ जपेद्वाथ नवार्णकाम् ।
एतच्चाम्नाय शास्त्रेषु कथितं कालवञ्चनम् ॥ ८८ ॥

नाभितो ब्रह्मरन्ध्रान्तं सर्पाभां चातिरूपिणीम् ।
प्रोल्लसन्तीं जपेन्नित्यं मायां कालस्य वञ्चनीम ॥ ८९ ॥

कालवञ्चनमित्युक्तं पादुकासिद्धिरुच्यते ।
अश्वलालांकुलीतैलैः पेषयेच्छ्वेतसर्षपान् ॥ ९० ॥

तल्लिप्तहस्तपादस्तु योजनानां शतं व्रजेत् ।
अंकोलतैल संपिष्टश्वेतसर्षपलेपिताम् ॥ ९१ ॥

पादुकामुष्ट्रचर्मोद्धां समारुह्य शतं व्रजेत् ।
कालजंगा शिरा ग्राह्या गृध्रस्य च वसा तथा ॥ ९२ ॥

1) प्रें. 2) द्रौं. 3) द्रां. 4) तथाहुतिम्.

अश्वकर्णी समायुक्तामुष्ट्रीक्षीरेण भावयेत् ।
अनेन लिप्तपादस्तु योजनानां शतं व्रजेत् ॥ ९३ ॥

अत्र मन्त्रः ॥

(ओंनमो भगवते रुद्राय भूतभेतालग्रासनाय शंखचक्रगदाधराय हलाहलमहते चन्द्रवेतालाय ॐ फट् स्वाहा)

अनेन पादलेपार्थं द्रव्यं समभिमन्त्रयेत् ।
श्वानमार्जारनकुलपित्तं ग्राह्यं [1]समांशकम् ॥ ९४ ॥
काकमांसवसाजंघां पिष्ट्वा पादौ प्रलेपयेत् ।
योजनानां शतं गत्वा पुनरायाति तत्क्षणात् ॥ ९५ ॥

अत्र मन्त्रः ॥

(ओंनमो भगवते रुद्राय नमो ब्रह्मणे नमस्सूर्याय नमश्चन्द्राय गदाधराय [2]हिवि हिवि स्वाहा)

शिखिनीं कांचनीं मूलामजामूलीं च चण्डिकाम् ।
दरदं पारदं चैतदुष्ट्री क्षीरेण पेषयेत् ॥ ९६ ॥
अनेन पादलेपेन श्वानरूपधरो नरः ।
योजनानां सहस्रं तु गत्वा प्रतिनिवर्तते ॥ ९७ ॥
आतुण्डस्य तु मूलानि तिलतैलेन पाचयेत् ।
पादौ च जानुपर्यन्तं लिप्त्वा दूराध्वगो भवेत् ॥ ९८ ॥

अत्र मन्त्रः ॥

(ओंनमश्चण्डिकायै गगने गमय गमय [3]चालय चालय वेगवाहिनि ह्रीं स्वाहा)

पूर्वोक्तस्य तु योगस्य मन्त्रोऽयं समुदीरितः ।
निर्गुण्डीमूलमादाय मलं पारावतोद्भवम् ॥ ९९ ॥
पलाश बीजसंयुक्तं [4]रक्तपाठाफलानि च ।
उलूकहृदयं चैव पेषयेच्छीतवारिणा ॥ १०० ॥
अनेन पादलेपेन योजनानां शतं व्रजेत् ।

अत्र मन्त्रः ॥

(ॐ ह्रीं ह्रीं पूलं ह्रः फट् नमः ॥)

जपेल्लक्षत्रयं मन्त्रं ध्यात्वा तां रक्तवर्णिकाम् ॥ १०१ ॥
कदम्बवनमध्यस्थां मधुपर्णीं त्रिलोचनाम् ।
कुण्डलैर्मणिभिर्दिव्यवस्त्रालंकारभूषिताम् ॥ १०२ ॥
अमृतं कलशं वामे दक्षिणे मणिहारकम् ।
दधतीं चिन्तयेद्दीप्तां रक्तपद्मोपरिस्थिताम् ॥ १०३ ॥

[1] समंसमम्. [2] हिलिहिलिस्वाहा. [3] जालय जालय.
[4] रक्तपाला फलानिच.

प्रहसन्तीं चित्रलेखां प्रसन्नां नवयौवनाम् ।
ईदृशीं पूजयेन्नित्यं जपान्ते जुहुयात्ततः ॥ १०४ ॥
शर्करां छागमांसं च गोक्षीरं मधुसंयुतम् ।
दशांशेन ततस्तुष्टा खेचरत्वं प्रयच्छति ॥ १०५ ॥
विमानं खेचरत्वं च ददत्यमृतभोजनम् ।
आयुर्लक्ष्मीं जयं चैव हारकेयूरकुण्डलम् ॥ १०६ ॥
नानालोकगतिं चैव यतो मन्त्री सुखी भवेत् ।

अत्रायं मन्त्रः ॥

(ॐ ह्रीं चित्रलेखे आगच्छागच्छ [1]कुरु कुरु ह्रीं स्वाहा)

इत्येवं पादुकासिद्धिर्योगस्साधु निरूपितः ॥ १०७ ॥
मृतसंजीविनीं विद्यां प्रवक्ष्यामि समासतः ।
लिंगमंकोल उत्पाद्य स्थापयित्वा प्रपूजयेत् ॥ १०८ ॥
नवं घटं च तत्रैव पूजयेल्लिंगसन्निधौ ।
वृक्षं लिंगं घटं चैव सूत्रेणैकेन वेष्टयेत् ॥ १०९ ॥
चतुर्भिस्साधकै [2]र्नित्यं प्रतियामं क्रमेण तु ।
एवं दिवानिशं कार्यमघोरेण समर्चनम् ॥ ११० ॥
पुष्पादिफलपाकान्तं साधनं कारयेत्सुधीः ।
फलानि पक्वान्यादाय पूर्ववत्पूजयेद् घटम् ॥ १११ ॥
शुक्लपक्षे ततः कृत्वा वीजानां घर्षणं मुखे ।
तन्मुखे टंकणं चूर्णं किंचित्किंचित्प्रलेपयेत् ॥ ११२ ॥
विस्तीर्णमुखभाण्डे तु कुम्भकारकरोद्धृताम् ।
मृत्तिकां लेपयेत्तत्र तानि वीजानि पूरयेत् ॥ ११३ ॥
कुण्डल्याकारयोगेन यत्नादूर्ध्वमुखानि वै ।
तच्छुष्कं ताम्रपात्राधो भाण्डं देयमधोमुखम् ॥ ११४ ॥
आतपे धारयेत्तैलं ग्राहयेत्तच्च रक्षयेत् ।
माषार्धं चैव तत्तैलं माषार्धं तिलतैलकम् ॥ ११५ ॥
नश्यं देयं मृतस्यैतत्सम्यक्तस्य हिताय तु ।
तत्क्षणाज्जीवति नरो गतो वापि यमालयम् ॥ ११६ ॥
रोगापमृत्युसर्पादि मृतो जीवति निश्चितम् ।
पुंशुक्रं पारदं तुल्यं तेन तैलेन मर्दयेत् ॥ ११७ ॥
नश्यं देयं मृतस्यैतत्कालदष्टस्य तत्क्षणात् ।
जीव आयाति तच्चित्रं महादेवेन भाषितम् ॥ ११८ ॥
पुष्यभास्करयोगे तु गुलूचीमूलमाहरेत् ।
पिष्टमुष्णजलैः पीतमपमृत्युहरं भवेत् ॥ ११९ ॥

[1] कुरुकुरु. [2] र्नैर्नित्यं.

अत्रायं मन्त्रः ॥ अघोरेभ्यो . . . रुद्ररूपेभ्यः ॥
मृतसंजीविनीत्युक्ताथादृश्यकरणं ब्रुवे ॥
लक्षमेकं जपेन्मन्त्रं राजद्वारं शुचिः स्थितः ॥ १२० ॥
सक्षीरैर्मालतीपुष्पैर्हुतैस्सिध्यति यक्षिणी ।
ददाति घुटिकां सा तु सुखस्यादृश्यकारिणी ॥ १२१ ॥

अत्रायं मन्त्रः ॥
(ओं मोदते मोदविडम्बिने आत्मीयसहानेहिम देहि स्वाहा.)
चतुर्लक्षमिमं मन्त्रं श्मशाने प्रजपेच्छुचिः ।
नम्रो व्रती नरोऽदृश्यो विचरेद्वसुधातले ।
निधिं पश्यति गृह्णाति न विघ्नैः परिभूयते ॥ १२३ ॥

अत्रायं मन्त्रः ॥
(ओं ह्रीं ड्रीं स्फां स्प्रीं श्मशानवासिनि प्रसीद स्वाहा)
नग्नश्चरन्निशि ध्यात्वा जप्त्वा वामेन पाणिना ।
अदृश्यकरिणीं विद्यां लक्षजापेन चाप्नुयात् ॥ १२४ ॥

अत्रायं मन्त्रः ॥
(ओन्नमो निशाचर महामहेश्वर ममोपर्यादृतस्सर्वलोकलोचनानि वन्ध वन्ध देव्याज्ञापयति स्वाहा)
रात्रौ कृष्णचतुर्दश्यां श्मशाने वा शिवालये ।
अलिवल्युपहारेण कुर्यादर्चनमुत्तमम् ॥ १२५ ॥
ततो दीपोऽङ्कुलीतैलैर्वर्त्ती स्यादब्जतन्तुभिः ।
प्रज्वाल्य नृकपालेतु तत्पात्रोद्धृतकज्जलम् ॥ १२६ ॥
अन्जयन्नेत्रयुगलं देवैरपि न दृश्यते ।

अत्रायं मन्त्रः ॥
ओं हुंफट् कालि महाकालि मांसशोणित भोजने रक्तकृष्णमुखि देवि मा मा पश्यतु मानुषः हुंफट् स्वाहा)
एतन्मन्त्रायुतजपात्सिद्धिर्भवति निश्चिता ॥ १२७ ॥
खञ्जरीटं सजीवं तु गृहित्वा फाल्गुने क्षिपेत् ।
पंजरे रक्षयेत्तावद्यावद्भाद्रपदावधि ॥ १२८ ॥
तदा न पञ्जरो दृश्यो जायते नात्र संशयः ।
खंजरीटशिखा ग्राह्या हस्तस्थाऽदृश्यकारिणी ॥ १२९ ॥
त्रिलोहवेष्टितां रक्षेद्धारयेन्मूर्ध्नि सर्वदा ।
दशहेम द्विषट्ताम्रं रौप्यं षोडशभागिकम् ॥ १३० ॥
एषा संख्या त्रिलोहस्य ज्ञातव्यासर्वकर्मसु ।
क्रमेण वेष्टयेद्यत्नाद् घुटिकानामयं क्रमः ॥ १३१ ॥

अत्रायं मन्त्रः ॥
(ओन्नमो भगवते उड्डामरेश्वराय नमो रुद्राय विलि विलि व्याघ्रचर्मपरिधानाय मरुळ मरुळ कुरुळ कुरुळ चण्डप्रचण्ड किलि किलि स्वाहा)
कृष्णमृत्पूरिते वाथ [1] कृष्णगुन्जा नृमुण्डके ।
रात्रौ कृष्णचतुर्दश्यामलिवल्युपहारकैः ॥ १३२ ॥
नित्यं कुर्याद्बलिं पूजां जलैस्सिंचेत्सदा निशि ।
यावत्फलति सा गुन्जा ततः कृष्णमजं वलिम् ॥ १३३ ॥
कृत्वायोगीश्वरान्पञ्च भोजयेद्भक्तिपूर्वकम् ।
ततश्चाष्टोत्तरशतं ग्राह्यं गुन्जाफलं क्रमात् ॥ १३४ ॥
सूच्यातुप्रोतयेत्सूत्रे सामालादृश्यकारिणी ।
धारयेन्मूर्ध्नि कण्ठे वा न द्रष्टुं केन शक्यते ॥ १४५ ॥
अत्रायं मन्त्रः ॥ (इडापिंगळायैस्वाहा)
अदृश्यकरणे चैवं रचितं दिक्प्रदर्शनम् ।
सिद्धिष्वेतासु सिद्धानि सन्ति योगान्तराण्यपि ॥ १३६ ॥
स्वदेहादन्यदेहान्तर्योगाभ्यसनवैभवात् ।
प्रवेशनं यदेतत्स्यात् परकायप्रवेशनम् ॥ १३७ ॥
देवतानुग्रहप्राप्तमणिना सिद्धिरस्ति या ।
मन्त्राणां विविधानां च जपात्सिद्धिस्तु या भवेत् ॥ १३८ ॥
काल्योगाविशेषेण सिद्धिरोषधिभिस्तु या ।
मणिमन्त्रौषधीसंज्ञा एतास्तिस्रस्तु सिद्धयः ॥ १३९ ॥
एताश्चान्याश्च विविधा मूकाम्बायाः प्रसादतः ।
सिद्धीस्संप्राप्य कुटजगिरौ तिष्ठन्ति योगिनः ॥ १४० ॥
कुटजाद्रेरुत्तरस्ति देशो वनवसाह्वयः ।
तस्मिन् देशे च नगरं वर्तते मधुनामकम् ॥ १४१ ॥
तत्र तिष्ठति लिंगं च मधुकेश्वरनामकम् ।
वरदातटिनीतीरे देवैर्यक्षैश्च चारणैः ॥ १४२ ॥
गरुडैः पन्नगैस्सिद्धैरभीष्टाप्त्यै निषेवितम् ।
इत्येवं शिवशक्त्याख्यक्षेत्रयोर्मध्यतः स्थितः ॥ १४३ ॥
मल्लनामांकदेशोऽयं यत्रासन्पूर्वजा नृपाः ।
धर्मतेजोयशोभाजो धरणीमन्वपालयन् ॥ १४४ ॥

इति श्रीशिवतत्त्वरत्नाकरे
पञ्चमकल्लोले कुटजाद्रिवर्णनवयस्तम्भकालवञ्चन
मृतसंजीवनप्रादुकागत्यदृश्यकरणपरकायप्रेवशादि
निरूपणं नाम प्रथमस्तरंगः

[1] मुञ्जा.

अथ द्वितीयस्तरंगः

क्षेत्र द्वितयमध्यस्थो मल्लदेशो य ईरितः ।
स च कीदृग्वंशवृद्धोऽस्माकं प्राथमिकश्च कः ॥ १ ॥
प्रावर्तत कथं तस्मादेतद्वंशपरम्परा ।
वृत्तानि कीदृशान्यासन्नेत्सन्ततिजन्मनाम् ॥ २ ॥
एतत्सर्वं समाख्याहि गुरो! विख्यातविक्रम! ।
विस्तृतं तद्ब्रुवे तुभ्यं सभ्याश्चयकरं सुत! ॥ ३ ॥
तुंगभद्रादयो यत्र परितस्सरितश्शुभाः ।
स्वपयोबिन्दुसम्बन्धनिर्धूताखिलपातकाः ॥ ४ ॥
स्वयं व्यक्तिमवाप्तानि शिवलिंगानि भूरिशः ।
रामेश्वरादीनीष्टार्थान् दिशत्येकाग्रचेतसाम् ॥ ५ ॥
यत्र सर्वेऽपि मनुजाश्शिवलिंगार्चनापराः ।
तन्नामासक्तरसनास्तद्ध्याने मीलितेक्षणाः ॥ ६ ॥
विभूतिरेखाविलसल्ललाटफलकान्तराः ।
रुद्राक्षमालिकोद्भासिद्धदो यत्राखिला नराः ॥ ७ ॥
आश्रमा यत्र विविधा विनिर्धूताविथिश्रमाः ।
रुद्रैकादशिनिश्शैवागमपाठरवाश्चिताः ॥ ८ ॥
यत्राग्रहारा बहावो भूसुरेभ्यस्समर्पिताः ।
क्षोणीरमण्या रुचिरा हारा इव विभान्ति मे ॥ ९ ॥
यत्र प्रतिपदं सत्राण्यासते तत्र भूसुराः ।
पात्रार्पितपदार्थानां श्राम्यान्ति कवलीकृतौ ॥ १० ॥
यन्मठेष्ववनाऽसंख्या किन्तु भोक्तृजनेष्वपि ।
तेषां निवासदिवसेष्वपीयं परि[1]गण्यते ॥ ११ ॥
यत्र देशे प्रवर्तन्ते सर्वतो दर्शनान्यपि ।
तन्मतानुगतानां च मठभेदास्सहस्रशः ॥ १२ ॥
कुम्भसम्भवभीत्यक्तस्वस्थानास्संभृतामृताः ।
सागरा इव साकारा यत्र राजन्ति भूरिशः ॥ १३ ॥
हंसा[2]इव सरस्तीरे विभूतिविशदश्रियः ।
आत्मचिन्तापरा एव क्षपयन्ति दिवानिशम् ॥ १४ ॥

1) दृश्यते. 2) यत्र.

यत्रशालावना व्याप्ता परितो हरितप्रभा ।
महिष्या भूपतेः क्षोण्याः प्रतिसीरेव दृश्यते ॥ १५ ॥
दृश्यन्ते बहुशो यत्रक्रमुकारामवीथयः ।
भर्तृसाम्यधृता भूमेर्हरिद्ध्वजपटा इव ॥ १६ ॥
यत्र ताम्बूलवल्लीभिराश्लिष्टाः पूगपादपाः ।
आरामे कामिनां भूयः सूचयन्त्युपगूहनम् ॥ १७ ॥
जानुदघ्नप्रसूनोद्यद्रजोनिवहसंभृते ।
पटवासो यदुद्याने वर्तते सर्वसुग्रहः ॥ १८ ॥
शुक[1]चंचूपुटदलत्पुण्ड्रेक्षूद्यद्रसापगाः ।
क्षेत्राणामतिमाधुर्यमावहन्ति वहन्ति याः ॥ १९ ॥
द्रुमाः फलभरानम्रा यत्र पल्लवपाणिभिः ।
चलितैराह्वयन्तीव च्छायां प्रत्यध्वगामिनः ॥ २० ॥
तरूणामालवालाम्बुसेको विफलतां गतौ ।
पुष्परेणुभरैर्यत्र मकरन्दद्रवैरपि ॥ २१ ॥
चिक्रोडदष्टकेरद्रुफलाम्भःपंकिले तले ।
तत्फलेषु पदंन्यस्य सञ्चरन्त्यध्वयायिनः ॥ २२ ॥
यद्ग्रामे धान्यराश्यग्रमषीमुद्रांकितान्तरः ।
निशाकरः स्वैरचारी कलंकित्वमवाप्तवान् ॥ २३ ॥
बन्धः काव्ये शशिन्यंको मदो यत्र मतंगजे !
छत्रे कनकदण्डश्च शास्त्रे चिंता न चान्यथा ॥ २४ ॥
कम्पा ध्वजेषु वर्णानां सांकर्यं चित्रकर्मसु ।
मधुपानमलिव्राते दूतसंप्रेषणं रतौ ॥ २५ ॥
अधोगतिर्द्रुमूलेषु तारकोद्धरणं गुहे ।
रामायणे स्त्रीवधश्च भारते द्यूतखेलनम् ॥ २६ ॥
मृणालेषु गुणच्छेदो भंगस्स्रोतस्सु नान्यथा ।
देशेऽस्मिन् केलदीनाम्नि पुरे गार्हस्थ्यमाश्रितः ॥ २७ ॥
गुरुभक्तिपरस्तस्थौ शैवो बसवनामकः ।
सनाम्न्या कांतया युक्तश्शिवया स यथा शिवः ॥ २८ ॥

1) चञ्चूमुख.

तस्य पर्याप्तवसनाशनसौख्यस्य जज्ञिरे ।
क्रमात्कुमाराश्चत्वारः पुमर्था इव धीमतः ॥ २९ ॥
कालक्रमेण सविधं शिवस्य समुपेयुषि ।
तस्मिन्नथानुगतयोस्तं द्वयोस्सुतयोरपि ॥ ३० ॥
अवर्धेतां[1]द्वौ कुमारौ चौडभद्रपनाथकौ ।
ताभ्यां माता बभौ भानुचन्द्राभ्यां द्यौरिवोन्नता ॥ ३१ ॥
उद्वाहमंगलमपि कारयामास सा तयोः ।
अनन्तरं च सुखिनोस्तिष्ठतो रेकदा तयोः ॥ ३२ ॥
स्वकारितां कृषिं द्रष्टुं चौडनामा विनिर्गतः ।
कृकलासाः पक्षिणश्च तस्य श्रेयांस्यसूचयन् ॥ ३३ ॥
तानालोक्य पुरो हृष्टमानसश्चलितोऽग्रतः ।
वनपल्लवसच्छायं रसालदलमाश्रिते ॥ ३४ ॥
शयाने कश्चन फणी मन्दं मन्दमुपागतः ।
प्रसार्यफणमुन्नम्रसुपर्युपरिमस्तकम् ॥ ३५ ॥
आतन्वानोऽवसत् स्वैरविहारी तावदम्बिका ।
अन्वेषयन्त्युपागच्छदपश्यच्चापि निद्रितम् ॥ ३६ ॥
ऊर्ध्वं प्रसारितं मूर्ध्नः फणिनः फणमण्डलम् ।
आलोक्य शंकितमनाश्चिन्तयामास भूरिशः ॥ ३७ ॥
तस्मिन्नवसरे सोऽपि फणी तस्मादपासरत् ।
सा च प्रबोध्य पुत्राय जगादोदन्तमीदृशम् ॥ ३८ ॥
रणे वने जले शैले सुप्तं मत्तं च देहिनम् ।
पुराकृतानि पुण्यानि रक्षन्तीति [1]न वै मृषा ॥ ३९ ॥
इति संभाषमाणौ तौ मातृपुत्रौ गृहं गतौ ।
ततोऽस्य कपिला धेनु रेका भवनवर्त्तिनी ॥ ४० ॥

[1] चौडभद्रनामानौ द्वौ कुमारकौ

वन प्रतिदिनं गत्वा सायमायाति तद्गृहम् ।
पयो न कियदप्येषा दोग्ध्रीत्यालोच्य चेतसि ॥ ४१ ॥
न क्षीरमूधसि स्वल्पमपिवा दृश्यते कुतः ।
त्वमेतां दुग्धवान् धेनुमिति वाचा प्रतर्जितः ॥ ४२ ॥
गोपालस्तामनुव्यग्रो जाग्रदेव परेद्यवि ।
ययौ प्रतीक्षमाणो गामारामावसरे तु सा ॥ ४३ ॥
कंचिद्गुल्मं प्रविश्य स्वं क्षीरं तस्मिन् ददाविति ।
दृष्ट्वोदन्तमिमं गोपः स्वामिने सन्यवेदयत् ॥ ४४ ॥
परेद्युरद्भुतं चैतद्दिदृक्षुः स्वजनैस्सह ।
गत्वा संछिद्य तद्गुल्मं भृत्यैस्तन्मध्यगं परम् ॥ ४५ ॥
लिंगमेकं ददर्शान्यत् किमस्तीति दिदृक्षया ।
खातायां शासनशिलाफलको भुव्यदृश्यत ॥ ४६ ॥
वाचिते निरधार्यस्मिन् लिंगं रामेश्वराभिधम् ।
पूजयामास तं नित्यमुपचारैस्तदेकधीः ॥ ४७ ॥
स्वेच्छया सृजतो लोकांस्तेषां प्रेरयतोधियम् ।
अन्यथा कुर्वतोऽप्येतान् दुष्करं किं महेशितुः ॥ ४८ ॥
तत्प्रसादमहिम्नाऽस्य कदाचित्स्वपतो निशि ।
स्वप्नो जातस्त्रियामान्ते निधिसंप्राप्तिसूचकः ॥ ४९ ॥
ततः प्रातस्समुत्थाय तत्फलं च विमृश्य सः ।
निधानं लब्धवान् पश्चाद्बहुद्रविणपूरितम् ॥ ५० ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले देशवर्णन-
चौडप्पनायकरामेश्वरानुग्रहवर्णनं नाम द्वितीयस्तरंगः

[1] न वाङ्.

अथ तृतीयस्तरंगः

गुरो! स्वप्नान्निधिप्राप्तिसूचकादवधारयन् ।
तस्य स्थानं च तच्चिह्नैर्निधिं प्राप्येति चेरितम् ॥ १ ॥
स्वप्नाश्च कीदृशास्तेषु के पुनः कस्य सूचकाः ।
निधिज्ञानं तु कैश्चिह्नैः केन वा ज्ञायते वद ॥ २ ॥
ब्रुवे फलानि स्वप्नानां निधिचिह्नाञ्जनानि च ।
दृष्टश्श्रुतोऽनुभूतश्च प्रार्थितः कल्पितस्तथा ॥ ३ ॥
भाविको दोषजश्चेति स्वप्नस्सप्तविधस्स्मृतः ।
तेष्वाद्या निष्फलाः पञ्च यथास्वप्नकृतिर्दिवा ॥ ४ ॥
विस्मृतो दीर्घदृष्टस्थो हि पूर्वरात्रे चिरात्फलम् ।
रात्रौ पूर्वादियामे तु स्वप्नो दृष्टः क्रमात्फलम् ॥ ५ ॥
करोति वर्षाद्वर्षार्धात् त्रिमासात्पक्षतस्तथा ।
अरुणोदयवेलायां द्वादशाहात्फलप्रदः ॥ ६ ॥
गवां दोहनकाले तु त्रिरात्रेण फलप्रदः ।
गोविसर्जनवेलायां तदहस्तु फलं भवेत् ॥ ७ ॥
अशुभः प्राक् शुभः पश्चात् शुभः प्राक्च ततोऽशुभः ।
पाश्चात्यः फलदः स्वप्नस्तत्र पूर्वस्तु निष्फलः ॥ ८ ॥
यत्किंचिदशुभं दृष्ट्वा तत्क्षयाय पुनः स्वपेत् ।
सुस्वप्नं कीर्तयेत्सद्यो दुस्स्वप्नं नैव कीर्तयेत् ॥ ९ ॥
धातुप्रकोपजनितं चिन्तितं चापि वर्जयेत् ।
वातप्रकोपवान् रात्रावाकाशगमनादिकम् ॥ १० ॥
यत्पश्यति पुनः स्वप्ने तद्वातजमुदाहृतम् ॥ ११ ॥
स्वप्नेतु पश्यति सुवर्णदिनेशदीप-
दावाग्निकिंशुकजपामणिकर्णिकारान् ।
रक्ताब्जषण्डरुधिरौवतटित्समूहान्
पित्तप्रकोपजनित[1] स्सतु पित्तजः स्यात् ॥ १२ ॥
सुप्तस्तु पश्यति समुद्रनदीसरांसि
मुक्ताफलप्रकरहंससिताब्जशंखान् ।
नक्षत्रकुन्दकुमुदेन्दुतुषारपातान्
श्लेष्माधिको यदि नरः कफजस्सतु स्यात् ॥ १३ ॥

1) सहित.

यद्यच्च ध्यायति दिवा नरः कार्यसमाकुलः ।
तत्पश्यति पुनः स्वप्ने तच्चिन्तितमुदाहृतम् ॥ १४ ॥
व्याधितेन सशोकेन चिन्ताग्रस्तेन जन्तुना ।
कामार्तेनातिधूर्तेन दृष्टः स्वप्नो न सिद्ध्यति ॥ १५ ॥
मलमूत्रादिपीडोत्थः स्वप्नः सर्वो निरर्थकः ।
अदृष्टहेतुकास्स्वप्नाः सर्वे सत्यं फलप्रदाः ॥ १६ ॥
स्वप्ने तु यो नरः पश्येद्राजानं कुञ्जरं हयम् ।
सुवर्णं वृषभं गांच कुटुम्बं तस्य वर्धते ॥ १७ ॥
आरोहणं गोवृषकुञ्जराणां प्रासादशैलाग्रवनस्पतीनाम् ।
विष्ठानुलेपो रुदितं मृतिश्च स्वप्नेऽप्यगम्यागमनं च धन्यम्
क्षीरिणं फलिनं वृक्षमेकाकी योऽधिरोहते ।
तत्रस्थस्तु विबुध्येत धनं शीघ्रमवाप्नुयात् ॥ १९ ॥
आदित्यमण्डलं स्वप्ने चन्द्रं वा यदि सप्रभम् ।
पश्येद्रोगाद्विमुच्येत महतीं श्रियमाप्नुयात् ॥ २० ॥
आदित्यमण्डलं वापि चन्द्रमण्डलमेव वा ।
स्वप्ने गृह्णाति हस्ताभ्यां राज्यं संप्राप्नुयान्नरः ॥ २१ ॥
सफलं च महावृक्षं वनं च सफलं महत् ।
पर्वतं वा सकान्तारं दृष्ट्वा स्वप्ने श्रियं लभेत् ॥ २२ ॥
आरोहणे वा चैतेषां श्रियमाप्नोत्यनुत्तमाम् ।
द्रुमानारुह्य च फलं गृह्णन् श्रियमवाप्नुयात् ॥ २३ ॥
यत्किञ्चिदुच्चमारुह्य स्वप्ने वृद्धिमवाप्नुयात् ।
पिबेत्सागरमक्षिभ्यां सजलां सरितं पिबेत् ॥ २४ ॥
तृष्णया यो विबुध्येत सराज्यं लभते ध्रुवम् ।
सागरं सरितं वापि तीर्णो यस्तु प्रबुध्यते ॥ २५ ॥
तीर्णे भयं विजानीयात्स्वप्नान्ते तु ध्रुवं नरः ।
पूर्णं तु सागरं क्षुब्धं सर्वांश्च सरितस्तथा ॥ २६ ॥
दृष्ट्वा श्रियमवाप्नोति महद्राज्यं ततो लभेत् ।
मातरं पितरं पुत्रान् द्विजान् बन्धून्सुहृज्जनान् ॥ २७ ॥
यदिपश्येन्नरः स्वप्ने विपुलां श्रियमाप्नुयात् ।
सुरां पिबति यः स्वप्ने यद्यगम्यां च गच्छति ॥ २८ ॥

अचिरेणैव कालेन कल्याणं तस्य निर्दिशेत् ।
उत्तमं रूपसम्पन्नं पुरुषं शुक्लवाससम् ॥ २९ ॥
स्त्रियं वा तादृशीं स्वप्ने यदि पश्येद्धनागमः ।
मनुष्यकाकमत्स्यानां शवमांसं स्पृशेद्यदि ॥ ३० ॥
रक्तं वारांगनां चापि समहद्धनमाप्नुयात् ।
कन्यां सपद्महस्तां च गौरीं चापि तथाविधाम् ॥ ३१ ॥
स्वप्ने दृष्ट्वा नरः शीघ्रं लक्ष्मीं संप्राप्नुयाद् ध्रुवम् ।
बलाकान् कुक्कुटांश्चैव मृगांश्च श्वेतपादपान् ॥ ३२ ॥
सुवर्णपक्षिणश्चैव दृष्ट्वा तु लभते श्रियम् ।
गृहाधिष्ण्याधिकरणं कुलगोत्रविचारणा ॥ ३३ ॥
वृक्षारामाधिकरणं स्थितिप्रदमिहोच्यते ।
उत्पलं कमलं शुक्लमालामाभरणानि च ॥ ३४ ॥
अगुरुं चापि यः स्वप्ने लभते स सुखं ध्रुवम् ।
गोऽश्वयुक्तं रथं स्वप्ने यद्येकाक्यधिरोहति ॥ ३५ ॥
तत्रस्थो यदि बुध्येत सोऽतुलां लभते श्रियम् ।
आसने शयने याने शरीरे चापि वाहने ॥ ३६ ॥
वर्तमानो विबुद्ध्येत लभते महतीं श्रियम् ।
दीपं मूलं फलं स्वप्ने कन्यां छत्रं तथा ध्वजम् ॥ ३७ ॥
गोशकृच्च तथा दृष्ट्वा चिन्तितं लभते ध्रुवम् ।
आमं मानुषमांसं तु स्वप्नान्ते यस्तु खादति ॥ ३८ ॥
पादभक्षे शतप्राप्तिस्सहस्रं बाहुभक्षणे ।
राज्यं शतसहस्रं वा लभते शीर्षभक्षणे ॥ ३९ ॥
यस्तु श्वेतेन सर्पेण दश्यते दक्षिणे भुजे ।
सहस्रं लभते क्षिप्रमपूर्णे त्वष्टमीदिने ॥ ४० ॥
क्षीरं वा बहुपीत्वा तु स्वप्नान्ते यः प्रबुध्यते ।
विपुलार्थागमस्तस्य भवत्येव न संशयः ॥ ४१ ॥
सर्पैः श्वभिर्वा दष्टस्य भवेद्यस्य न शोणितम् ।
उत्थितस्यैव जानीयात्संपदस्तस्य वै भृशम् ॥ ४२ ॥
तरुणं जीर्णमात्मानं स्वप्ने यस्तु प्रपश्यति ।
वृद्धिं चास्य विजानीयादायुषामितिनिश्चयः ॥ ४३ ॥
जातरूपमयं छत्रं श्वेतमाल्य विभूषितम् ।
आकाशं तु समीपस्थं दृष्ट्वा निधिमवाप्नुयात् ॥ ४४ ॥

देवालय च प्रतिमां शुक्लमाल्यविभूषिताम् ।
दृष्ट्वाऽऽप्नोति श्रियं सम्यक् तेषामेवाभिभाषितम् ॥ ४५ ॥
विप्राणां शुक्लवस्त्राणां शुक्लानां च गवामपि ।
दर्शनं त्वसकृत्स्वप्ने कार्यसिद्धेस्तु लक्षणम् ॥ ४६ ॥
स्वर्णं रौप्यं सिताम्भोजं वस्त्रमाभरणं तथा ।
यः पश्येच्छ्रियमाप्नोति निधिं चापि समश्नुते ॥ ४७ ॥
पूर्णं च विपुलं धान्यं गृहमग्निवृतं तथा ।
राजानं चोन्नतागारं कांस्यं दृष्ट्वा श्रियं लभेत् ॥ ४८ ॥
सौवर्णैः क्रिमिभिर्गात्रं स्वप्ने यस्य विशीर्यते ।
धनं धान्यमवाप्नोति तथाऽऽरोग्यं भजेन्नरः ॥ ४९ ॥
सुवर्णमपि चात्मानं स्वप्नान्ते यस्तु पश्यति ।
वृद्धिं तस्य विजानीयादायुष्मानप्यसौ भवेत् ॥ ५० ॥
बीजानामंकुरं चापि दृष्ट्वा सन्तानमाप्नुयात् ।
शंखचक्रध्वजादीनि तालवृन्तं च चामरम् ॥ ५१ ॥
रक्तकुम्भं च संपूर्णं पश्यन्निधिमवाप्नुयात् ।
घृतं च पायसं सक्तून् क्षीरं वा शर्करां दधि ॥ ५२ ॥
देवद्विजगुरुस्त्रीभिः भाषणं च शुभं विदुः ।
आत्मनश्चाभिषेकः स्यात् क्षीराद्यैर्द्रविणप्रदः ॥ ५३ ॥
शाकटं च गजं चैव प्रासादं शिबिकां तथा ।
फलकं च रथं वापि धिष्ण्यं चारोहयेद्यदि ॥ ५४ ॥
धनं प्राप्नोति विपुलं शुभं वृक्षादिकं तथा ।
आत्मनां बन्धनं चैव तथारोग्यप्रदायकम् ॥ ५५ ॥
सुस्वप्नाश्च मया प्रोक्तास्संग्रहेण तवाधुना ।
अथात्रावसरे तुभ्यं दुःस्वप्नफलमुच्यते ॥ ५६ ॥
शुनः शृगालान् गृध्रांश्च पिशाचान् कृष्णकीटकान् ।
स्वप्ने तु यदि वीक्षेत नरः शोकमवाप्नुयात् ॥ ५७ ॥
काकं गृध्रं वटेश्येनं पिशाचं वाथ राक्षसम् ।
पतन्तं पतितं वापि दृष्ट्वा व्यसनमाप्नुयात् ॥ ५८ ॥
कृष्णं कीटं च गां कृष्णां पश्यन्भयमवाप्नुयात् ।
आरोहणं तथा तेषां स्पर्शश्चातिभयप्रदः ॥ ५९ ॥
अश्वमुष्ट्रं खरं वापि महिषं श्वानमेव च ।
कृष्णस्त्रियश्च यः स्वप्ने पश्येच्छोकमवाप्नुयात् ॥ ६० ॥

देवता यत्र नृत्यन्ति हसन्ति च रुदन्ति च ।
आस्फोटयन्ति धावन्ति स देशस्तु विनश्यति ॥ ६१ ॥

रक्ताम्बरधरा नारी रक्तगन्धानुलेपना ।
उपगूहति यं स्वप्ने सा रात्रिस्तस्य पश्चिमा ॥ ६२ ॥

रक्तमाल्याम्बरधरो यो गच्छेद्दक्षिणां दिशम् ।
कृष्णां स्त्रियं करे गृह्णन् मरणं तस्य निर्दिशेत् ॥ ६३ ॥

कपिलामूर्ध्वकेशीं च स्वप्नान्ते यस्तु पश्यति ।
शरीरपतनं तस्य प्रधानपुरुषस्य वा ॥ ६४ ॥

चण्डालान् पतितान् म्लेच्छान् दुर्वर्णान् भीषणानपि ।
श्वापदान् कृष्णसर्पांश्च दृष्ट्वा मरणमाप्नुयात् ॥ ६५ ॥

मधुना वा तथान्येन तैलेनान्येन वा यदि ।
अभ्यज्य यो विबुध्येत रोगं तस्य विनिर्दिशेत् ॥ ६६ ॥

अभिद्रवन्ति यं स्वप्ने शृंगिणो दंष्ट्रिणोऽपि वा ।
वानरो वा वराहो वा तस्य स्याद्व्यसनं महत् ॥ ६७ ॥

पूर्णकुम्भविनाशं च पश्यञ्छोकमवाप्नुयात् ।
आदित्यं वाऽथ चन्द्रं वा विगतद्युतिकं यदि ॥ ६८ ॥

निपतेच्चापि नक्षत्रं तारकाश्चापि वा यदि ।
वीक्षेत मानवः स्वप्ने मरणं शोकमाप्नुयात् ॥ ६९ ॥

नदीं शुष्कां समुद्रं वा ह्रदं पुष्करिणीं तथा ।
यश्चक्षुषा नरः पश्येत्स्वप्ने तस्य धनक्षयः ॥ ७० ॥

केशा यस्य विशीर्यन्ते दन्ता यस्य पतन्ति वा ।
सन्तापं बन्धुनाशं च व्यसनं च विनिर्दिशेत् ॥ ७१ ॥

एवमादिकदुः स्वप्नदर्शने तु प्रतिक्रिया ।
अकीर्तनं पुनः स्वापः श्रवणे गोश्च कीर्तनम् ॥ ७२ ॥

एवं सुस्वप्नदुःस्वप्नफलान्युक्तानि ते मया ॥ ७३ ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले
शुभाशुभस्वप्नफलनिरूपणं नाम तृतीयस्तरंगः

चतुर्थस्तरंगः.

पूर्वं स्वप्नास्समाख्याताश्शुभाशुभफलप्रदाः ।
लक्षणान्यथ वक्ष्यामि निधीनां प्रतिपत्तये ॥ १ ॥

वर्षासु शीतकाले च यत्र गोधा निरन्तरम् ।
वृश्चिकः पन्नगो वाऽऽस्ते तत्र भूमौ भवेन्निधिः ॥ २ ॥

दृश्यते वज्रकीटानां सम्भोगो यत्र भूतले ।
निरिन्धनो भवेद्वह्निः ध्रुवं तत्र भवेन्निधिः ॥ ३ ॥

आवर्तो दृश्यते यत्र विना हेतुं जलाशये ।
पंकजानि द्विशीर्षानि तत्र तोये भवेन्निधिः ॥ ४ ॥

दृष्ट्वार्कं भुवमाघ्राय वृषभो यत्र नर्दति ।
वारं वारं प्रहृष्टात्मा तत्र भूमौ भवेन्निधिः ॥ ५ ॥

हस्तद्वयसमुत्सेधो बाष्पो यत्रानिमित्तकः ।
रूढिर्वा लौकिकी यत्र ध्रुवं तत्र भवेन्निधिः ॥ ६ ॥

सहायाश्शोभनाः कार्याः सप्त पञ्च त्रयोऽथ वा ।
असहायैर्न कर्तव्यं विद्वद्भिर्निधिसाधनम् ॥ ७ ॥

तत्रादौ लक्षणं वच्मि सहायानां समासतः ।
ग्राह्याग्राह्यविभागेन श्रीमच्छाम्बरभाषितम् ॥ ८ ॥

सर्वभूतहिताश्शान्ताः मदमात्सर्यवर्जिताः
मानिनः पद्मपत्राक्षाः कीर्तिमन्तोऽपि सात्त्विकाः ॥ ९ ॥

धार्मिकाश्शीलसम्पन्नाः कुलीना विभवान्विताः ।
बलवन्तो देवभक्ता ब्राह्मणाः क्षत्रिया विशः ॥ १० ॥

प्रपाप्रसादकर्तारः प्राज्ञा विद्याबलान्विताः ।
सहायाश्शोभना एते कथ्यन्ते निधिसाधने ॥ ११ ॥

सत्यहीना दुराचारा नास्तिकाश्शास्त्रदूषकाः ।
डाम्भिका विषयासक्ताः क्रूराहंकारिणश्शठाः ॥ १२ ॥

शीघ्राभिलाषिणश्चोरा अगम्यागमने रताः ।
देवद्विजगुरुस्त्रीणां निन्दका धर्मवर्जिताः ॥ १३ ॥
एते निन्द्यास्समाख्यातास्सहाया निधिदर्शने ।
बलिष्ठास्सत्त्ववन्तश्च रक्ताक्षाः कृष्णविग्रहाः ॥ १४ ॥
भूतत्रासनमन्त्रज्ञा योग्यास्ते निधिसाधने ।
तत्तदौषध [1]मन्त्रज्ञाश्शुचयो वञ्चनोज्झिताः ॥ १५ ॥
नानाविषयभाषाज्ञास्ते मता भेषजाहृतौ ।
रोचनं कुंकुमं शंखं बालमोटी तु चन्दनम् ॥ १६ ॥
राजावर्तं कुमारीं च सौवीराञ्जनपारदौ ।
षट्पलं काञ्चनं चैव श्वेतपद्मस्य केसरम् ॥ १७ ॥
असितायाश्च गोः क्षीरे समभागं तु पेषयेत् ।
तद्वर्तीं घृतसंयुक्तां ज्वाल्य कज्जलमाहरेत् ॥ १८ ॥
सर्वाञ्जनमितिख्यातं पातालनिधिदर्शनम् ।
शरत्काले तु संगृह्य भूतलाद्रक्तवर्णकाम् ॥ १९ ॥
सिन्दूरपूरितं कृत्वा रवितूलेन वेष्टयेत् ।
अतिकृष्णतिलातैलं ग्राहयेद्रक्षयेत्सुधीः ॥ २० ॥
तैले वर्त्याः प्रयोगेण कज्जलं चोत्तरायणे ।
ग्राहयित्वाऽञ्जयेच्चक्षुर्निधिं पश्यति पूर्ववत् ॥ २१ ॥
अतिकृष्णस्य काकस्य जिह्वाहृत्रासमाहरेत् ।
वेष्टयेद्रवितूलेन वर्त्तिं तेनैव कारयेत् ॥ २२ ॥
अजाघृतेन दीपञ्च प्रज्वाल्यादाय कज्जलम् ।
अञ्जिताक्षो नरस्तेन निधिं पश्यत्यसंशयम ॥ २३ ॥
सप्तधा पद्मसूत्राणि भावयेदिक्षुजै रसैः ।
तद्वर्त्या ज्वालयेद्दीपमंकोलीतैलसंयुतम् ॥ २४ ॥
ग्राह्यं पुष्यत्रयोदश्यां कज्जलं निधिदर्शनम् ।
सर्वाञ्जनमितिख्यातं शम्भुना परिकीर्त्तितम् ॥ २५ ॥
दीपकज्जलयोः पात्रं कर्तव्यं नरमुण्डकम् ।
सर्वेषामञ्जनानां तु शास्त्रं स्याच्छम्भुनोदितम ॥ २६ ॥
श्रोत्राञ्जनमुलूकस्य भावयेदश्रुवारिणा ।
तस्यै वाण्डे विनिक्षिप्य तथा सप्तदिनावधि ॥ २७ ॥
अनेनाञ्जितनेत्रस्तु निर्विघ्नं प्रेक्षते निधिम् ।
स्रोतोञ्जनमुलूकाण्डे तस्य बीजान्वितं क्षिपेत् ॥ २८ ॥
सप्ताहान्ते समुद्धृत्य निधिं पश्येत्तदञ्जनात् ।
उलूकचक्षुरादाय कुंकुमं रोचनं शशि ॥ २९ ॥

1) नामज्ञा.

समांशं मधुना पिष्टं ख्यातं सर्वाञ्जनं परम् ।
अञ्जनानान्तु सर्वेषां मन्त्रोऽघोरस्तु साधकः ॥ ३० ॥
विनाऽघोरेण विघ्नौघाः प्रभवन्ति पदे पदे ।
दक्षिणामूर्त्तिमाश्रित्य जपेदष्टसहस्रकम् ॥ ३१ ॥
अञ्जयित्वाऽञ्जनं पश्चात्सप्त चाश्वत्थपर्णकान् ।
बन्धयेत्प्रतिनेत्रं तु अच्छिद्रांस्तु महीमुखान् ॥ ३२ ॥
तस्योपरिस्थितं वस्त्रं पट्टकं वाऽथ बन्धयेत् ।
न चाञ्जयेत हीनांगान् श्वदष्टानग्निदग्धकान् ॥ ३३ ॥
सम्पूर्णांगं शुचिं स्नातं द्विदिनं तक्रभोजिनम् ।
क्षीरशाल्यन्नभोक्तारं द्विदिनं तु ततोऽञ्जयेत् ॥ ३४ ॥
दक्षिणामूर्त्तिमाश्रित्य यावदस्तमयं जपेत् ।
ततश्चाचम्य कुर्वीत शिखाबन्धं शिवोदितम् ॥ ३५ ॥
इति चिह्नान्यञ्जनानि निधेरुक्तानि साधने ।
ईश्वरानुग्रहे चैव किञ्चिदेतदपेक्षितम् ॥ ३६ ॥
तदुत्तरं प्रवृत्तस्तु वृत्तान्तश्चौडभूपतेः ।
उदीर्यते विस्मयकृत् क्रमादवहितः शृणु ॥ ३७ ॥
ईश्वरानुग्रहादेवं निधिं संप्राप्य तद्बलात् ।
ग्रामाधिपत्यमासाद्योत्तरोत्तरसमृद्धया ॥ ३८ ॥
प्रासादयत्पूजया तं रामेशं लिंगरूपिणम् ।
ततः परिवृतां सेनां संगृह्णाति परानपि ॥ ३९ ॥
तस्मिन्निगृह्णति श्रुत्वा सार्वभौमः प्रहर्षितः ।
आनाय्य तं क्रमादेनमुदन्तं तन्मुखोक्तितः ॥ ४० ॥
श्रुत्वायं सुमहान् शौर्यसम्पन्न इति नन्दितः ।
[1]मल्लदेशं वशं तस्य विधाय तदनन्तरम् ॥ ४१ ॥
नामादात्केलदीचौडप्पनायक इति स्वयम् ।
लब्ध्वा नाम च देशं चानुज्ञया तस्य निर्गतः ॥ ४२ ॥
केलदीस्थलमासाद्य तत्र रामेश्वरस्य सः ।
आलयं गुरु निर्माप्य भुवं भूयो वितीर्य चं ॥ ४३ ॥
उपचाराय पर्याप्तां समहर्षयदीश्वरम् ।
दुष्टानां निग्रहं चैव शिष्टानां परिपालनम् ॥ ४४ ॥
कुर्वन् स्वबाहुशौर्येण सम्पदा चाभ्यवर्धत ।
सुतौ तस्मादजायेतां यथाब्धेरिन्दुकौस्तुभौ ॥ ४५ ॥
तौ सदाशिवभद्राख्यौ प्रख्यातिं प्राप्नुतां ततः ।
शस्त्रविद्याब्धिपारीणौ निपुणौ किं च नीतिषु ॥ ४६ ॥

1) पुल्लदेशं.

वाहनारोहणाभिज्ञा युवृद्धसदृशास्त्रियौ ।
विधाय च तयोर्मध्ये श्रीसदाशिवनायके ॥ ४७ ॥
उद्वोढुमक्षम इव सर्वां राज्यधुरां न्यधात् ।
नीतिं चोपादिशत्तस्मै भूमिपालजनोचिताम् ॥ ४८ ॥
सद्भिस्संगं प्रकुर्वीत वर्जयेद्दुष्टसंगतिम् ।
असत्यं च परद्रोहमगम्यागमनं तथा ॥ ४९ ॥
असूयामनृतद्वेषावात्मनस्संस्तुतिं त्यजेत् ।
दानानि बहुधा दद्याद् ब्रूयाद्वाक्यं मनोहरम् ॥ ५० ॥
पूर्तानि कारयेच्चैव विप्रानपि च मानयेत् ॥
दीनानाथार्तबन्धूनां भृत्यानां चापि पोषणम् ॥ ५१ ॥
शरणागतरक्षा च कर्तव्या सर्वदा नृपैः ।
एते धर्मा नृपालानां कर्तव्यत्वेन कीर्त्तिताः ॥ ५२ ॥
तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः ।
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् ॥ ५३ ॥
मान्यान्मानय विद्विषोऽप्यनुनय प्रच्छादय स्वान् गुणान् ।
कीर्तिं पालय दुःखिते कुरु दयामेतत् सतां [1] चेष्टितम् ॥ ५४ ॥
दया क्षमाऽनसूया च सत्यं सद्वृत्तमस्पृहा ।
एतेस्युस्सद्गुणा यत्र पुत्र! तत्संगतिं कुरु ॥ ५५ ॥
गंगा पापं शशी तापं दैन्यं कल्पतरुस्तथा ।
पापं तापं च दैन्यं च हन्ति संगो महात्मनाम् ॥ ५६ ॥
शीलं पापभयं लज्जा दाक्षिण्यं धर्मशीलता ।
पञ्च यत्र न विद्यन्ते न कुर्यात्तेन संगतिम् ॥ ५७ ॥
दुर्वृत्तसंगतिरनर्थपरम्पराया
हेतुर्भवेदिति किमत्र विचारणीयम् ।
लंकेश्वरे हरति दाशरथेः कलत्रं
प्राप्नोति बन्धनविधिं खलु सिन्धुराजः ॥ ५८ ॥
कामात् क्रोधाद्भयाल्लोभात् साक्षिभावे तथैव च ।
मिथ्या वदति यद्वाक्यं तदसत्यं प्रकीर्तितम् ॥ ५९ ॥
देवतासन्निधौ वाक्यं ब्रूते शपथपूर्वकम् ।
तथो लंघयते मोहात्तदसत्यं प्रकीर्त्तितम् ॥ ६० ॥
अस्वर्ग्यमयशस्यं च लोकद्विष्टं जुगुप्सितम् ।
अनृतं सुतरां पापं तस्मात्तत्परिवर्जयेत् ॥ ६१ ॥
परीवादश्च पैशुन्यं मर्मोद्घाटनमेव च ।
गृहदारपशुक्षेत्रवसुधान्यधनस्य च ॥ ६२ ॥

[1] लक्षणम्.

अपहारोऽन्यदीयस्य परद्रोहस्स उच्यते ।
यस्मात्परभयं द्रोहः स्वस्यातीव सुदुस्सहः ॥ ६३ ॥
तस्मान्नरकदो घोरः परद्रोहस्स उच्यते ।
पुष्पिता पतिता कन्या लिंगिनी श्रेष्ठजातिजा ॥ ६४ ॥
परस्त्री विधवा श्वश्रूः स्वसा च दुहिता तथा ।
गुरुब्राह्मणभार्या च पुत्रमित्रनृपस्त्रियः ॥ ६५ ॥
पत्न्यश्च भृत्यबन्धूनामगम्याः परिकीर्तिताः ।
अनायुष्यकरं तासां गमनं परिकीर्तितम् ॥ ६६ ॥
परलोकेऽपि च भयं तस्मात्तत्परिवर्जयेत् ।
समृद्धिं वीक्ष्य चान्यस्यौदार्यं रूपसम्पदौ ॥ ६७ ॥
कलाकुशलतां शीलं सौभाग्यं कीर्तिशीलताम् ।
असहिष्णुर्भवेद्यस्तु स याति यममन्दिरम् ॥ ६८ ॥
लोके स निन्दनीयः स्यान्नासहिष्णुर्भवेद्यतः ।
महापातक[1] दुष्टानां लिंगिनां विधिलोपिनाम् ॥ ६९ ॥
चण्डालान्त्यजजातीनां संसर्गी पतितो भवेत् ।
क्रोधो नाशयते बुद्धिमात्मानं च कुलं धनम् ॥ ७० ॥
यशोनाशो भवेत्कोपात्तस्मात्तत्परिवर्जयेत् ।
क्रोधमूलो मनस्तापः क्रोधस्संसारबन्धनः ॥ ७१ ॥
धर्मक्षयकरः क्रोधस्तस्मात्तं परिवर्जयेत् ।
लोभात्क्रोधः प्रभवति क्रोधाद् द्रोहः प्रजायते ॥ ७२ ॥
द्रोहेण नरकं याति तस्माल्लोभं परित्यजेत् ।
आत्मानं च स्तुवन्मोहाज्जीवन्नपि मृतो हि सः ॥ ७३ ॥
प्रत्र यातनां याति तस्मत्तां परिवर्जयेत् ।
न सुखं न च सौभाग्यं स्वयं स्वगुणकीर्तनम् ॥ ७४ ॥
यथैव च पुरन्ध्रीणां स्वयं स्वकुचमर्दनम् ।
श्रोत्रियाय दरिद्राय शीलाचारयुताय च ॥ ७५ ॥
पुराणवेदविदुषे दानं देयं कुटुम्बिने ।
महापातकघातीनि महापुण्यकराणि च ॥ ७६ ॥
महादानानि देयानि महादेवस्य तुष्टये ।
सत्यं ब्रूया [2] द्धितं ब्रूयान्न ब्रूयात्सत्यमप्रियम् ॥ ७७ ॥
प्रियं च नानृतं ब्रूयादेष धर्मस्सनातनः ।
एवं वदति यो नित्यं स लोके पूज्यते बुधैः ॥ ७८ ॥
वापीकूपतटाकानि देवतायतनानि च ।
अन्नप्रदानमारामं पूर्तमार्याः प्रचक्षते ॥ ७९ ॥

[1] दुःखानां. [2] त्प्रियं.

द्वारहीनो भवेत्कूपो द्वारेणैकेन वापिका ।
नैकद्वारा पुष्करिणी सैव दीर्घा तु दीर्घिका ॥ ८० ॥

कुल्याविधूततोयश्च तटाकः परिकीर्त्तितः ।
एतेषां खननं कार्यं नृपैर्धर्मपरायणैः ॥ ८१ ॥

दानेन प्रियवाक्येन सन्मानेन द्विजोत्तमम् ।
पोषयेत्सर्वभावेन तेनाप्नोति परं पदम् ॥ ८२ ॥

देहीति याचते यस्तु कांक्षया कृपणं गिरा ।
दारिद्र्याद्दैन्यमापन्नः स दीनः परिकीर्त्तितः ॥ ८३ ॥

तस्मै दद्याच्च दीनाय वाञ्छितं द्रविणादिकम् ।
मातापितृविहीनस्तु रहितो मित्रबान्धवैः ॥ ८४ ॥

विगतस्वामिसम्बन्धो ह्यनाथः परिकीर्त्तितः ।
अनाथस्सर्वथा रक्ष्यः पार्थिवेन यशोऽर्थिना ॥ ८५ ॥

व्याधिभिर्बाधिता ये स्युर्विषाग्न्यादिप्रकीर्त्तिताः ।
तेषां च पोषणं कार्यं पानान्नशयनासनैः ॥ ८६ ॥

मातृपक्षसमुद्भूताः पितृपक्षसमुद्भवाः ।
आत्मसम्बन्धिनो ये च बान्धवास्ते प्रकीर्त्तिताः ॥ ८७ ॥

बन्धूनां मधुरं वाक्यं यथायोग्यं च माननम् ।
संविभागश्च कर्तव्यः स्वर्णाम्बरविभूषणैः ॥ ८८ ॥

व्याघ्रसिंहगजैश्चोरैश्शत्रुभिश्चापि विद्रुतः ।
भयाच्छरणमायातश्शरणागत उच्यते ॥ ८९ ॥

रक्षेच्छरणमायातं प्राणैरपि धनैरपि ।
स यशो महदाप्नोति जनैस्सर्वैः प्रशस्यते ॥ ९० ॥

क्रतवो विधिसंयुक्ता भीतसत्वस्य रक्षणम् ।
तुलायां तोलिते [1] द्वे तु प्राणत्राणं विशिष्यते ॥ ९१ ॥

वृत्तिच्छेदविधौ द्विजस्य हरणे मित्रापदां वारणे ।
सम्प्राप्ते शरणे कलत्रहरणे स्वामिग्रहे गोग्रहे ।
ये शक्ताः पुरुषाः परार्थघटने कुर्वन्त्युदासीनतां
तानालोक्य विलोकितुं मृगयिते सूर्योऽपि सूर्यान्तरम् ॥ ९२ ॥

धर्माज्जन्मकुले शरीरपटुता सौभाग्यमायुर्धनं
धर्मेणैव भवन्ति निर्मलयशोविद्यामहीसम्पदः ।
कान्तारेषु महाभयेषु सततं धर्मः परित्रायते
धर्मस्सम्यगुपासितो भवति हि स्वर्गापवर्गप्रदः ॥ ९३ ॥

यत्नागा मदवारिभिन्नकरटास्तिष्ठन्ति निद्रालवो
द्वारे हेमविभूषिताश्च तुरगा हेषन्ति दृप्ता मुहुः ।
वीणावेणुमृदंगशंखपटहैस्सुप्तश्च संबुध्यते ।
तत्सर्वं सुरलोकराज्यसदृशं धर्मस्य विस्फूर्जितम् ॥ ९४ ॥

साधु नीतिमुदीर्यैवं सप्रपञ्चं सुताय सः ।
केलदीस्थितरामेशप्रसादात्प्राप्तवान्निधिम् ॥ ९५ ॥

चौडनायकनामांको नृपः कैलासवासिनः ।
सन्निधिं दुर्लभं लब्धुमिव कैलासमासदत् ॥ ९६ ॥

ततस्तस्य सुतः श्रीमान् सदाशिवमहीपतिः ।
शशास सकलं राज्यं धर्मेणैव यशोनिधिः ॥ ९७ ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले निधिचिह्नाञ्जन साधारणराजनीतिवर्णनं नाम चतुर्थस्तरंगः

[1] तत्र.

अथ पञ्चमस्तरंगः

ततस्सदाशिवनृपे बहुधा राज्यवासिनि ।
महीसुरास्सुराश्चापि बहुधाराज्यहर्षिताः ॥ १ ॥
ज्येष्ठायामस्य भार्यायां दोड्डसंकण्णनायकः ।
कनीयस्यां तु संजातश्चिक्कसंकण्णनायकः । ॥ २ ॥
तावेधेतां सुतौ राज्ञो जनरागोदयाविव ।
उभयोर्वरयोर्विद्याभ्यासं स्वयमकारयत् ॥ ३ ॥
वाहनारोहदक्षाभ्यां ताभ्यां लोकमहर्षयत् ।
क्रमादुद्वाहितावाप्तयौवनौ तावकल्पयत् ॥ ४ ॥
नीत्या राज्यमवत्यस्मिन्नीतिर्न क्काप्यदृश्यत ।
पुष्टाभ्यां देशकोशाभ्यां चतुरंगबलेन च ॥ ५ ॥
अशात्रवां महीं कुर्वन् गोपायति यदा तदा ।
विद्यानगरभूमीशो रामराजः क्रमागतः ॥ ६ ॥
कल्याण कल्लुबुरगि वर्त्तिनां निग्रहेच्छया ।
आनाययदमुं स्वीयैः पुरस्साहाय्यकाय सः ॥ ७ ॥
सहैतेन बलं स्वीयं चतुरंगं नियोजयन् ।
बलेनानेन सहितस्त्वमग्रे यानमाचरं ॥ ८ ॥
इत्याज्ञप्ते पुरो याति श्रीसदाशिवनायके ।
भुत्वास्य पुरतो यानं विजयाख्यपुरेश्वरः ॥ ९ ॥
तेषां सहायकोद्युक्तो जेतुमेनं पुरःस्थितम् ।
प्राहिणोद्बलिनो योद्धुं प्रमुखान् म्लेच्छनायकान् ॥ १० ॥
न्यरुन्धन् दृश्यते मार्गे सन्नद्धा युद्धकर्मणि ।
जितेन लभ्यते लक्ष्मीर्मृतेनापि सुरांगना ॥ ११ ॥
क्षणविध्वंसिनः कायाः का चिन्ता मरणे रणे ।
इति युद्धाय सन्नद्धः परान् पर्यभवत् क्षणात् ॥ १२ ॥
अन्धकारानिव रविर्मेघानिव च मारुतः ।
पलायितानां तेषां तु सर्वस्वं स्वैरहारयत् ॥ १३ ॥
संगतेन तदा रामराजेनाह्लादि चेतसा ।
सहैव निर्ययावग्रे कल्याणवरणं प्रति ॥ १४ ॥
गच्छन् सह कियद् दूरं तं सन्निहितमैक्षत ।
सार्वभौमस्तमालोक्य कौतुकेन करास्थितम् ॥ १५ ॥
यमदंष्ट्रायुधं स्वीयं प्राकारान्तरथाक्षिपत् ।
अथ राजा प्रतीतान् स्वानवादीच्चापि यूथपान् ॥ १६ ॥
वरणाक्रमणं कश्चिद्युष्मासु रचयत्विति ।
सर्वेषु तूष्णींभूतेषु सदाशिवनृपः स्वयम् ॥ १७ ॥
ततस्तस्याभ्यन्तरं च प्रविश्य यमदंष्ट्रिकाम् ।
गृहीत्वा तां ततस्सार्वभौमायाकुरुतोपधाम् ॥ १८ ॥
सहायो यन्त्रकीलेन द्वारोद्घाटनकारिणा ।
सार्वभौमो ददौ तस्मै कोटेकोलाहलाभिधाम् ॥ १९ ॥
विरुदानि महार्घाणि वसनाभरणानि च ।
देशांस्त्रीन् गुत्ति बार्कूरु [1]मंगलूरु पदांकितान् ॥ २० ॥
रायनायकनामापि विधायस्य महीपतेः ।
बहुधा मानयामास श्रीसदाशिवनायकम् ॥ २१ ॥
सोऽप्याख्यया तदा भूरि प्रख्यातिमुपलब्धवान् ।
अनन्तरं कतिपयदिनेषु क्षपितेष्वसौ ॥ २२ ॥
चन्द्रगुत्तिस्थितैर्दस्युनायकैर्भूर्युपद्रुतः ।
सार्वभौमो निग्रहार्थं तेषामेनं समादिशत् ॥ २३ ॥
अयं च रचयामास तेषां निग्रहणं ततः ।
[2]भूयः कियद्दिनादूर्ध्वं दूतैरानाय्य तेन सः ॥ २४ ॥
बरीद्पादुषाहस्य विजयाय प्रचोदितः ।
विदितं तं करे कृत्वा सह सप्तांगसम्पदा ॥ २५ ॥
उपहारं समकरोत्तस्मै सोऽयं यदा तदा ।
सन्तुष्टस्य ददौ शत्रुसप्तांगहरणाभिधाः ॥ २६ ॥
किं चारुणध्वजपटं दुन्दुभिं वाद्यपञ्चकम् ।
मनोज्ञानि च वासांसि विरुदाभरणानि च ॥ २७ ॥
ततो याति कियत्काले सालवतिम्माभिधानवान् ।
तदनुज्ञां समासाद्य न्यग्रहणान्निजतेजसा ॥ २८ ॥

1) पुंगलूरु. 2) पुनः

अनन्तरं सार्वभौमः सदाशिवनृपं प्रति ।
मायोपायेषु चतुरान् स्वासाध्यान् केरलाधिपान् ॥ २९ ॥

तौलवांश्च तथा जेतुमादिदेश महीपतिः ।
दुर्बलानामसाध्यत्वं यैरुपायैरवाप्यते ॥ ३० ॥

तान् ब्रुवे मायिकोपायान् कुमार! शृणु सादरम् ।
बलशक्तिविहीनेन नृपेण रिपुघातने ॥ ३१ ॥

प्रयोज्यास्तु त्रयो दण्डा विषघाताभिचारजाः ।
विषं हालाहलं शृंगि कालकूटं भयावहम् ॥ ३२ ॥

वत्सनाभिश्चतुर्धा यः स्थावरः परिकीर्त्तितः ।
सर्पदंष्ट्राभिसंजातं विषं तज्जंगमं स्मृतम् ॥ ३३ ॥

विरुद्धद्रव्यमिलितं कृत्रिमं विषमुच्यते ।
तटाककूपवापीषु तथा लघुसरस्सु च ॥ ३४ ॥

विषं [1]विषे प्रयोक्तव्यं द्विषतां च विघातने ।
अन्ने पाने च ताम्बूले फले पुष्पे विभूषणे ॥ ३५ ॥

वस्त्रे विलेपने धूपे शय्यायामासनेऽपि च ।
पादुकायां पदाभ्यंगे तैले स्नानोदके तथा ॥ ३६ ॥

क्रीडापुष्करिणीमध्ये प्रयुञ्जीत विषं द्विषे ।
कुमारसचिवामात्यमन्त्रिसेनाधिपेषु च ॥ ३७ ॥

महावारणमुख्येषु तुरगेषूत्तमेषु च ।
एवं विषप्रयोगस्तु विषदण्डस्स उच्यते ॥ ३८ ॥

द्यूतवाद्यप्रसक्तेषु स्वैरक्रीडारतेषु च ।
मृगयासक्तचित्तेषु देवयात्राप्रसंगिषु ॥ ३९ ॥

अंकमल्लविनोदेषु भोजनस्थानवर्त्तिषु ।
व्यग्रेष्वन्येषु कार्येषु कुर्याद्वै रिपुघातनम् ॥ ४० ॥

अयमेव च शत्रूणां घातदण्डः प्रकीर्त्तितः ।
अथर्वविधितत्त्वज्ञैर्ब्राह्मणैर्विजितेन्द्रियैः ॥ ४१ ॥

तन्त्रमन्त्रविधानज्ञै दूँराद्दुन्मूलयेद्रिपून् ।
आभिचारकहोमैस्तु मन्त्रषट्कर्मसाधनैः ॥ ४२ ॥

यन्त्रलेखनकैरुग्रैरुपांशुजपनादिभिः ।
मन्त्रतन्त्रसुसिद्धैश्च काहलीपटहादिभिः । ॥ ४३ ॥

[1]द्विषे.

पताकानिकरैर्धूपैस्तथा मायूरपिञ्छकैः ।
बाणैर्मन्त्रप्रयुक्तैश्च सिद्धार्थकयुताक्षरैः ॥ ४४ ॥

मोहयेत्स्तम्भयेच्छत्रून् स्थानादुच्चाटयेत्तथा ।
विद्वेषयेच्च मित्राणि वशीकुर्याच्च विद्विषः ॥ ४५ ॥

नराकृतिं लिखेदादौ तालपत्रे सुबुद्धिमान् ।
कपोले विलिखेद्बीजं वह्न्याख्यत्रितयं तथा ।

हस्तद्वये पादयुगे पञ्च पञ्च यथाक्रमम् ।
स्तम्भमायां लिखेद्देवीमग्निबीजं हृदि न्यसेत् ॥ ४७ ॥

तन्मध्ये साध्यनामापि तद्वन्नाभौ च संलिखेत् ।
गृहद्वारे रोगकरं नदीवेगे च रोगदम् ॥ ४८ ॥

दहनं दीपशिखया भूतज्वरकरं परम् ।
श्मशाने निखनेद्यन्त्रं मारणं मासमात्रतः ॥ ४९ ॥

चुल्यधो भागतःस्थाप्यं बुद्धिभ्रंशोऽभि जायते ।
वज्रार्कक्षीरलेपेन पाण्डुरोगो भवेद् ध्रुवम् ॥ ५० ॥

तद्यन्त्रे गरलेपेन श्लेष्मरोगी भवेद् ध्रुवम् ।
पालाशविधिनाऽनेन दहनं त्रिदिनात्प्रिये! ॥ ५१ ॥

स्फोटकेन मृतिं याति मार्कण्डेयसमोऽप्यरिः ।
पुनरेकं प्रवक्ष्यामि नरयन्त्रं सुपावनम् ॥ ५२ ॥

अनायासेन फलदमादिनाथमुखोद्गतम् ।
नराकृतिं लिखेदादौ कपाले कुलसुन्दरि! ॥ ५३ ॥

वह्निगर्भितनामापि वेष्टयेद्वह्निबीजतः ।
ग्लौंकारपञ्चकं वामे दक्षे हस्ते तथैव च ॥ ५४ ॥

वामदक्षिणपादे च वाराहं बीजमालिखेत् ।
अग्निबीजान्यंगुलीषु विंशतिं कुलसुन्दरि ! ॥ ५५ ॥

एवं यन्त्रं लिखित्वा तु तालपत्रे सुशोभने! ।
निर्दहेद्दीपशिखया सप्तरात्राननुक्रमात् ॥ ५६ ॥

करपादविदाहेन स नरो [1]ज्वलितो भवेत् ।
नरशल्ये लिखेद्यन्त्रं लोहसूच्या ह्यतन्द्रितः ॥ ५७ ॥

जिह्वास्तम्भनमाप्नोति स्थापनाद् वृक्षकोटरे ।
उच्चाटे निम्बकुहरे विषतिन्दुकयोस्तथा ॥ ५८ ॥

[1] ज्वरितो.

अन्नद्वेषो भवेद्देवि! मासमात्रान्मृतो भवेत् ।
एवं शत्रोर्मारणं यत्सदण्डो ह्यभिचारजः ॥ ५९ ॥
चुल्ल्यधोभागतः स्थाप्य तद्वन्मासे मृतो भवेत्
शवदाहस्थले चैव लिखित्वा स्थापनात्प्रिये! ॥ ६० ॥
पक्षान्मरणमाप्नोति नात्र कार्या विचारणा ।
त्रपुप्यैमायसै रौप्यै रेकैकपलमात्रकम् ॥ ६१ ॥
द्वादशाङ्गेन ताम्रेण कारयेज्जयकारणम् ।
काहलीं रससंलिप्तां वादयेत्तां रणांगणे ॥ ६२ ॥
श्रुत्वा नादं प्रणश्यन्ति बलिष्ठा अपि शत्रवः ।
ताम्रकस्य विधानं तु ढक्कायामपि कारयेत् ॥ ६३ ॥
तथैव फलमप्युक्तं समरांगणभूमिषु ।
तुम्बुरा चित्रिकी दन्ती कृष्णोन्मत्तरसान्विता ॥ ६४ ॥
मार्जयेन्मौरजं चर्म सप्तवारं पुटद्वयम् ।
अग्निहोत्रश्मशानान्त्यजातिगेहसमुद्भवम् ॥ ६५ ॥
भस्मत्रितयमादाय कर्तव्यं भस्मकूटकम् ॥ ६६ ॥
अत्र मन्त्र. ॥

([1]काल सुक्कुरुनुवु वसुदपूयत्त सुविच्त सूभं मणुलालिकरं तुतुः आइ एहि किं पुच्छि एहि मापिमलद्व उद्भूति)

क्षिप्यते च रिपोस्सैन्यं भंगमायाति तत्क्षणात् ।
मारणे मोहने स्तम्भे विद्वेषोच्चाटने वशे ॥ ६७ ॥
एकं मायार्गलं यन्त्रं भेदेन बहुधा स्थितम् ।
द्वादशारं लिखेच्चक्रं वृत्तत्रयविभूषितम् ॥ ६८ ॥
दृष्टिमन्त्रं च तद्वह्ये यमश्लोकं च मध्यतः ।
(दृष्टिं विकृतिदंष्ट्राग्नं क्षेत्रं हुं फट्)
इति मन्त्रं जपेद्विद्वानयुतं विधिपूर्वकम् ॥ ६९ ॥
रोचनां कुंकुमं चन्द्रं कृष्णोन्मत्तरसान्वितम् ।
रोहितोद्भवलेखिन्या भूर्जे यन्त्रं लिखेदिदम् ॥ ७० ॥
साध्यनाम च तद्गर्भे बाह्ये चैकाररञ्जिकाम् ।
वह्निमण्डलगं कृत्वा रक्तसूत्रेण वेष्टयेत् ॥ ७१ ॥

[1]) कालनकुक्कुरु नहुहुभुद्दुयत्तनुविच्तनूभं मणुनालिकरं तु सुकि आयुविहिकिं पुच्छि एहमपि मलद्वलुदुभूतिद.

सिक्थेनावृतकं कुर्यान्मधुकुम्भे विनिक्षिपेत् ।
पूजयेद्रक्तपुष्पैश्च सप्ताहान्मोहयेद्रिपून् ॥ ७२ ॥
शिता तालहरिद्रा च मेषसूत्रसमन्विता ।
कोकिलाक्ष्या च लेखिन्या नीलरक्तपटे लिखेत् ॥ ७३ ॥
साध्यनामयुतं मध्ये रञ्जिकां च निवेशयेत् ।
पर्वताकृतियन्त्रं तु शिलाजलनिवेशितम् ॥ ७४ ॥
पूजयेत्पीतपुष्पैस्तु कुम्भकेन च वायुना ।
स्तम्भनं देहमनसोः सप्ताहाज्जायते रिपोः ॥ ७५ ॥
जत्वक्षुचित्रकैस्तुल्यैर्महिष्या रुधिरान्वितैः ।
पीतवस्त्रे च लेखिन्या लिखेद्यन्त्रमिदं परम् ॥ ७६ ॥
व्यतिक्रमाक्षरं चापि यन्त्रमध्ये निवेशयेत् ।
रञ्जिकाषट्कसमायुक्तं [1])महिलाकृतिमेव च ॥ ७७ ॥
निम्बवृक्षतले न्यस्तं सप्ताहाद् द्वेषकारकम् ।
काकविद्वेषिरक्तेन शवजंघायुते शुभे! ॥ ७८ ॥
काकपिञ्छस्य लेखिन्या लिखेद्यन्त्रं स्वरोदये ।
साध्यनाम लिखेत्तत्र चतुःकोणेषु मध्यगम् ॥ ७९ ॥
सविसर्गं [2])ष्टकारेण त्रकारेण च रंजिकाम्
उष्ट्रारूढं कृतं यन्त्रं बद्ध्वा काकगले तथा ॥ ८० ॥
सयन्त्रे वायसे मुक्ते ततस्तूच्चाटनं भवेत् ।
इत्याद्याः कुहनोपाया वर्तन्तेऽन्ये सहस्रधा ॥ ८१ ॥
दुर्बलेन विधातव्या बलिष्ठेषु जयार्थिना ।
एवं स्वशक्तिराहित्यात् कुहनोपायतत्परान् ॥ ८२ ॥
तानीश्वरप्रसादेन पौरुषेण च भूयसा ।
सदाशिवमहीपालः केरलादीन्पराभवत् ॥ ८३ ॥
भिन्दन्ति शैलानुदधीन्पिबन्ति व्यत्यासयन्ति क्षितिमन्तरिक्षम् ।
तृणीकृतब्रह्मपुरन्दराणां किं दुष्करं शंकरकिंकराणाम् ॥ ८४ ।
एवं केरलभूपादीन् सार्वभौमाभ्यनुज्ञया ।
सबलान् परिभूयाथ गृहीत्वापि बलिं ततः ॥ ८५ ॥
संस्थाप्य च जयस्तम्भं तद्देशाभ्यन्तरं क्वचित् ।
सकलान् सार्वभौमं स प्रापयामास तान्नृपान् ॥ ८६ ॥

[1]) महिषाकृति. [2]) गंटकारेण.

अनन्तरं जालिहाल्लु देशाधीशौ विरोधिनौ ।
यदवश्च मुरारिश्चेत्युभौ बहुपराक्रमौ ॥ ८७ ॥
निगृहीतुं परासाध्यौ स्वयं यातुं चिकीर्षति ।
सार्वभौमं वारयित्वा स्वयं गत्वा समं बलैः ॥ ८८ ॥
तद्दुर्गवरणं सद्यः प्रविश्यायं च तावुभौ ।
निजग्राह यथा रामः कुम्भकर्णदशाननौ ॥ ८९ ॥
प्रसाध्य दुर्ग्रहं दुर्गं जित्वा दुर्निग्रहौ च तौ ।
आनीय दर्शयामास राज्ञे सोऽयं तदा ततः ॥ ९० ॥
लब्ध्वा यदमूरारिकोटे कोलाहलाभिधाम् ।
ततस्सदाशिवनृपः स्वदेशं समुपेयिवान् ॥ ९१ ॥
रामेश्वरस्य पूजार्थं ददौ क्षेत्राणि भूरिशः ।
नगरं कारयामास स सदाशिवसागरम् ॥ ९२ ॥
ततः कुशावतीतीरे सदाशिवपुराह्वयम् ।
अग्रहारं स्वनाम्नैव व्यतनोदीशतुष्टये ॥ ९३ ॥
विप्रैर्विमलसद्वृत्तैस्सद्वंशजनितैरपि ।
अग्रहारः कृतो भूमेर्मुक्ताहार इवाबभौ ॥ ९४ ॥
सदाशिवेश्वरं तत्र प्रत्यस्थापयदादृतः ।
स्वनाम्नैव यथा रामः पुरा रामेश्वराभिधम् ॥ ९५ ॥
अथावरणदेवान्तं परितोऽस्थापयत्ततः ।
तन्नित्यपूजापर्याप्तं क्षेत्रं तेभ्योऽपि सोऽमुचत् ॥ ९६ ॥
महादानोदितैः कीर्त्तिखण्डैष्षोडशभिर्व्यधात् ।
सर्वेश्वरशिरःश्लाघ्यं स्वयशश्शशिमण्डलम् ॥ ९७ ॥

ततः कदाचित्सम्राजि दर्पितं जेतुमिच्छति ।
स मादरसनामानं बंकापुरनिवासिनम् ॥ ९८ ॥
निगृह्यतं गृहीत्वाथ निनाय नृपसन्निधिम् ।
अथानुजे समायते काश्या भद्रप्पनायके ॥ ९९ ॥
तेन साकमयं निन्ये कंचित्कालं महीमवन् ।
तस्य दत्वेम्मडिसदाशिवनायक नाम च ॥ १०० ॥
पट्टाभिषेकमकरोद्गन्तुकामस्तपोवनम् ।
स राज्ये च स्थितान् बाह्यान्निगृह्य श्रेयसे रिपून् ॥ १०१ ॥
आन्तरानिव तान् जेतुमाश्रमं स्वयमाविशत् ।
ततस्सदाशिवनृपः काले कियति निर्गते ॥ १०२ ॥
मुच्चन्नपि वपुर्नैव सदाशिवपदं जहौ ।
ततो महीं भद्रभूपः कञ्चित्कालं शशास सः ॥ १०३ ॥
जाया सत्सुतयोश्शस्त्रशास्त्रविद्याप्रवीणयोः ।
स्वं राज्यभारं निदधौ दोड्डसंकण्णनायके ॥ १०४ ॥
यौवराज्यं कनिष्ठेऽस्य चिक्कसंकण्णनायके ।
ताभ्यां राज्यस्थिरीभावसाधनत्वमुपेयुषाम् ॥ १०५ ॥
उपादिशद्राजनीतिं प्रेम्णा भद्रप्पनायकः ।
अनन्तरं च संकण्णनायको राज्यमन्वशात् ॥ १०६ ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले
सदाशिवनृपचरित्रमायोपायवर्णनं नाम पञ्चमस्तरंगः

अथ षष्ठस्तरंगः

राज्यस्य या स्थिरीभावे साधिकेति समीरिता ।
सा राजनीतिरधुना गुरो! प्रेम्णा निरूप्यताम् ॥ १ ॥
या त्वया साम्प्रतं पृष्टा शृणु नन्दन! तां ब्रुवे ।
नृपाणां च नराणां च केवलं तुल्यमूर्त्तिता ॥ २ ॥
आधिक्यं तु क्षमा धैर्यमाज्ञा दानं पराक्रमः ।
सदानुरक्तप्रकृतिः प्रजापालनतत्परः ॥ ३ ॥
विनीतात्मा हि नृपतिर्भूयसीं श्रियमाप्नुयात् ।
प्रजा न रञ्जयेद्यस्तु राजा रक्षादिभिर्गुणैः ॥ ४ ॥
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ।
प्रजापीडनसन्तापात् समुद्भूतो हुताशनः ॥ ५ ॥
राज्ञः कुलं श्रियं 1) प्राणान्नदग्ध्वा न निवर्तते ।
यथा बीजांकुरस्सूक्ष्मः प्रयत्नेनाभिवर्धितः ॥ ६ ॥
फलप्रदो भवेत्काले तद्वल्लोकस्सुरक्षितः ।
हिरण्यधान्यरत्नानि गजेन्द्राश्चापि वाजिनः ॥ ७ ॥
तथान्यदपि यत्किञ्चित् प्रजया स्यान्महीपतेः ।
उत्खातान्प्रतिरोपयन् कुसुमितांश्चिन्वन् लघून्वर्धय-
न्नत्युच्चान्नमयन् पृथूंश्च लघुयन्विश्लेषयन् संहतान् ।
वक्रान् कण्टकिनो वहिर्नियमयन् स्वारोपितान् पालयन्
मालाकार इव प्रयोगकुशलो राजा चिरं जीवति ॥ ८ ॥
इन्द्रस्यार्कस्य वायोश्च यमस्य वरुणस्य च ।
चन्द्रस्य च पृथिव्याश्च नृपस्सप्तगुणो भवेत् ॥ ९ ॥
यथेन्द्रश्चतुरो मासान् वार्षिकानभिवर्षति ।
एवं राष्ट्रं परीहारैरभिवर्षेज्जनाधिपः ॥ १० ॥
अष्टौ मासान् यथादित्यस्तोयं हरति रश्मिभिः ।
एवं राष्ट्रात्करान् राजा हरेदादित्यसन्निभः ॥ ११ ॥
प्रविश्य सर्वभूतानि यथा चरति मारुतः ।
चारैरेव चरेन्द्राजा व्रत्तमेमत्तु मारुतम् ॥ १२ ॥
यथा प्रियं वा द्वेष्यं वा प्राप्तकालं नियच्छति ।
तथार्हं दण्डयेद्राजा व्रत्तं वैवस्वतं हि तत् ॥ १३ ॥
यथा धावन्ति नद्यस्तु सिन्धुमाकांक्षया विना ।
तथा न कांक्षयेद्राजा व्रत्तमेतत्तु वारुणम् ॥ १४ ॥

1) प्राणान्नादग्ध्वा विनिवर्तते.

परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः ।
एवं प्रकृतयो नित्यं हृष्यन्ति नृपतेर्गुणैः ॥ १५ ॥
यथा सर्वाणि भूतानि धरा धारयते 1) समम् ।
पौरजानपदान् सर्वान् तथा राजाभिधारयेत् ॥ १६ ॥
सिंहादेकं बकादेकं विद्याच्चत्वारि कुक्कुटात् ।
वायसात् पञ्च शिक्षेच्च षट् शुनस्त्रीणि गर्दभात् ॥ १७ ॥
अल्पं कार्यमनल्पं वा यो नरः कर्तुमिच्छति ।
सर्वोद्योगेन तत्कुर्यात् सिंहादेकं प्रकीर्त्तितम् ॥ १८ ॥
इन्द्रियाणि च संयम्य बकवत्पण्डितो जनः ।
देशकालोपपन्नानि सर्वकार्याणि साधयेत् ॥ १९ ॥
प्रागुत्थानं च युद्धं च संविभागश्च बन्धुषु ।
स्त्रियमाक्रम्य भोगश्च विद्याच्चत्वारि कुक्कुटात् ॥ २० ॥
गूढमैथुनदूरेक्षे काले चाल्यसंग्रहः ।
अप्रमादोऽप्यनालस्यं पञ्च शिक्षेच्च वायसात् ॥ २१ ॥
बह्वाशी चाल्पसन्तोषी सुनिद्रस्सुप्रबोधकः ।
स्वामिभक्तश्च शूरश्च षडेते च शुनो गुणाः ॥ २२ ॥
सुश्रान्तोऽपि वहेद्भारं शीतोष्णे च न विन्दति ।
सन्तुष्टश्च भवेन्नित्यं खरस्यैते त्रयो गुणाः ॥ २३ ॥
एतांश्च विंशतिगुणान् यस्तु प्राप्नोति पण्डितः ।
लभते सर्वतः कीर्त्तिं सौख्यं सौभाग्यमेव च ॥ २४ ॥
बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् ।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ॥ २५ ॥
जिघांसिनः 2) पराश्रामाः परस्वादायिनश्शठाः ।
रक्षांस्यधिकृता नाम तेभ्यो रक्षेदिमाः प्रजाः ॥ २६ ॥
हस्तो हस्तं परिमुषेद्भिद्येरन् सर्वसेतवः ।
भयार्ता विद्रवेत्सर्वं यदि राजा न पालयेत् ॥ २७ ॥
ऊधश्छिनत्ति यो धेन्वाः क्षीरार्थी नाप्नुयात्फलम् ।
एवं राष्ट्रमयोगेन पीडयन्नाभिवर्धते ॥ २८ ॥
कालप्राप्तानुपादद्यान्नार्थान् राजावशोषयेत् ।
अहन्यहनि संदुह्यान्महीं गामिव बुद्धिमान् ॥ २९ ॥

1) श्रमम्. 2) पराक्रामाः.

पुत्रा इव पितुर्गेहे विषये यस्य मानवाः ।
यस्य वृत्तं नमस्यन्ति स्वर्गस्थस्यापि मानवाः ॥ ३० ॥
पौरजानपदास्सर्वे स राजा राजसत्तमः ॥ ३१ ॥
दुष्टस्य दण्डस्सुजनस्य रक्षा न्यायेन कोशस्य च संप्रवृद्धिः ।
अपक्षपातोऽर्थिषु राष्ट्ररक्षा पञ्चैव यज्ञाः कथिता नृपाणाम् ॥ ३२ ॥
तपो रक्षेच्च विप्रेभ्यस्तस्करेभ्यश्च सम्पदः ।
यथा स्वानाश्रमान्वर्णान् रक्षन् राजा षडंशभाक् ॥ ३३ ॥
एकग्रामप्रभुः कार्यो दशग्रामप्रभुस्तथा ।
ग्रामाणां विंशतेः कार्यस्तथा शतसहस्रयोः ॥ ३४ ॥
ग्रामदोषं समुत्पन्नमशक्तश्शासितुं यदि ।
दशग्रामेशितुश्शंसेत्तत्सर्वं विंशतीश्वरे ॥ ३५ ॥
विंशतीशश्शतेशाय तत्सर्वं विनिवेदयेत् ।
ब्रूयाद् ग्रामशतस्वामी सहस्रस्वामिनेऽखिलम् ॥ ३६ ॥
उत्पन्नांस्तु तथा दोषान् ग्रामाधोशनिवेदितान् ।
ज्ञात्वा तत्र स्थितास्सर्वे कुर्युस्तेषां प्रतिक्रियाम् ॥ ३७ ॥
पञ्चाशत्तम आदेयो भागः पशुहिरण्ययोः ।
द्वादशो वाष्टमोऽवापि षष्ठो वा धान्यतो नृपः ॥ ३८ ॥
फलक्लेशानुरूपेण गृह्णीयात्तत्करं नृपः ।
रसगन्धौषधीनां च मूलपुष्पफलस्य च ॥ ३९ ॥
तृणानां शाकपत्राणां फलानां चर्मणामपि ।
उपस्थितान्नाददीत श्रोत्रियाच्च करं नृपः ॥ ४० ॥
भूप्रदेशमकृष्टं तु गवां चाराय कल्पयेत् ।
देवोद्यानं सुप्रतिष्ठं मुनिभ्यो वितरेन्नृपः ॥ ४१ ॥
मृगसंघातसम्पन्नं क्रूरसत्त्वैर्विवर्जितम् ।
वनमात्मविहारार्थं पालयेत्पुरपार्श्वतः ॥ ४२ ॥
प्रत्यन्तदेशसम्भूतं वनं गिरिदरीयुतम् ।
सर्वेषां गोपनार्थं तु पार्थिवः परिपालयेत् ॥ ४३ ॥
फलैर्मूलैस्तृणैः काष्ठैः शाकैस्तत्रोद्भवैर्नराः ।
जीवन्ति ये ततो ग्राह्यो दशमो भागईरितः ॥ ४४ ॥
राष्ट्रादायातवित्तस्य चतुर्भागान् प्रकल्पयेत् ।
धर्मार्थकामसिध्यर्थं कुर्याद्भागत्रयं व्ययम् ॥ ४५ ॥
भागेनैकेन चावश्यं कुर्यात् कोशस्य संचयम् ।
कोशात् सुखमवाप्नोति कोशहीनस्तु सीदति ॥ ४६ ॥

(दुर्गलक्षणादि.)

विषहीनो यथा नागो मदहीनो यथा गजः ।
सर्वेषां वश्यतां याति दुर्गहीनस्तथा नृपः ॥ ४७ ॥
गिरिदुर्गं तोयदुर्गं गिरिपाषाणनिर्मितम् ।
इष्टकाभिः कृतं दुर्गं दुर्गं स्यान्मृत्तिकामयम् ॥ ४८ ॥
वनदुर्गं मरोर्दुर्गं दुर्गं स्याद्दारुनिर्मितम् ।
नरदुर्गं च नवमं तेषां वक्ष्यामि लक्षणम् ॥ ४९ ॥
दुरारोहं च शैलाग्रमुदकेन समन्वितम् ।
गिरिदुर्गं समाख्यातं नयशास्त्रविशारदैः ॥ ५० ॥
अगाधेनाथ तोयेन वेष्टितं जलजं भवेत् ।
पाषाणरचितं दुर्गमश्मदुर्गं प्रकीर्त्तितम् ॥ ५१ ॥
इष्टकाभिः कृतं सम्यक् सुधालिप्तं सुनिर्मलम् ।
इष्टकादुर्गमाख्यातं परिखावेष्टितं महत् ॥ ५२ ॥
मृदा विरचितं यत्तु तद् दुर्गं मृत्तिकामयम् ।
वनदुर्गं समाख्यातं घनं कण्टकशाखिभिः ॥ ५३ ॥
अन्तस्थैस्सञ्चितं तोयं वहिःस्थानां तु दुर्लभम् ।
मरुदुर्गं समाख्यातं मरुदेशेन संयुतम् ॥ ५४ ॥
दारुभिर्वेणुभिः क्लृप्तं दुर्गं दारुमयं स्मृतम् ।
शस्त्रहस्तैर्महायोधैर्निर्मितं नरदुर्गकम् ॥ ५५ ॥
एतेषामुत्तमं दुर्गं गिरिजं जलजं तथा ।
मध्यमानीतराण्याहुः कनिष्ठे नरदारुजे ॥ ५६ ॥
दुर्गायन्त्राणि कार्याणि नानाप्रहरणानि च ।
दुर्गद्वाराणि गुप्तानि कार्याण्यपि च भूभुजा ॥ ५७ ॥
संचयं चात्र सर्वेषामायुधानां प्रकल्पयेत् ।
अश्मनां च प्रभूतानां सिकतानां तथैव च ॥ ५८ ॥
सर्वेषां शिल्पभाण्डानां तत्र संचय इष्यते ।
औषधानां च सर्वेषां वादित्राणां तथैव च ॥ ५९ ॥
यवसानां प्रभूतानामिन्धनानां च संचयम् ।
गुडस्य सर्वतैलानां घृतस्य मधुनस्तथा ॥ ६० ॥
तथा च सर्वधान्यानां पांसुगोमययोस्तथा ।
अन्यानि सर्ववस्तूनि दुर्गे सञ्चिनुयान्नृपः ॥ ६१ ॥
मौल्यं भृतं तथा मैत्रं श्रेणमाटविकं बलम् ।
अमैत्रमपरं षष्ठं सप्तमं नोपलभ्यते ॥ ६२ ॥
वंशक्रमागतं मौल्यं भृतं द्रविणदानतः ।
मैत्रीकरणतो मैत्रं श्रेष्ठमेतद्बलत्रयम् ॥ ६३ ॥
सम्बद्धं जन्मकर्मभ्यां निश्चितं समयैश्च यत् ।
तद्बलं श्रेणमाख्यातं तच्च मध्यममिष्यते ॥ ६४ ॥
पर्वतोपान्तसंवासि निषादं म्लेच्छजातिजम् ।
अधमं तत्समाख्यातं वलमाटविकं बुधैः ॥ ६५ ॥

शत्रवो ये भयाक्रान्ता दासभावमुपागताः ।
तेषां बलं तु विज्ञेयममित्रजबलं बुधैः ॥ ६६ ॥
सन्निधौ न च तत्कार्यं विश्वसेन्न कदाचन ।
युद्धेषु पुरतः कार्यं नृपैर्युद्धविशारदैः ॥ ६७ ॥
लोहचर्मविनिर्माणाः कार्पासरचिता अपि ।
अयःकङ्कटकाः कार्याः सन्नाहः सदृढस्तथा ॥ ६८ ॥
बाहुत्राणैश्शिरस्त्राणैरंगत्राणैश्च संवृतम् ।
पताकादिध्वजस्तम्भैश्शोभमानं भवेद्बलम् ॥ ६९ ॥
वेत्रैर्वंशैश्च काष्ठैश्च चर्मभिश्चांकबन्धनैः ।
वर्तुलानि विधेयानि चर्माणि बलगुप्तये ॥ ७० ॥
व्याघ्रचर्मपिधानानि शातकुम्भमयानि च ।
फलकानि विचित्राणि कारयेच्च बले तथा ॥ ७१ ॥
मौल्ये बले च ये मुख्यास्तेषां कुर्वीत माननाम् ,
रत्नैर्विभूषणैर्वस्त्रैः प्रियवाक्यैर्मनोहरैः ॥ ७२ ॥
वृत्तिं तेषां प्रकुर्वीत यथायोग्यं सुपुष्कलम् ।
भृत्यानां वेतनं दद्याद्यथाकालमतन्द्रितः ॥ ७३ ॥
प्रत्यहं प्रतिमासं वा मासत्रयमथापि वा ।
चतुर्मासो चितं वापि मासषट्कमथापि वा ॥ ७४ ॥
संवत्सरमितं वापि कार्यापेक्षितया नृपः ।
प्रत्यहं वीक्षणं कार्यमलुब्धैराप्तपूर्वैः ॥ ७५ ॥
पक्षे पक्षे स्वयं पश्येद्दिने तैर्वीक्षितो भवेत् ।
जितश्रमाणां शूराणां सायुधानां नरेश्वरः ॥ ७६ ॥
दद्यात्प्रसादं भृत्यानां सोत्साहो वेतनं बुधः ।
अलसा नायुधैर्हीनान् दण्डयेत्तान्महीपतिः ॥ ७७ ॥
सिन्धुजैर्यवनोद्भूतैः काम्भोजप्रभवैरपि ।
शिक्षितैर्बहुभिर्वा हैश्चालनैर्विविधैरपि ॥ ७८ ॥
साध्यन्ते तुरगैरेव दूरस्था अपि वैरिणः ।
लभ्यते तुरगैः कीर्त्तिर्यस्याश्वास्तस्य भूः स्थिरा ॥ ७९ ॥
शिक्षिताः पोषितास्सम्यग्वाह्याः कार्या महीभुजा ।
यद्बद्वन [1] मसिंहं तु यद्वद्राष्ट्रमपार्थिवम् ॥ ८० ॥
[2] यद्वच्छौर्यमशस्त्रं तु तद्वत्सैन्यमकुञ्जरम् ।
अनेकायुधसंकीर्णाः पताकाध्वजरञ्जिताः ॥ ८१ ॥
चतुर्भिस्तुरगैर्युक्ता दृढसारथिनोदिताः ।
महारथैस्समाक्रान्ता बहवः स्यन्दना नृपैः ॥ ८२ ॥
चतुरंगबले कार्या रणे समरकांक्षिणा ।
एवं चतुर्विधं विद्याद्बलं सन्नद्धमाचरेत् ॥ ८३ ॥
शक्तित्रयसमायुक्तो नृपतिर्जयकाङ्क्षया ॥ ८४ ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले
राजगुणकरादान दुर्गलक्षण बलानुवर्णनं नामषष्ठस्तरंगः

1) यद्बद्वनमसालं तु. 2) यद्वत्कार्यमशास्त्रं तु.

अथ सप्तमस्तरंगः

शक्तित्रययुतो राजा जयेच्छत्रूनितीरितम् ।
किं तच्छक्तित्रयं मह्यं प्रब्रूहि दयया गुरो ! ॥ १ ॥
पुत्र ! ते यदभीष्टं तद्ब्रवीमि शृणु सादरम् ।
कुलीनं च सुशीलं च सुखे दुःखे च संगतम् ॥ २ ॥
अमायं दृढचित्तं च धनैः प्राणैरवञ्चकम् ।
नीतिज्ञं शौर्यसम्पन्नं व्यसनेषु पराङ्मुखम् ॥ ३ ॥
कुर्वीत नृपतिर्मित्रं धर्मार्थसुखसिद्धये ।
आत्मायत्तो द्वयायत्तस्सचिवायत्त इत्यपि ॥ ४ ॥
राज्ञामेवं त्रयो भेदा नीतिशास्त्रेषु कीर्त्तिताः ।
आत्मायत्तो नृपः श्रेष्ठो द्वयायत्तस्तु मध्यमः ॥ ५ ॥
कनिष्ठस्सचिवायत्त इति नीतिविदो विदुः ।
तत्तत्कर्तृकराज्यानि कीर्त्यन्ते तदभिख्यया ॥ ६ ॥
ममाधीनमिदं राज्यं राजा च वशगो मम ।
मया यत् क्रियते कार्यं तत्कार्यं केन लभ्यते ॥ ७ ॥
इत्यात्मगर्वेणाध्मातः सचिवो यत्र जल्पति ।
कनिष्ठस्तस्य तद्राज्यं सचिवायत्तमुच्यते ॥ ८ ॥
विज्ञप्तं यन्मया कार्य मवश्यं मन्यते प्रभुः ।
इत्यारोप्य स्वयं साम्यं सचिवो यत्र भाषते ॥ ९ ॥
सुखासुखप्रदं चैतदुभयाधीनसिद्धिदम् ।
तद्राज्यमुभयायत्तं मध्यमं परिकीर्त्तितम् ॥ १० ॥
प्रभोराज्ञां विना नाहं समर्थः कार्यसिद्धये ।
इति प्रीत्या नृपे भक्त्या सचिवो यत्र भाषते ॥ ११ ॥
एतद्राज्यं भयापेतं शुभदं राज्यसिद्धये ।
श्रेष्ठं स्थिरतरं सम्यगात्मायत्तं प्रकीर्त्तितम् ॥ १२ ॥
अनुग्रहे निग्रहे च दाने चादानकर्मणि ।
प्रवृत्तौ च निवृत्तौ च ग्रहणे मोक्षणे तथा ॥ १३ ॥
समर्थो वै स्वयं राजा स्वाज्ञा चैव निरर्गला ।
निजशक्त्या समायुक्तः सप्रभुः प्रभुरुच्यते ॥ १४ ॥
आज्ञारूपेण या शक्तिः सर्वेषां मूर्धनि स्थिता ।
प्रभुशक्तिर्हि सा ज्ञेया प्रभाव महितोदया ॥ १५ ॥
सहायं साधनोपायो विभागो देशकालयोः ।
विपत्तेश्च प्रतीकारः सिद्धिर्मन्त्रेऽङ्गपञ्चकम् ॥ १६ ॥
गुरुशुक्रमतेऽप्येते चाणक्यादिमते तथा ।
पश्चात्तापविहीनश्च सानुबन्धस्सुखोदयः ॥ १७ ॥
अभीष्टश्चाविलम्बश्च पञ्चांगो मन्त्र उच्यते ।
बहुभिर्भिद्यते मन्त्रो द्वाभ्यां मन्त्रो विनश्यति ॥ १८ ॥
आत्मना विहितो मन्त्रो ब्रह्मणाऽपि न भिद्यते ।
फलैर्मेयास्सदाऽऽरम्भाः पुण्यं पूर्वार्जितं यथा ॥ १९ ॥
बन्धुमूकजडार्तस्त्रीवृद्धबालशुकादिकान् ।
श्रुतिगोचरतो देशात्तथालोचनगोचरात् ॥ २० ॥
चालयेत्परतो यत्नान्मन्त्रकाले नरेश्वरः ।
आरुह्य चोन्नतस्थानं प्रासादं वा रहःस्थितम् ॥ २१ ॥
अरण्ये विजने वापि मन्त्रं कुर्यादलक्षितः ।
मध्याह्नकाले मन्त्रज्ञः कृताहारो गतक्लमः ॥ २२ ॥
रात्रेरन्तिमभागेवा गतनिद्रस्सुखोत्थितः ।
धर्ममर्थं च कामं च कृत्याकृत्यं बलाबलम् ॥ २३ ॥
रिपूणां निग्रहोयोगमर्थानामार्जनक्रमम् ।
भृत्यानां भरणं चैव प्रत्यूहानां प्रतिक्रियाम् ॥ २४ ॥
सन्मानं चैव मित्राणां पुत्राणां नयशिक्षणम् ।
शुद्धान्तवनितारक्षां शिक्षां च गजवाजिनाम् ॥ २५ ॥
मन्त्रिणां मन्त्रितं तद्वदमात्यानां विचेष्टितम् ।
रक्षणं च कुमाराणां सामन्तानां च शासनम् ॥ २६ ॥
रागारागौ च लोकानामात्मनश्च गुणागुणौ ।
आयं व्ययं च वित्तानां कोशस्यापि विवर्धनम् ॥ २७ ॥
दुष्टानां दमनं चैव शिष्टानां परिपालनम् ।
पूजनं सुरविप्राणां वर्णाश्रमविचारणम् ॥ २८ ॥
देवालयतटाकाग्र्यकूपारामादिरक्षणम् ।
स्वदेहरक्षणार्थाय ग्रहाणां च बलाबलम् ॥ २९ ॥
दुर्गाणां रक्षणं सम्यक् परभूपालचेष्टितम् ।
मारणं तस्करादीनामात्मरक्षाविधिक्रमः ॥ ३० ॥
प्रकृतीनां च सद्भावं धान्यादीनां समार्जनम् ।
शान्तिकं पौष्टिकं कर्म नित्यं नैमित्तिकं तथा ॥ ३१ ॥
माननं बुद्धिवृद्धानां देशकालविमर्शनम् ।
चिन्तयेन्मन्त्रिभिस्सार्धं स्वयं वा वसुधाधिपः ॥ ३२ ॥

आहूय मन्त्रिणस्सर्वान् मन्त्रयेत पृथक्पृथक् ।
अभिप्रायं विदित्वैषां गुणदोषौ विचारयेत् ॥ ३३ ॥
मन्त्रिभिर्मन्त्रिते मन्त्रे गुणदोषौ [1] विचार्य च ।
किं कृतं करणीयं किं क्रियमाणं च किं मया ॥ ३४ ॥
किमु धार्यमधार्यं मे सञ्चिन्त्यैवं मुहुर्मुहुः ।
बहुलाभं सुधन्यं च धर्मकीर्तिविवर्धनम् ॥ ३५ ॥
कार्यं विचार्य कर्तव्यं भूभुजा सुखमिच्छता ।
समावायव्ययौ यत्र व्ययो यत्राधिको भवेत् ॥ ३६ ॥
असाध्यं च सुखोपायैः कथं चित्तं सुमन्त्रयेत् ।
अधर्म्यं चायशस्यं च पश्चात्तापकरं च यत् ॥ ३७ ॥
दुर्लभं क्लेशबहुलं दुर्मन्त्रं तन्निवारयेत् ।
कामात् क्रोधाद्भयादन्यैर्लोभ्यमानो नमुह्यति ॥ ३८ ॥
यया शक्त्या युतः कार्ये मन्त्रशक्तिस्तु सा स्मृता ।
यस्य स्यादुद्यमे युक्तं चित्तमुत्साहसंयुतम् ॥ ३९ ॥
उत्साहशक्तिस्साज्ञेया नृपाणां शक्तिमिच्छताम् ।
सत्यानृता च परुषा प्रियवादिनी च हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च वारांगनेव नृपनीतिरनेकरूपा ॥
जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणाधिके पुंसि जनोनुऽरज्यते जनानुरागप्रभवा हि सम्पदः ॥ ४१ ॥
एवं भद्रमहीपालो ज्येष्ठभ्रातुस्तनूद्भवे ।
राज्ञामावश्यकीं तावद्राजनीतिमुपादिशत् ॥ ४२ ॥
ततः स्वल्पैरहोभिः प्राकृपृष्ट्वान् काशिकापतिम् ।
शिवं कैलासधामानं दिदृक्षुरिवनिर्ययौ ॥ ४३ ॥
ततो राज्यं समासाद्य दोड्डसंकण्णनायकः ।
आनन्दयत् कुवलयं राजा रम्यकलानिधिः ॥ ४४ ॥
जातु [1] जम्बूरुदेशीयो येरुषण्णाभिधानवान् ।
प्रख्यातःसार्वभौमाय दातव्यांश्च करोपधाः ॥ ४५ ॥

आदिशन् प्रतिकूलत्वमाचचारातिदर्पितः ।
तं निगृह्य बलाद्धृत्वा हस्तेनैवानयत्प्रभोः ॥ ४६ ॥
सविधं सोऽपि सन्तुष्यन्नेवं वचनमब्रवीत् ।
एतादृक्छौर्यसम्पन्नस्त्वमस्मत्सविधे वस ॥ ४७ ॥
निधेहि राज्यमनुजे समानय कुटुम्बकम् ।
इत्याज्ञप्ते सविधगे याते कियदनेहसि ॥ ४८ ॥
तस्योदभवतां श्रेष्ठौ महिष्यां क्रमशस्सुतौ ।
एकस्य रामराजाख्या रचिताऽसीत्परस्यतु ॥ ४९ ॥
विनिर्मिता वेंकटप्पनायकाख्या तयोर्द्वयोः ।
सार्वभौमस्तदा स्त्रीयनामांकनमवेक्ष्य सः ॥ ५० ॥
होळेहोन्नूरु मासूरु जीवीमल्लूरु देशकान् ।
दत्वोप भोग्यानथ तं प्राहिणोत्स्वपुरं प्रति ॥ ५१ ॥
स च प्राप्यानुजाभ्याशं तेन साकमवर्तत ।
अनन्तरं परांगेषु सार्वभौमविरोधिषु ॥ ५२ ॥
पुनरेनं समानाय्य मेलयित्वानुजेन तम् ।
नाम्ना विट्ठलराजेन यापयामास तान्प्रति ॥ ५३ ॥
ततस्तान्वैरिणो राजा गोवादेशनिवासिनः ।
पराभवत्सार्वभौमानुजेन सह संगतः ॥ ५४ ॥
ततो गोवापुराधीशं स्वस्मै जित्वार्पयत्यपि ।
अस्मिन् प्रमुदितः प्रादान्महादेवपुरस्थलम् ॥ ५५ ॥
अनन्तरं प्राप्य राज्यं यातो निजपुरीं प्रति ।
अनुजेन समं कंचित्कालं सुखमवर्तत ॥ ५६ ॥
ततः कदाचित् पुण्यानां क्षेत्राणां तत्र वर्तिनाम् ।
लिंगानामपि तीर्थानामवलोकनकांक्षया ॥ ५७ ॥
शकुनानि पुरस्कृत्य ततश्शुभपुलानि सः ।
प्रययौ प्रथमं तावत्ककुभं सेतुचिह्निताम् ॥ ५८ ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले शक्तित्रय दोड्डसंकण्णनायक वृत्तान्तवर्णनं नामसप्तमस्तरंगः

I) विचारयेत्. 1) जम्बूरुदेशेशो विरुप्यण्णा.

अथ अष्टमस्तरंगः.

शकुनानि समालोच्य स्वयं संकण्णनायकः ।
निर्ययौ तीर्थयात्रार्थमिति स्वामिन्निरूपितम् ॥ १ ॥
शकुनानि पुनः कानि कानि तेषु फलान्यपि ।
एतन्मह्यं समाचक्ष्व सर्वविद्याविशारद! ॥ २ ॥
शृणु नन्दन! यत्पृष्टं सङ्क्षिप्य विवृणोमि तत् ।
शुभाशुभानां कार्याणामासन्नानां भविष्यताम् ॥ ३ ॥
सूचकान्येव सर्वाणि शकुनानि विदुर्बुधाः ।
आकारगोचराण्येषां शकुनानां च कानिचित् ॥ ४ ॥
शाब्दानि कानिचित्तानि कीर्त्यन्तेऽत्र यथा तथा ।
अनुलोमो वहन् वायुः सुगन्धश्शीतलो मृदुः ॥ ५ ॥
सिद्धये यास्यतः प्रोक्तो विलोमोऽनिष्टदः स्मृतः ।
स्खलनाद्दक्षिणस्याङ्घ्रेरंगुष्ठादि यथाक्रमम् ॥ ६ ॥
वसुवस्त्रं विरोधं च कलहं हानिमश्नुते ।
वामस्य तद्वन्नैष्फल्यं कलहं मैत्रमीप्सितम् ॥ ७ ॥
सौख्यं च लभते मर्त्यो यात्रायां नात्र संशयः ।
तैलचामरसंभूता भूपतिर्गजमारथ? ॥ ८ ॥
सभापतिर्गजो मूर्खपरं गदमरासभाः? ।
दासीरथो भयत्यागी रथभूकान्तगर्दभ? ॥ ९ ॥
गजमूर्खसभायाति भानुवारादिषु क्रमात् ।
मृत्युर्वधश्श्रियश्चैव सुवार्ता विजयश्शुभम् ॥ १० ॥
सन्तापः कलहश्चैव सृगालक्षुतगौलिकाः ।
रागाद्यास्तु विदिग्भेदा दिशास्सर्वास्तु षोडश ॥ ११ ॥
एकैकदिशि यामार्धं दिवारात्रं चरेद्रविः ।
रव्यादिक्षुतपर्यन्तं प्रादक्षिण्यक्रमेण तु ॥ १२ ॥
भीतिर्मरणवार्ता च शत्रोरभ्यागमस्तथा ।
स्त्रीप्राप्तिः कलहश्चैव उपायानसमागमम् ॥ १३ ॥
चोराभ्यागमनं पुष्पं ताम्बूलं चित्तविभ्रमः ।
पत्रिका सुन्दरीप्राप्तिरिष्टाप्तिः सुखभोजनम् ॥ १४ ॥

1) ज्येष्ठाद्यंगुलिभिः क्रमात्.

सर्पदंशं च सन्तोषं सृगालक्षुतगौलिकाः ।
अशोभनं क्षुतं विन्द्यान्मृतयोगस्तथेरितः ॥ १५ ॥
बलात्तुनिष्फलं बालवृद्धपीनसिकैरपि ।
निरर्थकं पुरः प्रोक्तमनर्थं दक्षिणे तथा ॥ १६ ॥
पृष्ठतः कार्यलाभाय क्षुतं क्षेमाय वामतः ।
भेषजे वाहनारोहे शयनासनभोजने ॥ १७ ॥
विद्यारम्भे बीजवापे क्षुतं शुभकरं मतम् ।
अर्चितायां वदेद्गौल्याः फलानि स्वरसंख्यया ॥ १८ ॥
वृद्धिर्लोभं च दुःखं च भयलाभाभिवृद्धयः ।
मरणं राजसन्मानं बन्धूनां दर्शनं तथा ॥ १९ ॥
इष्टसिद्धिरनिष्टाप्तिः फलानि द्वादश स्वरे ।
यात्रायामुदये पुण्ये पुण्यारूढे तथैव च ॥ २० ॥
प्रथमे दक्षिणा पश्चात्सव्या शोभनमादिशेत् ।
पापोदये तथाऽऽरूढे दक्षिणा पूर्वमुत्तरा ॥ २१ ॥
सव्या विफलतां याति गतिः स्याद्गतिमात्रता ।
उदयारूढयोर्गौली पुण्यतां याति सर्वदा ॥ २२ ॥
शुभदा पापसंयोगादशुभं यातुरादिशेत् ।
यात्रायां गौलिका पृष्टा शुभारूढे शुभोदये ॥ २३ ॥
दक्षिणा शुभदा यात्रा ब्रूते तत्स्यादिति ध्रुवम् ।
सर्वस्य पापयोगेन यातुः स्यात्तद्विपर्ययः ॥ २४ ॥
सव्या च शुभदा गौली शुभारूढे शुभोदये ।
1) सपापि यदि सव्या स्याद् ब्रूते याऽनन्ततोऽधिकम् ॥ २५ ॥
विमाने गोपुरद्वारे विप्रराजगृहेषु च ।
वृक्षे क्षीरिणि वा पुष्पैः फलैर्वा पल्लवैर्युतम् ॥ २६ ॥
सभायां वा स्थिता गौली सद्य श्शुभफलप्रदा ।
वृक्षे च कण्टकैर्युक्ते चाक्षवृक्षे विषद्रुमे ॥ २७ ॥
शुष्के दग्धोदरे वाऽपि करञ्जे खदिरेऽपिवा ।
यदि वक्ति स्थिता गौली चिरेणाल्पफलप्रदा ॥ २८ ॥

1) सपापे.

श्वेता रक्ता पीतनीला श्वानचित्रा अपि क्रमात् ।
ब्रह्मक्षत्रियविट्छूद्रसर्वसंकरजातिजाः ॥ २९ ॥
योषिद्व्याधितवृद्धेषु बालक्लीबालसेषु च ।
न फलं स्यात्सुनिर्दिष्टं व्यंग्येषु फलमन्यतः ॥ ३० ॥
प्रयाणकालमुद्दिश्यविप्रः श्वा सव्यतो व्रजेत् ।
चिन्त्यमाना तु या सिद्धिर्दीर्घकालेन सा भवेत् ॥ ३१ ॥
यत्कार्यं मनसा ध्यायेद्वणिक्श्वा सव्यतो व्रजेत् ।
सद्य एवतु तत्कार्यं प्रसिद्ध्येन्नात्र संशयः ॥ ३२ ॥
यत्कार्यं मनसा ध्यायेच्छूद्रश्वा सव्यतो व्रजेत् ।
चिन्त्यमानं तु तत्कार्यं निर्विघ्नाज्जायते ध्रुवम् ॥ ३३ ॥
यदि गच्छन् दिशं वीक्ष्य पादेन धरणीं लिखेत् ।
कर्णस्फोटं तथा कुर्यात् सर्वकार्यविनाशनम् ॥ ३४ ॥
पृष्ठतोऽपि रुतं कृत्वा लांगूलं खादते पुनः ।
त्वरितं पुरतश्शेते कलहं तत्र निर्दिशेत् ॥ ३५ ॥
तृणेषु चैव काष्ठे च यदि मूत्रं स्रवन् स्पृशेत् ।
यात्रायां प्राप्यते शीघ्रमर्थहानिर्न संशयः ॥ ३६ ॥
रज्जुचर्म तृणं गृह्णन् द्रावितो यदि दक्षिणम् ।
वामे पादे स्पृशेद्भूमिं पादपीडा भवेत्तदा ॥ ३७ ॥
सम्मार्जनीं च कार्पासं शणकं शूर्पकं कशाम् ।
गृहीत्वा सम्मुखोऽभ्येति तद्गृहं पूर्यते धनैः ॥ ३८ ॥
वसुन्धरायाः कमपि प्रदेशं मूर्ध्ना स्पृशेद्यद्यवलोकते च ।
ध्रुवं तथा तत्र महानिधानमस्तीति सिद्धैः कथितं रहस्यम् ॥
अष्टदिशो रवियोगाज्ज्वलिता धूमान्विता छाया ।
सुजला कर्दमधात्र्या भस्मितदग्धे परिज्ञेयाः ॥ ४० ॥
प्रत्येकमेकस्ततं सुमेरोः प्रदक्षिणाभ्यागमनक्रमेण ।
दिवारजन्योः प्रहराष्टकेन प्रतापयत्युष्णकरो दिशोऽष्टौ ॥ ४१ ॥
दिशि ज्वलन्त्यां मरणं प्रदिष्टं धूमान्वितायां सकलार्थनाशः ।
च्छायाजलाकर्दमितासु दिक्षु जयो धरित्र्यां कथितोऽर्थलाभः ॥
स्याद्भस्मितायां न भयं न हानिरंगारितायां स्वजनक्षयः स्यात् ।
रात्रौ शिवायाः स्वरजप्रभावो यथा भवेदह्न्यपि तद्विधः स्यात् ।
अतीवसौख्यशुभदा याम्या निशि भवेच्छिवा ।
पूर्वस्यां तत्पुराध्यक्षमन्यं कुर्यादहर्मुखे ॥ ४५ ॥

आस्ते शिवा पश्चिमायां परचक्रभयाय सा ।
शुभा कुबेरदिश्यास्ते ग्रामान्ते शून्यकारिणी ॥ ४६ ॥
अश्वमध्ये कृतरवा शिवा युद्धप्रपञ्चकृत् ।
शिवा सप्तस्वरा ग्राह्या बहुशब्दा तु निष्फला ॥ ४७ ॥
धनं मित्रं प्रियं भोगं सुखं राज्यं भयं क्रमात् ।
एकादौ सप्तपर्यन्ते शब्देशान्तदिशाफलम् ॥ ४८ ॥
रुजं शोकं भयं हानिं चौर्यं वह्निं मृतिं क्रमात् ।
कुर्वन्त्येकादि सप्तान्ता दीप्तदिक्षु शिवारवाः ॥ ४९ ॥
दिवा त्रीनथवा पञ्च सप्त वा कुरुते स्वरान् ।
फेंफे हुहु भुभूश्चैव हाबु हाबु हहस्तथा ॥ ४९ ॥
एतान् पञ्चस्वरान् ब्रूते सर्वदिक्संगता शिवा ।
फेंफे नगरनाशाय हुहु सर्वशुभप्रदा ॥ ५१ ॥
भुभूश्च विपदं ब्रूते हाबुहाबु महाभयम् ।
हहश्च नृपनाशाय मिश्रे मिश्रफलं भवेत् ॥ ५२ ॥
पुरासन्ने स्वरे शीघ्रं फलं दूरे चिरेण च ।
एवं शिवारुतफलं क्रमेण परिकीर्त्तितम् ॥ ५३ ॥
पृष्ठे पुरो वाहनगोमयस्तथा वटादिषु क्षीरतरुष्वपीह ।
स्थिता [1]रुदन्तो जलपानमिष्टं विष्ठां च कुर्वन् वितरत्यवश्यम् ॥
अनादिवर्चःफलपुष्पमांसमत्स्यादिभिः पूर्णमुखस्तथैव ।
स्याद्दृष्टमात्रोऽभिमतार्थसिद्ध्यै मृष्टान्नभोज्याय सदैव काकः ॥
गोपृष्ठदुग्धद्रुमगोमयेषु तुण्डं निघर्षन्नवलोकितश्चेत् ।
स्वाहारमन्यस्य मुखे दधानो ददाति भोज्यं बलिभुग्विचित्रम् ॥
क्रां क्रामिति क्षेमविधौ विरावः किं किम्मितीष्टाशनपानहेतुः ।
करोति कुंकूमिति चार्थलाभं क्रें क्रें ध्वनेः काञ्चनलाभमाहुः ॥
यत्कायकायेति पुरः प्रदिष्टं शब्दद्वयं स्यान्महते फलाय ।
कामित्ययं वाहनमानने च ददाति हर्षं परमं विरावः ॥ ५७ ॥
गोपुच्छवल्मीककृतास्वदश्च काको भवेत्सर्पभयस्य हेतुः ।
वह्नीवरत्राकचशुष्ककाष्ठचर्मास्थिजीर्णाम्बरवल्कलानि ॥
अंगाररक्षोल्मुकखर्पराणि दशन्मुखेनातिभयाय काकः ।
अत्रस्थानिजपक्षैस्तुण्डविघातैर्जनानाभिभवन्तः
कुर्वन्ति शत्रुवृद्धिं निशि विरुवन्तस्समस्तजननाशम् ॥ ५९ ॥

[1] रुदन् भोजन.

शीर्षे नरस्योपविष्टः काको मृत्याद्यनर्थदः ।
स्थित्या जनापवादं वा शोकं वा कुरुते स्त्रियः ॥ ६० ॥
क्रीक्रीमितीष्टार्थविनाशनाय ज्वलज्वलेत्यग्निभयाय शब्दः ।
क्रोक्रोमितीदं शुभलाभकारि कुंकुं निनादः प्रियसंगमाय ॥
स्यात्कलिः कर कर ध्वनौ नृणां जायते कणकण ध्वनौ ज्वरः
(आवृजेत् कुलकुलध्वनौ प्रियं स्वादनं कुटुकुटुध्वनौ भवेत्)
यः स्नाति धूल्यम्बु विलोक्य रौति वृष्टिं स [1]चाशंसति वायसोऽसौ
जलस्थलस्नानविपर्ययेण वर्षासु वृष्टेर्भयमन्यथा तु ॥
काकस्य वचनं श्रुत्वा पादच्छायां प्रकल्पयेत् ।
त्रयोदशसमायुक्तं षड्भिर्भागं समाहरेत् ॥ ६४ ॥
रोगं लाभं तथाऽध्वानं भोजनं च धनागमम् ।
निश्शेषे मरणं प्रोक्तं सत्यमाह पराशरः ॥ ६५ ॥
रात्रौ गृहस्योपरि भाषमाणो दुःखाय घूकस्सुतमृत्यवे च ।
गृहस्थनाशाय च सप्तरात्रं नाशाय राज्ञो द्विगुणानुबन्धी ॥
त्र्यहं गृहद्वारि रुदत्युलूके हरन्ति चोरा द्रविणं प्रसह्य ।
तास्मिन् प्रदेशे निशि माषयुक्तकस्तद्दोषनाशाय बलिः प्रदेयः ॥
सन्ध्याकाले रुदन् भूमौ प्रदेशे वेश्मनोऽथवा ।
दृष्टो रागप्रदो घूकस्सोप्यार्तानां भयावहः ॥ ६९ ॥
घूघूशब्दस्सदा शान्तो गुरुर्गुग्लुश्च शान्तिदः ।
अन्ये शब्दास्तु घूकानां निन्दितास्सर्वथाऽशुभाः ॥ ७० ॥
शान्तायां दिशि वृक्षेषु ग्रामाद् दूरे तु शब्दतः ।
घूकःस्यात्सर्वलोकानामृद्धिसिद्धिसुखार्थकृत् ॥ ७१ ॥
शिरसः स्पन्दने राज्यं स्थानलाभोललाटके ।
भ्रूमध्ये धनलाभश्च भ्रुवः स्पन्देऽङ्गनागमः ॥ ७२ ॥
नासिकायां सुगन्धाप्तिर्दक्षाक्ष्यादौ सुदर्शनम् ।
मध्यापरि सुखावाप्तिर्नेत्रान्ते दुःखसंक्षयः ॥ ७३ ॥
नेत्रान्तेऽप्यधरे हानिर्मध्ये हासितु रोदनम् ।
नेत्रादावधरे युद्धं वामनेत्रादिके भयम् ॥ ७४ ॥
वाममध्योपरिभयं वामान्ते धनसम्पदः ।
अधोभागे रोदनं चाधोमध्ये च दुरिष्टकृत् ॥ ७५ ॥
वामाधरादौ सर्वार्थहानिः स्त्रीणां विपर्ययः ।
उत्तरोष्ठे चातिभूमिरधरोष्ठे च बन्धनम् ॥ ७६ ॥

मगलश्रवणं दक्षकर्णस्पन्दे सदा नृणाम् ।
वामे च दुष्टवार्ता च कण्ठे विभवविच्युतिः ॥ ७७ ॥
बहुग्रीवास्पन्दने तु मरणं नृपतेर्भयम् ।
भुजयोर्दक्षिणस्पन्दे पुत्रालिंगनशोभनम् ॥ ७८ ॥
मणिबन्धस्पन्दनेतु भूषणं सुपराक्रमः ।
दक्षहस्ततलेऽर्थाप्तिरंगुल्यामतिशोभनम् ॥ ७९ ॥
(वामांगस्पन्दनेरोगो दुःखालिंगनकृद्भुजे ।
मणिबन्धे सर्वहानिस्तापो हस्ततलेपिच ।
दक्षहस्तस्पन्दनेपि जघनेपि सुवासनम्)
कटिस्पन्दे स्वर्णरौप्य पुत्रप्राप्ति स्सुखोद्भवः ।
वामपार्श्वेऽङ्गनाप्राप्तिर्जघने शिशुसंक्षयः ॥ ८० ॥
जंघोरुस्पन्दनान्दोलवाहनच्छत्रसम्पदः ।
कुक्षिस्पन्दे धान्यलाभो नाभिस्पन्दे सुभोजनम् ॥ ८१ ॥
स्तनस्पन्दे सन्ततिश्च हृदः स्पन्दे महोन्नतिः ।
गुह्यस्पन्दे महाभाग्यं गुदस्पन्देऽङ्गनामृतिः ॥ ८२ ॥
जानूरुजघनस्पन्दे कृषिधान्यपशुक्षयः ।
वामगुल्फे वातरोगो व्रणरोगोऽथवा भवेत् ॥ ८३ ॥
पादस्पन्दे महाध्वाच पृष्ठस्पन्दे युधि क्षतिः ।
रोगे चैव भये स्त्रीणां दर्शने भोजने तथा ॥ ८४ ॥
अङ्गानां स्पन्दनं यत्तन्निष्फलं परिकीर्त्तितम् ।
दाक्षिणांगेषु यत्पुंसां फलं तावत्प्रकीर्तितम् ॥ ८५ ॥
वामांगस्पन्दने स्त्रीणां तत्फलं प्रवदेत्सुधीः ।
सृगालनकुलव्याघ्रचकोरोलूकपक्षिणाम् ॥ ८६ ॥
दक्षिणे स्पर्शनं श्रेष्ठं प्रस्थाने वामतोऽन्यथा ।
खमृगाजखरध्वांक्षरुरूणां गवयस्य च ॥ ८७ ॥
वामे चालोकनं शस्तं प्रयाणे दक्षिणेऽन्यथा ।
प्रस्थाने दाक्षिणे लाभं लाभं वामेच वञ्चुलः ॥ ८८ ॥
प्रवेशे व्यत्ययाद्ब्रूते मयूरश्चेदतोऽन्यथा ।
मार्गस्योभयतः स्थित्वा रुवतः पक्षिणौ यदा ॥ ८९ ॥
तोरणस्थौ विजानीयान्मांगल्यफलसूचकौ ।
प्रदाक्षिणं परिक्रम्य फलवृक्षं समाश्रितः ॥ ९० ॥
लाभं ब्रूतेऽन्यथाहानिं वञ्जुलो वायसोऽपिवा ।
आश्रित्य कण्टकतरुं प्रत्यर्कमवलोकयन् ॥ ९१ ॥

1) सदाशंसति.

क्रूरं रुवन् भयं ब्रूते स्वर्णचञ्चुश्च वायसः ।
वेश्म सेनासमूहं वा लंघयन् वञ्जुलो रुवन् ॥ ९२ ॥
कलहं वा मृतिं भ्रान्तिं तत्रावेदयति स्फुटम् ।
पूर्वाह्णे चर्वपरदौ सिद्धिं वामेन शंसतः ॥ ९३ ॥
दक्षिणेनापराह्णे तु व्यत्यासेनाशुभं तथा ।
लाभाय पिंगलो रौति दक्षिणेन न संशयः ॥ ९४ ॥
सव्येन चान्यथा नित्यं वदेच्छकुनकोविदः ।
कृकलासः पुरो यस्य भूमौ पतति विह्वलः ॥ ९५ ॥
तन्नामाक्षरमासेषु तस्य हानिं मृतिं वदेत् ।
यस्यां हरिति हारीतः प्रस्थाने दृश्यते पुरः ॥ ९६ ॥
षण्मासाभ्यन्तरे नाशं तत्र तस्यां दिशो विदुः ।
सुशीलं श्रोत्रियं शान्तं प्रसन्नं प्रियदर्शनम् ॥ ९७ ॥
सर्वज्ञं सुहृदं चापि बान्धवं वा धनुर्धरम् ।
प्रजावतीं तथा रम्यां दर्शनीयां पतिव्रताम् ॥ ९८ ॥
भूषितां वीरसूं वेश्यां कन्यामन्नं च तण्डुलम् ।
पुष्पं फलं वृषं धेनुं चन्दनं सामिधः कुशान् ॥ ९९ ॥
दूर्वां च चामरं सर्पिश्शवं तूर्याणि दर्पणम् ।
पूर्णकुम्भं ध्वजं छत्रं मत्स्यं मांसं सुरां दधि ॥ १०० ॥
पिष्टातं मूलजातं च पावकं ज्वलितं गजम् ।
राजानं तुरगं शंखं चक्रवाकं च सारसम् ॥ १०१ ॥
हंसं शिखण्डिनं मुस्तां ताम्रमाभरणानि च ।
वणकं शयनं मालां रूप्यं रत्नानि काञ्चनम् ॥ १०२ ॥
धान्यानि चेति प्रस्थाने पुरस्तात्पश्यतश्शुभम् ।
क्लीबं मूकं च बधिरं व्रतिनं विकृताकृतिम् ॥ १०३ ॥
ब्रह्मद्विषं परिव्राजं जाल्मं जालोपजीविनम् ।
जातिभ्रष्टं व्रतभ्रष्टं खल्वाटं ब्रह्मचारिणम् ॥ १०४ ॥

कुणिं च सौनिकं क्रूरं विकलं व्याधिपीडितम् ।
दण्डिनं मुण्डिनं वापि मुक्तकेशं दिगम्बरम् ॥ १०५ ॥
विधवां पुष्पितां वन्ध्यां विरक्तां भिक्षुकीं तथा ।
क्षीणां क्षीणस्तनीं मत्तां मातंगीं छिन्ननासिकम् ॥ १०६ ॥
तैलं मधु पय. पक्वं पिण्याकं फाणितं कुथम् ।
कण्ठानिचोलमुद्गारं लोहं च क्षतजं रसाम् ॥ १०७ ॥
कांस्यं कार्षापणं सीसमय[1] स्तक्रं च काञ्जिकम् ।
मार्जारं मार्जिनीं रज्जुमागारभसिते तुषाम् ॥ १०८ ॥
केशास्थि चर्म कार्पासच्छूर्पकूर्पासकर्परान् ।
उलूकं महिषं गृध्रं श्वानं शाखामृगं बकम् ॥ १०९ ॥
(रूक्षंखरं नरक्षुं च गर्दभं मेषमेलकौ)
गोधां च जम्बुकं काष्ठमूषरं खञ्जरीटकम् ॥ ११० ॥
रिक्तान्यपि च पात्राणि प्रस्थाने कुर्वतेऽशुभम् ।
शुभाशुभेष्वनुक्तं यन्निमित्तेष्विह लक्षणैः ॥ १११ ॥
साधारणमिति ज्ञेयं निमित्तं तत्त्वदर्शिभिः ।
एवं शुभाशुभफलप्रदानि शकुनानि तु ॥ ११२ ॥
अंगचेष्टितशब्दाभ्यामुक्तानि बहुधाधुना ।
एतेषु शुभदायीनि शकुनानि विलोकयन् ॥ ११३ ॥
संकण्णनायको ज्यायान् ककुभं सेतुचिह्निताम् ।
उद्दिश्य प्रथमं यानमकरोदातिसादरः ॥ ११४ ॥
तत्रत्यतीर्थक्षेत्राणां देवानां च दिदृक्षया ॥ ११५ ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले
शकुनफलकथनं नामाष्टमस्तरंगः.

1) स्ताम्रं.

अथ नवमस्तरंगः

गत्वाऽसौ नृपतिः कुत्र किं किं रचितवानिदम् ।
मह्यं ब्रूहि गुरो! तस्य श्रवणे कौतुकं महत् ॥ १ ॥
पुत्र! ते तत्समासेन वर्णयाम्यद्भुतं शृणु ।
यस्य संश्रवणान्नृणां हृदयं विस्मयास्पदम् ॥ २ ॥
रामेश्वरादिलिंगानि नानाक्षेत्राणि तत्र च ।
दृष्ट्वा स्नात्वा च तीर्थेषु तत्तत्येषु च सादरम् ॥ ३ ॥
दक्षिणां दिशमुन्मुच्य जगाहे दिशमुत्तराम् ।
दृष्ट्वा तत्रापि लिंगानि क्षेत्रतीर्थानि भूरिशः ॥ ४ ॥
क्रमात्समाविशत्काशीं भवाशीविषवर्हिणीम् ।
गंगां निजपयोविन्दुसंगापहृतदुष्कृताम् ॥ ५ ॥
विश्वेशं चापि विश्वेशं यतः प्रापुस्सुरासुराः ।
प्राप्यावगाह्य बहुधा सम्पूज्यापि क्रमेण तान् ॥ ६ ॥
निर्गत्य च ततो नीलकण्ठनेपालमाश्रितः ।
केदारेशं ततो दृष्ट्वा प्राप्तः काश्मीरमण्डलम् ॥ ७ ॥
कुरुक्षेत्रं ततोऽपश्यत्क्रमेणैव ततः परम् ।
डिल्लीनामकमेतर्हि प्रागिन्द्रप्रस्थसंज्ञितम् ॥ ८ ॥
नगरं प्रेक्ष्य तस्यान्तः प्रवेशाय कृतस्पृहः ।
व्रजन्नसिं द्वारिबद्धमद्राक्षीदेकमग्रतः ॥ ९ ॥
अपृच्छच्च प्रतीहारान् किमेतदिति कौतुकी ।
अयमंकुशखानेन शस्त्राशस्त्रिविधौ पटुः ॥ १० ॥
मया समं योद्धुकामो गृह्णात्विति निवेशितः ।
श्रुत्वेति वचनं तेषां स्मृत्वा पूर्वतनीं कथाम् ॥ ११ ॥
कौरवप्रेरितो मात्स्यनगरे मल्लतल्लजः ।
बध्द्वा द्वारि गदां योद्धुं भीमेनासीन्निषूदितः ॥ १२ ॥
मया निषूदनीयोऽयामीति निर्धारयन् हृदि ।
असिमानाययामास बद्धं तदनुयायिना ॥ १३ ॥
ततः सोऽङ्कुशखानोऽपि प्रतिहारमुखोक्तितः ।
तत्रप्रवृत्तं वृत्तान्तं सर्वमेवं निवेदितः ॥ १४ ॥
डिल्लीश्वरोऽथ सोऽन्येनमाकार्य नृपमादिशत् ।
शस्त्राशस्त्रिरणं कर्तुं सहतेनाऽसिमप्यदात् ॥ १५ ॥
अथ स्वभुजशक्त्यासीन् दत्तान् नव दशापि च ।
क्रमात्कम्पेन संछिन्नान् दृष्ट्वा विस्मितमानसे ॥ १६ ॥
डिल्लीश्वरे निजं रामेश्वरलिंगप्रसादतः ।
सम्प्राप्तं लक्षणाढ्यं तं खड्गं हस्तेन सोऽग्रहीत् ॥ १७ ॥
ततो बहुप्रकाराणि मण्डलानि प्रदर्शयत् ।
असौ वीरः प्रवीराणां दर्शयन् हस्तलाघवम् ॥ १८ ॥
निखारयोरस्याचकर्ष कृपाणं प्रतियोधिनः ।
कृपाणस्यातितैक्ष्ण्येन लाघवेन करस्य च ॥ १९ ॥
खण्डितोऽपि द्विधा तिष्ठन् यथापूर्वमदृश्यत ।
सुलक्षणत्वात् खड्गस्य तत्र त्तस्य श्रमादपि ॥ २० ॥
विजितस्तेन वीरेण प्रातियोधी दुरासदः ।
लक्षणानि पुनः कानि गुणास्तान्मे निरूपय ॥ २१ ॥
यैर्लभ्यते रणाग्रेषु जयलक्ष्मीरनर्गला ।
नन्दनाकर्णय स्वैरं कथयामि तवेप्सितम् ॥ २२ ॥
प्रमाणदोषरेखाश्च जातिं देशांश्च देवताः ।
ज्ञात्वैव खड्गमादद्यादायुस्सौभाग्यवृद्धये ॥ २३ ॥
पञ्चाशदंगुलं श्रेष्ठं चत्वारिंशाच्च मध्यमम् ।
षट्त्रिंशद्भिः कनिष्ठं स्यात्स्वांगुष्ठोदरनामकम् ॥ २४ ॥
स्फुटितं पिटकं विद्धं भग्नरेखं त्वचोद्धृतम् ।
जलमार्गं जलद्रावि सिध्मलं वक्रधारिणम् ॥ २५ ॥
इति दोषास्समाख्याताः फलं तेषां क्रमाद् ब्रुवे ।
स्फुटितेन भवेन्मृत्युः पिटको गोत्रघातकः ॥ २६ ॥
विद्धाद्दारिद्र्यमाप्नोति भग्नात्कीर्तिर्विनश्यति ।
जलमार्गाद्भवेद्भंगो जलद्रावी भयावहः ॥ २७ ॥
सिध्मले कुष्ठदारिद्र्यं वक्रधारो दुर्गतिं हरेत् ।
प्राकारशंखचक्राणि तोरणं चामरं ध्वजम् ॥ २८ ॥
मत्स्यकूर्मादि मालांकं शोभनं खड्गमीदृशम् ।
लिंगं सपीठं दृश्येत यस्मिन् खड्गे सुनिर्मले ॥ २९ ॥
तं खड्गं धारयेद्राजा आयुरारोग्यकारकम् ।
(प्राकारो दृश्यते यत्र गरुडश्च सुनिर्मलः) ।
(तं खड्गं धारयेद्राजा विषवज्रभयापहम्) ।
हंससारसभेरुण्डचक्रवाककपिंजलाः ॥ ३० ॥
दृश्यन्ते यस्य खड्गे तु तस्य श्रीर्विजयो भवेत् ।
एरण्डबीजसच्छायः पिशाचलिपिसन्निभः ॥ ३१ ॥

केतकीफलसंकाशश्शुभप्राकार ईदृशः ।
तरुणीकेशसंकाशं प्राकारैर्दृश्यसूक्ष्मकैः ॥ ३२ ॥

पञ्जरं नाम तल्लोहं जांगले तु समुद्भवम् ।
लिंगं सपीठं दृश्येत प्राकारो दृश्यसूक्ष्मकः ॥ ३३ ॥

स्थूलदीर्घश्च मध्ये तु बहुवर्णतिलांशकैः ।
अनूपदेशजं लोहं सुकृष्णं कृष्णपञ्जरम् ॥ ३४ ॥

प्राकारैः कुण्डलाकारैर्यद्वा खण्डेन्दुसन्निभैः ।
हलकोदण्डसंकाशैर्लोहं सादरणोद्भवम् ॥ ३५ ॥

प्राकारैर्वर्तुलैर्दीर्घैः प्रियंगुच्छाययान्वितैः ।
सुवर्णपञ्जरं नाम लोहं कालिंगसम्भवम् ॥ ३६ ॥

भुजंगगतिसंकाशैस्तैलबिन्दुसमन्वितैः ।
प्राकारैर्दृश्यते यत्तु लोहं काम्भोजसम्भवम् ॥ ३७ ॥

प्राकारैर्नीलवर्णैश्च दीर्घसूक्ष्ममनोहरैः ।
नीरसारं तु तल्लोहं (नीलपर्वतसन्निभम् ।

तैलबिंदुसमाकारैर्लतामण्डलसन्निभैः ।
कृष्णसारं तु तल्लोहं) घूर्जरेषु समुद्भवम् ॥ ३८ ॥

सुपाण्डुरैस्तु सुस्निग्धैः प्राकारैस्सूक्ष्मदीर्घकैः ।
श्वेतसारं तुतल्लोहं महाराष्ट्रसमुद्भवम् ॥ ३९ ॥

प्रकारैर्वर्तुलैस्सूक्ष्मैः पाण्डुच्छायैस्तुनिर्मलैः ।
मेदिकं नाम तल्लोहं कर्णाटेषु समुद्भवम् ॥ ४० ॥

अथातस्संप्रवक्ष्यामि शस्त्राणां मानलक्षणम् ।
नरस्य मध्यमं पर्व मध्यमांगुलिसम्भवम् ॥ ४१ ॥

मानांगुलमिदं श्रेष्ठं द्वितीयं पर्वमध्यमम् ।
तन्मानं द्विगुणीकृत्य चाष्टभागाहृतौ पुनः ॥ ४२ ॥

अष्टवाया ध्वजायास्तु क्रमशस्सम्भवन्त्यपि ॥ ४३ ॥

ध्वजेऽर्थसिद्धिर्मरणं च धूमे: सिंहे जयः स्याच्छुनके च रोगः ।
वृषे च सौख्यं च खरे तु दुःखं गजे सुखं निष्फलता च काके॥ ४४ ॥

पर्वगुण्यं चतुष्षष्ट्या नामाक्षरसमन्वितम् ।
अष्टभिस्तु हरेद्भागं शिष्टं शस्त्राधिदेवतम् ॥ ४५ ॥

महालक्ष्मीप्रभृतयस्तत्राष्टावधिदेवताः ।
महालक्ष्मीस्सदा भाग्यं कीर्तिमृद्धिं महेश्वरी ॥ ४६ ॥

वैष्णवी धनधान्याप्तिं पीडनं खड्गधारिणी ।
अम्बिका राज्यसौभाग्यं वाराही शत्रुपीडनम् ॥ ४७ ॥

कलहं शूलिनी चैव मृत्युं दिशति चण्डिका ।
आदिमारभ्य चाग्रान्तं सूत्रं निक्षिप्य मानतः ॥ ४८ ॥

तत्सूत्रं द्विगुणीकृत्य प्रथमान्मध्यमावधि ।
पुनर्निक्षिप्य तस्यार्धं गृहीत्वा युद्धविस्तृतेः ॥ ४९ ॥

मानेन मित्वा तत्सूत्रमादाय शकलानि च ।
पूर्वादिक्रमतश्चैतान्यष्टदिक्षु च विन्यसेत् ॥ ५० ॥

पुनरेवंविधाने तु शिष्टैर्दिक्पालजातयः ।
इन्द्रो वैश्यो मेषपालो वह्निश्शूद्रोऽर्कनन्दनः ॥ ५१ ॥

अम्बष्ठो निरृतिश्चैव वरुणो राजपुत्रकः ।
वायुश्चण्डाल एव स्यात् कुबेरो ब्राह्मणस्तथा ॥ ५२ ॥

ईशानश्च मतंगः स्यादिति दिक्पालजातयः ।
वैश्ये धनं मेषपाले दरिद्रत्वं च शूद्रके ॥ ५३ ॥

सुखं वन्धनमम्बष्ठे चैश्वर्यं राजनन्दने ।
चण्डाले स्त्रीविनाशश्च ब्राह्मणे जय एव च ॥ ५४ ॥

मातंगे कलहश्चैव क्रमादेषां फलं भवेत् ।
असिमानं सप्तहतं त्रिघनेनावशेषितम् ॥ ५५ ॥

अश्विन्याद्यं तु नक्षत्रं जन्मभाच्च पुनः पुनः ।
तारादीनां वलं पश्येदेतन्नक्षत्रयोगतः ॥ ५६ ॥

क्वणितं मरणायोक्तं पराजयाय प्रवर्तनं कोशात् ।
स्वयमुद्घूर्णे युद्धे ज्वलिते विजयो भवेत्खड्गे ॥ ५७ ॥

नाकारणं विवृणुयान्न विघट्टयेच्च पश्येन्न तत्र वदनं नवदेच्च मूल्यम् ।
देशं न चास्य कथयेत्प्रतिमानयेच्च नैव स्पृशेन्नृपतिरप्रयतोऽसियष्टिम्

मुष्टिच्छेदे म्रियेत्स्वामी छिन्नेऽग्रे मातरस्तथा ।
तस्मान्न च्छेदयेत्खड्गमात्मनश्शुभदं यतः ॥ ५९ ॥

प्रमाणसंयुतं किन्तु कुर्यान्निकषघर्षणैः ॥ ६० ॥

क्षीरे कदल्या भसितेन युक्ते विनोषितं पायितमायसं यत् ।
सम्यक् स्थितं चाश्मनि नैति भंगं नचान्यलोहेष्वपि तस्य कौण्ठ्यम्॥

एवं प्रोक्तानि खड्गस्य स्वरूपाणि समासतः ।
ततश्च नृपतिः खड्गं सर्वलक्षणसंयुतम् ॥ ६२ ॥

हस्तेनादाय पुरतो विरोधिनमपातयत् ।
शौर्यमस्येदृशं दृष्ट्वा हृष्टो डिल्लीपुराधिपः ॥ ६३ ॥

एतद्भृत्यान् पर्यपृच्छत् कुतुकी विस्मितान्तरः ।
अयं कः कुत्रवसति स्वामी युष्माकमित्यपि ॥ ६४ ॥

ततस्तं प्रति वृत्तान्तं स्वामिनस्तेऽप्यवादिषुः ।
संकण्णनायको नाम पश्चिमस्यां नृपो दिशि ॥ ६५ ॥

तीर्थयात्रापदेशेन स्वयमासीदुपागतः ।
इत्याकर्ण्य वचस्तेषां तस्मै चात्यन्तविस्मितः ॥ ६६ ॥
विरुदं हरितच्छायपताकं केतनं ददौ ।
बहुद्रविणदं देशं स्वदेशाभ्यन्तरे ददौ ॥ ६७ ॥
वासांसि च विचित्राणि नूत्नान्याभरणानि च ।
वितीर्णे तेन तं देशं काश्यामीश्वरतुष्टये ॥ ६८ ॥
मठदेवालयारामधर्मार्थं विन्ययुङ्क्त तम् ।
ततः स्वदेशमागच्छन् देशात्तस्मात्क्रमेण सः ॥ ६९ ॥
मासूरुदेशमासाद्य पटपल्लीति विश्रुते ।
ग्रामे वसन्निशि स्वप्ने कञ्चिद्योगिनमैक्षत ॥ ७० ॥
अब्रवीद्योगिनं तं च को भवानिति भूपतिः ।
स चाप्येनं प्रत्यवादीद्योगी संकण्णनायकम् ॥ ७१ ॥
योगिरूपेण नृपते! वीरभद्रोऽहमागतः ।
ग्रामात्पुरः स्थिते रम्ये तटाके सुमनोहरे ॥ ७२ ॥
अहं वसामि मां नीत्वा त्वद्देशाभ्यन्तरे नृप!
स्थापयानेन ते भूयः श्रेयांसि स्युः पदे पदे ॥ ७३ ॥
एवं प्रसेदुषो वीरभद्रस्याकर्णयन्वचः ।
समुत्थाय ततः प्राप्ते प्रभाते परिशोधयन् ॥ ७४ ॥
[1] महातटाकनीरान्तर्वीरभद्रमथाग्रहीत् ।
तत उद्धृत्य कासाराद्वाहयन्नपि सेवकैः ॥ ७५ ॥
स्वं प्राप्य केळदीदेशं रामेशागारसन्धौ ।
निर्माप्य भवनं वीरभद्रमस्थापयत्ततः ॥ ७६ ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले
संकण्णनायकयात्रावृत्तान्तखड्गलक्षणकथनं नाम नवमस्तरंगः

[1] महातटाकं तस्यान्त.

अथ दशमस्तरंगः

स्थापनं वीरभद्रस्य कृतमित्युपवर्णितम् ।
कस्मिन् काले तु तत्कार्यं देवतास्थापनं विभो! ॥ १ ॥
कथं वा कुत्र वा देवस्थापनं शास्त्रवर्णितम् ।
मह्यं निरूप्यतामेतन्मयि कारुण्यगौरवात् ॥ २ ॥
पुत्र! ते कथयाम्येतद्यच्छ्रोतुमभिकांक्षसे ।
सर्वेषामपि लोकानां हिताय च शुभाय च ॥ ३ ॥
नक्रक्रियानिमिषगोमिथुनाधिरूढे पद्माकरप्रणयिनि प्रबले शशांके ।
शुक्रे नभस्यमरमन्त्रिणि दैत्यपूज्ये स्फूर्जत्यभूदभिहिता त्रिदशप्रतिष्ठा ॥
उत्तरायणगे सूर्ये प्रतिष्ठा शोभना भवेत् ।
पुष्ये धनविवृद्धिः स्यान्माघमासेऽतिसम्पदः ॥ ५ ॥
फाल्गुने द्रव्यलाभः स्या चैत्रे मासे शुभावहः ।
अतीव सौख्यं वैशाखे ज्येष्ठे मासे शुभावहः ॥ ६ ॥
कुम्भे मासे न शस्तं स्यात्कुम्भं यदि न पश्यति ।
जीवः पश्यति चेच्छस्तं प्रतिष्ठायां रवौ घटे ॥ ७ ॥
आषाढे स्थापितो देवो यजमानविनाशकृत् ।
सौरमानेन विज्ञेयः श्रावणे राजराष्ट्रहा ॥ ८ ॥
प्रोष्ठपद्यां विपत्तिः स्यादाश्वयुग्राजहा भवेत् ।
कार्तिके शत्रुवृद्धिःस्यान्मार्गशीर्षे तथैवच ॥ ९ ॥
दिनेषु यस्य देवस्य या तिथिस्तस्य तत्र च ।
शुक्लपक्षे च पूर्वाह्णे कृष्णेऽप्यापञ्चमीतिथेः ॥ १० ॥
चतुर्थीं नवमीं षष्ठीं वर्जयित्वा चतुर्दशीम् ।
तिथयश्शुभदाः प्रोक्ता गुरुशुक्रबुधेन्दवः ॥ ११ ॥
वाराः स्युरशुभदाश्चान्ये शुभयोगे शुभप्रदाः ।
अश्विनी रोहिणी हस्ता श्रवणं रेवती तथा ॥ १२ ॥
पुष्यः पुनर्वसुश्चापि धनिष्ठा चोत्तरात्रयम् ।
ऋक्षाण्येतानि शस्तानि शुभयोगे पराण्यपि ॥ १३ ॥
बवादिवणिजान्तानि शुभानि करणानि षट् ।
लग्नग्रहबलं ज्ञेयं ज्योतिश्शास्त्रात्तदर्थिभिः ॥ १४ ॥

प्रीतिस्सौभाग्यमायुष्मान् सुकर्मा शोभनं धृतिः ।
वृद्धिस्सिद्धिर्ध्रुवो हर्षो वरीयान् साध्य एव च ॥ १५ ॥
ब्रह्मेन्द्रे च शिवश्चेति योगाश्शुभफलप्रदाः ।
शैववैष्णवशाक्तादिप्रतिष्ठासु विनायके ॥ १६ ॥
इन्द्रभैरवसौरादिवीरभद्रादिकेष्वपि ।
1) अर्कार्किभूजराह्विन्दुष्वेको लग्नगतो यदि ॥ १७ ॥
ग्रामतत्पतिभूपांश्च यजमानं च नाशयेत् ।
पापा लग्नाद्द्वितीयस्था धननाशकरास्तथा ॥ १८ ॥
तृतीये तु शुभास्सर्वे पापास्तत्र शुभाः परे ।
चतुर्थे तु शुभाः पुण्याः पापाः स्थानविनाशकाः ॥ १९ ॥
पञ्चमे तु शनिर्लग्नात् सुतनाशकरस्तथा ।
पत्नीनाशकरौ कर्तुः षष्ठे चन्द्रवृहस्पती ॥ २० ॥
भार्गवे कुलनाशः स्यात् सप्तमस्थानसंस्थिते ।
वापीकूपतटाकादिदेवग्रामप्रतिष्ठयोः ॥ २१ ॥
अष्टमस्था ग्रहा नेष्टाः शुभाश्चैवाशुभास्तथा ।
नवमे भूमिजो हन्ति पशूंश्चैव चतुष्पदान् ॥ २२ ॥
दशमे त्वशुभास्सर्वे विशेषेण रविं त्यजेत् ।
अशुभाश्च शुभाश्चैव लाभस्थाने शुभप्रदाः ॥ २३ ॥
द्वादशस्था ग्रहा नेष्टाः शुभाश्चैवाशुभास्तथा ।
न ग्रहो न च नक्षत्रं न तिथिर्नच चन्द्रमाः ॥ २४ ॥
सर्वमेव शुभं कार्यं केन्द्रस्थाने वृहस्पतौ ।
दिवा सूर्ये निशा चन्द्रे लग्नादेकादशस्थिते ॥ २५ ॥
कोटिदोषा विनश्यन्ति गार्ग्यस्य वचनं यथा ।
गुरुस्सितो वा केन्द्रस्थः प्रवलस्सर्वदोषहा ॥ २६ ॥
ग्रामस्य पश्चिमे भागे विष्णुं संस्थापयेत्तथा ।
ग्रामस्योत्तरपूर्वार्धे शिवं पूर्वमुखं न्यसेत् ॥ २७ ॥
आचार्यः शिवमन्दिरं सुकुसुमैः संप्रार्थितः कारयेत्
कर्ता शिल्पिभिरादरेण विधिवच्छास्त्रोक्तमार्गान्वितम् ।
पूर्वं तत्र परीक्ष्य भूमिमसकृत् कृष्णां ततः शोधयेत्
संक्षेपेण वदामि लक्षणमिदं भूमेश्च शास्त्रोदितम् ॥ २८ ॥
स्निग्धा रन्ध्रैर्विहीना बहुफलकुसुमा भूरि पांसुप्रयुक्ता
न्यायेनैवार्जिताया सहतलसहिता क्षीरवृक्षैरुपेता ।
गावो यस्यां रमन्ते रमति मधुरदानादलीन् सर्वतो या
भूमिस्सा सुप्रशस्ता शिवनिलयविधौ क्षिप्रबीजप्ररोहा ॥ २९ ॥

1) आरार्कसोरि.

शूलाकारा भुजगकुटिला मत्स्यपृष्ठा षडश्रा
शूर्पाकारा पशुमुखनिभा नागपृष्ठस्त्रिकोणा ।
मध्ये निम्ना यमपि शितभुग्वह्नि दिक्षुस्वभावा
निम्ना भूमिश्शिवगृहविधौ निन्दिता शर्कराढ्या ॥ ३० ॥
वामावर्तजलास्थिभस्मसहिता वल्मीकजालान्विता
दुर्गन्धा कटुकण्टकद्रुमयुता संक्लेदिनी कर्दमा ।
शुष्का सूकरगृध्रपिंगलयुता वातातपैस्संगता
भूमिश्शुष्कजला शिवालयविधौ कीटाकुला निन्दिता ॥ ३१ ॥
श्वेताज्यगन्धा मधुरा कषाया रक्तास्रगन्धौदनमूलगन्धा ।
पीता च तिक्ता कटुका च कृष्णा मध्याम्बुगन्धेति मही चतुर्धा ॥
आसिच्य गव्यं घृतमामपात्रे वर्तीश्चतस्रो विनिधाय दिक्षु ।
संकल्प्य विप्रप्रमुखांश्च वर्णान् प्रज्वाल्य वर्तीः सहिताः चतस्रः
वर्तीच यस्यां दिशि संप्रदीप्ता सा तस्य वर्णस्य मही प्रशस्ता ।
सर्वाश्च ताः प्रज्वलिता यदि स्युः संकीर्णका नाम मही प्रशस्ता ॥
सर्वेषु वर्णेषु शुभप्रदा सा निर्वापिता स्याद्यदि चाप्रशस्ता ।
वर्ज्या मही सा तु समस्तवर्णैः क्लेशं च कर्तुं विदधाति नित्यम् ॥ ३५ ॥
एवं परीक्ष्य विधिना सकलैर्विहीनां दोषैर्गुणैरुपचितां वसुधामवेक्ष्य ।
देवालयं विरचयेद्विधिवन्मनीषी लिंगार्थमत्र कथयामि शिलास्वरूपम् ॥
आचार्योऽसौ शुक्लपक्षे मुहूर्ते शुद्धे विप्रान् भोजयित्वा यतात्मा ।
शस्त्राण्यादौ पूजयित्वा च गच्छेल्लिंगस्यार्थे सच्छिलां संग्रहीतुम् ॥
ततश्च पूर्वाभिमुखश्शकुनानि विलोकयन् ।
उच्चारयेदिमं मन्त्रं शिलान्वेषणतत्परः ॥ ३८ ॥
त्रिनेत्राय च रुद्राय भूतानां पतये नमः ।
शिलां दर्शय देवेश! प्रसन्नो वृषभध्वज! ॥ ३९ ॥
येष्वद्रिषु शिला ग्राह्या तानद्रीन्द्रान्वदाम्यहम् ।
कैलासाचलगन्धमादनगिरिश्रीशैलनीलाचलौ
शेषोर्वीधरनामधेयनिषधौ गौरीकुमाराचलौ ।
विख्यातो भुवि हेमकूट इति यो मेरुस्त्रिकूटाचलो
दुष्प्रापास्सकलैश्च जन्तुभिरिमे वक्ष्ये ततोऽन्यान् गिरीन् ॥ ४० ॥
सह्यश्च विन्ध्यो मलयः कुमारो देवाचलः प्रोन्नतपारियात्रः ।
भूयो महेन्द्रो यदि दुर्लभाश्च तत्रापि भूमिस्थशिला प्रशस्ता ॥ ४१ ॥
नद्यास्तीरे शिला ग्राह्या यदि मुख्या1) महीतले ।
यासां च सरितां तीरे नदीस्ता विच्णोम्यहम् ॥ ४२ ॥

1) ग्राह्याः.

कावेरी सरयूश्च जह्नुतनया गोदावरी नर्मदा
सिन्धुश्शोणसरस्वती च यमुना तुंगा च भद्रा नदी ।
विख्याता भुवि गोमतीति विदिता या चन्द्रभागाह्वया
याश्चस्युः सरितः पयोष्ण्यपि भुवि ख्याताश्च ताः कीर्तिताः ॥ ४३ ॥

आसां च तीरे यदि दुर्लभाः स्युः उद्यानतीर्थोपवनेषु शस्ताः ।
पुण्येषु तत्रापि शिला न चेत्स्यादन्येषु देशेषु मनोरमेषु ॥ ४४ ॥

भूमिश्चतुर्विधा ज्ञेया माहेन्द्री वारुणी तथा ।
आग्नेयी वायवी चैव तासां वक्ष्यामि लक्षणम् ॥ ४५ ॥

तोयं यस्याश्चोत्तरे संस्थितं स्याद् व्रीहिक्षेत्रं दक्षिणाशास्थितं च ।
वारुण्याशा संस्थिताः क्षीरवृक्षाः माहेन्द्री सा भूमिरस्यां शिला च ॥

तोयावृता कोमलशालिसंयुता पुष्पद्रुमैश्चापि समन्ततो वृता ।
या स्यात्तृणाढ्या पशुभिश्च सेविता सा वारुणी भूमिरतीव शोभना ॥

श्येनाश्च गृध्राः परितो वराहाः यस्यां च भूमौ सततं भ्रमन्ति ।
अन्तर्गतं तोयमतीवमन्दं सेयं मही वह्निगुणोपपन्ना ॥ ४८ ॥

श्लेष्मातकैः पीलुविभीतकैश्च या वा प्रपूर्णा मृगतृष्णिकाढ्या ।
गोमायुवृन्दैश्च निषेविता स्यात् सा वायवी नष्टजला धरित्री ॥ ४९ ॥

आग्नेयीं वायवीं हित्वा शिले चान्ये शुभे मते ॥ ५० ॥

वल्मीकचैत्यशबरोषितचत्वरस्था क्षाराम्बुसिक्ता शुचिसूर्यहता क्षितिस्था
रेखान्विता विधिहताच विवर्णरूपा निन्द्या शिलात्र बहुवर्णसमन्विता च ॥

बालां च वृद्धां परिनिन्दितांगीं चण्डालजातीं परिवर्जयेच्च ।
शस्त्रासहा कर्दमपिच्छिला च मृद्वी च बाला तरुपल्लवाभा ॥ ५२ ॥

भुजंगनिर्मोकनिभाऽतिरूक्षा वृद्धा शिला या जरसा स्थिता स्यात् ।
नानावर्णा स्थूलरोमाऽतिरक्ता धूम्रच्छाया नीलवर्णा शिला च ॥ ५३ ॥

चण्डाली सा सर्वतो वर्जनीया शस्तां भूयः कीर्तयिष्ये शिलां ते ।
पुण्योद्यान क्षेत्रतीर्थह्रदस्था वृक्षच्छायाशीतलाश्लिष्टकाया ॥ ५४ ॥

स्निग्धा घण्टानिस्वनाऽप्याज्यगन्धा विस्तीर्णा सा लिंगकार्ये प्रशस्ता ।
श्वेता पंकजसन्निभा द्विजशिलातस्याश्शशी देवता
राज्ञो रक्तनिभा कुलित्थसदृशी शक्रः पुनर्देवता ।
पीता वै शिशिरा तथैव हरिता तस्या भगो देवता
कृष्णा शूद्रशिला च मुद्गसदृशी तत्राश्विनौ देवते ॥ ५६ ॥

एवं परीक्ष्य च शिलां समवेक्ष्य शस्तां ।
प्रक्षाल्य वारिभिरथ प्रविलिप्य गन्धैः ।
तस्यां च सम्यगभिपूज्य शिवं सबीज-
मुख्यं च तीक्ष्णविशदच्छुरिकासमेतम् ॥ ५७ ॥

मृत्युञ्जयेन सहितं च शिवांगपञ्च-
युक्तं च दिक्प्रतिवृतं सह शस्त्रवृन्दैः ।
तस्यां तथा ककुभि वारिपतेः शिलायां
होतव्यमाज्यमथ पाशुपतेन वह्नौ ॥ ५८ ॥

अष्टोत्तरं शतमनेन शिला समस्तै
र्दोषैर्विमुक्तमहिता भवति क्रियार्हा ।
तीक्ष्णं च शस्त्रमभिपूज्य निधाय पार्श्वे
शस्त्रेण दिक्षुविकिरेच्च बलिं गणेभ्यः ॥ ५९ ॥

दर्भशय्यासमारूढः शिलायाः पश्चिमे गुरुः ।
स्वप्नमाणवकं जप्त्वा स्वपेदेकाग्रमानसः ॥ ६० ॥

नमः शम्भो! त्रिनेत्राय रुद्राय वरदाय च ।
वामाय विश्वरूपाय स्वप्नाधिपतये नमः ॥ ६१ ॥

आचक्ष्व देवदेवश! प्रपन्नोऽस्मि तवान्तिकम् ।
स्वप्ने सर्वाणि कार्याणि हृदयस्थानि यानि वै ॥ ६२ ॥

पश्येच्च देवतारूढामुज्ज्वलन्तीं शिलां यदि ।
अन्यद्वा शोभनं शस्ता सा शिला लिंगनिर्मितौ ॥ ६३ ॥

दृष्ट्वा शुभं स्वप्नमथ प्रभाते स्नात्वा समभ्यर्च्य महेश्वरं च ।
चिह्नं शिलायाः परिकल्पयेच्च वक्त्रं च पृष्ठं च शिरश्च मूलम् ॥ ६४ ॥

उद्धृत्य संस्थिता तत्र यां दिशं वीक्षते शिला ।
तामेव प्रतिमां गेहे पश्यन्तीं [1])स्थापयेत्ततः ॥ ६५ ॥

ध्वनिर्घण्टानिभो यत्र स्फुलिंगाश्छेदने तथा ।
दृश्यते तच्छिरस्तस्यास्तत्त चिह्नं प्रकल्पयेत् ॥ ६६ ॥

एवं कृत्वा समारोप्य रथे नीत्वा शिवालयम् ।
कौवेर्यां दिशि संस्थाप्य लिंगं सम्यक् प्रकल्पयेत् ॥
पुंसा लिंगमथ प्रकल्प्य विधिवत् पीठं स्त्रीयाकल्पयेद्
भूयः सारशिलां नपुंसकशिलाक्लृप्तां क्रमात्कल्पयेत् ।
गम्भीरध्वनिनान्विता च सुदृढागुर्वी च लोहोपमा
पृथ्वीपिप्पल पत्रसन्निभतला शिष्टा शिला सा पुमान् ॥ ५८ ॥

रम्भादलेन सदृशी मृदुनिस्वना स्त्री नष्टस्वना च शिथिला द्विगुणप्रयुक्ता ।
प्रोक्ता नपुंसकशिला परिकल्पयेच्च गर्भं शिलागमगतं प्रवदामि तं च ॥

भेदने दृश्यते यत्र मण्डलं तत्र निर्दिशेत् ।
गर्भं च यादृशेयं स्यान्मण्डले तं वदाम्यहम् ॥ ७० ॥

मञ्जिष्ठाभे दर्दुरः पीतवर्णे गोधा कृष्णो मण्डले स्याद् भुजंगः ।
निस्त्रिंशाभे स्वच्छवर्णे च तोयं खद्योतं स्यान्मक्षिकभे प्रदिष्टः ॥ ७१ ॥

(कपोतवर्णे गृहगोधिका स्यादाखुश्च गर्भे कपिले प्रदिष्टः)

1) स्थापयेद्दिशम्.

रक्ते प्रदिष्टः कृकलासगर्भः पाषाणगर्भो गुडसन्निभे च ।
गर्भे कुलीरो हरितालवर्णे स्याच्चम्पकाभे शवले क्रिमिश्च ॥ ७२ ॥

गर्भे च वृक्षे सिकता प्रदिष्टा वर्णे विचित्रे सति वृश्चिकश्च ।
रक्ते विचित्रे शफरश्च गर्भः पीते विचित्रे पतगः प्रदिष्टः ॥ ७३ ॥

गर्भः कुसुम्भः प्रतिमेषतंघ्रिर्भस्मोपमाने सुषिरं भवेच्च ।
स्यान्मण्डले किंशुकपुष्पवर्णे वृतारिगोपश्च पिपीलिका वा ॥ ७४ ॥

तत्रातसीपुष्पसमानवर्णे नीले च वर्णे सति मक्षिकाः स्युः ।
एवं विधैः ख्यापितलक्षणैश्च गर्भं शिलायां विधिवत्परीक्ष्य ॥

बाह्येऽत्र दृष्टे सति लक्षणेऽस्मिन् लेपं विदध्यात्प्रवदामि तं च ॥

ब्रह्माणीं[1] चक्रपाणीं कुसुमशररिपुं वैष्णवं पेषयित्वा
क्षीरेणाज्येन सम्यक् समघृतमधुना लेपयेत्तां शिलां च ।
लिप्ता क्लिन्ना समन्ताद्भवति यदि शिला प्रोषिता चैकरात्रं
जानीयास्तत्रगर्भं फणिपतिमथवा वृश्चिकं वाथ गोधाम् ॥

काशीं सचोकांच[2] गवां पयोभिः पिष्ट्वा शिलां तां परिलिप्य सम्यक् ।
सा चेत् त्रिरात्रेण शिलारुणास्यात् कूर्मोऽथवा तत्र तु दर्दुरः स्यात् ॥

विप्रं च धात्रीमपि शूलिनं च मेषीपयोभिः परिलेपयेच्च ।
पिष्ट्वा शिला सा यदि नैकवर्णा स्यातां च तस्यां कृकलासमीनौ ॥

मांस्योशीरह्यारिवारिजदलैस्सार्धं फलानां त्रयं
पिष्ट्वा वामविलोचनस्तनभुवा क्षीरेणसंलेपयेत् ।
लिप्ता सा च शिला यदि त्रिदिवसैर्वर्णान्तरत्वं व्रजेत्
तत्रस्याद्विषमाशुनाशजनकं हस्तेन तां न स्पृशेत् ॥ ८० ॥

तोयं भीतिं दर्दुरस्संविधत्ते गोधा राज्ञां नाशनं गोक्षयं च ।
कर्तुर्वंशं नाशयेन्नागगर्भो मारीं तस्मिन् संविधत्ते च देशे ॥ ८१ ॥

कर्तुर्मृतिं गर्भविनाशनं च स्त्रीणां विधत्ते सलिलासगर्भः ।
खद्योतगर्भस्तु भयं च वह्नेः दौर्विध्यमुग्रं गृहगोधिका च ॥

आयुर्भय[3] तस्करजं विधत्ते दुर्भिक्षमुग्रं कृकलाख्यगर्भः ।
नाशं च वृष्टेरुपलाख्यगर्भः सस्यप्रणाशं च कुलीरगर्भः ॥ ८३ ॥

कुष्ठं विधत्ते क्रिमयश्च कर्तुः चौर्यं च कुर्युः सिकता समन्तात् ।
शूलं विदध्यादथ वृश्चिकश्च द्रव्यस्य नाशं शफरो विधत्ते ॥ ८४ ॥

स्थाने च तस्मिन् कुरुते पतंगो व्याधिं षडंघ्रिस्तु वहूंश्चरोगान् ।
तद्वच्च कुर्यात्सुषिरं च रोगान् नाशं धनानामथ शक्रगोपः ॥ ८५ ॥

चिन्तां विधत्ते च पिपीलिका तु कर्तुः प्रवासं त्वथ मक्षिका च ।
कूर्मोऽथ रोगाद्भयमत्युदग्रं दृष्टेर्विनाशं कुरुते विशं[4] च ॥ ८६ ॥

1) ब्रह्माणम्, 2) कासीसचोरौ. 3) आखुर्भय. 4) षं.

अन्ये तु गर्भा बहवः प्रदिष्टाः दोषावहा लिंगविधौ शिलायाम् ।
रेखाः प्रवक्ष्यामि शुभावहाश्च दोषावहाश्चाकृतिवर्णभिन्नाः ॥ ८७ ॥

रेखा यस्यामुत्तमा स्याच्छिलायां हीनायां सा सम्प्रशस्ता शिला च ।
रेखा यस्यामुत्तमायां शिलायां हीनायां चेद्वर्जनीया शिला सा ॥

विप्रादीनां वर्णभेदात्तु रेखाः श्वेता रक्ताः पीतकृष्णाः प्रदिष्टाः ।
रेखायस्यां देवराजायुधाभाः ग्राह्या सा स्यात् सर्ववर्णैः शिला च ॥

यस्यां च रेखास्तु समानवर्णाः कर्तुर्भवेदन्वयवर्धिनी सा ।
रेखा च यस्यां वहुवर्णभिन्ना वर्ज्या शिला सा नृपतिं निहन्ति ॥

विच्छिन्नाविर्भजर्यनीया शिला सा रेखाभिर्वा संश्रिता सर्ववर्णैः ।
वक्राः स्थूलाश्चातिरूक्षाः कृशाश्च रेखा यस्यां वर्जनीया शिला सा ॥

नन्द्यावर्तवसुन्धराधननिभाः श्रीवत्सकूर्मोपमाः
शंखस्वस्तिकपद्मगोवृषनिभाः चक्रेन्दुसूर्योपमाः ।
छत्रस्रग्ध्वजलिंगतोरणमृगप्रासादशूलोपमाः
वज्राभाश्शफरोपमाश्च शुभदा रेखाः कपर्दोपमाः ॥ ९२ ॥

वह्नेश्च वीजं पवनस्य वीजं भूयः स्वराण्यत्र नपुंसकानि ।
हित्वा समस्ताः शुभदाः प्रशस्ताः रेखाश्च वर्णाकृतिभिन्नरूपाः ॥

काकश्येनवृकोष्ट्रवानरनिभाः मार्जारगृध्रोपमाः
सर्पोलूकसृगालकीटसदृशाः श्वानोपमा वर्जिताः ।
रेखास्तिर्यगवस्थिताश्च सकलाः श्येनाश्च दोषावहाः
सन्त्यज्य प्रतिगृह्य शोभनशिलाः लिंगं पुनः कल्पयेत् ॥

स्थानं यद्देवतायाश्च यस्याः शास्त्रे विधीयते ।
सम्यग्विभज्य तत्स्थानं संक्षेपेण वदाम्यहम ॥ ९५ ॥

मध्ये ब्रह्मगृहं पुरादिषुभवेद् द्वारे च लक्ष्मीगृहं
तस्मिन् वैश्रवणेच भास्करगृहं पूर्वे च कृष्णालयम् ।
वह्नौ वह्निगृहं च मातृभवनं याम्ये यमस्यालयं
नैरृत्ये पितृधाम शास्त्रविहितं तत्रैव कालीगृहम् ॥ ९६ ॥

पाश्चात्ये वरुणालयं निजदिशि ख्यातं च वयोर्गृहं
तस्मिन्विन्ध्यनिवासिनीनिलयनं शस्तं पुनश्चोत्तरे ।
दैत्यानामपि षण्मुखस्य भवनं तस्मिन् पिशाचालयं
सोमस्यापि गृहं शिवालयमभूदीशानदिक्संस्थितम् ॥ ९७ ॥

प्रासादभेदाः प्रमथेश्वरस्य मेरोः स्थिता मूर्धनि पञ्चभिन्ना ।
वैराजनामा चतुरश्रसंस्थः स्यात्पुष्पकाख्यश्चतुरश्रदीर्घः ॥ ९८ ॥

कैलासकश्च समवृत्तविनिर्मितांगो वृत्तायतश्च मणिको नयानभिरामः ।
अन्यस्त्रिविष्टपइति प्रथितोष्टकोणोभिन्नाः पुनः प्रथगिमेनवधा प्रतिष्ठाः ॥

चत्वारिंशत्पञ्च युक्ताः प्रभेदाः प्रासादानां कीर्त्तिताः स्युः क्रमेण ।
नामान्येषां शैवतन्त्रोदितानि व्याख्यास्येऽहं संविभज्य क्रमेण ॥

मेरुर्वै मन्दरश्चापि विमानो भद्र एव च ।
सर्वतोभद्ररुचकौ नन्दनो नन्दिवर्धनः ॥ १०० ॥

श्रीवत्सश्चेतिवैराजो वलभी गृहराजकः ।
शाला गृहो मन्दिरं च विमानो ब्रह्ममन्दिरम् ।
भवनप्रभवौ चापि शिविकाश्चेति पौष्पिका ॥ १०१ ॥

वल्यो दुन्दुभिः पद्मो महाब्जमुकुलस्ततः ।
उष्णीषश्शंखकलशौ श्रीवृक्षश्चेति वृक्षजाः ॥ १०२ ॥

गजश्च वृषभो हंसो गरुडोक्षौ च भूषणः ।
भूधरः श्रीधरश्चापि नवमः पृथिवीजयः ॥ १०३ ॥

वज्रचक्रस्वास्तिकश्च वज्रस्वस्तिक एव च ।
चक्रस्वस्तिकखड्गौ च गदः श्रीकण्ठ एव च ॥ १०४ ॥

विजयश्चेति सम्प्रोक्ताः त्रिविष्टपसमुद्भवाः ।
षट्त्रिंशद्धस्तमारभ्य चतुश्चतुरुपायतः ॥ १०५ ॥

चतुष्करान्ताः प्रासादाः नवैकैकसमुद्भवाः ।
एतेषामायता येतु तत्पादेन च संयुताः ॥ १०६ ॥

नवाद्येककरान्तानि लिंगान्येषां क्रमाद्विदुः ॥

अल्पोत्साहा वित्तहीना मनुष्याः कर्तुं नैतान्यत्र लोके समर्थाः ।
तस्मादेषां वर्तनां नात्र वक्ष्ये प्रासादानां ग्रन्थबाहुल्यभीरुः॥ १०७ ॥

सिद्धक्षेत्रे महानद्यां पर्वते वनगह्वरे ।
प्रतिष्ठितं चिरानर्च्यमप्रतिष्ठितमेव वा ॥ १०८ ॥

आनयेत्स्थापनार्थाय लिंगं श्लक्ष्णं च वर्तुलम् ।
स्थापयेत्तत्र चागारे प्रासादाद्यं न शोधयेत् ॥ १०९ ॥

नवीकरणपक्षे तु प्रासादाद्यं विचारयेत् ।
कर्तुश्चन्द्रानुकूलेऽह्नि गुरुशुक्रास्तवर्जिते ॥ ११० ॥

वास्तुं सम्पूज्य विधिवत् कृत्वा होमं वलिं हरेत् ।
जलान्तं वा शिलान्तं वा भूमिं खात्वा विशोधयेत् ॥ १११ ॥

आधारे शक्तिपीठं च न्यस्य होमं समाचरेत् ।
संस्थाप्य कूर्मपीठं च प्रार्थयेदिति मन्त्रतः ॥ ११२ ॥

नमस्ते कूर्मरूपाय विष्णवे विश्वधारिणे ।
करिष्यमाणप्रासादनिमित्तं स्थातुमर्हसि ॥ ११३ ॥

अनन्ताकारपीठं च दिग्गजान् दिक्षु विन्यसेत् ।
पद्माकारं न्यसेत्पीठं पञ्चधा परिकीर्त्तितम् ॥ ११४ ॥

पातालादिकमारभ्य न्यसेत्सप्त शिलास्ततः ।
पद्मयोरन्तरे चैव ब्रह्मनालं प्रकल्पयेत् ॥ ११५ ॥

स्वर्णेन रजतेनापि नालं ताम्रेणवा भवेत् ।
नालोर्ध्वे पद्मपीठं च ततः पीठत्रयात्मकम् ॥ ११६ ॥

नवाष्टसप्तहस्ताश्च लिंगं स्यादुत्तमं त्रिधा ।
षट्पदं वेदहस्तोच्चं लिंगं तन्मध्यमं त्रिधा ॥ ११७ ॥

त्रिद्व्येकहस्तमानं यल्लिंगं स्यादधमं त्रिधा ।
एवं नवविधं लिंगमुत्तमादिविभेदतः ॥ ११८ ॥

ब्रह्माविष्णुकपर्येशैश्चतुरश्राष्टवर्तुलैः ।
पीठत्रयं करायित्वा पञ्चसूत्रसमन्वितम् ॥ ११९ ॥

लिंगं पीठं तथा नालं लिंगाग्रात्पादमेवच ।
लिंगाग्रमुखपर्यन्तं पञ्चसूत्रमुदाहृतम् ॥ १२० ॥

लिंगलक्षणमित्युक्तं गर्भलक्षणमुच्यते ।
पीठं नवगुणं प्रोक्तं गर्भलक्षणमुत्तमम् ॥ १२१ ॥

पीठस्य पञ्चगुणितं मध्यमं गर्भलक्षणम् ।
पीठस्य त्रिगुणं गर्भमधमं परिकीर्त्तितम् ॥ १२२ ॥

एवं च त्रिविधं गर्भं गर्भार्धं च तदन्तरम् ।
द्वारद्वयसमायुक्तं तत्प्रमाणं च मण्टपम् ॥ १२३ ॥

चतुर्द्वारसमायुक्तं षोडशस्तम्भसंयुतम् ।
दर्पणोदरसंकाशं नानामूर्त्तिसमन्वितम् ॥ १२४ ॥

रंगमण्टपमित्युक्तं गर्भार्थं वाहनालयम् ।
द्वादशस्तम्भसंयुक्तं चतुस्स्तम्भमथापि वा ॥ १२५ ॥

चतुर्दिक्षु चतुर्द्वारं पञ्चान्तरसमन्वितम् ।
तदूर्ध्वे गोपुराकारं तदग्रे कलशं न्यसेत् ॥ १२६ ॥

स्थापयेच्च महानन्दिफालनेत्रसमन्वितम् ।
गर्भस्य त्रिगुणं कुर्यात्प्राकारं परितस्तथा ॥ १२७ ॥

प्राकाराग्रे न्यसेद्द्वारं गृहद्वाराधिकं पुनः ।
गर्भस्य पञ्चगुणितं वहिः प्राकारविस्तरम् ॥ १२८ ॥

पुरद्वाराधिकं कुर्याद्बहिर्द्वारं विचक्षणः ।
गेहार्धशिखरं वत्स ! तदग्रे कलशं न्यसेत् ॥ १२९ ॥

तन्मितं सार्धहस्तं स्यात् स्वर्णरौप्यादिभेदतः ।
पूर्वे तु वृषभः प्रोक्त आग्नेय्यां षण्मुखस्तथा ॥ १३० ॥

दक्षिणे गणनाथः स्या द्वीरभद्रस्तु नैरुते ।
पश्चिमे विष्णुमूर्तिश्च वायुपुत्रश्च वायवे ॥ १३१ ॥

उत्तरे पार्वती स्थाप्या चैशान्यां भैरवस्तथा ।
एवं शिवालयः प्रोक्तो मूर्तिगेहमथोच्यते ॥ १३२ ॥
मूर्त्यर्धविरतरं पीठं पीठार्धं नाल्मुच्यते ।
नाल्मानं मूर्त्तिकीलं नालार्धं कीलविस्तरः ॥ १३३ ॥
पीठस्य त्रिगुणं गर्भं गर्भार्धं च तदन्तरम् ।
द्वारद्वयसमायुक्तं तत्समं तु जयालयम् ॥ १३४ ॥
द्वारमेकं तु तस्योक्तं गेहार्धं वाहनालयम् ।
एवं निर्माप्य भवनं यथाशास्त्रं च शिल्पिना ॥ १३५ ॥
सन्तोष्य शिल्पिनं गेहं तस्य हस्तात् प्रभूत्तमः ।
प्रार्थ्य संगृह्य विधिवच्चोदयेत्तं विचक्षणः ॥ १३६ ॥
शिलाभिर्निर्मितं गेहं दृढं सौम्य! त्वया कृतम् ।
देहि मे शिल्पिराजेन्द्र! स्थापनर्थं शिवस्य मे ॥ १३७ ॥
त्वया संपादितं पुण्यं दशांशं देहि मे विभो!
तद् गृहीत्वा मुदा गेहं प्रदास्यामि नरोत्तम! ॥ १३८ ॥
शम्भोस्संस्थापनात्पुण्यं प्रदस्यामि कदाचन ।
लयेप्सितं धनं रत्नं गृहाणाल्यकारक! ॥ १३९ ॥
मया कृतमिदं गेहं दृढं सौम्यं शिवालयम् ।
गृहाणाहं प्रदास्यामि प्रतिष्ठायै शिवस्य च ॥ १४० ॥
इत्युक्त्वा कारुको भक्त्या दद्याद्गेहं प्रहर्षितः ।
गेहं लब्ध्वा ततो लिंगं तत्र संस्थापयेच्छिवम् ॥ १४१ ॥
प्राणप्रतिष्ठामन्त्रेण तत्र कुर्वीतमन्त्रवित् ।
अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य । ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुस्सामाथर्वाणि छन्दांसि । अशेषचैतन्यात्मकप्राणशक्तिर्देवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । (अमुकदेवतायाः) प्राणप्रतिष्ठा सिद्ध्यर्थे विनियोगः । ॐ आं ह्रीं क्रों अं कं खं गं घं ङं पृतिव्य प्तेजोवाप्वाकाशात्मने आं अंगुष्ठाभ्यांनमः । ॐ आं ह्रीं क्रों इं चं छं जं झं ञं शब्दस्पर्शरूपगसगन्धात्मने ईं तर्जनीन्यां नमः । ॐ आं ह्रीं क्रों उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं मध्यमाभ्यां नमः । ॐ आं ह्रीं क्रों एं तं थं दं धं नं वाक्पादपाणि पायूपस्थात्मने ऐं अनामिकाभ्यां नमः । ॐ आं ह्रीं क्रों ॐ पं फं बं भं मं प्राणापानव्यानोदानसमानात्मने औं कनिष्ठिकाभ्यां नमः । ॐ आं ह्रीं क्रीं अं यं रं लं वं शं षं सं हं ळं क्षं मनोबुद्धिचित्ता हंकारविज्ञानानन्दात्मने औं करतलकरपृष्ठाभ्यां नमः । एवं हृदयादि षडंगन्यासं कृत्वा ध्यायेत् ।
रक्ताम्भोधिस्थपोतोल्लसदरुण सरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमणिगुणमप्यंकुशं पञ्च बाणान् ।
बिभ्राणा सृक्कपालं त्रिनयनविलसत्पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥ १४३ ॥
आं ह्रीं क्रों यरलवशषसहों हंसः । देवस्य प्राणा इह प्राणाः । देवस्य जीव इह स्थितः । देवस्य सर्वेन्द्रियाणि मनोबुद्धि चित्ता हंकारपृथिव्यप्तेजोवाय्वाकाशशब्दस्पर्शरूपरसगन्धश्रोत्रत्वक्चक्षुर्जिह्वा घ्राणवाक्पाणिपादपायूपस्था इहैवागत्य सुखं चिरंतिष्ठन्तु स्वाहा ॥
इति मन्त्रमुच्चार्य प्राणप्रतिष्ठां कुर्यात् ।
पश्चात् प्राणप्रतिष्ठातः तत्र चावाहयेत्कलाः ॥ १४४ ॥
आग्नेय्यां दश सूर्यजाद्विसहितास्सोमोद्भवाष्षड्युताः
पश्चादोम्प्रभवाः क्रमाद्दश दश प्रोक्ताः चतस्रः कलाः ।
बिन्दोर्नादभवाश्च षोडश महाब्राह्म्यादयो मातृकाः
एवं षड् गदिताश्चतुर्नवतिका स्सम्यक् समाहूत्य ताः ॥ १४५ ॥
धूम्रार्चिरूष्मोज्ज्वलिनी समन्विता सज्वालिनी स्यादथ विस्फुलिंगिनी।
सुश्रीस्सुरूपा कपिला वहन्ती काव्याच कव्याग्निकलास्सयादिकाः ॥
तपिनी तापिनी च स्याद् धूम्राख्याना मरीचिश्च ।
ज्वालिन्यपि रुचिसंज्ञा सुषुम्ना भोगदा विश्वा ॥ १४७ ॥
बोधिनी तदनु धारिणी क्षमा भास्करस्य सहिताः कलाः क्रमात् ।
बोधिन्नक्षसुरसादिभिश्शिखाल्लक्षकावतिभिरक्षरद्वयैः ॥ १४८ ॥
प्रालेयांशोः कलास्या इति पुनरमृता मानदाख्या सपूषा
तुष्ट्याख्या पुष्टिसंज्ञा रविधृतिशशिनी चन्द्रिका कान्तिसंज्ञा ।
पश्चाज्ज्योत्स्नाभिधा श्रीस्तदनु निगदिता प्रीतिसंज्ञांगदाख्या
पूर्णा पूर्णामृताख्या ल्वपरिलसितैरक्षरैश्चन्दनाद्यैः ॥ १४९ ॥
सृष्टिऋध्दीस्मृतिश्चापि मेधाह्वया कान्तिलक्ष्म्या द्युतिःस्यात् स्थिराख्या स्थितिः ।
सिद्धिरित्यक्षरैः पिप्पलाद्यैः क्रमाद्रोचनाद्यैर्युतास्ता अकारोद्भवाः ॥
जलापालिनी शान्तिसंज्ञेश्वरी स्याद्रतिः कामिकाख्या वराद्यातितोदा ।
तथा ह्लादिनी प्रीतिदीर्घैः चटाद्यैः समेता दशोंकारजाता इमाः स्युः ॥
तीक्ष्णा रौद्रा स्याद्भयाख्या च निद्रा
तन्द्री क्षुत् स्यात् क्रोधिनी च क्रिया च ।
उत्कार्याख्या मृत्युसंज्ञा च पाद्यैः
वर्णैर्युक्ता स्ता अकारोद्भवाः स्युः ॥ पीता श्वेतारुणे पश्चादसितेति कला मताः ।
दूर्वा देवी सहा लक्ष्मीस्समेता बिन्दुसम्भवाः ॥ १५३ ॥
निवृत्तिः प्रतिष्ठा च विद्या च शान्ति स्तथाचण्डिका दीपिकारेचिका च ।
ततो मोचिकाख्या पराख्या च सूक्ष्मा मृताज्ञानपूर्णा च पूर्णामृता च ॥

आप्यायिनी व्यापिनी च व्योमरूपा ह्यनन्तरम् ।
अनन्ता ह्युदिता नादकलास्ताः स्वरसंयुताः ॥ १५५ ॥

प्रणयभुवननायिकाशिवाद्यैः सहितकलापदशक्तिरोन्नमोऽन्तैः ।
यजतु शिवमतिः कलास्समस्ताः निजनिजनामभिरेव शंखतोये ॥

आग्नेयीनां त्रिष्टुबर्कोद्भवानां गायत्रीस्यादिन्दुजानामनुष्टुप् ।
सद्याद्याः स्युर्हादिजानां कलानामेवं प्रोक्तास्ता रुचोत्र क्रमेण॥ १५७ ॥

सुप्रभा मेघदूती च विजया भास्करोपमा ।
गन्धर्वा शकटा शूर्पा मालिनी च वसुन्धरा ॥ १५८ ॥

हुंकारा राक्षसी रम्भा त्रिणेत्रा नेत्रभूषिणी ।
अञ्जना [1] मित्रपीडाच भद्रा स्वस्तिः करालिका ॥ १५९ ॥

काली बलवती शूरा रोगघ्नी कामदायिनी ।
दूतिनी शाकिनी हंसी माया वागीश्वरी तथा ॥ १६० ॥

वनमाली गवांक्षी च द्वात्रिंशच्छक्तिदेवताः ।
एकवक्त्रास्त्रिणेत्राश्च षड्भुजाशिशिखिवाहनाः ॥ १६१ ॥

खड्गखट्वांगसंयुक्ता धनुर्बाणकराः स्मृताः ।
वरदाभयहस्ताश्च द्वात्रिंशत्पीठशक्तयः ॥ १६२ ॥

सुप्रभा विजया चैव मेघदूती मनस्विनी ।
साघोरा नवमी प्रोक्ता ह्यघोरे नव शक्तयः ॥ १२३ ॥

अघोरशक्तयस्त्वेता विकरालीति संज्ञिताः ।
भुजाष्टकसमायुक्ता ध्यायेत्ता घोररूपिणीः ॥ १६४ ॥

वरं च फलकं चैव टंकं पाशं तथाङ्कुशम् ।
गदां त्रिशूलकं चैव पद्मं चैव यथाक्रमम् ॥ १६५ ॥

द्वात्रिंशद्धस्तमूर्तेस्तु शक्तयः परिकीर्त्तिताः ।
एकवक्त्रं सदानन्दं द्वात्रिंशद्भुजसंयुतम् ॥ १६६ ॥

1) मित्रपीठा च.

जटामुकुटसंयुक्तं त्रिणेत्रं चन्द्रशेखरम् ।
अभयं खड्गशूले च चक्रं डमरुकं तथा ॥ १६७ ॥

दधानमस्थिबाणौ च गदां फालं च पद्मकम् ।
ज्ञानमुद्रां कुन्तहस्तमसिं चैवाक्षमालिकाम् ॥ १६८ ॥

खट्वांगं परशुं चैव दधानं दक्षिणैर्भुजैः ।
वरं च फलकं चैव टंकं पाशांकुशौ तथा ॥ १६९ ॥

नागमग्निं मृगं घण्टां धनुश्च कटिहस्तकम् ।
रत्नं च कुमुदं कुम्भं खेटकं पुस्तकं तथा ॥ १७० ॥

एतदायुधसंयुक्तं रुण्डमाला विभूषितम् ।
कालमुण्डस्य शिरसि स्थितं सर्वाभयप्रदम् ॥ १८१ ॥

वामे यस्तु विभर्ति चापफलकौ दक्षे तु बाणौ तथा
हस्ताभ्यां स चतुर्भुजस्त्रिणयनः श्रीभद्रकालीयुतः ।
धत्ते ब्रह्मकपालदाम हृदये यः पादुकान्यस्तपा-
दीशक्रोधसमुद्भवस्सभवतु श्रीवीरभद्रः श्रिये ॥ १८२ ॥

एवं शास्त्रानुसारेण श्रीमान् संकण्णनायकः ।
केलदीनाम्निनगरे तथेक्केरीपुरान्तरे ॥ १८३ ॥

कारयित्वा शुभं गेहं तत्र स्थापितवान् क्रमात् ।
वीरभद्रेश्वरं तद्वदघोरेश्वरमेव च ॥ १८४ ॥

आगमोक्त विधानेन स्थानयोरनयोर्द्वयोः ।
पट्टाभिषेकमकरोत्तथा निजकनीयसे ॥ १८५ ॥

अनुजाय विनीताय राज्ञामावश्यकीं नृपः ।
नीतिं चोपादिशत्तस्मै शत्रुनिग्रहसाधिकाम ॥ १८६ ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले
देवप्रतिष्ठाकालगृहनिर्माणादिनिरूपणं नामदशमस्तरंगः

1) मंकुशं चाक्षमालिकाम्. 2) पाशं च मुद्गरम्. 3) कटवस्तकम्.

अथ एकादशस्तरंगः

कृत्वाऽभिषेचनं नीतेरुपदेशः कुतोऽभवत् ।
इत्याख्यातं तत्र कोवा विधिः पट्टाभिषेचने ॥ १ ॥

शत्रुनिग्रहणे का वा नीतिरेतन्निरूप्यताम् ।
कुमार! कथयाम्येतच्चच्छ्रोतुमभिकांक्षसे ॥ २ ॥

अथातः सम्प्रवक्ष्यामि भूपानामभिषेचनम् ।
आधानजन्मेशादिनाधिनाथरवीन्दुभौमेज्यसितैर्वलिष्ठैः
उत्पातदोषादिविवर्जितेषु धराधिपानामभिषेक इष्टः ॥ ३ ॥

मूलत्रिकोणस्वगृहोच्चमित्र गृहस्थितैर्वापि तदंशसंस्थैः ।
शुभे विलग्ने सततं ग्रहेन्द्रा दिशन्ति लक्ष्मीं विपुलां च कीर्त्तिम् ॥

शीर्षोदये चोपचये ग्रहे वा स्वजन्मलग्नादथ लग्नगेवा ।
शुभग्रहैर्युक्तनिरीक्षिते वा राज्यं स्थिरं स्यात् सततं च राज्ञाम् ॥

पापग्रहैस्स्वान्तगतश्च निःस्वो रोगी विलग्नोपगतैर्भवेत्सः ।
पदच्युतिस्सप्तचतुर्थगैस्तैः पुत्रस्थितैश्चापि सुखैर्विहीनः ॥ ६ ॥

भ्रष्टोच्चकैः कर्मगतैरनायुः मृत्युस्थितैर्वीर्ययुतैश्च पापैः
नूनं व्ययाष्टारिगतः क्षितीशं निहन्ति सद्यश्च तदा वलीचेत् ॥

त्रिकोणकेन्द्र त्रिधनायसंस्थैस्त्रिषष्ठलाभायगतैश्च पापैः ।
[1]षष्ठाष्टलाभव्ययवर्जितेन चन्द्रेण राज्ञां शुभदोऽभिषेकः ॥

प्राग्भागे मन्दिरस्याथ गोमयेन तु कारयेत् ।
मण्डलं चतुरश्रं तु वर्णैस्समलंकृतम् ॥ ९ ॥

तत्र भद्रासनं सम्यगर्चयेत् सुमनोहरम् ।
गंगातोयेन सम्पूर्णस्वर्णकुम्भैरनेकशः ॥ १० ॥

दिग्विदिक्षु स्थितैश्शुक्लगन्धमाल्याम्बरावृतैः ।
शतौषधीमूलहेम [2]रत्नैस्सोद्भिज्जपल्लवैः ॥ ११ ॥

मृत्तिकावृषशृंगे च गजदन्तं च रोचनम् ।
उत्पलं पद्मकं गन्धं मुरारेणुश्च कुंकुमम् ॥ १२ ॥

राजसर्षपमुस्तेच देवदारुसमन्विते ।
एतानि मंगलद्रव्याण्युदकुम्भेषु निक्षिपेत् ॥ १३ ॥

देवस्यत्वेति मन्त्रेण चायुःपुष्टियशस्करैः ।
अब्लिंगैर्वेदमन्त्रैश्च शुभलग्ने शुभान्विते ॥ १४ ॥

भद्रासनस्थनृपतेरभिषेकं च कारयेत् ।
नीराजनं च कर्तव्यं शंखवादित्रनिस्स्वनैः ॥ १५ ॥

आशिषो वाचनं कृत्वा पूजयेच्च सुरेश्वरान् ।
आयुधानि च सम्पूज्य विप्रान् गन्धादिनाऽर्चयेत् ॥ १६ ॥

शुक्लमाल्याम्वरधरः प्राङ्मुखस्य महीपतेः ।
पट्टं शिरसि बध्नीयात् सिंहासनगतस्य च ॥ १७ ॥

विप्रेभ्यो दक्षिणां दद्यादानमेन्मन्त्रपूर्वकम् ।
ब्रूयात्प्रत्यङ्मुखो राजा नमामि त्वां धरेति च ॥ १८ ॥

प्राच्यां मामभिषिञ्चन्तु वसवस्तेजसे श्रिये ।
याम्यायामभिषिञ्चन्तु रुद्रा मां विजयाय च ॥ १९ ॥

आदित्यास्त्वभिषिञ्चन्तु प्रतीच्यां दिशि वृद्धये ।
विश्वे देवास्तथोदीच्यामभिषिञ्चन्तु पुष्टये ॥ २० ॥

दिगीशास्त्वभिषिञ्चन्तु सदा मां विजयाय च ।
साम्राज्यमितिमन्त्रेण राजानं सम्यगर्चयेत् ॥ २१ ॥

व्याघ्रचर्मण्यथासीनं नवालंकारभूषितम् ।
छत्रचामरसंयुक्तं राज्यचिह्नसमान्वितम् ॥ २२ ॥

पुरोहितश्च जुहुयात् सावित्र्याग्नौ प्रयत्नतः ।
औदुम्वरसमिद्भिश्च ह्याज्येनाष्टोत्तरं शतम् ॥ २३ ॥

विद्वत्पुरोहितामात्यवृद्धबन्धुसमन्वितः ।
तथा साञ्चितसप्तांगः प्रजा धर्मेण पालयेत् ॥ २४ ॥

एवं यः कुरुते सम्यक् स राजा वर्धते स्वयम् ।
अनेन विधिना राज्ञां कुर्यात्पट्टाभिषेचनम् ॥ २५ ॥

अथ नीतिं प्रवक्ष्यामि शत्रुनिग्रहसाधिकाम् ।
श्रीमान् कुलीनोऽव्यसनोऽतिशूरः श्रुतिस्मृतिज्ञः स्मृतिमान् सुदक्षः
धर्मस्वरूपी स्वगतस्त्वलुब्धः शुचिस्मितो नीतिपरस्स भूपः ॥
तथ्याभिभाषी निपुणः कलासु वक्ता सुवेषः प्रियवाक् कृतज्ञः ।
वृद्धोपसेवी गुणवान् गुणज्ञः स्वरन्ध्रगोप्ता पररन्ध्रवेत्ता ॥ ३७ ॥

---

1) षष्ठाष्टलग्नव्यय. 2) रत्नसोद्भिज्जपल्लवैः

दाता सहिष्णुर्विजितेन्द्रियश्च मानी च सप्तांगयुतो विनीतः ।
उत्साहमन्त्रप्रभुशक्तियुक्तश्चतुर्विधोपाययुतस्त्वमीतः ॥ ३८ ॥
पञ्चांगमन्त्रे कुशलः प्रगल्भष्षाड्गुण्यवृन्दे विजयी नृपः स्यात् ॥
सन्धिश्चतुर्विधः प्रोक्तो मैत्री सम्बन्धमिच्छताम् ।
प्रथमो मित्रसन्धिः स्यात् सन्धिजश्च द्वितीयकः ॥ ४० ॥
परस्परोपकाराख्य उपहारस्तथैव च ।
सुजनोऽयमिति ज्ञात्वा स्वयं षड्गुणवान् नृपः ॥ ४१ ॥
करोत्यलोभतस्सन्धिं मित्रसन्धिस्स उच्यते ।
कन्यादानेन यः कुर्यात् सन्धिं कार्यवशान्नृपः ॥ ४२ ॥
स सन्धिजश्च विज्ञेयस्सन्धिस्सन्धिविशारदैः ।
अन्योन्यस्योपकारार्थं यत्र सन्धीयते नृपैः ॥ ४३ ॥
परस्परोपकाराख्यस्स सन्धिः प्रोच्यते बुधैः ।
गजानश्वांस्तथा रत्नं सुवर्णं भूमिमेवच ॥ ४४ ॥
दत्त्वायः क्रियते सन्धिरुपहारस्स उच्यते ।
शूरत्वेन सहायेन सामर्थ्येन बलेन च ॥ ४५ ॥
मन्त्रहीनेन भूपालस्सार्धं कुर्वीत विग्रहम् ।
कामजो लोभजश्चैव भूभवो मानसम्भवः ॥ ४६ ॥
अभयाख्यस्समाख्यात इच्छाजोऽथ मदोत्थितः ।
अथ शास्त्रे परिख्यात एकद्रव्याभिलापकः ॥ ४७ ॥
इत्यष्टौ विग्रहाः प्रोक्ता नवमो नोपलभ्यते ।
स्त्रीनिमित्तं हि यो जातो विग्रहः काम उच्यते ॥ ४८ ॥
द्रव्योपहारजनितो विग्रहो लोभजस्तथा ।
भूम्यर्थमुत्थितो यस्तु भूभवो विग्रहो महान् ॥ ४९ ॥
विरुद्धार्थकृतो यस्तु विग्रहो मानसम्भवः ।
शरणागतरक्षार्थं यो भवेत्कलहो महान् ॥ ५० ॥
अभयाख्यस्स कथितो विग्रहो नीतिवेदिभिः ।
मित्रार्थे बन्धुभृत्यार्थे विग्रहं यस्समाचरेत् ॥ ५१ ॥
इच्छाजस्सतु निर्दिष्टो नीतिशास्त्रार्थवेदिभिः ।
मित्रार्थे बन्धुभृत्यार्थे विग्रहं यस्समाचरेत् ॥ ५२ ॥
एतैर्नृणां समुत्पन्नो मतिभ्रंशकरो महान् ।
अविवेकसमुत्पन्नस्स भवेच्च मदोत्थितः ॥ ५३ ॥
एकमर्थं समुद्दिश्य यो भवेद्विग्रहो मिथः ।
सप्रोक्तश्शास्त्रतत्त्वज्ञैरेकद्रव्याभिलाषकः ॥ ५४ ॥
दैवेनोपहतो यस्तु व्याधिना पीडितोऽपि वा ।
बलकोशविहीनो वा यो मित्रैर्विनियोजितः ॥ ५५ ॥
तस्य भूयो नृपो यायाज्जिगीषुर्जयसिद्धये ।
शरत्काले वसन्ते च रिपोर्नाश उपस्थिते ॥ ५६ ॥
निमित्तं शकुनं लब्ध्वा यात्रां कुर्वीत भूपतिः ।
संधानजा पार्ष्णिरोधा मित्रविग्रहिणीतथा ॥ ५७ ॥
द्वन्द्वनिर्व्याजगा कुल्या सप्तमी चापि शीघ्रगा ।
पार्ष्णिग्रहेण सन्धाय पश्चाद्गच्छेच्च भूपतिः ॥ ५८ ॥
सन्धानयात्रा विज्ञेया नृपाणां हितकारिणी ।
पार्ष्णिग्राहस्य रोधार्थं नियोज्यात्मबलं महत् ॥ ५९ ॥
गमनं वा भवेद्यत्र पार्ष्णिरोधश्शुभावहः ।
शत्रोस्सार्धं स्वामित्रेण कारयित्वा स्वविग्रहम् ॥ ६० ॥
गच्छतां सा भवेद्यात्रा मित्रविग्रहिणी परा ।
यस्योपरि स्वयं यायादानयेत्तदरींस्तथा ॥ ६१ ॥
सा यात्रा द्वन्द्वजा प्रोक्ता रिपुसंहारकारिणी ।
सर्वतः स्वस्थचित्तस्य बलमुख्या विघातिनः ॥ ६२ ॥
भवेद्या नृपतेर्यात्रा निर्व्याजा परिकीर्त्तिता ।
रिपुवंश्येन सार्धं यो गच्छेत्परविनाशने ॥ ६३ ॥
सातु यात्रा भवेत्कुल्या द्विषतां भयकारिणी ।
द्विषतो वधमुद्दिश्य त्यक्त्वा चान्यत्प्रमाधिकम् ॥ ६४ ॥
सहसा क्रियते यात्रा सा भवेच्छीघ्रगामिनी ।
देशं कालं तथा वित्तं निमित्तं बलमात्मनः ॥ ६५ ॥
विचार्य कुर्वतो नित्यं यात्रा भवति सिद्धिदा ।
यात्रां विदध्याच्छुभगोचरेषु भानौ कुलीरालिझषैर्विमुक्ते ।
शुक्रेन्दुपुत्रावनिजेष्टवामेष्वनस्तगेष्वप्रतिलोमगेषु ॥ ६६ ॥
अतिपातिषु कार्येषु ग्रहान् सम्पूज्य यत्नतः ।
यात्रां कुर्वीत नृपतिः कार्यसिद्धिकरीं सदा ॥ ६७ ॥
स्वपुरपरपुराद्वा कर्कटे मासि विद्वान्
गमनमिह न कुर्यात्तत्र तावच्छुभार्थी ।
प्रचलति यदि सम्यक् सप्त वर्षाणि भूयो
भवति सकलदुःखैस्सार्थं मायुःक्षयाय ॥ ६८ ॥

पृष्ठगं दक्षिणं वापि भृगुं कृत्वा विशेत्तदा ।
पुरतो वामभागे वा शुक्रं कृत्वा विशेत्तदा । ॥ ६९ ॥
रोहिणी श्रवणा चित्रा सोमवारे शुभावहा ।
आहिर्बुध्न्यं च पौष्यं च भैमवारे प्रशस्यते ॥ ७० ॥
पुनर्वसुर्गुरोर्वारे भाग्यं च श्रवणं सिते ।
हरिदैवं द्विदैवं च वह्निदैवं शनेर्दिने ॥ ७१ ॥
धिष्ण्यान्येतानि शस्तानि वारेष्वेतेषु सर्वदा ।
चरलग्ने प्रयातव्यं द्विस्वभावोऽतिनिन्दितः ॥ ७२ ॥
लग्ने स्थिरे न गन्तव्यं यात्रायां क्षेमकांक्षिभिः ।
चन्द्रमा दशमे यस्य स यात्रायां जयी भवेत् ॥ ७४ ॥
बुधजीवसितानां च यदि चन्द्रस्त्रिकोणगः ।
एको भवद्ग्रहो यस्य तस्य यात्रा शुभावहा ॥ ७५ ॥
द्वौ चेत्केन्द्रत्रिकोणस्थावतियोगस्स कथ्यते ।
योगातियोगः कथितस्त्रिभिः केन्द्रत्रिकोणगैः ॥ ७६ ॥
ऐन्द्रे दधि यमे तैलं वारुणे गुडमेवच ।
कौबेरे क्षीरमादद्याद्वारदोषो न विद्यते ॥ ७७ ॥
क्रमात् सूर्यादिवारेषु घृतं क्षीरं गुडं तथा ।
तिलान् दधि यवान् माषान् भुक्त्वा यायान्नराधिपः ॥ ७८ ॥
अर्कोदये व्रजेदैन्द्रीं दिशं भुक्त्वा तु शर्कराम् ।
खस्थेऽर्के घृतभुक् प्राचीमस्तगे दक्षिणां तिलान् ॥ ७९ ॥
सुखस्थेऽर्के पयः पीत्वा पश्चिमां तु दिशं व्रजेत् ।
लग्नाज्जन्मर्क्षतो वाऽपि चन्द्रेऽनुपचयं गते ॥ ८० ॥
क्षीणे च शुभदा यात्रा पूर्णेऽप्युपचये शुभा ।
अर्जुनः फल्गुनः पार्थः किरीटी श्वेतवाहनः ॥ ८१ ॥
बीभत्सुर्विजयः कृष्णस्सव्यसाची धनञ्जयः ।
अर्जुनस्य दशैतानि नामानि सुमहात्मनः ॥ ८२ ॥
यात्राकाले स्मरेद्यश्च तस्य शत्रुर्जितो भवेत् ।
ऐन्द्रीं यायाद्गजारूढो रथेनैव तु दक्षिणाम् ॥ ८३ ॥
हयेन वारुणीं यायान्नृयानेनोत्तरां दिशम् ।
शत्रुजन्मादिराशीनामष्टमर्क्षे गतो नृपः ॥ ८४ ॥
तत्र ध्वजस्तु संसिद्धो यथावदुदितः क्रमात् ।
तमुद्धृत्य पुरो यायादाहवे शात्रवीं दिशम् ॥ ८५ ॥

ध्वजं कृत्वातु दण्डेन वेणुवैकंकतेन च ।
पालाशेनाथवा बद्ध्वा घण्टाकिंकिणिशोभितम् ॥ ८६ ॥
वैनतेयं स्वस्तिकं च कुलिशं च लिखेत्पटे ।
सम्पूज्य विधिवन्मन्त्रैर्गन्धपुष्पाक्षतादिभिः ॥ ८७ ॥
हुत्वा च हविषाऽऽज्येन पलाशसमिदादिभिः ।
यत इन्द्रेतिमन्त्रेण त्रिष्टुभानुष्टुभाऽन्यतः ॥ ८८ ॥
नित्यं सम्पूज्य यानेन युद्धे नित्यं पुरो वहेत् ।
एवं दक्षिणतो वामे पृष्ठतश्च वहेद् ध्वजान् ॥ ८९ ॥
धनुश्शतार्धात्पुरतःशुभेऽहनि वसेन्नृपः ।
वेश्यागारे वणिग्गेहे भूसुराणां गृहेषु च ॥ ९० ॥
निर्गमान् प्रक्षिपेद्यत्र तत्र वामे विनिक्षिपेत् ।
स्वयमेकदिनं प्रोक्तं भार्याचैकादशाम्बरम् ॥ ९१ ॥
त्रिर्मन्त्री वाहनं सप्त स्वर्णे मासो द्विरायुधम् ।
मेषाद्ये युधि दारभृत्यवचनं वह्निप्रदीप्तांगना
चागच्छेदिह मध्यमे खलु तदा दीपातिदीप्तांगना ।
अन्त्ये विप्रयुगागमो निगदितस्ताम्रध्वनिर्वा तदा ।
द्रेक्काणोदितलक्षणं निगदितं तत्कालभागैः क्रमात् ॥ ९२ ॥
वृषभाद्ये मृगगोपा गमनं चण्डालजोऽथवा शब्दः ।
मध्ये मंगलनादो विप्रागमनं तथा वाच्यम् ॥ ९३ ॥
अन्ते च पुष्पधारी चागच्छेदार्द्रवसनविप्रो वा ।
अजशब्दो मिथुनाद्ये मंगलनादो न वा भवति ॥ ९४ ॥
अन्ते शंखध्वानो द्वौ विप्रौ (वा) पुष्पधारिणी योषा ।
आद्ये च मृगागमनमन्त्ये भेरीविरावश्च ॥ ९५ ॥
(शकुनिनिनादो मध्ये चण्डालानां ध्वनिर्वा स्यात्)
अन्त्ये तु गजाक्रोशस्तुरगागमनस्य शंसनं वाच्यम् ॥ ९६ ॥
आदौ कुक्कुटकेकारावोऽथवा कुलीरे स्यात् ।
मध्ये चरणनिनादः काष्ठनिनादोऽथवा भवति ॥ ९७ ॥
अन्ते शंखध्वानो द्वौ विप्रौ पुष्पधारिणी योषा ।
आद्ये च मृगागमनं दीपो वा दृश्यतेऽथ सिंहस्य ॥ ९८ ॥
मध्ये मंगलशब्दो मांसागमनं तदीयवार्ता वा ।
अन्ते दुष्टानारी चागच्छेदार्द्रवसनविप्रो वा ॥ ९९ ॥
कन्याद्ये ताम्ररवो दूतागमनं तथा स्नेहः ।
मध्ये वृषगोपानामागमनं कुम्भधारिणी चान्ते ॥ १०० ॥

तुलाद्ये तु वणिग्देवयोषा पुष्पवती तथा ।
विप्रद्वयागमश्चैव तुलामध्य उदाहृतः ॥ १०१ ॥

तदन्ते रोषब्दश्च मृगरावोऽथवा भवेत् ।
वृश्चिकाद्ये पान्नशब्दो द्विजक्रोशोऽथवा भवेत् ॥ १०२ ॥

तन्मध्ये योषितश्शब्दो दीपस्तम्भागमोऽथवा ।
वृश्चिकान्ते वेदशब्दो वैदिकागमनं तथा ॥ १०३ ॥

गजागमो वा नृपतेर्हयांगस्यादिभागके ।
मध्ये मंगलशब्दः स्यादन्ते रम्यातपत्रकः ॥ १०४ ॥

पश्वागमो वा युवतेरागमो वा मृगादिके ।
मध्ये शस्त्राम्बुनोर्वार्ता तदन्ते वायसध्वनिः ॥ १०५ ॥

कुम्भाद्ये बालघोषो वा हरिवार्ता भवेत्तथा ।
छत्रधारागमो मध्ये भृतकस्य जनस्य वा ॥ १०६ ॥

आक्रोशः स्यात्तदन्ते तु नासिकोत्थध्वानिस्तथा
अन्धकस्यागमो वाच्यो मीनाद्ये बधिरागमः ॥ १०७ ॥

अन्यथा ध्वनिरस्यैव वसुशब्दोऽथ मध्यमे ।
भेरीशंखनिनादः स्यान्मीनान्ते तत्त्रिभागके ॥ १०८ ॥

गुरौ केन्द्रत्रिकोणस्थे वायसो दक्षिणं व्रजेत् ।
लग्नस्थे भार्गवे वापि पयः पक्षी च वामतः । ॥ १०९ ॥

त्रिषडायगते भौमे खे श्येनस्तत्र वामतः ।
कृष्णपक्षो भरद्वाजः प्रदक्षिणमियाद् ध्रुवम् ॥ ११० ॥

केन्द्रत्रिकोणगे जीवे दर्शनं छागविप्रयोः ।
त्रिषडायगते चार्के भरद्वाजे यथापुरा ॥ १११ ॥

आयस्थे वाक्पतौ लग्ने ब्राह्मणौ समुपस्थितौ ।
बुधशुक्रौ च केन्द्रस्थौ सवत्सा गौः पयस्विनी ॥ ११२ ॥

चतुर्थस्थे तु शीतांशौ दशमस्थेऽथवा यदा ।
दीपदर्शनसांमुख्यं रजको धौतवस्त्रकम् ॥ ११३ ॥

सुतस्थाने यदा सौम्ये वृषभस्सम्मुखो भवेत् ।
गुरुचन्द्रौ च नवमे दक्षिणे वाथ वायसः ॥ ११४ ॥

लग्नेष्टमे सप्तमे वा जीवज्ञौ यदि संस्थितौ ।
आदर्शपुष्पमांसानां मद्यस्यालोकनं शुभम् ॥ ११५ ॥

लग्नाष्टमे राहुकेतू सर्पदर्शनमीरितम् ।
चडांशुराहुमन्दाश्च सहजस्था यदा तदा ॥ ११६ ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले
पट्टाभिषेकविधिसन्धिविग्रहयानस्वरूपवर्णनं
नामैकादशस्तरंगः

अथ द्वादशस्तरंगः

सन्धिविग्रहयानानां भेदान् श्रुत्वाऽस्मि हर्षितः ।
ब्रूहि त्वमासनं द्वैधमाश्रयं च क्रमाद् गुरो! ॥ १ ॥

कुमाराकर्णय स्वैरं सारमेतद्ब्रवीमि ते ।
अवृष्ट्या तोयरहिते दुर्भिक्षेण शुचान्विते ॥ २ ॥

परेषां दुःस्थिते देशे नैव यायात् कथंचन ।
परस्परविरोधेन क्षीयमाणेषु शत्रुषु ॥ ३ ॥

तद्विनाशो भवेद्यावत्तावत्तिष्ठेच्च बुद्धिमान् ।
स्वस्थासनमुपेक्षाख्यं मार्गरोधासनं तथा ॥ ४ ॥

दुर्गसाध्यासनं चैव राष्ट्रस्वीकरणासनम् ।
रमणीयासनं चान्यत्तथा च निकटासनम् ॥ ५ ॥

दूरमार्गासनं चैव प्रलोभासनमेव च ।
पराधीनासनं चेति दशासनमुदाहृतम् ॥ ६ ॥

इतोऽधिकं न दृश्येत नीतिज्ञैरन्य[1]थाऽऽसनम् ।
निष्कण्टके तथा राज्ये शासिते वैरिमण्डले ॥ ७ ॥

स्वस्थाने या स्थिती राज्ये स्वस्थासनमिति स्मृतम् ।
यदस्माभिरनुष्ठेयं दैवेन क्रियते हि तत् ॥ ८ ॥

[1]) दासनम्.

उग्रदण्डप्रयोगाच्च व्यसनाद्भृत्यकर्शनात् ।
उपेक्ष्य यदवस्थानमुपेक्षासनमुच्यते ॥ ९ ॥
नद्याः पूरप्रवाहेण रुद्धं स्याद्गमनं यदि ।
तेन रोधेन यत् स्थानं मार्गरोधासनं [1]हि तत् ॥ १० ॥
दुर्गं गृहीतुमुद्युक्तो वारणार्थं विरोधिनः ।
तत्रैव निवसेदुक्तं दुर्गसाध्यासनं हि तम् ॥ ११ ॥
बलादुपार्जिते राष्ट्रे वशार्थं यत्र तिष्ठति ।
तत् स्थानं कथितं राज्ञो राज्यस्वीकरणासनम् ॥ १२ ॥
विजिगीषुर्नृपो गत्वा रिपून् हत्वा रणांगणे ।
रम्यां वसतिमालोक्य यत्र तिष्ठति सानुगः ॥ १३ ॥
यवसेन्धनभूयिष्ठे जलधान्यसमन्विते ।
यत् स्थानं नीतितत्त्वज्ञै रमणीयासनं हि तत् ॥ १४ ॥
दूरस्थस्य रिपो राजा विनाशाय समुद्यतः ।
समीपे यत् स्थितिं कुर्यात् तद्भवेन्निकटासनम् ॥ १५ ॥
दूरदेशं नृपो गत्वा कृत्वा कार्यमशेषतः ।
विज्ञाय स्वरिपुं दूरं यत्र तिष्ठत्यनाकुलः ॥ १६ ॥
वर्षर्तुव्यत्ययाद्यावत्तिष्ठेच्च शरदागमः ।
तावद्यदुचितं स्थानं दूरमार्गासनं हि तत् ॥ १७ ॥
हस्त्यश्वधनरत्नानि दुर्गं राष्ट्रं तथैव च ।
किंचित् कालं स्थितिः कार्या रिपून् हत्वा वदामि ते ॥ १८ ॥
इति प्रलोभितोऽन्येन यत्र तिष्ठति भूमिपः ।
तत् प्रलोभासनं नाम कथितं नीतिवेदिभिः ॥ १९ ॥
मासे पक्षे दशाहे च षडहे पञ्चरात्रके ।
प्रभूतं ते ददामीति प्रलोभ्य स्थापयेन्नृपः ॥ २० ॥
आशया धार्यमाणस्तु यत्र तिष्ठति वा चिरम् ।
प्रलोभासनमेतद्धि समाख्यातं मनीषिभिः ॥ २१ ॥
स्नेहाद्वा वैरिभावाद्वा गन्तुं देशं स्वकं न यः ।
यतते यत्र तत् स्थानं पराधीनासनं स्मृतम् ॥ २२ ॥
स्वयं हीनबलो राजा जयहेतुं न पश्यति ।
बलिना पीड्यमानो यः क्षेमस्थानं समाविशेत् ॥ २३ ॥

[1] ततम्.

तत्संश्रयोऽन्यसंसर्गो दुर्गसंश्रयणं तथा ।
इति भेदास्त्रयः प्रोक्ताश्चतुर्थो नोपलभ्यते ॥ २४ ॥
महता शत्रुणा यस्तु पीडितोऽल्पस्तथा नृपः ।
सत्यसन्धं परिज्ञाय तमेवाश्रयते बुधः ॥ २५ ॥
बहूंस्तान् सद्गुणान् वीक्ष्य शत्रुं यस्तु समाश्रयेत् ।
गुणनीतिषु तत्त्वज्ञास्तं संश्रयमुशन्ति हि ॥ २६ ॥
शत्रुणा बाध्यमानोऽपि स्वयं चाप्यनुपायकः ।
गुणहीनं रिपुं ज्ञात्वा तस्मादन्यं गुणाधिकम् ॥ २७ ॥
बलिनं कृपया युक्तं धर्मज्ञं सत्यवादिनम् ।
आश्रयेदीश्वरं ज्ञात्वा स समाश्रय उच्यते ॥ २८ ॥
वैरिणा बलयुक्तेन पीडितोऽल्पबलो नृपः ।
यस्तु संश्रयते दुर्गं दुर्गसंश्रय इष्यते ॥ २९ ॥
लोभाद्वापि भयाद्वापि योगक्षेमार्थसाधकः ।
द्वेषिमध्ये चिरं कालं द्वैधीभावेन यापयेत् ॥ ३० ॥
मिथ्याचित्तस्समुद्दिष्टो मिथ्यावचन एव च ।
मिथ्याकरण इत्यन्यस्तथा चोभयवेतनः ॥ ३१ ॥
युग्मप्राभृतकश्चेति द्वैधीभावोऽत्र पञ्चधा ।
चित्ते विरोधमादत्ते वचसा प्रियभाषणम् ॥ ३२ ॥
द्वैधीभावोऽयमाख्यातो मिथ्याचित्तार्थकोविदैः ।
वचसाऽऽख्याति कर्माणि मनसा तत्ततोऽन्यतः ॥ ३३ ॥
द्वैधीभावोऽपरः ख्यातो मिथ्यावचनसंज्ञकः ।
स्तोकं स्तोकं किमप्यादौ कार्यं विश्वासकारणात् ॥ ३४ ॥
करोति तावद् दुष्टोऽसौ यावत्कार्यं विनाशयेत् ।
एवं यः कुरुते मिथ्या रिपोर्नाशाय पार्थिवः ॥ ३५ ॥
मिथ्याकरणनामायं द्वैधीभावः प्रकीर्त्तितः ।
गुप्तं वेतनमन्यत्र तथैकत्र प्रकाशतः ॥ ३६ ॥
कार्यं करोति सर्वत्र [1] गुप्तदस्य हितेच्छया ।
अलक्षितो रिपोर्मित्रं भूत्वा स्वस्वामिनेऽर्पयन् ॥ ३७ ॥
यत्र तिष्ठति वै विद्यात् सस्यादुभयवेतनः ।
सन्नाहं प्रेषयिष्यामि साधयिष्यामि ते रिपुः[2] ॥ ३८ ॥
इति ब्रुवन् [3] समृद्धाभ्यां द्वाभ्यामर्थं समाहरन् ।
तयोरज्ञातरूपस्सन् यत्र राजा प्रवर्त्तते ॥ ३९ ॥

[1] गुप्तमस्य. [2] रिपुम्. [3] विरुद्धाभ्यां.

द्वैधीभावं तमप्याहुर्युग्मप्राभृतकं बुधाः ।
द्वैधीभावं समालम्ब्य यएवं वर्तते नृपः ॥ ४० ॥
विपक्षलक्ष्मीमादत्ते मन्त्ररक्षाविचक्षणः ।
सन्धिं च विग्रहं चैव यानमासनमाश्रयम् ॥ ४१ ॥
द्वैधीभावं च यो वेत्ति प्रयोक्तुं शत्रुमण्डले ।
बलवान् कोशसम्पन्नो गुणवान् सत्क्रियो बुधः ॥ ४२ ॥
स कृत्स्नां पृथिवीं भुङ्क्ते देशकालसहायवान् ।
उपायेषूत्तमं साम भेदो मध्यम इष्यते ॥ ४३ ॥
उपप्रदानमवरं दण्डः कष्टतरः स्मृतः ।
1) अपायरहितत्वाच्च द्रव्यहानेरभावतः ॥ ४४ ॥
संधिमायान्ति कार्याणि तस्मात्सामोत्तमं मतम् ।
कुत्सिता भेदमायान्ति न ते विश्वासभूमयः ॥ ४५ ॥
ततः सन्देहरूपत्वात् स भेदो मध्यमः स्मृतः ।
वित्तस्य संक्षयः पूर्वं सिद्धिर्दैवे व्यवस्थिता ॥ ४६ ॥
उपप्रदानमवरं तेन प्रोक्तं मनीषिभिः ।
लाभार्थं क्रियते युद्धं रणे संशयितो जयः ॥ ४७ ॥
राज्यं च जीवितं चैव दण्डःकष्टतर2) स्ततः ।
चतुर्थोपायसाध्ये तु शत्रौ सान्त्वमपक्रियां ॥ ४८ ॥
प्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः ।
कुलीनेषु कृतज्ञेषु सार्द्रचित्तेषु साधुषु ॥ ४९ ॥
कार्यार्थिषु च मेधावी पूर्वं साम प्रयोजयेत् ।
प्रथमं कर्णसुभगं द्वितीयं दैविकं तथा ॥ ५० ॥
तृतीयं स्मारकं प्रोक्तं चतुर्थं लोभकं स्मृतम् ।
तथैव पञ्चमं साम निजार्पणमिति स्मृतम् ॥ ५१ ॥
उपायेषूत्तमं साम कथितं निरुपद्रवम् ।
मधुरैस्सुखसल्लापैः श्राव्यैश्च हृदयंगमैः ॥ ५२ ॥
एवं वचोभिर्यत् साम तत् कर्णसुभगं मतम् ।
विश्वासजननोपायैः शपथैर्देवपूर्वकैः ॥ ५३ ॥
क्रियते यन्नीतिज्ञात् साम तद्दैविकं विदुः ।
यदासीत् सौहृदं पूर्वं साम्प्रतं विस्मृतं त्वया ॥ ५४ ॥

1) उपायरहितत्वाच्च. 2) कष्टतरः स्मृतः.

इति संस्मार्यते यत्र साम तत् स्मारकं मतम् ।
ग्रामं पुरं तथा राष्ट्रं वाजिनं वारणं धनम् ॥ ५५ ॥
दास्यामीति च यत् साम स्मृतं तदिह लोभजम् ।
भवत्कार्ये मदीयं स्वं शरीरं च मयार्पितम् ॥ ५६ ॥
इति वागर्पितं साम कथितं तन्निजार्पणम् ।
सामोपायै रसाध्या ये रिपवो मदमोहिताः ॥ ५७ ॥
भेदोपायेन ते साध्या नृपेण विजिगीषुणा ।
क्षीरं नीरं यथा हंसो विश्लेषयति संगतम् ॥ ५८ ॥
तथा च संहतान् शत्रून् भेदाद्विश्लेषयेत्तु तान् ।
शत्रुस्तैरात्मपुरुषैर्गूढैरुभयवेतनैः ॥ ५९ ॥
भीतावमानितान् क्रुद्धान् भेदयेच्छत्रुसंगतान् ।
प्राणहानिर्मानभंगो धनहानिश्च बन्धनम् ॥ ६० ॥
दाराभिलाषकश्चेति षड्भेदास्सांगभंगकाः ।
प्राणापहो भवेद्यस्तु सभेदः प्राणहा स्मृतः ॥ ६१ ॥
त्वद्विषत्प्रेरितो राजा तव मानं हरिष्यति ।
एवमुद्वेज्य यो भेदो मानभंगस्स वर्णितः ॥ ६२ ॥
धनिकोऽयं महानेष किञ्चित्तव न यच्छति ।
तस्मात् केनाप्युपायेन धनमाहर्तुमर्हसि ॥ ६३ ॥
इति संमन्त्र्य भूपाय यद्ब्रूते धनिकाय च ।
अर्थलुब्धो ह्ययं राजा तव द्रव्यं हरिष्यति ॥ ६४ ॥
1) यत्रैवं पिशुनत्वेन भिनत्त्युभयवेतनः ।
धनहानिरयं भेदो नीतिज्ञैस्समुदाहृतः ॥ ६५ ॥
न करोति तव स्वामी विश्वासं त्वयि कर्हिचित् ।
बन्धयित्वातु निगलैः कारागारे निधास्यति ॥ ६६ ॥
इति विश्वासमुत्पाद्य निजस्वामिहितो नरः ।
यद्भिनत्ति परं बुद्ध्या सभेदो बन्धकः स्मृतः ॥ ६७ ॥
विलासी चपलो भोगी रूपवान् तरुणो विटः ।
अन्तः पुरे मदीयां स्त्रीं कटाक्षैः स्प्रष्टुमीहते ॥ ६८ ॥
वध्योऽयमिति भूपालो मया सार्धममन्त्रयत् ।
इति यः कुरुते भेदं स स्याद्दाराभिलाषकः ॥ ६९ ॥

1) इत्येवं.

तद्भार्यां रूपसम्पन्नां नवयौवन[1]शीलिनीम् ।
ममाग्रेऽवर्णयद्राजा सापेक्ष इव लक्षितः ॥ ७० ॥
त्वयि जीवत्यलभ्यत्वात् तव द्रोहं विधास्यति ।
दाराभिलाषभेदोऽयमेवं वा परिकीर्त्तितः ॥ ७१ ॥
अयमस्मिन् कुले जातः कदाचिद्राज्यमिच्छति ।
अंगुलिं वा तथा नेत्रे सन्ततिं वा धनानि च ॥ ७२ ॥
हर्तुमिच्छत्ययं राजा सर्वथा तत् करिष्यति ।
इति यो र्मितो भेदस्सोऽङ्ग भङ्ग इतीरितः ॥ ७३ ॥
सम्यग्भेदेन शत्रूणां भिनत्ति प्रकृतिं तु यः ।
भेदवज्रेण तद्भिन्नं हृदयं प्रति भूभुजाम् ॥ ७४ ॥
अर्धहारप्रभेदेन स्वाधिकारव्ययेन च ।
अलब्धवेतनत्वेन मानापहरणेन च ॥ ७५ ॥
द्विषतां करणैरेभिर्विरक्ता ये च मन्त्रिणः ।
अमात्यास्सचिवाश्चैव तथा सामन्तमान्यकाः ॥ ७६ ॥
भृत्याश्च बान्धवाश्चैव ये चान्तर्वर्तिनो नराः ।
युद्धबुद्धिसहाया ये तेषां दानं प्रयोजयेत् ॥ ७७ ॥
अन्ये ये लोभसंयुक्ता व्यसनासक्तचेतसः ।
तेभ्योऽपि दानं युञ्जीत नृपश्शत्रुं जिघांसया ॥ ७८ ॥
अभीष्टं हायनं देश्यं करजं सातिदान्तिजम् ।
ग्रामजं शासनं भूषा वसनं प्रतिपत्तिजम् ॥ ७९ ॥
आकरं रुक्मजं कान्यं वैश्यं वेलाकरं तथा ।
उपप्रदानमेवं तु प्रोक्तं षोडशधा बुधैः ॥ ८० ॥
यस्मै यद्रोचते वस्तु तस्मै योग्यानुसारतः ।
यद्दीयते तदाख्यातमभीष्टं दानमुत्तमम् ॥ ८१ ॥
एकसंवत्सरं यावत् कुटुम्बभरणक्षमम् ।
[2]येन यद्दीयते यस्य तद्दानं हायनं स्मृतम् ॥ ८२ ॥
यद्देशेऽप्युचितं दानं तद्दानं देश्यमुच्यते ।
राष्ट्रोत्थं धनधान्यं यत् तत् स्मृतं करजं बुधैः ॥ ८३ ॥
वारणस्य प्रदानं यत्तद्दानं दन्तिसंज्ञिकम् ।
हयस्य दानमाख्यातं सातिजं नीतिकोविदैः ॥ ८४ ॥

[1] शोभिताम्. [2] यस्ययद्दीयते तस्य.

अगृहीतकरो वापि प्रगृहीतकरोऽपि च ।
ग्रामः प्रदीयते यत्तु तद्दानं ग्रामजं मतम् ॥ ८५ ॥
पुत्रपौत्रप्रपौत्रेषु दत्तं नैव विलंघ्यते ।
अबाध्यत्वेन यत्किंचित्तद्दानं शासनं स्मृतम् ॥ ८६ ॥
रत्नेन जातरूपेण घटितं चारुभूषणम् ।
दीयते यत्तु तद्दानं भूषणाख्यमुदाहृतम् ॥ ८७ ॥
नानावर्णविचित्राणि नानासूत्रमयानि च ।
नानादेशसमुत्थानि सूक्ष्माणि च घनानि च ॥ ८८ ॥
वस्त्राण्यतिमनोज्ञानि प्रभूतानि प्रसादतः ।
दीयन्ते यत्तु तद्दानं वसनं परिकीर्त्तितम् ॥ ८९ ॥
आसनं चामरं छत्रं यानं सन्माननोचितम् ।
नाम वा दीयते यत्तु तद्दानं प्रतिपत्तिजम् ॥ ९० ॥
रौप्यकांचनरत्नानि संजायन्ते यतो भुवः ।
सा खानिर्दीयते यत्तु तदाकरजमीरितम् ॥ ९१ ॥
दीयन्ते यत्र [1]निष्काणि प्रभूतानि वराणि च ।
तद्दानं रुक्मजं प्रोक्तमर्थशास्त्रविचक्षणैः ॥ ९२ ॥
भूषणैर्भूषिता कन्या लक्षणैश्च समन्विता ।
विधिवद्दीयते यत्तु कान्यं दानं तदुच्यते ॥ ९३ ॥
रूपयौवनसम्पन्ना नृत्तगीतविशारदा ।
वेश्या प्रदीयते यत्तु तद्दानं वैशमुच्यते ॥ ९४ ॥
यत्राढ्या वहवस्सन्ति वहिस्तस्योपजीविनः ।
रत्नाकरस्य वेलायां बहुपण्यप्रचारिणः ॥ ९५ ॥
अपूर्वोपायनाद्भूतं पत्तनं बहुवस्तुदम् ।
दीयते यत्तु तद्दानं वेलाकरमिति स्मृतम् ॥ ९६ ॥
यदसाध्यं हि भेदेन तद्दानेन प्रसाध्यते ।
सर्वेषामप्युपायानां दानं श्रेष्ठतमं स्मृतम् ॥ ९७ ॥
दानशीलो नृपो लोके देववत् पूज्यते नरैः ।
उपायत्रितयेनापि यो न शक्यो भवेद्रिपुः ॥ ९८ ॥
तस्य दण्डं प्रयुञ्जीत बलवान् यदि भूपतिः ।
सामादीनां प्रयोक्तारमशक्तं मन्यते रिपुः ॥ ९९ ॥
तस्माद्दण्डं प्रयुञ्जीत दण्डो हि वशकृन्नृणाम् ।
बलिष्ठेन तथा कार्या दण्डा द्वादशभेदजाः ॥ १०० ॥

[1] रुक्माणि.

अशक्तेन त्रयं कार्यमेवं पञ्चदश स्मृताः ।
अन्ये च दण्डाः कर्तव्या भूभृता धर्ममूर्त्तिना ॥ १०१ ॥

क्लेशार्त्तिहरणाच्चैव जनानां वृत्तलक्षणात् ।
देशनाशश्च शत्रूणां जनांगच्छेदकस्तथा ॥ १०२ ॥

गोनृभूधान्यहरणो बन्दिग्राहस्तथा परः ।
देशहारो धनाहारः सर्वस्वहरणः परः ॥ १०३ ॥

दुर्गभंगः स्थानदाहो देशनिर्वासकस्तथा ।
युद्धे वधो महादण्डः शत्रुसंहारकारकः ॥ १०४ ॥

ग्रामाश्च यत्र दह्यन्ते स दण्डो देशनाशकः ।
नासिका श्रवणद्वन्द्वं छिद्यते देशवासिनाम् ॥ १०५ ॥

नराणां यत्र दण्डोऽसौ जनांगच्छेदनो मतः ।
देशजाः पशवस्सर्वे गृह्यन्ते सहसा बलात् ॥ १०६ ॥

दण्डोऽसौ गोग्रहो नाम विख्यातः परभूमिषु ।
गर्तेषु पिहितं धान्यं क्षेत्रे सस्यशिखागतम् ॥ १०७ ॥

आपणे पुंजितं यच्च खले राशीकृतं च यत् ।
तत्सर्वं हीयते यच्च रिपुराष्ट्रेषु संस्थितम् ॥ १०८ ॥

दण्डोऽसौ धान्यहरणो देशदुर्भिक्षकारणम् ।
कुटुम्बिनो गृहस्था ये धनिका व्यवहारिणः ॥ १०९ ॥

नीयन्ते यत्र बध्वा ते स बन्दिग्राह उच्यते ।
जनानामभयं दत्वा भयं छित्वा तथाऽन्यजम् ॥ ११० ॥

आत्मसात् क्रियते राष्ट्रं स दण्डो देशहारकः ।
आक्रम्य सैनिकैर्ग्रामान् बलात् कृत्वा स्वसम्मतम् ॥ १११ ॥

आहरेत् कांचनं दण्डं धनहारस्स उच्यते ।
महत्या सेनया युक्तः ख्यातं नगरपत्तनम् ॥ ११२ ॥

आवेष्ट्य लुण्ठयेद्यत्र धनधान्यगवादिकम् ।
लोहभाण्डानि वस्त्राणि गृहोपकरणानि च ॥ ११३ ॥

यस्माच्च गृह्यते सर्वं सर्वस्वहरणो हि सः ।
नानाविधैरुपायैर्यत् परेषां दुर्गसाधनम् ॥ ११४ ॥

क्रियते स समाख्यातो दुर्गभंगाभिधानवान् ।
यस्मिन् पुरे वसेत् कर्ता सपुत्रबलवाहनः ॥ ११५ ॥

तत्पुरं राजनिलयं साट्टप्राकारतोरणम् ।
अन्तःपुरं पुरन्ध्रीणां रम्याणि भवनानि च ॥ ११६ ॥

निकेतनानि पुत्राणाममात्यानां गृहाणि च ।
सचिवानां निवासांश्च मन्त्रिणां सदनानि च ॥ ११७ ॥

अन्येषां च मनुष्याणां मन्दिराणि बहूनि च ।
मन्दुरा गजशालाश्च विविधान्यापणानि च ॥ ११८ ॥

भस्मासात् कुरुते यस्तु स दण्डः स्थानदाहकः ।
देशत्यागात् परिभ्रष्टो हतभोगः पदच्युतः ॥ ११९ ॥

गिरिकन्दरकान्तारनिकुञ्जभवनाश्रयः ।
वियुक्तो दारपुत्रैश्च बन्धुभिस्सचिवैस्तथा ॥ १२० ॥

क्षुत्पिपासापरीतश्च चिन्ताशोकसमन्वितः ।
यानासनविहीनश्च गजवाजिविवर्जितः ॥ १२१ ॥

तत एवं विधो दण्डो देशनिर्वासकः स्मृतः ।
युद्धे शत्रुवधो यस्तु दण्डो युद्धवधाभिदः ॥ १२२ ॥

सन्ध्यादीन् षड्गुणां श्चैव सामादीनप्युपायकान् ।
सार्वभौमत्वमाप्नोति यथाकालं प्रयो[1] गतः ॥ १२३ ॥

तस्मान्नित्यं प्रयोक्तव्या एते वैरिषु भूभृता ।
ज्ञात्वा स्वरबलं राजा मुहूर्तबलमेव च ॥ १२४ ॥

कुर्वीत सर्वकार्याणि संग्रामं तु विशेषतः ।
नाच्छित्वा परमर्माणि नाकृत्वा कर्म दारुणम् ॥
नाहत्वा मत्स्यघातीव प्राप्नोति महतीं श्रियम् ॥ १२५ ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले
आसनद्वैधीभावसमाश्रयचतुरुपायनिरूपणं
नाम द्वादशस्तरंगः.

1) प्रयोजयन्.

अथ त्रयोदशस्तरंगः

कीदृशं तत् स्वरबलं मुहूर्तबलमेव च ।
मह्यमेतत् समाख्याहि तच्छ्रोतुं मेऽस्ति कौतुकम् ॥ १ ॥
पुत्र! ते कथयिष्यामि यस्य श्रवणमीप्सितम् ।
यद्विज्ञाय प्रवृत्तस्य जयः करतले स्थितः ॥ २ ॥
अथातः सम्प्रवक्ष्यामि शरीरस्थं स्वरोदयम् ।
हंसचारस्वरूपेण येन ज्ञानं त्रिकालजम् ॥ ३ ॥
नाभिस्थिता कुण्डलिनी शक्तिर्भुजगरूपिणी ।
ऊर्ध्वगा दशनाड्यस्तु दश चाधः स्थितास्ततः ॥ ४ ॥
द्वे द्वे तिर्यग्गते नाड्यौ चतुर्विंशतिसंख्यया ।
कुण्डलिन्यां महाशक्तौ मूलमार्गा भवन्त्यमी ॥ ५ ॥
ताभि[1] स्सूक्ष्ममुखानाड्यश्शरीरस्यापि पोषकाः ।
संख्यया च [2] समादिष्टाः सप्तसप्तशतानि च ॥ ६ ॥
प्राधान्याद्दशनाड्यस्तु दश वायुप्रवाहिकाः ।
नामानि नाडिकानां च वार्तानां च वदाम्यहम् ॥ ७ ॥
पिंगलेडा सुषुम्ना च गान्धारी हस्तिचिह्निका ।
पूषा जया वला व्यूषा कुहूश्शंखिनिका तथा ॥ ८ ॥
ताभ्यस्सूक्ष्ममुखा नाड्यो द्विसप्ततिसहस्रकम् ।
प्रकटं प्राणसंचारो लक्ष्यते देहमध्यतः ॥ ९ ॥
प्राणोऽपानस्समानश्चोदानो व्यान स्तथैवच ।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ॥ १० ॥
इडा च पिंगला चैव सुषुम्ना च तृतीयका ।
इडानाडीस्थितश्चन्द्रः पिंगला भानुवाहिनी ॥ ११ ॥
सुषुम्ना शम्भुरूपेण हंसश्शम्भुस्सुरूपगः ।
हकारो निर्गमश्शम्भुस्सशक्तिः स्यात् त्प्रवेशने ॥ १२ ॥
शक्तिरूपस्थितश्चन्द्रो वामनाडी प्रवाहकः ।
दक्षचारप्रवाहे तु शम्भुरूपी दिवाकरः ॥ १३ ॥
एकैकस्य कलाः पञ्च क्रमेणैवोदयन्ति च ।
पृथिवी सलिलं तेजो वायुराकाशमेव च ॥ १४ ॥
मध्ये पृथ्वी ह्यधश्चापो वह्निरूर्ध्वगतो भवेत् ।
तिर्यग्वायुप्रवाहश्च नभो वहति संक्रमे ॥ १५ ॥
पृथ्व्याद्येकैकतत्त्वे स्यादेकैकघटिकोदयः ।
अहोरात्रस्य मध्ये स्युस्ते च द्वादश संक्रमाः ॥ १६ ॥

1) ताभ्यस्सूक्ष्म. 2) समुद्दिष्टाः.

अष्टांगुलो भवेद्वह्निरनिलश्चतुरंगुलः ।
दिवाकरांगुला पृथ्वी सलिलं षोडशांगुलम् ॥ १७ ॥
चापाकारो वहेद्वायुस्त्रिकोणो वह्निरुच्यते ।
चतुरश्रस्तु माहेयो वर्तुलो वारुणः स्मृतः ॥ १८ ॥
कटुस्वादो भवेद्वायुस्तीक्ष्णस्वादोऽनलो भवेत् ।
कषायकस्तु माहेयो मधुरो वारुणो मतः ॥ १९ ॥
शुक्लप्रतिपदो वायुश्चन्द्रस्त्वर्कस्त्र्यहं त्र्यहम् ।
पक्षश्शस्तोऽनया वृत्त्या विपर्यासे तु दुःखदः ॥ २० ॥
चन्द्रोदये यदा सूर्यश्चन्द्रस्सूर्योदये यदा ।
अशुभं हानिरुद्वेग श्शुभं सर्वं निजोदये ॥ २१ ॥
शशिनं चारयेद्रात्रौ चारयेदह्नि भास्करम् ।
इत्यभ्यासरतो नित्यं सयोगी नात्र संशयः ॥ २२ ॥
यात्रादाने विवाहे च वस्त्रालंकारभूषणे ।
शुभकर्मणिसन्धौ च प्रवेशे च शशी शुभः ॥ २३ ॥
विवादद्यूतयुद्धेषु स्नानभोजनसंगमे ।
व्यवहारे भये भंगे सूर्यनाडी प्रशस्यते ॥ २४ ॥
होमश्च शान्तिकश्चैव दिव्यौषधिरसायनम् ।
विद्यावत्रं [1]स्थिरं कर्म कर्तव्यं च निशाकरे ॥ २५ ॥
उद्यत्स्वरपदे चैव कृता यात्रातिसिद्धिदा ।
चन्द्रे समपदं कुर्यात् सूर्येच विषमं सदा ॥ २६ ॥
पूर्वं पूर्वं पुरस्कृत्य यात्रा भवति सिद्धिदा ।
वामचारप्रवाहेतु न गच्छेत् पूर्वमुत्तरम् ॥ २७ ॥
दक्षचारप्रवाहेतु न गच्छेद्याम्यपश्चिमे ।
वामे दक्षिणतो वापि यत्र वायुः प्रवर्तते ॥ २८ ॥
आदौ तत्पादमुद्धृत्य यो गच्छेत् कार्यसिद्धये ।
युद्धकाले यदा चन्द्रः स्थायी जयति निश्चयम् ॥ २९ ॥
यदा सूर्यप्रवाहस्तु यायी विजयते सदा ।
पृथ्वी जले शुभे तत्त्वे तेजोमिश्रफलोदयम ॥ ३० ॥
हानिमृत्युकरौ पुंसामुभयोर्व्योममारुतौ ।
पार्थिवे सक्षतं युद्धं सन्धिर्भवति वारुणे ॥ ३१ ॥
विजयो वह्नितत्त्वे च वायौ भंगो मृतिस्तु खे ।
शयने वा प्रसंगे वा युवत्यालिंगनेऽपि वा ॥ ३२ ॥

1) स्थितं.

यस्सूर्येण पिबेचन्द्रं स भवेन्मकरध्वजः ।
जीवेन गृह्यते जीवे जीवं जीवस्य दापयेत् ॥ ३३ ॥
जीवस्थानगते जीवे बालाजीवान्तगावशा ।
भुक्तमात्रेऽथ मन्दाग्नौ स्त्रीणां वश्यार्थकर्मणि ॥ ३४ ॥
1) शयनं सूर्यवाहेन कर्तव्यं सर्वदा बुधैः ।
शान्ते शोके तृषार्तेच ज्वलिते मूर्छितेऽपिवा ॥ ३५ ॥
सज्जनस्वामिबोधार्थे चन्द्रचारं प्रवाहयेत् ।
गर्भप्रश्ने यदा दूतः पूर्णे पुत्रः प्रजायते ॥ ३६ ॥
शून्ये कन्यायुगे युग्मं गर्भपातश्च संक्रमे ।
भास्करे विषमावर्णास्समवर्णा निशाकारे ॥ ३७ ॥
वाहस्थो भाषते दूतस्तदा लाभोऽन्यथा नहि ।
ऊर्ध्वे वामाग्रतो दूतो ज्ञेयो वामपदे स्थितः ॥ ३८ ॥
दक्षे पृष्ठे तदाधस्तात् सूर्यवाहोऽग्रतो मतः ।
पूर्णनाडी स्थितो दूतो यत्पृच्छति शुभाशुभम् ॥ ३९ ॥
तत्सर्वं सिद्धिदं ज्ञेयं शून्ये शून्यं न संशयः ।
आदौ शून्यगतः पृच्छेत् पश्चात्पूर्णो विशेषदि ॥ ४० ॥
तदा सर्वार्थसिद्धिः स्याद्वामे वामं न संशयः ।
पृथिव्या येन तत्त्वेन दिनमासादिकैः फलम् ॥ ४१ ॥
शोभनं च तदा दुष्टं व्योममारुतवह्निभिः ।
श्वासप्रवेशकालेतु दूतो वाञ्छति जल्पितुम् ॥ ४२ ॥
इति देहस्वरः प्रोक्तश्शिवालिखितमुच्यते ।
इमं कश्चिदविज्ञाय स्वकार्यं यः करिष्यति ॥ ४३ ॥
न भविष्यन्ति तस्यैव सर्वकामसमृद्धयः ।
न सौरचान्द्रमानं वा तस्यैवं नान्यखेटजम् ॥ ४४ ॥
न शाकुन फलं तस्य यस्येदं करसंस्थितम् ।
चैत्रवैशाखमासौ द्वौ नभोभाद्रपदावपि ॥ ४५ ॥
माघफाल्गुनमासानामेका पद्धतिरीरिता ।
शून्यं कालं तथाऽऽवर्तममृतं रोगसंज्ञकम् ॥ ४६ ॥
पञ्च वेलास्तु कथिता घटिके द्वे मुहूर्तकम् ।
आश्वयुक्कार्तिके मासि सहस्यपि सहस्यके ॥ ४७ ॥
रोगामृते च शून्यं च कालमावर्तनं तथा ।
शून्याख्यममृतं चैवमावर्तं रोगसंज्ञकम् ॥ ४८ ॥
कालरेखा यथा प्रोक्ता ज्येष्ठाषाढद्विमासयोः ।
रौद्रश्वेतसमैत्रास्तथाऽपरौ चक्रवाकसावित्रौ ।
वैरोचनजयदेवा अभिजातो रावणो मुहूर्तोऽन्यः ॥ ४९ ॥

1) न युद्धं.

बलवदनो विजयाख्यो नन्दनयमसोमभाग्यवत्संज्ञाः ।
घटिकाद्वयपरिमाणं प्रवर्तते दिवाऽनिशं क्रमशः ॥ ५० ॥
रौद्रस्तथा श्वेतजचक्रवाकवैरोचनो रावणबालवाख्यौ ।
यमस्तथैव क्रमशो मुहूर्ता भान्वादिवारेषु भवेयुरांद्याः ॥ ५१ ॥
रौद्रे दुःखं बन्धनं कार्यनाशो राज्ञां पूजा श्वेतजे भूमिलाभः ।
मैत्रे मित्राद्राज्यमर्थागमश्च श्रेयोहानिर्वक्रता चक्रवाके ॥ ५२ ॥
सावित्रनाम्नि प्रभवन्ति विद्या वैरोचने शस्त्रहतिः प्रदिष्टा ।
प्रारम्भसिद्धिर्जयदेवसंज्ञे कार्योऽभिजाते हयरोहणादिभिः ॥ ५३ ॥
बलवदनमुहूर्ते रावणे चाशुभं स्या-
ज्जयति विजयसंज्ञे नन्दने नन्दनीयः ॥ ५४ ॥
यमे चाशुभसंप्राप्तिः सौम्ये स्याद्राजमाननम् ।
भाग्ये स्त्रीसंगमाद्यं च मुहूर्तानां क्रमात्फलम् ॥ ५५ ॥
शून्यबिन्दुसमाकारममृतं चोर्ध्वरेखया ।
कालं कालपदं ज्ञेयमावर्तं धनुराकृति ॥ ५६ ॥
कर्तरीरोगरेखा च पञ्च रेखाः प्रकीर्त्तिताः ।
शून्ये शून्यं भवेत्कार्यमावर्ते विभ्रमो भवेत् ॥ ५७ ॥
कालरेखा भवेन्मृत्युरर्थहानिश्च कर्तरी ।
अमृतेन भवेत् सिद्धिस्सद्यो भवति निश्चितम् ॥ ॥ ५८ ॥

षण्मासविषये

रविसौम्यार्किवारेषु शून्यमादौ प्रजायते ।
गुरुचन्द्रे तथाऽऽवर्तममृताख्यं सिते कुजे ॥ ५९ ॥

मासचतुष्टयविषये

रविसौम्यार्कजेज्यादौ रोगरेखां लिखेत्तथा ।
इन्दौ जीवेऽमृतार्धं च कालार्धं भौमशुक्रयोः ॥ ६० ॥
चतुर्णामेव मासानां पञ्च रेखाः क्रमात् स्वयम् ।

द्विमासविषयेः—

रवीन्दुजार्कजेज्यादौ शून्यरेखा भवेत्तथा ॥ ६१ ॥
इन्दौ गुरौ तथावर्तमर्धरोगं तथा सिते ।
पञ्चरेखा क्रमस्त्वेष लेख्यो मासद्वयो भवेत् ॥ ६२ ॥
अंगनाधनुषि मीनकर्कटे सत्वकालमरणं तु यायिनाम् ।
तौलिमेषवृषवृश्चिकराशौ राजसे च मरणं तु यायिनाम् ॥ ६३ ॥
सिंहकुम्भमृगयुग्मराशयस्तामसेन मरणं तु यायिनाम् ॥
सत्वं रजस्तम इति वेलाक्रम इहोच्यते ।
चतुश्चतुर्घटी चैषां भूयोभूयः क्रमादिह ॥ ६५ ॥

गुरुसौमे सत्ववेला भृगुभौमे रजस्तथा ।
शन्यर्कसौम्यवारेषु तमस्तु द्विमुहूर्तकम् ॥ ६६ ॥
शून्यं बिन्दौ च मृत्युः स्यात्कालबिन्दुश्च मृत्युदः ।
आवर्ते लभते युद्धममृते रोगनाशनम् ॥ ६७ ॥
रोगेण रोगसम्प्राप्तिरिति बिन्दुफलं क्रमात् ।
न तिथिर्न च नक्षत्रं न योगः करणं तथा ॥ ६८ ॥
अमृतस्य तु वेलायां सर्वकार्याणि कारयेत् ।
तामसं सात्विकं चैव राजसं च त्रिधा मतम ॥ ६९ ॥
तत्तद्ददाति बहुधा स्वनामसदृशं फलम् ।
रजोवेला भवेच्छीघ्रं सत्ववेला स्थिरं तथा ॥ ७० ॥
तमस्सर्वविनाशं च तिस्रो वेलाः प्रकीर्त्तिताः ॥

चैत्रवैशाख — श्रावणभाद्रपद — माघफाल्गुन — मासेषु.

रविवारे दिवा बिन्दवः.	रविवारे रात्रौ बिन्दवः
*रौ, श्वे, मै, च, सा, वै, ज, ल, रा, ब, लि, सं, य, सो, भा, त, त, स, स, र, र, त, त, स, स, र, र, त, त, स, छु, शु, बु, चं, मं, बु, कु, ल, शु, बु, चं, मं, ज, तु, छु.	का, श्वे, मै, च, सा, वै, ज, ल, रा, ब, वि, नं, य, सा, भा, गु, कु, ल, शु, बु, चं, मं, चि, कु, ल, शु, बु, चं, मं, चि, स, र, र, त, त, स, स, र, र, त, त, स, स, र, र.
इन्दुवारे दिवा बिन्दवः	**इन्दुवारे रात्रौ बिन्दवः**
श्वे, गै, च, सा, वै, ज, ल, रा, ब, वि, न, य, भा, रौ, स, स, र, र, त, त, स, स, र, र, त, त, स, स, र, चं, श, गु, कु, अ, शु, बु, च, श, गु, कु, ल, शु, बु, चं.	श्वे, मै, च, सा, वै, चि, ल, र, ब, वि, न, य, सो, भा, रौ, र, त, त, स, स, र, र, त, त, शु, बु, चं श, गु, कु, ल, शु, बु, कु, श, गु.
कुजवारे दिवा बिन्दवः	**कुजवारे रात्रौ बिन्दवः**
च, स, वै, ज, आ, रा, ब, वि न, य, सो, भा, रो, श्वे, मै, र, र, त, त, स, स, र, र, त, त, स, स, र, र, त, कु, ल, श, बु, चं, श्व, गु, कु, ल, शु, बु, चं, शं, गुं.	च, स, वै, द, आ, रा, ब, वि, न, य, सो, भा, रौ, श्वे, मै, त, स, स, र, र, त, त, स, स, र, र, त, त, स, स, श, गु, कु, आ, बु, चं, श, गु, कु, ल, शु.
बुधवारे दिवा बिन्दवः	**बुधवारे रात्रौ बिन्दवः**
वै, ज, ल, रा, ब, वि, न, य, सो, भा, रौ, श्वे, मै, च, त, त, स, स, र, र, त, त, स, स, र, र, त, त, स, बु, चं, श, गु, कु, ल, शु, बु, चं श, ज, कु.	वै, ज, ल, रा, ब, दि, न, य, सो भा, कां, श्वे, मै, च, स, र, र, त, त, स, स, र, र, त, त, स, स, र, र, ल, बु, चं, श, कु, ल, शु, बु, च, श.
गुरुवारे दिवा बिन्दवः	**गुरुवारे रात्रौ बिन्दवः**
र, बि, वि, न, य, सो, बा, का, श्वा, मै, च, सा, वै, ज, आ, स, स, र, र, त, त, स, स, र, र, त, त, स, स, र, कु, ल, शु, बु, चं, श, ज, श, ल, शु, बु.	र, ब, वि, न, य, सो, भा, रो, स्वि, मै, च, सा, वै, ज, ल, र; त, त, स, स, र, र, त, त, स, स, र, र, त, त, चं, त, गु, कु, ल, शु, बु, चं श, ल.
भार्गववासरे दिवा बिन्दवः	**भार्गववासरे रात्रौ बिन्दवः**
वि, न, य, सो, भा, का, श्वे, मै, च, सा, वै, ज, ल, रा, वि, र, र, त, त, स, स, र, र, त, त, स, स, स, र, र, त, शु, बु, चं, शु, गु, कु, ल, शु, बु, चं, श, ज.	वि, न, य, सो भा रौ स्व मै, च, सा, वै, ज, ल, रा, चि, त, स, स, र, र, त, त, स, स, र, र, त, त, स, स, स, कु, ल, शु, बु, चं, श, गु, कु, ल, शु बु, च.

* Differs in the Calculation of the bindus.

मन्दवारे दिवा बिन्दवः	मन्दवारे रात्रौ बिन्दवः
य, सो, भा, रौ, श्वे, मै, च, सा, वै, ज, ल, रा, व, वि, नं, त, त, स, स, र, र, त, त, स, स, र, र, त, त, स, श, गु, कु, शु, बु, चं, श, गु, कु, ल, शु.	य, सो, भा, रौ, श्वे, मै, च, स, वै, ज, ल, रा, व, वि, नं, स, र, र, त, त, स, स, र, र, त, त, स, स, र, र, बु, चं, श, गु, कु, रल, शु, बु, ज, वं, क गु, कु.

आश्वयुज, कार्त्तिक, मार्गशीर्ष, पुष्यमासेषु.


रविवसरे दिवा बिन्दवः	रविवसरे रात्रौ बिन्दवः
रे, श्वे, मै, च, सा, वै, ज, ल, रा, व, वि, न, य, सो, भा, स, र, र, त, त, स, स, र, र, त, त, अ, शु, बु, चं श, ज, कु, ल, शु, बु, च, श.	रा, श्वे, मै, च, सा, वैं, ज, ल, रा, व, वि, न, य, सो, भा, स, र, र, त, त, स, स, र, र, त, त, स, स, र, र, गु, कु, ल, शु, गु, चं, श, गु, कु, ल, शु, बु.
सोमवासरे दिवा बिन्दवः	सोमवासरे रात्रौ बिन्दवः
स्वे, मै, च, सा, वै, ज, ल, रा, व, वि, न, य, सा, भा, का, स, स, र, र, त, त, स, स, र, र, त, त, स, स, र, श, चं, श, गु, कु, ल, शु, बु, चं, तं, गु, कु, ल.	श्वे, मै, च, सा वै, ज, ल, रा, व, वि, न, य, सो, भा, का, र, त, त, स, स, र, र, त, त, स, स, र, र, त, त, शु, बु, च, श, गु, कु, ल, शु, बु, चं, श, गु.
भौमवारे दिवा बिन्दवः	भौमवारे रात्रौ बिन्दवः
य, सा, वै, ज, ल, रा, व, वि, न, य, सो, भा, का, श्वे, मै, र, र, त, त, स, स, र, र, त, त, स, स, र, र, त, कु, ल, शु, बु, चं, श, गु, कु, ल, शु, बु, चं.	च, सा. व्य, ज, ल. रा, व, वि, न, य, सो, भा, का, श्वे, मै, त, स, स, र, र, त, त, स, स, र, र, त, त, स, स, श, गु, कु, ल, शु, बु, चं, श, गु, कु, ल, शु.
बुधवारे दिवा बिन्दवः	बुधवारे रात्रौ बिन्दवः
वै, ज, ल, रा, व, दि, न, य, सो, भा, का, श्वे, मै, ज, सा, त, त, स, स, र, र, त, त, स, स, र, र, त, त, स, कु, चं, श, गु, कु, ल, शु, बु, चं, श, गु, कु.	मै, ज, ल, र, व, वि, न, य, सो, भा, रौ, श्वे, मै, ज, सा, स, र, र, त, त, स, स, र, र, त, त, स, स, र, र, ल, शु, बु, चं, म, गु, कु, ल, शु, बु चं, त.
गुरुवारे दिवा बिन्दवः	गुरुवारे रात्रौ बिन्दवः
रा, व, वि. न, य, सो, भा, का, श्वे, मै, ज, सा, वै, ज, ल, स, स, र, र. त, त, स, स, र, र, त, त, स, स, त, गु. कु. ल, शु. बु, चं, श, ज, कु, ल, शु, बु.	रा. ब. वि, न, य, यो, भा, का, स्वे, द्वे, मै, च, सा, वै, ज, ल, र, त, त, स, स, र, र, त, त, स, स, र, र, त, त, च, ल, गु, कु, ल, शु, बु, चं, श, गु, कु, ल.
भार्गववासरे दिवा बिन्दवः	भार्गववासरे रात्रौ बिन्दवः
वि, न, य, यो, वा, का, रे, मै, च, सा, वै, ज, ल, रा, व, र, र, त, त, स, स, र, र, त, त, स, स, र, र, त, शु, बु, चं, श, गु, कु, ल, शु, बु, च, श, गु.	वि, न, य, सो, भा, रा, श्वे, मै, च, सा, वै, ज, ल, रा, ब, र, स, स, र, र, त, त, स, स, र, र, त त, स, स, कु, हि, शु, बु, चं, श, ज, कु, ल, शु, बु, चं.

मन्दवासरे दिवा बिन्दवः य, सा, भ, का, श्वे, मै, च, सा, वै, ज, ल, रा, व, वि, नं, त, त स, स, र, र, त, त, स, स, र, र, त, त, स, श, कु, गु, कु, ल, शु, बु, चं, श, गु, कु, ल, शु.	**मन्दवासरें रात्रौ बिन्दवः** य, सो, भा, सौ, श्वे, मै, च, सा, वै, ज, ल, रा, ब, वि, तं स, र, र, त, त, स, स, र, र, त, त, स, स, र, र, बु, चं, श, गु, कु, ल, शु, बु, चं, श, गु, कु.

ज्येष्ठाषाढयोः.

रविवारे दिवा बिन्दवः का, श्र, मै, ज, सा, वै, ज, ल, रा, व, वि, न, य, सो, भा, त, त, स, स, र, र, त, त, स, स, र, र, त, त, स, ल, शु, बु, चं, श, गु, कु, ल, शु, बू, च, श.	**रविवारे रात्रौ बिन्दवः** का, श्वे, मै, च, सा, वै, ज, ल, रा, व, वि, न, य, सो, भा, सं, र, र, त, त, स, स, र, र, त, त, स, स, गु, कु, ल, शु, बु, चं, श, गु, कु, ल, शु, बु.
सोमवारे दिवा बिन्दवः श्वे, मै, च, सो, वै, ज, ल, रा, व, वि, न, य, सो, भा, का, स, स, र, र, त, त, स, स, र, र, त, त, स, स, र, चं, लं, गु, कु, आ, शु, बु, चं, श, गु, कु, आ.	**सोमवारे रात्रौ बिन्दवः** श्वे, मै, च, सा, वै, ज, ल, रा, ब, वि, न, य, सो, भा, का, र, त, त, स, स, र, र, त, त, स, स, र, र, त, त, अ, शु, बु, चं, अ, गु, कु, आ, शु, बु चं, श, गु, कु.
कुजवारे दिवा बिन्दवः च, सा, वै, ज, ल, रा, व, वि, न, य, सो, भा, का, श्वे, मै, र, र, त, त, स, स, र, र, त, त, स, स, र, र, स, त, कु, आ, शु, बु, चं, श, गु, कु, आ, शु बु, चं.	**कुजवारे रात्रौ बिन्दवः** च, स, वै, ज, अ, का, बु, वि, नं, य, सो, भा का, श्व, मै, त, स, स, र, र, त, त, स, स, र, र, त, त, स, स, र, र, श, कु, गु, आ शु, ग्र, चं, श, गु, कु, लं, शु.
बुधवारे दिवा बिन्दवः वै, ज, ल, रा, व, वि, न, य, सो, भा, का, श्वे, मै, च, सा, त, त, स, स, र, र, त, त, स, स, र, र, त, त, स, बु, चं, श, गु, कु, अ, शु, बु, श, गु, कु.	**बुधवारे रात्रौ बिन्दवः** वै, ज, ल, रा, व, वि, न, य, सो, भा, का, श्वे, मै, च, सा, स, र, र, त, त, स, स, र, र, त, त, स, स, र, र, ल, शु, बु, चं, श, गु, कु, आ शु, बु, चं, श.
गुरुवासरे दिवा बिन्दवः रा, च, वि, न, य, सो, भा, का, श्वे, मै, च, सा, वै, ज, ल, स, स, र, र, त, त, स, स, र, र, त, त, स, स, र, गु, कु, आ, शु, बु, चं, श, गु, कु, ल, शु, चं.	**गुरुवासरे रात्रौ बिन्दवः** रा, व, वि, न, य, सो, भा, का, श्व, मै, च, सा, वै, ज, ल, र, त, त, स, स, र, र, त, त, स, स, र, र, त, त, चं, श, गु, कु, आ, शु, ज, चं, श, गु, कु, आ.
भार्गववारे दिवा बिन्दवः वि, न, य, सो, भा, का, स्वे, मै, च, सा, ज, ल, रा, ब, र, र, त, त, स, स, र, र, त, त, स, स, र, र, त, शु, बु, चं श, गु, कु, आ, शु, बु, चं, श, गु, कु.	**भार्गववासरे रात्रौ बिन्दवः** वि, न, य, मो, भा, का, स्वे, मै, च, सा, वै, ज, ल, रा, ब, त, स, स, र, र, त, त, स, स, र, र, त, त, स, स, कु, आ, शु, बु, चं, श, गु, कु, अ शु, कु, चं.

स्थिरवासरे दिवा बिन्दवः	स्थिरवासरे रात्रौ बिन्दवः
य, सो, भा, का, श्वे, मै, र, सा, वै, ज, ल, रा, ब, वि, नं, त, त, स, स, र, र, त, त, स, स, र, र, त, त, स, श, गु, कु, आ, शु, बु, त, गु, कु, अ, शु.	य, सो, भा, का, श्वे, मै, च, सा, वै, ज, य, रा, वि, नं, स, र, र, त, त, स, स, र, र, त, त, स, स, र, र, बु चं, श, गु, कु, आ, शु, बु, चं श, गु, कु.



एवं ज्ञात्वा मुहूर्तानां बलं गच्छेद्विचक्षणः ।
इदानीं भूबलं वक्ष्ये विजयो येन लक्ष्यते ॥ ७३ ॥

चतुरश्रं लिखेच्चक्रं तन्मध्ये चाष्टकोणकम् ।
आरभ्य पूर्वदिग्भागे रेखामावर्तयेत् सुधीः ॥ ७४ ॥

पूर्वादारभ्य वायव्यं वायव्याद्याम्यमानयेत् ।
याम्यादीशान्यदिग्भाग मैशानात्पश्चिमं नयेत् ॥ ७५ ॥

पश्चिमात्कोणमाग्नेयमाग्नेयादुत्तरं नयेत् ।
उत्तरान्नैरृतं कोणं नैरृतादैन्द्रमानयेत् ॥ ७६ ॥

एवमष्टाश्रकं चक्रं जायते सन्निवेशतः ।
तत्र चैत्रादिमासानां विन्यासो दिक्षु वक्ष्यते ॥ ७७ ॥

चैत्रमासार्धवैशाखं पूर्वभागे न्यसेत्सदा ।
1) सार्धं वैशाखमासस्य ज्येष्ठं वायव्यतः क्षिपेत् ॥ ७८ ॥

1) अर्धं.

आषाढः श्रावणस्यार्धं याम्यभागे प्रकल्पयेत् ।
श्रावणस्यार्धमैशान्याः नभस्यं च [2] तथा लिखेत् ॥ ७९ ॥

आश्विनं कार्त्तिकस्यार्धं वारुण्यां दिशि विन्यसेत् ।
कार्त्तिकार्धं मार्गशीर्षं हुताशनदिशि क्षिपेत् ॥ ८० ॥

पैषमर्धं च माघस्य कौवेर्यां ककुभि क्षिपेत् ।
माघस्यार्धं फाल्गुनं च नैॠत्यां दिशि कल्पयेत् ॥ ८१ ॥

यस्यां दिशि स्थितो मासस्सार्धस्तत्रोदयो भवेत् ।
तावत्कालं भुवस्सोऽपि तावन्नाडी चतुष्टयम् ॥ ८२ ॥

[1] याम्यार्धं तु बलं भूमेः क्रमाद्दिक्षु व्यवस्थितम् ।
रेखाविन्यासमार्गेण क्रमाद्भवति मेदिनी ॥ ८३ ॥

उदयादस्तपयन्तमस्तादप्युदयावधि ।
चतुर्यामेषु मेदिन्या दिक्षु भ्रमणमष्टषु ॥ ८४ ॥

भूबलं पृष्ठतः कार्यं दक्षिणे वा जिगीषुणा ।
एवं कृतानि कार्याणि सिद्धिं यान्ति न संशयः ॥ ८५ ॥

अस्यैव चक्रराजस्य कोणानाश्रित्य विन्यसेत् ।
अष्टौ वर्गान् रकारादीन् प्रादक्षिण्येन पूर्वतः ॥ ८६ ॥

अवर्गे गरुडः प्रोक्तः कवर्गे पृषदंशकः ।
चवर्गे मृगराजः स्याट्टवर्गे सरमासुतः ॥ ८७ ॥

तवर्गे पन्नगः प्रोक्तः पवर्गे मूषकस्तथा ।
यवर्गे तु गजः प्रोक्तश्शवर्गे शश इष्यते ॥ ८८ ॥

[1] यामर्धं.

पूर्वान्नैॠतपर्यन्तं भक्षकास्समुपस्थिताः ।
पश्चिमाद्रौद्रदिग्भागो यावद्भक्ष्या व्यवस्थिताः ॥ ८९ ॥

भक्षकात्पञ्चमस्थाने स्थितो भवति भक्ष्यकः ।
तस्माद्विचार्य यत्नेन स्वशत्रुं पञ्चतां नयेत् ॥ ९० ॥

भक्ष्यस्थाने स्थिते शत्रौ भक्षकस्थानमाश्रयेत् ।
ब्रह्माणी पूर्वदिग्भागे प्रतिपन्नवमी तिथौ ॥ ९१ ॥

द्वितीयायां दशम्यां च वैष्णवी नैॠतिं श्रिता ।
पञ्चम्यां च त्रयोदश्यां वाराही दक्षिणे स्थिता ॥ ९३ ॥

चतुर्दश्यां तथा षष्ठ्यामिन्द्राणी पश्चिमोदया ।
सप्तम्यां पौर्णमास्यां च वायव्ये चण्डिका स्थिता ॥ ९४ ॥

अमावास्याष्टमीतिथ्योर्महालक्ष्मीस्तथेशगा ।
दक्षिणे पृष्ठतः कार्या योगिन्यो विजिगीषुणा ॥ ९६ ॥

योगिनीनां बलं चैव सर्वेषामुत्तमोत्तमम् ।
एवं [1] सर्वमुहूर्तानां बलं भूमेस्तथैवच ॥ ९४ ॥

बलं वर्गस्य योगिन्या ज्ञात्वा गच्छन् जयी भवेत् ।

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले
स्वरमुहूर्तभूमिवर्गयोगिनीबलवर्णनं नाम त्रयोदशस्तरंगः

[1] एवं स्वरमुहूर्तानां.

अथ चतुर्दशस्तरंगः

स्वरादीनां बलं ज्ञात्वा यात्रां कुर्यादितीरितम् ।
कथं यात्रा विधातव्या शत्रूणां विजये नृपैः ॥ १ ॥
एतन्मह्यं समाख्याहि श्रोतुं कौतुकितं मनः ।
कुमार! ते प्रवक्ष्यामि यच्छ्रोतुमभिकांक्षसे ॥ २ ॥
युद्धपूर्वदिने राजा कृतोत्साहस्सभागतः ।
कुमारान्मण्डलाधीशां त्सामन्तान्मान्यकानपि ॥ ३ ॥
सुवर्णवस्त्राभरणैस्तेषां ये सैनिकाः स्थिताः ।
वाग्भिः प्रोत्साहयेत्तांश्च गुणकीर्त्तनमाननैः ॥ ४ ॥
तेषां प्रतिज्ञां संश्रुत्य सुभटानां नृपोत्तमः ।
मातंगान्मद संयुक्तान् वाजिनश्च जवाधिकान् ॥ ५ ॥
दद्याद्यथार्हं सर्वेषां संग्रामजयकांक्षया ।
ततो विसर्जयेत् सर्वान् युद्धाय कृतनिश्चयः ॥ ६ ॥
तस्यां रात्रौ बलारावैः पूरयेद्गगनांगणम् ।
महातूर्यप्रघोषैश्च शंखकाहलनिस्वनैः ॥ ७ ॥
सिंहनादैर्भटानां च त्रासयेद्रिपुसैनिकान् ।
अधिवास्य ततो राजा शस्त्राणि कुलदेवताः ॥ ८ ॥
ततः शयीत मेदिन्यां कुशानास्तीर्य यत्नतः ।
ततः प्रातः समुत्थाय निरीक्ष्य घृतदर्पणम् ॥ ९ ॥
स्नात्वा तीर्थजलैः पुण्यैः श्वेताम्बरविभूषितः ।
समाराध्य जगन्नाथमभीप्सितफलप्रदम् ॥ १० ॥
धेनुं भूमिं हिरण्यं च विप्रेभ्यो विधिनाऽर्पयेत् ।
तदाशिषस्समादाय नीराजितजयद्विपः ॥ ११ ॥
दक्षिणाग्रखुरोल्लेखैर्हयानां हेषितैरपि ।
वामेतरविषाणाग्रवेष्टनेन करस्य च ॥ १२ ॥
बृंहितेन गजानां च जानीयाज्जयमञ्जसा ।
नराणां शुभवाक्यैश्च मंगलद्रव्यदर्शनैः ॥ १३ ॥
प्रदक्षिणगतैश्चापि भरद्वाजशिखण्डिनाम् ।
अन्यैश्चशकुनैर्भद्रैः जयमंगलसूचकैः ॥ १४ ॥
दक्षिणाक्षिपरिस्पन्दं स्पन्दं दक्षभुजस्य च ।
मनसश्च प्रसादेन स्वानुकूलानलेन च ॥ १५ ॥
एवं निमित्तैर्निश्चित्य जयं समरदुर्जयः ।
शुभस्थानस्थितैस्सर्वैः ग्रहैस्ताराभिरेवच ॥ १६ ॥

उदितेन स्वरेणाथ जयभूमिबलेन च ।
निमित्तैर्विजयोत्साही निर्गत्य निजमन्दिरात् ॥ १७ ॥
ताडयित्वा महाभेरीं प्रतिसैनिकभीषिणा ।
धनुषां द्वे शते गत्वा तत्र स्थित्वा नृपोत्तमः ॥ १८ ॥
मेलयित्वा ततः सर्वमेवमाभाषयेत्ततः ।
दास्यामि तस्मै प्रयुतं राजानं हन्ति यो रणे ॥ १९ ॥
तत्कुमारप्रहन्तॄणां दास्यामि नियुतं तथा ।
सामन्तमण्डलाधीशहन्तॄणामयुतं तथा ॥ २० ॥
प्रधानामात्यहन्तॄणामयुतं पारितोषिकम् ।
प्रधानयोधहन्तॄणां दास्ये पञ्चसहस्रकम् ॥ २१ ॥
द्विसहस्रं प्रदास्यामि गजव्यूहविघातिनाम् ।
सहस्रं प्रतिदास्यामि स्यन्दनौघविघातिनाम् ॥ २२ ॥
अश्वसादिनिहन्तॄणां प्रदास्ये शतपञ्चकम् ।
शतं तस्मै प्रदास्यामि समानयति यश्शिरः ॥ २३ ॥
एवं प्रलोभ्य तान् सर्वान् प्रयायाद्युद्धसंमुखः ।
सुभटान् बलसंयुक्तान् हयविद्याविशारदान् ॥ २४ ॥
वरवाजिसमारूढान् भूपरीक्षाविचक्षणान् ।
अल्पवृक्षाचलाच्छिद्रा लंघनीयदरी स्थिरा ॥ २५ ॥
विशर्करा विपंका भूरश्वव्यूहाय शस्यते ।
निस्स्थाणुनिष्कुटापंका निर्वल्मीकोपला समा ॥ २६ ॥
केदारव्रततिश्वभ्रवृक्षगुल्मविवर्जिता ।
स्थिरा समतला धात्री रथव्यूहे प्रशस्यते ॥ २७ ॥
विपंका वीतशंका भूर्गजव्यूहे प्रशस्यते ।
सर्वदोषोज्झिता भूमिस्सरिद्वारिसमान्विता ॥ २८ ॥
विशाला गुणभूयिष्ठा चतुरंगबलोचिता ।
एवं परीक्ष्य भूभागं यस्मिन् यत्र यथोचितम् ॥ २९ ॥
यत्र संचारयेत्सैन्यं नृपो युद्धविशारदः ।
अरिर्मित्रमरेर्मित्रं मित्रामित्रमतः परम् ॥ ३० ॥
तथारिमित्रमित्रं च विजिगीषोः पुरस्सरः ।
पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरम ॥ ३१ ॥
आसारावनयोश्चापि विजिगीषोस्तु पृष्ठतः ।
अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः ॥ ३२ ॥

अनुग्रहे संहतयोर्व्यस्तयोश्च वधे प्रभुः ।
मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः ॥ ३३ ॥
अनन्तरमरिं विद्यादरिसंश्लिनमेवच ।
अरेरनन्तरं मित्रमुदासीनं तयोः परम् ॥ ३४ ॥
एवं तेषां क्रमं ज्ञात्वा तत्तद्भागे प्रचारयेत् ।
सर्वलक्षणसम्पन्नं समस्तरिपुमर्दनम् ॥ ३५ ॥
रचयेदुत्तमं व्यूहं परव्यूहविभेदकम् ।
मुखे गजो रथाः पृष्ठे तत्पृष्ठे च पदातयः ॥ ३६ ॥
पार्श्वयोश्च हयाः कार्या व्यूहस्यायं विधिःस्मृतः ।
अर्धचन्द्रं च चक्रं च शकटं मकरं तथा ॥ ३७ ॥
कमलं श्रेणिकां गुल्मं व्यूहानेवं प्रकल्पयेत् ।
क्षत्रं सारभृतं शूरं शस्त्रज्ञमनुरागि च ॥ ३८ ॥
अपि स्वल्पं श्रियै सैन्यं वृथेयं मुण्डमण्डली ।
अपि पञ्चशतं शूरा मृद्नन्ति महतीं चमूम् ॥ ३९ ॥
अथवा पञ्च षट् सप्त विजयन्ते निवर्तिनः ।
परस्परानुरक्ता ये योधाश्शरधनुर्धराः ॥ ४० ॥
आवर्णपलिता योधास्संग्रामे जयशालिनः ।
एकः कापुरुषोदीर्णो दारयेन्महतीं चमूम् ॥ ४१ ॥
भोगप्राप्तिश्च विजये स्वर्गप्राप्तिर्मृतावपि ।
निष्कृतिः स्वामिपिण्डस्य नास्ति युद्धसमा गतिः ॥ ४२ ॥
शूराणां रक्तमायाति तेन पापं त्यजन्ति ते ।
घातादिदुःखसहनं रणे तु परमं तपः ॥ ४३ ॥
परस्परसहस्राणि यान्ति हत्वा रणे मृतिम् ।
स्वामी सुकृतमादत्ते भग्नानां विनिवर्तनात् ॥ ४४ ॥
ब्रह्महत्याफलं तेषां तथा प्रोक्तं पदे पदे ।
अश्वमेधफलं प्रोक्तं शूराणामनिवर्त्तिनाम् ॥ ४५ ॥
गजाद्याश्च न हन्तव्या न हन्तव्याः पलायिनः ।
न प्रेक्षकाः प्रविष्टाश्च विशस्त्राः पतितादयः ॥ ४६ ॥
एकेभैकरथा त्र्यश्वा पत्तिपञ्च पदातिगा ।
पत्त्यंगैस्त्रिगुणैस्सर्वैः क्रमादाख्या यथोत्तरम् ॥ ४७ ॥
सेनामुखं गुल्मगणा वाहिनी पृतना चमूः ।
अनीकिनी दशानीकिन्युक्ताक्षौहिणिका ततः ॥ ४८ ॥
महाक्षौहिणिका चान्या तत्संख्याथ प्रकीर्त्यते ।
दशभिस्तु (10) भवेत्पत्तिस्त्रिंशत् (30) सेनामुखं तथा ॥ ४९ ॥
गुल्मस्तु(90)न वतिस्सप्तत्यधिकं द्विशतं (270) गणः ।
दशोत्तराष्टशतकं वाहिनी परिकीर्त्तिता (810) ॥ ५० ॥

व्योमाग्निपदनेत्रैस्तु पृतना परिकीर्त्तिता । (2430)
आकाशनिधिनेत्राद्रिसंख्यया कथिता चमूः (7290) ॥ ५१ ॥
व्योमाद्रिवसुभूनेत्रैः कथितानीकिनी बुधैः (21870) ।
खद्वयं स्वरवस्विन्दुनेत्रैरक्षौहिणी मता (218700) ॥ ५२ ॥
अक्षौहिण्यां प्रदिष्टानां रथानां करिणामपि ।
संख्यागणिततत्त्वज्ञाः सहस्राण्येकविंशतिः ॥ ५३ ॥
उपर्यष्टौ शतान्याहुस्तथा भूयश्च सप्ततिः ।
ज्ञेयं लक्षं पदातीनां सहस्राणि तथा नव ॥ ५४ ॥
शतानि त्रीणि पञ्चाशच्छूराणां शस्त्रधारिणाम् ।
पञ्चषष्टिसहस्राणि तथाश्वानां शतानि च ॥ ५५ ॥
दशोत्तराणि षट्प्राहुस्संख्यातत्त्वविदो जनाः ।*
खद्वयं निधिवेदाक्षिचन्द्राक्ष्यग्निहिमांशुभिः ॥ ५६ ॥
महाक्षौहिणिका प्रोक्ता गणितज्ञैस्सुधीवरैः । (132124900)
†महाक्षौहिणिकायां तु रथाः कोटिमिताः स्मृताः ॥ ५७ ॥
सप्तत्रिंशच्चलक्षाणि गीयन्ते तत्त्ववेदिभिः ।
द्वादशैव सहस्राणि चत्वार्येव शतानि च ॥ ५८ ॥
प्रोक्ता च नवतिस्तद्वदेवमेव मता रथाः ।
अश्वाश्चतुष्कोटिमिता लक्षाण्येकादशैवतु ॥ ६० ॥
सप्तत्रिंशत्सहस्राणि तथा शतचतुष्टयम् ।
पञ्चाशदिति संख्याता महाक्षौहिणिकास्थिताः ॥ ६१ ॥
षट्कोटयस्त्र्यशीतिश्च लक्षाणिच ततः परम् ।
द्विषष्टिश्च सहस्राणि चत्वारि च शतान्यतः ॥ ६२ ॥
पञ्चाशदिति संख्याता गणितज्ञैः पदातयः ।
संभावितेन सैन्येन रचयेद् व्यूहमुत्तमम् ॥ ६३ ॥
मुखं पूर्वविभागः स्यादुरश्च तदनन्तरम् ।
उरसः पश्चिमे भागे पौरस्त्यं परिकीर्त्तितम् ॥ ६४ ॥
पौरस्त्यस्य तथा पृष्ठे प्रतिगूह इति स्मृतः ।
यक्षौ प्रकक्षौ कक्षौ च प्रकक्षौ पार्श्वयोः क्रमात् ॥ ६५ ॥
प्रतिगूहात् परोभागः पृष्ठमित्यभिधीयते ।
एवं व्यूहविभागं च विज्ञाय नृपसत्तमः ॥ ६६ ॥
मुखे मुखसदं नागं शूरारूढं सुशिक्षितम् ।
तनुत्राणसमायुक्तं योधद्वयसमन्वितम् ॥ ६७ ॥

---

* रथाः 21870; गजाः 21870; अश्वाः 65610; पदातयः 109350;

† रथाः 13712490; गजाः 13712490; अश्वाः 41137450; पदातयः 68362450;

त्रिशतैष्षट् छतैर्वापि नवभिर्वा तथा शतैः ।
प्रकक्षदेशे निक्षिप्तैश्चण्डकोदण्डसंयुतैः ॥ ६८ ॥

पृष्ठे च कक्षभागे च रक्षितं खड्गपाणिभिः ।
त्रिधा विभक्तैस्सुभटैः स्थानत्रयसुसंस्थितैः ॥ ६९ ॥

सुभटैश्शतसंख्याकैस्तदर्धैर्वा समायुतम् ।
प्रकक्षे जवसंयुक्तैर्गात्रत्राणसुरक्षितैः ॥ ७० ॥

अश्वैस्सर्वायुधोपेतवाहकैश्च समन्वितैः ।
शतपञ्चकसंघातप्रकक्षद्वयकल्पितैः ॥ ७१ ॥

परितः पत्तिभिश्शूरैरावृतं चतुरो न्यसेत् ।
दारुणं शत्रुसैन्यानां वारणं वैरिवारणम् ॥ ७२ ॥

एवं विधबलोपेतं व्यूहस्याग्रे नियोजयेत् ।
द्विमुखं त्रिमुखं तद्वदेकवक्त्रमथापि वा ॥ ७३ ॥

परव्यूहस्य भेदार्थं कुर्याद् व्यूहमुखं नृपः ।
उरस्स्थाने महीपालः श्रेणमाटविकं बलम् ॥ ७४ ॥

अमित्रजं तथा फल्गु युद्धभूमौ नियोजयेत् ।
प्रोरस्त्ये युद्धभाण्डानि शस्त्राणि विविधानि च ॥ ७५ ॥

वारि भूरि नयेदुष्ट्रैस्तृषार्तानां सुतृप्तये ।
प्रतिगूह्यप्रदेशेतु स्वयं तिष्ठेन्महीपतिः ॥ ७६ ॥

भद्रलक्षणसम्पन्नमैरावतकुलोद्भवम् ।
विष्णंवशकं शुभानूकं कालिंगवनसंभवम् ॥ ७७ ॥

भूघ्नच्छिखरसंकाशं शिक्षितं च [1] महामृधे ।
मदावस्थां चतुर्थी च सम्प्राप्तं गिरिसन्निभम् ॥ ७८ ॥

शूरं महाबलं वीरं धीरमन्वर्थवेदिनम् ।
सुवर्णघण्टिकोदारकक्षपक्षसमन्वितम् ॥ ७९ ॥

वक्त्रत्राणसमोपेतं पिञ्छगुच्छसमन्वितम् ।
नानावर्णविचित्रांगं परिकापरिशोभितम् ॥ ८० ॥

[2] डोल्किान्तः स्थितैर्योधैर्मध्ये कुन्तधरैर्वृतम् ।
पश्चाच्च सादिना युक्तं शक्तितोमरपाणिना ॥ ८१ ॥

आरूढमतिशूरेण खेटकद्वयधारिणा ।
ईदृग्गुणयुतं नागमारोहेद्विजयोद्यतः ॥ ८२ ॥

विख्यातनामभिर्मौलैः खड्गिका चर्म[3] धारिभिः ।
अंगरक्षान्वितैश्शूरैर्वृतस्सन्नंगरक्षकैः ॥ ८३ ॥

कक्षस्थैर्देशसंवासैस्तदर्धैर्वा सुरक्षितैः ।
प्रकक्षे सचिवामात्यकुमारैभटान्वितैः ॥ ८४ ॥

मित्रभृत्यबलैः कक्षे चापसायकधारिभिः ।
अनायुधधरैर्वीरैरश्वारूढैस्सुशिक्षितैः ॥ ८५ ॥

धेनुकाध्यासिताशेषकोशोनाधिष्ठिते स्थिरम् ।
तेषां तु पृष्ठरक्षार्थं नरवाजिबलं न्यसेत् ॥ ८६ ॥

ईदृशीं व्यूहरचनां विधाय परवीरहा ।
व्रजेदब्धिरिव क्षुब्धो जिगीषुः परवाहिनीम् ॥ ८७ ॥

शूराणां सिंहनादैश्च वाजिनां हेषितस्वनैः ।
भेरीप्रहारपातैश्च काहलाशंखनिस्स्वनैः ॥ ८८ ॥

युद्धाशंसिमहातूर्यनिनादैः स्फोटयन् दिशः ।
यतः फल्गु यतो भिन्नं यतो धृष्टै[1] रधिष्ठितम् ॥ ८९ ॥

तद्बलं प्रथमं हन्यादात्मनश्चोपबृंहयेत् ।
सारं द्विगुणसारेण फल्गु सारेण पीडयेत् ॥ ९० ॥

संहतं तु गजानीकैः प्रचण्डैरवदारयेत् ।
प्रचण्डैर्वीरमुख्यैश्च परसैन्यं विदारयेत् ॥ ९१ ॥

अश्वव्यूहैर्भटानीकं वाजिव्यूहांश्च दन्तिभिः ।
बाणासारैस्तथा कुन्तप्रासशक्त्यसितोमरैः ॥ ९२ ॥

अग्निज्वालाञ्चितैर्बाणैर्विभिन्द्यात् द्विपयूथपान् ।
प्रभूतं कुञ्जरानीकं घटासंघट्टनैर्हतम् ॥ ९३ ॥

पाटयेत् करटप्रान्तं ताडयेद्द्विपमूर्धनि ।
विसृश्य राजचिह्नानि निश्चित्य नृपतेः पदम् ॥ ९४ ॥

सर्वसैन्येन संयुक्त तत्र यायाज्जयोन्मुखः ।
नाराचैर्जर्जरीकृत्य कुन्तैर्निर्भिद्य निर्भरम् ॥ ९५ ॥

चक्राघातैर्द्विधाकृत्य पाशैराकृष्य पातयेत् ।
संचूर्ण्य मुद्गराघातैश्छित्वा परशुना भटान् ॥ ९६ ॥

अश्वारूढान् क्षुरेणाथ संयोज्य वरवारणम् ।
तमस्त्रं च गजोद्दामदन्ताघातैर्निपात्य च ॥ ९७ ॥

निस्त्रिंशेन रिपोः छिन्द्यात् कुण्डलालंकृतं शिरः ।
एवं निहत्य संग्रामे दुष्टशत्रुं मदोद्धतम् ॥ ९८ ॥

जयतूर्यनिनादेन हर्षयन् सुभटान् स्वकान् ।
कुमारामात्यसचिवान् सामन्तान् मण्डलेश्वरान् ॥ ९९ ॥

विनिहत्यागतानां च मानं दद्याद्यथोचितम् ।
द्विषतां रक्तपूरेण पूरयित्वा च मेदिनीम् ॥ १०० ॥

पिशितेन पिशाचादीन् क्रव्यादानान्त्रसंकुलात् ।
पलायनपरान् भीतान् रक्षयित्वा तु धर्मतः ॥ १०१ ॥

---

1) वधावधे. 2) ढेंकिकान्तःस्थितैः. 3) पाणिभिः.

1) रवीक्षितम्.

आरोहमुक्तान् स्वीकृत्य तुरगान् वरवारणान् ।
धेनुकाश्वोष्ट्रसंघातं निश्शेषं कोशमेव च ॥ १०२ ॥

परिगृह्य तथा सर्वप्रयत्नाद्वीक्ष्य सर्वतः ।
एवं तु युध्यते यत्र युद्धे शत्रुर्महाबलः ॥ १०३ ॥

नृपेण बलिना स स्याद्दण्डो युद्धवधाभिधः ।
एवं बहुविधोपायैर्विजित्य द्विषतो रणे ॥ १०४ ॥

विधूततिमिरोन्मेषो भास्वानिव सुखी भवेत् ।
एवं चोपादिशद्राजनीतिं रणजयावहाम् ॥ १०५ ॥

कियन्तं कालमनयत् पालयन् वसुधां ततः ।
ततः परं कतिपये दिने समतिवाहिते ॥ १०६ ॥

सङ्कण्णनायको ज्यायान् स्वनाम्ने [1] सहजन्मने ।
दत्तराज्यभरः सोऽयमदत्त शतमुन्मुखः ॥ १०७ ॥

भूयिष्ठानि शिवस्थानान्यालोक्य च समन्ततः
उपविष्टानि स द्रष्टुमिव कैलासमासदत् ॥ १०८ ॥

ततस्तदनुजन्मापि चिक्कसङ्कण्णनायकः ।
अशात्रवां वसुमतीमशेषामन्वपालयत् ॥ १०९ ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले
दण्डयुद्धोपायव्यूहरचनाक्रमवर्णनं नाम चतुर्दशस्तरंगः

1) स्वादुजन्मने.

अथ पञ्चदशस्तरंगः

ज्येष्ठसङ्कण्णभूपस्य प्रशस्तान्यद्भुतानि च ।
चरित्राणि समाकर्ण्य चित्तमालम्बते मुदम् ॥ १ ॥

ज्येष्ठाधिगतराज्येऽस्मिन् चिक्कसङ्कण्णनायके ।
कस्यासन्नपदानानि सिद्धानानि यशश्श्रियः? ॥ २ ॥

तानि मह्यं समाचक्ष्व गुरो! गुरुगुणालय! ।
कुमार! वर्णयाम्येतत् समाहितमनाः शृणु ॥ ३ ॥

ततः सम्प्राप्तराज्येऽस्मिन् चिक्कसङ्कण्णनायके ।
फलाभिवृध्या व्यरुचत् सर्वतः क्षितिमण्डलम् ॥ ४ ॥

ततः कतिपयेष्वेव गतवत्सु दिनेष्वपि ।
सिद्धप्पनायकस्तस्माज्जातः सङ्कण्णनायकात् ॥ ५ ॥

विद्याभिस्स बभौ चूतलताभिस्सुरभिर्यथा ।
एकदा स च सङ्कण्णनायकस्समुपागतम् ॥ ६ ॥

विजयाख्यपुरस्स्थायिम्लेच्छसाहाय्यकोद्धतम् ।
वायव्यदिगवस्थायिसामन्तं पर्यभूत्ततः ॥ ७ ॥

शत्रुपद्मवने दन्ती भूत्वा लक्ष्मीमपाहरत् ।
पुनः कियद्दिनादूर्ध्वं महत्या सेनया सह ॥ ८ ॥

योद्धुं मञ्जुलखानाख्ये म्लेच्छे च समुपागते ।
गजांस्तद्वाजिनश्चापि विजित्य तमपाहरत् ॥ ९ ॥

अनन्तरं गैरसवै वैरादेवीमुखान् नृपान् ।
महीपान् परिभूयान्ते तेभ्यो धनमपाहरत्[1] ॥ १० ॥

ततः परं वेङ्कटप्पनायकं ज्यायसं सुतम् ।
अभ्यषिंचन्निजे राज्ये यौवराज्येऽस्य चानुजम् ॥ ११ ॥

सङ्कण्णनायको रामराजनायकनायकम् ।
राज्यसप्ताङ्गविवृतिं तस्मै सम्यगुपादिशत् ॥ १२ ॥

तां तुभ्यं कथयाम्यर्हो कुमार! शृणु सादरम् ।
2) सामन्तवश्यता शक्तिर्दक्षत्वं 3) प्रियकारिता ॥ १३ ॥

उद्योगित्वमनिर्वेदः सर्वदा 4) धर्मशीलता ।
जनानुरागस्सौभाग्यं शस्त्रशास्त्रेषु नैपुणम् ॥ १४ ॥

दोषानुरूपदण्डश्च सर्वसत्वहितैषिता ।
प्रियवादः प्रसन्नत्वं भृत्यानां सुखकर्तृता ॥ १५ ॥

आर्जवं तत्त्वदर्शित्वमक्षुद्रपरिवारता ।
मङ्गलाचार इत्येतैर्गुणैर्युक्तो नृपो वरः ॥ १६ ॥

राजा कार्यवशादेव लोकपालत्वमृच्छति ।
अष्टानां लोकपालानामंशीभूतो महीपतिः ॥ १७ ॥

1) मुपाददौ. 2) वश्यसामन्तता. 3) क्षिप्रकारिता. 4) धर्मकारिता.

महैश्वर्ये महाभाग्ये शत्रूणां च पराजये ।
महाश्रियां महाराज्ये महेन्द्रत्वेन राजते ॥ १८ ॥
राजा चाधर्मवृत्तेषु दहत्यग्निवदुल्बणः ।
यमवद्दण्डयत्येतानपराधानुरूपतः ॥ १९ ॥
धनं हरति रक्षोवदसाधूनां महीपतिः ।
न्यायवृत्तेषु धाराद्रः प्रसीदति जलेशवत् ॥ २० ॥
वायुवद् ध्वंसनेऽरीणां बलवान् भवतीश्वरः ।
कोशसंवर्धने सोमो भवतीतस्ततो नृपः ॥ २१ ॥
सर्वज्ञत्वे प्रहृष्टत्वे शूली भवति भूपतिः ।
धृष्णुत्वे भूपतिर्ब्रह्मा कामसृष्टौ सदा नृषु ॥ २२ ॥
बुध्या स व्यापनाद्विष्णुः क्षमया च वसुन्धरा ।
स्थैर्ये महीधरो वीर्ये त्रिपुरारिर्महीपतिः ॥ २३ ॥
बार्हस्पत्यं चौशनं च नीती वहति वै पुरः ।
गाम्भीर्ये सागरत्वं च समत्वे व्योमरूपताम् ॥ २४ ॥
कालाग्नित्वं महाक्रोधे रुद्रत्वं लोकसंहृतौ ।
एवं सप्तमरुत्वं च काले काले दधाति सः ॥ २५ ॥
सर्वदेवमयो राजा तस्माद्भवति निश्चितम् ।
यस्य [1]) संदर्शनादेव तुष्यन्तीह सुसाधवः ॥ २६ ॥
चरन्तीह सुखं राज्ञा स्वपन्ति विगतज्वराः ।
एवंविधं महात्मानं कोऽवमन्येत बुद्धिमान् ॥ २७ ॥
अवमत्य क्षणादेव विनश्यति सहान्वयः ।
विभूतिं च तथा कीर्तिं धर्मं च विजयं सुखम् ॥ २८ ॥
य इच्छेत्सततं राजा गुणानेतान् विधारयेत् ।
महिषी च कुमारश्च द्रविणं खड्गमन्त्रिणौ ॥ २९ ॥
अश्वाश्चैव गजाश्चेति राज्ञस्सप्ताङ्गमीरितम् ।
राज्ञाग्र्या महिषी कार्या सर्वलक्षणसंयुता ॥ ३० ॥
विनीता गुरुसक्ता च [2]) क्रोधासूयाविवर्जिता ।
[3]) भृत्याश्रितगुणज्ञा च भृत्यानामन्ववेक्षणे ॥ ३१ ॥
रागद्वेषवियुक्ता च सपत्नीषु सदैव या ।
भोजनासनपानेन सर्वासामन्वयेक्षिणी ॥ ३२ ॥
सपत्नीनां च पुत्रेषु [4]) पुत्रवद्वत्सलातु या ।
मन्त्रिसांवत्सरामात्यान् या सम्भावयते सदा ॥ ३३ ॥
ब्राह्मणेषु दयायुक्ता कार्यज्ञा च विशेषतः ।
एवंविधगुणोपेता चारु तेषां प्रियंवदा ॥ ३४ ॥

1) यस्यदर्शनमत्रेण तुष्यन्ति भुवि साधवः,
2) ईर्ष्यासूयाविवर्जिता. 3) भृत्याभृत्यगुणज्ञा. 4) पुत्रवद्वर्तितेसदा.

अभिषिच्या भवेद्राज्ञा परां प्रीतिकारिणा ।
एकेनापि सुपुत्रेण जायमानेन सत्कुलम् ॥ ३५ ॥
शशांकेनेव गगनमेकेनैवोज्ज्वलीकृतम् ।
तस्मात्सर्वप्रयत्नेन गुणिनं कारयेत्सुतम् ॥ ३६ ॥
पात्रं न तापयति यो न मलं प्रसूते ।
स्नेहं न भक्षयति नैव दशां क्षिणोति
दोषावसानसमये चलतां न धत्ते ।
सत्पुत्रकस्सुकृतपद्मविकासिदीपः ॥ ३७ ॥
पञ्च भेदास्सुवर्णस्य तान् प्रवक्ष्ये सुरेश्वरि !
प्राकृतं सहजं वह्निसंभूतं खनिसंभवम् ॥ ३८ ॥
रसेन्द्रवेधसंजातमिवसिद्धान्तरासलम् ।
ब्रह्माण्डं संवृतं येन रजोगुणभवं खलु ॥ ३९ ॥
तत्प्राकृतमिति प्रोक्तं देवानामपि दुर्लभम् ।
ब्रह्म येनावृतो जातस्सुवर्णं सहजं हि तत् ॥ ४० ॥
विसृष्टमग्निना शैवं तेजः पीतं सुदुस्सहम् ।
अभूत् स्वर्णं तदुद्दिष्टं वर्णैष्षोडशभिर्युतम् ॥ ४१ ॥
धारणादेव तत्कुर्याच्छरीरमजरामरम् ।
तत्र तत्र निलीना वा जातं खनिषु यद्भवेत् ॥ ४२ ॥
तच्चतुर्दशवर्णाढ्यं भक्षितं सर्वदोषहृत् ।
रसेन्द्रवेधात् सञ्जातं तद्वेधजमुदाहृतम् ॥ ४३ ॥
रसायनमिदं श्रेष्ठं पवित्रं वेधजं हि तत् ॥ ४४ ॥
श्वेतं दिवर्णं मलिनं कठोरं कृष्णं च दाहे निकषे च पाण्डु ।
स्थूलाग्रकं निर्भरकं कठोरं स्फुटं सुवर्णं दशधा हि शस्तम् ॥ ४५ ॥
उत्ताने चाथ कुब्जे वा वले साचिगतेऽपि वा ।
संविष्टे चोपविष्टे वा खड्गा एव परायणम ॥ ४६ ॥
प्रतप्तजाम्बूनदरोचिकाभस्समांगुलः पङ्कजसौरभाढ्यः ।
नीलोत्पलाभो लघुमुष्टियुक्तः खड्गो जयश्रीविहतिं विधत्ते ॥ ४७ ॥
कुलीनाश्श्रुतसम्पन्नाः शुचयश्चानुरागिणः ।
शूरा धीरा विरोगाश्च नीतिशास्त्रविशारदाः ॥ ४८ ॥
प्रगल्भा वादिनः प्राज्ञा रागद्वेषविवर्जिताः ।
आये व्यये च निपुणाः स्वामिकार्यरतास्सदा ॥ ४९ ॥
कार्याकार्यविवेकज्ञा देवब्राह्मणपूजकाः ।
अमार्गे वर्तमानस्य नृपस्य प्रतिकूलगाः ॥ ५० ॥
बोधयन्तः प्रभुं वाक्यैर्मन्त्रिणो राष्ट्रवृद्धये ।
अन्वयादागतान् वृद्धानुपदाभिः परीक्षितान् ॥ ५१ ॥

सचिवान् सप्त वाष्टौवा कुर्वीतमतिमान्नृपः ।
स्वदेशवासिनः प्राज्ञा ऊहापोहपरायणाः ॥ ५२ ॥
देशकालविदो धीरास्साध्यासाध्यविवेकिनः ।
परेंगितज्ञा धीमन्तः स्वाकारस्य निगूहकाः ॥ ५३ ॥
एवंविधा महीभर्तुः सचिवाः कार्यसिद्धये ।
त्रय्यां च दण्डनीत्यां च शान्तिकर्मणि पौष्टिके ॥ ५४ ॥
आथर्वणे च कुशलः सम्यग्ग्रामपुरोहितः ।
अद्वेषी नित्यसंतोषी ब्राह्मणो गणितेक्षणः ॥ ५५ ॥
ग्रहचारविधानज्ञः सर्वे ज्यौतिषिकः स्मृतः ।
कुलजश्शीलवान् वीरश्चतुर्भाषाविशारदः ॥ ५६ ॥
व्यूहभेदविधानज्ञः सादितत्त्वविशेषवित् ।
दाता प्रियंवदो दान्तो मतिमान् दृढनिश्चयः ॥ ५७ ॥
राज्ञा सेनापतिः कार्यश्शूरो भृत्यविशेषवित् ।
स्मृतिशास्त्रार्थकुशला रागद्वेषविवर्जिताः ॥ ५८ ॥
व्ययेऽपि च विशेषज्ञो रक्षणे निपुणश्शुचिः ।
स्मार्तैस्सह समालोच्य यथार्हं दण्डपातिनम् । ॥ ५९ ॥
धर्माधर्मविचारज्ञं कुर्याद्दण्डधरं नृपः ।
लोहवस्त्राजिनादीनां वस्त्राणां च विशेषवित् ॥ ६० ॥
धर्माधिकारिणः कार्या विलोभा भयवर्जिताः ।
अनूचानस्सुसन्तुष्टश्शास्ता वहुकुटुम्बिकः ॥ ६१ ॥
सावधानो गणितविद्भाण्डागारे नियुज्यते ।
एकाद्या नवपर्यन्ता नवैवाङ्काः स्वरूपतः ॥ ६२ ॥
दशोत्तरक्रमेणैते वर्धन्ते विन्दुवृद्धितः ।
विन्दुरेको दशस्थाने शते विन्दुद्वयं भवेत् ॥ ६३ ॥
विन्दुत्रयं सहस्रे स्याद्युते तच्चतुष्टयम् ।
विन्दवः पञ्च लक्षे स्युः प्रयुते विन्दवश्च षट् ॥ ६४ ॥
विन्दवस्सप्त कोट्यां स्युर्दशकोटिस्तथाष्टभिः ।
शतकोट्यस्तु नवभिर्खुदं दशविन्दुभिः ॥ ६५ ॥
महाशंखे तु तेसैकाः क्षितौ विंशति विन्दवः ।
महाक्षितौ तु तेसैकाः क्षोभे द्वाविंशतिः स्मृताः ॥ ६६ ॥
एकाधिका विधातव्याः क्रमादेतेषु विन्दवः ।
एकाधिका महाक्षोभे ते चतुर्विंशतिर्निधौ ॥ ६७ ॥
महानिधौ सागरे च महासागरके तथा ।
हरौ महाहरौ संख्ये महासंख्ये पणा तथा ॥ ६८ ॥
महापणा क्रतौ तद्वन्महाक्रतुपरार्धयोः ।
एकाधिका विधातव्याः क्रमादेतेषु विन्दवः ॥ ६९ ॥

स्थानान्येकोन षट्त्रिंशद्गणितव्यवहारके ।
एकान्ते विन्दुरेकश्चेद्दशकं तत्प्रकीर्त्तितम् ॥ ७० ॥
द्वितीयांकपुरो विन्दौ संख्या विंशतिरिष्यते ।
एवं तृतीयाद्यंकेषु विन्दुः स्यात्पुरतो यदि ॥ ७१ ॥
त्रिंशदाद्यास्तदा संख्या नवत्यन्ताः प्रकीर्त्तिताः ।
शतादिके परार्धान्ते यावन्तो विन्दवस्तदा ॥ ७२ ॥
यस्य यस्य पुरोभागे तावत्संख्या तु सम्भवेत् ।
अंकान् कतिपयान् स्थाप्य गणनीयतया स्थितान् ॥ ७३ ॥
अधस्तात् प्रथमांकस्य गुणकल्पांकमालिखेत् ।
एकैकं गुणयेत्सर्वैरुपरिष्टमधस्तनैः ॥ ७४ ॥
लब्धं निवेत्रहेदत्र स्वांकस्योपरि लेखयेत् ।
एकादिगणने वाच्या वुधैरङ्कविपर्ययात् ॥ ७५ ॥
लब्धं तु दशकं स्थानं पूर्वेणांकेन योजयेत् ।
विभागकथनं तेषां सुसमं विन्यसेद् वुधः ॥ ७६ ॥
अधोंकं वृद्धये कृत्वा तर्कयेदङ्कमूर्ध्वगम् ।
विभागो येन जायेत तेन भागं प्रकल्पयेत् ॥ ७७ ॥
अनेन क्रमयोगेन भजनीयं विभाजयेत् ।
एकत्र स्थापयेल्लब्धमवशिष्टं तथान्यतः ॥ ७८ ॥
अवशिष्टं पुनर्भङ्त्वा यथाभागानुसारतः ।
लब्धेन मेलयेत्तत्तु भागहारोऽयमीदृशः ॥ ७९ ॥
प्रमाणं फलमिच्छेति राशित्रितयमुच्यते ।
इच्छया गणितं वस्तु प्रमाणेन विभाजयेत् ॥ ८० ॥
प्रमाणद्रव्यमाख्यातं फलं द्रविणमिष्यते ।
द्रव्यभागविभागार्थमिच्छामिच्छन्ति साधवः ॥ ८१ ॥
ततस्त्रैराशिकमिदं प्रोक्तं गणितकोविदैः ।
पञ्चराशिकमत्रैव सप्तराशिकमेवच ॥ ८२ ॥
नवराशिकमत्रैव क्षेपज्ञे हारके विधौ ।
सकलं गणितं प्रोक्तं संक्षेपेण प्रसङ्गतः ॥ ८३ ॥
ईदृशं गुणकारं च भागहारं च तत्त्वतः ।
त्रैराशिकविधानं च यो जानाति विनिश्चितम ॥ ८४ ॥
अलुब्धस्सावधानश्च रागद्वेषविवर्जितः ।
सराज्ञा गणकः कार्यः कोशे राष्ट्रे च धीमता ॥ ८५ ॥
सकृद्युक्तिगृहीतार्थो लघुहस्तोचिताक्षरः ।
मेधावी वाक्पटुः प्राज्ञो भवेच्चास्यलेखकः ॥ ८६ ॥
जलाग्निधूमादर्शेषु लिपीनां दृश्यताजुषम् ।
नानादेशलिपीनां च तद्भाषाणां च वेदकः ॥ ८७ ॥

स्वर्णादिदृतिभिर्भूयो लेखनक्रमशिक्षितः ।
उन्नतो रूपवान् दक्षः प्रियवाग्दर्पवर्जितः ॥ ८८ ॥
गृहीतचित्तस्सर्वेषां प्रतिहारस्स उच्यते ।
प्रगल्भो मतिमान् दक्षस्सर्वभाषाविशारदः ॥ ८९ ॥
बलाबलस्याभिज्ञः प्रियवाक् शुभदर्शनः ।
कृतवीर्यश्च शूरश्च सारथिः पार्थिवोचितः ॥ ९० ॥
असम्मेयश्शुचिर्दक्षः कृतान्नस्य परीक्षकः ।
सूपान्नस्य विशेषज्ञः सूदाध्यक्षो विधीयते ॥ ९१ ॥
कुलक्रमसमायातास्तुष्टेष्टाश्चानुरागिणः ।
कृत्तके 1) शद्विजनखाः परामेया नरोत्तमाः ॥ ९२ ॥
पानव्यञ्जनतत्वज्ञाः खण्डभेदप्रवेदिनः ।
क्षीरप्रकारबोद्धारः सूदाः कार्या महीभृता ॥ ९३ ॥
नराणां च गजानां च वाजिनां च गवामपि ।
मृगाणां च खगानां च ये जानन्ति चिकित्सितुम् ॥ ९४ ॥
परम्परागतास्सम्यगष्टांगेषु चिकित्सकाः ।
शस्त्रकर्मकलादक्षा मन्त्रयन्त्रेषु कोविदाः ॥ ९५ ॥
देहे च मस्तके फाले विशेषेण ग्रहेऽपि च ।
वृष्ये रसायने चैव कुशला भिषजोऽष्टसु ॥ ९६ ॥
रोगनाम निदानं च तथा चाङ्गरुजारुजम् ।
औषधं रूपनामाभ्यां जानन्तो भिषजो वराः ॥ ९७ ॥
समौ विरेचने नस्ये वस्ये शस्त्रक्रियास्वपि ।
शस्यन्ते भिषजस्सम्यगष्टोनाः पञ्चकर्मसु ॥ ९८ ॥
असाध्याः परकीयानामात्मस्वामिहितेरताः ।
धर्मज्ञा दृढचित्ताश्च वैद्याः कार्या महीभुजा ॥ ९९ ॥
विबुधा लोभहीनाश्च भावज्ञाश्च जितेन्द्रियाः ।
कार्या राज्ञा कुमाराणामध्यक्षास्सुपरीक्षिताः ॥ १०० ॥
कर्मस्वन्येषु सर्वेषु दक्षाश्च शुचयस्तथा ।
शूराश्च बुद्धिमन्तश्च शस्त्रशास्त्रार्थकोविदाः ॥ १०१ ॥
योगक्षेमसुखार्थाय दुष्टसंयमनाय च ।
प्राणतुल्यास्सदा धीरा निद्रालस्यविवर्जिताः ॥ १०२ ॥
अव्यग्रास्शुचयो दक्षाः कार्या राज्ञोऽङ्गरक्षकाः ।
काणाः कुब्जाश्च खञ्जाश्च तथा वृद्धाश्च पङ्गवः ॥ १०३ ॥
एते चान्तःपुरे नित्यं नियोक्तव्याः क्षमाभृता ।
धर्मशास्त्रार्थकुशलाः कुलीनास्सत्यवादिनः ॥ १०४ ॥
समाश्शत्रौ च मित्रे च नृपतेः स्युस्सभासदः ।
क्रमागतो हितमतिः सर्वभावपरीक्षकः ॥ १०५ ॥
धीरो यथोक्तवादी च दूत एवंविधो भवेत् ॥
सुगन्धिदानद्रवशीकरेषु दन्ताभिघातस्फटिकोपलेषु ।
गजेषु नीलाभ्रसमप्रभेषु राज्यं निबद्धं पृथिवीपतीनाम् ॥ १०६ ॥
दीर्घग्रीवास्सुपार्श्वाः पृथुनयकटिस्कन्धवक्षोललाटाः ।
ह्रस्वपृष्ठाण्डकर्णाः कठिनघनखुरा दीर्घनिर्मांसजंघाः ॥ १०७ ॥
सूक्ष्मस्फिग्रोमवाला मृदुतनुरसनाप्रोथसत्कोष्ठकेशाः ।
शुद्धावर्तास्सुवर्णा घनसितदशनाः सप्तयो राजवाह्याः ॥ १०८ ॥
एवं विज्ञाय सप्तानां चाङ्गानामपि लक्षणम् ।
यथानीतिप्रवृत्तस्तु नृपतिः सुखमश्नुते ॥ १०९ ॥
एवमाख्याय सप्ताङ्गराजनीतिं समासतः ।
काले याते कियति स गोपायन्वसुधामिमाम् ॥ ११० ॥
भूयो राज्यसुखं स्वैरमनुभूय व्यरज्यत ।
तपोराज्यं सुखावाप्त्यै जगाम स तपोवनम् ॥ १११ ॥
प्राप्तराज्ये वेङ्कटप्पनायके शासति क्ष्माम् ।
अचलारोहणायासात् शत्रवो भेजिरे क्षमाम् ॥ ११२ ॥

इति श्रीशिवतत्त्वरत्नाकरे पञ्चमकल्लोले
राज्यसप्तांगसचिवसेनानीपुरोहितवैद्यगणक
सूदसभास्तारांगरक्षकभिषग्दूतादिलक्षणवर्णनं
नामपञ्चदशस्तरंगः

कामन्दकीयनीतिं च गुरुभार्गवयोर्मतम् ।
वक्षामरेश्वरं तन्त्रखण्डं सह्याद्रिनामकम् ॥
निधिप्रदीपिकां चैव ज्यौतिषार्णवमेव च ।
आगमं शिल्पशास्त्रं च शास्त्रं शकुनबोधकम् ॥
आलोक्य संगृहीतोऽयं कल्लोलः पञ्चमोऽभवत् ।
तरंगैरन्वितः पञ्चदशसंख्यासमन्वितैः ॥
सैकत्रिंशत्पञ्चशताभ्यधिकं तु सहस्रकम् ।
ग्रन्थानामत्रकल्लोले संख्या समवलोक्यताम् ॥
श्रीमत्सद्गुणसोमशेखरलसच्चेन्नाम्बिकासूनुना ।
श्रीदीक्षागुरुचेन्नवीरकरसञ्जातेन विद्याब्धिना ॥
शम्भौ दत्तहृदा सदापि वसदक्षोणीभृता निर्मिते ।
कल्लोलः परिपूरितः कृतिवरे त्वस्मिन्नभूत्पञ्चमः ॥

1) दन्त.

श्रीः

श्रीशिवतत्त्वरत्नाकर

षष्ठकल्लोले

प्रथमस्तरंगः.

केकालापिनि शैलजाकचभरे मेघभ्रमाद्वर्हिणि ।
स्कन्दस्याहिषु विद्रवत्सु परितस्त्यक्त्वा द्रुते मूषिके ॥
आश्वासागतमातृपत्रहरिणा भूयः स्खलन्तं भिया ।
संश्लिष्यानुसुसान्त्वयन् गजमुखं गौरीपतिः पातु वः ॥ १ ॥
एवं सर्वां भुवं रक्षन् किं किं रचितवानसौ ।
तस्यापदानमखिलं मह्यं स्वामिन्! निरूप्यताम् ॥ २ ॥
श्रृणु नन्दन! तत्सर्वं वर्णयामि यथाक्रमम् ।
इक्केरिनाम्नि देशे च रम्यं पदमकल्पयत् ॥ ३ ॥
तत्रैवाश्चर्यजनकं भवनं निरमापयत् ।
तत्र नाटकशालां च विचित्रामुदपादयत् ॥ ४ ॥
प्रेक्षकसत्कृतीः किञ्च सत्कृतीरप्यकारयत् ।
[illegible]ऽपि [illegible]ग्रामे तटाकं च व्यधापयत् ॥ ५ ॥
तत्र द्रुमलतारम्यमुद्यानवनमातनोत् ।
एतेषां वर्णये पुत्र! निर्मापणविधिं श्रृणु ॥ ६ ॥
तत्रादौ पुरनिर्माणविधानं वर्णयामहे ।
वर्धते भूगुणैर्देशो देशः कोशाभिवृद्धिकृत् ॥ ७ ॥
भूमिं गुणवतीं तस्मादाविशेद् भूतये नृपः ।
सर्वसस्यवती सेव्या खनिद्रविणगर्भिणी ॥ ८ ॥
वस्तव्या बहुपानीया पुण्यकृद्भिर्जनैर्युता ।
स्तम्बेरमाध्वनोपेता बहुधान्यसुशोभना ॥ ९ ॥
भूर्नदीशोभिता शस्ता सर्वदा धरणीभृताम् ।
ईदृग्भूमियुतं राष्ट्रं महापत्तनभूषितम् ॥ १० ॥
पालनाद्वर्धयेद्राजा स्वकोशस्याभिवृद्धये ।
वृत्या समावृतस्तत्र ग्राम इत्यभिधीयते ॥ ११ ॥
नद्यद्रिवेष्टितं विज्ञैः खेटकं परिकीर्त्तितम् ।
खेटकैर्दशभिर्युक्तं खर्वडं परिकीर्त्तितम् ॥ १२ ॥
समुद्रतटिनीयोगसमीपस्थलसंस्थितम् ।
पर्वतेन परीतं च द्रोणमित्यभिधीयते ॥ १३ ॥
युक्तमेकादशग्रामैर्मडम्बं परिकीर्त्तितम् ।
अनेकजातिसहितमपाद्रव्यशोभितम् ॥ १४ ॥
पत्तनं तत् समाख्यातं सागरोपान्तसंश्रयम् ।
नगरं च चतुर्द्वारं गोपुराट्टालशोभितम् ॥ १५ ॥
देशान्तराहृतद्रव्य क्रयविक्रय साधनम् ।
नानाजातिसमाकीर्णं भूपालेन परिष्कृतं ॥ १६ ॥
प्राच्यां दिशि कुलालानां पश्चिमे मांसजीविनाम् ।
उत्तरे तैलवृत्तीनामैशान्यां पुष्पजीविनाम् ॥ १७ ॥
परितस्तुप्रजातीनां शिल्पिनां तु यथेच्छया ।
चण्डालानां तु वायव्ये कारूणां ग्रामतो बहिः ॥ १८ ॥
स्थलं किञ्चिच्च वहितो गवां चाराय कल्पयेत् ।
धनुश्शतं परीणाहो ग्रामक्षेत्रान्तरं भवेत् ॥ १९ ॥
द्वे शते खर्वटस्य स्यान्नगरस्य चतुश्शतम् ।
वैशाखे फाल्गुने मार्गे कार्त्तिके श्रावणे तथा ।
शुक्लपक्षे गृहान् कुर्यात् सर्वकामफलप्रदान् ॥ २० ॥
उत्तरात्रितयं चित्रा रोहिणी स्वातिरेवच ।
ज्येष्ठा मृगशिरोमूलमश्विनी हस्तमेवच ॥ २१ ॥
ऋक्षाण्येतानि शस्यन्ते वास्तुशास्त्र[1] विशारदैः ।
क्रूरग्रहैरदृष्टानि सौख्यदानि भवन्ति हि ॥ २२ ॥
आदित्यमङ्गलौ त्यक्त्वा सर्वे वाराश्शुभावहाः ।
गृहकर्मणि शस्यन्ते वास्तुशास्त्रविशारदैः ॥ २३ ॥
नन्दा चैकादशी षष्ठी प्रतिपच्चेति कीर्तिताः ।
पञ्चमी दशमी पूर्णमासी पूर्णा इमाः स्मृताः ॥ २४ ॥
नन्दाश्च पूर्णास्तिथयो मदिरारम्भणे शुभाः ।
तानि क्षीणे निशानाथे गृहारम्भा भवन्तिहि ॥ २५ ॥
वृषो धनुस्तुला कन्या मिथुनं कलशस्तथा ।
लग्नान्येतानि शस्तानि गृहप्रासादकर्मणि ॥ २६ ॥

1) सर्वदावास्तुकर्मणि.

यथानाम फलं तेषां तथासिद्धिरुदाहृता ।
माहेन्द्रे रौहिणे चैव सापत्रे मैत्रएवच ॥ २७ ॥
गान्धर्वे चाभिजिति च मुहूर्ते कारयेद् गृहान् ।
चन्द्रार्कादिग्रहास्सर्वे स्वक्षेत्रे शुभदा गृहे ॥ २८ ॥
न वृद्धा न च नीचस्था न च ऋक्षांशदूषिताः ।
विप्राणां पाण्डरा भूमिर्लोहिता क्षत्रजन्मनाम् ॥ २९ ॥
पीता विशां समाख्याता वृषलानां च मेचका ।
रत्निमात्रं कृतं गर्तं पूरयेत्तन्मृदा पुनः ॥ ३० ॥
लाभमप्यधिके विन्द्याद्धीने हानिस्समे समम् ।
धनिष्ठादीनि सन्त्यज्य पञ्चर्क्षाणि प्रयत्नतः ॥ ३१ ॥
शुभे नक्षत्रयोगे च तरुं छिन्द्याच्छुभावहम् ।
सनीडं क्षीरवृक्षं वा वायुवह्नि विदूषितम् ॥ ३२ ॥
दन्तिदन्ताहतं चैव विद्युत्पातनिपातितम् ।
स्वयं शुष्कं च भग्नं च वक्रं देवालयोद्भवम ॥ ३३ ॥
चैत्यवृक्षं शिवक्षेत्रनदीसङ्गमसम्भवम् ।
तटाककूपमध्यस्थं कण्टकाकुलितं तथा ॥ ३४ ॥
नीपं विभीतकं निम्बं श्लेष्मातकमहीरुहम् ।
आसारांछाखिनस्सर्वान् वर्जयेद्गृहकर्मणि ॥ ३५ ॥
एकजात्या द्विजात्या वा त्रिजात्या वापि भूरुहाम् ।
कारयेन्मन्दिरं राजा श्रियमिच्छन्नचञ्चलाम् ॥ ३६ ॥
व्यासेन गुणितं दैर्घ्यमष्टभिश्च विभाजितम् ।
तच्छेषस्तु भवेदायः प्रोक्तो नामभिरष्टभिः ॥ ३७ ॥
आद्यो ध्वजः परो धूमस्तृतीयस्सिंह एवच ।
तुरीयस्सारमेयस्तु पञ्चमो वृष उच्यते ॥ ३८ ॥
षष्ठः खरो विनिर्दिष्टस्सप्तमस्सामजो भवेत् ।
अष्टमो वायसः प्रोक्त एवमायविनिर्णयः ॥ ३९ ॥
एतेषु च समा निन्द्या विषमास्तु शुभावहाः ।
एन्द्रीं दिशं समारभ्य प्रदक्षिणविधानतः ॥ ४० ॥
अष्टासु दिक्षु बोद्धव्याः क्रमादाया ध्वजादिकाः ।
पश्चिमाशामुखः श्लाघ्यो ध्वजः पूर्वमुखोऽथवा ॥ ४१ ॥
उत्तराभिमुखं द्वारं न शस्तं मन्दिरस्य च ।
मध्ये स्तम्भशतं तस्य भद्राभे विंशतिस्तथा ॥ ४२ ॥
चतुर्भद्रेषु च शतं स्तम्भानां द्वादशादिकम् ।
चत्वारो मध्यमाः स्तम्भा यत्र तत्स्याच्चतुष्ककम् ॥ ४३ ॥
यस्या बहिरलिन्दः स्याच्छाला स्यात्तदनन्तरम् ।
अलिन्दं च पुनश्शाला क्रमेणैवं प्रवर्धते ॥ ४४ ॥
यावत्कर्तुमभीष्टं स्याद् गृहं नरपतेश्शुभम् ।
यच्चतुष्काहतं क्षेत्रं पञ्चधा तद्विभज्यते ॥ ४५ ॥
यद्भागप्रमितं कार्यं त्रिभिर्भागैरलिन्दकम् ।
सार्धत्रिभागिका शाला कर्तव्या सुविचक्षणैः ॥ ४६ ॥
इति स्थितिस्समस्तानां गृहाणां प्रतिपादिता ।
नाम्ना तमुक्तकोणं यत्तत्कार्यं रविभागतः ॥ ४७ ॥
मध्ये स्तम्भाश्शतं सार्धं षड्भिर्न्यूना निरूपिताः ।
चत्वारिंशत्तथा स्तम्भा भद्रे! भद्रे निरूपिताः ॥ ४८ ॥
शतं षष्ट्यधिकं तेस्युश्चतुर्भद्रेषु सङ्ख्यया ।
एकादश तथा कोणा विदिशं विदिशं प्रति ॥ ४९ ॥
चतुर्दश तथा त्रिंशाच्छतं षष्ट्यपि सङ्ख्यया ।
कथ्यते सर्वतोभद्रमनुभागैर्विभाजितम् ॥ ५० ॥
मध्ये स्तम्भा भवेत्तस्य षण्णवत्यधिकं शतम् ।
चत्वारिंशत्तथा चैव भद्रे स्तम्भा निरूपिताः ॥ ५१ ॥
एवं चतुर्षु भद्रेषु शतं षष्टिस्तथाष्टकम् ।
कोणास्तस्य विधातव्यास्त्रयोदश मिता बुधैः ॥ ५२ ॥
समस्ता गुणिताः कोणा द्विपञ्चाशद्भवन्ति ते ।
श्रीवत्समष्टभागं स्याच्चतुष्षष्टिस्तु मध्यगाः ॥ ५३ ॥
तस्य स्तम्भाः प्रयोक्तव्या भद्रेऽष्टादश सङ्ख्यया ।
चतुष्षष्टिश्च भद्रेषु द्विसप्ततिरुदाहृताः ॥ ५४ ॥
सप्त कोणास्समन्ताच्च द्विगुणा मनुसङ्ख्यया ।
एवमादीन्यनन्तानि गृहाणि धरणीभुजाम् ॥ ५५ ॥
कियन्त्यपि मयोक्तानि प्रधानानि यथाक्रमम ।
चतुश्शालं त्रिशालं च द्विशालं चैकशालकम् ॥ ५६ ॥
वक्ष्यामि भवनं राज्ञां नामलक्षणसंयुतम् ।
अलिन्दगैश्चतुर्द्वा रैश्चतुश्शालमुदीरितम् ॥ ५७ ॥
सर्वतो भद्रनामेदं नृपाणां शस्यते गृहम् ।
नन्द्यावर्तं तदाख्यातं पश्चिमद्वारवर्जितम् ॥ ५८ ॥
वर्धमानं तदाख्यातं दक्षिणद्वारवर्जितम् ।
स्वस्तिकं तद्भवेन्नाम्ना पूर्वद्वारविवर्जितम् ॥ ५९ ॥
उत्तरद्वारहीनं चेद्रुचकं तद्भवेद्गृहम् ।
सर्वतोभद्रनामेदं चतुश्शालमुदाहृतम् ॥ ६० ॥
शुभप्रदं नरेन्द्राणां विजयारोग्यवर्धनम् ।
नन्द्यावर्तं वर्धमानं स्वस्तिकं रुचकं तथा ॥ ६१ ॥
चत्वारिस्युस्त्रिशालानि गेहानि धरणीभुजाम् ।
नैर्ऋते मुख्यगेहं स्याच्छाले चोत्तरपूर्वगे ॥ ६२ ॥

पूर्वायां चोत्तरद्वारमुत्तरस्यां च पूर्वतः ।
कर्तव्ये गर्भगेहस्य द्वारे द्वे तु विचक्षणैः ॥ ६३ ॥
एकं स्यात्पूर्वतो द्वारमन्यदुत्तरतः स्थितम् ।
अङ्गणाद्दक्षिणा शाला हस्तिनी परिकीर्तिता ॥ ६४ ॥
अङ्गणात्पश्चिमा शाला महिषीति निगद्यते ।
इदं शालं च सिद्धार्थं सर्वकामफलप्रदम् ॥ ६५ ॥
नृपाणां शस्यते स्थानं विशेषाद्धितवर्धनम् ।
वायव्ये गर्भगेहं स्याच्छाले दक्षिणपूर्वगे ॥ ६६ ॥
द्वारे शालामुखे कार्ये शालाद्वारे च सम्मुखे ।
महिषीत्वङ्गणात्पश्चादुत्तरागा प्रकीर्तिता ॥ ६७ ॥
द्विशालं भयदं चैतद्यमपूर्वं च निन्दितम् ।
ईशान्ये प्रथमं वेश्म शाले दक्षिणपश्चिमे ॥ ६८ ॥
दक्षिणादङ्गणात्पूर्वभागे शालोत्तरा स्थिता ।
दण्डाख्यं नामतः प्रोक्तं विशालं भयदं नृणाम् ॥ ६९ ॥
वर्जनीयं प्रयत्नेन नृपैरावासकर्मणि ।
आग्नेये मुखवेश्म स्याच्छाले चोत्तरपश्चिमे ॥ ७० ॥
अङ्गणात्पूर्वगाच्छारि दक्षिणा हस्तिनी मता ।
वाताख्यं नामतः प्रोक्तं नृणामुद्वेगकारकम् ॥ ७१ ॥
नृपाणां चैवकर्तव्यं निवासार्थं कथञ्चन ।
विशालमेकं सिद्धार्थं प्रशस्तं पृथिवीभुजाम् ॥ ७१ ॥
क्रीडार्थं तन्निवासार्थं भोगार्थं च प्रशस्यते ।
ध्रुवं हीनमलिन्देन पूर्वालिन्दं तु धन्यकम् ॥ ८२ ॥
जयाख्यं दक्षिणालिन्दं पश्चिमालिन्दकं वरम् ।
दुर्मुखं चोत्तरालिन्दमेकालिन्दं चतुर्गृहम् ॥ ७४ ॥
धन्यं जयं च शुभदं निन्दिते वरदुर्मुखे ।
पूर्वदक्षिणतोऽलिन्दं नन्दमित्यभिधीयते ॥ ७५ ॥
याम्यपश्चिमतोलिन्दं मनोरममुदाहृतम् ।
पूर्वदिग्भागतोऽलिन्दं गृहं क्रूरं निगद्यते ॥ ७६ ॥
पश्चिमोत्तरतोलिन्दं क्षयमित्यभिधीयते ।
पूर्वपश्चिमतोऽलिन्दं कान्तं नाम्ना निगद्यते ॥ ७७ ॥
दक्षिणोत्तरतोऽलिन्दं सुपक्षं परिचक्षते ।
उत्तरालिन्दहीनं तत् सुमुखं परिकीर्त्तितम् ॥ ७८ ॥
एवं षोडश गेहानि कथितानि परिस्फुटम् ।
यथानाम फलं तेषां विज्ञेयं तन्निवासिनाम ॥ ७९ ॥
राज्ञा तस्मात् प्रकर्तव्यं नृपाणां गेहमुत्तमम् ।
हीनस्तम्भमलिन्दं स्याच्छाला स्तम्भैस्समाहृतैः ॥ ८० ॥
नृपाणां गृहकर्तृणां क्रम एष उदाहृतः ।
अन्यच्च तत्प्रकारं तदेकशालं गृहं भवेत् ॥ ८१ ॥
प्रधानगेहस्तम्भश्च शालास्तम्भैस्समो भवेत् ।
तस्य लक्ष्म प्रवक्ष्यामि शुभाशुभफलोदयम् ॥ ८२ ॥
उत्तरा शस्यते शाला शाला पूर्वा प्रशस्यते ।
दक्षिणा पश्चिमा शाला द्वेशाले परिनिन्दिते ॥ ८३ ॥
नृपाणां सुखवासार्थं कर्तव्ये न कदाचन ।
तिष्ठन् गृहेषु शस्तेषु श्रियमाप्नोति पुष्कलाम् ॥ ८४ ॥
आरोग्यं विजयं कीर्त्तिं सन्तोषं परमाप्नुयात् ।
ईदृग्लक्षणसंयुक्तान् विविधान् बहुभूमितान् ॥ ८५ ॥
कारयित्वा महीपालः प्राप्य चन्द्रबलं महत् ।
विधाय वास्तुपूजादि तोषयित्वा द्विजानपि ॥ ८६ ॥
सहमङ्गलवाद्येन प्रविशेत्तत्र हर्षितः ॥

इति श्रीशिवतत्वरत्नाकरे षष्ठकल्लोले
पुरभवननिर्माणकथनं नाम प्रथमस्तरङ्गः.

अथ द्वितियस्तरंगः

नगरागारनिर्माणक्रमः स्वामिन्निरूपितः ।
अथ नाटकशालायाः क्रममिच्छामि वेदितुम् ॥ १ ॥

ब्रुवे नाटकशालाया निर्माणस्य क्रमं शृणु ।
सुधाधवलितं रम्यं वास्तुलक्षणसंयुतम् ॥ २ ॥

जालमार्गकृतोद्यानं क्वापि सर्वप्रकाशकम् ।
क्वापि सन्तमसोपेतं मणिदीपप्रकाशितम् ॥ ३ ॥

दन्तिदन्तविनिर्माणमत्तवारणशोभितम् ।
सौवर्णस्तम्भरुचिरं चन्दनस्तम्भगन्धितम् ॥ ४ ॥

रत्नस्तम्भकृतावासं प्रवालस्तम्भरंजितम् ।
काचकुट्टिमरोचिष्णु स्फुटिकोज्वलकुट्टिमम् ॥ ५ ॥

सुधाकुट्टिमकोपेतं स्फुटद्दर्पणककुट्टिमम् ।
स्फाटिकोपलविन्यासदर्पणाकारभित्तिमत् ॥ ६ ॥

विचित्रचित्रसंयुक्तप्रमोदप्रदभित्तिमत् ।
एवमाश्चर्यजनकं किञ्चिन्निर्मापयेद् गृहम् ॥ ७ ॥

प्रगल्भैर्भावतत्त्वज्ञैस्सूक्ष्मरेखाविशारदैः ।
विद्वद्भिर्मानकुशलैश्चित्रलेखनकोविदैः ॥ ८ ॥

वर्णपूरणदक्षैश्च मिश्रणे च कृतश्रमैः ।
चित्रकैर्लेखयेच्चित्रं नानारससमुद्भवम् ॥ ९ ॥

सुधया निर्मितां भित्तिं श्लक्ष्णां क्षतविवर्जिताम् ।
लेपयेच्चित्रकर्मार्थं लेखनीयं प्रवक्ष्यते ॥ १० ॥

माहिषीं त्वचमादाय नवां तोयेन पाचयेत् ।
नवनीतमिवायाति यावच्चिक्कणतां भृशम् ॥ ११ ॥

तत् कल्कं चिक्कणीभूतं शलाकां परिकल्पयेत् ।
यत्नेन शोषयेत्पश्चाद्यावत् काठिन्यमाप्नुयात् ॥ १२ ॥

वज्रलेपमिदं ख्यातं चित्रे सर्वत्र शस्यते ।
तदृढं मृत्तिकापात्रे तोये कृत्वा प्रतापयेत् ॥ १३ ॥

संतप्तो द्रवतां याति सर्ववर्णेषु तद्द्रवः ।
मिश्रणीयः प्रमाणेन यथा वर्णः प्रशस्यते ॥ १४ ॥

आदाय मृत्तिकां श्वेतां वज्रलेपेन मिश्रयेत् ।
तया लेपं प्रकुर्वीत परिशुष्के त्रिवारतः ॥ १५ ॥

शङ्खचूर्णं सितापिष्टं वज्रलेपसमन्वितम् ।
आदाय मृत्तिकां लिम्पेद्यावच्च श्लक्ष्णतां व्रजेत् ॥ १६ ॥

धातुं नीलनिकाभासं श्वेतं चन्द्रसमप्रभम् ।
नागनाम्नैव विख्यातं शिलया परिवेष्टितम् ॥ १७ ॥

मिश्रितं वज्रलेपेन समादाय च पाणिना ।
लेपयेन्मृदि योगेन स्वच्छमच्छं शनैश्शनैः ॥ १८ ॥

पश्चाच्चित्रं विचित्रं च तस्य भित्तौ लिखेद् बुधः ।
नानाभावरसैर्युक्तं सुरेखं वर्णकोचितम् ॥ १९ ॥

कनिष्ठिकापरीणाहां भागद्वयसमायुताम् ।
घनवेणुसमुद्भूतां तूलिकां तरिकल्पयेत् ॥ २० ॥

तदग्रे ताम्रजं शंकु यवमात्रं विनिक्षिपेत् ।
तावन्मात्रं वहिः कुर्यात् पत्रिणामेलिता बुधैः ॥ २१ ॥

खचोरं भक्तसिक्तेन मृदित्वा कण्टकाकृतिम् ।
वर्त्तिं कृत्वा तया लेख्यं वर्त्तिकानाम सा भवेत् ॥ २२ ॥

वत्सकर्णसमुद्भूतरोमाण्यादाय यत्नतः ।
तूलिकाग्रे न्यसेत्तानि लाक्षाबन्धनयोगतः ॥ २३ ॥

लेखिनी नाम सा प्रोक्ता सा चैव त्रिविधा भवेत् ।
स्थूला मध्या तथा सूक्ष्मा तया चित्रं विरच्यते ॥ २४ ॥

स्थूलया लेपनं कार्यं तिर्यगाहितया तया ।
अञ्जनं मध्यया कुर्यादग्रपार्श्वनिविष्टया ॥ २५ ॥

सूक्ष्मया च तथा सूक्ष्मां रेखां कुर्वित कोविदः ।
अग्रेण चित्रको धीमान् चित्रविद्याविशारदः ॥ २६ ॥

प्राणी वा यदिवाऽप्राणी यत्प्रमाणमितिस्मृतम् ।
भित्तौ निवेशितस्यास्य दृश्यमानस्य चेतसा ॥ २७ ॥

तन्मानेन लिखेद्रेखां सर्वांगेषु विचक्षणः ।
पूर्वं किट्टनलेख्यं स्याद्यद्वा वर्तिकया बुधैः ॥ २८ ॥

आकारमात्रिकां रेखां विना वर्णं लिखेत्पुरः ।
आकारनिर्मितां रेखां किट्टवर्त्तिविनिर्मिताम् ॥ २९ ॥

लिखेत्तामेव लेखिन्या गैरिकोद्भूतवर्णतः ।
पूरयेद्वर्णतः पश्चात्तत्तद्रूपोचितं यथा ॥ ३० ॥

उज्वलं प्रोन्नते स्थाने श्यामलं निम्नदेशतः ।
एकवर्णेऽपितं कुर्यात्तारतम्यविभेदतः ॥ ३१ ॥

अन्वयेदुज्ज्वलान् वार्णान् घनश्यामलतां व्रजेत् ।
भिन्नवर्णेषु रूपेषु भित्तौ वर्णः प्रयुज्यते ॥ ३२ ॥

श्वेतेषु पूरयेच्छंखं शोणेषु दरदं तथा ।
रक्तोत्पलकशकलं लोहिते गैरिकं तथा ॥ ३३ ॥
हरितालं भित्तिषु स्यात् कृष्णे कज्जलमिष्यते ।
शुद्धा वर्णा इमे प्रोक्ताश्चत्वारश्चित्रसंश्रया: ॥ ३४ ॥
मिश्रान् वर्णानधो वक्ष्ये वर्णसंयोगसम्भवान् ।
दरदं शंखसम्मिश्रं भवेत्कोकनदच्छवि ॥ ३५ ॥
अलक्तं शंखसंमिश्रं चोराश्वसदृशं भवेत् ।
कज्जलं शंखसंमिश्रंधूम्रच्छायं निरूपितम् ॥ ३६ ॥
निर्विशंखेन संमिश्रं कपोताभं प्रजायते ।
राजावर्तस्सएव स्यादतसीपुष्पसन्निभ: ॥ ३७ ॥
केवलैव च या नीली भवेदिन्दीवरप्रभा ।
हरितालेन संमिश्रा जायते हरितच्छवि: ॥ ३८ ॥
गैरिकं हरितालेन मिश्रितं गौरतां व्रजेत् ।
कज्जलं गैरिकोपेतं श्यामवर्णं निरूपितम् ॥ ३९ ॥
अलक्तकेन संमिश्रं कज्जलं पाटलं भवेत् ।
अलक्तनीलिकायुक्तं जम्बूवर्णं स्फुटं भवेत् ॥ ४० ॥
एवं शुद्धाश्च संमिश्रा वर्णभेदा: प्रकीर्त्तिता: ।
तत्तद्रूपानुसारेण पूरणीयास्तु चित्रकै: ॥ ४१ ॥
एणसारङ्गशार्दूलशिखितित्तिरिकादिषु ।
भिन्नवर्णेषु सत्वेषु पृथग्वर्ण: प्रयुज्यते ॥ ४२ ॥
गौरवर्णेषु नीलीषु हरितालं पुरो न्यसेत् ।
गौरेषु गौरिकं पश्चान्नीलीं नीलेषु योजयेत् ॥ ४३ ॥
क्षुरेण तीक्ष्णधारेण रेखां न्यूनाधिकां हरेत् ।
पाण्डुरं विन्दुजातं यत्तत्सर्वं तेन कारयेत् ॥ ४४ ॥
पूरितं वर्णमात्रं यत्तावन्मात्रं हरेत्सुधी: ।
मृदुघर्षणयोगेन यथा सङ्ख्या न नश्यति ॥ ४५ ॥
रोमराजिं सितां कुर्याद्रेखा नानाविधा अपि ।
वीरणैस्सूक्ष्मतुण्डाग्रैर्मृदुघर्षणयोगत: ॥ ४६ ॥
शुद्धं सुवर्णमित्यर्थं शिलायां परिवेष्टितम् ।
कृत्वा काचमये पात्रे गालयेत्तन्मुहुर्मुहु: ॥ ४७ ॥
क्षिपृत्वा तोयं तदालोड्य निर्हते तज्जलं मुहु: ।
यावज्जलांशको याति तावत्कुर्वीत यत्नत: ॥ ४८ ॥
घनत्वान्मसृणं हेम न याति सह वारिणा ।
आस्ते तदमलं हेम वालार्करुधिरच्छवि ॥ ४९ ॥
तत्कल्कं हेमजं स्वल्पं वज्रलेपेन मेलयेत् ।
असितं वज्रलेपेन लेखन्यग्रे निवेशयत् ॥ ५० ॥

विभेदाभरणं क्वापि यत्किञ्चिद्धेमकल्पितम् ।
चित्रे निवेशितं हेम यदा शोषं प्रपद्यते ॥ ५१ ॥
वराहदंष्ट्रया तत्तु घट्टयेच्च शनैश्शनै: ।
यावत्कान्ति समायाति विद्युच्चलितविग्रहम् ॥ ५२ ॥
सर्वचित्रेषु सामान्यो विधिरेष प्रकीर्त्तित: ।
प्रान्ते कज्जलवर्णेन लिखेल्लेखा विचक्षण: ॥ ५३ ॥
वस्त्रमाभरणं पुष्पं मुखरागादिकं सुधी: ।
अलक्तेन लिखेत्पश्चाच्चित्रं पूर्णं भवेत्तत: ॥ ५४ ॥
ऋजु स्यात्सम्मुखं स्थानमन्यदर्धर्जुसंज्ञितम् ।
तृतीयं स्थानकं साचि तुर्यं न्यर्धर्जुसंज्ञितम् ॥ ५५ ॥
पञ्चमं भित्तिकं प्राहुस्तद्ज्ञा: पार्श्वगतं च यत् ।
एवं स्थानानि मुख्यानि कथितानीह संज्ञया ॥ ५६ ॥
तेषां तु लक्षणं वक्ष्ये ब्रह्मसूत्रविभेदत: ।
ब्रह्मसूत्रवहिस्सूत्रे षट्षडंगुलमध्यगे ॥ ५७ ॥
यत्र स्यात्तदृजु स्थानं रूपं साम्मुख्ययोगवत् ।
अन्तरं ब्रह्मसूत्रस्य पक्षसूत्रस्य चैकत: ॥ ५८ ॥
अष्टांगुलं ततोऽन्यत्र चतुरंगुलमन्तरम् ।
उक्तमर्धर्जुके स्थाने लम्बसूत्र क्रियाक्रम: ॥ ५९ ॥
अङ्गुलानि दशैकत्र कलामात्रं ततोऽन्यत: ।
अन्तरं ब्रह्मसूत्रस्य पक्षसूत्रद्वयस्य च ॥ ६० ॥
साचिस्थाने समाख्यात ऊर्ध्वसूत्रस्थितिक्रम: ।
एकत्रैकांगुलं यस्मिन्नन्यत्रैकादशांगुलम् ॥ ६१ ॥
मध्याद्वधिक्षिते स्थाने लम्बसूत्रक्रमो भवेत् ।
पक्षसूत्रद्वयं तिष्ठेद्ब्रह्मसूत्रं न दृश्यते ॥ ६२ ॥
लम्बसूत्रक्रमोऽपीह भित्तिके समुदाहृत: ।
स्थानेषु परिवृत्तेषु लम्बसूत्रक्रमोऽव्ययम् ॥ ६३ ॥
तेषां तत: समागत्य भ्रूमध्यं नासिकाग्रत: ।
चुबुकाद्धृदयं नाभेश्चरणद्वयमध्यगम् ॥ ६४ ॥
आभूमेर्मस्तकं यावद् ब्रह्मसूत्रमुदाहृतम् ।
अखिलं तदृजुस्थाने स्थानेष्वन्येषु तद्बलम् ॥ ६५ ॥
पार्श्वयोस्तस्य सूत्रे द्वे षट्षडंगुलदूरके ।
कर्णान्ताच्चुबुकाज्जानुमध्यात्त्वलकबाह्यत: ॥ ६६ ॥
पादप्रदेशिनीमध्याद् भूमिप्रान्ते उभे अपि ।
पक्षसूत्रे समाख्याते सर्वस्थानेषु निश्चले ॥ ६७ ॥
परमाणुभिरष्टाभिर्वालाग्रमभिधीयते ।
वालाग्रैरष्टभिर्लिक्षा यूका लिक्षाष्टकं भवेत् ॥ ६८ ॥

यूकाष्टकं यवः प्रोक्तो यवाष्टकमथांगुलम् ।
एकांगुलं भवेन्मात्रा द्वे मात्रे गोलकं कला ॥ ६९ ॥
त्रिमात्रमध्यर्धकला भागास्तु चतुरंगुलम् ।
त्रयो भागा वितस्तिः स्याद्वितस्तिस्ताल उच्यते ॥ ७० ॥
तालस्तु मुखमाख्यातं व्यवहाराय कोविदैः ।
उत्सेधस्तु भवेद्व्यर्थ्यं विस्तारस्तिर्यगीरितः ॥ ७१ ॥
आनाहः परिधिः स्थौल्यमेवं मानत्रयं भवेम् ।
उत्तमं दशतालं स्याच्चतुर्विंशच्छतांगुलम् ॥ ७२ ॥
सविंशकं शतं मध्यं कनिष्ठं षोडशांगुलम् ।
दशतालमिति ज्ञेयं नवतालं तु वक्ष्यते ॥ ७३ ॥
सद्वादशशतं तत्र ज्येष्ठमष्टाधिकं भवेत् ।
समध्यमांकं तं वेद मात्राधिकशतांगुलम् ॥ ७४ ॥
ज्येष्ठेन दशतालेन ब्रह्मविष्णुमहेश्वराः ।
तथैव मध्यमानेष्टा दुर्गा भूमिस्सरस्वती ॥ ७५ ॥
ब्राह्मी माहेश्वरी ज्येष्ठा वृषली भूश्च सम्मिता ।
क्षेत्रपालस्य मानं तु कनिष्ठेन विधीयते ॥ ७६ ॥
आद्यः स्कन्दोथ देवेन्द्रो मोहिनी वितये तथा ।
अग्निश्चण्डेश्वरश्चैव यमश्च वरुणस्तथा ॥ ७७ ॥
वायुश्च धनदश्चैव गन्धर्वा यक्षराक्षसाः ।
सिद्धचारणनागेन्द्रविद्याधरगणा इमे ॥ ७८ ॥
वरुणानी तथेन्द्राणी कौमारी गरुडस्तथा ।
मध्यमे वाधमे चैव शेषाणां परिकल्पयेत् ॥ ७९ ॥
अष्टतालेन मर्त्यास्यं सप्तताले विशाखिकाः ।
षट्तालं कुब्जकानां तु पञ्चतालो गणाधिपः ॥ ८० ॥
वामनस्तु तथैव स्याच्चतुस्तालास्तु भूतकाः ।
किन्नरश्च त्रितालस्तु कूश्माण्डश्च पिशाचकाः ॥ ८१ ॥
एकतालाः कबन्धाः स्युरेवं तालक्रमं विदुः ।
अतः परं प्रवक्ष्यामि प्रतिमामानमुत्तमम् ॥ ८२ ॥
मानं प्रमाणमुन्मानं परिमाणोपमानकम् ।
कम्पमानं षडेतानि मानानि कथयाम्यहम् ॥ ८३ ॥
मानमुत्सेधमानं स्यात्प्रमाणं सहनं मतम् ।
मानं च तिर्यगूर्ध्वे यत्तदुन्मानमिहोच्यते ॥ ८४ ॥
तच्च प्रतिकृतेस्तावत्तदङ्गानां चैव कथ्यते ।
उत्सेधमानं मूर्धादिपादान्तमनुपूर्वशः ॥ ८५ ॥
लब्धाङ्गदेहिनां तावदंगुलानां शतेन च ।
चतुर्विंशत्युत्तरेण प्रतिमां परिकल्पयेत् ॥ ८६ ॥

उष्णीषमंगुलयितं केशान्तं त्र्यंगुलं ततम् ।
उत्सूत्रा तत आरभ्य षट्त्रिंशद्यवसम्मितम् ॥ ८७ ॥
तद्वन्नासापुटं तत् स्यात्तद्वच्चुबुकमेव हि ।
तेन केशान्तमारभ्य मुखमानं चतुर्मुखम् ॥ ८८ ॥
अष्टोत्तरं यवशतं चुबुकावयवादधि ।
गलमूर्धोंगुलं सार्धं त्र्यंगुलं कण्ठ इष्यते ॥ ८९ ॥
भिक्कासूत्रं समारभ्य हृदयान्तं मुखोन्नतम् ।
ततः प्रभृति नाभ्यन्तं सार्धं सत्रिदशांगुलम् ॥ ९० ॥
ततः प्रभृति मेढ्रान्तं तद्वदुत्सेध इष्यते ।
तन्मूलाज्जानुपर्यन्तं तन्मानं त्रिदशांगुलम् ॥ ९१ ॥
चतुरंगलमुत्सेधं जानुमण्डलमिष्यते ।
अक्षान्तं जानुनोऽधस्तादेतत्सममितीरितम् ॥ ९२ ॥
ततः स्थलान्तमुत्सेधं चतुरंगुलसम्मितम् ।
देहांगुलीनि यावन्ति दशतालेऽभिपूजिते ॥ ९३ ॥
विभज्य तावन्त्युक्तानि मध्यमे श्रूयतां क्रमात् ।
त्रयोदशांगुलं वक्त्रं त्रिस्थानं चतुरंगुलम् ॥ ९४ ॥
षड्विंशत्यंगुलोत्सेधमुरोमानमुदाहृतम् ।
तद्वज्जंघासमुत्सेधमुत्तमेनैव तत्समम् ॥ ९५ ॥
अधमे दशताले तु मुखं शतयवं समम् ।
अन्यत्तदेव तस्य स्यादूरू यवशतद्वयम् ॥ ९६ ॥
जंघाच तत्समोत्सेधा मुखेनान्यत्समं मतम् ।
विंशद्यवशतं पादद्राघिमा कमलासन! ॥ ९७ ॥
अङ्गुष्ठं त्र्यंगुलायामं तदायामा च तर्जनी ।
एकविंशद्यवायामा मध्यमांगुलिरिष्यते ॥ ९८ ॥
विंशद्यवानामिका स्यात् कनिष्ठा त्र्यंगुलापि च ।
यवश्च पञ्चभियुक्तः पार्ष्णिश्च चतुरंगुलः ॥ ९९ ॥
भिक्का तयोस्तथा बाह्वोरंगुल्यस्सप्तविंशतिः ।
ततश्च मणिबन्धान्तं षड्विंशत्यंगुलायतम् ॥ १०० ॥
यवद्वयेन च युतं मणिबन्धतलं पुनः ।
मध्यमांगुलिमूलान्तं पञ्चाशद्यवसंमितम् ॥ १०१ ॥
पञ्चांगुलमथांगुष्ठं तर्जनी तद्वदायता ।
षड्यवैश्चाधिकायामा मध्यमा तु षडंगुला ॥ १०२ ॥
आयता षड्यवैश्चापि तत्समानामिका मता ।
कनिष्ठांगुलितुल्या तु मांसला च नखायतिः ॥ १०३ ॥
एकांगुलिनखायामा तिष्ठा षड्यव संमिता ।
बाहू तथोपबाहूच चतुरंगुलमायतौ ॥ १०४ ॥

चतुर्यवं चोर्ध्वकण्ठं नालं पञ्चांगुलायतम् ।
लिंगं पञ्चांगुलायामं मुष्कस्स्याच्चतुरंगुल: ॥ १०५ ॥
सार्धाष्टांगुलविस्तारं ललाटं तदनन्तरम् ।
द्वादशांगुलविस्तारं वालचन्द्रसमाकृति ॥ १०६ ॥
ततस्तु कर्णयोर्मध्यं सार्धं सत्रिदशांगुलम् ।
दशांगुलमधस्तस्य विस्तारश्चुबुकस्य च ॥ १०७ ॥
सपादद्व्यंगुलं पूर्णं किञ्चिन्निम्नाकृति स्फुटम् ।
मूलमध्याग्रविस्तारो ग्रीवायां क्रमशो भवेत् ॥ १०८ ॥
नवांगुलं तथैकोनसार्धसप्तांगुलं तथा ।
भिक्षातयोरधोवाहुमूलयोरन्तरं भवेत् ॥ १०९ ॥
यवैश्चतुर्भिर्विस्तारं सचत्वारिंशदंगुलम् ।
कक्षयोर्मध्यविस्तारस्त्र्यंगुलं सार्धविंशति ॥ ११० ॥
अष्टादशांगुलमितं स्तनयोरपिचान्तरम् ।
षोडशांगुलविस्तारं तुङ्गमध्यमुदाहृतम् ॥ १११ ॥
अष्टादशांगुलं श्रोणिरधरोदरमिष्यते ।
कटिप्रदेशविस्तारस्त्र्यंगुलं सार्धविंशति ॥ ११२ ॥
ऊरुमूलस्य विस्तारस्सार्धस्सत्रिदशांगुल: ।
अग्रमेकांगुलं सार्धत्र्यंगुलं मध्यमिष्यते ॥ ११३ ॥
द्व्यंगुलो मूलविस्तारो लिंगस्य समुदाहृत: ।
विस्तीर्णं त्र्यंगुलं मूलं मध्यमर्धाधिकं पुन: ॥ ११४ ॥
विस्तीर्णमग्रं मुष्कस्य द्वात्रिंशद्यवमम्मितम् ।
विस्तीर्णमेकादशभिरंगुलैरूरुमध्यमम् ॥ ११५ ॥
अग्रं दशभिरेतस्य विस्तीर्णं कमलासन!
नवांगुलं जानुवक्त्रं पार्श्वे चार्धेन्दुसन्निभम् ॥ ११६ ॥
मूले नवाष्टौ मध्ये स्याज्जंघार्धं सार्धसप्तकम् ।
विस्तीर्णो नलिकाभागस्सार्धैश्च चतुरंगुलै: ॥ ११७ ॥
अंघ्रिमूलस्य विस्तारस्त्र्यंगुलाच्च चतुर्यव: ।
सार्धं पञ्चांगुलं मध्यमग्रं सार्धं षडंगुलम् ॥ ११८ ॥
सार्धमष्टांगुलं मूले वाह्वोस्सप्तांगुलं पुन: ।
मध्याग्रौ तुल्यविस्तारौ प्रकोष्ठावयवात्परम् ॥ ११९ ॥
सार्धैश्च सप्तभिर्मूले विस्तीर्णं सार्धपञ्चभि: ।
अग्रे चतुर्भिर्मध्ये च मणिवन्धस्य चोच्यते ॥ १२० ॥
पञ्चांगुलोऽर्धसहितसार्धतरतलं स्मृतम् ।
अंगुष्ठमूलविस्तारो नवभिस्सहितो यवै: ॥ १२१ ॥
मध्यमेकांगुलं सप्त तथैवाग्रमुदाहृतम् ।
मूलं दशयवं मध्यमधमाया यवा नव ॥ १२२ ॥

अग्रमेकांगुलं प्रोक्तमितरा तर्जनीसमा ।
मूले त्वष्टौ कनिष्ठायां यवास्तत्रैव मध्यमे ॥ १२३ ॥
षडग्रेऽङ्गुल्यग्रपर्वस्वर्धं स्यान्नखविस्तृति: ।
मध्ये करतलं रेखा मध्यमामूल उत्थिता ॥ १२४ ॥
कनिष्ठामूलमारभ्य रेखा मध्यमगा भवेत् ।
मध्यमांगुलितर्जन्योर्निम्ना तुल्या विचक्षणै: ॥ १२५ ॥
अंगुष्ठमूलमारभ्य तर्जन्याश्चैव मध्यत: ।
तयोश्च रेखयोर्मध्ये तर्जनी मूलगामिनी ॥ १२६ ॥
रेखा कल्प्या यथाशास्त्रं शास्त्राभिज्ञेन शिल्पिना ।
ललाटस्य च विस्तारस्सपादद्व्यंगुलो भवेत् ॥ १२७ ॥
तस्याधस्ताद्भ्रुतौ कल्प्ये चत्वारिंशद्यवायते ।
मध्ये यवेन विस्तीर्णे नेत्रमष्टादशायतम् ॥ १२८ ॥
चक्षु: कनीनिकायामो विस्तारश्च यव: स्मृत: ।
अंगुलं श्वेतवर्णस्य विस्तार: कृष्णमण्डलम् ॥ १२९ ॥
यवोनमंगुलं ज्योतिस्तन्मध्ये यवसम्मितम् ।
यूकमानं च तन्मध्यदृष्टि: पक्ष्मावली पुन: ॥ १३० ॥
ऊर्ध्वा समंचिता सार्धमंगुलैर्दशभिर्यवै: ।
विस्तीर्णो शक्रदायामो विस्तारस्य तदर्धकम् ॥ १३१ ॥
अशीति: पक्ष्मरोमाणि वक्त्रघ्राणे शतानि च ।
द्व्यंगुलं चक्षुषोर्मध्यं मध्यं च भ्रुत्वपाङ्गयो: ॥ १३२ ॥
चत्वारिंशद्यवं कर्णविस्तारो द्व्यंगुलं भवेत् ।
ऊर्ध्वकण्ठस्य चायामस्तथार्धचतुरंगुल: ॥ १३३ ॥
नालं पञ्चांगुलमितं विस्तृतं षड्यवै: पुन: ।
पश्चाच्चतुर्यवा नाडी नालतुल्यं चतुर्मुख! ॥ १३४ ॥
श्रवणस्य च पिप्पल्या मध्यगतं चतुर्यवम् ।
श्रीवत्सकर्णपिप्पल्यंगुलमात्रमवस्थिता ॥ १३५ ॥
वन्धनं त्र्यंगुलं रन्ध्रं नेत्रसूत्रसमन्वितम् ।
नासिकामूलमध्याग्रविस्तार: कथ्यते क्रमात् ॥ १३६ ॥
अंगुलं चांगुलस्यार्धं त्र्यंगुलं च चतुर्यवम् ।
अंगुलेनोन्नतं मूलं तेन सार्धेन मध्यमम् ॥ १३७ ॥
द्वाभ्यां यवाभ्यां मूलेन द्व्यंगुलेनाग्रमुन्नतम् ।
षड्यवं सुषिरं तस्य पुटमध्यं चतुर्यवम् ॥ १३८ ॥
पुटपार्श्वस्य विस्तारो द्वियव: परिकीर्त्तित: ।
दन्तपाल्यंगुलोत्सेधा दर्पणोदरसन्निभा ॥ १३९ ॥
विस्तारो यवतुल्य: स्याद्राजदन्तौ चतुर्यवौ ।
द्वात्रिंशद्दशना: कल्प्या यथा शास्त्रोक्तमार्गत: ॥ १४० ॥

जिह्वा षडंगुलायामा विस्तीर्णं त्र्यंगुलं तथा ।
एकादशांगुलं वृत्तं द्व्यंगुलं स्तनमण्डलम् ॥ १४१ ॥

चतुर्यवं चूचुकं स्यात् स्तनमण्डलमध्यगम् ।
चतुर्यवं नाभिगर्तं दक्षिणावर्तमिष्यते ॥ १४२ ॥

मध्येऽर्धमंगुलं वृत्तं बहिरर्धांगुलोन्नतम् ।
उष्णीषात्पृष्ठकेशान्तमेकाधिकदशांगुलम् ॥ १४३ ॥

उष्णीषात् पार्श्वकेशन्तं द्वादशांगुलमानकम् ।
कर्णयोरन्तरं विद्यात् सार्धं सत्रिदशांगुलम ॥ १४४ ॥

मूलं मध्याग्रदेशेषु पृष्ठग्रीवा यथाक्रमम् ।
विस्तीर्णा नवभिस्सार्धैरंगुलैर्नवभिस्तथा ॥ १४५ ॥

अष्टाभिश्च भवेत्तस्मादधस्तात् ककुदस्थिति ।
आयामोत्सेधविस्तारैः ककुदं तच्चतुर्यवम ॥ १४६ ॥

षट्त्रिंशदंगुलं बाह्वोरंगुलैर्नवभिस्तथा ।
षड्विंशतिश्चांगुलानां कक्षयोरन्तरं भवेत् ॥ १४७ ॥

पृष्ठे मध्यस्थविस्तारो भवेत्सप्तदशांगुलः ।
विस्तीर्णं पञ्चविंशत्या श्रोणिपार्श्वे तथांगुलैः ॥ १४८ ॥

कटिप्रदेशविस्तारष्षड्विंशत्यंगुलो भवेत् ।
षड्त्रिंशदंगुलं मध्यं ककुदन्यकटिस्तथा ॥ १४९ ॥

द्व्यंगुलोच्छ्रायतस्तस्य स्फिचोस्तन्मध्यमंगुलम् ।
अष्टांगुलं तयोर्मूलं मध्यं सप्तांगुलं भवेत् ॥ १५० ॥

अग्रं त्र्यंगुलविस्तारमूर्वोर्मूलादिषु त्रिषु ।
भवेत्क्रमेण विस्तारस्सार्धं च त्रिदशांगुलम ॥ १५१ ॥

द्वादशांगुलवृत्तस्य तथैवद्वादशांगुलः ।
जङ्घाष्टांगुलविस्तारा सार्धमष्टांगुलं भवेत् ॥ १५२ ॥

जङ्घामध्यं सुविस्तीर्णं नाडिका चतुरंगुलम् ।
चतुर्यवाधिकं चैव गुल्फौ च चतुरंगुलौ ॥ १५३ ॥

विस्तारमानं त्रिगुणं सर्वेषां सहनं मतम् ।
अभीतिदो वा वरदो मुख्यो वामेतरः करः ॥ १५४ ॥

स्तनसूत्रसमं कार्यमंगुल्यग्रं करस्य तु ।
तयोर्भवेदन्तरालं द्वादशांगुलमब्जज! ॥ १५५ ॥

अंगुष्ठतर्जनीमध्ये सनालं कमलं भवेत् ।
वरदे कमलाकारं लिखेत्करतलोदरे ॥ १५६ ॥

अंगुलाधो यवादर्वाक् सजीवः क्रियते नखः ।
ततोऽग्रे जीवहीनं तु नखाग्रं परिकल्पयेत् ॥ १५७ ॥

सजीवो लोहितः किञ्चिन्निर्जीवः पांडरच्छविः ।
यवत्रितयमानेन नखाग्रं परिकल्पयेत् ॥ १५८ ॥

एवं लक्षणसंयुक्तान् मूर्त्तिभेदात् मनोहरान् ।
देवानां मानुषाणां च तिरश्चां प्राणिनामपि ॥ १५९ ॥

यथाविधानं देवानां मूर्त्तिभेदाननेकशः ।
भावप्रकाशने दक्षैर्वर्णपूरणकोविदैः ॥ १६० ॥

चित्रकैः कारयामास चित्रमेवं समन्ततः ।
स्वयं नाटकशालायां सकलाश्चर्यकारकम् ॥ १६१ ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले **वर्णसंयोजन** चित्तलेखनप्रतिमालक्षणनिरूपणं नाम द्वितीयस्तरङ्गः.

अथ तृतीयस्तरंगः

स्वामिन्नाटकशालैवं कारितेति समीरितम् ।
यदर्थं तद्विनिर्माणं नटनं तच्च कीदृशम् ॥ १ ॥

नटनार्हस्त्रियः कास्स्युस्तस्य वा कीदृशः क्रमः ।
तन्मह्यमखिलं ब्रूहि विज्ञाताखिलशास्तव! ॥ २ ॥

कुमार! तद्ब्रुवे तुभ्यं समाकर्णय सादरम् ।
प्रागल्भ्यमप्रगल्भानामुत्साहो दीनचेतसाम् ॥ ३ ॥

ईश्वराणां विलासश्च कीर्तिरौदार्यशालिनाम् ।
दुःखिनां दुःखहरणं स्थैर्यं चञ्चलचेतसाम् ॥ ४ ॥

मनो मानवतां यस्मात्तन्नृत्यं सततं मतम् ।
पुत्रोत्पत्तावभीष्टार्थसंसिद्धौ सर्वपर्वसु ॥ ५ ॥

शोभावहं सुमांगल्यं नृत्यं सर्वजनप्रियम् ।
नरेन्द्राणां विशेषेण तस्मादेतत् प्रशस्यते ॥ ६ ॥

इन्द्राभ्यर्थनया पूर्वं भारताय चतुर्मुखः ।
प्रमोदाय महेन्द्रस्य नाट्यं समुपदिष्टवान् ॥ ७ ॥

तद्वाचिकांगिकाहार्यसात्विकं स्याच्चतुर्विधम् ।
सच पुत्रशतोपेतस्सममप्सरसां गणैः ॥ ८ ॥

पुरन्दरस्य पुरतः प्रयोगमकरोन्मुनिः ।
नृत्तं यदुद्धवं तत्तु तांडवं तण्डुने शिवः ॥ ९ ॥

विकृतैरङ्गहाराद्यैरुपेतामुपदिष्टवान् ।
तण्डुनोक्तं मुनिभ्यो वै मनुष्येभ्यो महर्षिभिः ॥ १० ॥

लास्यरूपं तु यन्नृत्यं तत्पार्वत्यै महेश्वरः ।
पुरोपादिष्टवान् सम्यक् सुकुमार! प्रयोगतः ॥ ११ ॥

तद्भक्तितुष्ट्या गौर्या शिक्षिता बाणकन्यका ।
द्वारवत्यां तयाप्येतद्गोपीभ्यस्सम्प्रदर्शितम् ॥ १२ ॥

ततस्सौराष्ट्रनारीभ्यो गोपिभिस्सम्प्रदर्शितम् ।
किञ्च चित्ररथाख्येन गन्धर्वप्रभुणार्जुनः ॥ १३ ॥

शिक्षितो विविधं नृत्तं सच मार्गमिति स्मृतम् ।
शिशिक्षे सकलं तस्माद्विराटदुहितोत्तरा ॥ १४ ॥

तथाराधनतो लब्धं मनुष्येभ्य उपादिशत् ।
अपि नृत्तं विरूपं यत्तत्तद्देशनिवासिनाम् ॥ १५ ॥

देशनृत्तं तदेव स्यात्सर्वलोकानुराञ्जनम् ।
विचित्रे भावचित्रार्थचित्रचित्रोपशोभिते ॥ १६ ॥

आस्थानमण्टपे रम्ये सर्वलक्षणसंयुते ।
नानारत्नसमाकीर्णे नानालङ्कारशोभितम् ॥ १७ ॥

सिंहासनं पूर्वमुखं तन्मध्ये विनिवेशयेत् ।
श्रीमान् दाता गुणग्राही भावज्ञः कीर्तिलम्पटः ॥ १८ ॥

संगीतगुणदोषज्ञस्सर्वभाषाविशारदः ।
प्रियवाग्वादिमध्यस्थो मार्गदेशप्रभेदकः ॥ १९ ॥

धीमान् सर्वकलादक्षः सदस्यासीत भूमिपः ।
रूपयौवनसम्पन्ना सदा शृङ्गारलोलुपा ॥ २० ॥

सौभाग्यशालिनी भर्तुश्चित्तनेत्रानुसारिणी ।
देवी चोपविशेत्तत्र वामभागे महीपतेः ॥ २१ ॥

रूपयौवनसम्पन्नाः सर्वाभरणभूषिताः ।
हावभावविलासाढ्या विभ्रमादिगुणान्विताः ॥ २२ ॥

विलासिनीर्महीपस्य पश्चाद्भागे निवेशयेत् ।
वागेयकारकविताकारा ये नर्तकादयः ॥ २३ ॥

लास्यलक्षणदक्षाश्च सा तेषा मुपवेशनम् ।
अन्येऽपि ये यथायोग्यं तत्तद्विद्याविशारदाः ॥ २४ ॥

भवेयुस्ते महेशस्य नारीदूरोपवेशिनः ।
रम्यं कुसुमसंकीर्णं दीपिकाशतशोभितम् ॥ २५ ॥

विशालोज्वलचित्राढ्यं मण्टपं नृत्तदर्शने ।
पादस्थानकचार्येषु मण्डलीकरणे तथा ॥ २६ ॥

अङ्गहारे दृष्टिहस्तशिरोभावेषु शिक्षितः ।
शुद्धसंकीर्णताभिज्ञो वितते सुषिरे घने ॥ ३७ ॥

तते च वाद्ये निपुणो देशदेशाङ्गनृत्तवित् ।
स्वयं नृत्यक्रियाभिज्ञस्सर्वभाषाविशारदः ॥ ३८ ॥

नीरोगो वंशवान् स्वामिवत्सलो विजितेद्रियः ।
नित्यलोहितसंगीतशास्त्रो नर्तक इष्यते ॥ ३९ ॥

पुरोदेशे नरपतेर्दशहस्तान्तरे तदा ।
धार्या यवनिका रम्या नानावर्णविभूषिता ॥ ३० ॥

क्षत्रियाणां च वैश्यानां शूद्राणामथ भेदतः ।
वर्णाः स्युः कथिताः कामं वरमध्याधमाः क्रमात् ॥ ३१ ॥

लाटघूर्जरसौराष्ट्रमहाराष्ट्रसमुद्भवाः ।
उत्तमाः स्युर्वरारोहा नृत्ताभिनयकर्मणि ॥ ३२ ॥

मध्योत्तरसमुद्भूता मध्यमास्स्युर्मृगीदृशः ।
कर्णाटद्राविडान्ध्रेषु सम्भूताः स्युः स्त्रियोऽधमाः ॥ ३३ ॥

वयोविंशतिपर्यन्तमारभ्य द्वादशाब्दिकात् ।
उत्तमं स्यात्तदुपरि यावत्रिंशत्तु मध्यमम् ॥ ३४ ॥

आचत्वारिंशदधमं त्रिंशदूर्ध्वमुदाहृतम् ।
गौरः स्यादुत्तमो वर्णो वर्णः कृष्णोऽधमो भवेत् ॥ ३५ ॥

मध्यमो मध्यमो वर्णो वर्णस्यैवं विनिर्णयः ।
नातिदीर्घा नातिह्रस्वा न स्थूला न कृशास्तथा ॥ ३६ ॥

रूपौदार्यगुणैर्युक्ता सुमुखी दीर्घलोचना ।
सुविभक्ताङ्गवैचित्र्या घनस्तननितम्बिनी ॥ ३७ ॥

जितश्रमा बहुप्रज्ञा सुशिक्षितगतिक्रमा ।
अरोगारोग्यसम्पन्ना सततं प्रियवादिनी ॥ ३८ ॥

उक्तिप्रत्युक्तिचतुरा सहिता रञ्जकैर्गुणैः ।
गुरुदेवद्विजातीनां पूजनोद्युक्तमानसा ॥ ३९ ॥

भूषिता भूषणैस्सम्यक् सा मता नर्तकी बुधैः ।
रङ्गमण्टपमध्यस्था नमस्कुर्याच्चतुर्मुखम् ॥ ४० ॥

विकीर्णपुष्पप्रकरा भारतीं भावयेद्धिया ।
महादेव! महायोगिन्! देवदेवामरोत्तम! ॥ ४१ ॥

प्रगृह्यतां बलिर्देव! मन्त्रसंस्कारसंकृतः ।
प्रसीदत्वं महाराज! पृथिवीच ससागरा ॥ ४२ ॥

इज्ययार्चनया नित्यं प्रीयन्तां सर्वदेवताः ।
इति पुष्पाञ्जलिं क्षिप्त्वा क्षिप्त्वा यवनिकापटम् ॥ ४३ ॥

वादनोपक्रमं कुर्यान्मार्गोगिकपुरोगमम् ।
षोडश द्वादशाष्टौ वा समा मार्दंगिका मताः ॥ ४४ ॥

हुडुक्कवंशवादौ द्वौ शब्दौ तदनुसारिणौ ।
चतस्रः कांस्यतालीया गायन्त्येकाश्चवल्लकीम् ॥ ४५ ॥

अष्टौ तदनुगायिन्यस्तासु द्वे तालकोविदे ।
अष्टौ षड्वाथ चत्वारस्समाः काहलधारिणः ॥ ४६ ॥

एकश्च करचञ्चुश्च एषवाद्यविधिः स्मृतः ।
मध्यमादीन् पुरस्कृत्य श्रीरागमथवा ध्रुवाम् ॥ ४७ ॥

आदाय प्राञ्चिता लिप्तं मृडं गायेयुरङ्गनाः ।
श्रीरागो मध्यमादिश्च नाटकर्णाटकगोलकौ ॥ ४८ ॥

छायानटाश्च गतव्या रागं षट् प्राञ्चिताः स्फुटम् ।
नाट्यादित्रितये तत् स्यात् षडङ्गानि प्रचक्षते ॥ ४९ ॥

शिरो वक्षः करः पार्श्वं कटिश्चरणमित्यपि ।
उपाङ्गानि भ्रुवौ नेत्रे नासा गण्डस्थलाधरम् ॥ ५० ॥

चुबुकं चेति षट्प्राहुर्नृत्यविद्याविशारदाः ।
प्रत्यङ्गानि पुनर्ग्रीवा बाहू पृष्ठं तथोदरम् ॥ ५१ ॥

ऊरू जंघायुगं चेति षडुक्तानि महर्षिभिः ।
शीर्षं दृष्टिस्तथा तारापुटभ्रूभङ्गनासिकम् ॥ ५२ ॥

तथोदरो हनुश्चैव मुखरागस्तथा परः ।
हस्तकर्म तथा हस्तप्रचारश्च रथक्रिया ॥ ५३ ॥

बाहुरंसश्च हृदयं जटरं पार्श्वमेव च ।
कटिरूरुस्तथा जंघा पादकर्म तथापरम् ॥ ५४ ॥

स्थानकं च तथा चारिमण्डलं पादमेव च
अङ्गहारस्तथा ज्ञेयो रेचकस्तदनन्तरम् ॥ ५५ ॥

शिक्षा च पद्धतिश्चेति कथितो नृत्यसंग्रहः ।

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
नाट्यक्रमनिरूपणं नाम तृतीयस्तरङ्गः.

अथ चतुर्थस्तरंगः

शिरोदृष्ट्यादिकानां तु प्रोक्ता नृत्तोपयोगिता ।
उपयोगस्तथाङ्गस्य कथ्यतां कस्य कुत्र वा? ॥ १ ॥

स्वामिन् मह्यमिदं ब्रूहि श्रोतुं मेऽस्ति कुतूहलम् !
कुमार! शृणु तत्सर्वं वर्णयामस्तवेप्सितम् ॥ २ ॥

शिरोदृष्टिकरादीनां चाङ्गानामुपयोगिताम् ।
यथाक्रममथात्रैव लक्षणं प्रतिपाद्यते ॥ ३ ॥

धूतं विधुतमाधूतमञ्चितं कम्पितं तथा ।
आकम्पितं परावृत्तमवधूतमधोमुखम् ॥ ४ ॥

निकुञ्चितं तथा क्षिप्तं लुलितं परिवाहितम् ।
इति त्रयोदशविधं शिरः प्रोक्तं मनीषिभिः ॥ ५ ॥

रेचितं तद्विशनकैस्तिर्यग्धूतं शिरस्स्मृतम् ।
प्रतिषेधे विषादे च तथा पार्श्वावलोकने ॥ ६ ॥

विस्मयादौ प्रयोगोऽस्य कथितो नाट्यनृत्तयोः ।
तदेव शीघ्रचलनाद्विधूतं वर्णितं शिरः ॥ ७ ॥

भये शीते विषादादौ शिरस्तु विधुतं मतम् ।
उच्चैः कृतं शिरस्तिर्यगाधूतमभिधीयते ॥ ८ ॥

पार्श्वस्थोन्नतवीक्षायां गर्वादौ नाट्यनृत्तयोः ।
मनाग्विनमितं पार्श्वे कथयत्यञ्चितं शिरः ॥ ९ ॥

विनियोगोऽस्य नाट्ये स्याद्व्याधिमूर्छावमादिषु ।
कम्पितं तु शिरश्शीघ्रं मुहुरूर्ध्वं प्रकम्पितम् ॥ १० ॥

नाट्यवित्तर्कविज्ञानपृच्छादौ विनियुज्यते ।
शनैरूर्ध्वमधस्ताच्च क्रम्पादौ कम्पितं शिरः ॥ ११ ॥

पृछोपदेशसंज्ञादावेतत् स्यान्नाट्यनृत्तयोः ।
विधूतं चावधूतं च कम्पितं धूननं तथा ॥ १२ ॥

अधोमुखं लोलितं च तथोत्क्षिप्तं निकुञ्चितम् ।
एतानि नाट्येदृष्टौ शिरांस्युक्तानि कोविदैः ॥ १३ ॥

आकम्पितं परावृत्तमाधूतं परिवाहितम् ।
धुतं चेति शिरांस्याहुः पञ्चैवं नाट्यनृत्तयोः ॥ १४ ॥

स्निग्धा हृष्टा तथा दीना क्रुद्धा दृप्ता भयान्विता ।
जुगुप्सिता विस्मितेति दृशोऽष्टौ स्थायिभावजाः ॥ १५ ॥

शून्या च मलिना श्रान्ता सलज्जा शंकिता तथा ।
विषण्णा मुकुला जिह्मा ललिता च वितर्किता ॥ १६ ॥

भ्रान्तार्धमुकुला त्रस्ता विकासा केकरी तथा ।
विप्लुता मदिराज्ञाना चाभितप्ताऽथ कुञ्चिता ॥ १७ ॥

इति विंशतिरुद्दिष्टा दृष्टयो व्यभिचारिणः ।
कान्ता भयान्विता हास्या करुणा च तथाद्भुता ॥ १८ ॥

रौद्रवीरा च बीभत्सेत्यष्टौ स्यूरसदृष्टयः ।
एवमेकत्रिगुणिताष्षट्त्रिंशन्नाट्यवृत्तयः ॥ १९ ॥

सहर्षा साभिलाषा च मधुरान्तर्विकासिनी ।
स्मेरतारा भवेद् दृष्टिर्हृष्टा हास्ये प्रयुज्यते ॥ २० ॥

विस्रब्धाधोत्तरपुटा बाष्पस्थगिततारका ।
मन्दसंचारभाग्दृष्टिर्दीना शोके प्रयुज्यते ॥ २१ ॥

स्थिरोद्वृत्तापुरो रूक्षा निश्चलोध्वततारका ।
अविद्धवद्धभ्रुकुटिर्दृष्टिः क्रुद्धा भवेत् क्रुधि ॥ २२ ॥

स्थिरतारा समुत्फुल्ला प्रसादगुणशालिनी ।
दृप्ता दृष्टिः प्रयोक्तव्या भाव उत्साहनामनि ॥ २३ ॥

स्थिरा विकारसहिता निश्चला क्रूरतारका ।
दृष्टिर्निष्क्रान्तमध्येयं भये ज्ञेया भयान्विता ॥ २४ ॥

अक्षलोकसमुद्विग्ना दृष्टिस्तनिततारका ।
ससंकोचपुटा सा स्याज्जुगुप्सायां जुगुप्सिता ॥ २५ ॥

उद्धृततारकात्यर्थं समा विकसिता तथा ।
विस्पष्टविगला दृष्टिर्विस्मये विस्मयाभिधा ॥ २६ ॥

इत्यष्टौ दृष्टयः प्रोक्ताः स्थायिभावसमश्रयाः ।
निश्चला ससतारा च माह्यानर्थान् समादिशेत् ॥ २७ ॥

तथा सम्पुटोपेता शून्यदृष्टिरुदाहृता ।
मनोज्ञा विनतप्रान्ता किञ्चिद्दर्शिततारका ॥ २८ ॥

ईषदस्पृष्टपक्ष्माग्रा मलिना दृष्टिरिष्यते ।
श्रममग्नपुटद्वन्द्वा क्षामा चकिततारका ॥ २९ ॥

तथैवाञ्चितनेत्रा च दृष्टिः क्रान्ताभिधीयते ।
मनाक् पतितपक्ष्माग्रा लज्जावस्थिततारका ॥ ३० ॥

किञ्चित्संकुचिता दृष्टिर्लज्जिता कथिता बुधैः ।
चला किञ्चित् स्थिरा किञ्चिद् गूढा चकिततारया ॥ ३१ ॥

आयता तिर्यगुत्तुङ्गा शंकिता दृष्टिरीरिता ।
विस्तारितपुटद्वन्द्वा दृष्टिस्सा मुकुलाभिधा ॥ ३२ ॥

अम्भोवक्रपुटद्वन्द्वा मन्दा तिर्यग्विलोकिनी ।
गूढपात्तारका दृष्टिर्नाम्ना जिह्मेति कीर्तिता ॥ ३३ ॥
वक्रोपान्ता सकामा च भ्रूविकारसमन्विता ।
सविस्मया च मधुरा लतिका दृष्टिरिष्यते ॥ ३४ ॥
ततोद्वृत्तपुटद्वन्द्वा विकासान्वितारका ।
अधस्थितप्रचाराच ज्ञेया दृष्टिर्वितर्किता ॥ ३५ ॥
चञ्चलीकृततारा च व्याकुलभ्रान्तदर्शना ।
भृशं संस्पृष्टमध्या सा विभ्रान्ता दृष्टिरिष्यते ॥ ३६ ॥
ईषदुत्फुल्लपक्ष्माग्रा किञ्चिद्वक्रपुटद्वया ।
मनागवलिततारा या ज्ञेयार्धमुकुलाभिधा ॥ ३७ ॥
उद्वर्तितपुटा त्रासात् तरलीकृततारका ।
सुव्याकोचा च मध्या च व्यस्ता दृष्टिः प्रकीर्तिता ॥ ३८ ॥
विकासितपुटद्वन्द्वा निर्निमेषा विकासिनी ।
तथा चञ्चलतारा च विकासा दृष्टिरुच्यते ॥ ३९ ॥
मनाग्वक्रपुटा योगगिलितार्धनिमेषभाक् ।
भृशं विभ्रान्ततारा दृग्दूरालोकेषु केकरा ॥ ४० ॥
स्फुरणं स्फुरता यत्र शैथिल्यं स्तब्धता तथा ।
उद्वृत्ततारकाद्वन्द्वा दृशं तां विकृतां विदुः ॥ ४१ ॥
आकम्पमानमध्या या सौष्ठवेन विवर्जिता ।
दृष्टिर्विकासितारा सा मदिरेति निगद्यते ॥ ४२ ॥
भ्रूपक्ष्माग्रपुटैर्लानैः क्रमस्मेरिततारका ।
शिथिला मन्दसञ्चारा ग्लाना दृष्टिरुदाहृता ॥ ४३ ॥
सव्यथा मन्दतारा च सन्तप्ता चञ्चलैः पुटैः ।
अभितप्ताभिधा दृष्टिर्विज्ञेया भावुकैर्जनैः ॥ ४४ ॥
मनाग्वर्तितपक्ष्माग्रा पत्रीकृतपुटद्वया ।
श्रान्ता विकृततारा च कुञ्चिता दृष्टिरिष्यते ॥ ४५ ॥
इत्युक्ता व्यभिचारिण्यो विंशतिर्नाट्यदृष्टयः ।
अभितप्ता च शून्या च चिन्तायां दृष्टिरिष्यते ॥ ४६ ॥
वैवर्ण्ये चारिनिर्वेदे दृष्टिः स्यान्मलिनाभिधा ।
भेदे क्रमे भवेच्छ्रान्ता त्रपायां लज्जिता मता ॥ ४७ ॥
व्यायामे चाप्यपस्मारे ग्लाना दृष्टिः प्रकीर्तिता ।
सविषादा विषादे स्याच्छङ्कायमपि शंकिता ॥ ४८ ॥
दुःखे स्वप्ने सुषुप्तौ च मुकुला दृष्टिरिष्यते ।
अक्षिरोगेऽप्यसूयायां दुःखेक्षे कुञ्चिका भवेत् ॥ ४९ ॥
निर्वेदेऽप्यभितप्ता दृगभिघातोपघातयोः ।
जडतायामसूयायां जिह्मा दृष्टिः प्रकीर्तिता ॥ ५० ॥

वितर्किता स्मृतौ तर्के ललिता धृतिहर्षयोः ।
आनन्दे चार्धमुकुला स्पर्शगन्धरसादिषु ॥ ५१ ॥
विभ्रान्ता विभ्रमे दृष्टिस्संग्रामावेगयोरपि ।
विष्णुता दृष्टिरुन्मादे चापले मरणादिषु ॥ ५२ ॥
केकरा च भवेद्दृष्टिर्दूरालोकविलोकने ।
मदेषु मदिरा दृष्टिस्सलासा लासदर्शने ॥ ५३ ॥
प्रसादहर्षसम्भूता सकामापाङ्गसङ्गता ।
सम्भोगनाम्नि शृङ्गारे कान्ता दृष्टिः प्रयुज्यते ॥ ५४ ॥
स्तब्धोद्वृत्तपुटद्वन्द्वा ललिता दृधततारका ।
भये भयानका दृष्टिर्नाट्यज्ञैस्सम्प्रयुज्यते ॥ ५५ ॥
क्रमवक्रपुटद्वन्द्वा किञ्चिद्विभ्रान्ततारका ।
हास्यदृष्टिरियं प्रोक्ता हास्याभिनयकर्मणि ॥ ५६ ॥
पतितोर्ध्वपुटा साम्रा नासिकाग्रावलोकिनी ।
शोकमन्थरतारा च करुणे करुणैव दृक् ॥ ५७ ॥
समाकुञ्चितपक्ष्माग्रा विस्वप्नोद्वृत्ततारका ।
विस्तीर्णान्ताच सौम्या च दृष्टिः स्याददद्भुतेऽद्भुता ॥ ५८ ॥
रूक्षा क्रूरारुणोद्वृत्ता विस्तब्धपुटतारका ।
कुटिलभ्रूकुटिर्दृष्टी रौद्रा रौद्ररसे भवेत् ॥ ५९ ॥
गम्भीरा समताराच दीप्ता क्षेपविवर्जिता ।
उत्फुल्लाभ्यन्तरा दृष्टिर्वीरा वीररसे भवेत् ॥ ६० ॥
निकुञ्चितपुटोपान्ता सुश्लिष्टा स्थिरसूक्ष्मभाक् ।
वीभत्से सघृणा दृष्टिर्बीभत्सकथिता रसे ॥ ६१ ॥
एवमेकीकृतास्सर्वाष्षट्त्रिंशदृष्टयः स्मृताः ।
आलोकितं समं त्यस्नं प्रलोकितविलोकिते ॥ ६२ ॥
उल्लोकिता सुवृत्ताच ततोऽन्यदवलोकितम् ।
इत्यष्टौ दर्शने भेदास्तेषां लक्षणमुच्यते ॥ ६३ ॥
वीक्षणं सहसा यद्वाद्वदन्त्यालोकितं हि तत् ।
सौम्यं यत्समातरं च समन्ताद्दर्शनं विदुः ॥ ६४ ॥
दृष्टिस्सा च भवेत्सास्रं पक्ष्मान्तर्वत्तितारकम् ।
पार्श्वयोर्दर्शनं यत्स्यात्तत्प्रलोकितमुच्यते ॥ ६५ ॥
विलोकितं तु विज्ञेयं पृष्ठभागनिरीक्षणम् ।
उल्लोकितं परिज्ञेयमूर्ध्वभागनिरीक्षणम् ॥ ६६ ॥
ऊर्ध्वस्थदर्शनं प्राहुरनुवृत्तं विचक्षणाः ।
अधस्ताद्दर्शनं प्राहुरवलोकनसंज्ञितम् ॥ ६७ ॥
इत्यष्टौ दर्शने भेदा नृत्तनाट्यसमाश्रयाः ।
व्यसनं चलनं पातो भ्रमणं च प्रदेशनम् ॥ ६८ ॥

निवर्तनं च निष्कामं समुद्वृत्तमतः परम् ।
प्राकृतं चेति कर्मेदं तारयोर्नवधा स्मृतम् ॥ ६९ ॥
व्यसनं चलनं चेति वलनं तिर्यगीक्षणम् ।
त्रस्ततारं भवेत्पातो भ्रमणं च पुटान्तरे ॥ ७० ॥
तारयोर्मण्डलावृत्तिः प्रवेशोऽन्तः प्रवेशनम् ।
निवर्तनं कटाक्षः स्यान्निष्क्रामो निर्गमो मतः ॥ ७१ ॥
समुन्नतिस्समुद्वृत्तसहजं सातु तद्भवेत् ।
निष्कामं चलनं चैव करुणे च भयानके ॥ ७२ ॥
हास्ये रसे च बीभत्से प्रवेशनमुदाहृतम् ।
निष्क्रामश्चलनोद्वृत्तिः भ्रमणं वीररौद्रयोः ॥ ७३ ॥
करुणे पातनं कार्यं निष्क्रामश्चाद्भुते रसे ।
तारकर्मेतिकथितं रसभावसमाश्रयम् ॥ ७४ ॥
विवर्त्तितं ततोन्मेषः पिहितं कुञ्चितं समम् ।
वितालिते च स्फुरितं निमेषः प्रसृतं तथा ॥ ७५ ॥
विवर्त्तितं समुद्वृत्तमुन्मेषः पुटयोः पुनः ।
विश्लेषस्तु परिज्ञेयः पिहितं स्तनितं भवेत् ॥ ७६ ॥
अञ्चितं कुञ्चितं स्यात्तु समं नैसर्गिकं मतम् ।
वितालितं वाहितं स्यात् पिण्डितं स्फुरितं भवेत् ॥ ७७ ॥
निमीलितं निमेषः स्यात्प्रसृतं च प्रसारितम् ।
कोपे विवर्त्तितं प्रोक्तं निमेषोन्मेषसंयुतम् ॥ ७८ ॥
वीरविस्मयहर्षेषु प्रसृतं तु प्रकीर्त्तितम् ।
निकुञ्चितं निमेषे च गन्धस्पर्शरसादिषु ॥ ७९ ॥
स्फुरितं स्यादनर्थाय शृङ्गारेतु समं मतम् ।
धूमोष्णवातमूर्छादौ पिहितं परिकीर्त्तितम् ॥ ८० ॥
वितालितं परिज्ञेयमभिभूते मनीषिभिः ।
तारापुटप्रकारोऽयं रसभावेषु दर्शितः ॥ ८१ ॥
भ्रुकुटिः कुञ्चनं चैव रेचितं पातनं तथा ।
उत्क्षेपस्सहजं चैव चतुरं चेति सप्तधा ॥ ८२ ॥
भ्रूमध्यमूलविक्षेपो भ्रुकुटिः कथिता बुधैः ।
वीरः स्यान्मृदुभंगेन द्वयोर्वास्यान्निकुञ्चितम् ॥ ८३ ॥
रेचितं पुनरेकस्य ललितोत्क्षेपणाद् भ्रुवः ।
पातितं पुनरेकस्य द्वयोर्वा स्यादधोगतिः ॥ ८४ ॥
समुद्गतिरुत्कोपो भ्रुवोरेकैकशोऽथवा ।
निसर्गतस्समुत्पन्नं सहजं परिकीर्त्तितम् ॥ ८५ ॥
चतुरं चेषदुछ्वासमसृणायतता भ्रुवोः ।
हेलावितर्ककोपेषु दर्शने श्रवणे तथा ॥ ६ ॥८

लीलया सहजः केकामूर्ध्वं सञ्चारयेद् भ्रुवम् ।
रोषविस्मयहर्षेषु शाम्यत्कोपोद्भवो भ्रुवोः ॥ ८७ ॥
हासासूयाजुगुप्सासु घ्राणे च पतनं भ्रुवोः ।
क्रोधाश्रयेष्वनेकेषु भ्रुकुटिः पुटना भवेत् ॥ ८८ ॥
चतुरं स्यात्सुखस्पर्शि शृङ्गारे ललिते तथा ।
मोहान्विते विलासे च किलिकिञ्चितवृत्तयोः ॥ ८९ ॥
तथा कुट्टिमिते प्राज्ञे भ्रुवोः कार्यं निकुञ्चितम् ।
विधेयं रचितं सद्भिः कारणादागते क्षणे ॥ ९० ॥
अनुद्धतेषु भावेषु भवेत्स्वाभाविकं मतम् ।
एवं प्रवसितान्यत्र भ्रुवोः कर्माणि सप्तधा ॥ ९१ ॥
स्वाभाविकी नता मन्दा सोच्छ्वासा च निकूणिता ।
विकृष्टा चेति निर्दिष्टा नासिका षड्विधा बुधैः ॥ ९२ ॥
स्वाभाविकी समाज्ञेया मुहुःश्लिष्टपुटा नता ।
निभृता कथिता मन्दा सोच्छ्वासा हृतमारुता ॥ ९३ ॥
निकूणिता ससंकोचा मन्दं वायुप्रचारिणी ।
निकृष्टा च परिज्ञेया श्वासोच्छ्वासादिकस्फुटा ॥ ९४ ॥
इति नाट्ये समुद्दिष्ट [1] नासाकर्म मनीषिभिः ।
रुदिते मन्दविच्छिन्ने सोच्छ्वासा नासिका नता ॥ ९५ ॥
औत्सुक्ये चित्तनिर्वेदे मन्दा शोके च नासिका ।
तीव्रगन्धे विकृष्टा स्याद्रोषश्वासभयार्तिषु ॥ ९६ ॥
हृद्यगन्धेषु सोच्छ्वसो दीर्घोच्छ्वासे कृते तथा ।
असूयायां जुगुप्सायां हास्ये प्रोक्ता निकूणिता ॥ ९७ ॥
स्वाभाविकी स्याद्भावेषु शेषे श्लिष्टातु नासिका ।
कम्पितः कुञ्चितः क्षामः फुल्लः पूर्णस्समस्तथा ॥ ९८ ॥
इति षोढा समुद्दिष्टो गण्डस्तल्लक्ष्म कथ्यते ।
स्फुरितः कम्पिताभिख्यस्ससंकोचस्तु कुञ्चितः ॥ ९९ ॥
अवनम्रस्तथा क्षामः फुल्लो विकसितः पुनः ।
पूर्णस्समुन्नतः प्रोक्तः स्तथा स्वाभाविकस्समः ॥ १०० ॥
इति गण्डास्समुद्दिष्टाष्षड्विधाः पूर्वसूरिभिः
दुःखे क्षामो विधातव्यः प्रमोदे फुल्ल इष्यते ॥ १०१ ॥
उत्साहगर्वयोः पूर्णः कम्पितो दुःखहर्षयोः ।
शीते ज्वरे भये स्पर्शे रोमाञ्चे चैव कुञ्चितः ॥ १०२ ॥
अवशिष्टेषु भावेषु प्राकृतं कर्म गण्डयोः ।
विवर्त्तितं विसर्गश्च कम्पनं विनिगूहनम् ॥ १०३ ॥

1) नासाषोढा मनीषिभिः.

सन्दष्टकसमुद्गौ च षोढा कर्माधराश्रयम् ।
विवर्त्तितं समुद्दिष्टमधरस्य निकूणनम् ॥ १०४ ॥
विसर्गश्च विनिष्क्रामः स्फुरणं कम्पनं भवेत् ।
विनिगूढप्रवेशः स्यात्सन्दष्टो दशनक्षतम् ॥ १०५ ॥
श्लिष्टोऽधरस्समुद्गः स्यादधरे लक्ष्म षड्विधम् ।
अवज्ञावेदनासूयाहास्यादौ स्याद्विवर्त्तितम् ॥ १०६ ॥
जये रोषे भये श्रान्तिवेदनादौ च कम्पितम् ।
आयासे च विलासे च रञ्जनादौ च गूहनम् ॥ १०७ ॥
क्रोधकर्मणि सन्दष्टं समुद्गं चुम्बनादिषु ।
खण्डनं कुट्टनं भिन्नं लेहनं छुतितं समम् ॥ १०८ ॥
दष्टं च दन्तयोगे च चुबुकं सप्तधा भवेत् ।
कोपे च खण्डनं ज्ञेयं दन्तघृष्टैश्च कुट्टनम् ॥ १०९ ॥
भयव्याधिज्वराशीतग्रस्तानां कुट्टनं स्मृतम् ।
व्यायामे रुदिते शीते भिन्नं व्याधिभयादिषु ॥ ११० ॥
लेहनं लेह्यलेहादौ जृम्भिते छुतितेमतम् ।
समं सहजभावेषु सन्दष्टं कोपकर्मणि ॥ १११ ॥
इति जिह्वोष्ठदन्तानां व्यापारैश्चुबुकक्रिया ।
श्यामं रिक्तं प्रसन्नं च तुर्यं स्वाभाविकं मुखम् ॥ ११२ ॥
श्यामं तु जायते वक्त्रं बीभत्से च भयानके ।
मदे वीरे च रौद्रेच जायते रक्तमाननम् ॥ ११३ ॥
प्रसन्नमद्भुते वक्त्रं हास्यश्रृङ्गारयोरपि ।
स्वरूपावस्थितं वक्त्रं भवेत् स्वाभाविकं पुनः ॥ ११४ ॥
कन्धरायात्तु कर्माणि शिरः कर्मानुगानि यत् ।
अतस्तस्या मयाकर्म पृथङ् नेह प्रदर्शितम् ॥ ११५ ॥
इति शीर्षादिकण्ठान्तमङ्गानां कर्म वर्णितम् ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले भरते शीर्षादि-कण्ठान्ताभिनयनिरूपणं नाम शतुर्थस्तरङ्गः.

अथ पञ्चमस्तरंगः

अङ्गानां शीर्षमुख्यानां विनियोग उदीरितः ।
इदानीं शृणु हस्तस्य विनियोगो निरूप्यते ॥ १ ॥
विसर्गो धूननं रक्षा संश्लेषो मोक्षणं तथा ।
विक्षेपान्दोलने चैव विग्रहस्तु परिग्रहः ॥ २ ॥
अकर्षणं विकर्षः स्याद्वियोगोत्कर्षणे तथा ।
ताडनं मोटनं भेदश्छेदनं स्फोटनं तथा ॥ ३ ॥
आह्वानं तर्जनं चेति हस्तकर्माणि विंशतिः ।
एषामन्वर्थसंज्ञत्वान्न पृथग् लक्ष्म कथ्यते ॥ ४ ॥
अधोमुखस्यथोत्तानस्तथा पार्श्वगतः पुरः ।
करप्रचारस्त्रिविधो नाट्यनृत्तेषु युज्यते ॥ ५ ॥
पूर्वमावेष्टितं ज्ञेयमुद्वेष्टितमतः परम् ।
व्यावर्त्तितं ततः प्रोक्तं परं च परिकीर्त्तितम् ॥ ६ ॥
चतुर्धा हस्तकरणं प्रोक्तं तल्लक्ष्म कथ्यते ।
अभ्यन्तरे यथांगुल्यस्तर्जनी प्रमुखाः क्रमात् ॥ ७ ॥
प्रवेष्ट्यन्ते तु करणमावेष्टितमिदं हि तत् ।
वहिर्मुखा यथांगुल्यस्तर्जन्याद्या यथाक्रमम् ॥ ८ ॥
उद्वेष्ट्यन्तेतुकरण मुद्वेष्टितपदाभिदम् ।
अभ्यन्तरे कनिष्ठाद्या व्यावर्तन्ते यथाक्रमम् ॥ ९ ॥
अंगुल्याः करणं ज्ञेयं तदा व्यावर्त्तिताभिधम् ।
अंगुल्यः परिवर्तन्ते कनिष्ठाद्या वहिर्यथा ॥ १० ॥
क्रमेणैव तदा ज्ञेयं करणं परिवर्तितम् ।
ऊर्ध्वः प्रसारितस्तिर्यगञ्चितोऽधोमुखस्तथा ॥ ११ ॥
स्वस्तिको मण्डलगतिरपविद्धस्तथापरः ।
पृष्ठानुसारितश्च स्यादुद्वेष्टितक इत्यपि ॥ १२ ॥
दशधा कथितः प्राज्ञैः प्रचारो बाहुसंश्रयः ।
संज्ञातो ज्ञातरूपाणामेषां लक्ष्म न कथ्यते ॥ १३ ॥
चतुरस्रौ करौ पूर्वमुद्धृताख्यौ ततः परम् ।
ततस्तलमुखौ ज्ञेयौ स्वस्तिकौ विप्रकीर्णकौ ॥ १४ ॥

अरालकटकावक्त्रौ ततश्चाविद्धवक्त्रकौ ।
सूच्यास्यौ रेचिताख्यौ च भवेनामर्धरेचितौ ॥ १५ ॥
उत्तानसंज्ञकौ चान्यौ पल्लवौ च नितम्बकौ ।
केशबन्धौ लताख्यौ च करिहस्तावतः परम् ॥ १६ ॥
पक्षवञ्चितनामानौ पक्षप्रोद्यतकौ ततः ।
तार्क्ष्यपक्षौ करौ स्यातां दण्डपक्षौ प्रकीर्त्तितौ ॥ १७ ॥
ऊर्ध्वमण्डलकौ हस्तौ पार्श्वमण्डलिकावपि ।
उरोमण्डलिनावन्या वुरः पार्श्वार्धमण्डलौ ॥ १८ ॥
मुष्टिकस्वस्तिकौ हस्तौ नलिनीपद्मकोशकौ ।
ललितौ वलितौ स्यातां नलपद्मौ तथोल्वणौ ॥ १८ ॥
नृत्यहस्ता इमे प्रोक्तास्संयुक्ता नृत्यवेदिभिः ।
समकूर्परसस्कन्धौ वक्षसोऽष्टांगुलस्तथा ॥ २० ॥
प्राङ्मुखौ कटकावक्त्रौ चतुरस्त्रौ निरूपितौ ।
तालवृन्तवदुद्वृत्तौ हंसपक्षौ यदा करौ ॥ २१ ॥
वक्षसं सम्मुखौ भूता वुद्वृत्तावििति कीर्त्तितौ ।
हंसपक्षौ तथा हस्तावन्योन्याभिमुखौ स्थितौ ॥ २२ ॥
रेचितौ त्रिस्वभावेन स्यातां तल्मुखौ तथा ।
मणिबन्धसमीपस्थौ हंसपक्षाभिधौ तदा ॥ २३ ॥
स्थितौ स्वस्तिकरूतेण स्वास्तिकौ कथितौ करौ ।
करौ स्वस्तिकनामानौ विश्लिष्टौ मणिबन्धनात् ॥ २४ ॥
भवेतां हंसपक्षाभौ विप्रकीर्णाभिधौमतौ ।
पुरस्तामरसान्यस्तः कटकाख्यः पराङ्मुखः ॥ २५ ॥
तिर्यक् प्रसारितः किञ्चिदरालश्चोन्नताननः ।
निजस्थान गतावेतौ विन्यस्तव्यस्तकौ तथा ॥ २६ ॥
सव्यापसव्यतः स्यातामरालकटकामुखौ ।
भुजकूर्परबाह्वग्रैर्वक्रैरावर्त्तितौ करौ ॥ २७ ॥
अवाङ्मुखतलौ हस्तावर्तावाविद्धवक्त्रकौ ।
भुजङ्गमस्तकौ हस्तौ किञ्चित्कुञ्चितकूर्परौ ॥ २८ ॥
मध्यांगुष्ठौ करौ तिर्यक् सूचिवक्त्रौ प्रकीर्त्तितौ ।
हंसपक्षौ धृतौ भ्रान्तौ पार्श्वदेशप्रसारितौ ॥ २९ ॥
हस्तौ हस्तविशेषज्ञैः प्रथितौ पल्लवौ करौ ।
स्कन्धादूर्ध्वं विनिष्क्रान्तौ त्रिपताकाकरौ यथा ॥ ३० ॥
नितम्बाविति विख्यातौ निबन्धे कृतिरेचितौ ।
पार्श्वतः केशबन्धाश्च नितम्वा बहुशो यदा ॥ ३१ ॥
तदा हस्तविशेषज्ञैः केशबन्धाविति स्मृतौ ।
त्रिपताकौ यदा हस्तौ कर्णोपान्तमुपागतौ ॥ ३२ ॥

तौ लतापार्श्वतः पार्श्वे हस्तौ तु करिहस्तकौ ।
कटिमस्तकलग्नाग्रौ त्रिपताकौ यदा करौ ॥ ३३ ॥
प्रयोगज्ञैस्सदा ज्ञेयौ पक्षपञ्चितसंज्ञकौ ।
एतावेव परावृत्तौ पक्षप्रद्योतकौ करौ ॥ ३४ ॥
त्रिपताकापताकौ वा नितम्बस्थावधो मुखौ ।
कूर्परौ कुञ्चितौ किञ्चित् करौ गडरुपक्षकौ ॥ ३५ ॥
हंसपक्षौ यदा हस्तौ व्यावृत्तौ परिकीर्त्तितौ ।
प्रसारितभुजौ तिर्यग्दण्डपक्षावुदाहृतौ ॥ ३६ ॥
हस्ता वरालनामाना वूर्ध्वदेशप्रवर्त्तितौ ।
आवृत्तिपरिवृत्तिभ्यामूर्ध्वमण्डलिनौ करौ ॥ ३७ ॥
तथैव पार्श्वविन्यस्तौ पार्श्वमण्डलिकाविमौ ।
एक उद्वेष्टितो हस्तो द्वितीयोऽप्यपवेष्टितः ॥ ३८ ॥
वक्षस्समीपविन्यस्ता वुरोमण्डलिनौ करौ ।
अलपल्लवकाराला वुरः पार्श्वान्तरस्थितौ ॥ ३९ ॥
पूर्ववद्भ्रमितौ हस्तावुरःपार्श्वार्धमण्डलौ ।
मणिबन्धसमीपस्थौ स्वस्तिकाकारधारिणौ ॥ ४० ॥
कटकावदनौ हस्तौ मुष्टिकस्वस्तिकौ मतौ ।
व्यावृत्तिपरिवर्त्तिभ्यां पद्मकोशाभिधौ करौ ॥ ४१ ॥
स्यातां जानुसमीपस्थौ नलिनीपद्मकोशकौ ।
पल्लवाभौ शिरस्स्थाने हस्तौ ललितसंज्ञकौ ॥ ४२ ॥
मुष्टिकस्वस्तिकौ हस्तौ शिरोदेशवितर्त्तितौ ।
उक्तौ वलितनामानौ नृत्तविद्याविशारदैः ॥ ४३ ॥
करौ प्रसारितावूर्ध्वानलपद्म समाश्रयौ ।
उद्वेष्टिताग्रौ विज्ञेयौ नृत्तज्ञैरुल्वणाभिधौ ॥ ४४ ॥
पताकः प्रथमो हस्तस्त्रिपताकस्ततः परम् ।
कर्तरीमुखसंज्ञः स्यादर्धचन्द्रोऽप्यरालकः ॥ ४५ ॥
शुकतुण्डस्ततो ज्ञेयो मुष्टिकस्तदनन्तरम् ।
शिखरश्च कपित्थश्च तथान्यः कटकामुखः ॥ ४६ ॥
सूच्यास्यः पद्मकोशश्च सपर्शीर्षस्ततः परम् ।
मृगशीर्षश्च लांगूलो ह्यलपद्मस्तथैव च ॥ ४७ ॥
चतुरो भ्रमरश्चैव हंसास्यो हंसपक्षकः ।
संदंशमुकुलौ स्यातामूर्ध्वनाभस्ततः परम् ॥ ४८ ॥
ताम्रचूड इति प्रोक्ताश्चतुर्विंशतिसङ्ख्यकाः ।
अंगुष्ठतर्जनीमूले संलग्नी यत्र कुञ्चितः ॥ ४९ ॥
अंगुल्यः प्रसृताः श्लिष्टाः सपताकाकरः स्मृतः ।
प्रतापनप्रहारादौ विनियोगोऽस्य दर्शितः ॥ ५० ॥

स एव त्रिपताकः स्याद्वक्रितानामिकांगुलिः ।
मङ्गले द्रव्यसंस्पर्शे तिलकस्य कृतावपि ॥ ५१ ॥
अश्रुप्रमार्जनादौ च विनियोगः प्रदर्शितः ।
अस्यैव मध्यमापार्श्वे तर्जनीपृष्ठदर्शिनी ॥ ५२ ॥
कर्तरीमुखनामासौ करः प्रोक्तस्तथा बुधैः ।
वियाविरजने मार्गदर्शनादावयं करः ॥ ५३ ॥
सांगुष्ठाः करशाखाः स्युर्विनता यत्र चापवत् ।
तमाहुरर्धचन्द्राख्यं चन्द्रलेखादिदर्शने ॥ ५४ ॥
पताके तर्जनीवक्रो नाम्ना सोऽयमरालकः ।
शौर्यगाम्भीर्यधैर्यादौ विनियोगोऽस्य दर्शितः ॥ ५५ ॥
अस्यैव हृदि हस्तस्य कुञ्चितानामिका भवेत् ।
शुकतुण्डस्तदा सोऽपि सत्यमिथ्यादिषु स्मृतः ॥ ५६ ॥
अंगुष्ठेनातिपीड्यन्ते यदांगुल्यस्तलस्थिताः ।
तदा स्यान्मुष्टिकः खड्गग्रहणादौ नियुज्यते ॥ ५७ ॥
अंगुष्ठो मुष्टिकस्यैव यदा स्यादूर्ध्वनिर्गतः ।
तदासौ शिखरः कार्यः प्रग्रहग्रहणादिषु ॥ ५८ ॥
अस्यैव तर्जनी वक्रा यदांगुष्ठनिपीडिता ।
तदा कपित्थकः कार्यः खड्गव्यायुद्धदर्शने ॥ ५९ ॥
कपित्थस्यैव हस्तस्य कनिष्ठानामिका यथा ।
उत्क्षिप्ता कुञ्चिता किञ्चित्तदास्यात्कटकामुखः ॥ ६० ॥
आदर्शचामरच्छत्रधारणादौ नियुज्यते ।
अस्यैव यदि हस्तस्य तर्जनी प्रसृता भवेत् ॥ ६१ ॥
सूचीमुखस्तदा हस्तो विद्युद्दीपादिदर्शने ।
अंगुष्ठसहितास्सर्वाः करशाखास्सुसंहताः ॥ ६१ ॥
निम्नं तलं च यत्र स्यात्सहस्तस्सर्पमस्तकः ।
इभकुम्भतलास्फाले भुजङ्गगतिदर्शने ॥ ६२ ॥
अंसरखुल्लुकवासादौ विनियोगोऽस्य दर्शितः ।
अस्मिन् कनिष्ठिकांगुष्ठावूर्ध्वावन्याश्च संहताः ॥ ६४ ॥
अधोमुखास्तथांगुल्यस्स हस्तो मृगशीर्षकः ।
अक्षपातेऽथवा स्वेदमार्जनादौ नियुज्यते ॥ ६५ ॥
मध्यमांगुष्ठतर्जन्यो यत्र त्रेताग्निवत् स्थिताः ।
कुञ्चितानामिका चोर्ध्वा कनिष्ठा चेत्तुलांगुलम् ॥ ६६ ॥
मणिपूरफलादीनां दर्शने सा नियुज्यते ।
आवर्त्तिताः करतले यस्मिन्नंगुल्योऽखिलाः ॥ ६७ ॥
पार्श्वागताश्च विरलाः करोऽसावलपद्मकः ।
निषिद्धशून्यवाक्यादौ हस्तोऽयं विनियुज्यते ॥ ६८ ॥

ऊर्ध्वे कनीयसी यस्मिन्नसौ न्यासः प्रसारितः ।
अंगुष्ठो मध्यमामध्ये सहस्तश्चतुरः स्मृतः ॥ ६९ ॥
विनये नियमादौ च विनियोगोऽस्य दर्शितः ।
वक्रा प्रदेशिनी यस्मिन् संदंशोगुष्ठमध्ययोः ॥ ७० ॥
कनिष्ठानामिका चोर्ध्वे विरले भ्रमरस्तु सः ।
विनियोगोऽस्य विज्ञेयः कर्णपूरादिदर्शने ॥ ७१ ॥
मध्यमांगुष्ठतर्जन्यः संश्लिष्टाग्राः परे पुनः ।
ऊर्ध्वे च विरले यस्मिन् हंसवक्त्रस्स कीर्त्तितः ॥ ७२ ॥
किञ्चित्प्रसारिताग्रोऽसौ मृदुत्वादौ प्रयुज्यते ।
ऊर्ध्वा कनीयसी यस्मिन्नंगुष्ठः कुञ्चितो मनाक् ॥ ७३ ॥
शेषाः प्रसारिताः श्लिष्टास्स हस्तो हंसपक्षकः ।
प्रतिग्रहेष्वाचमनप्रभृतिष्वेव दृश्यते ॥ ७४ ॥
यत्रांगुष्ठस्य तर्जन्या संदंशः परिदृश्यते ।
ऊर्ध्वाश्च विरलाश्शेषास्स संदंशकरो मतः ॥ ७५ ॥
एष प्रयुज्यते हस्तः कुसुमोपचयादिषु ।
अंगुलीपञ्चकं यत्र मिलिताग्रं प्रदृश्यते ॥ ७६ ॥
मुकुलो मुकुलाकारः करोऽसौ परिकीर्त्तितः ।
भोजने देवपूजायामेष हस्तः प्रयुज्यते ॥ ७७ ॥
अंगुल्यः कुञ्चितास्सर्वाः पद्मकोशो यथा तथा ।
ऊर्णनाभिस्तदा हस्तश्शिरः कण्डूयनादिषु ॥ ७८ ॥
तर्जनी कुञ्चिता यत्र संदंशोऽङ्गुष्ठमध्ययोः ।
शेषे तलगताग्रे च ताम्रचूडकरः स्मृतः ॥ ७९ ॥
वालविश्वासदेशेर्घदर्शने तालपातने ।
जृम्भणे च तथा राज्ञां ताम्रचूडाकरो भवेत् ॥ ८० ॥
इत्यसंयुतहस्तानां चतुर्विंशतिरीरिताः ।
अञ्जलिः प्रथमः प्रोक्तः कपोतः कर्कटस्तथा ॥ ८१ ॥
स्वस्तिकाख्यस्स विज्ञेयो कटको वर्धमानकः ।
उत्सङ्गो 1) नीषगान्दोलौ ततः पुष्पपुटः करः ॥ ८२ ॥
मकरो गजदन्तश्च वर्धमानो वहित्थकः ।
एते तु संयुता हस्तास्त्रयोदश प्रकीर्त्तिताः ॥ ८३ ॥
पताकाकारहस्ताभ्यां श्लिष्टाभ्यामञ्जलिर्भवेत् ।
निर्वाणगुणविप्राणामयं स्यादभिवादने ॥ ८४ ॥
अन्योन्यपार्श्वसंश्लेषात्कपोतः करयोर्मतः ।
प्रणामे विनयादौच प्रयोगोऽस्य प्रदृश्यते ॥ ८५ ॥

1) नीषदङ्गश्च.

अंगुल्यः करयोर्यस्मिन्नन्योन्यं मध्यनिर्गताः ।
स करः कर्कटः कम्बुवादनादौ प्रयुज्यते ॥ ८६ ॥
करावरालावुत्तानौ मणिवन्धे निवेशितौ ।
वामपार्श्वगतौ चेत्स्यात्स हस्तः स्वस्तिकाभिधः ॥ ८७ ॥
मेघवार्धिवनादीनां विशिष्टानां च दर्शने ।
कटकाख्यो यदा हस्तावन्योन्याभिमुखीकृतौ ॥ ८८ ॥
कटको वर्धमानोऽयं प्रणामादौ नियुज्यते ।
करौ चेत्सर्पशीर्षाख्यौ क्रियते स्वस्तिकाकृतिः ॥ ८९ ॥
व्यत्यस्तभुजसम्बन्धा वुत्सङ्गः स्यात्करस्तुसः ।
परीरम्भे च कम्पदौ करोऽयं विनियुज्यते ॥ ९० ॥
करं मुकुलनामानं कपित्थकरवेष्टितम् ।
वदन्ति नीषदङ्गोऽयं समयादिषु दृश्यते ॥ ९१ ॥
शिथिलांसौ यदा हस्तौ पताकाख्यौ प्रलम्बितौ ।
तदान्दोलाह्वयो हस्तो विषादादौ प्रयुज्यते ॥ ९२ ॥
हस्तस्पर्शशिरस्संज्ञावन्योन्यं पार्श्वसङ्गतौ ।
हस्तः पुष्पपुटस्स स्याद्देवतातर्पणादिषु ॥ ९३ ॥

हस्तौ पताकनामानावूर्ध्वाङ्गुष्ठावधोमुखौ ।
उपर्युपरि विन्यस्तौ स करः कथितः करः ॥ ९४ ॥
विनियोगोऽस्य शार्दूलसिंहनकादिदर्शने ।
अन्योन्याभिमुखौ हस्तौ किञ्चित्कुञ्चितकूर्परौ ॥ ९५ ॥
सर्पशीर्षकरौ सोऽयं गजदन्तः प्रकीर्तितः ।
कूटपर्वतपाषाणस्तम्भादिग्रहणादिषु ॥ ९६ ॥
पराङ्मुखौ हंसपक्षौ वर्धमानो भवेत्करः ।
विनियोगोऽस्य मन्तव्यः कवाटोत्पाटनादिषु ॥ ९७ ॥
अभिवक्षस्स्यलं स्यातां शुकतुण्डौ यदा करौ ।
शनैरधोमुखं नीताववहित्यस्तदा करः ॥ ९८ ॥
दौर्बल्यौत्सुक्यनिःश्वासगात्रखासेष्वसौ भवेत् ।
एतेतु संयुता हस्तास्त्रयोदश निरूपिताः ॥ ९९ ॥
एवं कराश्चतुष्षष्टिर्नाट्यनृत्तोपयोगिनः ।
दर्शितास्सङ्ग्रहेणैव विनियोगपुरस्सरम् ॥ १०० ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
हस्ताभिनयवर्णनं नाम पञ्चमस्तरङ्गः.

अथ षष्ठस्तरंगः

अथ वक्षः प्रभृत्यङ्गभेदानां लक्षणानि तु ।
निगद्यन्ते क्रमेणैव विनियोगपुरस्सरम् ॥ १ ॥
सममुद्वाहितं चैव निभुग्नं च प्रकम्पितम् ।
आभुग्नं चेति विज्ञेयं वक्षः पञ्चविधं भवेत् ॥ २ ॥
सकलैरङ्गविन्यासैस्समैस्सौष्ठवसंयुतः
स्वभावावस्थितं वक्षस्समं नाम प्रकीर्त्तितम् ॥ ३ ॥
ऊर्ध्ववक्त्रं तु विज्ञेयं वक्ष उद्वाहिताभिधम् ।
उन्नतालोकजृम्भादौ प्रयोगोऽस्य प्रदृश्यते ॥ ४ ॥
उन्नतं निर्वपुष्टं च निभुग्नांसं च निश्चलम् ।
निभुग्नसंज्ञकं वक्षो वार्तादौ विनियुज्यते ॥ ५ ॥
वक्षो यत्र भवेद्युक्तमूर्ध्वक्षेपैर्निरन्तरम् ।
प्रकम्पिताख्यं विज्ञेयमुरो ह्रासादिकर्मसु ॥ ६ ॥

उदग्रपृष्ठं निम्नं च कुञ्चितांसं श्लथं मनाक् ।
आभुग्नाख्यमुरस्तत्स्यान्मूर्छाशोकभयादिषु ॥ ७ ॥
इति पञ्चविधं वक्षः प्रोक्तं जठरमुच्यते ।
खल्वं क्षामं तथा जीर्णं जठरं कथितं त्रिधा ॥ ८ ॥
निम्नं खल्वं नतं क्षाममाध्मातं पूर्णमुच्यते ।
क्षुधिते व्याधिते श्रान्ते जठरं खल्वमिष्यते ॥ ९ ॥
जृम्भारोदनहास्यादौ जठरं क्षाममिष्यते ।
व्यथावत्यशनादौ च पूर्णं जठरमुच्यते ॥ १० ॥
समुन्नतं नतं चैव प्रसारितमतः परम् ।
विवर्तितं चापसृतं पार्श्वं पञ्चविधं भवेत् ॥ ११ ॥
पार्श्वं भुजकटिस्कन्धैरुन्नतैस्स्यात्समुन्नतम् ।
आभुग्नस्तु कटिर्यत्र स्कन्धोऽप्यपसृतो मनाक् ॥ १२ ॥

नताभिधानं तत्पार्श्वं कथितं नाट्यवेदिभिः ।
आयामात्पार्श्वयोर्ज्ञेयं पार्श्वं नामप्रसारितम् ॥ १३ ॥
पार्श्वं निवर्तितं ज्ञेयं त्रिकस्यैव विवर्तनात् ।
पार्श्वादपसृते किञ्चित्पार्श्वं चापसृतं भवेत् ॥ १४ ॥
समुन्नतं चापसृतं नतं स्यादुपसर्पणे ।
प्रसारितं प्रमोदादौ पतिवृत्ताविवर्जितम् ॥ १५ ॥
निवृत्ते प्रसृतं पार्श्वं ज्ञेयं नाट्यविशारदैः ।
इति पार्श्वं समुद्दिष्टमधुना कटिरुच्यते ॥ १६ ॥
विवृत्ता रेचिता भिन्ना कम्पितोद्वाहिता तथा ।
इति पञ्चविधा प्रोक्ता कटिर्नाट्यविचक्षणैः ॥ १७ ॥
विवृत्ता सा कटिर्ज्ञेया सम्मुखीया पराङ्मुखा ।
परितो भ्रमणाद् ज्ञेया संज्ञया रेचिता कटिः ॥ १८ ॥
तिर्यङ्मुखस्य चलनाद् भिन्ना नाम कटिर्भवेत् ।
तूर्णं गतागतैस्तिर्यक्कटिरुक्ता प्रकम्पिता ॥ १९ ॥
उद्वाहिता गतैः पार्श्वनितम्बोद्वाहिता कटिः ।
वर्तनेषु विवृत्ता स्याद् भ्रमणेषु च रेचिता ॥ २० ॥
व्यायामेषु भवेच्छिन्ना कम्पिता गमनादिषु ।
उद्वाहिता कटिस्तौल्ये तथा लीलागतादिषु ॥ २१ ॥
वलितः कम्पितश्चैव स्तम्भितोद्वर्त्तितावपि ।
विवर्त्तिताह्वयश्चेति भवेदूरुस्तु पञ्चधा ॥ २२ ॥
वलनक्रियया युक्त ऊरुस्स्याद्वलिताभिधः ।
नमनोन्नमनात् पार्ष्णिरूरुस्स्यात् कम्पितो मुहुः ॥ २३ ॥
अपवृते क्रियायोग ऊरुस्स्यात्सम्भिताभिधः ।
वलिताविधस्य करणादूरुद्वाहितो मतः ॥ २४ ॥
पार्ष्ण्योरभ्यन्तरगतैरूरुर्निर्वर्त्तितस्स्मृतः ।
स्वेच्छाविहारे चरितो भवेद् भीतौ च कम्पितः ॥ २५ ॥
विषादे साध्वसे चैव स्तम्भितं विनियोजयेत् ।
उद्वर्त्तितः प्रयोक्तव्यो व्यायामे ताण्डवे तथा ॥ २६ ॥
सम्भ्रमादिपरिश्रान्ता ऊरुर्निर्वर्त्तितः स्मृतः ।
उद्वाहिता नता क्षिप्ता परिवृत्ता ततः परम् ॥ २७ ॥
आवर्त्तितेति विज्ञेया जंघा पञ्चविधा बुधैः ।
ऊर्ध्वमुद्वाहनाज्जंघा भवेदुद्वाहिताभिधा ॥ २८ ॥
जानुसंकोचनादुक्ता नता जंघा मनीषिभिः ।
विक्षेपणेन जंघायाः क्षिप्रा जंघा निगद्यते ॥ २९ ॥
पतिवृत्ता भवेज्जंघा पतिविक्षेपणक्रमात् ।
वामतो दक्षिणः पादो वामोऽपिहि तथान्यतः ॥ ३० ॥

क्षिप्यते यत्र विद्वद्भिर्जंघा सावर्त्तिताभिधा ।
आविद्धगमनादौ तु स्याज्जंगोद्वाहिताभिधा ॥ ३१ ॥
स्थानासनादौ कर्तव्या नता जंघा प्रयोक्तृभिः ।
व्यायामे ताण्डवे चैव क्षिप्रा जंघा नियुज्यते ॥ ३२ ॥
परिवृत्ता तु कर्तव्या कोविदैस्ताण्डवादिषु ।
गता विदूषकस्य स्याज्जंघावर्त्तितसंज्ञका ॥ ३३ ॥
अञ्चितः कुञ्चितस्सूची तथाग्रतलसञ्चरः ।
उद्घट्टितस्समश्चेति चरणष्षड्विधस्स्मृतः ॥ ३४ ॥
भूमौ यस्य स्थितौ पार्ष्णी अंगुल्यः किञ्चिदञ्चिताः ।
ऊर्ध्वमग्रतलः पादस्सूची स परिकीर्त्तितः ॥ ३५ ॥
यस्य पार्ष्णिस्समुत्क्षिप्तस्तथांगुल्यश्च कुञ्चिताः ।
कुञ्चितो मध्यभागश्च चरणः कुञ्चितस्तुसः ॥ ३६ ॥
यस्योत्क्षिप्तो भवेत् पार्ष्णिरंगुष्ठाग्रे व्यवस्थितः ।
वामपादः प्रकृत्याच सूचीपादस्स उच्यते ॥ ३७ ॥
अंगुष्ठौ प्रसृतौ यस्मिन्नुत्क्षिप्तः पार्ष्णिरेवच ।
अंगुल्यः कुञ्चितास्स स्यात्पादोऽग्रतलसञ्चरः ॥ ३८ ॥
स्थित्वा चांघ्रितलाग्रेण भूमौ पार्ष्णिर्विघट्यते ।
उद्घट्टिताभिधः पादो नृत्यज्ञैस्सम्प्रकीर्त्तितः ॥ ३९ ॥
स्वभावसंस्थितो भूमौ ज्ञेयः पादस्समाभिधः ।
पादाहतादौ कर्तव्यश्चरणाञ्चितसंज्ञकः ॥ ४० ॥
उदारगमनाद्येषु कुञ्चितश्चरणो भवेत् ।
चरणे नूपुराभावे सूचीचरण इष्यते ॥ ४१ ॥
धरणीताडनात्स स्यात्पादोऽग्रतलसंज्ञकः ।
उद्वाहिताख्यकरणे पाद उद्घट्टितस्स्मृतः ॥ ४२ ॥
स्वभावस्याभिनयने समपादः प्रकीर्त्तितः ।
स्थानकत्रितयं स्त्रीणां तत्रैकं चायतं भवेत् ॥ ४३ ॥
अश्वक्रान्तं द्वितीयं स्यात्तृतीयं चावहित्थकम् ।
समः स्याद्दक्षिणः पादस्त्र्यश्रस्तदितरो मतः ॥ ४४ ॥
तालमात्रं तयोर्मध्यं मितं चेद्दक्षिणः करः ।
तालसंज्ञस्तदा पादस्समुन्नतमुरस्स्थलम् ॥ ४५ ॥
मुखं प्रसन्नं तत्र स्यादुन्नतान्त्र समा कटिः ।
तदेतदायतं नाम स्थानकं परिकीर्त्तितम् ॥ ४६ ॥
इदं रङ्गप्रवेशे स्यात्पुष्पाञ्जल्यर्पणादिषु ।
एकस्समो द्वितीयोऽङ्घ्रिर्यस्मिन्नग्रतलाञ्चितः ॥ ४७ ॥
विद्धं सूच्याथवा विद्धमश्वक्रान्तं तदुच्यते ।
सांहित्ये च विलासादौ प्रयोगोऽस्य समीरितः ॥ ४८ ॥

अथुनोदितहस्तांघ्रिविन्यासस्य विपर्ययात् ।
अवहित्थाभिधं सद्भिः स्थानकं परिकीर्त्तितम् ॥ ४९ ॥
लीलायां च वितर्के च विस्मयादौ च तद्भवेत् ।
प्रथमं वैष्णवं ज्ञेयं समपादमतः परम् ॥ ५० ॥
वैशाखमण्डलं च स्यादाविद्धं तदनन्तरम् ।
प्रत्याविद्धमिति ज्ञेयान्युक्तानि स्थानकानि षट् ॥ ५१ ॥
सार्धं तालद्वयं यस्मिन्नन्तरं पादयोर्भवेत् ।
जंघा च कुञ्चिता किञ्चिच्छेषमंगुष्ठसौष्ठवम् ॥ ५२ ॥
स्थानकं वैष्णवं तत्स्याद्विष्णुर्यत्राधिदेवता ।
पक्षत्रयश्रस्तयोर्यत्र पादयोरन्तरं भवेत् ॥ ५३ ॥
सार्धं तालत्रयं ज्ञेयं वैशाखं स्थानकं च तत् ।
विशाखो देवता चात्र कीर्त्तिता भरतादिभिः ॥ ५४ ॥
तुरङ्गवाहनादौ च प्रयोगोऽस्य प्रदर्शितः ।
पादावुपस्थितात्प्राप्तावेकतालान्तरस्थितौ ॥ ५५ ॥
कटिजानुसमानौ च स्थानकं मण्डलं तथा ।
चतुरस्रं तदालोके महेन्द्रश्चात्र देवता ॥ ५६ ॥
गजानां वाहनादौ च विनियोगोऽस्य दृश्यते ।
स्थानान्येतानि चत्वारि दृश्यन्ते नाट्यनृत्तयोः ॥ ५७ ॥
वामत्रिस्रस्थितः पादो दक्षिणः प्रसृतः पुनः ।
अन्तरं पञ्चतालं चेत्तयौरालीढकं तथा ॥ ५८ ॥
रुद्रो हि देवता चास्य प्रयोगो वीररौद्रयोः ।
विपरीतपदन्यासं प्रत्यालीढमितीरितम् ॥ ५९ ॥
देवता विनियोगश्च द्वयमालीढवत् स्मृतम् ।
अनयोर्विनियोगस्तु नाट्य एव प्रदर्शितः ॥ ६० ॥
उक्तानि भरतोक्तानि स्थानकानि मयाधुना ।
अन्यानि च मनोज्ञानि वक्ष्यन्ते लक्ष्यदर्शनात् ॥ ६१ ॥
संहतं समपादं च स्वस्तिकं वर्धमानकम् ।
नन्द्यावर्तं चतूरस्रं पार्ष्णिविद्धं तथैवच ॥ ६२ ॥
पार्ष्णिपार्श्वगतं स्थानमेकपार्श्वगतं तथा ।
एकजानुकृतं चैव परावृत्तं तथा परम् ॥ ६३ ॥
पृष्ठोद्दानस्तलस्थानमेकपादं तथैव च ।
ब्राह्मं च वैष्णवं चैव गारुडं वृषभासनम् ॥ ६४ ॥
समसूचिकमित्युक्तं तथा विषमसूचिकम् ।
चण्डसूचिकमित्येकं स्थानकान्येकविंशतिः ॥ ६५ ॥
गुल्फयोस्सङ्गतिर्यत्र मिथश्चांगुष्ठयोरपि ।
स्वभावावस्थितं देहस्थानकं संहतं तु तत् ॥ ६६ ॥

समावृत्तिस्थितौ पादौ वितस्त्यन्तरमायतौ ।
भवेतां यत्र तत्स्थानं समपादमुदाहृतम् ॥ ६७ ॥
नूपुरस्थानसम्बन्धकनिष्ठाद्वयसङ्गतम् ।
ईषदुच्चतलं नाम स्वस्तिकं स्थानकं विदुः ॥ ६८ ॥
तिरश्चीनमुखौ पादौ पार्ष्णिभ्यां यत्र सङ्गतौ ।
स्थानकं वर्धमानाख्यं तदुक्तं नृत्यकोविदैः ॥ ६९ ॥
वर्धमानं यथा स्थानं षडंगुलकृतान्तरम् ।
नन्द्यावर्त्तं तु तत्रैवं नृत्यभेदविशारदैः ॥ ७० ॥
सार्धा वितस्तिर्यत्र स्यादन्तरं पादयोर्यथा ।
नन्द्यावर्त्ते तदा ज्ञेयं स्थानकं चतुरस्रकम् ॥ ७१ ॥
पार्ष्ण्यंगुष्ठसमायोगात् स्थानकं पार्ष्णिविद्धकम् ।
पार्श्वस्यान्तर्गता पार्ष्णिः कीर्त्तितं पार्ष्णिपार्श्वकम् ॥ ७२ ॥
एकः पादस्समो यत्र बहिस्तिर्यक्कृतोऽपरः ।
स्तानकं तत्समुद्दिष्टमेकपार्श्वाभिधं बुधैः ॥ ७३ ।
एकः पादस्समो यस्मिन् परः कुञ्चितजानुकः ।
चतुरंगुलविश्लेषादेकजानुर्निगद्यते ॥ ७४ ॥
पार्ष्ण्यंगुष्ठसमे यत्र स्यातां पार्ष्णिकनिष्ठिके ।
परावृत्तं परिज्ञेयं स्थानकं स्थानकोविदैः ॥ ७५ ॥
अंगुलीपृष्ठसंलग्नः पाश्चात्यांघ्रिर्यदा भवेत् ।
समः पादः पुरस्तश्चेत्पृष्ठोत्तानतलं भवेत् ॥ ७६ ॥
समस्थानस्थितस्त्वेकः पुरस्ताज्जानुमूर्धनि ।
बाह्यपार्श्वेन संलग्नमेकपादं तदीरितम् ॥ ७७ ॥
एकस्समो द्वितीयस्तु कुञ्चितश्चरणो यदि ।
जानुसंधिस्समानश्च ब्राह्मं स्यात्स्थानकं तथा ॥ ७८ ॥
सममेकं पदं भूमावन्यत् किञ्चिच कुञ्चितम् ।
परः प्रसारितः पादास्तिर्यक्तद्वैष्णवं विदुः ॥ ७९ ॥
यत्र वामस्समः पादो जानुशीर्षसमोऽपरः
कुञ्चितश्च निरालम्बः स्थानकं शैवमिष्यते ॥ ८० ॥
आकुञ्चितांघ्रिर्वामश्चेत्तदन्यो जानुनि स्थितः ।
भूतलेतु तदाख्यातं स्थानकं गारुडं बुधैः ॥ ८१ ॥
जानुद्वयं यदा भूमौ संवृतं समवास्थितम् ।
तिर्यक् सौष्ठवसंयुक्तं तदा स्याद् वृषभासनम् ॥ ८२ ॥
तिर्यक् प्रसारितौ पादावूरु जंघांसपार्ष्णिकम् ।
भूमिलग्नं तदा स्थानं समसूचीति कीर्त्तितम् ॥ ८३ ॥
पुरः प्रसारितस्त्वेकः पश्चादेकः प्रसारितः ।
जानुगुल्फे च भूलग्ने भवेद्विषमसूचिकम् ॥ ८४ ॥

एकस्तु कुञ्चितः पादो द्वितीयस्तिर्यगायतः ।
ऊरू पार्ष्णिसमौ लग्नौ भुविस्याच्चण्डसूचिकम् ॥ ८५ ॥
स्थानकानामिति त्रिंशन्नियोज्यं नाट्यनृत्तयोः ।
न जातिरहितं नाट्यं नृत्तं वा दृश्यते क्वचित् ॥ ८६ ॥
तस्मात्तल्लक्षणं वक्ष्ये यदुक्तं भरतादिभिः ।
कटिरूरुश्च जंघायाः क्रियायाः क्रियते समम् ॥ ८७ ॥
पादप्रसरणं यत्र सा जातिरभिधीयते ।
भूमिजाकाशनीचेति सा जातिर्द्विविधा मता ॥ ८८ ॥
प्रत्येकमेतयोर्ज्ञेया भेदाष्षोडश षोडश
समपादा चार्धगतिस्स्थिरावर्ता तयेषिता ॥ ८९ ॥
ऊरूद्वृत्तादिना बद्धा जनिता चण्डिका तथा ।
स्यन्दिता शकटास्याथ स्याथवा स्यन्दिता तथा ॥ ९० ॥
समासादितमत्तल्लिमत्तल्यभ्यधिका तथा ।
एकाकी क्रीडिता चेति भूमिचार्यः प्रदर्शिताः ॥ ९१ ॥
अतिक्रान्तोर्ध्वजानुश्च सूचीनूपुरपादिता ।
विद्युद्भ्रान्ता च दण्डा च भुजङ्गत्रासिता तथा ॥ ९२ ॥
डोला पादकयोद्वृत्ता स्यादाक्षिप्ता मृगप्लुता ।
पार्श्वाक्रान्ताप्यपक्रान्ता भ्रमर्याविद्धसंज्ञिता ॥ ९३ ॥
अलाता चेति चार्यामाह्याकाशिन्यः प्रकीर्तिताः ।
एकैकमण्डलोत्पत्तिश्चारिभिर्बहुभिर्भवेत् ॥ ९४ ॥
अधुना कथ्यते तेषां नाम प्रत्येकशः क्रमात् ।
द्विधा भवन्ति चैतानि भौमान्याकाशगानि च ॥ ९५ ॥
भ्रमरं शकटास्यं च समं स्फुरितमण्डलम् ।
अध्यर्धे पृष्ठकुट्टाख्यमेडकं क्रीडितं तथा ॥ ९६ ॥
आस्कन्दितं तथावर्थं तथा चाधोगताभिधम् ।
इति प्रोक्तानि नाट्ये तु मण्डलानि दश क्रमात् ॥ ९७ ॥
अतिक्रान्तं दण्डपादं सूचीविद्धमलातकम् ।
विचित्रं विहितं क्रान्तं तथा वलितसञ्चरम् ॥ ९८ ॥
वामाविद्धं तथा ज्ञेयं तथा च वलिताभिधम् ।
उत्क्रान्याकाशजान्येवं मण्डलानि पुनर्दश ॥ ९९ ॥
एवमाष्टोत्तरशतं करणान्यपराणि च ।
पाताष्षोडश सम्प्राप्ता नृत्यतत्त्वविशारदैः ॥ १०० ॥
विस्तरः क्रियतेऽस्माभिर्नैव संग्रहकांक्षिभिः ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले वक्षःप्रभृतिपादान्ताभिनयस्थानकचारीमण्डलभेदवर्णनं नाम षष्ठस्तरङ्गः.

अथ सप्तमस्तरंगः

समापतेऽथ सभ्यानां नर्तक्या नर्तकस्य च ।
रङ्गस्थलस्य लक्ष्माणि तथा पुष्पाञ्जलेरपि ॥ १ ॥
शिरःप्रभृतिगात्राणां लक्ष्याण्यभिनयस्य च ।
श्रीमद्भिः कीर्तितान्यासन् बहुधा विबुधोत्तम! ॥ २ ॥
निवृत्तं हृदयं श्रीमद्वचोभिरमृतोपमैः ।
अधुना नटनार्थं यौ गीततालावपेक्षितौ ॥ ३ ॥
तौ ब्रूहि सप्रभेदौ मे श्रोतुकामोऽस्म्यहं गुरो! ।
मनीषा तव निर्दोषा नन्दनानन्ददायिनी ॥ ४ ॥
गीततालौ सप्रभेदौ शृणु तौ वर्णयामहे ।
प्रथमं तत्र गीतस्य स्वरूपं वर्ण्यतेऽधुना ॥ ५ ॥
नादश्रुतिस्वरग्राममूर्छनातानवर्णकाः ।
अलङ्कारोऽथ गमकं जातिरागौ तथा परौ ॥ ६ ॥
रागाङ्गभाषाभाषाङ्गविभाषान्तरभाषिकाः ।
उपाङ्गं च क्रियाङ्गं चेत्यङ्गान्यष्टौ तथा दश ॥ ७ ॥
अष्टादशानामेतेषां स्वरूपमधुनोच्यते ।
गीतं नादात्मकं वाद्यं नादव्यक्त्या प्रशस्यते ॥ ८ ॥
तद्द्वयानुगतं नृत्तं नादाधीनमतस्त्रयम् ।
नादेन प्रोच्यते वर्णः पदं वर्णात्पदाद्वचः ॥ ९ ॥
वचसो व्यवहारोऽयं नादाधीनमथो जगत् ।
आहतोऽनाहतश्चेति द्वेधा नादौ निगद्यते ॥ १० ॥

तत्र चानाहतं नादमेकाग्रन्यस्तमानसाः ।
गुरूपदिष्टमार्गेण महान्तः पर्युपासते ॥ ११ ॥
स च रक्तिविहीनत्वान्न मनोरञ्जको नृणाम् ।
तस्मादाहतनादस्य श्रुत्यादिद्वारतोऽखिलम् ॥ १२ ॥
ज्ञेयं वितन्यते लोकरञ्जनं भवभञ्जनम् ।
उत्पत्तिमभिधास्यामि तस्य श्रुत्यादिहेतुना ॥ १३ ॥
आत्मा विवक्ष्यमाणोऽयं रहः प्रेरयते मनः ।
नाभिस्थं वह्निमाहन्ति स प्रेरयति मारुतम् ॥ १४ ॥
ब्रह्मग्रन्थिस्थितस्सोऽथ क्रमादूर्ध्वपथे चरन् ।
नाभिहृत्कण्ठमूर्धास्येष्वाविर्भावयति ध्वनिम् ॥ १५ ॥
नादोतिसूक्ष्मोसूक्ष्मश्च पुष्टोपुष्टश्च कृत्रिमः ।
इति पञ्चभिदां धत्ते पञ्चस्थानस्थितः क्रमात् ॥ १६ ॥
व्यवहारे त्वसौ त्रेधा हृदि मन्द्रोऽभिधीयते ।
कण्ठे मध्ये मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरः ॥ १७ ॥
नाकारः प्राणनामस्याद्दाकारस्त्वनलो मतः ।
जातः प्राणाग्निसंयोगान्नाद इत्यभिधीयते ॥ १८ ॥
तस्य द्वाविंशतिर्भेदाः श्रवणाच्छ्रुतयो मताः ।
हृद्यूर्ध्वनाडिसंलग्ना नाड्यो द्वाविंशतिर्मताः ॥ १९ ॥
तिरश्चस्तासु तावन्त्यः श्रुतयोर्मारुताहतेः ।
उच्चोच्चतरतायुक्ताः प्रभवन्त्युत्तरोत्तरम् ॥ २० ॥
एवं कण्ठे तथा शीर्षे श्रुतिर्द्वाविंशतिर्मता ।
प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः ॥ २१ ॥
सा श्रुतिस्सम्प्रति ज्ञेया सर्वावयवलक्षणा ।
श्रुतिभ्यश्च स्वराष्षड्जर्षभगान्धारमध्यमाः ॥ २२ ॥
पञ्चमो धैवतश्चाथ निषाद इति सप्त ते ।
चतुश्चतुश्चतुश्चैव षड्जमध्यमपञ्चमाः ॥ २३ ॥
द्वेद्वे निषादगान्धारौ त्रिस्त्रिर्ऋषभधैवते ।
तेषां संज्ञां सरिगमपधनेत्यपरा मताः ॥ २४ ॥
गीर्वाणकुजसंभूताः षड्जगान्धारमध्यमाः ।
पञ्चमः पितृवंश्योऽथ रिधौ ऋषिकुलोद्भवौ ॥ २५ ॥
निषादोऽसुरवंश्योऽथ ब्राह्मणास्समपञ्चमाः ।
रिधौतु क्षत्रियौ ज्ञेयौ वैश्यजाती निगौ मतौ ॥ २६ ॥
शूद्रा वन्तरकाकल्यौ स्वरौ वर्णास्त्विमे क्रमात् ।
पद्माभः पिञ्जरः स्वर्णवर्णः कुन्दप्रभोऽसितः ॥ २७ ॥
पीतः कर्बुर एतेषां जन्मभूमिमथ ब्रुवे ।
जम्बूशाककुशक्रौञ्चशाल्मलीश्वेतनामसु ॥ २८ ॥

द्वीपेषु पुष्करे चैते जाताष्षड्जादयः क्रमात् ।
वह्निर्वेदात्शशाङ्कश्च लक्ष्मीकान्तश्च नारदः ॥ २९ ॥
ऋषयो ददृशुः पञ्च षड्जादींस्तुम्बुरुध्वनीन् ।
वह्निब्रह्मसरस्वत्यश्शर्वश्रीशगणेश्वराः ॥ ३० ॥
सहस्रांशुरिति प्रोक्ताः क्रमात् षड्जादिदेवताः ।
क्रमादनुष्टुब् गायत्री त्रिष्टुप् च जगती ततः ॥ ३१ ॥
पङ्क्तिरुष्णिक् च बृहतीत्याहुश्छन्दांसि सादिषु ।
सरी वीरोद्धते रौद्रे धो भीभत्सभयानके ॥ ३२ ॥
कार्यौ गती तु करुणे हास्यशृङ्गारयोर्मतौ ।
षड्जं मयूरो वदति गावस्त्वृषभभाषिणः ॥ ३३ ॥
अजाविकं तु गान्धारं क्रौञ्च : क्वणति मध्यमम् ।
पुष्पसाधारणे काले पिकः कूजति पञ्चमम् ॥ ३४ ॥
धैवतं हेषते वाजी निषादं बृंहते गजः ।
ग्रामः स्वरसमूहःस्यान्मूर्छनादेस्समाश्रयः ॥ ३५ ॥
षड्जग्रामो भवेदादौ मध्यमग्राम एव च ।
गान्धारग्राम एवं तद्ग्रामत्रयमुदाहृतम् ॥ ३६ ॥
षड्जमध्यमनामानौ ग्रामौ गायन्ति मानुषाः ।
न तु गान्धारनामानं सलभ्यो देवयोनिभिः ॥ ३७ ॥
लक्षणं ग्रामयोर्वक्ष्ये षड्जमध्यमसंज्ञयोः ।
षड्जग्रामः पञ्चमे स्वचतुर्थश्रुतिसंस्थिते ॥ ३८ ॥
स्वोपान्त्यश्रुतिसंस्थित्यस्तस्मिन्नग्राम इष्यते ।
यद्वा दस्त्रिश्रुतिष्षड्जे मध्यमे तु चतुश्रुतिः ॥ ३९ ॥
रिमयोः श्रुतिमेकैकां गान्धारश्चेत्समाश्रितः ।
पश्रुतिं धो निषादस्तु धश्रुतिं सश्रुतं श्रितम् ॥ ४० ॥
गान्धारग्राममाचष्ट तदा तं नारदो मुनिः ।
प्रवर्तते स्वर्गलोके ग्रामोऽसौ न महीतले ॥ ४१ ॥
क्रमाद् ग्रामत्रये देवा ब्रह्मविष्णुमहेश्वराः ।
हेमन्तग्रीष्मवर्षासु गातव्यास्ते यथाक्रमम् ॥ ४२ ॥
पूर्वाह्नकालेमध्याह्नेऽपराह्नेभ्यश्चतुश्श्रुतिः ।
क्रमात् स्वराणां सप्तानामारोहश्चावरोहणम् ॥ ४३ ॥
मूर्छनेत्युच्यते ग्रामद्वये तास्सप्त सप्तसु ।
षड्जे भूतारमन्द्रादौ रजनी चोत्तरायिता ॥ ४४ ॥
शुद्धषड्जा मत्सरीकृदश्वक्रान्ताभिरुद्गता ।
मध्यमे स्यात्तु सौवीरी हरिणाश्वा ततः परम् ॥ ४५ ॥
स्यास्कलोपनता शुद्धा मध्यमा नीचपारविः ।
हृष्यकेत्यथ तासां तु लक्षणं प्रतिपाद्यते ॥ ४६ ॥

मध्यस्थानस्थ षड्जेन मूर्छनारभ्यते क्रमात् ।
अधस्ततैर्निषादाद्यैष्षड्जन्या मूर्छना क्रमात् ॥ ४७ ॥
मध्यमध्यममारभ्य सौवेरी मूर्छना भवेत् ।
षड्जन्यास्तदधोऽधस्तान् स्वरानारभ्य तु क्रमात् ॥ ४८ ॥
षड्जस्थानस्थितैर्नादैरजन्याद्यैः परे जगुः ।
हरिणाश्वादिका नादैर्मध्यमस्थानसंस्थितैः ॥ ४९ ॥
षड्जादीन्मध्यमादींश्च तदूर्ध्वं सारयेत्क्रमात् ।
चतुर्धा ताः पृथक् शुद्धाः काकलीकलितास्तथा ॥ ५० ॥
सान्तरास्तद्द्वयोपेताः षट्पञ्चाशदितीरिताः ।
श्रुतिद्वयं चेत्षड्जस्य निषादस्संश्रयेद्यथा ॥ ५१ ॥
स काकलीमध्यमस्य गान्धारस्त्वन्तरः स्वतः ।
यस्यां यावतिथौ षड्जमध्यमौ ग्रामयोः क्रमात् ॥ ५२ ॥
मूर्छना तावतीत्येव सा निश्शङ्केन कीर्तिता ।
प्रथमादिस्वरारम्भादेकैकन्सप्तधदा भवेत् ॥ ५३ ॥
तासूच्चार्यान्तस्वरान्तान् पूर्वानुच्चारये त्क्रमात् ।
ते क्रमास्तेषु सङ्ख्या स्याद् द्विनवत्या शतत्रयम् ॥ ५४ ॥
यक्षराक्षोनारदाब्जभवनागाश्विपाशिनः ।
षड्जग्रामे मूर्छनानामेतास्स्युर्देवताः क्रमात ॥ ५५ ॥
ब्रह्मेन्द्रवायुगन्धर्वशिवद्रुहिणभानवः ।
स्युरिमा मध्यमग्रामे मूर्छनादेवताः क्रमात् ॥ ५६ ॥
तासामन्यानि नामानि नारदो मुनिरब्रवीत् ।
मूर्छनोत्तरमन्द्राद्याः षड्जग्रामे समुद्गताः ॥ ५७ ॥
अश्वक्रान्ता च सौवीरी हृष्यका चोत्तरायताः ।
रजनीति समाख्याता ऋषिणा सप्त मूर्छनाः ॥ ५८ ॥
आप्यायनी विश्वहारा चन्द्राह्वे मिकपर्दिनी?
मैत्री चान्द्रमसी प्रीत्या मध्यमे मूर्छना इमाः ॥ ५९ ॥
नन्दा विशाला सुमुखी चित्रा चित्रवती सुखा ।
आलपा चेति गान्धारग्रामे स्युस्सप्त मूर्छनाः ॥ ६० ॥
काशः स्वर्गे प्रयोक्तव्यो विशेषात्तेन नोदिताः ।
तानास्स्युर्मूर्छनां शुद्धाष्षाडवौडवितीरिता ॥ ६१ ॥
षड् वर्गास्सप्त हीनाश्चेत् क्रमात्सरिप सप्तमैः ।
तदाद्यार्विंशतिस्थाना मध्यमे सरिगोज्झिताः ॥ ६२ ॥
सप्त क्रमाद्यथा तारा स्युस्तदा ह्येकविंशतिः ।
एते चैकोनपञ्चाशदुभये षाडवा मताः ॥ ६३ ॥
सपाभ्यां द्विश्रुतिभ्यां च रिधाभ्यां सप्तवर्जिताः ।
षड्जग्रामे पृथक्ताना एकविंशतिरौडवाः ॥ ६४ ॥

निधाभ्यां द्विश्रुतिभ्यां च मध्यमग्रामगास्तुते ।
हीनाश्चतुर्दशे च स्युः पञ्चत्रिंशत्तु ते युताः ॥ ६५ ॥
सर्वे चतुरशीतिः स्युर्मिलिताः षाडवौडवाः ।
असम्पूर्णाश्च सम्पूर्णा व्युत्क्रमोच्चारिताः स्वराः ॥ ६६ ॥
मूर्छनाकूटतानाः स्युः तत्सङ्ख्यामभिदध्महे ।
पूर्णाः पञ्चसहस्राणि चत्वारिंशद्युतानि तु ॥ ६७ ॥
एकैकस्यां मूर्छनायां कूटतानास्सह क्रमैः ।
षट्पञ्चाशन्मूर्छनासा पूर्णाः कूटास्सुयोजिताः ॥ ६८ ॥
लक्षद्वयं सहस्राणि ह्यशीतिर्द्विशते तथा ।
चत्वारिंशच्च सङ्ख्याता भूयां भेदान्तरं बुधैः ॥ ६९ ॥
अङ्कानेकादिसप्तान्तानूर्ध्वमूर्ध्वं लिखेत् क्रमात् ।
हते पूर्वेण पूर्वेण तेषु चाङ्के परे परे ॥ ७० ॥
एकस्वरादिसङ्ख्यास्यात् क्रमेण प्रतिमूर्छनम् ।
क्रमादन्त्यस्वरस्थाप्यः पूर्वं पूर्वापरादधः ॥ ७१ ॥
स चेदुपरि तत्पूर्वः पुरस्तु परिवर्त्तिनः ।
मूलक्रमक्रमात्कृष्ट एष प्रस्तार ईदृशः ॥ ७२ ॥
सप्ताथैकान्तकोष्ठानामधोऽधस्सप्त पङ्क्त्यः ।
तास्वाद्यायामाद्यकोष्ठे लिखेदङ्कं परेषु खम् ॥ ७३ ॥
वेद्यतानस्वरमितान्यसीतेष्वेव लोष्ठकान् ।
सा पङ्क्त्यान्त्याङ्कसंयोगाद्र्ध्वाधस्तेपु पंक्तिषु ॥ ७४ ॥
शून्यादधो लिखेदेकं तच्चाधोऽधः स्वकोष्ठकान् ।
कोष्ठसङ्ख्या गुणं न्यस्येत् खण्डमेरुरयं मतः ॥ ७५ ॥
स्वरान्मूलात्क्रमात्पूर्वं साप्ययावतिथस्स्वरः ।
उद्दिष्टान्त्यस्तावदेति कोष्ठेऽधो लोष्टकं क्षिपेत् ॥ ७६ ॥
लोष्टचालनमन्त्यस्य त्यतक्ता लब्धं क्रमं भवेत् ।
लोष्ठाक्रान्ताङ्कसंयोगादुद्दिष्टस्य मितिर्भवेत् ॥ ७७ ॥
यैरङ्कैर्नष्टसंख्या स्यान्मोलैकाङ्कसमन्वितैः ।
तेषु लोष्ठान् क्षिपेन्मौले लोष्टस्थानस्थितं भवेत् ॥ ७८ ॥
नष्टस्थानस्वरस्थानं ततो यावतिथे पदे ।
अधः क्रमाधस्तल्लोष्टस्वरस्तावतिथो भवेत् ॥ ७९ ॥
क्रमादिमस्वरात् पूर्वं लब्धत्यागादि पूर्ववत् ।
तानस्वरमितोर्ध्वाधः पङ्क्तिगान्त्याङ्कमिश्रणात् ॥ ८० ॥
एकस्वरादितानानां सङ्ख्या संज्ञायते क्रमात् ।
गानक्रियोच्यते वर्णस्स चतुर्धा निरूपितः ॥ ८१ ॥
स्थाप्यारोह्या विरोहीच सञ्चारीत्यथ लक्षणम् ।
स्थित्वा स्थित्वा प्रयोगस्य चैकैकस्य स्वरस्य यः ॥ ८२ ॥

स्थायी वर्णस्य विज्ञेयः परावर्त्यर्थनामकौ ।
एतत्संमिश्रणाद्वर्णः सञ्चारी परिकीर्त्तितः ॥ ८३ ॥
विशिष्टं वर्णसन्दर्भमलङ्कारं प्रचक्षते ।
यत्र भेदा बहुविधास्तत्र स्थायिगतान् ब्रुवे ॥ ८४ ॥
एवमाद्यन्तयोरेकस्वरस्थे स्थायिवर्णगाः ।
प्रसन्नादिः प्रसन्नान्तः प्रसन्नाद्यन्तसंज्ञिकाः ॥ ८५ ॥
ततः प्रसन्नमध्यः स्यात् परस्थत्वमरोचितः ।
प्रस्तारोऽथ प्रसारः स्यात् सप्तैते स्थायिनि स्थिताः ॥ ८६ ॥

1	0	0	0	0	0	0
	1	2	6	24	120	720
		4	12	48	240	1440
			18	72	360	2160
				96	480	2880
					600	3600
						4320

मन्द्रं प्रकरणेऽत्र स्यान्मूर्छनां प्रथमः स्वरः ।
प्रस्तार एवं द्विगुणः पूर्वः पूर्वोऽथवा भवेत् ॥ ८७ ॥
सां प्रसन्नद्वयमध्यमे दीप्तिप्रसन्नाद्दतस्यात्?
दीप्ते प्रसन्नाद्यन्तः स्यात्तारयोर्मध्यमे पुनः ॥ ८८ ॥
मन्द्रे प्रसन्नमध्याख्यमलङ्कारविदो विदुः ।
सां सां सा
आद्यन्तौ मूर्छनादिश्चेत् स्वरो मध्ये द्वितीयकः ॥ ८९ ॥
सैकाकलाथ चेन्मध्ये तत्तृतीयचतुर्थता ।
साद्वितीया पञ्चमायाश्चयोन्त्याश्चेत्कला पराः ॥ ९० ॥
एवं कालत्रयेणोक्तोऽलङ्कारः क्रमरेचितः ।
सरिसां ॥ संगमसां॥ सपधनिसाम् ॥
दीपोन्त्यैश्च प्रतिकलं प्रस्तारस्सोऽभिधीयते ।
सं रि सा सं गं म सा पं ध नि सा ॥ ९१ ॥
तारमन्द्रविपर्यासात्तं प्रसादं विचक्षते ।
स रिं सा सा ग म सां सा प ध नि सा
स्यातां विस्तीर्णनिष्कर्षौ विन्दुरभ्युच्चयो परः ॥ ॥९२

स सेता प्रेंखिता क्षिप्ता सन्धिप्रच्छादिता स्थिता ।
उद्गीतोद्वाहितौ तद्वत् त्रिवर्णमिणुरित्यमी ॥ ९३ ॥
द्वादशारोहवर्णास्ता अलंकाराः प्रकीर्त्तिताः ।
अवरोहक्रमादेते द्वादशाप्यवरोहणे ॥ ९४ ॥
तथा सञ्चारिवर्णास्तास्सङ्ख्याताः पञ्चविंशतिः ।
एवमेकोनपञ्चाशद्भेदास्तत्र व्यवस्थिताः ॥ ९५ ॥
द्रष्टव्यास्ते सूक्ष्मबुद्ध्येत्यत्र नैतत्प्रपञ्च्यते ।
अनेन सप्तालङ्कारा गीतज्ञैरुपदर्शिताः ॥ ९६ ॥
तारमन्द्रप्रसन्नश्च मन्द्रतारप्रसन्नकः ।
आवर्तकस्सम्प्रदानो विधुतोऽप्युपलोलकः ॥ ९७ ॥
उल्लासितश्चेति तेषामधुना लक्ष्म कथ्यते ।
कलास्तेषां द्वितीयाद्याः पूर्वैकैकप्रहाणतः ॥ ९८ ॥
अष्टमस्वरपर्यन्तमारुह्याद्यं व्रजेदधः ।
तारमन्द्रप्रसन्नोऽयमलङ्कारस्तथोच्यते ॥ ९९ ॥
स रि ग म ध नि सा सां
मन्द्रादष्टममुत्प्लुत्य स्वप्रकस्यावरोहणे ।
मन्द्रतारप्रसन्नाख्यमाह माहेश्वरोत्तमः ॥ १०० ॥
सा सा नि ध प म ग रि सां
आद्यं द्वितीयमाद्यं च द्विर्द्विर्गत्वा द्वितीयकम् ।
सकृदाद्यं यत्कलायां गायेदावर्तकस्तथा ॥ १०१ ॥
स स रि रि स स रि सा, रि रि ग ग रि रि ग रि ग ग म म ग ग
म ग, म म प प म म प म, प प ध ध प प ध प, ध ध नि
नि ध ध नि ध, नि नि स स नि नि स नि.
एतस्यैव यदान्त्यौ द्वौ स्वरौ सन्त्यज्य गीयते ।
यदा तदा संप्रदानमलङ्कारविदो विदुः ॥ १०२ ॥
स स रि रि स, स रि रि ग ग रि रि,
ग ग म म ग ग म म प प म म,
प प ध ध प प ध ध नि नि ध ध, निं नि स स नि नि,
कलाया मध्ययोर्युग्मं चेत्तृतीतयद्वितीययोः ।
द्विर्द्विः प्रयुज्यते तज्ज्ञैरुपलोलस्तयोच्यते ॥ १०३ ॥
सरि सरि, गरि गरि, रिग रिग, मग मग, गम गम, पम पम, मप
मप, धप धप, पध पध, निध निध, धनि धनि, सनि सनि,
युग्ममेकान्तरितयोस्त्यत्कायावेवमेव चेत् ।
द्विर्द्विः प्रयुज्येत तदा विदितो बुधसम्मतः ॥ १०४ ॥
सग सग रिम रिम, गपगपम धमधपनिपनि,
द्विर्गत्वाद्यं तृतीयं च प्रथमं च तृतीयकम् ।
सकृद्गायेद्यत्कलायां तमुल्लासितमूचिरे ॥ १०५ ॥

स स ग स ग, रि रि म रि मं, ग ग प ग प, म म ध म ध, प प नि प नि, इति सप्तालङ्काराः ॥

रक्तिलाभः स्वराणां वर्णगानविवता ।
इति प्रणयनान्याहुरलङ्कारनिरूपणे ॥ १०६ ॥

॥ इत्यलङ्काराः ॥

स्वरस्य कम्पो गमकः श्रोतृचित्तसुखावहः ।
तिरिपुस्स्फुरितश्चैव कम्पितोपिनएव च ॥ १०७ ॥
आन्दोलश्च वलीच त्रिभिन्नः कुरुलस्तथा ।
आहतोल्लासिता चैव प्लाविको गुम्भिकस्तथा ॥ १०८ ॥
मुद्रितो नामितो मिश्र इति पञ्चदश स्मृताः ।
अप्यच्छडमरुध्वानकम्पानुकृतिसुन्दरः ॥ १०९ ॥
द्रुततुर्यांशवेगेन तिरिपुः परिकीर्त्तितः ।
वेगाद्द्रुततृतीयांशकम्पिते स्फुरितो मतः ॥ ११० ॥
द्रुतार्धमानवेगेन कम्पितं गमकं विदुः ।
विन्यस्तद्रुतवेगेनान्दोलितो लघुवेगकः ॥ १११ ॥
येन केनापि वेगेन ह्यत्वे कुरुलः स्मृतः ।
त्रिभिन्नस्तु त्रिषु स्थानेष्वविश्रान्तघनस्त्वनः ॥ ११२ ॥
कुरुळोप्यतिरेकः स्यादग्रन्थिः कोमलस्वरः ।
स्वरमग्रिममाहत्य विविक्तस्त्वाहतो मतः ॥ ११३ ॥
उल्लासितस्तु सम्प्रोक्तो यः स्वरानुत्तरोत्तरान् ।
प्लावितं तु क्रमाद्यत् स्यात् प्लुतमानेन कम्पनम् ॥ ११४ ॥
हृदयागमहुङ्कारगम्भीरो गुम्फितो भवेत् ।
मुखमूर्धान्तसंवीतो मुद्रितो गमको भवेत् ॥ ११५ ॥
स्वराणां मननादुक्तो नामितो ध्वनिवेदिभिः ।
एतेषां मिश्रणे तावन्मिश्रितो गमको मतः ॥ ११६ ॥
गमकानां लक्षणानि प्रोक्तान्येवं क्रमेण तु ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
नादादिगमकान्तनिरूपणं नाम सप्तमस्तरङ्गः.

अथ अष्टमस्तरंगः

जात्यादीनामथाङ्गानां स्वरूपं वर्ण्यते क्रमात् ।
शुद्धाः स्युर्जातयः सप्त ताष्षड्जादिस्वराभिधाः ॥ १ ॥
षड्जर्षभौ च गान्धारमध्यमौ पञ्चमस्तथा ।
धैवतं चाथ नैषादः शुद्धाता लक्ष्म कथ्यते ॥ २ ॥
यासां नाम स्वरो न्यासोपन्यासांशो ग्रहस्तथा ।
तारन्यासविहीनास्ताः पूर्वशुद्धाभिधा मताः ॥ ३ ॥
विकृता वर्जिता न्यासैर्लक्ष्महीना भवन्त्यमूः ।
सम्पूर्णत्वग्रहांशोपन्यासेष्वेकैकवर्जनात् ॥ ४ ॥
भवन्ति भेदाश्चत्वारो द्वयोस्त्यागेन षण्मताः ।
त्यागे त्रयाणां चत्वार एकत्यक्ते चतुष्टये ॥ ५ ॥
भेदाः पञ्चदशैवेते षड्जष्षड्भिर्निरूपितः ।
तत्राष्टौ पूर्णताहीनास्सप्त त्वितरवर्जिताः ॥ ६ ॥
द्विधा स्युः पूर्णताहीनाष्षाडवौडुवभेदतः ।
अतोऽष्टावधिकाश्चार्षभ्यादिष्वौडवजातिषु ॥ ७ ॥
अतस्त्रयोविंशतिधा षड्जाः प्रत्येकमीरिताः ।
विकृतानां तु संसर्गाज्जाता एकादश स्मृताः ॥ ८ ॥
स्यात्षड्जकैशिकीषड्जोदीच्यवा षड्जमध्यमा ।
गान्धारोदीच्यवा रक्तगान्धारी कैशिकी मता ॥ ९ ॥
मध्यमोदीच्यवा कौर्मारवीगान्धारपञ्चमी ।
अधान्ध्री नन्दयन्तीति तद्धेतूनधुना ब्रुवे ॥ १० ॥
षड्जीगन्धारिकायोगाजायते षड्जकौशिकी ।
षड्जिकामध्यमाभ्यां तु जायते षड्जमध्यमा ॥ ११ ॥
गान्धारीपञ्चमाभ्यां तु जाता गान्धारपञ्चमी ।
गान्ध र्यार्षिकाकाभ्यां तु जातिरान्ध्री प्रजायते ॥ १२ ॥

षाड्जीगान्धारिका तद्वद् धैवतीमिलितास्त्विमाः ।
षड्जोदीच्यवतीं जातिं कुर्युः [1] कार्मारविं पुनः ॥ १३ ॥
उत्पादयति नैषादिं पञ्चम्यार्षभिकायुता ।
गान्धारी धैवती षाड्जी मध्यमेतियुतास्त्विमाः ॥ १४ ॥
गान्धारोदीच्यवान् कुर्यान्मध्यमोदीच्यवान् पुनः ।
एत एव विना षड्जं षचम्या सह कुर्वते ॥ १५ ॥
कुर्युस्ता रक्तगान्धारीं नैषादीं च सधैवतीम् ।
आर्षभीं धैवतीं त्यक्त्वा पञ्चम्यः कैशिकीं भवेत् ॥ १६ ॥
चतस्रः षड्जशब्दिन्यो नैषादी धैवती तथा ।
आर्षभिश्चेति सप्तैताष्षड्जग्रामस्य जातयः ॥ १७ ॥
शेषस्तु मध्यमग्रामोऽपूर्णत्वादधुनोच्यते ।
कार्मारवीच गान्धारः पञ्चमी षड्जकैशिकी ॥ १८ ॥
मध्यमोदीच्यक ह्येते नित्यपूर्णे प्रकीर्त्तिते ।
षाड्जी च नन्दयन्त्यान्ध्री गान्धारोदीच्यकंत्यमूः ॥ १९ ॥
सम्पूर्णाष्षाडवाः प्राह चतस्रः काश्यपो मुनिः ।
दशावशिष्टास्सम्पूर्णाष्षाडवौडुविका मताः ॥ २० ॥
पञ्चमी मध्यमाष्षड्जमध्यमाभ्यां सजातिषु ।
स्वरस्साधारणः प्रोक्तो मुनिभिर्भरतादिभिः ॥ २१ ॥
एकांशा नन्दयन्ती च मध्यमोदीच्यवा तथा ।
गान्धारपञ्चमीत्येतास्तिस्रो द्व्यंशास्तथैवच ॥ २२ ॥
गान्धारोदीच्यवाजातपञ्चमीत्युदिता इमाः
नैषाद्यार्षभिका षड्जा कैशिकी त्र्यंशिका मता ॥ २३ ॥
आन्ध्री कार्मारवी षड्जोदीच्यवा चतुरंशिका ।
पञ्चशा रक्तगान्धारी गान्धारी मध्यमा तथा ॥ २४ ॥
षाड्जितैताश्चतस्रः स्युष्षडंशैकैककैशिकी ।
सप्तांशासुरभिष्षड्जमध्यमाः परिकीर्त्तिताः ॥ २५ ॥
इति त्रिषष्टिरंशास्युर्जातिष्वष्टादशस्विमे ।
योऽसौ ध्वनिविशेषस्तु स्वरवर्णविभूषितः ॥ २६ ॥
रञ्जको जनचित्तानां स रागः कथितो बुधैः ।
प्रधानरागा द्वात्रिंशत्तेष्वष्टौ पुरुषाः स्मृताः ॥ २७ ॥
शेषा योषा इति ज्ञेयाश्चतुरुत्तरविंशतिः ।
रागौ वगळभूपालौ भैरवो माल्वस्तथा ॥ २८ ॥
श्रीरागोऽथ वसन्तश्च सारङ्गः फलपञ्जरः ।
अष्टावेते रागविद्भिः पुरुषास्संप्रकीर्त्तिताः ॥ २९ ॥

वेलावरी मल्हरी कुरञ्जी मेघरञ्जनी ।
छाया गौला च धन्यासी रुण्डी मङ्गलकौशिकी ॥ ३० ॥
कर्णाटी देशगौळाक्षी वराळी रीतिगौळिका ।
चोली रामक्रिया देवक्रिया गुण्डक्रिया तथा ॥ ३१ ॥
आरिता देशकारी च गौरी नारायणाह्वया ।
घूर्जरी पूर्वगौळी च भल्लारी साहुरीति च ॥ ३२ ॥
आन्दोलीति स्त्रियः प्रोक्ताश्चतुरुत्तरविंशतिः ।
पुरुषाह्वयरागाणामेकैकस्य मनीषिभिः ॥ ३३ ॥
स्त्रीरागाः प्रविभज्यन्ते तिस्रस्तिस्रोऽङ्गना इति ।
वेलावरी मल्हरी चोलिभूपालकस्य च ॥ ३४ ॥
वङ्गालस्य च धन्यासी छायाकर्णाटगौलिके ।
देवक्रिया भैरवस्य कुरञ्जी मेघरञ्जनी ॥ ३५ ॥
माल्वी घूर्जरी गुण्डक्रिया नारायणाह्वया ।
श्रीरागस्य तथान्दोली भल्लारी साहुरीति च ॥ ३६ ॥
रामक्रिया वसन्तस्य वराली शुभकौशिकी ।
सारङ्गस्य च देशाक्षी रीतिपूर्वादिगौलिके ॥ ३७ ॥
आरिता देशकारी च रुण्डी शेषस्य योषितः ।
मतङ्गस्य मतेनैवं रागसङ्ख्या प्रदर्शिता ॥ ३८ ॥
षाडवा औडवाश्चैव सम्पूर्णाश्चेति ते त्रिधा ।
स्वरैष्षड्भिष्षाडवः स्यात्तैस्तु पञ्चभिरौडवः ॥ ३९ ॥
सप्तभिस्तु स्वरैर्ज्ञेयो रागस्सम्पूर्ण उच्यते ।
षडवन्तिप्रयोगं ये स्वरास्ते षाडवा स्मृताः ॥ ४० ॥
षट्स्वरास्तेषु जातत्वाद् गीतं षाडवमुच्यते ।
वान्ति यान्त्युडुवोऽत्रेति व्योमोक्तमुडुवं बुधैः ॥ ४१ ॥
पञ्चमं तत् सुभूतेषु पञ्चसङ्ख्या तदुद्भवाः ।
अडुवी सास्ति येषां च स्वराः स्थित्वौडुवा मताः ॥ ४२ ॥
ते सञ्जाता यत्र गीतेरथोडुवितमुच्यते ।
गीतादिविहितस्तत्र स्वरो ग्रह इतीरितः ॥ ४३ ॥
गीते समाप्तिकृन्न्यामः स्वर इत्यत उच्यते ।
भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा ॥ ४४ ॥
श्रीरागो मेघरागश्च षडेते पुरुषाह्वयाः ।
मध्यमादिर्भैरवी च बङ्गाली च वराळिका ॥ ४५ ॥
सैन्धवी च पुनर्ज्ञेया भैरवस्य वराङ्गनाः ।
तोडी कंभावती गौडी गुण्डक्रिककुभे तथा ॥ ४६ ॥
रागिण्यो रागराजस्य कौशिकस्य वराङ्गनाः ।
वेशावली रामकरी देशाक्षी फलमञ्जरी ॥ ४७ ॥

[1] कार्पूरवीं.

ललितासहिता एता हिन्दोलस्य वराङ्गनाः ।
केदारी कानडी देशी काम्भोजी नाटिका पुनः ॥ ४८ ॥
दीपकस्य प्रियाः पञ्च ख्याता रागविशारदैः ।
वसन्तो मालवी चैव मालवश्रीर्धनश्रिका ॥ ४९ ॥
असावरीति विज्ञेयाः श्रीरागस्य वराङ्गनाः ।
मल्हारी देशकारी च भूपाळी घूर्जरी तथा ॥ ५० ॥
ठक्काच पञ्चमी भार्या मेघरागस्य योषितः ।
षण्णां पुरुषरागाणां पञ्च पञ्च स्त्रियो मताः ॥ ५१ ॥
एवं स्त्रीपुंसभेदेन षट्त्रिंशत् समुदीरिताः ।
क्रमादेषां लक्षणं च ध्यानं च समुदीर्यते ॥ ५२ ॥
धैवतांशग्रहन्यासो रिपहीनोऽधमान्तकः ।
भैरवस्य तु विज्ञेयो धैवतादिकमूर्छनः ॥ ५३ ॥
धैवतो विकृतो यस्मिन् षाडवः परिकथ्यते ॥
गङ्गाधरश्शशिकलातिलकस्त्रिणेत्रः सर्पैर्विभूषिततनुर्गजकृत्तिवासाः ।
भास्वत्त्रिशूलकरएष नृमुण्डधारी शुभ्राम्बरो जयति भैरव आदिरागः ॥
"ध नि स ग म प ध म" इति भैरवरागः ॥
मध्यमादिश्च रागाङ्गग्रहांशन्यासमध्यमः ।
समस्वरैस्तु गातव्या मध्यमादिकमूर्छना ॥ ५६ ॥
संपूर्णा कथिता तज्ज्ञैः रिधहीना क्वचिन्मता ।
पर्यासहासं परिरभ्य कामं सुचुम्बिता स्यात् कमलायताक्षी ।
स्वर्णच्छविः कुङ्कुमलिप्तदेहा सा मध्यमादिः कथिता मुनीन्द्रैः ॥
"म प ध नि स रि ग म" इति मादिः ॥
संपूर्णा भैरवी ज्ञेया ग्रहांसन्यासमध्यमा ।
सल्विंती मूर्छना ज्ञेया मध्यमग्रामचारिणा ॥ ५८ ॥
कैश्चित्तेषां भैरववत् स्वरैर्ज्ञेया विलक्षणा ।
स्फटिकरजतपीठे रम्यकैलासशृङ्गे विकचकमलपत्रैरर्चयन्ती महेशम् ।
करधृतघनवाद्या पीतवर्णायताक्षी सुकविभिरियमुक्ता भैरवी भैरवस्त्री ॥
"म प ध नि च रि ग म" इति भैरवी ॥
बङ्गाली त्वौडुवा ज्ञेया ग्रहांशन्यासषड्जभाक् ।
रिधहीनेति विज्ञेया मूर्छना प्रथमा मता ॥ ६० ॥
पूर्णवाङ्गत्रयोपेता कल्लिनाथेन भासिता ।
कक्षे निवेशितकरा तरुणी तपस्विन्युग्रत्रिशूलपरिमण्डितवामहस्ता ।
भस्मोज्वला निबिडबद्धजटाकलापा बङ्गालिकेत्यभिहिता तरुणार्करोचिः
"सगमपनिस, समपधनि सरिगम" इति बङ्गाली ॥ ६१ ॥
षड्जग्रहांशकन्यासा वराटा कथिता बुधैः ।
प्रथमा मूर्छना या स्यात्संपूर्णा कीर्तिवर्धनी ॥ ६२ ॥

विनोदयन्ती दयितं सुकेशी सुकङ्कणा चामरचालनेन ।
कर्णे दधाना सुरवृक्षपुष्पं वराङ्गनेयं कथिता वराटी ।
"स रि ग म प ध नि स" इति वराटिका ॥ ६३ ॥
षड्जग्रहांशकन्यासा पूर्णा सैन्धविका मता ।
मूर्छनोत्तरमन्द्राद्या कैश्चित्षाडविका मता ॥ ६४ ॥
रि हीना तु भवेन्नित्यं रसे वीरे प्रयुज्यते ।
त्रिशूलपाणिश्शिवभक्तियुक्ता रक्ताम्बरा धारितबन्धुजीवा ।
प्रचण्डकोपा रसवीरयुक्ता सा सैन्धवी भैरवरागिणीयम् ॥
"स रि ग म प ध नि स, स ग म प ध नि स" इति सैन्धवी ॥
षड्जग्रहांशकन्यासः पूर्णो मालवकौशिकः ।
मूर्छना प्रथमा ज्ञेया काकलीस्वरसंयुता ॥ ६६ ॥
आरक्तवर्णो धृतगौरयष्टिर्वीरस्सुवीरेषु कृतप्रहारः ।
वीरैर्वृतो वीरकपालमालाधारी मतो मालवकौशिकोऽयम् ॥ ६७ ॥
"सरिगमपधनिस, सनिधपमगरिस" इति मालवकौशिकः ॥
मध्यमांशग्रहन्यासा सौद्विती मूर्छना मता ।
संपूर्णा कथिता तज्ज्ञैस्तौडी स्त्री कौशिकी मता ॥ ६८ ॥
ग्रहांशन्यासषड्जांशान् केचिदत्र प्रचक्षते ।
तुषारकुन्दोज्वलदेहयष्टिः काश्मीरकर्पूरविलिप्तदेहा ।
विनोदयन्ती हरिणं वनान्ते वीणाधरा राजति तौडिकेयम् ॥
"मपधनिसरिगम, सरिगमपधनिस" इति तोडिः ॥ ६९ ॥
धैवतांशग्रहन्यासा षाडवा त्यक्तपञ्चमा ।
कम्भावतीति विज्ञेया मूर्छना पौरवी मता ॥ ७० ॥
कम्भावती स्यात्सुखदा रसज्ञा तारुण्यलावण्यविभूषिताङ्गी ।
गानप्रिया कोकिलरम्यनादा प्रियंवदा कौशिकरागिणीयम् ॥
"ध नि स रि ग म ध" इति काम्भावती ॥ ७१ ॥
ग्रहांशन्यासषड्जास्याद्रिप्रहीना सुखप्रदा ।
मूर्छना प्रथमा ज्ञेया गौडी सर्वाङ्गसुन्दरी ॥ ७२ ॥
निवेशयन्ती श्रवणे वतंसमाम्रांकुरं कोकिलनादरम्या ।
श्यामा मधुस्यन्दिसुसूक्ष्मनादा गौडीयमुक्ता किल दोहलेन ॥
"स ग म प ध नि स" इति गौडी ॥ ७३ ॥
रिधहीना गुणकरी त्वौडवा परिकीर्तिता ।
निग्रहांशे तु विन्यासः कैश्चित् षड्जलया मता ॥ ७४ ॥
मूर्छना रजनी चात्र माल्वाश्रयणी च सा ।
शोकाभिभूतनयना करुणं रुदन्ती नम्रानना धरणिधूसरगात्रयष्टिः ।
आमुक्तचारुकबरी प्रियदूरवृत्तिः संकीर्तिता गुणकरी तरुणी कृशाङ्गी ॥

"नि स ग म प नि, स ग म द नि स" इति गुण्डक्रिया ॥
धैवतांशग्रहन्यासो सम्पूर्णा ककुभा मता ।
तृतीयमूर्छनोत्पन्ना शृङ्गाररसमण्डिता ॥ ७६ ॥
संशोषिताङ्गी रसमण्डिताङ्गी चन्द्रानना चम्पकदामयुक्ता ।
कटाक्षणे स्यात्परमा विचित्रा गाने नियुक्ता ककुभा मनोज्ञा ॥
"ध नि स रि ग म प ध" इति ककुभा ।
हिन्दोलको रिधत्यक्तस्तत्रयां गदितो बुधैः ।
मूर्छनाशुद्धमध्यस्थाद्वौडवः काकलीयुतः ॥ ७८ ॥
नितम्बिनीमन्दतरङ्गितासु डोलासु खेलासुखमादधानः ।
तासां कपोलेष्वतिकामयुक्तो हिन्दोलरागः कथितो मुनीन्द्रैः ।
"स रि ग म प नि स" इति हिन्दोलः ॥ ७९ ॥
धैवतांशग्रहन्यासो पूर्णा वेलावली मता ।
पौरवी मूर्छना ज्ञेया रसं वीरं प्रयुज्यते ॥ ८० ॥
सङ्केतदीक्षां दयिताय दत्वा नितम्बिनी भूषणमङ्गलेषु ।
मुहुः स्मरन्ती स्मरमिष्टदेवं वेलावली नीलसरोजकान्तिः ॥
"ध नि स रि ग म प ध" इति वेलावली ॥ ८१ ॥
षड्जग्रहांशकन्यासा पूर्णा रामकरी मता ।
मूर्छना प्रथमा ज्ञेया करुणे सा प्रयुज्यते ॥ ८२ ॥
रिधौ त्यक्त्वा तु सा कैश्चित्कैश्चित्पञ्चमवर्जितः ।
देहप्रभाभासुरभूषणानि नीलं निचोलं वपुषा वहन्ती ।
कान्ते समीपे पदमाश्रितेऽपि मानोन्नता रामकरी मतेयम् ॥ ८३ ॥
"स रि ग म प ध नि स" इति रामकरी ॥
देशाक्षी षाडवा ज्ञेया गत्रयेण विभूषिता ।
ऋषभेण वियुक्ता सा शार्ङ्गदेवेन कीर्तिता ॥
मूर्छना हरिणाश्वा च सम्पूर्णा केचिदूचिरे ॥ ८४ ॥
वीरे रसे व्यञ्जितरोमहर्षं निरुद्धसम्बन्धविलासमाहुः ।
प्रांशुः प्रचण्डः कलिताङ्गरागो देशाक्षिरागः कथितो मुनीन्द्रैः ॥ ८५ ॥
"ग म प ध नि स रि ग" इति देशाक्षी ॥
पञ्चमांशग्रहन्यासा पूर्णाच फलमञ्जरी ।
वृषका मूर्छना ज्ञेया रसिकानां सुखप्रदा ॥ ८६ ॥
वियोगिनी क्लान्तविशीर्णगात्रा स्रजं वहन्ती वपुषा च शुष्का ।
आश्वास्यमाना प्रियया च सख्या सुधूसराङ्गी फलमञ्जरीयम् ॥ ८७ ॥
"प ध नि स रि ग म प" इति फलमञ्जरी ॥
रिपवर्जा च ललिता त्वौडवा सत्रया मता ॥ ८८ ॥
मूर्छना शुद्धमध्या सा संपूर्णा केचिदूचिरे ।
धैवतत्रसंयुक्का द्वितीया ललिता मता ॥ ८९ ॥

प्रफुल्लसप्तच्छदमाल्यधारी रुचा च गौरोत्पललोचनश्रीः ।
विनिर्गता दैवशात्प्रभाते विलासवेषा ललिता प्रदिष्टा ॥ ९० ॥
"स ग म ध नि स, ध नि स ग म ध" इति ललिता ॥
षड्जग्रहांशकन्यासस्सम्पूर्णो दीपको मतः ।
मूर्छना शुद्धमध्या स्याद्गातव्या गायने सदा ॥ ९१ ॥
बाला रतार्थं प्रविलीनवेषा गृहेऽन्धकारे सुखसंप्रयुक्ता ।
तस्याश्शिरोभूषणरत्नदीपैर्लज्जासुदग्रां कृतवान् प्रदीपः ।
"स रि ग म प ध नि स" इति दीपकः ॥ ९२ ॥
केदारी रिधहीनास्यादौडवा परिकीर्त्तिता ।
निवया मूर्छना मार्गिकाकली स्वरमण्डिता ॥
जटां दधानश्शितचन्द्रमौलिर्नागोत्तरीयो धृतयोगपीठः
गङ्गाधरो ध्याननिमीलिताक्षः केदाररागः कथितस्तपस्वी
"नि स ग म स नि" इति केदारः ॥ ९३ ॥
विनिषादार्थसम्पूर्णो निषादो विकृतो भवेत् ।
मार्गी च मूर्छना ज्ञेया कर्णाटियं सुखप्रदा ॥ ९४ ॥
कृपाणपाणिर्गजदन्तपत्रमेकं दधद्दक्षिणहस्तकेन ।
संस्तूयमाना सुरचारणौघैः कर्णाटिकेयं क्षितिपालमूर्त्तिः
"नि स रि ग म प ध नि" इति कर्णाटः ॥ ९५ ॥
देशी पञ्चमहीना सा ऋषभत्रयसंयुता ।
कपोलललिता ज्ञेया मूर्छना विकृतर्षभा ॥ ९६ ॥
निद्रालसं सा कपटेन कान्तं विबोधयन्ती सुरतोत्सवाय
गौरी मनोज्ञा शिखिपिञ्छवस्त्रा ख्याता च देशी रतपूर्णचित्ता ॥
"रि ग म ध नि स रि" इति देशी ॥ ९७ ॥
धांशन्यासग्रहा पूर्णा पौरवी मूर्छना मता ।
मल्हारी निकटे ज्ञेया काम्भोजी च निगद्यते ॥ ९८ ॥
पीतं वसाना वसनं सुकेशी वने रुदन्ती करुणं सुमध्यमा ।
विलोकयन्ती विदिशास्सखीभिः काम्भोजिका कान्तमनुस्मरन्ती ॥
"ध नि स रि ग म प ध" इति काम्भोजी ॥ ९९ ॥
ग्रहांशन्यासषड्जा स्यात्संपूर्णा नाटिका मता ।
प्रथमा मूर्छना ज्ञेया गमकैर्बहुभिर्मता ॥ १०० ॥
तुरङ्गमस्कन्धनिविष्टबाहुः स्वर्णप्रभश्शोणितशोणगात्रः ।
सङ्ग्रामभूमौ विचरन् प्रतापी नाटोऽयमुक्तः किल शृङ्गमूर्त्तिः ॥
"स रि ग प ध नि स" इति नाटः ॥
श्रीरागस्तु विख्यातस्सत्रयेण विभूषितः ।
पूर्णस्सर्वगुणोपेतो मूर्छना प्रथमा भवेत् ॥ १०२ ॥

केचित्तु कथयन्त्येनमृषभत्रयसंयुतम् ।
अष्टादशाब्दः स्मरचारुमूर्त्तिर्धीरो लसत्पल्लवकर्णपूरः ।
षड्जादिसेव्योऽरुणवस्त्रधारी श्रीरागराजः क्षितिपालमूर्त्तिः ॥
"सरिगमपधनिस, रिगमपधनिसरि" इति श्रीरागः ॥ १०३ ॥
वसन्तिका तु सम्पूर्णा सत्रया कथिता बुधैः ।
श्रीरागमूर्छनेवात्र ज्ञेया रागविचक्षणैः ॥ १०४ ॥
शिखण्डिबर्होचयबद्धचूडः कर्णावतंसीकृतशोभनाम्रः ।
इन्दीवरश्यामतनुर्विलासी वसन्तकः स्यात्फलमन्जुलश्रीः ॥
"स रि ग म प ध नि स" इति वसन्तकः ॥ १०५ ॥
मालवी त्वौडवा ज्ञेया नित्रया रिपवर्जिता ।
रजनी मूर्छना ज्ञेया काकलीस्वरमण्डिता ॥
नितम्बिनीचुम्बितवक्त्रपद्मस्सुज्ज्वलत्कुण्डलवान् प्रमत्तः ।
सङ्केतशालां प्रविशन्प्रदेषे मालाधरो मालवरागराजः ॥
"नि स ग म ध नि" इति मालवः ॥ १०६ ॥
मालवश्रीस्तुरगाङ्गपूर्णा सत्रयभूषिता ।
मूर्छनोत्तरमन्द्रा स्याच्छृङ्गाररसमण्डिता ॥ १०७ ॥
रक्तोत्पलं हस्ततले नियुक्तं विभावयन्ती ततुदंहयष्टिः ।
रसालवृक्षस्य तले निषण्णा शोके स्थिता साकिल मालवश्रीः ॥
"स रि ग म प ध नि स" इति मालवश्रीः ॥ १०८ ॥
मंत्रया ऋषभत्यक्ता षाडवा च धनत्रिका ।
मूर्छना प्रथमा ज्ञेया रसे वीरे प्रयुज्यते ॥ १०९ ॥
दूर्वादलश्यामतनुर्मनोज्ञा कान्तं लिखन्ती चरणेन नूना ? ।
भिन्ना कपोले नयनेऽश्रुबिन्दुनिष्यन्दिनी धूतकचा धनश्रीः ॥
"स ग म प ध नि स" इति धनश्रीः ॥ ११० ॥
असावरी गरित्यक्ता धग्रहांशा तथौडवा ।
न्यासस्तु धैवतो ज्ञेयः करुणारसनिर्भरा ॥ १११ ॥ अथवा,
ककुभा दैवतोत्पन्ना ख्याता मांशग्रहा मता ।
पञ्चमेनैव रहिता षाडवा च निगद्यते ॥ ११२ ॥
श्रीखण्डशैलशिखरः शुकपिच्छवस्त्रमातङ्गमौक्तिककृतोत्तमहारवल्ली ।
आकृष्य चन्दनतरोस्तुरगं वहन्ती साऽसावरी वलयमुज्ज्वलनीलकान्तिः ।
"ध नि स म प ध, म ध नि स रि ग ध" इत्य सावरी ॥
मेघः पूर्णो धत्रयः स्यादुत्तरायणमूर्छनः ।
विकृतो धैवतो ज्ञेयः शृङ्गाररसपूरितः ॥ ११४ ॥
नीलोत्पलाभवपुरिन्दुसमाननीलः पीताम्बरस्तुषितचातकयाच्यमानः ।
पीयूषमन्दहसितो द्रुममध्यवर्त्ती वीरेषु राजति युवा किल मेघरागः ॥
'ध नि स रि ग म प ध" इति मेघरागः ॥

मल्लारिः सपहीना स्यादौडवी षाडवीयुता ।
वर्षासु सुखदा ज्ञेया धांशान्यासग्रहान्विता ॥ ११६ ॥
गौरी कृशा कोकिलरम्यनादा गीतच्छलेनात्मपतिं स्मरन्ती ।
आदाय वीणां मलिना रुदन्ती मल्लारिका यौवनदूनचित्ता ॥
"ध नि रि ग म ध" इति मल्लारिः ॥ ११७ ॥
देशकारी तु सम्पूर्णा षड्जन्यासग्रहांशका ।
मूर्छना प्रथमा ज्ञेया वराटीमिश्रिता भवेत् ॥ ११८ ॥
भर्त्रा समं केलिरतिस्सुकेशी सर्वाङ्गपुष्टा कमलायताक्षी ।
पीनस्तनी रुक्मतनुस्सुपूर्णा चन्द्रानना सैवहि देशकारी ।
"स रि ग म प ध नि स" इति देशकारी ॥ ११९ ॥
षड्जग्रहांशकन्यासा भूपाली कथिता बुधैः ।
मूर्छना प्रथमा ज्ञेया संपूर्णा शान्तके रसे ।
कैश्चित्तु रिपहीनेयमौडवा परिकीर्त्तिता ॥ १२० ॥
गौरद्युतिः कुंकुमलिप्तदेहा तुङ्गस्तनी चन्द्रमुखी मनोज्ञा ।
भर्तुः स्मरन्ती विरहेण दूना भूपालिका शान्तरसेषु युक्ता ॥
"स रि ग म प ध नि स" इति भूपालिका ॥ १२१ ॥
ग्रहांशन्यासऋषभो संपूर्णा गुर्जरी मता ।
सप्तमी मूर्छना सा स्याद् भूपाल्या सह मिश्रिता ॥ १२२ ॥
श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लवतल्पमध्ये ।
श्रुतिस्वराणां दधती विभागं तन्त्रीमुखा दक्षिणगुर्जरीया ॥
"रि ग म प ध नि स रि" इति गुर्जरीरागः ॥ १२३ ॥
टक्का स्यात्तु त्रिधा षड्जा सम्पूर्णा स्यादि मूर्छना ।
शय्यासुखुसं नलिनीदलाङ्गं वियोगिनं वीक्ष्य विषण्णचित्ता ।
सुवर्णवर्णा गृहमागता सा विभूषयन्ती किल टक्कसंज्ञा ॥ १२४ ॥
"स रि ग म प ध नि स" इति टक्कारागः ॥
इति क्रमेण षट्त्रिंशद्रागास्सम्यद् निरूपिताः ।
रागास्त्वनन्ता विज्ञेया द्रष्टव्याः स्युर्मनीषिभिः ॥ १२५ ॥
रागच्छायानुकारित्वाद्रागाङ्गमिति कथ्यते ।
मध्यमादिमुखाः प्रोक्ता रागाङ्गानि त्रयोदश ॥ १२६ ॥
किञ्चिद्भाषानुरागित्वं भाषाङ्गमिति कथ्यते ।
उप सामीप्यतो वृत्ती रागानां स्यादुपाङ्गता ॥ १२७ ॥
तानानां कारणं तत्र क्रियाशब्देन कथ्यते ।
क्रियायां तूद्भवेदङ्गं क्रियाङ्गं तदुदाहृतम् ॥ १२८ ॥
भावक्रियाविक्रियानि प्रोक्तानि द्वादशैव तु ।
प्रोक्ताःषण्णवातिर्भाषाः शार्ङ्गदेवस्य सम्मताः ।
अथवेला ॥ १२९ ॥

पूर्वयामे तु देशाक्षी भैरवः फलमञ्जरी ।
भूपाली साहुरी रामक्रिया गुर्जरसंभवा ॥ १३० ॥
वेलावली द्वितीये तु कुरञ्जी शुभकौशिकी ।
[1]तुण्डी वराली धन्यासी वङ्गालश्च वसन्तकः ॥ १३१ ॥
ललिताथ तृतीये तु यामे जीमूतरञ्जनी ।
वौली चान्द्रोलिका रामक्रिया गुण्डक्रिया अपि ॥ १३२ ॥
मल्लारी देशकार्याख्या भल्लारी च ततः परम् ।
यामे तु मालवी तुर्ये गौळः कर्णाटगौलिकौ ॥ १३३ ॥
गौल्नारायणाख्या च गातव्या गायकोत्तमैः ।
देशाक्षी भैरवी शुद्धा साळगाख्या च भैरवी ॥ १३४ ॥
देवक्रिरस्तहंसं च माहुरी रागरञ्जकः ।
एते सूर्योशतो जातास्सायंकालेऽतिनिन्दिताः ॥ १३५ ॥
प्रगायति प्रभाते यस्स नरस्सुखमश्नुते ।
शुद्धनद्दा सालगा च नद्दा शुद्धवराटका ॥ १३६ ॥
वराटका द्राविडी च देशी नागवराटका ।
छायावराटका च स्यान्माहुर्यम्वालिका तथा ॥ १३७ ॥
मल्लारिका तथा च्छाया गौडी कर्णाटिकाह्वया ।
गौळो मालवगौळश्च रामक्रिरतिरुत्तमा ॥ १३८ ॥
छाया रामकृती रङ्गछाया सर्ववराटका ।
कर्णाटाह्वयवङ्गोलसहितश्चन्द्रमोंशकाः ॥ १३९ ॥
सायमेते प्रागतव्यास्तस्य श्रीरतुला भवेत् ।
अत्रोक्तेतररागाणां न वेलानिर्णयः क्वचित् ॥ १४० ॥
अवेलरागामाकर्ण्य तस्य दोषस्य शान्तये ।
ईशानं च हरिं स्मृत्वा मध्यमादिं प्रयोजयेत् ॥ १४१ ॥
देवताविषयं गीतं पुण्यगीतं च यद्भवेत् ।
आध्यात्मं चैव यद् गीतं तदा तत्पापनाशनम् ॥ १४२ ॥
विवाहसमये गानं देवतास्तुतिपूर्वकम् ।
अवेलरागमाकर्ण्य न दोषः परिकीर्त्तितः ॥ १४३ ॥
आयुर्धर्मो यशो बुद्धिर्धनं धान्यं बलं शुभम् ।
राज्याभिवृद्धिस्सन्तानं पूर्णारोग्यफलं भवेत् ॥ १४४ ॥
संग्रामरूपलावण्यविरहा गुणकीर्तनम् ।
षाडवेन प्रगातव्यं लक्षणं चरितं तथा ॥ १४५ ॥
व्याधिनाशे शत्रुनाशे भयशोकविनाशने ।
दुःस्थिते चैव सन्तापे मङ्गलाचारसंयुते ॥ १४६ ॥
औडवेन प्रगातव्यं क्षामे च ग्रहमोक्षणे ।
प्रवीणश्शब्दविद्यायां तथालङ्कारपद्धतौ ॥ १४७ ॥

तथा शास्त्रेषु कुशलो लोकव्यापारकोविदः ।
गीतशास्त्रेषु निष्णातः स्वरलक्षणलक्ष्यवित् ॥ १४८ ॥
रागरागाङ्गभाषासु क्रियासु च विचक्षणः ।
कर्ता स्वरप्रधानानां धातुमातुविचक्षणः ॥ १४९ ॥
स्रष्टा च सर्वरीतीनां देशभाषाविशारदः ।
तालमानक्रियादक्षो निर्भयः प्रतिभान्वितः ॥ १५० ॥
स्वरपाठप्रयोगेषु प्रवीणः पदबन्धने ।
श्रेष्ठवाग्गेयकारोऽयमुत्तमोत्तम उच्यते ॥ १५१ ॥
गुणैः कैश्चिद्विहीनोऽपि धातुमातुविचक्षणः ।
उत्तमस्सतु विज्ञेयो गायकेष्वपि निन्दितः ॥ १५२ ॥
प्रयुङ्क्ते वर्जितं यस्तु स्वरं रागक्रियाविधौ ।
प्रारब्धांशं न शक्नोति पुनः स्थापयितुं धिया ॥ १५३ ॥
स चास्वर इति ज्ञेयो निन्दितो गायकाधमः ।
न्यूनाधिका श्रुतिर्यस्य षड्जादिषु विभाव्यते ॥ १५४ ॥
स बाह्यो निन्दितो ज्ञेयो गायको रागनाशकः ।
नासाह्वारगतैर्नादैर्यस्तु गायति गायकः ॥ १५५ ॥
कपिलस्स तु विज्ञेयस्सोऽपि कष्टतमो मतः ।
काकस्वरसमो यस्य स्वरः कर्णकठोरकः ॥ १५६ ॥
ध्वनिर्यत्र प्रयोगेषु स काकी निन्दितो भृशम् ।
सन्दश्य्वा दशानान् सर्वान् चर्वन्निव पदावलिम् ॥ १५६ ॥
यो गायति स विज्ञेयस्सन्दष्टो गीतनाशकः ।
व्यवस्थितं तु यद्गीतं यः करोत्यव्यवस्थितम् ॥ १५७ ॥
अव्यवस्थितनामासौ निन्दितो गायको बुधैः ।
मुहुरुच्छ्वासनिःश्वासफूत्कारपरिगर्जितैः ॥ १५९ ॥
खासैर्निष्ठ्यूतसंयुक्तैः फूत्कारो गायकोऽधमः ।
ग्रीवायां यस्य भाले च शिरालाभः प्रदृश्यते ॥ १६० ॥
घोणोत्फुल्लारुणे नेत्रे गायन्निन्द्यस्स कम्पकः ।
अलर्थं कन्धरां वक्रां कृत्वा गीतं तु गायति ॥ १६१ ॥
समं गातुं न जानाति स वक्री कथ्यतेऽधमः ।
व्यादाय वदनं यस्तु करालध्वनिसंयुतः ॥ १६२ ॥
गीतं गायति स ज्ञेयः कराली स निराकृतः ।
निमील्य नयनद्वन्द्वमपश्यन्नग्रतः स्थितान् ॥ १६३ ॥
गायन्निन्द्यः परिज्ञेयो निन्दितस्स निमीलनः ।
उष्ट्रवत्कन्धरां कृत्वा जानुभ्यामाश्रितो महीम् ॥ १६४ ॥
यो गायति स विज्ञेय उष्ट्रग्रीवोऽतिनिन्दितः ।
प्रसार्य गात्रं हस्तौ च गीतं चाप्यविचक्षणः ॥ १६५ ॥

[1] तोडी.

गायन्मानाधिकं प्रोक्तः प्रसारी स न शस्यते ।
कम्पमानो ध्वनिर्यस्य सहजो गीतकर्मणि ॥ १॥६ ॥

कम्पितस्स तु विज्ञेयो निन्दितो ध्वनिकोविदैः
अभ्यासेन विना यस्तु रागाणां वक्ति कारकम् ॥ १५७ ॥

शरीरेण समुत्पन्नं शारीरं तत्प्रचक्षते ।
चम्पकेषु यथा गन्धः कान्तिर्मुक्ताफलेषु च ॥ १५८ ॥

यथेक्षुदण्डे माधुर्यं शारीरे श्राव्यता तथा ।
अन्यजन्मकृताभ्यासाद्दानयोगाच्छिवार्चनात् ॥ १५९ ॥

शारीरं प्राप्यते पुंभिरभ्यासान्नैव लभ्यते ।
शिक्षितो भावकश्चैव रञ्जको रसिकस्तथा ॥ १७० ॥

अपरः कुट्टकाराख्यः पञ्चधा गायकाः स्मृताः ।
कृतं वाग्गेयकारेण श्रुतं गृह्णात्युनक्तकम् ॥ १७१ ॥

स विस्मरन् सावधानी शिक्षाकारस्स कथ्यते ।
रसहानौ न संधत्ते निर्भावे भावमानयेत् ॥ १७२ ॥

रागं करोति वैदग्ध्याद्भावकस्सोऽभिधीयते ।
श्रोतॄणां हृदयं ज्ञात्वा तेषां चित्तानुसारतः ॥ १७३ ॥

गायन् रञ्जयते यस्तु स रञ्जक इति स्मृतः ।
स्निग्धामात्मश्रुतिं श्रुत्वा भ्रूरमानन्दभाग्भवेत् ॥ १७४ ॥

पुलकाञ्चितसर्वाङ्गो गाता च रसिकः स्मृतः ।
परगीतानुकारं यो ध्वनिचेष्टादिसंयुतम् ॥ १७५ ॥

सम्यक् प्रकुरुते वक्षः कुट्टकारस्स उच्यते ।
स्वरं वर्णं च तालं च युक्तं यो घटयेत् त्रयम् ॥ १७६ ॥

शोभनध्वनिसंयुक्तस्संकरो गायको हि सः ।
यथा शास्त्रप्रयोगेण मार्गं देशीयमेव च ॥ १७७ ॥

यो गायति विना दोषैः कथ्यतेऽसौ क्रियापरः ।
वेणुवीणासमैर्नादै रक्तोऽसौ ध्वनिरिष्यते ॥ १७९ ॥

कोकिलस्वनसङ्काशो मधुरो ध्वनिरुच्यते ।
उच्चस्थाने प्रियश्राव्यस्निग्धो ध्वनिरसो मतः ॥ १८० ॥

अकृशो निविडो यस्तु स्वरोऽसो ध्वनिरिष्यते ।
दूरस्थः श्रूयते यस्तु वृन्दमध्यस्थितोऽपिवा ॥ १८१ ॥

स माधुर्यगुणोपेतः श्रावकोऽसौ ध्वनिर्मतः ।
स्थानत्रयेऽपि यश्श्राव्यश्शोभनो लक्षणान्वितः ॥ १८२ ॥

ध्वनीनामुत्तमः प्रोक्तो ध्वनिस्थानकशोभनः ।
शारीरं च ध्वनिर्मेधा प्रौढिर्गमककौशलम् ॥ ६८३ ॥

तालज्ञानमभीतिश्च गातुस्सप्त महागुणाः ।
गीतस्याङ्गानि नादादिन्यासान्युक्तानि यानि तु ॥ १८४ ॥

तान्यष्टादश सङ्ख्यातान्याख्यातानि यथाक्रमम् ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
जात्यादिकाङ्गगायकलक्षणनिरूपणं नामाष्टमस्तरङ्गः.

अथ नवमस्तरंगः

अतः परं च क्रियते तालानां सुनिरूपणम् ।
गीतं वाद्यं च नृत्तं च सर्वं ताले प्रतिष्ठितम् ॥ १ ॥
न तालेन विना किञ्चित्तस्मात्तालस्य मुख्यता ।
तकारस्ताण्डवः प्रोक्तो लकारो लास्यमुच्यते ॥ २ ॥
तकारश्शङ्करः प्रोक्तो लकारः पर्वती स्मृता ।
शिवशक्तिसमायोगात् ताल इत्यभिधीयते ॥ ३ ॥
न तालेन विना गीतं नवाद्यं तालवर्जितम् ।
न नृत्तं तालहीनं स्याद्रञ्जकस्स ततो मतः ॥ ४ ॥
अतः परं तालभेदा उदीर्यन्ते यथाक्रमम् ।
शिवपञ्चाननोद्भूताः पञ्च तालाः प्रकीर्तिताः ॥ ५ ॥
सद्योजातमुखे चञ्चत्पुटतालस्समुद्भूतः ।
वामदेवमुखे चाचपुटतालस्समुत्थितः ॥ ६ ॥
अघोराख्ये मुखे चातष्षट्पितापुत्रकस्तथा ।
मुखे तत्पुरुषे चातस्सम्पद्वेष्टकसंज्ञकः ॥ ७ ॥
ईशानाख्ये मुखे देवि! ताल उद्घट्टसंज्ञकः ।
तस्मादेते पञ्च तालाः प्रशस्ताः पातकापहाः ॥ ८ ॥
चञ्चत्पुटश्चाचपुटष्षट्पितापुत्रकस्तथा ।
सम्पद्वेष्टसमुद्घट्टावादितालश्च दर्पणः ॥ ९ ॥
चचरी सिंहलीलश्च त्विभिन्नो वीरविक्रमः ।
हंसलीलो वर्णभिन्नो राजचूडामणिस्तथा ॥ १० ॥
रङ्गद्योतो राजतालः कन्दर्पस्सिंहविक्रमः ।
प्रत्यङ्गो रतिलीलश्च सिंहविक्रीडितस्तथा ॥ ११ ॥
श्रीरङ्गो रतिलीलश्च रङ्गतालश्च कन्दुकः ।
वनमाली वर्णतालः पूर्णरङ्गप्रदीपकः ॥ १२ ॥
हंसनादस्सिंहनादो मल्लिकामोदसंज्ञकः ।
ततः कुरङ्गलीलश्च रङ्गाभरण एवच ॥ १३ ॥
ततस्तुरङ्गलीलश्च सिंहनन्दन संज्ञकः ।
जयश्रीर्विजयो नन्दः प्रतितालो द्वितीयकः ॥ १४ ॥
मकरन्दः कीर्त्तितालो विजयो जयमङ्गलः ।
राजविद्याधरो मक्ठो जयश्चैव हुडुक्कः ॥ १५ ॥
ततो निस्सारुकः क्रीडा त्रिभङ्गी कोकिलप्रियः ।
श्रीकीर्तिर्विन्दुमारी च समतालश्च नन्दनः ॥ १६ ॥
दुर्दीक्षणो मट्टिका च ढेंकिका वर्णमट्टिका ।
अभिनन्दो रतिक्रीडो मल्लतालश्च दीपकः ॥ १७ ॥
अनङ्गतालो विषमो नान्दीमुकुलसंज्ञकः ।
सिंहतालश्च कङ्कालः चतुस्ताली च दोम्बली ॥ १८ ॥
अभङ्गो राजकङ्खोलस्तथैव लघुशेखरः ।
प्रतापशेखरश्चान्यो जगज्झम्पश्चतुर्मुखः ॥ १९ ॥
झम्पा च प्रतिमठ्ठश्च तथा तालस्तृतीयकः ।
तस्मादुपरि विज्ञेयो वसन्ततिलको रतिः ॥ २० ॥
कपणाख्यो यतिश्चैव षट्तालो वर्धनस्तथा ।
तथोवर्णयतिश्चैव राजनारायणस्तथा ॥ २१ ॥
मदनश्चैव विज्ञेयः पार्वतीलोचनस्तथा ।
ततो गरुडतालः स्यात्तारः श्रीनन्दनो जयः ॥ २२ ॥
लीलाविलासिकश्चान्यो ललितप्रिय एव च ।
जनकश्चैव लक्ष्मीशो रागवर्धनसंज्ञकः ॥ २३ ॥
उत्सवश्चेति तालानां स्यादेकाभ्यधिकं शतम् ।
चतुरस्रादितालानां लक्ष्मेदानीमहं ब्रुवे ॥ २४ ॥
प्रस्तारसदृशं लक्ष्यं तद्भेदांश्च चतुर्विधान् ।
ताले पञ्चत्पुटे ज्ञेयं गुरुद्वन्द्वं लघुप्लुतौ ॥ २५ ॥
गुरुर्लघुर्गुरुश्चैव भवेच्चञ्चत्पुटाभिधे ।
पलगा गलपाश्चैव षट्पितापुत्रके तथा ॥ २६ ॥
मगणः स्यात्प्लुताद्यन्तः सम्पद्वेष्टकतालके ।
उद्घट्टे मगणस्त्वेक आदिताले लघुः स्मृतः ॥ २७ ॥
दर्पणस्य द्रुतद्वन्द्वं गुरुश्चैव प्रकीर्तितः ।
अष्टद्रुस्तु चच्चार्यो विरामान्ते द्रुते लघुः ॥ २८ ॥
सिंहालीढे विधातव्यं लघ्वाद्यन्तद्रुतद्वयम् ।
द्रुतद्वयं यकारश्च कन्दर्पे परिकीर्त्तितः ॥ २९ ॥
सिंहविक्रमताले स्युर्मगणो कपला गहाः ।
श्रीरङ्गसंज्ञके ताले सगणो लघुपौ मतौ ॥ ३० ॥
रतिलीले विधातव्यं लघुद्वन्द्वं गुरुद्वयम् ।
चत्वारो रङ्गताले स्युर्द्रुतो गुरुस्ततः परम् ॥ ३१ ॥
परिक्रमे लघुद्वन्द्वं यगणस्तदनन्तरम् ।
प्रत्यङ्गसंज्ञके ताले मगणस्याल्लघुद्वयम् ॥ ३२ ॥

चतुष्कं च विरामान्तं गजलीले प्रकीर्त्तितम् ।
लघुर्गुरुर्लघुश्चैव त्रिभिन्नः परिकीर्त्तितः ॥ ३३ ॥
वीरविक्रमताले तु लद्रुतौ लगुरू ततः ।
सविरामं लघुद्वन्द्वं ताले स्याद्धंसलीलके ॥ ३४ ॥
वर्णभिन्नाभिधे ताले द्रुतद्वन्द्वं लघुर्गुरुः ।
राजचूडामणौ ताले द्रुतौ लश्च द्रुतौ लगौ ॥ ३५ ॥
रङ्गद्योतनताले तु मगणो लप्लुतावपि ।
गपौ द्रुतौ लगौ पश्च सिंहविक्रीडितं लपौ ॥ ३६ ॥
वेदद्रुतौ लो द्रुतौ च वनमाली निगस्तथा ।
गुरुर्लघुद्रुतौ गश्च वर्णे स्याच्चतुरस्रके ॥ ३७ ॥
लगा द्रुतौ लघू गश्च वैषे वर्णः प्रकीर्त्तितः ।
परित्रुर्ये विरामान्त्यभिश्राख्ये द्वादश द्रुतौ ॥ ३८ ॥
प्लुतो गुरुर्द्रुतद्वन्द्वं गद्वयं लो गुरुस्ततः ।
रङ्गप्रदीपताले स्यात्तगणाद्गप्लुतौ यदि ॥ ३९ ॥
लप्लुतौ द्रुतयुग्मं च हंसनादे निरूपितः ।
ताले स्यान्मल्लिकामोदे लद्वयं खचतुष्टयम् ॥ ४० ॥
लघुर्द्रुतचतुष्कं लो स्मातां शरभलीलके ।
तगणाल्लौ च गौराद्यौ रङ्गाभरणसंज्ञके ॥ ४१ ॥
लपला गो द्रुतो गौ तो पलपा गश्चलद्वयम् ।
निश्शब्दं लचतुष्कं च ताले स्यात्सिंहनन्दने ॥ ४२ ॥
तुरङ्गलीलताले स्याद् द्रुतद्वन्द्वं लगौ ततः ।
भगणाल्लो गुरुश्चैव जयश्रीः परिकीर्त्तितः ॥ ४३ ॥
भवेयुर्विजयानन्दे लद्वयं गुरवस्त्रयः ।
लो द्रुतौ प्रतितालस्य द्रुतौ लश्च द्वितीयके ॥ ४४ ॥
मकरन्दे द्रुतद्वन्द्वं लघुत्रयमतो गुरुः ।
लपौ पगौ लपौ चैव कीर्त्तिताले प्रकीर्त्तिता: ॥ ४५ ॥
प्लुतो गश्च प्लुतो गश्च ताले विजयसंज्ञके ।
सगणद्वितयं यत्र सतालो जयमङ्गलः ॥ ४६ ॥
लघुर्वक्रो द्रुतौ ताले राजविद्याधराभिधे ।
सकारान्मध्यताले स्यात् कम्पितं लचतुष्टयम् ॥ ४७ ॥
भकारतो गुरुद्वन्द्वं निश्शब्दमथवा भवेत् ।
अथवा नगणो गश्च लघू चेति प्रकीर्त्तितः ॥ ५८ ॥
जगणो लो द्रुतौ यश्च जयताले प्रकीर्त्तितः ।
द्रुतद्वयं लघुद्वन्द्वं भवेत्ताले हुडुक्कके ॥ ४९ ॥
लघुद्वन्द्वं विरामान्तं ताले निस्सारके भवेत् ।
द्रुतद्वयं विरामं तं क्रीडाताले प्रकीर्त्तितम् ॥ ५० ॥

चण्डनिस्सारकः कैश्चिदयमेवमभिधीयते ।
सकाराद् गुरुणैकेन त्रिभङ्गीत्यभिधीयते ॥ ५१ ॥
कोकिलप्रियताले स्युः क्रमाद् गुरुलघुप्लुताः ।
श्रीकीर्त्तिसंज्ञके ताले गुरुद्वन्द्वे लघुद्वयम् ॥ ५२ ॥
चत्वारो विन्दवो गुर्वोर्मध्ये स्युर्विन्दुमालिनि ।
समताले लघुद्वन्द्वं विरामं तद् द्रुतद्वयम् ॥ ५३ ॥
लौ द्रुतश्च प्लुतश्चान्त्यस्ताले स्यान्मण्डलाभिधे ।
केचिद्विदक्रियोर्मध्ये विन्दुयुग्मं प्रचक्षते ॥ ५४ ॥
दुरीक्षणे लघुद्वन्द्वाद् गुरुरेकः प्रकीर्त्तितः ।
मल्लिकायां विधातव्या गुरुविन्दुप्लुताः क्रमात् ॥ ५५ ॥
विरामो व्योमयुग्मं च लद्वयं चेति केचन ।
ढेंकिकारगणे मल्लताले च लघवो गुरू
द्रुतद्वयं लघुद्वन्द्वं गुरुद्वन्द्वं च दीपके ॥ ५७ ॥
लघुप्लुतौ सकारश्च स्यादनंगाभिधे पुनः ।
वेदद्रुता विरामान्ता द्विवारं विषमे मताः ॥ ५८ ॥
नन्दिताले समुद्दिष्टा लघू विन्दुलघू गुरू ।
मुकुलाख्ये तथा ताले लघू विन्दुलघू गुरुः ॥ ५९ ॥
अन्त्यैर्लघ्वादिगुर्वन्तं मध्यविन्दुचतुष्टयम् ।
लघुद्वयात् सकारेण कन्दुकः परिकीर्त्तितः ॥ ६० ॥
एकेनैव द्रुतेन स्यादेकतालश्च संज्ञया ।
चतुर्विधस्तु कंकाकः पूर्णखण्डसमासमः ॥ ६१ ॥
पूर्णो लघुचतुष्केन गुरुणा लघुना क्रमात् ।
द्रुतद्वयं लघुः खण्डे गुरुद्वन्द्वं लघू समे ॥ ६२ ॥
एको लघुर्गुरुद्वन्द्वं कंकाले विषमे भवेत् ।
चतुस्ताले गुरुः पूर्वं ततो विन्दुत्रयं भवेत् ॥ ६३ ॥
विरामान्तं लघुर्विन्दुर्दोम्बलाख्ये प्रकीर्त्तितः ।
लघुमेकं वदन्त्यन्ये ताले बद्धफणाभिधे ॥ ६४ ॥
अभंगताले कर्तव्यो लघोरग्रे विमात्रकः ।
रगणाद् विन्दुयुग्मेन राजखेकोल इष्यते ॥ ६५ ॥
एकेन सविरामेण लघुना लघुशेखरः ।
प्रतापशेखरे स्याद्वाद् विरामान्तं द्रुतद्वयम् ॥ ६६ ॥
चतुर्मुखाभिधे ताले भगणानन्तरं प्लुतः ।
गुरुलघुः प्लुतः कैश्चिदयमेव प्रकीर्त्तितः ॥ ६७ ॥
व्योमद्वयं विरामान्तं लश्च झम्पाभिधे भवेत् ।
सगणो भगणो वापि प्रतिमण्ठे बुधैः स्मृतः ॥ ६८ ॥
तालैरयमेवान्यैस्सोकलः परिकीर्त्तितः ।
तृतीयताले बिन्दोः स्यात्सविरामं द्रुतत्रयम् ॥ ६९ ॥

वसन्तकाले कर्तव्यो नगणो मगणस्तथा ।
ताले ललितसंज्ञे स्याद् द्रुतद्वन्द्वं गुरुर्लघुः ॥ ७० ॥
अतिताले लघुः कार्यस्ततश्चैव गुरुः स्मृतः ।
ताले करणयत्याख्ये ज्ञेयं विन्दुचतुष्टयम् ॥ ७१ ॥
षट्तालसंज्ञके ताले विन्दुषट्कं निरन्तरम् ।
वर्धने विन्दुयुगलं ततः कार्यौ लघुप्लुतौ ॥ ७२ ॥
वर्णइत्यभिधे ताले लघुद्वन्द्वं प्लुतद्वयम् ।
राजनारायणे विन्दुद्वितयं जगणो गुरुः ॥ ७३ ॥
तद्वयं द्रुप्लुतश्चैको मदने परिकीर्त्तितः ।
पार्वतीलोचने प्रोक्तो लो द्रुतौ तनभाः क्रमात् ॥ ७४ ॥
गलयं लघु विन्दुश्च गुरुद्वन्द्वं द्रुतद्वयम् ।
गारुडी कथ्यते प्राज्ञैर्विरामान्त्यश्चतुर्द्रुतः ॥ ७५ ॥
श्रीनन्दनस्य तालस्य भगणात्प्लुत इष्यते ।
जयः स्याज्जगणो लश्च विन्दुयुग्मं प्लुतस्तथा ॥ ७६ ॥
विन्दुर्लघुः प्लुतश्चैव लीलाताले प्रकीर्त्तितः ।
विलोकिते लघुर्वक्रशून्ययुग्मं प्लुतस्तथा ॥ ७७ ॥
ललितप्रियताले स्यात्सगणानन्तरं लघुः ।
जनकाभिधताले स्यान्मयसंभ्यः परं गुरुः ॥ ७८ ॥
विन्दुद्वयं विरामं तं लक्ष्मीशे लप्लुतौ ततः ।
लघुद्वयं विरामं तं लप्लुतौ रागवर्धने ॥ ७९ ॥
उत्सवः कथितः प्राज्ञैर्लघोरूर्ध्वं द्रुतो लघुः ।
अन्येऽपि सन्ति भूयांसस्तालास्ते लक्ष्मवर्त्मनि ॥ ८० ॥
प्रसिद्धिविधुरत्वेन शास्त्रेऽस्मिन्न प्रदर्शिताः ।
तद्भेदप्रत्ययार्थं तु लघूपाया भवन्त्यमी ॥ ८१ ॥
प्रस्तारसङ्ख्ये नष्टं चोद्दिष्टं वा तालकस्ततः ।
द्रुतमेरुर्लघुमेरुर्गुरुमेरुः प्लुतस्य च ॥ ८२ ॥
मेरुसंयोगमेरुश्च खण्डप्रस्तारकस्तथा ।
प्राचां चतुर्णां मेरूणां नष्टोद्दिष्टौ पृथक् पृथक् ॥ ८३ ॥
एकोनविंशतिरिति प्रत्ययास्तान् ब्रुवेऽधुना ।
न्यस्याल्पमाद्यान्महतोऽधस्ताच्छेषं यथोपरि ॥ ८४ ॥
प्रागूने वामसंस्थांस्तु संभवे महतो लिखेत् ।
अल्पेन संभवेत्तालः पूर्तौ चैवाप्ययं विधिः ॥ ८५ ॥
सर्वद्रुतावधिः कार्यः प्रस्तारोऽयं लघौ गुरौ ।
प्लुते व्यस्ते समस्ते च न तु व्यस्ते द्रुतेऽस्ति सः ॥ ८६ ॥
एकद्व्यङ्कान् क्रमान्न्यस्य युञ्जीताद्यं पुरातनैः ।
द्वितीयस्तुर्यषष्ठाङ्कैरभावे तुर्यषष्ठयोः ॥ ८७ ॥
तृतीयपञ्चमाङ्काभ्यां क्रमात्तं योगमग्रतः ।
लिखेद्दक्षिणसंस्थैवमङ्कश्रेणिर्विलीयते ॥ ८८ ॥
सा चाङ्कैरिष्टतालस्तद् द्रुतसंख्यैस्समाप्यते ।
द्रुतो लघुस्सार्धमात्रश्चैकैकद्रुतवर्धिताः ॥ ८९ ॥
तालभेदाः क्रमादङ्कैस्संख्यायन्ते क्रमादिह ।
यदङ्कयोगादन्त्योऽङ्को लब्धस्तैरन्ततः क्रमात् ॥ ९० ॥
भेदा द्रुतान्ता लघ्वन्ता गुर्वन्ताश्चेत् प्लुतान्तकाः ।
संख्यायन्त इति प्रोक्ता अत्र निश्शंकसूरिणा ॥ ९१ ॥
अत्रैतावतिको भेदस्तस्योत्तरमिहोच्यते ।
भेदानां यावतां मध्ये नष्टप्रश्नः श्रुतो भवेत् ॥ ९२ ॥
तावत्संख्याङ्कपर्यन्तां लिखेत् संख्याङ्कसन्ततिम् ।
अन्त्याङ्के तत्र नष्टाङ्कं पातयेदथ शेषतः ॥ ९३ ॥
पातयेत् पूर्वपूर्वाङ्कं तत्र त्वपतिताद् द्रुताः ।
पूर्वश्चेत्पतितो न स्याल्लघुस्तु पतिताद्भवेत् ॥ ९४ ॥
उत्तरेणाकृतार्थेन सहिता तदसम्भवे ।
अकृतार्थेन पूर्वेण सान्तरे पतिते पृथक् ॥ ९५ ॥
लघुर्निरन्तरे त्वस्मिन् लघुरेव गुरुर्भवेत् ।
गुरुहेतौ तृतीये तु पतिते च प्लुतो भवेत् ॥ ९६ ॥
अन्त्याभावे द्रुता ग्राह्यास्तालपूरणहेतवः ।
इति नष्टस्य विज्ञेयमुत्तरं रूपनिर्णयात् ॥ ९६ ॥
नष्टेऽत्र कथितो भेदः कतमः प्रश्न ईदृशे ।
उद्दिष्टां तत्र संख्याङ्कसन्ततिं नष्टवल्लिखेत् ॥ ९७ ॥
यैरङ्कैः पतितैर्नष्टैर्लभ्यन्ते यत्प्लुतादयः ।
तानेवाङ्कान् लभन्ते ते भेदमुद्दिष्टमाश्रिताः ॥ ९८ ॥
यद्वा प्लुतो भवेदङ्क आद्यङ्कात्प्राप्तसप्तमे ।
तदभावेऽपि षष्ठाङ्के पातितेऽन्त्याङ्कमध्यतः ॥ ९९ ॥
निश्शेषस्सप्लुताल्लभ्यो लब्धहीनाङ्कदोषतः ।
ज्ञातपूरणसंख्या या उद्दिष्टोत्तरमिष्यते ॥ १०० ॥
आदौ रूपमथैकैकमङ्कं संख्याङ्कसंख्यकम् ।
क्रमादधोऽधो विन्यस्येदन्त्यादींश्चतुरस्तथा ॥ १०१ ॥
स्वपंक्तिस्थान्लिखेदङ्कादन्त्यसंख्याङ्कविद्रुतान् ।
किन्तु प्रतिनिधिर्नात्र विद्यते तुर्यषष्ठयोः ॥ १०२ ॥
नष्टतालद्रुतमितां वीथिकां विलिखेदपि ।
क्रमादन्तोपान्ततुर्यषष्ठैर्यत्र द्रुतादयः ॥ १०३ ॥
निर्णीयन्ते सर्वतोऽत्र पातालस्सोऽभिधीयते ।
पङ्क्तिं कृत्वेष्टतालं तद् द्रुतसम्मितिकोष्ठिकाम् ॥ १०४ ॥

तिरश्चे तत्परामूनां कोष्ठेनाथ ततः पराम् ।
द्विर्द्विकोष्ठोनितास्त्वन्याः पूर्वतोऽथाङ्कयोजना ॥ १०५ ॥

द्वौ द्वौ तालसमौ कोष्ठौ स्यातामेकाङ्कसंयुतौ ।
अधस्तन्या तृतीयादिविषमे कोष्ठके लिखेत् ॥ १०६ ॥

अन्त्याद्यङ्कचतुष्कस्य योगस्संख्याङ्कसंघवत् ।
समे त्वन्त्यं विनैतेषां योगं न्यस्याद्यपंक्तिषु ॥ १०७ ॥

परामशेषकोष्ठेषु चतुर्योगोऽयमिष्यते ।
नास्ति प्रतिनिधिस्तासामङ्कयोस्तुर्यषष्ठयोः ॥ १०८ ॥

तासां स्वभावतो यास्तु दिष्त्रन्नादूर्ध्वपंक्तयः ?
तन्मध्ये तु समे कोष्ठेऽन्त्यस्थानेन्त्यादधस्तनः ॥ १०९ ॥

अङ्काः कार्याश्च तैरङ्कैर्भेदसंख्या विधीयते ।
विषमायामूर्ध्वपंक्तौ स्थितैरङ्कैरथ क्रमात् ॥ ११० ॥

एकद्रुताद्या विषमत्र्यादिसंख्यास्तु तद्गताः ।
सर्वद्रुताद्या मीयन्ते समपंक्तिस्थितैः पुनः ॥ १११ ॥

०	१	०	०।०	०।०	००	⌒०।०	० ⌒०।०	। ⌒०।० ०
1	2	3	6	10	19	33	16	106
1	2	5	10	22	44	91	180	350

द्रुतमेरुः

							1
					1	1	6
			1	1	5	6	20
	1	1	3	4	9	14	25
1	1	2	2	5	4	12	7

लघुमेरुः

							1
					1	4	11
			1	3	6	10	18
	1	2	3	4	7	12	21
1	1	1	2	3	5	7	10

द्रुतहीनादयो द्व्यादिसमसंख्यास्तु तद्गताः ।
सर्वद्रुतान्ता जायन्ते लघुमेरुरयं मतः ॥ ११२ ॥

ऊर्ध्वपंक्तिस्तु संख्याङ्कयोगात् संख्या निगद्यते ।
लघुमेरौ कोष्ठपङ्क्तिं प्राग्वदाद्यावलौ लिखेत् ॥ ११३ ॥

योगमन्त्यस्य तुर्यस्य षष्ठाङ्कस्य तमूर्ध्वतः ।
अधोगोपान्त्ययुक्तस्य तैरङ्कैरूर्ध्वपङ्क्तिगैः ॥ ११४ ॥

लघुहीनादुपक्रम्य चैकद्व्यादिषु संयुताम् ।
सर्वलान्ताः क्रमाद् ज्ञेयास्संख्यास्सर्वाङ्कसन्ततेः ॥ ११५ ॥

गुरुमेरावधः पंक्तिः परा कोष्ठत्रयं गता ।
तच्चतुष्कोष्ठहीनाः स्युः स्वस्वपूर्वदलैः पराः ॥ ११६ ॥

एकान्तवन्त आद्याद्यकोष्ठाः प्रथमपंक्तिगाः ।
द्वितीयो द्व्यङ्कवानन्त्योपान्त्यषष्ठाङ्कयोगिनः ॥ ११७ ॥

शेषकोष्ठाः परास्तासु द्वितीयादिषु लिख्यते ।
अन्त्या द्वितीयषष्ठाङ्का अधस्तुर्याङ्कसंयुताः ॥ ११८ ॥

लघुस्थाने गुरुर्ज्ञेयश्शेषं तु लघुमेरुवत् ।
प्लुतमेरावधः पङ्क्तौ पञ्चकोष्ठोनिताः पराः ॥ ११९ ॥

तत्पराः स्वस्वपूर्वातः षट्षट्कोष्ठोनितास्तथा ।
अधःपंक्तिषु षष्ठाङ्कस्थाने तुर्योऽत्र युज्यते ॥ १२० ॥

त्रयो गोचरतष्षष्ठयुक्तस्यापरपङ्क्तिषु ।
प्लुतौ ज्ञेयौ गुरुस्थाने शेषं तु गुरुमेरुवत् ॥ १२१ ॥

संयोगमेरोरूर्ध्वास्स्युश्चतस्रः कोष्ठपङ्क्तयः ।
इष्टताल्द्रुतमितैः कोष्ठैर्युक्तास्ततः परे ॥ १२२ ॥

द्वे पंक्ती स्वस्य पूर्वान्ते द्विद्विकोष्ठोनिते परे ।
पंक्ती द्वे स्वस्य पूर्वाभ्यां तथैकैकोनिते परे ॥ १२३ ॥

आद्यासु चतसृष्वासां क्रमेण सकलद्रुताः ।
समस्तलघवस्सर्वगुरवस्सकसप्लुताः ॥ १२४ ॥

एकाङ्कयुक्तनिश्शेषकोष्ठाद्या स्यात्परा पुनः ।
संयुक्तविषमैः कोष्ठैः समैः स्वैकाङ्कसंयुता ॥ १२५ ॥

कर्तव्या गुरुपङ्क्तिस्तु त्रयः कोष्ठा नभोन्विताः ।
तुर्यमेकाङ्कयक्ष्मैव चतुष्कोष्ठाः परा अपि ॥ १२६ ॥

प्लुतपङ्क्तौ सपन्याः स्युः पञ्चषष्ठ्यस्तु रूपवान् ।
षट् कोष्ठास्तद्वदन्याः स्युषट्सु पङ्क्तिष्वनन्तरम् ॥ १२७ ॥

संयोगजाः क्रमाद्भेदा दलघूदगुरू दपौ ।
लगौ लपौ गपौ चेति तदन्तप्रक्रिया त्वियम् ॥ १२८ ॥

अत्रोपदिष्टादारभ्य स्यादधोधोङ्कखेलनम् ।
अन्त्यपूर्वे द्वितीयान्ततुर्यषष्ठास्तथा क्रमात् ॥ १२९ ॥

योगा दलगपेषु स्युस्तेषु यद्योगजाभिधा ।
पंक्तौ तदङ्कयोगाङ्कं तत्कोष्ठे संभवाल्लिखेत् ॥ १३० ॥

लेखपङ्क्त्या परिश्रेणिं या तिरश्चीतराश्रिता ।
एकादलगपानां स्युराद्यपंक्तिचतुष्टये ॥ १३१ ॥

तेषु प्रस्तुतभेदस्तद् द्रुतादिव्यक्तिसंश्रितान् ।
अङ्कान् गृहीतान् स्तिप्यन्त्यद्वितीयाङ्का द्रुतादिषु ॥ १३२ ॥

प्रस्तेषु विपर्यस्तास्स्युरङ्कासम्भवे तु खम् ।
त्रियोगजाश्च ये भेदाश्चतुर्योगगताश्च ये ॥ १३३ ॥

तत्पंक्तीनामपि ज्ञेयमेवमेवाङ्कपूरणम् ।
किन्तु त्रियोगजा भेदा येत्र ये स्युर्द्वियोगजाः ॥ १३४ ॥

तेषां सन्निहितान्तानां प्रागुक्तोऽङ्क विपर्ययः ।
चतुर्योगे तु चत्वारो ये स्युर्भेदास्त्रियोगजाः ॥ १६५ ॥

तदङ्केष्वेव पूर्वोक्तः स्याद्विपर्ययोगजः ।
ये चत्वारस्त्रियोगोत्थाश्चतुर्योगोत्थपञ्चमाः ॥ १३६ ॥

भेदास्ते पंक्तिषु ज्ञेयाः क्रमादन्यासु पञ्चसु ।
धलगा धलपाश्चाथ दगपा लगपाः क्रमात् ॥ १३७ ॥

त्रियोगजाश्चतुर्योगोद्भवा दलगपा इति ।
एष संयोगमेरुः स्यादतो ज्ञेयमथोच्यते ॥ १३८ ॥

त्रियुक्पंक्तिस्थकोष्ठाङ्कैस्त्रिस्त्रिस्सर्वद्रुतादयः
ऊर्ध्वपङ्क्तिगता मेयास्तदभावस्तु शून्यतः ॥ १३९ ॥

एवं तालप्रभेदानां [1]ज्ञानोपायप्रदर्शनः ।
वाद्यानां मर्दलादीनां नृत्तविद्योपयोगिनाम् ॥ १४० ॥

[1] ज्ञानोपायः प्रदर्शितः

स्वरूपं वर्ण्यते सम्यगिदानीं शास्त्रसम्मतम् ।
चन्दनं तु द्विजातीनां क्षत्रियो रक्तचन्दनम् ॥ १४१ ॥

खदिरो वैश्यजातीनामितरेषां तथेतरे ।
नीरंसोषरभूजातजीर्णवाताहतोत्तराः ॥ १४२ ॥

निर्भिन्नाः पतिता गर्भे मर्दलेष्वशुभा द्रुमाः ।
मेदोन्वितं जराक्रान्तं भिन्नं काकमुखाहतम् ॥ १४३ ॥

अग्निधूमहतं जीर्णं वर्णं चर्म च मर्दले ।
निर्दोषभूजकाष्ठेन मृदङ्गः क्रियते वरः ॥ १४४ ॥

अंगुलैरेकविंशत्या कृतायामान्तरा पृथुः ।
चतुर्दशांगुलं वामं वक्त्रमूर्ध्वं प्रकल्पयेत् ॥ १४५ ॥

त्रयोदशांगुलं चान्यात्पिण्डं त्वर्धांगुलं भवेत् ।
एकांगुलाधिके कुर्याद्वक्त्रयोश्चर्मणी [1]दृढे ॥ १४६ ॥

चत्वारिंशच्च रन्ध्राणि तयोः प्रान्ते पृथक् पृथक् ।
व्यवधानं भवेदेषामन्तरांगुलमंगुलम् ॥ १४७ ॥

सव्येऽनुक्रमयोगेन रन्ध्रकेषु क्षिपेत् क्रमात् ।
निविकांकर्तरमयीं तेषु रन्ध्रेषु निक्षिपेत् ॥ १४८ ॥

मृदंगमध्ये वध्नीयात् त्रिभिस्सेवनकैस्तथा ।
कुर्याद् गोमूत्रिकाविन्दुक्रमं विन्दुद्वयेन च ॥ १४९ ॥

कुण्डलीद्वितयं प्रान्ते रक्षावन्धाय कल्पिते ।
कक्ष्यां निवेश्य तत्रैव सम्यक् द्विगुणतां नयेत् ॥ १५० ॥

सांगुलद्वितयं प्रान्ते वन्धनं स्यान्निरन्तरम् ।
भक्तेन भूतिमिश्रेण मुद्रितेन पुनः पुनः ॥ १५१ ॥

चिक्कणेन मुखे वामे बोहणं च परिक्षिपेत् ।
पिण्डिकापूरिकाकारसम्मिताकृतिधारिणीम् ॥ १५२ ॥

किञ्चिन्मात्रेण भक्तेन वक्त्रं दक्षं प्रलेपयेत् ।
अनेनैव भवेन्नादो मृदङ्गस्य मनोहरः ॥ १५३ ॥

मुखयोर्बोहणं दत्वा वारयित्वाननद्वयम् ।
गिड्दामिति वामं तु गड्दामिति दक्षिणम् ॥ १५४ ॥

अन्धकासुरनामानं संहृत्य च महासुरम् ।
आनन्दताण्डवपरे वहुधैव महेश्वरे ॥ १५५ ॥

सूचिते भ्रमणे वेगे भूमौ पतितकुण्डले ।
तद्धित्तोटण्णेति वर्णपञ्चकं समभूत्तदा ॥ १५६ ॥

तेनाक्षरेण पूर्वेण बहुशब्दा भवन्ति हि ।
प्रवन्धस्सूल्काख्येन द्विधा भेदेन वर्णिते ॥ १५७ ॥

[1] घने.

प्रवन्धे वहुभेदोऽस्ति भुवि चैकोत्तरं शतम् ।
पाठाक्षरान् प्रवक्ष्यामि वर्णनिकोनविंशत्तिम् ॥ १५८ ॥
तस्य वर्णेषु शुद्धेषु सप्त वर्णा भवन्ति हि ।
तद्धित्तोठण्णरुन्देति शुद्धाक्षरमुदाहृतम् ॥ १५९ ॥
पञ्च वर्णा मृदङ्गस्य द्वौ वर्णौ पटहस्य च ।
एतानि सप्त वर्णानि विज्ञेयानीह कोविदैः ॥ १६० ॥
सर्वे पाठाक्षरा ज्ञेया वर्णाष्षोडशकादयः ।
अधिकान्भजमान्वर्णान् वर्णयन्त्यपरे तथा ॥ १६१ ॥
वर्णितः स्यात्कवर्गश्च टवर्गश्च तवर्गकः ।
दपौ षोडशवर्णास्तु पाठाक्षर उदाहृतः ॥ १६२ ॥
सप्त द्वीपास्समुद्राश्च ऋषयस्सप्त च स्वराः ।
सप्त वीराश्च विज्ञेयास्सप्त शुद्धाक्षरस्थले ॥ १६३ ॥
नागवन्धः स्वस्तिकश्च शुद्धश्चासारलमकः ।
समः कलितपञ्चैते मुख्यपाटाः प्रकीर्त्तिताः ॥ १६४ ॥
तालैस्सप्तभिरेतेषां योजनेतु कृते सति ।
प्रत्येकं सप्त पाठाः स्युः पञ्चत्रिंशद्भवन्त्यमी ॥ १६५ ॥
षड्जग्रहे तकारश्च धिकारो ऋषभग्रहे ।
गान्धारे चैव तोकारष्टकारो मध्यमग्रहे । ॥ १६६ ॥
णकारः पञ्चमे चैव झङ्कारो धैवते स्मृतः ।
दकारश्च निषादे तु स्वरपाठक्षरक्रमः ॥ १६७ ॥
इच्छाशक्तिर्वामजानौ ज्ञानशक्तिस्तु मध्यतः ।
क्रियाशक्तिर्दक्षजानौ मृदङ्गाधरदेवताः ॥ १६८ ॥
मणिवन्धे वसेद् ब्रह्मा गोविन्दोऽङ्गुष्ठमाश्रितः ।
तर्जन्यग्रे शिवः प्रोक्तो मध्यमायाञ्च भास्करः ॥ १६९ ॥
कन्दर्पोऽनामिकायां च कनिष्ठायां बृहस्पतिः ।
चन्द्रमा हस्तमध्ये स्यादिमा हस्ताधिदेवताः ॥ १७० ॥
मणिवन्धे स्थितो ब्रह्मा अंगुष्ठे तु गणाधिपः ।
तर्जन्यामीश्वरः प्रोक्तो मध्यायां नन्दिकेश्वरः ॥ १७१ ॥
अनन्तो ऽनामिकायां तु कनिष्ठायां तु नारदः ।
मध्ये तु देवतास्सर्वा दक्षहस्ते प्रकीर्त्तिताः ॥ १७२ ॥
कांस्येन तालयुग्मं स्यादंगुलत्रयसम्मितम् ।
वर्तुलं मध्यतो निम्नं ताले त्वंगुलमात्रकम् ॥ १७३ ॥
गुञ्जाप्रमाणं विवरं विस्तारेऽप्यंगुलद्वयम् ।
यवप्रमाणपिण्डं च श्लक्ष्णमन्योन्यसन्निभम् ॥ १७४ ॥

नेत्रपाटाञ्चलघ्राणरन्ध्रे प्रक्षिप्तरज्जुवत् ।
यथा रन्ध्रान्न निर्याति ग्रन्थिं दद्यात्तदग्रतः ॥ १७५ ॥
संवेष्ट्य तर्जनीं वाममंगुष्ठेन प्रपीड्य च ।
कार्यस्तिर्यङ्मुखं तालं तालमध्ये प्रयत्नतः ॥ १७६ ॥
कनिष्ठानामिकामध्याः करशाखाः प्रसारयेत् ।
तेन तालाग्रदेशेन ताडयेन्मध्यतोऽपरम् ॥ १७७ ॥
लघुगुर्वादिभिर्मानैर्वादयेद्बहुभङ्गिभिः ।
कांस्यकल्पसपुटद्वन्द्वा गर्भस्थायसगोलका ॥ १७८ ॥
रन्ध्रद्वयान्वितशिखा सुस्वना क्षुद्रघण्टिका ।
तास्तु घर्घरिकाटोके प्रसिद्धा रज्जुगुम्फिताः ॥ १७९ ॥
पादानुचलनादासां शब्दाः पाठानुयायिनः ।
हंसलावकयोर्यानं मयूरेभहयस्य च ॥ १८० ॥
कर्कटष्टिट्टिभस्यापि गमनं नर्तनं भवेत् ।
जनस्थिरत्वं रेखा च भ्रमणे दृष्टिरभ्रमा ॥ १८१ ॥
मेधा प्रीतिर्वचोनीतं प्राणाः पात्रस्य ते दश ।
इमे नृत्तविधौ योग्याः पदार्थास्सम्प्रकीर्त्तिताः ॥ १८२ ॥
आनद्धं च ततं चैव घनं च सुषिरं तथा ।
इति शास्त्रेषु वाद्यानां चतुष्टयमुदाहृतम् ॥ १८३ ॥
झल्लरी मुरजो भेरी पटहः करडा तथा ।
कुडुक्का च हुडुक्का च ढक्का डमरुकस्तथा ॥ १८४ ॥
तूर्यस्यान्येऽपि भेदास्स्युरानद्धस्यानुगा इमे ।
पालिका काहलो वासो मुकुरी मधुकर्यपि ॥ १८५ ॥
दंशस्तथैव शंखः स्याच्छुकिशृङ्गं सुरुलपि ।
सुषिरस्यापि वाद्यस्य भेदा इत्थं भवन्ति हि ॥ १८६ ॥
कांस्यतालस्तथा तालो घटिका जयघण्टिका ।
क्षुद्रघण्टा तथा कम्रा घनवाद्यानुगा इमे ॥ १८७ ॥
वीणादिकं ततं वाद्यं तदनेकविधं स्मृतम् ।
गान्धर्वाङ्गं नृत्तगीतवाद्यमेवं निरूपितम् ॥ १८८ ॥
इत्थं नाटकशालायां वेंकटक्षोणिपालकः ।
पश्यन्नथ यथाशास्त्रं नाट्यं सुखमवर्तत ॥ १८९ ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले तालप्रस्तारादि
विविधवाद्यादिस्वरूपवर्णनं नाम नवमस्तरङ्गः॥

अथ दशमस्तरंगः

स्वामिन्! वेङ्कटभूपालः स्थले संगळनामके ।
वरं तटाकं निर्माप्योद्यानं तत्रायकारयत् ॥ १ ॥
इतीरितं पुरा सम्यक् तयोर्निर्माणकौशलम् ।
श्रोतुमिच्छा मामकीने हृदये सम्प्रवर्तते ॥ २ ॥
विशेषविदिताशेषवेद्यजात! दयाम्बुधे! ।
तन्निरूपय वात्सल्यादुन्नतात्मगुणोदय! ॥ ३ ॥
पुंसस्सर्वसुखैकसाधनफलं सौन्दर्यगर्वोद्धुर-
क्रीडालोलविलासिनी जनमनस्स्फीतप्रमोदावहम् ।
गुञ्जद्भृंगविनिद्रपङ्कजवृतस्फारोल्लसद्दीर्घिका-
युक्तास्सन्ति गृहेषु यस्य विपुलारामास्स पृथ्वीपतिः ॥ ४ ॥
नवं वयो हारि वपुर्वराङ्गनाः सखा कलावित् कलवल्लकीस्वनः ।
धनं वृथान्यत् सकलं सुखैषिणो विना विहारोपवनानि भूपतेः ॥ ५ ॥
दशकूपसमा वापी दशवापीसमो ह्रदः ।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ॥ ६ ॥
गृहस्य पूर्वदिग्भागे न्यग्रोधस्सार्वकामिकः ।
उदुम्बरस्तथा याम्ये वारुण्यां [1]पिप्पलद्रुमः ॥ ७ ॥
प्लक्षश्चोत्तरतो धन्यो विपरीतं तु वर्जयेत् ।
वर्जयेत्पूर्वतोऽश्वत्थं प्लक्षं दक्षिणतो गृहात् ॥ ८ ॥
न्यग्रोधं पश्चिमे चैव तथौदुम्बरमुत्तरे ।
देवदानवगन्धर्वाः किन्नरोरगराक्षसाः ॥ ९ ॥
पशुपक्षिमनुष्याश्च संश्रयन्ति तदा तरून् ।
क्रीडारामं तु यः कुर्यादुद्दामफलसंयुतम् ॥ १० ॥
तस्मिन् प्रसीदति परं पार्वतीवल्लभः स्वयम् ।
यस्तु संपोषयेद्बिल्वं शङ्करप्रीतिकारकम् ॥ ११ ॥
तत्कुले तु महालक्ष्मी [2]र्वसेदाचन्द्रतारकम् ।
अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दश तिन्त्रिणीश्च ।
कपित्थबिल्वामलकत्रयं च नवाम्रवापी नरकं न पश्येत् ॥ १२ ॥
सर्वासां वृक्षजातीनां छाया वर्ज्या गृहे सदा ।
अपि सौवर्णकं वृक्षं गृहद्वारे न रोपयेत् ॥ १३ ॥
बदरी कदली चैव दाडिमी बीजपूरकम् ।
प्ररोहन्ति गृहे यस्य तद्गृहं न प्ररोहति ॥ १४ ॥

न कुर्याद् याम्यनैरुत्याग्नेयेष्वपि वाटिकाम् ।
अन्यथा कलहोद्वेगौ कष्टं वा लभते भृशम् ॥ १५ ॥
तस्माद्राज्यं हि शुभदं पुत्रपौत्रप्रवर्धनम् ।
पश्चिमोत्तरपूर्वेषु भवेदुपवनं कृतम् ॥ १६ ॥
अथोपवननिर्माणे योग्यां भूमिं प्रचक्ष्महे ।
जाङ्गलानूपसामान्यस्वभावापि च मेदिनी ॥ १७ ॥
भेदैस्सा भिद्यते षड्भिर्वर्णतो रसतस्तथा ।
असितविपाण्डुश्यामललोहितबहुपीतसितरुचः क्रमशः ।
मृदुलाच्छलवणतिक्तकटुकषायान्विता भुवो रसतः ॥ १८ ॥
विषपाषाणवल्मीकबिल्युक्ता तथा मही ।
दुरौदका शर्करिला तरुभ्यो न हिता भवेत् ॥ १९ ॥
इन्द्रनीलशुकपक्षकोमला शंखकुन्दकुसुमेन्दु [1]निर्मला ।
तप्तकाञ्चनविकासिचम्पकस्पर्धिनी वसुमती प्रशस्यते ॥ २० ॥
समा समासन्नजला हरिद्वर्णतृणांकुरा ।
तस्यां सर्वे यथास्थानं प्ररोहन्ति महीरुहाः ॥ २१ ॥
न जाङ्गला न चानूपा भूमिस्साधारणा शुभा ।
तस्यां सर्वेऽपि तरवः प्ररोहन्ति न संशयः ॥ २२ ॥
पनसलिकुचतालीवंशजम्बीरजम्बू-
तिलकवटकदम्बाश्चूतखर्जूरपूगाः ।
कदलितिनिशमद्वीकेतकीनाळिकेर-
प्रभृतय इति चान्ये प्रायशोऽनूपजाःस्युः ॥ २३ ॥
शोभाञ्जनश्रीफलसप्तपर्णशेफालिकाशोकशमीक [2]केराः ।
कर्कन्धुकाकेसरनिम्बशाका वृद्धिं लभन्ते भुवि जाङ्गलायाम् ॥ २४ ॥
बीजपूरकपुन्नागाः [3]कतकाः पूतिसंयुताः ।
प्रियंगुदाडिमाद्याश्च साधारणसमुद्भवाः ॥ २५ ॥
निधिदेवमहीपानां प्रभावाच्चातियत्नतः ।
अकस्माद् भूसमुत्पन्ना अपि सिद्ध्यन्ति पादपाः ॥ २६ ॥
वनस्पतिद्रुमलतागुल्माः पादपजातयः ।
बीजात् काण्डात्तथा कन्दात्तज्जन्म विविधं मतम् ॥ २७ ॥
ते वनस्पतयः प्रोक्ता विना पुष्पं फलन्ति ये ।
द्रुमाश्च ते निगदिताः पुष्पैस्सह फलन्ति ये ॥ २८ ॥

1) पिप्पलस्त्वशुभः 2) वसेदापुत्रपौत्रकम्.

1) सन्निभा. 2) करीराः, 3) कतकाम्रातिमुक्तकाः

प्रसरन्ति प्रतानैर्यास्ता लताः परिकीर्त्तिताः ।
बहुस्तम्भा विटपिनो गुल्मा एते प्रकीर्त्तिताः ॥ २९ ॥

जम्बूचम्पकपुन्नागतिन्त्रिणीनागकेसराः ।
कपित्थबदरीबिल्वकुम्भकारि प्रियङ्गवः ॥ ३० ॥

पनसाम्रमधूकाद्या करमर्दश्च 1)बीजिकाः ।
ताम्बूलीसिन्धुवारश्च तगराद्याश्च काण्डजाः ॥ ३१ ॥

पाटला दाडिमीप्लक्षकरवीरवटादयः ।
मल्लिकोदुम्बरः कुन्दो बीजकाण्डोद्भवा मताः ॥ ३२ ॥

2)कुंकुमद्रुतसूनालुकन्दाः कन्दसमुद्भवाः ।
एलापद्मोत्पलादीनि बीजकन्दोद्भवानि तु ॥ ३३ ॥

सम्यक् कृष्टे समे क्षेत्रे माषानुप्त्वा तिलांस्तथा ।
सुनिष्पन्नानपनयेत्तत्र बीजोप्तिरिष्यते ॥ ३४ ॥

अथर्तुपक्वात्फलतो 3)विशिष्यते विकृष्य बीजं पयसा निषिच्य
विशोषितं पञ्च दिनानि सर्पिषा विलङ्गमिश्रेण च 4)मापयेत्ततः ॥

क्षीरनिषिक्तं बीजं शुष्कं तिलभस्म सर्पिषा लिप्तम् ।
गोमयमृदितमथोप्तं सद्यो जायेत धूपितं वसया ॥ ३६ ॥

पयसि निषिक्तं बीजं गोमयपरिमर्दितं विशेषतश्चैव ।
माक्षिकविडङ्गचूर्णैर्बहुशो मृदितं प्रजायेत ॥ १६७ ॥

जम्बूपनसचूतानां सरलालिकुचस्य च ।
क्षीरसिक्तं वपेद्बीजं घृतगोविड्विलङ्गकैः ॥ ३८ ॥

शुचिः स्नातो बिभ्रद्वसनममलं पूजितसुरो
गुरुं नत्वा दत्वा वसु मतिमते सद्गुणवते ।
स्वयं बीजान्यादौ वपति कतिचिद्वास्तुपुरुषं
नमस्कृत्वा सिञ्चेत्तदनु परितोऽन्यः परिजनः ॥ ३९ ॥

बीजधानीं तृणास्तीर्णां कृत्वा सिञ्चेत्पयोऽम्बुना ।
जातांकुरा च सलिलैर्निस्तुषां शोषमानयेत् ॥ ४० ॥

अयथाविहितानां यन्मनोज्ञतासम्पदौ नस्तः ।
कथयाम्यतस्तरूणां रोपविधानं यथोद्दिष्टम् ॥ ४१ ॥

ध्रुवमृदु मूलविशाखा गुरुभं श्रवणस्तथाश्विनी हस्ता ।
उक्तानि दिव्यदृग्भिः पादपसंरोपणे भानि ॥ ४२ ॥

हस्तप्रमाणान् विटपान् सुषिक्तान् संक्रामयेन्मूलमधस्समृक्तान् ।
सर्पिर्मधूशीरविडङ्गलिप्तान् बिले निदध्याच्च करीषयुक्ते ॥ ४३ ॥

1) जीविकः. 2) कुंकुमार्द्ररसौनालकन्दाः 3) विशोषितात्.
4)धूपयेत्ततः

अवालुकाश्लक्ष्णमृदा पूरिते शोधिते तथा ।
कोदण्डार्धमिते भागे गर्ते सिक्ते क्षिपेत्ततः ॥ ४४ ॥

कदलीशीरिणौ रोप्यौ मूले दत्वा तु गोमयम् ।
रम्भायास्संपरिणतैः फलैर्विलिप्तां कुर्वाणो भुवि निहितां पलालरज्जुम् ।
शुद्धायामुपरि न गाढमृत्कमुप्तामासिञ्चेदबहुजलैर्बहून्यहानि ॥ ४५ ॥
सा रज्जुस्तदनु तमालनीलभासो बिभ्राणा त्वरुणातरांकुरान्प्रसूते ।
भूयस्तामुपचितकाण्डपत्रमूलामारोप्य प्रथितविधानतो निषिञ्चेत् ॥
आषाढे श्रावणे मासे बीजवापनरोपणे ।
ग्रीष्मादन्यत्र वल्लीनां केचिदिच्छन्ति रोपणम् ॥ ४७ ॥
मण्टपनन्द्यावर्तस्वस्तिकचतुरस्रता सर्वतोभद्रैः ।
वीथीनिकुञ्जपुञ्जकविन्यासैः पादपा रोप्याः ॥ ४८ ॥
दशविंशति षोडशभिस्तु करैरधरोत्तरमध्यकृतान्तरकान् ।
द्विचतुस्त्रिभिरन्तरितान् क्रमशस्तृण पादपगुल्मभृतश्च वपेत् ॥ ४९ ॥
सान्द्ररोपणमवृद्धिकारणं वातभीतिरतिदूररोपणे ।
भिन्नवृत्तिरचनाल्पपीडना नैव युक्तिरिति मे प्रतीयते ॥ ५० ॥
किंशुकश्च गिरिकर्णिका सिता तित्तिरीकविपलाक्षिनीलिका: ।
कोविदार इति भीतिदा गणा नैव तानुपवनेषु रोपयेत् ॥ ५१ ॥
नलिन्यशोकपुन्नागशिरीषा निम्बचम्पकाः ।
माङ्गल्याः प्रथमं रोप्या भल्लातश्च गदापहः ॥ ५२ ॥
पूर्वाशां करमर्दवंशविटपाः पारावता दक्षिणे
कौबेर्यां बदरीकपित्थतरवो धात्री च पश्चाच्छिवा ।
अन्ये चोत्तममध्यमाधमशिवा रोप्यास्स्ववर्गैस्समं
कृत्वा चान्तरकं यथायथममी पत्रैरुपर्यस्पृशः ॥ ५३ ॥
सर्वस्य च नवोप्तस्य सायं प्रातर्नि 1)षेवणम् ।
शीतातपसमीरेभ्यो रक्षणं च विधानतः ॥ ५४ ॥
हेमन्ते शिशिरे देयं तोयं चैकान्तरे दिने ।
वसन्ते प्रत्यहं ग्रीष्मे सायंप्रातर्निषेचनम् ॥ ५५ ॥
वर्षासु च शरत्काले यदा वृष्टिर्न दृश्यते ।
जलं देयं तदा स्वल्पमालवाले महीरुहाम् ॥ ५६ ॥
वारिणा यावता यस्य मूले सौहित्यमिष्यते ।
तावत्तस्य तरोर्देयं किं घटार्धविवक्षया ॥ ५७ ॥
आलवालस्थितं तोयं शोषं न भजते यदा ।
अजीर्णं तद्विजानीयान्न देयं तादृशं जलम् ॥ ५८ ॥

1) षेचनम्.

समीपजातं यत्नेन तृणगुल्मलतादिकम् ।
पालनीयं प्रयत्नेन द्रुमाणां वृद्धिमिच्छता ॥ ५९ ॥
नीहारखण्डवाताच्च धूमाद्वैश्वानरादपि ।
जालकारात्प्रयत्नेन रक्षणीयाः क्षमारुहाः ॥ ६० ॥
पङ्कमध्ये तु पुष्पाणि फलवन्तस्तथा परं ।
वृक्षाः कार्या वृता वृत्या सा चापि परिखावृता ॥ ६१ ॥
विद्युदाहतवृक्षस्य भूतिमादाय सर्वतः ।
रक्षार्थं विकिरेदेषां तया नैव हि बन्धनम् ॥ ६२ ॥
दीप्तोऽप्यग्निश्शमं याति वज्रदग्धद्रुभस्मना ।
शीतशाल्योदनं दध्ना सैन्धवेन [1]समन्वितम् ।
क्षेपणीयं च परितो वृक्षाणां दृष्टिवारणम् ।
शलभाखुपतङ्गानां पिप्पल्यादेर्भये सति ॥ ६४ ॥
अष्टोत्तरशतं जप्त्वा मन्त्रं पत्रे तरोर्लिखेत् ।
"ओं स्वस्ति किष्किन्धावस्थितः प्रकटपराक्रमान्त-
र्हिताकर्मण्डलोपजीवितः श्रीहनूमानाज्ञापयति
क्रममाणस्य शरीरनिग्रहं समावर्तयति ॥
तस्य वानरसिंहस्य क्रममाणस्य सागरम् ।
कक्षान्तरगतो वायुर्जीमूत इव नर्दति ॥
हुं फट् नमः"
पत्रे मनुं समालिख्य जप्त्वा तन्निखनेद् भुवि ।
क्षेत्रे कीटपतङ्गाखुपिप्पल्यादि विनश्यति ॥ ६५ ॥
द्रुमप्रवालस्थगितान्तराणि विकीर्णपुष्पाणि समीरणेन ।
गृहाणि कुर्यादविमुक्तगानां लताभिरालोलमधुव्रताभिः ॥ ६६ ॥
स्थानेष्वपरेषु तथा पादपयुगलेषु मिथुनसंवाह्याः ।
शाखावलम्बिनीभिर्दोलाः कार्या लताभिश्च ॥ ६७ ॥
तरुविटपलतानिकुञ्जरम्यो विरचितकन्दरसानुगण्डशैलः ।
विविधमणिगुहो विचित्रधातुः क्वचिदपि पर्वतराड् विलासहेतुः॥ ६८ ॥
केकानिनादस्सुभगस्सदा संहेषिता हयाः ।
ताण्डवेन तदुद्देशान् मण्डयन्ति शिखण्डिनः ॥ ६९ ॥
विलम्बिनो यत्र तटे द्रुमा तनुर्विलोकयन्ति प्रसवेक्षणैरिव ।
शमं दिशन्तः कलहंसभूषणाः क्वचिद्भवेत् पुष्करिणी मनोरमा॥ ७० ॥
निर्यादस्सलिलां सुखावतरणां तीरेषु पुष्पद्रुमां
कूजद्वृक्षविहङ्गपूगनिचुलां नात्यायतां दीर्घिकाम् ।
कुर्यात्तत्र ससुल्लसत्कमलिनीपत्रैः क्वचिच्छामलां
श्यामालोचनमालिकां विदधतीं नीलोत्पलानि क्वचित् ॥ ७१ ॥

[1] युतं वने.

उपवनमिव वारिमध्यमग्नं विमलतया प्रतिबिम्बितं दधाना ।
शशिकरनिकरेण पूरितेव क्वचिदुपनेयपयास्सुखाय वापी ॥ ७२ ॥
द्वारहीनो भवेत् कूपो द्वारेणैकेन वापिका ।
नैकद्वारा पुष्करिणी दीर्घाकारा तु दीर्घिका ॥ ७३ ॥
कुल्याविधूततोयश्च तटाकः परिकीर्त्तितः ।
स्फटिकरजतवर्णो नीलराजीविचित्रः
कमलसदृशमूर्त्तिश्चारुवंशश्च कूर्मः ॥
अरुणसमवपुर्वा सर्षपाकारचित्र-
स्सकलनृपमहत्वं मन्दिरस्थः करोति ॥ ७४ ॥
अञ्जनभृङ्गश्यामतनुर्वा विन्दुविचित्रो व्यङ्ग्यशरीरः ।
सर्पशिरावा स्थूलगलोवा सोपि नृपाणां राष्ट्रविवृद्ध्यै ॥ ७५ ॥
वैडूर्यत्विट् स्थूलकण्ठत्रिकोणो गूढच्छिद्रश्चारुवंशः प्रशस्तः ।
क्रीडावाप्यां तोयपूर्णे घटे वा कूर्मः कार्यो मङ्गलार्थं नरेन्द्रैः ॥ ७६ ॥
अर्जुनमुस्तोशीरैस्सनागकोशातकामलकचूर्णैः ।
कतकफलचूर्णयुक्तैः कूपे [1]गूढं प्रदातव्यः ॥ ७७ ॥
कलशं कटकं लवणं विरसं ससिलं चाशुभगन्धि भवेत् ।
तदनेन भवत्यमलं सरसं शुभगन्धि गुणैरपरैश्च युतम् ॥ ७८ ॥
प्रोक्तेत्युपवनक्रीडा वृक्षारोपणपूर्विका ।
अथ वक्ष्ये जलोत्पत्तिचिह्नानि क्रमशोऽधुना ॥ ७९ ॥
पातालादूर्ध्वगमाः सिराः प्रसर्पन्ति सर्वतोदिक्षु ।
नीरस्य भूमिमध्ये ज्ञात्वा ताः कल्पयेत्कूपम् ॥ ८० ॥
विक्षतिसंज्ञाश्च [2]सिरा नवमीमध्ये महाशिरा नाम ।
एतास्स्यूत्याश्शतशो कुमुदाद्यैर्नामभिः प्रथिताः ॥ ८१ ॥
यदि वेद सोम्बुरहिते देशे हस्तिखिभिस्ततः पश्चात्
सार्धे पुरुषे तोयं वहति सिरा पश्चिमा तत्र ॥ ८२ ॥
चिह्नमपि चार्धपुरुषे मण्डूकः पाण्डुरोऽथ मृत्पीता ।
पुटभेदकश्च तस्मिन् पाषाणो भवति बहुतोयः ॥ ८३ ॥
जम्बूवृक्षस्य प्राग्वल्मीको यदि भवेत्समीपस्थः ।
तस्माद्दक्षिणपार्श्वे सलिलं पुरुषद्वये स्वादु ॥ ८४ ॥
पुरुषार्धे मत्स्यो वा पारावतासन्निभोऽथ पाषाणः ।
मृद्भवति तत्र नीला दीर्घं कालं च बहुतोयम् ॥ ८५ ॥
वल्मीकेन युतायां निर्गुण्ड्यां दक्षिणतः करत्रयोन्माने ।
पुरुषद्वये सपादे भवति जलं स्वादु चाशोष्यम् ॥ ८६ ॥
रोहितमत्स्योऽर्धनरे मृत्कपिला पाण्डुरा ततःपरतः ।
सिकताश्च शर्कराश्च क्रमेण परतो भवत्यम्भः ॥ ८७ ॥

[1] योगः [2] शिरासव.

पूर्वेण यदि बदर्या वल्मीको दृश्यते विलं पश्चात् ।
पुरुषैस्त्रिभिरादेश्यं श्वेता गृहगोधिकार्धनरे ॥ ८८ ॥

सफला बदरी चेद्धि ह्यपरस्यां ततो जलं भवति ।
पुरुषत्रये सपादे पुरुषेऽत्र च डुंडुभश्चिह्नम् ॥ ८९ ॥

काकोदुम्बरिकायां वल्मीको दृश्यते शिरा तस्मिन् ।
पुरुषत्रये सपादे पश्चिमदिक् सा सिरा वहति ॥ ९० ॥

आपाण्डुपीतमृत्का काञ्चनवर्णश्च भवति पाषाणः ।
पुरुषार्धे कुमुदनिभो दृष्टिपथं मूषको याति ॥ ९१ ॥

आसन्नो वल्मीको दक्षिणपार्श्वे विभीतस्य ।
अध्यर्धे तत्र सिरा पुरुषे ज्ञेया दिशि प्राच्याम् ॥ ९२ ॥

तस्यैव पश्चिमायां वल्मीको भवेद्यदा हस्ते ।
तत्रोदग्भवति सिरा चतुर्भिरर्धाधिकैः पुरुषैः ॥ ९३ ॥

श्वेतो विश्वम्भरकः (प्रथमे पुरुषे च कुंकुमाक्तोऽश्मा।
अपरस्यां दिशि च सिरा नश्यति वर्षत्रयेऽतीते ॥
सकुशः स्थित ऐशान्यां वल्मीको यत्र कोविदारस्य ।
मध्ये तयोर्नरैरर्धपञ्चमैस्तोयमक्षोभ्यम् ॥
प्रथमे पुरुषे भुजङ्गः कमलोदरसन्निभा मही रक्ता)
कुरुविन्दकपाषाणः चिह्नान्येतानि [1]चान्यानि ॥ ९४ ॥

सर्वेषां वृक्षाणामधः स्थितं दर्दुरं यदा पश्येत् ।
तस्याधस्तात्तोयं चतुर्भिरर्धाधिकैः पुरुषैः ॥ ९५ ॥

उत्तरतश्च मधूकादहिनिलयः पश्चिमोत्तरं तोयम् ।
परिहृत्य पञ्चहस्तादर्धाष्टे पौरुषे वाच्यम् ॥ ९६ ॥

अहिराजः पुरुषेऽस्मिन् धूम्रा धात्री कपित्थवर्णोऽश्मा ।
माहेन्द्रीं वहति सिरा भवति सफेनं सदा तोयम् ॥ ९७ ॥

सर्पावासः पश्चाद्यदा कदम्बस्य दक्षिणेन जलम् ।
पुरतो हस्तत्रितयात् षड्भिः पुरुषैस्तुरीयोनैः ॥ ९८ ॥

वल्मीकसंवृतो यदि तालो वा नालिकेरो वा ।
पश्चात् षडभिर्हस्तैर्नरैश्चतुर्भिश्शिरा याम्या ॥ ९९ ॥

अश्मातकस्य वामे वदरीवा दृश्यतेऽथ वल्मीकः ।
षड्भिरुदक् चास्यकरैस्सार्धैः पुरुषत्रयैस्तोयम् ॥ १०० ॥

कूर्मः प्रथमे पुरुषे पाषाणो धूसरश्च सिकता मृत् ।
आदौ सिरा च याम्या पूर्वोत्तरतो द्वितीया च ॥ १०१ ॥

जलरहिते यदि देशे चिह्नान्येतानि दृश्यन्ते ।
वारणदूर्वारहिते यत्र हि तस्मिन् जलं पुरुषम् ॥ १०२ ॥

तिल्कामातकवरणा भल्लातकविल्वतिन्दुकाङ्कोलाः ।
पिठरीशिरीषकांञ्जनपरुषाः कारञ्जवंजुकाख्याति ॥ १०३ ॥

एतैर्यदि सुस्निग्धैर्वल्मीकैः परिवृतस्ततस्तोयम् ।
हस्तैस्त्रिभिरुत्तरतश्चतुर्भिरर्धे नरस्याथ ॥ १०४ ॥

अतृणे सतृणा यस्मि स्तरुणी तृणवर्जिता मही यत्र ।
तस्मिन् सिरा प्रदिष्टा वक्तव्यं वा धनं तत्र ॥ १०५ ॥

[1]कण्टकक्कर्यटकानां व्यत्यासेऽऽम्भः करैस्त्रिभिः पश्चात् ।
खात्वा पुरुषत्रितयं त्रिधा च युक्तं धनं पश्चात् ॥ १०६ ॥

वृक्षस्यैका शाखा विनता भवति पाण्डुरा वा स्यात् ।
विज्ञातव्यं शाखाग्रतले नीरं त्रिपूरुषादेव ॥ १०७ ॥

यत्फलकुसुमविकारस्तस्य च पूर्वे सिरात्रिभिर्हस्तैः ।
भवति पुरुषैश्चतुर्भिः पाषाणोऽधः क्षितौ पीडा ॥ १०८ ॥

यदि कण्टकहीना स्यान्निधिग्धिका शुभ्रपुष्पसंयुक्ता ।
तस्यास्स्थलेऽम्बु वाच्यं त्रिभिर्नरैरर्धपुरुषे वा ॥ १०९ ॥

खर्जूरी द्विशिरस्का यत्र भवेज्जलविवर्जिते देशे ।
तस्याः पश्चिमभागे निर्देश्यं त्रिपूरुषे वारि ॥ ११० ॥

यदि भवति कर्णिकारस्सितकुसुमः स्यात्पलाशवृक्षो वा ।
सव्येन तत्र हस्तद्वयेऽम्बु पुरुषत्रये भवति ॥ १११ ॥

उष्मा यस्यां धात्र्यां धूमो वा वारि तत्र नरयुगले ।
निर्दिष्टव्या च सिरा वहता वारि प्रवाहेन ॥ ११२ ॥

यस्मिन् क्षेत्रे देशे जातं सस्यं विनाशमुपयाति ।
स्निग्धमतिपाण्डुरं वा महाशिरा नरयुगे तत्र ॥ ११३ ॥

पूर्वोत्तरेण पीलोर्यदि वल्मीको जलं भवति पश्चात् ।
उत्तरगमना च सिरा विज्ञेया पञ्चभिः पुरुषैः ॥ ११४ ॥

चिह्नं दर्दुर आदौ मृत्कपिला तत्परं भवेद्धरिता ।
भवति च पुरुषाधोऽस्मात्तस्य तले वारि निर्देश्यम् ॥ ११५ ॥

वदरीरोहितवृक्षौ सम्पृक्तौ चेद्विनापि वल्मीकात् ।
हस्तत्रयेऽम्बु पश्चात्षोडशभिर्मानवैर्भवति ॥ ११६ ॥

आदौ तोयं सुरसं दक्षिणगा वहति चोत्तरेण सिरा ।
पिष्टनिभः पाषाणो मृच्छ्वेता वृश्चिकोऽर्धनरे ॥ ११७ ॥

सकरीरा चेद्वदरी त्रिभिः करैः पश्चिमेन तत्राम्भः ।
अष्टादशभिः पुरुषैरैशानी बहुजला च सिरा ॥ ११८ ॥

ककुभः कारीरो वा ककुभो विल्वस्तथैकत्र ।
हस्तत्रयेऽम्बु पश्चान्नरैर्भवत्येकविंशत्या ॥ ११९ ॥

[1] वाच्यानि.

[1] कण्टक्यकण्टकानां.

ग्रन्थिप्रचुरा यस्मिन् छमी भवेदुत्तरेण वल्मीकः ।
पश्चात्पञ्चकरान्ते शतार्धसंख्यैर्नरैस्सलिलम् ॥ १२० ॥

स्निग्धायताः पादपगुल्मवल्ल्यो विच्छिन्नपत्राश्च ततश्शिराश्च ।
पद्मेक्षुरोशीरकुलास्तथेन्द्रे काशः कुशो वा नलिनीसखो वा ॥ १२१ ॥

खर्जूरजंब्वर्जुनकेतकाः स्युः क्षीरान्विता वा द्रुमगुल्मवल्ल्यः
छत्रेभनागाश्शतपत्रनीलास्स्युर्नक्रमाल्यांश्च्यवतीन्दुपारा ॥ १२२ ॥

विभीतको वा मदयन्तिको वा यत्रास्ति तस्मिन् पुरुषत्रयेऽम्भः ।
या मेदिनी काशकुशैश्च युक्ता नीला च मृद्यत्र सशर्करा च ॥ १२३ ॥

तस्यां प्रभूतं सुरसं च तोयं कृष्णाथवा यत्र च तिक्तमृद्वा ।
सशर्करा ताम्रमही कषाया क्षारं धरित्री कपिला करोति ॥ १२४ ॥

आपाण्डुरायां लवणं प्रदिष्टं मृष्टं पयो नीलवसुन्धरायाम्
शाकाश्वकर्णार्जुनविल्वसर्जश्रीपर्ण्यरिष्टा धवशिंशुपौ च ॥ १२५ ॥

छिद्रैश्च पत्रैर्द्रुमगुल्मवल्ल्यो वृक्षाश्च दूरेऽम्बु निवेदयन्ति ।
सूर्याग्निभस्मोष्ट्रखरा सुवर्णा या निर्जला सा वसुधा प्रदिष्टा ॥

रक्तांकुरक्षीरयुता करीरयुक्ता धरा चेज्जलमश्मनोऽधः ।
वैडूर्यमुक्ताम्बुदमेचकाभा पाकोन्मुखोदुम्बरसन्निभा वा ॥ १२७ ॥

भृङ्गाञ्जनाभा कपिलाथवा या ज्ञेया शिला भूरि समीपतोया ।
पारावतक्षौद्रसमा मही या क्षौमस्य वस्त्रस्य च तुल्यरूपा ॥ १२८ ॥

या सोमवल्ल्याश्च समानवर्णा सा भूरि तोयं कुरुते क्षयाय ।
ताम्रैस्समेता वृषकैश्च चित्रैरापाण्डुभस्मोष्ट्रखरा सुवर्णा ॥ १२९ ॥

भङ्गे तथाम्बष्ठकपुष्पकाभा सूर्याग्निवर्णा च शिला वितोया ।
ज्ञात्वा जलस्येत्थमधः प्रविष्टां सिरां निखन्यादथ शुद्धलग्ने ॥ १३० ॥

याश्चेन्द्रनीलमणिहिंगुलिकाञ्जनाभाः
सूर्योदयांशुहरितालनिभाश्च यास्स्युः ।

ताश्शोभना मुनिवचोऽत्र पुनः प्रमाणं
तद्भेदनक्रममथो प्रवदामि सर्वम् ॥ १३१ ॥

भेदं शिला नैति यदा तदानीं पालाशकाष्ठैस्सह तिन्दुकानाम् ।
प्रज्वाल्नानन्तरमग्निवर्णा सुधाम्बुसिक्ता प्रविदारमेति ॥ १३२ ॥

शीताम्बुना मौचकभस्मना वा यत्सप्तकृत्वः परिषेचनं तु ।
कार्यं शरक्षारयुतं शिलायाः प्रस्फोटने वह्न्यतितापितायाः ॥

रक्तकाञ्जिकसुरासकुलित्थायोजितानि बदराण्यपि तस्मिन् ।
सप्तरात्रमुषितान्यभितप्तां दारयन्ति हि शिलां परिषेकैः ॥ १३४ ॥

हस्ता मघानुराधा पुष्यधनिष्ठोत्तराश्विरोहिण्यः ।
शतभिषगित्यारम्भे कूपानां शस्यते भगणः ॥ १३५ ॥

आग्नेये यदि कोणे ग्रामस्य पुरस्य वा भवेत् कूपः ।
नित्यं स करोति भयं दाहं च समानुषं प्रायः ॥ १३६ ॥

नैर्ऋतकोणे बालक्षयं च वनिताक्षयं च वायव्ये ।
दिश्यैशान्यां भीतिं शेषास्तु शुभावहाः कूपाः ॥ १३७ ॥

इति जलभूमिपरीक्षा प्रोक्ता पोषाय रोपिततरूणाम् ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले उपवननिर्माण-
जलभूमिपरीक्षावर्णनं नाम दशमस्तरङ्गः.

अथ एकादशस्तरंगः

फलकुसुमसम्पदुचिता रोपणतो भवति केवलान्न यतः ।
पोषणविधिमथ संमतमनोकहानामतो वक्ष्ये ॥ १ ॥

खर्जूरबिल्वलिकुचास्सितसर्षपेण पिण्याकतश्च तुषवारिवसेन चाम्रः ।
ऐरावता निचुलपत्रजलोक्षणेन सव्रीहिमांससलिलेन च यान्ति वृद्धिम्

प्राचीनामलकातरोः प्रियाहि माषाः
क्षीराम्भोयुतमिह वालतिन्दुकानाम् ।
प्रीयन्ते यवराजसा च नालिकेराः
सर्वेषां भवति रुचिर्निमग्नभूमौ ॥ ३ ॥

कुरङ्गकिटिसारङ्गसृगालाश्वादिमेदसा
क्वथितेन सदुग्धेन पञ्चपल्लववारिणा ॥ ॥ ४ ॥

कृतसेको भवेदाशु सहकारोऽतिसौरभः ।
घृतकुणपवचावराहविष्ठासलिलमतीव सुखाय दाडिमानम् ;
क्वथितकुलित्थचूर्णकं वा जलमपि वृद्धिकरं [1] फलं शवर्याः ॥ ५ ॥

यष्टिफलाशफरीघृतलिप्तो धूपित आज्यफलत्रयधूपैः ।
आत्मफलैरपि दाडिमशाखी तालफलानि विडम्बयतीव ॥ ॥ ६ ॥

दधिमुस्तकाञ्जिकसुरावदरीतिलगोधिकाकुणपशीधुपयः ।
फलिनीकदम्बकरिकेसरान् कुरुते सुगन्धिवहुपुष्पयुतान् ॥ ॥ ७ ॥

प्रियङ्गुगुञ्जाफलनिम्बपिप्पलीवचाहरिद्रातिलसर्षपैस्समैः ।
घृताश्वकर्णाम्बु विलोड्य चारयेत् सचम्पके नागतरौ सुवृद्धिदम् ॥ ८ ॥

सिक्ताम्भोभिः पललतुषयोः कुक्कुटानां पुरीषं
मूले दत्वा सुफलकुसुमा गोस्तनी वृद्धिमेति ।
स्कन्धन्यस्तैः पनसतरवो वार्षुपाललभारैः
आमूलाग्रं दधति च वचावारिसिक्ताः फलानि ॥ ९ ॥

सर्पिर्गुडक्षीरमधूपचारं दत्वा निषिक्तौ च कपित्थबिल्वौ ।
पीयूषकल्पान्यपि मांसलानि फलान्यनन्तानि सदा दधाते ॥ १० ॥

कोशातकीफलशिफाक्वथितामिषाम्भः-
संसिञ्चनाच्च सुकणारजसा च युक्तः ।
लब्धोपचारमथ धूपजलाभिषिक्तः
शोभां विभर्ति कुसुमैर्नितरां मधूकः ॥ ११ ॥

तिलयष्टिमधुमधूपलमिश्रितजलसेकतर्पिता वदरी ।
कुणपैरुपचितमूलं फलति फलं शर्करामधुरं ॥ १२ ॥

अजैडिकासूकरविड्विडङ्गैः क्रमोपचारेणच वीजपूरः ।
भूयोऽश्वमूत्राबिल्वारिसिक्तः फलानि धत्ते सुबहूनि शश्वत् ॥ १३ ॥

वृश्चिककण्टकविद्धाः सुरभीघृतधूपिताहि निखिललताः ।
मूषिककोलवसाभिस्संसिक्ताः स्युः फलैर्नम्राः ॥ १४ ॥

सुरभिजलनिषेकतो निदाघे कुणपजलेन च केतकी निषिक्ता ।
जलधरसमये सुगन्धसूचीचयनिचितानि विभर्ति पल्लवानि ॥ १५ ॥

यस्य कस्यापि पुष्पस्य सौरभेणाधिवासिताम् ।
मृत्तिकां सकलां मूले वृक्षाणां वहुलां क्षिपेत् ॥ १६ ॥

कुष्ठपत्रमुरामुस्तासागरोशीरचूर्णकैः ।
मिश्रितेनांभसा सेकान्मासं सौरभसम्भवः ॥ १७ ॥

कुल्माषदन्तिदन्तानां चूर्णयोगस्य सम्भवे ।
प्रत्यहं पुष्पिताम्भोजमण्डिता पद्मिनी भवेत् ॥ १८ ॥

सिद्धार्थः कदलीदलामिषपरीविट्कोलमार्जारयो-
रेतेषां समभागमाज्यसहितं चूर्णं तरुभ्यो हितम् ।
दत्तं धूपविलेपनोपचरणैराप्यायनं रोगहृ-
च्छाखाः पल्लवयत्यलं मधुकरव्यालोलपुष्पच्छदाः ॥ १९ ॥

धूपो घृतस्य समदो यववारिसिक्तो
नित्यं च दुग्धसलिलैः कुणपाम्बुभिर्वा ।
लेपो विळङ्गतिलकल्ककृतशिशूनां
वृद्धिं करोति परमां खलु भूरुहाणाम् ॥ २० ॥

अङ्कोलक्वाथतोयेन मिश्रितं घृतमाक्षिकम् ।
वसाकिटिकुरङ्गाणामेतैस्सिक्ता महीरुहाः ॥ २१ ॥

सिद्धार्थकफलोपेतास्सर्वदा फलशोभिताः ।
जायन्ते पत्रपुष्पाढ्यास्सच्छाया रोगवर्जिताः ॥ २२ ॥

यष्टेर्मधूकपुष्पाणि सिता कुष्टं समाक्षिकम् ।
निष्पिष्य घुटिकां कृत्वा मूले सर्वत्र निक्षिपेत् ॥ २३ ॥

दुग्धसेकं च वृक्षस्य यस्य कुर्याद्विचक्षणः ।
फलं सुनिश्चितं तस्य मधुरं जायते भृशम् ॥ २४ ॥

इत्येवं पोषणविधिस्तरूणामुपवर्णितः ।
कुरङ्गकीटमत्स्यानां मेषश्वगलखड्गिनाम् ॥ २५ ॥

मांसं ग्राह्यं यथालाभं मेदोमज्जावपास्तथा ।
तान् सर्वानिकतः कृत्वा वह्नौ नीरेण पाचयेत् ॥ ॥ २६ ॥

---

[1] फलंचसद्यः.

सम्यक् पक्कं क्षिपेद् भाण्डे तत्र दुग्धं च निक्षिपेत्
चूर्णीकृत्य कली देया तिलानां माक्षिकं तथा।
स्विन्नांश्च सरसान् माषांस्तत्र दद्याद् घृतं तथा॥
उष्णं जलं क्षिपेत्तत्र मात्रा नास्तीह कस्यचित् ॥ २८॥

कुणपस्तु भवेद्देयस्तरूणां पुष्पकारकः।
नराणामिव वृक्षाणां वातपित्तकफा गदाः ॥ २९॥

सम्भवन्ति यतस्तस्मात् कुर्यात्तद्दोषनाशनम्।
कीटजग्धेऽग्निसंप्लुष्टे वातजेऽन्यश्च निकृंते ॥ ३०॥

वृक्षच्छेदापचारादिपीडिते च पृथक्क्रिया।
कृशो दीर्घो लघू रूक्षो निद्राहीनोऽल्पचेतनः ॥ ३१॥

न धत्ते फलपुष्पाणि वातप्रकृतिकस्तरुः।
आतपासहनः पाण्डुरशाखाहीनो मुहुर्यदि ॥ ३२॥

अकालफलपाकः स्याच्छाखी पित्तात्मकः कृशः।
सिद्धशाखादलश्शाखी सम्यक् पुष्पफलोज्वलः ॥ ३३॥

लतापरीतगात्रस्तु कफवान् परिमण्डलः।
कटुसिक्तकषायरसैः पवनः पित्तं कटूष्मलवणाम्लैः ॥ ३४॥

स्निग्धमधुराम्ललवणैः श्लेष्माकोपं प्रयाति तरौ
सुस्निग्धैः पिशितरसैः प्रयाति वातस्सुस्निग्धैर्मधुरहितैर्जलैश्च पित्तम्
कटुवम्लैर्हिमजलैः कषायवृक्षैः श्लेष्मापि क्रमविहितः प्रयाति नाशम्॥
रौक्ष्यं ग्रन्थिः कुटुका वाताद् वृक्षस्य जायते नितराम।
गोविड्विलोहितवसाकुणपजलैस्तज्जयोऽपि भवेत् ॥ ३७॥

दोषैर्यस्य विना प्रवालकुसुमग्लानिर्विरुद्धं वपुः
मूले तस्य तरोर्भवन्ति क्रिमयो यत्नाच्च तानुद्धरेत्।
गोमूत्राज्यविडङ्गसर्षपतिलैर्लिम्पेत्प्रणष्टैस्तथा
सिक्तः क्षीरजलैरुदेति सहसा धूपैश्च धूपायितः ॥ ३८॥

करञ्जागर्वदारिष्टसप्तपर्णत्वचा कृतः।
उपचारः क्रिमिहरो मूत्रमुस्ता विडङ्गवान् ॥ ३९॥

कुणपजलपयोनिषिक्तमूलः सरसिजकन्दविलिप्तसर्वगात्रः।
तनुरनलहतो बिभर्ति भूयो मरकतगर्हाणि पल्लवानि ॥ ४०॥

प्लक्षाश्वत्थोदुम्बरत्वक्पृथुमधुसरघामिश्रदुग्धैर्विलेप
स्तम्भैस्तम्बरज्ज्वा परिकलितवपुः पूरितः श्लक्ष्णमृद्भिः।
सिक्तः क्षीरेण भूयो जलभरिततलश्चण्डवातादिभग्नः
स्वस्थो भूत्वा प्रियायाः कुसुमफलभरानातनोति प्रकामम् ॥ ४१॥

वृक्षस्याशनिदग्धस्य जीवनं श्रृणु भेषजम्।
घृतक्षीरमधूकैश्च मुद्गान् माषान् यवांस्तिलान् ॥ ४२॥

पिष्ट्वा क्षीराम्बुसंयुक्तैस्सेचयेत्तमभीक्ष्णशः।
स सेकाप्यायितश्शीघ्रं प्रकृतिस्थो भविष्यति ॥ ४३॥

जनयित्वा फलकुसुमे यः पुनरुपयाति वन्ध्यतां शाखी।
सक्षीरैः कुणपजलैर्भूयस्सिक्तः फलत्येव ॥ ४४॥

असंकतोऽत्यन्तनिषेकतश्च शाखास्सशोषाः फलिता निरीक्ष्याः।
सप्ताहमात्रं स्थितमत्र सर्पिर्विडङ्गयुक्ताम्बु निषेचनीयम् ॥ ४५॥

उन्निद्रिता मत्स्यसगन्धता च प्रवालहानिस्सपिपीलिकत्वम्।
एवं प्रवातादिकृशाच्च जीर्णात् तरोर्भवेत्तत्र चिकित्सनीयम् ॥ ४६॥

तन्मूलशूलं परशुप्रहारैः विप्रासितं दोषशतं निहत्य।
क्षौद्राज्यजन्तुघ्नतिलैः प्रलिप्तं मृत्पूरितं दुग्धजलैर्निषिक्तं ॥ ४७॥

शर्करातिलगोक्षीरवारिसेकात्तथा तरोः।
शोषश्शाम्यति वृक्षस्य लेपधूपोपचारतः ॥ ४८॥

प्रियङ्गुवत्सकारिवेतसार्जुनवल्कलैः।
नीरदुग्धैर्विलिप्तानां स्रावश्शाम्याति शाखिनाम् ॥ ४९॥

वृक्षायुर्वेदफलं मनोहरं शास्त्रतस्सिद्धम्।
नानाविधानचित्रं चित्रीकरणं प्रवक्ष्यामि ॥ ५०॥

सुरभिसुमनोलब्धा मोदां निधायच मृत्तिकां।
धवखदिरयोः क्वाथाम्भोभिस्सुगन्धिभिरुक्षणात् ॥ ५१॥

मलयजरजोलेपाद्धूपाद् घृतस्य च भूरुहां।
व्रजति कुसुमं निर्गन्धानामतीव सुगन्धिताम् ॥ ५२॥

यवतिलनिशापलाशैरुपचितमूला तदम्बुसिक्ता च।
ज्वलदनलोपममसकृत्कार्पासी तूलकं सूते ॥ ५३॥

शाल्मलीत्वङ्निशानीलीत्रिफलाकृष्णशीधुभिः।
सकृल्लेपोपचारेण शुकपक्षनिभं भवेत् ॥ ५४॥

मञ्जिष्ठातिलयवपीतसारसारैः जीवन्ती दलसहितैर्मनश्शिलाक्तैः।
गोजाविप्रचुरपयश्रितैर्विलिप्तात् कार्पासात् प्रभवति तूलकं खनीलम्॥
संपक्वेक्षुरसविदारिकन्दपरिलिप्तमूलभागस्य।
सिक्तेनेक्षुरसेनच तरोरकाले भवेत्कुसुमम् ॥ ५६॥

तिलखनिविडङ्गगोमयविलोहितेक्षुरसंसेचितस्य तरोः।
फलकुसुममकालभवं मनोहरं फलाति लोकस्य ॥ ५७॥

मधुयष्टिसिताकुष्ठमधुपुष्पविनिर्मितैः।
मोदकृच्छादिते मूलैर्निरस्ते स्यात्फलं तरोः ॥ ५८॥

मधुककुसुमगुञ्जाशर्करोदुम्बराढ्यं
समधु निहितमन्तः काण्डमुत्कीर्य बद्ध्वा।
उपरिच परिलिप्तं वत्सविड्भिस्तरूणां
जनयति फलमेतत्स्वादु सेकादनन्तम् ॥ ५९॥

तत्कालनिहतस्योच्चैश्छागस्यार्द्रेण चर्मणा ।
बद्धायां वृक्षशाखायां फलपातो न जायते ॥ ६० ॥
करिमदमृदितवल्लीमुखनलकैर्मूले तु कीलितस्य तरोः ।
संवत्सरं न यावत् फलितानि फलानि नैव पच्यन्ते ॥ ६१ ॥
बध्वा चर्मतृणाभ्यां विङ्गमधुदुग्धलेपतो लिप्ताः ।
शाखा पयोऽम्बुसेकाच्चिरमपि पक्वं फलं धत्ते ॥ ६२ ॥
मीनकोलवसामांसकुष्ठसेकेन धूपनात् ।
सर्ववीजानि साश्चर्यमुत्तिष्ठन्ति फलन्ति च ॥ ६३ ॥
अङ्कोलतैलगुलिकाशिशुमारवसासु भावितं बीजम् ।
सद्यो रोहति नियतं भूमौ करिकाम्भसा सिक्तम् ॥ ६४ ॥
बीजमम्लादिवृक्षाणां पक्वं मीनफलाम्बुनि ।
अङ्कोलतैलदुग्धाज्यनिहितं सुवृहद्भवेत् ॥ ६५ ॥
भस्मन्यामेलितं सूक्ष्मं सप्तषट्सहभिद्यते ? ।
फलं चाशेषकोकस्य कृतकौतुकमञ्जसा ॥ ६६ ॥
एकविंशतिवारेण कुक्कुटस्यासृजोक्षितम् ।
तत्क्षणाद्दाडिमी बीजं वर्धते फलते ध्रुवम् ॥ ६७ ॥
मत्स्यकोलवसामांसचणकक्षारभावितम् ।
यस्य कस्यापि वा बीजं द्रुतं पुष्पफले दिशेत् ॥ ६८ ॥
स्कन्धतस्समन्ततस्सूकरास्थितो दृढं ।
कीलितो न संशयं नाशमेत्यनोकहः ॥ ६९ ॥
कुलुत्थक्वाथतोयेन तरुः पुष्पफले त्यजेत् ।
किंशुकार्जुनतत्कारिलवणाम्बूक्षणेन वा ॥ ७० ॥
नानावर्णैर्घटितं करदं तु सुमस्य सूत्रसंघटितम् ।
घृतमधुविलिप्तमुप्तं सूते कुसुमं तथा वर्णम् ॥ ७१ ॥
माहिषकरीषमूत्रैर्मृदितविशुष्कं दिनानि यत्सप्त ।
कुमुदफलबीजमुप्तं जनयति करवीरविटपं तत् ॥ ७२ ॥
कूश्माण्डवार्ताकपटोलिकादिबीजं वसाभावितसिक्तमुप्तम् ।
विशोधितायां भुवि सर्वकालं फलान्यनन्तानि महान्ति धत्ते ॥ ७३ ॥
या मन्दारद्रुमे रन्ध्रे कौश्माण्डी निर्गता लता ।
मृद्गोमयभृते तस्मिन् सिक्ते भवति सा सदा ॥ ७४ ॥
सूकरासृग्वसासिक्तमङ्कोलीतैलभावितम् ।
एरण्डकं कारवल्लीफलं सूतेऽतिकौतुकम् ॥ ७५ ॥
वार्ताकबीजं घृतमाक्षिकाक्तं विशोषितं गोमयलिप्तरन्ध्रे ।
वालस्य कूश्माण्डफलस्य तस्मिन् पक्वं गृहीतं फलितं महत् स्यात् ॥
खरतुरगविष्णिवेशितपीतंयायदशलाकया ।
मूले विद्धा कदली फलति फलं करिकराकारम् ॥ ७७ ॥
कोलशोणितमेदोभ्यामङ्कोलक्वथितेन च ।
सेविता कदली सूते दाडिमी फलमुत्तमम् ॥ ७८ ॥
नरमांसवसासिक्तदन्तिदन्तविचूर्णितैः ।
मिश्रितैरुदकैस्सिक्ता रम्भा चूतफला भवेत् ॥ ७९ ॥
अङ्कोलक्वथिते त्वस्मिन्नृमांसच्छागदुग्धवत् ।
पिण्याकसहितं मूले सहकारस्य निक्षिपेत् ॥ ८० ॥
द्राक्षावल्लीसमाकारस्सहकारस्सदाफलः ।
जायते निश्चितं धत्ते सर्वेषामद्भुतं महत् ॥ ८१ ॥
शशकूर्मासृजा मध्ये बहुभावितमाम्रकं बीजम् ।
रूढं सिक्तं दुग्धैः फलति फलं सर्वकालेषु ॥ ८२ ॥
कृमिरिपुयवयष्टिमधुगुडदुग्धविलेपितानि विलिख्य तरुः ।
भवति जलदुग्धसिक्तः स्वभावतिक्तोऽपि मधुरफलः ॥ ८३ ॥
बीजं नरपलाङ्कोलतैलभिन्नं शुभं सदा ।
उद्गच्छति मृदा पूर्णमम्भस्सिक्तं करे क्षणात् ॥ ८४ ॥
अङ्कोलतैलभावितमुपेतं सद्यस्तु कुमुदकन्दफलम् ।
करकाण्डरक्तमिश्रं कलशी कुसुमं समुद्वहते ॥ ८५ ॥
गोकोलास्थिकरीषैस्तु दिग्धे गर्ते विशोधिते ।
उप्तं च वालुकापूर्णे मूलकं गर्तवद्भवेत् ॥ ८६ ॥
इष्टकचिते समन्तात् पूरुषनिखाते वटतरुर्जातः ।
वामन एव हि धत्ते फलकुसुमं सर्वकालमपि ॥ ८७ ॥
फलकुसुमपत्रवृद्धिं वनस्पतीनां विलोक्य विज्ञेयम् ।
सुलभत्वं द्रव्याणां निष्पत्तिश्चापि सस्यानाम् ॥ ८८ ॥
न्यग्रोधेनतु यवकात्तिन्दुकवृध्या य षाष्टिकोऽभवति ।
अश्वत्थेन ज्ञेया निष्पत्तिस्सर्वसस्यानाम् ॥ ८९ ॥
जम्बूभिस्तिलमाषादिशिरीषवृध्याथ दुग्धनिष्पत्तिः ।
गोधूमाश्च मधूकैर्यववृद्धिस्सप्तपर्णेन ॥ ९० ॥
करिणश्च हस्तिकर्णैर्निर्दिश्या वाजिनोऽश्वकर्णेन ।
गावश्च पाटलाभिः कदलीभिरजाविकं भवति ॥ ९१ ॥
आम्रैः क्षेमं भल्लातकैर्भयं पीलुकैस्तथारोग्यम् ।
खदिरशमीभ्यां दुर्भिक्षमर्जुने शोभना वृष्टिः ॥ ९२ ॥
पिचुमन्दनागकुसुमैस्सुभिक्षमथ मारुतः कपित्थेन ।
निचुलेनावृष्टिभयं व्याधिभयं भवति कुटजेन ॥ ९३ ॥
पुष्पोद्गमेऽनोकहानां दोहदान्तरमुच्यते ।
अशोकश्चरणाहत्या वकुलो मुखशीधुना ॥ ९४ ॥
आलिङ्गनात् कुरवकस्तिलको वीक्षणेन तु ।
करस्पर्शेन माकन्दो मदरागेण चम्पकः ॥ ९५ ॥

सल्लापात् कर्णिकारश्च सिन्धुवारो मुखानिलात् ।
गीत्या प्रियालुर्नितरां नमेरुर्हसनेन च ॥ ९६ ॥
स्त्रीभिर्व्यञ्जन्ति विकृतिं दश दोहदभूरुहाः ।
एवमुद्यानमध्ये तु लतागुल्मद्रुमान्विते ॥ ९७ ॥
हंससारससन्नादिवापीवरविराजिते ।
प्रेक्षणादिविलासैर्या वशयन्ति तरूनपि ॥ ९८ ॥
ताभिर्विलोलनेत्राभिस्सार्धमाबद्धखेलनः ।
श्रीवेङ्कटमहीपालस्सुखमन्वभवच्चिरम् ॥ ९९ ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले तरुचिकित्सा-पोषण-विचित्रीकरण-दोहदवर्णनं नामैकादशस्तरङ्गः.

अथ द्वादशस्तरंगः

स्वामिन्! याभिस्सहारामे सुखं भूयैन्वभूदिति ।
उदीरितं मृगाक्ष्यस्ता गुरो! ब्रूहि कियद्विधाः ॥ १ ॥
कीदृग्विलासशालिन्यः कीदृग्गुणपरिष्कृताः ।
कीदृशः कृतयस्सर्वमेतद् ब्रूहि कलानिधे! ॥ २ ॥
शृणु नन्दन! तत्सर्वं वर्णयामि यथाक्रमम् ।
सोमश्शौचं ददौ तासां गन्धर्वाश्च शुभां गिरम् ॥ ३ ॥
अग्निस्सर्वाङ्गकान्तिं च कस्मान्नेष्टतमाः स्त्रियः ।
स्त्रियः पवित्रममलं नैता दुष्यन्ति कर्हिचित् ॥ ४ ॥
मध्ये धरित्र्याः पुरमेव सारं पुरे गृहं सद्मनि चैकदेशः ।
तत्रापि शय्या शयने वरस्त्री रत्नोज्ज्वला राज्यसुखस्य सारः ॥ ५ ॥
न हयैर्न च मातङ्गैर्न रथैर्नच पत्तिभिः ।
स्त्रीणामपाङ्गदृष्ट्यैव जीयते जगतां त्रयम् ॥ ६ ॥
अचापलं भयं लज्जा दाक्षिण्यमनुकूलता ।
मधुरस्वरतौदार्यं पटुत्वं प्रियवादिता ॥ ७ ॥
मनश्शुचित्वं लावण्यं गुरुशुश्रूषणे रतिः ।
धर्मज्ञतार्जवं सत्यं कौशलं सर्वकर्मसु ॥ ८ ॥
हृष्टा स्मितभाषित्वं पतिदोषनिगूहनं ।
व्यवायसौख्यमित्येते योषितां प्रवरा गुणाः ॥ ९ ॥
स्त्रीणां रूपवती श्रेष्ठा सुरूपासु सयौवना ।
रतिकौशलसारज्ञा गीतविज्ञा च नर्तकी ॥ १० ॥
उत्तरोत्तरमेतासु श्रेष्ठा पूर्वगुणैर्युता ।
एतैस्सर्वगुणैर्युक्ता दुर्लभा रमणी भुवि ॥ ११ ॥
जातिस्वभावगुणदेशजधर्मचेष्टाभावेङ्गितेषु विकलो रतितन्त्रमूढः ।
लब्ध्वापि हि स्खलति यौवनमङ्गनानां
किं नारिकेलफलमाप्य कपिः करोति ॥ १२ ॥

पद्मिनी चित्रिणी चाथ शङ्खिनी हस्तिनी तथा ।
पूर्वपूर्वोत्तरास्तासु श्रेष्ठास्तल्लक्ष्म चक्ष्महे ॥ १३ ॥
कमलमुकुलमृद्वी फुल्लराजीवगन्धा
सुरतपयसि यस्यास्सौरभं दिव्यमङ्गे ।
चकितमृगदृगाभे प्रान्तरक्ते च नेत्रे
स्तनयुगलमनल्पश्रीफलश्रीविडम्बि ॥ १४ ॥
तिलकुसुमसमानां बिभ्रती नासिकां च
द्विजगुरुसुरपूजाश्रद्दधाना सदैव ।
कुवलयदलकान्तिः कापि चाम्पेयगौरी
स्फुटसरसिजकोशाकारकामातपत्रा ॥ १५ ॥
व्रजति मृदु सलीलं राजहंसीव तन्वी
त्रिवलिललितमध्या हंसवाणी सुवेषा ।
मृदु शुचि लघु भुङ्क्ते मानिनी गाढलज्जा
धवलकुसुमवासोवल्लभा पद्मिनी स्यात् ॥ १६ ॥
सुगतिरनतिदीर्घा नातिखर्वा कृशाङ्गी
स्तनजघनविशाला काकजङ्घोन्नतोष्ठी ।
मधुसुरभिताम्बुः कम्बुकण्ठी चकोर-
स्वरवचनविभागा नृत्तगीताद्यभिज्ञा ॥ १७ ॥
मदनसदनमस्या वर्तुलोच्छूनमन्तः
मृदुमदनजलाढ्यं लोमभिर्नातिसान्द्रम् ।
प्रकृति चपलदृष्टिर्बाह्यसम्भोगरक्ता
रसयति मधुराल्पं चित्रिणी चित्ररक्ता ॥ १८ ॥
तनुरतनुवपुः स्याद्दीर्घदेहाङ्घ्रिमध्या
द्वारुणकुसुमवासःकाङ्क्षिणी कोपशीला ।
अनिभृततरमङ्गं दीर्घनिम्नं वहन्ती
स्मरगृहमतिलोम क्षारगन्धि स्मराम्बु ॥ १९ ॥

सृजति बहुनखाङ्कं संप्रयोगे लघीय-
स्स्मरसलिलप्रषक्ता किञ्चिदुत्तप्तगात्री ।
न बहु न लघु चात्ति प्रायशः पित्तला स्यात्
पिशुनमलिनचित्ता शङ्खिनी [1] रागभोक्त्री ॥ २० ॥

अललितगतिरुच्चैः स्थूलवक्रांगुलीकं
वहति चरणयुग्मं कन्धरां ह्रस्वपीनाम् ।
कपिलकचकलापा क्रूरचेष्टातिपीना
द्विरदमदसगन्धि स्वाङ्गकेऽनङ्गके च ॥ २१ ॥

द्विगुणकटुकषायप्रायभुग्वीतलज्जा
चलदतिविपुलोष्ठी दुःखसाध्या प्रयोगे ।
वहिरपि तनुरोमात्यन्तमन्तर्विशालं
वहति जघनरन्ध्रं हस्तिनीगद्गदोक्तिः ॥ २२ ॥

नयनयुगशरर्तु ब्रध्नदिङ्नागसङ्ख्या-
स्तिथय इह रते स्युः प्रीतये चित्रिणीनाम् ।
ग्रहतिथिभवनाख्या द्वीपयुक्ताः करिण्या-
स्तदितरतिथयः स्युस्शङ्खिनीनां चतस्रः ॥ २३ ॥

पङ्कजासनपदेन पद्मिनीं नागरेण रमयन्ति चित्रिणीम् ।
वेणुदारितपादेन शङ्खिनीं स्कन्धपादयुगलेन हस्तिनीम् ॥ २४ ॥

व्रजति रतिसुखार्थं चित्रिणीमप्रयामे
भ[2] तिथिदिनरजन्योर्हरितनीं च द्वितीये ।
रमयति च तृतीये शङ्खिनीमार्द्रभावां
रमयति रमणीयां पद्मिनीं तुर्ययामे ॥ २५ ॥

चित्रिणीगुणसंयुक्तः पुमान् भद्रो नवाङ्गुलः ।
हस्तिनीगुणसम्पन्नो हयस्स्याद् द्वादशांगुलः ॥ २६ ॥

शङ्खिन्याः कूचिमाराख्यः पुरुषस्स्याद्दशांगुलः ।
पद्मिन्यास्स तु पाञ्चालो नायकस्स्यात् षडङ्गुलः ॥ २७ ॥

अङ्गुष्ठे पदगुल्फजानुजघने नाभौच वक्षस्तने
कक्षे कण्ठकपोलदन्तवसने नेत्रेऽलिके मूर्धनि ।
शुक्लाशुक्लविभागतो मृगदृशामंगेष्वनङ्गस्थिति-
श्चोर्ध्वाधोगमनेन वामपदगाः पक्षद्वये लक्षयेत् ॥ २८ ॥

ते गृह्णन्ति कचान् ललाटवदने चुम्बन्ति दन्तच्छदं
दन्तोष्ठेन निपीडयन्ति बहुशश्चुम्बन्ति गण्डस्थलम् ।
कक्षे कण्ठतले लिखन्ति नखरैर्गृह्णन्ति गाढं स्तनौ
मुष्ट्या वक्षसि ताडयन्ति दधते नाभौ चपेटां शनैः ॥ २९ ॥

1) रासभोक्तिः. 2) भजति.

कुर्वन्ति स्मरमन्दिरे करिकरक्रीडां स्त्रियो जानुनी
गुल्फांगुष्ठपदानि च प्रतिमुहुर्निघ्नन्ति तैरात्मनः ।
पादे जङ्घोरुदेशे च गले कक्षे स्तने श्रुतौ ।
नखमात्रं प्रदातव्यं भगे नाभौ च मर्दनम् ॥ ३० ॥

गण्डे नेत्रे ललाटे च चुम्बनं कामुकैरिह ।
इति कामुकसंघातैः कर्तव्यं काम[1] रञ्जनम् ॥ ३१ ॥

द्रवत्यनेन कामो हि घृतभाण्डमिवाग्निना ।
आरोहपरिणाहाभ्यां षण्णवद्वादशांगुलैः ॥ ३२ ॥

गुह्यैश्शशो वृषश्चाश्वो हरिण्यश्वेविकास्त्रियः ।
हरिणीशशयोर्योगे वडवावृषयोस्तथा ॥ ३३ ॥

हस्तिनीहययोश्चैव मतं समरतं त्रयम्
मृगीवृषं च वडवाहयमुच्चरतं द्वयम् ॥ ३४ ॥

नीचद्वयं च वडवाशशकं वृषहस्तिनी ।
अत्युच्चमतिनीचं च मृगयश्वं हस्तिनीशशम् ॥ ३५ ॥

इति प्रमाणभेदेन नवधा रतमुच्यते ।
उत्तमानि समान्याहुर्मध्यमुच्चरतद्वयम् ॥ ३६ ॥

नीचद्वयं तथात्युच्चमतिनीचं विगर्हितम् ।
कण्डूतेरप्रतीकारादन्तर्लिङ्गाविमर्दनात् ॥ ३७ ॥

न द्रवन्ति न तृप्यन्ति योषितो नीचमेहने ।
उच्चेऽपि मृदु गुह्यन्तः सपीडास्सव्यथा हृदि ॥ ३८ ॥

न द्रवन्ति न रज्यन्ते मनस्तन्वो हि मन्मथः ।
रक्तजाः कृमयस्सूक्ष्मा मृदुमध्योग्रशक्तयः ॥ ३९ ॥

सन्ति कामालये कण्डूं जनयन्ति यथाबलम् ।
चण्डध्वजाभिघातेन कण्डूत्यपनयादनु ॥ ४० ॥

चरणौ च सुखं तासां विस्रब्धिस्यन्दनात्मना ।
निस्संज्ञत्वं ततो याति मुकुलीकृतलोचना ॥ ४१ ॥

स्त्रीपुंसयोर्विस्रब्धिश्च लघुमध्यचिरोदया
नवधा रतमेवं स्यात्कालतोऽपि प्रमाणवत् ॥ ४२ ॥

मन्दमध्यमचण्डाः स्युर्वेगतोऽप्युभयोस्तथा ।
वेगः कामुकभावेन तेनापि [2] नवधेरितम् ॥ ४३ ॥

वीर्यं बहुक्षताघातसंहत्वं रतिलोलता ।
चण्डवेगस्य चिह्नानि मन्दवेगे विपर्ययः ॥ ४४ ॥

एतेषां मध्यमत्वे तु मध्यमत्वं समुन्नयेत् ।
कालप्रमाणभावैस्स्युरित्येवं सप्तविंशतिः ॥ ४५ ॥

1) चारणम्. 2) नवधा रतम्.

रतानि तत्र साम्ये स्यात्त्रिभिस्सुरतमुत्तमम् ।
सर्ववैषम्यतस्तस्मादधमं पशुचेष्टितम् ॥ ४६ ॥

शेषे तु मध्यमत्वं स्यादेकत्रापि जुगुप्सितम् ।
अत्युच्चमतिनीचं च संक्षेपादिति भाषितम् ॥ ४७ ॥

उक्तमृग्यादिभेदानामिदानीं चिह्नमुच्यते ।
सममूर्धाकुञ्चितघनकेशी [1] तुच्छरतिर्नितम्बाढ्या ।
अल्पविवरनासापुटघटितरदनपक्ष्मलाक्षी च ॥ ४८ ॥

अरुणाधरकरचरणा कोमलतरलसान्द्रभुजलतिका ।
आयतकर्णकपोलग्रीवानतिमांसलोरुजघना च ॥ ४९ ॥

समगुल्फा वरगजगतिरीर्ष्याविलितोन्नतस्तनी ।
तरलमनास्सुकुमारा लघुकोपा सुरतलम्पटा ॥ ॥ ५० ॥

समसुरभिसुरतसलिला सरलांगुलिरलसमधुरोक्तिः लघुभुक् ।
निम्नसमुन्नतमूर्धा स्थूला बहुसान्द्रशिरसिजप्रचया ॥ ५१ ॥

उत्पलदलचलनयना स्थूलायतफालनेत्रगलवदना ।
स्थूलदराजिरायतदन्तच्छदपीनकठिनकुचकलशा ॥ ५२ ॥

सुललितमांसलबाहुस्तुच्छोदरकमलमुकुलमृदुपाणिः ।
विस्तृतहृदयकवाटा गद्गदमधुरोक्तिरीर्ष्ययोद्विग्ना ॥ ५३ ॥

निम्नसुवर्तुलनाभीवृतरुचिरजघनसमलघूरुश्च ।
विपुलकटिर्नतमध्या खेलालसगमनरक्तसमचरणा ॥ ५४ ॥

चपलहृदयकोमलतनुः निद्राहारप्रिया प्रियप्रवणा ।
प्रथमचरणधात्वधिका पूतिपललगन्धिसुरताम्बुः ॥ ५५ ॥

क्षणमात्रमदनगुणिनी वहतिहि वडवा नवांगुलं गुह्यम् ॥
पृथुभिरलिकगण्डश्रोत्रनासापुटैर्या करचरणभुजोरुद्वन्द्वकैर्ह्रस्वपीनैः ।
दरविनमितखर्वस्थूलया ग्रीवया च प्रकटरदशिखाभिः कुन्तलैस्स्थूलनीलैः

अनवरतरतेच्छा कुम्भिगम्भीरकण्ठ-
स्वरशबलशरीरा स्फार[2] विम्बाधरोष्ठी ।
विपुलमदनमोहा कोपना पिङ्गलाक्षी
करिमदमदनांबुः प्रायशो गूढपापा ॥ ५७ ॥

अतिबहुतरदोषा हस्तिनी दण्डसाध्या
वहति च रविसङ्ख्यैरंगुलैर्गुह्यदेशम् । ॥ ५८ ॥

प्रायः कोमलकुन्तलाः पृथुदृशश्शान्ताश्च तुच्छाशयाः
सूक्ष्माङ्गाश्शुचयस्सुवर्तुलमुखास्स्थूलाल्पदन्तास्तथा ।

विश्राणाः करपादजानुजघनग्रीवोरुषु क्षामतां
धन्यास्स्वल्परतास्सुगन्धिमदनस्यन्दा विनीताश्शशाः ॥ ५९ ॥

क्रूराः प्रोन्नतमौल्यो दृढभुजास्सुप्रौढवक्षस्स्थलाः
रूक्षाः कूर्मनिभोदराश्च मलिनास्त्यागान्विताः पीवराः ।
शोणान्तस्थिरदीर्घलोचनधृतस्त्वारक्तहस्तोदर-
व्यालोला वृषभा नवांगुलमितं कामांकुशं बिभ्रति ॥ ६० ॥

दीर्घस्थूलशिरोरुहाश्चलदतिस्फारेक्षणाः क्रोधनाः
अत्यन्तं कृशदीर्घकन्धररदश्रोत्राननां लोभिनः ।
पीनोरुस्थलदीर्घबाहुयुगला निद्रालवश्चालसाः
प्रौढा वक्रनखांघ्रिजानुयुगला गम्भीरसम्भाषणाः ॥ ६१ ॥

धृष्टाः खण्डरते रतास्तदितरा दीर्घांगुलीश्रेणयः ।
स्थूलस्त्रीरतिलालसा बहुभुजो गत्यातु पृष्ठ्यान्विताः
भूरिक्षारविगन्धिमन्मथजलप्रायास्तथास्थ्याकुला ।
आदित्यांगुलसंमितं च तुरगं कामं सदा बिभ्रति ॥ ६२ ॥

सुस्निग्धदन्तनखलोचनपद्मयुग्मा मानोन्नता प्रियतमे सुदृढानुरागा ।
श्यामाथ शीतमृदुमांसलगुह्यरन्ध्रा प्रोक्ता कफप्रकृतिरेव वरा पुरन्ध्री ॥

स्यात्पित्तलातु गौराङ्गी शोणलोचनपाणिजा ।
क्षणे क्रुद्धा प्रसन्ना च पीनश्रोणिपयोधरा ॥ ६४ ॥

बिभ्रती घर्मसलिलं विस्रगन्धि सुबुद्धिका ।
श्लथकोष्णवराङ्गी च कुशला सुरते मृदुः ॥ ६५ ॥

वातुलाथ कठोराङ्गी रूक्षकेशी प्रलापिनी ।
चञ्चला बहुभोज्या च कृष्णपाणिविलोचना ॥ ६६ ॥

श्यामा धूसरवर्णा च सुरते कठिना भृशम् ।
गोजिह्वाभकरस्पर्शं बिभर्ति मदनालयम् ॥ ६७ ॥

प्रियंवदा भूरिजना धनाढ्या नारीयमुक्ता किल देवसत्वा ।
सङ्गीतलीलारसिकातिशान्ता सुगन्धमाल्यादिरुचिश्शुभाङ्गी ॥ ६८ ॥

विलासिनी निर्मलचारुवेषा गन्धर्वसत्वा वनिता प्रदिष्टा ।
अपेतलज्जा मधुमांससक्ता पीनस्तनीचम्पकगौरदेहा ॥ ६९ ॥

रोषान्विता सन्ततभोगवाञ्छा प्रोक्ता कवीन्द्रैः किल यक्षसत्वा ।
आतिथ्यसख्यादिषु बद्धभावा सुरागिणी निर्मलचित्तवृत्तिः ॥ ७० ॥

नानाव्रतैरति न च प्रयासं मनुष्यसत्वा परिकीर्त्तिता सा
दुश्चारिणी कुत्सितभूरिभोज्या दृप्यति[1] रुष्टा परितप्तगात्री ॥ ७१ ॥

खर्वातिकृष्णा सविकारवक्त्रा मालिन्ययुक्ता च पिशाचसत्वा ।
व्याकुला भ्रान्तिशीला च सोऽछवासा बहुजृम्भिता ।

[1] तुच्छोदरी. [2] लम्बाधरोष्ठी.

[1] धृष्टा.

निद्रासक्ता च सततं नागसत्त्वेति सा स्मृता
उद्योगं निष्फलं कुर्याच्चित्ते संभ्रामयेन्मुहुः ।
अति क्षुधार्ता सततं काकसत्त्वेति सोच्यते ॥ ७४ ॥
अत्यन्तचपला यातु सततोद्भ्रान्तलोचना ।
दन्तसंघट्टसत्त्वा च कपिसत्त्वेति तां विदुः ॥ ७५ ॥
स्वभावाद् दुष्टवाक्यानि विप्रियाण्येव भाषिणी ।
अपेतरागा स्नानादौ खरसत्त्वेति कीर्त्तिता ॥ ७६ ॥
उद्विग्नमानसा या तु कटुकोग्रैकभाषिणी ।
नित्यं हिनस्ति भर्तारं रक्षस्सत्त्वां विनिर्दिशेत् ॥ ७७ ॥
दीर्घानना दीर्घनासा मृदुरोमा च जङ्घयोः ।
निगूहयन्ती गुह्यानि गुह्यकांशसमुद्भवा ॥ ७८ ॥
कातरा गूढमन्त्रा च परवेश्माशनप्रिया ।
तमःप्रिया च सन्तानापेक्षिणी पितृसंभवा ॥ ७९ ॥
गौराङ्गी दृढचित्ता च देवभक्ता पतिव्रता ।
स्वल्पाशना च धर्मज्ञा कृशा ऋष्यंशसंभवा ॥ ८० ॥
ईषद्वक्रोरुजंघा च स्फोटकांघ्रितला मनाक् ।
नात्यायतमुखी दीर्घलोचना समनासिका ॥ ८१ ॥
श्यामा कर्कशहस्ता च किन्नरांशसमुद्भवा ।
अन्यासामपि जातीनामंशेभ्यश्च समुद्भवाः ॥ ८२ ॥
रूपस्वभावमुख्यैश्च दुश्शीलां परिवर्जयेत् । ॥ ८३ ॥
विचित्रवेषा शुचिकर्मदक्षा सुशिल्पिनी दन्तनखादिरक्ता ।
मनोजसङ्ग्रामविनोदरङ्गा स्यान्मध्यदेशप्रभवा पुरन्ध्री ॥ ८४ ॥
उपभोगकलानुरागिणी चिरसंभोगरतप्रतोषिणी ।
परघातनतुष्टमानसा वनिता मालवदेशसंभवा ॥ ८५ ॥
अभिघातरुचिश्च रज्यते नखदन्तैः परिरम्भलालसा ।
बहुचुम्बनहार्यमानसा वनिताभीरसमुद्भवा मता ॥ ८६ ॥
परिरम्भाणलोलुपा पदक्षतघातैर्द्रवमेति सत्वरम् ।
सुकुमारतनुर्मनोरमा सुरते नृत्यति लाटकामिनी ॥ ८७ ॥
मृद्वी दुराचाररता वहन्ती रतार्तिमुच्चैरपि नर्मदक्षा ।
त्रपाविहीनातिमनोहराङ्गी स्यादान्ध्रकर्णाटभवा पुरन्ध्री ॥ ८८ ॥
नितान्तकण्डूतियुतस्मरालया द्रवन्ति चण्डध्वजघातनाच्चिरम् ॥
रतिप्रयोगे चतुराश्च योषितः प्रकीर्त्तिताः कोसलराष्ट्रसंभवाः ॥ ८९ ॥
ईषद्धासमनोरमाश्च नितरां स्यात्क्षेपवाग्विभ्रमाः
निर्लज्जाश्चपलाः कलासुकुशला गाढानुरागान्विताः ।
नार्यः पाटलिपुत्रजा अपि महाराष्ट्रोद्भवास्सन्ततं
नानादेशविनोदभावरसिकाः संकीर्त्तितास्सूरिभिः ॥ ९० ॥

कुसुममृदुशरीरा चुम्बनालिङ्गनाद्यै
बहुतरधृतभावा क्रूरचेष्टा विरक्ता ।
विषमविशिखयुद्धे स्तोकवेगा पुरन्ध्री
भवति तरलनेत्रा वङ्गजा गौडजा च ॥ ९१ ॥
विपरीतरताभिलाषिणी गतलज्जा नखदानतोषिणी ।
नितरामनुरागशालिनी मदनार्ता कथितेयमुत्कटी ॥ ९२ ॥
प्रियंवदा कोमलदेहवल्ली भृशं द्रवन्ती स्मरकेलिरङ्गे ।
विलासदक्षा प्रचुरानुरागा स्यात्कामरूपप्रभवा पुरन्ध्री ॥ ९३ ॥
निजदोषनिगूहने रता परदोषग्रहणे च तत्परा ।
वनिता वनवाससंभवा दृढदेहा परिकीर्त्तिता बुधैः ॥ ९४ ॥
उपभोगरता सुलोचना लघुसंभोगविधिप्रतोषिणी ।
शुभवेषधरा विचक्षणा कथिता सा खलु घूर्जरी बुधैः ॥ ९५ ॥
प्रचण्डवेगाश्च सुकष्टसाध्यास्सुकोपवत्यश्चलनेत्रपाताः ।
भवन्ति दुष्टाः किल सिन्धुजाता अवन्तिवाह्लीकभवाश्च नार्यः ॥
मृद्व्यस्सुवाचो लघुभोगसाध्यास्ससाहसा वीतभयत्रपाश्च ।
समानरूपा द्रविडेषु जाता सौवीरदेशे मलयेऽपि नार्यः ॥ ९७ ॥
नखादिविन्यासकलाविधिज्ञा संभोगसम्मर्दनजातरोषा ।
स्वभावतो दुष्टतमा प्रचण्डा काम्भोजिकापाड्यभवा पुरन्ध्री ॥ ९८ ॥
दुर्गन्धदेहा लघुभोगतुष्टास्सुचुम्बनाश्लेषणभावहीनाः ।
म्लेच्छाङ्गनाः पर्वतजाश्च नार्यो गान्धारकाश्मीरभवास्तथैव ॥ ९९ ॥
संभोगदक्षाः कुशलास्सुशीलाः प्रियोपभोग्या अतिचण्डवेगाः ।
मनोरमाः पुष्पपुरे प्रसूताः स्युरङ्गना मद्रसमुद्भवाश्च ॥ १०० ॥
जात्यादिसात्म्यमिति तत्त्वतएव यस्तु ज्ञात्वा नरस्सकलकामकलाप्रवीणः ।
सन्तोषयेच्च सततं सुरतप्रयोगे प्राणैस्समत्वमुपयाति स कामिनीनाम् ॥
देवादिसत्त्वानि यथा वधूनां तथैव पुंसामपि संभवन्ति ।
यो देशधर्मः प्रकृतिश्च वापि सर्वं समानं विबुधा वदन्ति ॥ १०२ ॥
पितृसदननिवासस्सङ्गतिः पुंश्चलीभिः प्रवसनमपि भर्तुर्वार्धकं सेवनं च ।
वसतिरपि च पुंभिर्दुष्टशीलैरवश्यं क्षतिरपि निजवृत्ते योषितां नाशहेतुः
यावत्षोडशवर्षकं निगदिता बाला ततस्त्रिंशकं ।
यावत्सा तरुणीति बाणविशिखैस्सङ्ख्यातु यावद्भवेत्
सा प्रौढेत्यभिधीयते कविवरैर्वृद्धा तदूर्ध्वं मता ।
निन्द्या कामकलाकलापविधिषु त्याज्या सदा कामिभिः ॥ १०४ ॥
बाला नवीनसुरते मुदिता तमिस्रे संजायतेऽथ तरुणी महति प्रकाशे ।
प्रौढा प्रकाशतमसोस्समुपैति सौख्यं वृद्धा न च क्वचन जीवनहारिणी सा

बाला ताम्बूलमाल्याद्यैस्तरुणी 1) वस्त्रभूषणैः ।
2) प्रेम्णा चैकान्ततः प्रौढा वृद्धा सल्लापगौरवैः ॥ १०६ ॥

कार्पण्यादतिमानरोगविरहोद्योगाच्च पारुष्यतो ।
मालिन्यात् समयज्ञतादिभयतश्शोकाच्च दारिद्र्यतः ।
भर्तॄणां तनुतादिभिश्च वपुषः काठिन्यतश्शङ्किता
दोषाणां च वृथा प्रयाति वनिता वैराग्यमुच्चैस्सदा ॥ १०७ ॥

नाभिपश्यति भर्तारं नोत्तरं संप्रयच्छति ।
वियोगे सुखमाप्नोति संयोगे चातिसि 3) ध्यति ॥ १०८ ॥

शय्यामुपगता शेते वदनं 4) परिचुम्बिता ।
तन्मित्रैर्द्वेष्टि मानं च विरक्ता नाभिवाञ्छति ॥ १०९ ॥

नैसर्गिकी विषयजा समा चाभ्यासिकी तथा ।
चतुर्विधेति विद्वद्भिर्दम्पत्योः प्रीतिरुच्यते ॥ ११० ॥

अभ्यासविषया साध्या दम्पत्योस्सहजा तु या ।
सान्द्रा निसर्गभूता च प्रीतिर्नैसर्गिकी मता। ॥ १११ ॥

मालाचन्दनभोज्याद्यैर्विषयैर्वर्धिता तु या ।
प्रीतिर्विषयजा प्रोक्ता समयोगे समा स्मृता ।
आखेटदेवपूजादिकेलीसङ्गीतकर्मसु ।
अभ्यासयोगाद्या वृद्धिं याति साभ्यासिकी मता ॥

5)योनेरभ्यन्तरं क्वापि पद्मकिञ्जल्ककोमला ।
कापि स्याद्घटिकाकीर्णा काचिद्वल्लिचया कुला ॥ ११२ ॥

गोजिह्वाभकरस्पर्शा काचिदभ्यन्तरं भवेत् ।
पूर्वपूर्वतरास्तास्तु श्रेष्ठा ज्ञेया विचक्षणैः ॥ ११३ ॥

योनिमध्ये तु नाड्येका कामांकुशसमाहिता ।
लिंगेन क्षोभिता वाति मदवारि निरन्तरम् ॥ ११४ ॥

कामातपत्राभिस्रुतं निष्यन्द इति कीर्त्यते ।
वराङ्गरन्ध्रादूर्ध्वं तु नालिकाभं यदस्ति तत् ॥ ११५ ॥

मन्मथछत्रमित्याहुराढ्यं मदशिराजलैः ।
योनिरन्ध्रे नातिदूरात्पूर्णचन्द्रास्ति नाडिका ॥ ११६ ॥

मनोजवारिसंपूर्णा स्त्रीणां 6) कान्तिकृदन्वहम् ।
तद्विसृष्टा द्रुता नारी प्रोच्यते पूर्वसूरिभिः ॥ ११७ ॥

रक्ताद्विश्रान्तदेहा चिरविरहवती मासमात्रप्रसूता
गर्भालस्या च नव्यज्वरयुततनुका त्यक्तमानप्रसन्ना ।
स्नाता पुष्पावसाने नवरतिसमये मेघकाले वसन्ते
प्रायसम्पन्नरागा मृगशिशुनयना स्वल्पसाध्या रते स्यात् ॥ ११८ ॥

1) भूरि. 2) सुप्रेम्णारज्यते प्रौढा. 3) सीदति. 4) मार्ष्टि.
5) योनेरभ्यन्तरे क्वापि. 6) तिष्ठति सर्वदा.

कन्दर्पयुद्धे प्रथमेऽल्पभावाश्चिरेण तृप्तिं वनिता लभन्ते ।
शीघ्रं द्वितीये धृतिभूरिभावाः पुंसः क्रमोऽयं विपरीत उक्तः ॥

संगृह्णात्यलकान् मुहुः कुचयुगं वस्त्रेण चाच्छादयेत्
दन्तेनाप्यधरं दशेच्च विरमेत्संजातलज्जा क्षणम् ।
प्रायश्चुम्बति फालकं निजवपुस्संभज्यते जृम्भते
रत्यां चापि रुणद्धि पश्यति च दोर्मूलं हसत्यादरात् ॥ १२० ॥

आलिङ्गेत् स्वसखीं प्रियं प्रलपति प्रत्युत्तरं याचते
प्रव्यक्तं न च भाषते शशिमुखी व्रीडां वृथा पारयेत् ।
व्याजेनैव विलम्बते प्रकुरुते मौलौ च कण्डूयनं
सा प्रोद्यत्सुरतस्पृहा बुधजनैर्ज्ञेयेति भावैस्सदा ॥ १२१ ॥

निर्लज्जा विधवा कलासु कुशला गोष्ठीपरा दुर्भगा
क्लीबस्थूलकठोरवामनजरावैरूप्यभार्या तु या ।
द्वारावस्थिति शीलिकातिचपला वन्ध्या महामानिनी
प्रत्यग्रा तरुणी महाविरहिणी साध्या सुखस्याङ्गना ॥ १२२ ॥

लज्जां न धत्तेऽभिमुखं च पश्येत् पादेन भूमिं विलिखेत् स्थिता च ।
व्यनक्ति गात्रं कुरुते च हास्यं दृष्ट्वा कटाक्षैर्नयने पिदध्यात् ॥

पृष्टा स्फुटं सस्मितमेव वाक्यं 1) शनैर्वदेच्चावसरेऽल्पचिन्तं ।
विलोक्य तं व्याजवशात्प्रसङ्गाद्गुह्यैर्वदेत्स्वं परिदर्शयन्ती ॥ १२४ ॥

तन्मित्रवर्गे प्रणयं विदध्यादित्यादिवार्तामसकृच्च पश्येत् ।
कतिस्त्रियश्चालयगास्सुरूपाः कस्यामयं प्रेम भृशं विधत्ते ॥ १२५ ॥

मृन्दाति दृष्ट्वा स्वकुचं करेण संस्फोटयेदङ्गुलिकास्सजृम्भम् ।
भूषाविहीना न ददाति तस्मै स्वदर्शनं याचितमप्यजस्रम् ॥ १२६ ॥

पुष्पादिना हन्ति तथा च 2) तारां सञ्चालयेन्मार्ष्टि भुजं करेण ।
व्याजेन गच्छेत् सदनं करांघ्रि वक्त्रे तु घर्माम्बु वहेद्विलोक्य ॥

इत्यादिचिह्नैरनुरागयुक्तां ज्ञात्वा विदग्धां मृगशावकाक्षीम् ।
संप्रेषयेत्तां प्रति निर्विशङ्कां दूतीं वरां कामकलाप्रवीणाम् ॥ १२८ ॥

आद्ययामे तु शङ्खः स्यान्महाशङ्खो द्वितीयके ।
पद्मस्तृतीयके यामे महापद्मश्चतुर्थके ॥ १२९ ॥

रामस्तु पञ्चमे यामे विरामष्षष्ठके स्मृतः ।
3) प्रदरस्सप्तमे ज्ञेयः 4) प्रत्यक्षश्चाष्टमे स्मृतः ॥ १३० ॥

दाडिमं तु द्विजे ज्ञेयं पनसं क्षत्रिये स्मृतम् ।
कदलीफलकं वैश्ये चाम्रकं शूद्रके मतम् ॥ १३१ ॥

राजपुत्रे द्विजेन्द्रश्च सम्पूर्णेन्दुश्च भूपतौ ।
ब्राह्मण्यां कुन्दपुष्पं स्याद्राजपुत्र्यां च मालती ॥ १३२ ॥

1) शनैर्वदेच्चानुसरेद् दृगन्तम्. 2) जारं. 3) प्रवर. 4) प्रत्यूष.

मल्लिका वैश्यपुत्र्यां च शूद्रपुत्र्यां तु कैरवम् ।
कामुके भ्रमरः प्रोक्तो कामिन्यां चूतमञ्जरी ॥ १३३ ॥

भल्लातकफलं भीरौ भयाभावे हरीतकी ।
छिन्नवस्त्रं तु विच्छेदे दशाग्रन्थिश्च सङ्गमे ॥ १३४ ॥

एकस्नेहे तथा चैको द्वयोस्स्नेहे च तद्द्वयम् ।
मालाकारवधूस्सखी च विधवा धात्री नटी शिल्पिनी
सैरन्ध्री प्रतिगेहिकाथ रजकी दासी च सम्बन्धिनी ।
बाला प्रव्रजिता च भिक्षुकसती तक्रस्य विक्रायिका
मान्या कार्यवधूर्विदग्धपुरुषैः प्रेष्या इमा दूतिकाः ॥ १३५ ॥

वह्नौ ब्राह्मणपूज्यवर्गनिकटे नद्यां च देवालये
दुर्गादौ च चतुष्पथे परगृहेऽरण्ये श्मशाने दिवा ।
सङ्क्रान्तौ शशिसङ्क्षयेऽथ शरदि ग्रीष्मे ज्वरेऽर्कव्रते
सन्ध्यायां च परिश्रमेषु सुरतं कुर्यान्न विद्वान् क्वचित् ॥ १३६ ॥

विस्तीर्णे ललिते सुधाधवलिते चित्रादिनालङ्कृते
रम्ये प्रोन्नतचत्वरेऽगरुमहाधूपादिपुष्पान्विते ।
सङ्गीताङ्गविराजिते स्वभवने दीपप्रभाभासुरे
निश्शङ्कं सुरतं यथाभिलषितं कुर्यात्समं कान्तया ॥ १३७ ॥

इतिश्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले कामशास्त्रे जाति-स्वभाव-गुण-देश-धर्म-चेष्टादिवर्णनं नाम द्वादशस्तरङ्गः.

अथ त्रयोदशस्तरंगः

जातिस्वभावादिकमीरितं प्रागथोच्यते बाह्यरतोपयोगः ।
आदौ रतौ बाह्यमिह प्रयोज्यं तत्रापि चालिङ्गनपूर्वमेव तत् ॥ १ ॥

अजातजातिस्मरकेलिभेदा द्विधा पुनर्द्वादशधा च तत्स्यात् ।
यद्योषितस्सम्मुखमानिताया अन्यप्रदेशाद् व्रजतो नरस्य ॥ २ ॥

गात्रेण गात्रं घटितं रतिज्ञाः आलिङ्गनं स्पृष्टकमेतदाहुः ।
यद्गृह्णती कञ्चनवञ्चिताक्ष स्थितोपविष्टं पुरुषं स्तनाभ्याम् ॥ ३ ॥

नितम्बिनी विध्यति तां च गाढं गृह्णात्यसौ विद्धकमुच्यते तत् ।
यात्रोत्सवादौ तिमिरे घनेवा यद्गच्छतोः स्याच्चिरमङ्गसङ्गः ॥ ४ ॥

तद् घृष्टकं तत्पुनरेव कुड्ये निपीडनात्पीडकसंज्ञकं स्यात् ।
भावप्रबोधार्थमजातरत्योश्चतुर्विधोक्ता परिरम्भलीला ॥ ५ ॥

सम्प्रयुक्तस्त्वनुरागवद्भिर्बुधैरसावष्टदिशोपदिष्टा ।
प्रियतनुकृतवल्लीविभ्रमा वेष्टयन्ती ध्रुवमिलदतुलाङ्गी मन्दसिक्ता तदीयम्
वदनमुदितलीलं क्रन्दनाचुम्बनार्थं नमयति कथितं तद्वल्लरीवेष्टितं च ॥

रमणचरणमेकेनाङ्घ्रिणाक्रम्यमिमश्वसितमपरपादेनाक्रमन्तीतदूरुम् ।
निजमथ भुजमेकं पृष्ठतोऽस्यार्पयन्ती पुनरपि परदेशं प्राञ्चयन्ती तदंसम्

तरुमिव कमितारं चुम्बनार्थं निरूढं
यदभिलषति नारी तच्च वृक्षाधिरूढम् ।
स्थितपतिमधिकृत्य प्रोक्तमाश्लेषयुग्म-
स्सपदि च कथनीयास्सुप्तसंश्लेषभेदाः ॥ ८ ॥

भुजयुगविपर्ययान्मिथो घटयेच्चेन्मिथुनं सुनिश्चलम् ।
तिलतण्डुलसंज्ञकं तदा परिरम्भं कथयन्ति सूरयः ॥ ९ ॥

अङ्केऽथ तल्पे पतिसम्मुखा स्तथा कान्ता समालिङ्गति यत्र गाढम् ।
मिथः प्रवेशं कुरुतो निजाङ्गैः स्यात् क्षीरनीरं परिरम्भणं हि ॥

मनसिजतरलायास्सम्भृतानङ्गरागो
यदि पतिरबालायाः पीडयेदूरुयुग्मम् ।
दरदलितनिजोरुद्वन्द्वसंदंशयोगात्
तदिह मुनिमतज्ञैरुक्तमूरूपगूढम् ॥ ११ ॥

जघनकलितकान्तश्रोण्युराश्रोपरिष्टात्
प्रथयति जघनोपश्लेषमेनं मुनीन्द्रः ।
उरसि कमितुरुच्चैराविशन्ती वराङ्गात्
स्तनभरमुपधत्ते यत् स्तनालिङ्गनं तत् ॥ १२ ॥

मुखमभिमुखमक्ष्णोरक्षिणी न्यस्य हन्त्या-
दलिकमलिकपट्टेनेति लालाटिकं तत् ।
नयनगलकपोलं दन्तवासोमुखान्त-
स्स्तनयुगलललाटं चुम्बनस्थानमाहुः ॥ १३ ॥

दधति जघननाभीमूलकक्षासु चुम्ब-
व्यतिकरसुखमुच्चैर्देशसात्येन लाटम् ॥ १४ ॥

नारीमुखान्ते वदनं स्वकीयं समानयेद्यत्र बलेन कान्तः ।
सा नैव चुम्बेदतिकोपयुक्ता स्याच्चुम्बनं तन्मिलिताभिधानम् ॥ १५ ॥

यदि तस्य निवेश्य वक्त्रके निजवक्त्रकं परिचुम्ब्य चाधरम् ॥
नपिवेदबला तदाननं स्फुरिताख्यं किल चुम्बनं तथा ॥ १६ ॥
करेण कान्तस्य निमील्य नेत्रे जिह्वां मुखान्ते विनिधाय वक्त्रम् ।
चुम्बेद्विलोमा परिमीलिताक्षी तद्घाटिकाख्यं मुनयो वदन्ति ॥ १७ ॥
करेण कान्ताचुबुकं गृहीत्वा पिबेत्पतिः पश्चिमभागवर्ती ।
मिथोदरं यत्रतु तिर्यगाख्यं प्रोक्तं कवीन्द्रैः खलु चुम्बनं तत् ॥ १८ ॥
दन्तैर्गृहीत्वा मदनातिलोलाऽधरं विचुम्ब्याशु दशेत्स्वभर्तुः ।
कान्ता तदीयं कथितं मुनीन्द्रैरत्युत्तराख्यं परिचुम्बनं हि ॥ १९ ॥
आदाय दन्तच्छदमाशु तिर्यक् करांगुलीसंघटनेन नारी ।
जिह्वाग्रदेशेन पुटे दशेत तच्चुंबनं पीडितसंज्ञकं स्यात् ॥ २० ॥
प्रियामुखं स्वाधरसम्पुटेन विशेत्पतिस्सापि तथैव भर्तुः ।
तत्संपुटाख्यं ह्नुवक्त्रकसंज्ञं [1] सत्केलिजिह्वाननकण्ठदेशम् ॥ २१ ॥
संप्राप्तनिद्रां रहसि स्वकान्तां चिरागतश्चुम्बति यत्र भर्ता ।
प्रोक्तः कवीन्द्रैः परिबोधसंज्ञं तच्चुम्बनं सर्वरसातिरेकम् ॥ २२ ॥
अधरोष्ठयुगेन कामिनी पतिवक्त्रोष्ठयुगं स्वजिह्वया ।
परिपीय विचुम्ब्य नर्तयेत्कथितं तद्धि समोष्ठसंज्ञकम् ॥ २३ ॥
कक्षाकरोरुजघनस्तनपार्श्वपृष्ठहृत्कन्धरासु नखराः करवेगयोः स्युः ।
अप्यन्ययोर्नवरते विरते च माने पुष्पे मदे प्रसवने विरहे प्रयोज्याः ॥
सात्मेनवा रदविधेरपि निर्णयाय प्रत्यग्रभूरिशिखरा अतिवेगयोः स्युः ।
वर्धिष्णुता मलिनता मृदुतोज्ज्वलत्वं
नीरेखता स्फुटिततेति गुणा नखानाम् ॥ २५ ॥
अव्यक्तरेखमणिकर्म नखैस्समस्तैः रोमाञ्चकृच्चटचट ध्वनियोजितान्तम्
अङ्गुष्ठकाग्रनखताडनतो नखानां गण्डस्तनाधरगले ललितं लिखन्ति ॥
वक्त्रोऽर्धचन्द्र इति च स्तनकन्धराग्रे
तौ सम्मुखौ वदति मण्डलकं मुनीन्द्रः ।
स्थानं च तस्य भगमूर्धकुकुन्दरोरु-
द्वित्राङ्गुली परित एव लिखन्ति रेखाः ॥ २७ ॥
अङ्गुष्ठजं नखमधो विनिवेश्य कृष्ट्वा सर्वाङ्गुलीकररुहैरुपरि स्तनस्य
यच्चूचुकाभिमुखमेत्य भवन्ति रेखा स्तद्ज्ञा मयूरपदकं तदुदाहरन्ति ॥
सर्वैः शशप्लुतमिदं करजैः कुचाग्रे तत्तिर्यगुत्पलदलं स्तनपृष्ठगुह्ये ।
रेखा घनाश्चिचतुरा जघने स्तने वा भर्तुः प्रवासगमने विदधाश्विदग्धा
तेन्तर्मुखोत्तररदच्छदनेत्रवर्जं स्थानेषु चुम्बनविधौ कथितेषु योज्याः ।
रागैकलिङ्गमधरे किल गूढकं स्यादुच्छूनकं दशनवाससि वामगण्डे ॥
स्यात्पीडनात्तदधरोष्ठविशेषयोगात् तत्र प्रवालमणिरभ्यसरे न साध्यः ।
मध्येऽधरं तिलक एव विखण्डने स्यात् बिन्दूद्रदद्वयकृतास्सकलैः कृतैस्तु
स्यातां शिताग्रदशनैर्मणि बिन्दुमाले कक्षे ललाटगलवङ्क्षणभूषणे द्वे
खण्डाभ्रकं स्तनतटे दशनाग्रलेख्यं स्यान्मण्डलाकृतिकृतं विषमैश्च कूटैः
ताम्रान्तरा रदनराजिरखर्वसान्द्रा स्यात्कोलचर्वितमिदं स्तनपृष्ठभूषा ।
स्निग्धा घनाः कुञ्चितनीलवर्णाः केशाः प्रशस्तास्तरुणीजनानाम् ॥
प्रेमप्रवृद्धैर्विधिनेव साम्यप्राप्तैर्नरैश्चुम्बन दानकाले ॥ ३४ ॥
चिकुरान्परिगृह्य चुम्बयन् करयुग्मेन पतिः प्रियां यदि ।
समहस्तवमित्यथैततो यदि हस्तेन तरङ्गरङ्गकम् ॥ ३५ ॥
परिकृष्य करेण कुन्तलान् मदनार्तो यदि धारयेत्प्रिया ।
रतिकेलिकलापकोविदाः कथयन्तीति भुजङ्ग[1] वल्लरीम् ॥ ३६ ॥
कर्णप्रदेशस्थकचान् विकृष्य पतिं मुदा चुम्बति यत्र नारी ।
पतिश्च रागात् सुरतावकाशे कामावतंसस्सकचग्रहस्स्यात् ॥ ३७ ॥
इति प्रदीपाः कतिचित्प्रसिद्धाः क्रमान्मयोक्तास्सुरतप्रकाराः ।
प्रसिद्धबुध्या बहुशोऽपरत्र न दर्शिता विस्तरशङ्कयात ॥ ३८ ॥
स्वात्मानुरूपां च विधाय पूर्वं पुमांश्चरेद् व्याहरतोपचारान् ।
अथ श्लथीभूतवराङ्गदेश्यां भजेत कान्तां स्मरकेलिरङ्गे ॥ ३९ ॥
दृढापि नारी श्लथतामुपैति प्रसारणादूरुयुगस्य सद्यः ।
अविश्लथा संयमितोरुयुग्मा गच्छेद् दृढत्वं सुरतप्रयोगे ॥ ४० ॥
उत्तानितं तिर्यगथासिताख्यं स्थितं तथैवानतकं रतज्ञैः ।
पञ्चप्रकारं सुरतं प्रदिष्टं तस्य प्रभेदान् क्रमशो वदामि ॥ ४१ ॥
निधाय पादौ रमणांसयोश्चेदुत्तानसुप्ता रमते पुरन्ध्री ।
रतिप्रबन्धं समपादसंज्ञं प्रोचुस्तदा भोगविशेषदक्षाः ॥ ४२ ॥
उत्तानितायाः स्मरमन्दिरे यः स्थितस्तदूरुद्वयमुद्गृहीत्वा ।
संस्थाप्य बाह्यं कटितो रमेच्चेत्कान्तस्ततः स्यात्किल नागराख्यम् ॥
स्त्रियोऽङ्घ्रिमेकं विनिधाय भूमावन्यं स्वमौलौ निजपादयुग्मम् ।
पृथ्व्या समाधाय रमेत भर्ता त्रैविक्रमाख्यं करणं तदा स्यात् ॥
बन्धस्स उक्तस्स्मरवक्त्रनामा श्रेष्ठस्सदा कामिजनस्य लोके ।
उत्तानितोरुद्वयमध्यगानि दृढं समालिङ्ग्य भजेत यत्र ॥ ४५ ॥
कान्तो विलासिप्रिय एव बन्धः [2] पुमाख्य उक्तः कविभिः पुराणैः ।
कान्तोरुयुग्मं परिवर्तनेन निपीड्य कामांकुशचित्तवृत्तिः ॥ ४६ ॥
रमेत भर्ता यदि चेष्टिताख्यं तदेव बन्धं मुनयो वदन्ति ।
स्कन्धप्रदेशे विनिधाय जंघामेकां स्त्रियोन्यामथ संविदार्य ॥ ४७ ॥
अर्धं [3] निगीर्य प्रवरं रमेत भर्ता यदा वेणुविदारितं तत् ।
विलासिनीसंहृतमूरुयुग्मं कृत्वोर्ध्वमालिंग्य भजेत भर्ता ॥ ४८ ॥
ईदृग्विधः स्यात्प्रमदांघ्रियुग्मे कान्तोरसि स्थे स्फुटनं प्रदिष्टम् ॥

1) सत्केलिजिह्वाननकं तदेव.

1) वल्लकीम्. 2) सौम्याख्य उक्तः. 3) विनीय.

कान्तांघ्रिमेकं हृदये स्वकीये निधाय भर्ता शयने द्वितीयम् ।
कुर्याद्रतिं चेदिति वेणिकाख्यः प्रौढाङ्गनायाः परिकल्पनीयः ॥ ५० ॥
यद्यङ्गनाकुञ्चितपादयुग्मं स्वनाभिदेशे परिकल्प्य भर्ता ।
रतिं प्रकुर्यादिति कर्कटाख्यं तदा कवीन्द्रैः करणं प्रदिष्टम् ॥ ५१ ॥
प्रेङ्खा च पादभ्रमणैरिहस्याद्विपर्ययादूरुयुगस्य नार्याः ।
पद्मासनं स्यादथ चैकजिह्वं विपर्ययेऽर्धोपपदं प्रदिष्टम् ॥ ५२ ॥
स्वजानुयुग्मान्तरनिर्गतौ चेद्भुजासु कण्ठे विनयेन्मृगाक्षी ।
कान्तोऽपि गत्वातिविधिं प्रगच्छेद्बन्धो बुधैश्छुरिकाख्य उक्तः ॥
स्थितां स्त्रियं कुञ्चितपादयुग्मां तथैव भर्ता कृततिर्यगङ्गः ।
भजेत सत्कामकला[1] विधज्ञो बन्धं तदा युग्मपदं वदन्ति ॥ ५४ ॥
संवेष्टयित्वा निजकूर्परेण जान्वङ्गनाया अवलम्ब्य कक्षाम् ।
रतिं प्रकुर्यादिति कूर्पराख्यो बन्धः प्रदिष्टः स च जानुपूर्वः ॥ ५५ ॥
उक्तप्रकारे करणे यदैकः पादो भवेदूर्ध्वरतेऽङ्गनायाः ।
तदा प्रदिष्टो हरिविक्रमाख्यो बन्धः प्रियोऽयं तरुणीजनानाम् ॥
अधोमुखीं मस्तकदोःकुचास्यैर्भुवं गतां काम्यति यत्र नारीम् ।
करीव भर्ता रतिलोलचित्त स्तदेभसंज्ञं करणं प्रदिष्टम् ॥ ५७ ॥
एणसूकरकगार्दभादिकान्यप्रयोजनतया च भूरिशः ।
अप्रसिद्धकरणानि नो मया दर्शितान्यतिविनिन्दितानि च ॥ ५८ ॥
अनेकरूपैस्सुरतप्रभेदैर्जातश्रमं वीक्ष्य पतिं पुरन्ध्री ।
कन्दर्पवेगाकुलिता नितान्तं कुर्वीत तुष्ट्यै पुरुषायितं सा ॥ ५९ ॥
उत्तानसुप्तं दयितं भुजाभ्यामालिंग्य लिङ्गं विनिवेश्य योनौ ।
भजेन्नितम्बं परिचालयन्ती नारी तथा स्याद्विपरीतबन्धः ॥ ६० ॥
सुप्तस्य पुंसो जघनोपरि स्थिता सम्भ्रामयत्यङ्घ्रियुगं विकुञ्चितम् ।
चक्राकृतिस्त्री नखवद्विचेष्टा तद् भ्रामराख्यं करणं समीरितम् ॥ ६१ ॥
विपरीतरतेन सीत्कृता दरहासाति मनोरमानना ।
कितवाद्य वशं गतोऽसि मे स्मरयुद्धे विजितोऽसि चाप्यलम् ॥ ६२ ॥
इति मञ्जु रटन्त्यथाकुला सकचाकर्षणचुम्बिताधरा ।
श्रममीलितचारुलोचना द्रवतां याति तदा विलासिनी ॥ ६३ ॥
श्लथदेहरतां समूर्छनां दरसंमीलितलोचनोत्पलाम् ।
ममवेक्ष्य नितान्तनिस्सहामवगच्छेदबलां द्रुतामिति ॥ ६४ ॥
करिणीं हरिणीं च गर्भिणीं नवसूतामपि पुष्पिणीं कृशाम् ।
ज्वरितां च कुमारिकां रते विपरीते परिवर्जयेत्सुधीः ॥ ६५ ॥
मोहनं मदनयुद्धमूचिरे तस्य ताडनमिहाङ्गमिष्यते ।
आर्तिरूपमपि तस्य सीत्कृतं भूरि नैकविधमुच्यते बुधैः ॥ ६६ ॥

1) विदग्धो.

ताडनं समतलापहस्ततो मुष्टिना प्रसृतिकेन [1] चोचितम् ।
पृष्ठपार्श्वजघनस्तनान्तरं मूर्ध्नि चेति मदनस्य भूमयः ॥ ६७ ॥
हुङ्कृतस्तनितसीत्कृतक्वणात् कूत्यतः श्वसितरोदनादिकम् ।
मुञ्च पीडय गृहाण जीवय त्राहि हा! धिगिति सीत्कृतं विदुः ॥ ६८ ॥
तच्च लावककपोतकोकिलाहंसकेकिसदृशैः रुतैः क्रमात् ।
मिश्रितं प्रहरणे प्रयुज्यते चान्यथा विरुतमिष्यते बुधैः ॥ ६९ ॥
ऊर्ध्वमुन्नमितकण्ठनासिकं हुङ्कृतं स्तनितमभ्रघोषवत् ।
वंशविस्फुटनवत्तु सीत्कृतं दुष्कृतं बदरपातवज्जले ॥ ७० ॥
रोदितं ध्वनितरं कराहितं हृत्पयोजमपहस्तकं विदुः ।
मुष्टिरत्र विहितस्तु पृष्ठतो मूर्धनि प्रसृतिकः फणाकृतिः ॥ ७१ ॥
हस्ततालजघनं तु जाघने पार्श्वयोस्समतलं प्रयुज्यते ॥ ७२ ॥
रूपेण वा धनैर्वस्त्रैश्चेष्टाभिर्भाषणैरपि ।
मन्त्रैरौषधजालैश्च वशीकार्याः स्त्रियो नरैः ॥ ७३ ॥
वश्यं भुक्तिश्च तांबूलं फूत्कारं तिलकं तथा ।
स्तम्भनं मोहनं मायामञ्जनं द्रावकं तथा ॥ ७४ ॥
भ्रमणं चोषणं लेपः स्पर्शनं मार्जनं तथा ।
पञ्चैतानि परस्त्रीणां दशपूर्वाणि कारयेत् ॥ ७५ ॥
वश्या भवन्ति मर्त्यानां त्रपरयन्त्यः परस्त्रियः ।
दूर्वाश्च शतपर्वण्यस्समूलदलगुच्छकाः ॥ ७६ ॥
आनीय ता गृहस्तम्भे च्छायाशुष्काः प्रकल्पयेत् ।
गवां च कृष्णवर्णानां घृतेनात्क्ताथ वर्तिकाम् ॥ ७७ ॥
प्रज्वाल्य दीपभागेन दाहयेच्छतपर्वकाम् ।
तद्भस्म मधुनालोड्य निक्षिपेच्छृङ्गपात्रके ॥ ७८ ॥
तर्जन्या तिलकं [2] कृत्वा दर्शयेच्चैव योषिताम् ।
दर्शनस्य प्रभावेन भवेद्वश्या पराङ्गना ॥ ७९ ॥
शष्कुल्यपूपचणका माषमुद्गतिला अपि ।
आत्मनिष्यन्दतोयेन क्षालयेद्घर्षयेत्ततः ॥ ८० ॥
शष्कुल्यादीनि कुर्वीत घृतेनाजभवेन च ।
भक्षणार्थं ततो दद्याद्वश्याः स्युस्तेन योषितः ॥ ८१ ॥
खात्वार्कवारे मध्याह्ने चित्रमूलं समूलकम् ।
सुपुष्पं कोशसंयुक्तं नावलोक्य गृहं नयेत् ॥ ८२ ॥
छायाशुष्कं ततः कृत्वा संहितेनैव सर्पिषा ।
गृहीत्वा चैव तद्भस्म निक्षिपेच्छृङ्गमध्यतः ॥ ८३ ॥
देवनक्षत्रसंयुक्ते दिने चणकमानतः ।
प्रणवेन त्रिरामन्त्र्य मुखफूत्कारवायुना ॥ ८४ ॥

1) बोधितम्. 2) भृत्वा.

तद्भस्मस्पर्शमात्रेण स्त्रियो यास्यन्ति वश्यताम् ।
पुंसोऽप्यस्वत्थवृक्षस्य फलान्यष्टशतं पुनः ॥ ८५ ॥
आनीय च गृहं सम्यक् पेषयेदात्मवारिणा ।
यावद्भवति तत् पिष्टं तावन्नग्नत्वमाचरेत् ॥ ८३ ॥
निक्षिपेदायसे पात्रे श्रीगन्धेनैव मर्दयेत् ।
परस्त्रीसङ्गमे काले लेपयेदात्मदेहकम् ॥ ८७ ॥
उपगुह्य ततो नारी कुर्याद्रतिमिहादरात् ।
षण्मुहूर्तं भवेन्नारी स्तम्भवत्तेन सङ्गता ॥ ८८ ॥
ततः परमसौ नारी वश्या भवति सर्वदा ।
मन्त्रं च मोहनं नाम जपेत्कामी प्रयत्नतः ॥ ८९ ॥
तां पश्यन् मनसा ध्यात्वा न्यासध्यानपुरस्सरम् ।
वह्निबीजं नमश्शब्दं वह्निबीजं सदीर्घकम् ॥ ९० ॥
वह्निना मूलमन्त्रेण जपेदष्टशतं बुधः ।
जायते मोहिता नारी कपोतीव पतिं यथा ॥ ९१ ॥
कुम्भिकामूलमादाय स्वात्मतोयेन पेषयेत् ।
तावत्काले ऋतौ नार्या अभ्यङ्गे च विलेपयेत् ॥ ९२ ॥
देहे सम्मर्दनं कुर्यात्तदारभ्य पराङ्गना ।
मायया वशमायाता सर्वदा रतिमिच्छति ॥ ९३ ॥
वटश्रृङ्गं समादाय पेषयेदात्मवारिणा ।
नूतनेन शरावेण धारयेच्चूर्णमुत्तमम् ॥ ९४ ॥
वस्त्रेण चूर्णमात्रस्य दाहयेदर्कवह्निना ।
तच्चूर्णं सर्वमादाय नवनीतेन मर्दयेत् ॥ ९५ ॥
मर्दितं कज्जलं दद्यात्परनार्यै रताप्तये ।
नेत्रयोर्धारणेनैव भवेत्तद्वशगा सती ॥ ९६ ॥
पर्पाटकफलं धृत्वा हिङ्गुलीफलसंयुतम् ।
पेषयेत्कन्यकामूत्रे वटकं धारयेत्ततः ॥ ९७ ॥
वटके क्षीरपानेन गुह्यस्थानमुपागते ।
शुक्रं स्रवत्यहोरात्रं तत्पुंसो दर्शनादितः ॥ ९८ ॥
करणैर्मनसा वाचा तं स्मरेत् सा स्ववङ्गगा ।
अश्मातं बृहतीमूलं जम्बीररसपेषितम् ॥ ९९ ॥
कृत्वा शलाटुवद्धीमान् छायाशुष्कं च कारयेत् ।
बद्ध्वा तत्पट्टसूत्रेण दर्शयित्वा पराङ्गनाम् ॥ १०० ॥
बध्नीयाद्बाहुमूले च रमयेत्परयोषितम् ।
तदारभ्य विटं नारी न त्यजेद्यत्र कुत्रचित् ॥ १०१ ॥
केतकीमूलमादाय खण्डयेत्कणशः क्षणात् ।
तत्सर्वं सुश्रुतं कृत्वा निजतोयेन मर्दयेत् ॥ १०२ ॥

अथ तच्चूर्णमादाय परनारीस्तनान्तरे ।
मर्दयेन्निद्रितां काले वायुना तद्विशोषयेत् ॥ १०३ ॥
तदौषधप्रभावेन सा नारी वशमाप्नुयात् ।
वाजिगन्धां वचां कुष्ठां टङ्कणैश्च लवङ्गकैः ॥ १०४ ॥
नवनीताम्बुसंमिश्रैर्लेपं कुर्यात्कुचौ पृथू ।
कोलमज्जा हयारिश्च भुजङ्गस्य वसा समा ॥ १०५ ॥
एतेषां मर्दनात् स्त्रीणां कुचौ पीनत्वमाप्नुतः ।
श्रीपर्णीरससंसिद्धतिलतैलविलेपनात् ॥ १०६ ॥
पतितावपि जायेतां पीनोत्तुङ्गौ कुचौ स्त्रियाः ।
दाडिमीकल्कससंसिद्धकटुतैलविमर्दनात् ॥ १०७ ॥
वला चामलकं व्योषा लज्जालुश्च निशाद्वयम् ।
एतेषां कल्कसहितं पचेन्मृद्वग्निना सुधीः ॥ १०८ ॥
ततः क्षामौ कुचौ स्त्रीणां शीघ्रं यान्ति विशालताम् ।
शालितण्डुलतोयेन तैलमेतत्पचेद्यदि ॥ १०९ ॥
पीनोत्तुङ्गौ कुचौ तस्या न पतेतां कदाचन ।
लघ्वग्नौ सार्षपं तैलं जातिपुष्पैः प्रपाचयेत् ॥ ११० ॥
नारीगुह्ये तदभ्यङ्गात् सुगन्धि सुरते भवेत् ।
प्रौढानवप्रसूतानां श्लथं गुह्यं न रोचते ॥ १११ ॥
अतश्च कामिनां प्रीत्यै विधिं संकोचकं ब्रुवे ।
सनालं कमलं पिष्ट्वा पयसा कारयेद् घुटीम् ॥ ११२ ॥
तां निधाय क्षणाद् योनौ वृद्धापि स्यात्कुमारिका ।
देवदारुनिशायुग्मं सरसीरुहकेसरैः ॥ ११३ ॥
संलिप्तं मदनच्छत्रं सङ्कोचं परमं व्रजेत् ।
त्रिफलाधातकीपुष्पजम्बूत्वक्सारकैस्समैः ॥ ११४ ॥
सक्षौद्रैर्लिप्तगुह्या च कन्येव जरती भवेत् ।
मधूककाष्ठसारेण श्लक्ष्णेन मधुना सह ॥ ११५ ॥
वराङ्गं पूरितं यत्नादत्यन्तं दृढतां व्रजेत् ।
पतनान्मदनाम्भसः पुरा परितोषो न भवेद्विलासिनाम् ॥ ११६ ॥
सुरतोत्सवसिद्धिहेतवे तदयं स्तम्भविधिर्निरूप्यते ।
लज्जामूलं च गोक्षीरं वज्रीक्षीरेण वा पुनः ।
दृष्ट्वा स्वपादौ संलिप्य चिराद् बीजं न मुञ्चति ॥ ११७ ॥
सितकोकिलनाम्नश्च बीजं पुष्पोद्धृतं कटौ ।
बद्धं लोहितसूत्रेण बीजस्तम्भं करोत्यलम् ॥ ११८ ॥
बीजं सितपिकाख्यस्य वटक्षीरेण पेषितम् ।
करञ्जसहितं बीजस्तम्भनं वदने ध्रुवम् ॥ ११९ ॥

शक्तेरभावे स्तम्भादि सर्वमेवाप्रयोजकम् ।
ततश्शरीरपुष्ट्यर्थं वाजीकरणमुच्यते ॥ १२० ॥
चूर्णं विदार्याः स्वरसैर्भावितं भानुशोषितम् ।
मध्वाज्यमिश्रितं भुक्त्वा भजते वनिता दश ॥ १२१ ॥
स्वरसैर्भावितं धात्रीचूर्णमाज्यसितान्वितम् ।
क्षौद्रेण लीढं भुक्त्वा तु वृद्धोऽपि तरुणायते ॥ १२२ ॥
पृथुकं मधुना घृतेन च प्रलिहन् क्षीरमनुप्रयोजयन् ।
लभते न स चात्मनः क्षयं प्रमदानां प्रियतां च गच्छति ॥ १२३ ॥
अथ लोकहितार्थाय दम्पत्योस्सुखसिद्धये ।
नवौषधविधानेन द्रवयुक्तिर्विधीयते ॥ १२४ ॥
मधुना सहितं योषाचूर्णं यस्या वराङ्गके ।
क्षिपेत कामी सा पुंसः प्रागेव द्रवतां व्रजेत् ॥ १२५ ॥
कर्पूरं टङ्कणं शम्भुबीजं चेति त्रिभिस्समैः
सक्षौद्रैर्लिङ्गलेपाच्च वरस्संद्रावयेत्प्रियाम् ॥ १२६ ॥
जीर्णो गुडस्तिन्त्रिणिकाफलं च योषारजः क्षौद्रयुतं समांशम् ।
एभिर्ध्वजं यः परिलिप्य शेते कुर्यात्स रेतश्च्युतिमङ्गनानाम् ॥ १२७ ॥
बिम्बाफलं ससिन्दूरं माक्षिकेन समन्वितम् ।
क्षिप्तं गुह्ये रते योषा प्रागेव द्रवतां व्रजेत् ॥ १२८ ॥
कामशास्त्रोदिता एवं पदार्थाः परिकीर्त्तिताः ।
अथ वेङ्कटभूपालचरित्रं परमारभे ॥ १२९ ॥
एवं वेङ्कटभूपालः कामशास्त्रोक्तवर्त्मना ।
भार्यया सार्धमुद्यानसौख्यं समधिकं भजन् ॥ १३० ॥
राज्यं सुविलसन्नीतिप्राज्यं रक्षन्नवर्तत ।
तस्मादजायत सुतो नाम्ना भद्रपनायकः ॥ १३१ ॥
उद्यद्दीधितिः क्षीरवाराशेरिव कौस्तुभः ।
तस्य बाल्ये वीरभद्रप्रसादप्राप्तसंभवः ॥ १३२ ॥
तन्नामा तनुजो जज्ञे श्रिया तत्समतां गतः
तं वीरभद्रनामानां पिता भद्रपनायकः ॥ १३३ ॥
स्वतनूजं वेङ्कटप्पनायकस्य वशं न्यधात् ।
स वीरभद्रनामापि कलास्सर्वा अशिक्ष्यत ॥ १३४ ॥
ततोविषयवैराग्यवशाद्भद्रपनायकः ।
जानन्नेहसाल्पेन 1) परमाश्रयमाश्रयत् ॥ १३५ ॥
अनन्तरं वेङ्कटप्पनायकः पुत्रसूनुना
वीरभद्राभिधानेन साकं सुखमवर्तत ॥ १३६ ॥

1) वरमाश्रममाश्रयत्.

ततः कतिपयानेवमतिवाह्य स वासरान् ।
होलेहोन्नूरु नामाङ्के प्राकारेऽस्मिन्निषेदुषि ॥ १३७ ॥
सहायमधिकं लब्ध्वा म्लेच्छानां विपुलं बलम् ।
आगत्य चावृणोद् दुस्ससालं हनुमनायकः ॥ १३८ ॥
तदैकाकी वेङ्कटप्पनायको हयमुत्तमम् ।
आरुह्य निर्गतस्सलाद्बहिर्देशमवाप्य च ॥ १३९ ॥
संगृह्य कियतीं सेनां पुनर्गत्वा च साहसी ।
तं हत्वा कारयामास वरणाक्रमणं ततः ॥ १३७ ॥
तत्साह्यायागतं म्लेच्छं नाम्ना मंजुलखानकम् ।
योधयित्वा चिरं तस्यापसर्पणमकारयत् ॥ १३९ ॥
हानगल्लु स्थले कीर्त्यै ध्वजस्तम्भं चखान च ।
हनुमस्य सुतो ज्येष्ठस्सन्धित्सुरमुना सह ॥ १४० ॥
लक्कुवाल्लि गाजनूरु शीमोग्गे नामविश्रुतान्
प्राकारानुपधां कृत्वा शरणं तं समाश्रयत् ॥ १४१ ॥
शरणागतमप्यर्थं मानयित्वा सहामुना ।
पारे तु तुङ्गभद्रायाः परस्मिन् शिबिरेऽवसत् ॥ १४२ ॥
तस्यानुजोऽग्रजं दृष्ट्वा तं वैरिशरणागतम् ।
अभ्याययौ योधयितुं बलेन महता सह ॥ १४३ ॥
ततश्चायं नृपो जित्वा दूरमद्रावयच्च तम् ।
विधृतः प्राविशत्पश्चाद् बाणावरपुरान्तरम् ॥ १४४ ॥
ततोऽयं स्वपुरं प्राप्य राजा सुखमवर्तत ।
ततः परं दानिवास कुम्बेसे प्रमुखस्थले ॥ १४५ ॥
स्थितान् क्षुद्ररिपून् सर्वानुन्मूल्य तदनन्तरम् ।
हेब्बे जागर मुख्येषु तेषां स्थानेषु सर्वतः ॥ १४६ ॥
कारयामास दुर्गाणि दुष्प्रधर्षाणि विद्विषाम् ।
सन्माण्डलिकसामन्तराजनामांकितान् रिपून् ॥ १४७ ॥
गलिताहंकृतीन् कृत्वा तेषां स्थानेषु भूयसा ।
चतुर्विधानि दुर्गाणि दुष्प्रधर्षाण्यकल्पयत् ॥ १४८ ॥
ततस्तौलवराजस्य शासित्रीं बहुविक्रमाम् ।
उपद्रुतप्रजां स्वैरं भैरादेवीं पराभवन् ॥ १४९ ॥
बन्दीचकार तां तस्या राज्यमप्याक्रमत्ससमम् ।
ततः परं कतिपयदिनेभ्यस्स महीपतिः ॥ १५० ॥
भट्टं वेणुपुरस्थं शंकरनारायणाभिधम् ।
सीमान्तस्थायिनां स्वैरमुपद्रवविधायिनम् ॥ १५१ ॥
तं ब्राह्मणतया निन्ये भङ्गं वधविनाकृतम् ।
विप्राणामुचितो दण्डो यत्पुनर्मानखण्डनम् ॥ १५२ ॥

इति नीतिमुपाश्रित्य गर्वनिर्वापणं व्यधात् ।
यदाभिलषितैर्भोग्यभोज्यैस्तं प्रत्यपालयत् ॥ १५३ ॥
जातु कौरवदुर्गाख्ये दुर्गे दुष्टैरधिष्ठिते ।
तान्निगृह्याथ तद्दुर्गं बलिष्ठं विरचय्य च ॥ १५४ ॥
ततो बनभुदुर्गाख्यां दुर्गस्यास्य प्रदाय च ।
तस्योपरिष्टाच्छिखरेश्वरविश्वेश्वराभिधौ ॥ १५५ ॥
लक्ष्मीनारायणं चैव मैलारमपि संज्ञया ।
दुर्गाद्वहिर्विरूपाक्षविठ्ठलौ नरसिंहकम् ॥ १५६ ॥
वृषेन्द्रं वीरभद्रं च गुरुनाथं च कालिकाम् ।
संस्थाप्य कारयामास भवनानि समन्ततः ॥ १५७ ॥
तत्र शृंगपुराधीशस्वामिनां मठमातनोत् ।
अग्रहारं च तत्रैव ब्राह्मणानामकल्पयत् ॥ १५८ ॥
भूरुद्रास्पदमत्यर्थं महान्तं मठमातनोत् ।
तेषामनितरापेक्षां भुवं भूयो वितीर्णवान् ॥ १५९ ॥
अनन्तरं चोच्चसार्वभौमसंस्थानतां गते ।
अनन्तशिवपूर्वाख्ये स्थले चानन्दनामकम् ॥ १६० ॥
पुरं निर्माप्य तस्यान्तः प्राकारं निरमापयत् ।
तस्यान्तस्ताण्डवेशाख्यमालयेऽस्थापयच्छिवम् ॥ १६१ ॥
तथैव रङ्गनाथाख्यदेवस्याप्यालयं नवम् ।
निर्माप्य तस्य पूजार्थं क्षेत्रं भूरि विसृष्टवान् ॥ १६२ ॥
तत्र निश्रेयसार्थं च भूरुद्राणां महात्मनाम् ।
सन्मठं चम्पकसरोनामकं पर्यकल्पयत् ॥ १६३ ॥
इक्केरी नाम्नि देशे च स सदाशिवसागरम् ।
निर्माप्य नगरं तत्र राजगेहं विधाय च ॥ १६४ ॥
मनोहरं जलक्रीडाप्रासादं चाप्यकारयत् ।
वरदातटिनीतीरे विश्वनाथपुराह्वयम् ॥ १६५ ॥
अग्रहारं च विद्वद्भ्यः कारयामास सादरम् ।
वाजपेयादिकान् भूरि कारयन्नपि च क्रतून् ॥ १६६ ॥
स्वमातृनाम्ना वीराम्बापुरामित्यतिविस्तृतम् ।
वधूनाम्नाऽप्यभिनववीराम्बापुरमित्यपि ॥ १६७ ॥
अग्रहारद्वयं कृत्वा विद्वद्भ्यो व्यतरद्वरम् ।
आदिशार्केर्महेशस्य मूकाम्बाया विशेषतः ॥ १६८ ॥
सुब्रह्मण्यस्य तद्वच्छंकरनारायणेशितुः ।
देवानामेतदादीनामुपचारक्रिया अपि ॥ १६९ ॥
वर्धयामास तादर्थ्यात्क्षेत्राणि व्यतरत्तदा ।
कृतीश्च कारयामास विद्वत्कृतचमत्कृती: ॥ १७० ॥
काव्ये च नाटके धर्मशास्त्रादौ च महत्तराः ।
एवं तटाकमुख्यं च प्राप्य सन्तानसप्तकम् ॥ १७१ ॥
अष्टैश्वर्ययुतो रक्षन् सप्ताङ्गं राज्यमोजसा ।
धर्मार्थकीर्तिलक्ष्मीभिरिवासौ वयसाऽपि च ॥ १७२ ॥
वृद्धत्वं प्राप्तवान्पौत्रं वीरभद्रपनायकम् ।
अयोजयद्राज्यलक्ष्म्या जरया श्लिष्टविग्रहः ॥ १७३ ॥
तस्मै राज्योपभोगांश्च सप्रपञ्चमुपादिशत् ।
पितृव्यचिक्कसंकण्णनायकस्य तु पौत्रयोः ॥ १७४ ॥
शिवप्प-वेंकटप्पाख्याजुषोर्नायकयोर्द्वयोः ।
शिवप्पनायकायात्र सर्वनिर्वहणोद्यमम् ॥ १७५ ॥
उपादिशद्वीरभद्रनायके राज्यशासिनि ।

इति श्री शिवतत्त्वरत्नाकरे षष्ठकल्लोले बाह्यरत-करणभेद-यौवनस्थिरीकरण-वेंकटप्पनायकचारि वर्णनं नामत्रयोदशस्तरङ्गः

अथ चतुर्दशस्तरंगः

स्वामिन्! राजोपभोगाः प्राक्कीर्त्तिता इत्युदीरितम् ।
ते के? कथं वा संसेव्याः? ब्रूहि भोगपुरन्दर! ॥ १ ॥
तान् भोगान् वर्णये तुभ्यं नन्दनावहितः शृणु ।
सुधाधवलिते रम्ये वास्तुलक्षणसंयुते ॥ २ ॥
जालमार्गस्फुटोद्याने क्वापि सर्वप्रकाशके ।
क्वापि सन्तमसोपेते मणिस्तम्भोपशोभिते ॥ ३ ॥
प्रासादशिखरे तुङ्गे सौवर्णकलशान्विते ।
चित्रवस्त्रसमाकीर्णे नानावर्णविचित्रिते ॥ ४ ॥
विशालस्तम्भविन्यस्तपट्टीधारणशोभिते ।
वरदारुसमाकीर्णे वेणुकर्मविराजिते ॥ ५ ॥
मुञ्जपुञ्जसुसंपन्ने श्लक्ष्णभित्तिविराजिते ।
स्फाटिकोपलविन्यासदर्पणाकारभित्तिगे ॥ ६ ॥
सुधायाः कुट्टिमोपेते काचकुट्टिमशोभिते ।
प्रवालस्तम्भरुचिरे चन्दनस्तम्भगन्धिनि ॥ ७ ॥
तिष्ठेद्विलाससंयुक्तो भुवनाश्रयसद्मनि ।
ईशानकोणभागे तु सर्वलक्षणसंयुतम् ॥ ८ ॥
पूर्वतोमुखशालाकं देवतारूपचित्रितम् ।
देवगेहं तु तत्पार्श्वे कर्तव्यं वेदिकायुतम् ॥ ९ ॥
कृत्वैवं देवतागारं तत्र देवं प्रपूजयेत् ।
हरिद्रारससंछन्नवालमूलकभित्तिके ॥ १० ॥
मरुकैर्दमनैर्बद्धैस्सिकतामयभूतले ।
सेचिते गन्धतोयैश्च मण्टपे सुमनोहरे ॥ ११ ॥
सुधाकरसुधाश्वेते शोभिते शशिवारिणा ।
पुष्पप्रकारशोभाढ्ये मृदुगन्धवहे शुभे ॥ १२ ॥
सुखसल्लापयोग्याभिः प्रेयसीभिस्समन्विते ।
वेदङ्गैर्वाद्यनिपुणैर्निशार्धं गमयेन्नृपः ॥ १३ ॥
ततो विसृज्य तान् सर्वान् सुखशालामथावसत् ।
प्रियया सह संयुक्तो निशाशेषं नयेत् सुधीः ॥ १४ ॥
वसन्ते च तथा ग्रीष्म एवंविधगृहोषितः ।
शीतलान् सुखसंस्पर्शान् भोगान् सेवेत भूपतिः ॥ १५ ॥
नीरन्ध्रके निवाते च शीतशीकरवर्जिते ।
हर्म्ये चतुष्किकायां वा वर्षासु निवसेन्नृपः ॥ १६ ॥

ऋतुकालविभागेन गृहभोगः प्रकीर्त्तितः ।
अथ स्नानोपभोगस्तु कथ्यते सुमनोहरः ॥ १७ ॥
स्वगृहाभ्यन्तरेशानकोणे स्नानगृहं न्यसेत् ।
काञ्चनस्तम्भसंयुक्तं स्फुरत्स्फाटिकवेदिकम् ॥ १८ ॥
काचकुट्टिमशोभाढ्यं दरदाक्लृप्तभित्तिकम् ।
पीतपट्टवितानेन चित्रेण परिशोभितम् ॥ १९ ॥
वरुणस्य विमानेन स्पर्धमानं स्वतेजसा ।
तत्र स्थित्वा महीपालः स्नानभोगं समाचरेत् ॥ २० ॥
तापं कान्तिमरिं लक्ष्मीमर्थसञ्चयमापदम् ।
अनूनां सम्पदं कुर्युरभ्यंगे दिनपादयः ॥ २१ ॥
सोमे बुधे च मन्दे च योऽभ्यङ्गं कुरुते नृपः ।
आयुः प्रवर्धते तस्य लक्ष्मीश्च विपुला भवेत् ॥ २२ ॥
भानौ दूर्वान्वितं भौमे भूयुक्तं पुष्पयुग्गुरौ ।
सर्वेषां सर्वदा तैलमभ्यङ्गेषु न दूष्यति ॥ २३ ॥
षष्ठ्यां दिनक्षयेऽष्टम्यामेकादश्यां च पर्वसु ।
द्वादश्यां च चतुर्दश्यां पञ्चम्यां प्रतिपत्तिथौ ॥ २४ ॥
तृतीयायां त्रयोदश्यां पञ्चम्यामपि नेष्यते ।
तृतीयायां सुखध्वंसष्षष्ठी चायुर्विनाशिनी ॥ २५ ॥
अष्टम्यां धर्मविध्वंसो दशमी पुत्रनाशिनी ॥ २६ ॥
एकादशी रूपहरा त्रयोदश्यां धनक्षयः ।
चतुर्दशी रोगकरी तत्राभ्यङ्गं विवर्जयेत् ॥ २७ ॥
व्रते श्राद्धदिने जन्मत्रितये श्रवणार्द्रयोः ।
ज्योष्ठोत्तराफल्गुनेषु व्यतीपाते च वैधृतौ ॥ २८ ॥
विष्टियोगे च संक्रान्तौ मन्वादिषु युगादिषु ।
नाभ्यङ्गस्तत्र बालानां वृद्धानां न तु दोषकृत् ॥ २९ ॥
सार्षपं गन्धतैलं च यत्तैलं पुष्पवासितम् ।
अन्यद्रव्ययुतं तैलं न दूष्यति कदाचन ॥ ३० ॥
निषिद्धतिथिवारर्क्षग्रहणेष्वपि रात्रिषु ।
किञ्चिद्गोघृतयुक्तं वा गुरुपादरजोन्वितम् ॥ ३१ ॥
माङ्गल्ये नैव दोषोऽस्ति वृद्धिपूर्वोत्सवेषु च ।
केतकीकलितामोदैर्जातीपरिमलोत्कटैः ॥ ३२ ॥
पुन्नागचंपकोद्दामगन्धसंवासितैस्तिलैः ।
यन्त्रसंपीडितैस्तैलं गृहीत्वाभ्यङ्गमाचरेत् ॥ ३३ ॥

केतकीगर्भपत्राभनखरैस्तरुणीकुचैः ।
सुकुमारकरस्पर्शहर्षोत्करकरैर्वरैः ॥ ३४ ॥
ओषधीगन्धसंसिद्धैस्त्वाचदोषापहैश्शुभैः ।
तिलैरभ्यज्य गात्राणि मल्लैस्संवाहयेत्ततः ॥ ३५ ॥
मृदुहस्ततलैस्सारं मर्दितं च समाचरेत् ।
कोष्ठं पत्रैलकं मुस्ता ग्रन्थिपर्णी निशाद्वयम् ॥ ३६ ॥
बालकस्तगरं मांसी वाजिगन्धा च पुष्करम् ।
एषां मूलानि संगृह्य छायाशुष्काणि कारयेत् ॥ ३७ ॥
निंबस्य राजवृक्षस्य तुलस्या अर्जुनस्य च ।
पत्राण्येतानि चाहृत्य प्रागुक्तैस्सह मेलयेत् ॥ ३८ ॥
एला जाजी सर्षपाश्च तिलाः कुस्तुंभराण्यपि ।
वाकुची चक्रमर्दश्च बीजान्येकत्र कारयेत् ॥ ३९ ॥
लवङ्गं पद्मकं लोध्रं श्रीखण्डं सुरदारुकम् ।
तगरं सरलं चैव काष्ठान्येतानि निक्षिपेत् ॥ ४० ॥
नागकेसरपुन्नागकर्कन्धूपिचुमन्दकम् ।
पुष्पाण्येतानि संगृह्य तेषां मध्ये विनिक्षिपेत् ॥ ४१ ॥
गुग्गुलं सैन्धवं चैव चोलं सर्जरसं तथा ।
द्रव्याण्येतानि संपेष्य पयसा रञ्जितेन वा ॥ ४२ ॥
अभ्यक्तगात्रो नृपतिरुद्वर्तनमथाचरेत् ।
आरनालसुसंस्निग्धगोधूमश्लक्ष्णचूर्णकैः ॥ ४३ ॥
मदनस्य च मूलेन चूर्णितेन विमिश्रिता
श्रीखण्डक्षोदसंयुक्ता लक्ष्मीपल्लवसंश्रिता ॥ ४४ ॥
स्नेहापनयने योग्या पिशुनेवोत्तमा वली ।
नानातीर्थाहृतैस्तोयैर्विमलैर्मलहारिभिः ॥ ४५ ॥
सुगन्धवासनायुक्तैः सुखोष्णैः स्पर्शसौख्यदैः ।
कलशैः काञ्चनोत्पन्नैः कान्तैः कान्ताकरस्थितैः ॥ ४६ ॥
करिकुंभयुगप्रख्यपयोधरविडंबिभिः ।
मेघमाला इव श्यामाः कान्ताः कनकविद्युतः ॥ ४७ ॥
अभिषिक्तांबुधारोत्थस्फुरत्सनितविभ्रमाः ॥ ४८ ॥
इतस्ततः पर्यटन्त्यः सुविलासा वरस्त्रियः ।
स्नपनं भूपतेः कुर्युस्तन्मुखाहितदृष्टयः ॥ ४९ ॥
सुगन्धामलकैश्श्लक्ष्णैस्संलिप्य च शिरोरुहान् ।
तानप्यपनयेयुस्तास्सुखोष्णैस्सलिलैः पुनः ॥ ५० ॥
वङ्गचोलकलिङ्गान्ध्रमलयक्षेत्रजातया ।
धूपवासितयात्यर्थं कृतालेपं हरिद्रया ॥ ५१ ॥
ईषत्पीतेन तोयेन रागिण्यो रागहेतवः ।
स्नपयेयुर्महीपालं स्नानभोग इतीरितः ॥ ५२ ॥
निर्वर्त्यैवं नृपः स्नानं परिधायाङ्गमार्जनम् ।
सितं तु धौतवसनं कृतमार्जं परित्यजेत् ॥ ५३ ॥
इदानीं पादुकाभोगः कथ्यते लक्ष्यलक्षितः ।
श्रीपर्णीदारुघटिते हरिचन्दननिर्मिते ॥ ५४ ॥
गिरिमल्लीसमुद्भूते चन्दनद्रुमकल्पिते ।
मयूरपिञ्छगुच्छाभे समन्तात्परिशोभिते ॥ ५५ ॥
चर्मणा निर्मिते चापि नानावर्णसुरञ्जिते ।
गजदन्तसमुद्भूते सुवर्णरचनान्विते ॥ ५६ ॥
विचित्रे सुदृढे श्लक्ष्णे सुजाते सुमनोहरे ।
लघुछत्रकृताधारे सुस्पर्शे पादुके समे ॥ ५७ ॥
अध्यास्ते यन्महीपालः पादुकाभोग ईरितः ।
विलेपनोपभोगोऽथ कथ्यते भोगिनांप्रियः ॥ ५८ ॥
अच्छं विलेपनं रम्यमङ्गसौख्यप्रदायकम् ।
ततस्समाचरेद् भूपः कान्ताजनमनोहरम् ॥ ५९ ॥
चन्दनागरुकर्पूरकस्तूरीकुंकुमान्वितम् ।
सुरभीकेसरैर्युक्तं ग्रन्थिपर्णीसमायुतम् ॥ ६० ॥
जातीदूतीफलोपेतं सुश्लक्ष्णं भूरि धूपितम् ।
वसन्ते लेपनं कुर्याद्यक्षकर्दममुत्तमम् ॥ ६१ ॥
कक्षमार्गे कर्णसन्धौ नाभिवंक्षणयोरपि ।
स्वेदगन्धविनाशार्थं सान्द्राख्यं लेपमाचरेत् ॥ ६२ ॥
चन्दनस्य तरोर्मूलग्रन्थिकोटरखर्परम् ।
गन्धोत्कटं हिमस्पर्शं वरिष्ठं तन्निरूपितम् ॥ ६३ ॥
श्रेष्ठं मलयजं तत्तु मध्यमं यावनोद्भवम् ।
अधमं बर्बरोद्भूतं जुष्टं पाञ्चालसंभवम् ॥ ६४ ॥
यत् छेदे रक्ततां धत्ते घर्षे पीतत्वमेति च ।
शोषे शुभ्रत्वमायाति खादे तिक्तरसं भवेत् ॥ ६५ ॥
पुन्नागकेसरैर्युक्तं श्रीखण्डं शशिना युतम् ।
केतकीमल्लिकोन्मिश्रं पाटलीगन्धवसितम ॥ ६६ ॥
शशाङ्ककरसङ्काशं हिमडिण्डीरपाण्डरम् ।
निदाघे शीतलं लेपं नृपः कुर्यात् समुज्ज्वलम् ॥ ६७ ॥
श्रीखण्डं तादृशं हृद्यं निष्कृष्टं पेषितं पुनः ।
मसृणं लेपयेद्गात्रे स्वच्छमच्छं विलेपनम् ॥ ६८ ॥
काश्मीरदेशसंभूतं हरिचन्दनकेसरम् ।
लोहितं तत्समादाय पेषिण्या श्लक्ष्णपेषितम् ॥ ६९ ॥

कटुतैलसमायुक्तं लाक्षारागसमप्रभम् ।
तादृशं कुंकुमं श्रेष्ठं लेपनार्थं महीभृताम् ॥ ७० ॥
कुंकुमं लघुसंमिश्रं घनसारसुधूपितम् ।
कुर्वीत लेपनं रम्यं वर्षाकाले नरेश्वरः ॥ ७१ ॥
चन्दनं बहुसौरभ्यं मिलितं पद्मकेसरैः ।
उत्पलावासितं लेपाच्छरत्काले प्रशस्यते ॥ ७२ ॥
महतीपुण्यसंपन्नमृगनाभिसमुद्भवा ।
गोलकाकारसंस्थाना किंचित्कुंकुमपिञ्जरा ॥ ७३ ॥
मर्दिता चिक्कणीभूता द्विगुणेव विलोक्यते ।
दग्धा याति न भस्मत्वं लसत्सिमिसिमिस्वना ॥ ७४ ॥
स्वादे तिक्ता कटुर्वापि तुलिते लघुतां गता ।
ईदृग्विधा वरिष्ठा या कस्तूरी सा नृपोचिता ॥ ७५ ॥
एवंविधां समानाय्य कस्तूरीं दिव्यसंभवाम् ।
पेषिण्या पेषयित्वा तां तोयमिश्रं विलेपयेत् ॥ ७६ ॥
गन्धमार्जारवीजानि समाहृत्य विनिक्षिपेत् ।
उष्णतोये समुद्घृष्य कटुतैलेन लेपयेत् ॥ ७७ ॥
विकीर्य च निशाचूर्णं छायायां परिशोषयेत् ।
एवं संचिनुयाद् भूरि क्राथयेत्सञ्चितान्यपि ॥ ७८ ॥
श्रीवृक्षमृगविन्दूनां तुलसीवीजपूरयोः ।
पल्लवैः क्वथितैस्तोयैर्बीजानि क्षालयेत्ततः ॥ ७९ ॥
प्रक्षाल्य शोषयेत्तद्वत्ततः कुर्याच्च खण्डशः ।
निक्षिप्य वारिमध्ये च वीजपूरफलत्वचः ॥ ८० ॥
क्राथयेन्मात्रया पश्चात्ततस्स्नेहो विनिस्सरेत् ।
तोयोपरि स्थितं स्नेहं दर्व्या काञ्चनजातया ॥ ८१ ॥
आहरेच्च प्रयत्नेन यद्वा बीजेन पाचयेत् ।
पेषिण्या पेषयित्वाथ स्नेहं निस्सारयेद्बुधः ॥ ८२ ॥
निस्सारितं ततः स्नेहं सञ्चितं धूपयेत्पुनः ।
पश्चाच्च लघु कर्पूरैर्वारं वारं च धारयेत् ॥ ८३ ॥
अङ्गानां सञ्चितं प्राहुर्दिव्यगन्धं मनोहरम् ।
नृपाणां लेपने शस्तं हेमन्ते शिशिरेऽपि च ॥ ८४ ॥
नवकेसरसंभूतं कुंकुमं कायरञ्जकम् ।
सुगन्धितैलसंयुक्तं शीतकालेऽनुलेपनम ॥ ८५ ॥
वस्त्रभूषानुसारेण चाङ्गरागविलेपनम् ।
ललाटवाहुशिखरे कर्णे वक्षस्यथोदरे ॥ ८६ ॥
नानागन्धसमोपेतं नानावर्णसमन्वितम् ।
विलेपनं सदाकाले प्रकुर्यान्नृपपुंङ्गवः ॥ ८७ ॥
एवं भूरिसुगन्धाढ्यद्रव्याणां संप्रयोगतः ।
अङ्गरागा महीपानां वहुधा संभवन्त्यपि ॥ ८८ ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
गृहस्नानपादुकालेपनोपभोगवर्णनं नाम चतुर्दशस्तरंगः

अथ पञ्चदशस्तरंगः

स्वामिन्! सद्गुणमन्दारसुमगन्धितविष्टप! ।
एवमन्योऽपि गन्धानामुपभोगो भवेदिति ॥ १ ॥

उक्तमासीत् तत्प्रकारश्रवणेच्छा ममाधिका ।
तद्भेदान् वर्णय प्रेम्णा गुरो! सर्वविदां वर! ॥ २ ॥

कुमार! वर्णये तुभ्यं यत्ते श्रोतुमभीप्सितम् ।
अतः परं प्रवक्ष्यामि तैलानां विधिमुत्तमम् ॥ ३ ॥

द्विविधं पाकविज्ञानमग्निना सूर्यरश्मिभिः ।
शरद्ग्रीष्मवसन्तेषु सूर्यपाकस्तथैव च ॥ ४ ॥

प्रावृड्हेमन्तकाले तु वह्निपाकं तु कारयेत् ।
तिलाः परिणतास्स्निग्धास्तीव्रातपविशोषिताः ॥ ५ ॥

काले सुक्षेत्रजाश्चैव कल्कगन्धविवर्जिताः ।
मर्दनं स्वेदनं चैव लेपनं धूपनं तथा ॥ ६ ॥

तिले संवासनं चैव क्रिया पञ्चविधा स्मृता ।
प्रथमं मर्दनं चैव पञ्चपल्लववारिणा ॥ ७ ॥

द्वितीयं स्वेदनं चैव सर्वगन्धोदकेन तु ।
तृतीयं लेपनं चैव त्रिजातत्रिफलैस्सह ॥ ८ ॥

चतुर्थं धूपनं चैवागरुकुंकुमचन्दनैः ।
पञ्चमं वासनं चेति तिलचूर्णान्यमिश्रणात् ॥ ९ ॥

यन्त्रे मृद्भाजने चैव कामं सुकरयुक्तिभिः ।
चूर्णं तु भाजने न्यस्तं स्थापयेच्च प्रयत्नतः ॥ १० ॥

कृष्णां च मृदमर्कांशमपो दद्याच्चतुर्गुणम् ।
तिलमेकगुणं देयं पचेन्मन्देन वह्निना ॥ ११ ॥

तिलपाकं ततो ज्ञात्वा सहसा गालयेद् बुधः ।
त्वक्पथ्यारेणुकैः पत्रैर्मांसीवारिदवारिभिः ॥ १२ ॥

तेन चूर्णेन मतिमान् प्रमाणेन तु दापयेत् ।
तैलकर्मसु सर्वेषु सममेतत् प्रयोजयेत् ॥ १३ ॥

तुल्यैः पत्रतुरुष्कवालतगरैर्गन्धस्स्मरोद्दीपनः
सश्यालो वकुलोऽयमेव कटुकाहिंगूपृथूपान्वितः ।
कुष्ठेनोत्पलगन्धिकस्समलयः पूर्वो भवेच्चंपको
जातीत्वक्सहितोऽतिमुक्तग इति ज्ञेयस्सकुस्तुंबरुः ॥ १४ ॥

शतपुष्पा कुन्दुरुका पादेनार्धेन खतुरुष्कौ च ।
मलयप्रियंगुभागौ गन्धो धूप्यो गुडनखेन ॥ १५ ॥

गुग्गुलवालुकलाक्षामुस्तानखशर्करात्समाद् धूपः ।
अन्ये मांसीवालुकतुरुष्कनखचन्दनैः पिण्डः ॥ १६ ॥

भागैश्चतुर्भिश्शितशैलमुस्ता श्रीसज्जभागौ नखगुग्गुलौ च ।
कर्पूरवेधोमधुपिण्डकोऽयं कोपच्छदो नाम नरेन्द्रधूपः ॥ १७ ॥

हरीतकीशंखनखद्रवांबुगुडोत्पलैश्शैलकमुस्तकान्वितैः ।
नवान्तपादादिविवर्धितैः क्रमाद् भवन्ति धूपा वहवो मनोरमाः

त्वगुशीरपत्रभागैस्सूक्ष्मैलार्द्धेन संयुतश्चूर्णः ।
पटवासप्रवरोऽयं मृगकर्पूरप्रवोधेन ॥ १९ ॥

घनवालुकशैलेयककर्पूरोशीरनागपुष्पाणि ।
व्याघ्रनखस्पृक्कागरुमदनकनखतगरधान्यानि ॥ २० ॥

कर्पूरचोरमलयैः स्वेच्छापरिकल्पितैश्चतुर्भिरतः ।
एकद्वित्रिचतुर्भिर्भागैर्गन्धार्णवो भवति ॥ २१ ॥

अत्युल्वणगन्धत्वादेकांशो नित्यमेव धान्यानाम् ।
कर्पूरस्य तद्वत्तौ नैतौ द्वित्र्यादिभिर्योज्यौ ॥ २२ ॥

श्रीसर्जगुग्गुलुनखैस्ते धूपाः स्युः क्रमाच्च पिण्डस्थैः ।
वोधः कस्तूरिकया देयः कर्पूरसंयुतया ॥ २३ ॥

अत्र सहस्रचतुष्टयमन्यानि सप्ततिसहस्राणि ।
लक्षं शतानि सप्त च विंशतियुक्तानि गन्धानाम् ॥ २४ ॥

एकैकमेकभागं द्वित्रिचतुर्भागिकैर्युतं द्रव्यैः ।
षड्गन्धकरं तद्वद्द्वित्रिचतुर्भागिकं कुरुते ॥ २५ ॥

द्रव्यचतुष्टययोगाद् गन्धचतुर्विंशतिर्यथैकः स्यात् ।
एवं शेषाणामपि षण्णवतिस्सर्वपिण्डोऽत्र ॥ २६ ॥

षोडशके द्रव्यगणे चतुर्विकल्पेन विद्यमानानाम् ।
अष्टादश जायन्ते शतानि सहितानि पञ्चविंशत्या ॥ २७ ॥

षण्णवति भेदभिन्नश्चतुर्विकल्पो गणो यतस्तत् ।
षण्णवतिगुणः कार्यः सा सङ्ख्या भवति गन्धानाम् ॥ २८ ॥

पूर्वेण पूर्वेण गतेन युक्तं स्थानं विनान्यत् प्रवदन्ति संख्याम् ।
इच्छाविकल्पैः क्रमशोऽभिनीय नीते निवृत्तिः पुनरन्यरीतिः ॥ २९ ॥

द्वित्रिंशदष्टभागैरगरुः पलं तुरुष्कशैलेयौ ।
विषयष्टिपक्षतदहनप्रियंगुमुस्तारसाः केश्याः ॥ ३० ॥

स्पृक्कात्वक्तगराणां मांस्याश्च कृतैकसप्तषड्भागाः !
सप्तर्तुवेदचन्द्रैर्मलयनखश्रीकुकुन्दुरुकाः ॥ ३१ ॥

षोडशके [1]कक्षपुटे यथातथा मिश्रितैश्चतुर्द्रव्यैः ।
यत्राष्टादश भागास्तस्मिन् गन्धादयो योगाः ॥ ३२ ॥
नखतगरतुरुष्कयुता जातीकर्पूरमृगकृतोद्बोधाः ।
गुडनखधूप्या गन्धाः कर्तव्यास्सर्वतोभद्राः ॥ ३३ ॥
जातीमृगकर्पूरोद्बोधितसहकारमधुसिक्तैः ।
बहवोऽत्र पारिजाताश्चतुर्भिरिच्छापरिगृहीतैः ॥ ३४ ॥
सर्जरसश्रीवासकसमन्विता धूपयोगास्ते ।
श्रीसर्जरसवियुक्ता स्नानानि सवालुखत्वग्भिः ॥ ३५ ॥
लोध्रोशीरनखागरुमुस्तापत्रप्रियंगुनत [2]पक्ष्याः ।
नतकोष्ठात्कक्षपुटद्रव्यत्रितयं समुद्धृत्य ॥ ३६ ॥
चन्दनतुरुष्कभागौ शुक्त्यर्धं पादुकं तु शतपुष्प्याः ।
कटुहिंगूगुडधूप्याः केसरगन्धाश्चतुरशीतिः ॥ ३७ ॥
सप्ताहं गोमूत्रे हरीतकीचूर्णसंयुक्ते ।
क्षिप्त्वा गन्धोदकेन भूयो विनिक्षिपेद्दन्तकाष्ठानि ॥ ३८ ॥
एलात्वक्पत्राञ्जनमधुमरीचैर्नागपुष्पकोष्ठैश्च ।
गन्धाम्भः कर्तव्यं किञ्चित्काले स्थिते ह्यस्मिन् ॥ ३९ ॥
जातीपत्रफलैलाकर्पूरैस्त्रितयमेकशिखिभागैः ।
अवचूर्णितानि भानोर्मरीचिभिश्शोषणीयानि ॥ ४० ॥
वर्णप्रसादं रदनस्य कान्तिं वैशद्यमास्यस्य सुगन्धितां च ।
संसेविनां श्रोत्रसुखां च वाचं कुर्वन्ति काष्ठान्यसकृन्नराणाम् ॥ ४१ ॥
औदुम्बरवटप्लक्षचूताश्वत्थसमुद्भवाः ।
गन्धशास्त्रोदिता ज्ञेयाः पण्डितैः पञ्च पल्लवाः ॥ ४२ ॥
पञ्चपल्लवसंयुक्ते काञ्जिके सप्तवारकम् ।
पाचयेन्निंबसारस्य लघुखण्डानि बुद्धिमान् ॥ ४३ ॥
शिंशुपासारखण्डानि सरसानि लघूनि च ।
पञ्चपत्रयुते नीरे क्वथितानि दिनत्रयम् ॥ ४४ ॥
मधुपक्वानि जायन्तेऽगरुरूपाणि निश्चितम् ।
सल्लक्या देवदारोर्वा सरलस्याथ खण्डितः ॥ ४५ ॥
सारस्सुपक्वसालरसमज्जायुक्तो दिनाष्टकम् ।
गोमूत्रे क्वथितो गोष्ठे निहितः पल्लवांभसि ॥ ४६ ॥
काञ्जिकेऽगरुसंयुक्तः पक्वः स्यादगरूत्तमः ।
निर्मलक्षालितोऽत्यर्थं शिंग्रुकन्दोऽतिचूर्णितः ॥ ४७ ॥
सरसश्चन्द्रकाक्कोलफलकर्षार्धसंयुतः ।
निर्गन्धे निर्मले श्लक्ष्णे भाण्डे निक्षिप्य शोषितः ॥ ४८ ॥

शशाङ्कशकलाकारः खण्डितोऽतिमनोहरः ।
शशिविद्धो भवेदेष कर्पूरो भोगिवल्लभः ॥ ४९ ॥
अर्धकाञ्चिकधौतानि शुष्कसंचूर्णितानि च ।
शैवाल्याः खदिरोष्णांभःकृतरागाणि वह्निना ॥ ५० ॥
पुटे युक्तानि पक्वानि पक्वश्रीफलमध्यतः ।
कुंकुमेन सुविद्धानि लभन्ते कुंकुमच्छविम् ॥ ५१ ॥
सुश्वेतशिग्रुकन्दस्य रसो मांसी सुरायुतः ।
कंगुना समभागेन मेलितो मर्दितो भृशम् ॥ ५२ ॥
गुडस्य नखरस्यापि धूपात् कस्तूरिकासमः ।
गन्धोऽस्य जायते दिव्यो दुर्लभो भूरि भोगिनाम् ॥ ५३ ॥
स्नुहीपत्रं घनच्छल्लिकुटिलं सममेधितम् ।
गन्धस्संजायते दिव्यो जातीकुसुमसौरभः ॥ ५४ ॥
द्विभागतगरोन्मिश्रमलयागरुकुष्ठकैः ।
समांशैस्सरलैर्गन्धो जायते चंपकाभिधः ॥ ५५ ॥
पादांशतगरोन्मिश्रपल्लवं दशशिग्रुभिः ।
केतकीपत्रसंवादी गन्धो भवति निश्चितम् ॥ ५६ ॥
रक्तचन्दनमांजिष्ठाफलिनीखदिरान्वितम् ।
सल्लकीचूर्णयुक्तैलं पक्वमर्कखरातपे ॥ ५७ ॥
[1]सहकारसमं गन्धं धत्ते भृंगारलोहयुक् ।
सर्वदेवोपभोगाय तत्तैलं परिकीर्त्तितम् ॥ ५८ ॥
श्रीगन्धागरुदारुवालुकनखैरलाजटाकुंकुमै-
रुज्जत्वग्घनसारकुष्ठतगरैः कक्कोललाक्षान्वितैः ।
सर्वैरेव समांशकैस्त्रिगुणया युक्तो भवेद्वालया
तैलं चास्य सोमयन्त्रविधिना पुष्पैस्तु संवासितम् ॥ ५९ ॥
जातीचम्पककेतकीमरुवकैस्संस्थापयेद्भाजने
कस्तूरीसहमोदितं परिमलोल्लोलं सुसौख्यप्रदम् ।
तत्तैलं घनवारिहारिवपुषः कान्तिप्रदं लेपनात्
संसेव्यं धनिनां प्रमोदजनकं कल्याणलक्ष्मीकरम् ॥ ६० ॥
देवदारीफलागस्तिमधुयष्टिसुटङ्कणैः ।
अतिशुद्धमधूपेतैर्लिप्तपत्राणि वेगतः ॥ ६१ ॥
द्रवन्ति भाजने रौप्ये विधृतान्यातपे खरे ।
विलिप्तं मल्लिकापुष्पं सुशुद्धमधुटङ्कणैः ॥ ७२ ॥
द्रवेद्वा चम्पपुष्पाणां समूहो धान्यमध्यतः ।
दग्धशंखस्य चूर्णेन तथार्द्रकरसेन च ॥ ६३ ॥

1) कक्षघटे. 2) पथ्याः.

1) सहकारासवं.

केतकीस्निग्धपत्राणि लिप्यमानानि रश्मिभिः ।
तापितानि द्रवन्त्येव यथा लोहानि वह्निना ॥ ६४ ॥

सितामलयजं कुष्ठं नखसर्जरसौ रसम् ।
समांशैर्मिलितो धूपः स्थिरगन्धोऽतिसौरभः ॥ ६५ ॥

दलं मलयजं मांसी सितागरु जलं मधु ।
समांशैर्मिलितो धूपो धत्ते कुंकमसौरभम् ॥ ६६ ॥

नखमुरसिल्हकवाल्ककुन्दुरुशैलेयचन्दनश्यामाः ।
क्रमवृद्धया भागान्वितवृत्तिः क्षितिनाथकान्तेयम् ॥ ६७ ॥

सुरदारुमरीचमुस्ता लाक्षागरु वालचूर्णकर्पूरम् ।
नृपवासगेहयोग्या मनोहरा दीपवर्त्तिरियम् ॥ ६८ ॥

गन्धरसागरुकुन्दुरुगुग्गुलुपूतिरसकर्पूरम् ।
श्रीवाससिल्हचन्दनमित्यपरा दीपवर्त्तिरियम् ॥ ६९ ॥

त्वक्पत्रैलानखस्त्रर्णजातीभिः कारयेद् घुटीम् ।
ताम्बूलयुक्ता सा भुक्ता वक्त्रं सुरभतां नयेत् ॥ ७० ॥

केसराङ्कोल्ममज्जा च क्षौणेयं जातिसस्यकम् ।
वटुका मधुनैतेषां कृता वक्त्रं सुवासयेत् ॥ ७१ ॥

सुराकिञ्जल्ककुष्ठानां चूर्णं लीढं हि सन्ध्ययोः ।
कर्पूरगन्धि वदनं कुर्यान्मासार्धतो ध्रुवम् ॥ ७२ ॥

कस्तूरिचन्दनलवं फलकुंकुमं च पुष्पद्रुतिः खदिरसारहिमान्वितं च ।
एकैकमेकमपि चार्धमथैकभागं स्यात्पञ्च षोडशगुणैकमथैकभागम् ॥

कूलक्षा वटी वदनसौरभमातनोति चूर्णप्रदग्धमुखपाकरुजं हिनस्ति ।
सौभाग्यरञ्जनृपमोहनवाग्विलासकन्दर्पपोषणमिदं प्रथमं विधत्ते ॥

एलाचन्दनकोष्ठकोत्पललवं जातीफलं पत्रकं
सेवन्ती शचिमुस्तकुंकुमशटी तक्कोल्मांसीमदम् ।
सर्वं रेखसमानखादिरयुतं हैमाम्बुना पेषितं
गुञ्जामात्रवटीकृतं वितनुते ताम्बूलसंयोजितम् ॥ ७५ ॥

एवं सुगन्धिद्रव्याणि प्रोक्तानीह समासतः ।
योगेन चान्यथाभावं यान्ति स्वाभाविकान्यपि ॥ ७६ ॥

अङ्गरागप्रकरणे तस्य जात्यानुरूप्यतः ।
वस्त्रमाल्यानि धार्याणि भोगिनाथ महीभुजा ॥ ७७ ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
गन्धयुक्तिनिरूपणं नाम पञ्चदशस्तरङ्गः

अथ षोडशस्तरंगः

वस्त्राणां चैव माल्यानामुपभोगो नृपोचितः ।
इत्याख्यातमभूत् तेषां धारणं क्रियतां कथम् ? ॥ १ ॥

तत्प्रकारं ममाचक्ष्व गुरो! सर्वविदां वर! ।
यत्त्वया कांक्षितं श्रोतुं पुत्र! ते वर्णयामि तत् ॥ २ ॥

वस्त्राणामुपभोगोऽत्र प्रथमं परिकीर्त्यते ।
अश्विनी वस्त्रदा प्रोक्ता रोहिणी धनवर्धिनी ॥ ३ ॥

पुनर्वसौ वसुप्राप्तिः पुष्ये सौख्यं प्रवर्धते ।
उत्तरायां यशोर्लाभो हस्ते सिद्धिस्सुकर्मणाम् ॥ ४ ॥

चित्रायां सुखसम्प्राप्तिः स्वात्यां सौभाग्यसम्पदः ।
विशाखायां जनप्रीतिर्मैत्रे मित्रसमागमः ॥ ५ ॥

तुष्टिः स्यादुत्तराषाढे धनिष्ठा धान्यपूरिणी ।
उत्तरायां सुतप्राप्ती रेवती रत्नवृद्धिकृत् ॥ ६ ॥

एवमृक्षगुणाः प्रोक्ता नूतनाम्बरधारणे ।
बुधे नवागमं विद्यात् [1] प्रजावृद्धिर्भवेद् गुरौ ॥ ७ ॥

आयुः प्रवर्धते शुक्रे नूतने वस्त्रधारणे ।
गृहोत्सवे विवाहे च परभूपालसङ्गमे ॥ ८ ॥

उत्सवेषु च सर्वेषु गीतनृत्तविनोदने ।
दानकर्मणि यज्ञे च तथा युद्धे ऋतूत्सवे ॥ ९ ॥

जनैर्नवाम्बरं धार्यं न दूष्यति कदाचन ।
कृताधिलेपो राजेन्द्रो वस्त्रभाण्डाधिकारिणः ॥ १० ॥

आनेतुमादिशेद् वस्त्राण्युत्तमानि बहूनि च ।
द्वीपान्तपुरजातानि सप्रापुरभवानि च ॥ ११ ॥

[1] प्रजावृद्धिकरो गुरुः

अनिलाघाटजातानि चीरवल्लीभवानि च ।
मल्लिकाकरजातानि सिंहलद्वीपजानि च ॥ १२ ॥
चीनजातानि दिव्यानि महाचीनभवानि च ।
नीलानि कृष्णवर्णानि धूम्राणि मधुराणि च ॥ १३ ॥
पाटलान्यभिरामाणि जम्बूफलनिभानि च ।
नानावर्णविचित्राणि नानारूपमयानि च ॥ १४ ॥
मध्ये रक्तानि पीतानि कृष्णानि हरितानि च ।
क्वचिद्द्वयचिह्नानि सितरेखामयानि च ॥ १५ ॥
तिर्यगायतरेखाणि रेखाभङ्गयुतानि च ।
वक्ररेखानि रम्याणि रेखात्रययुतानि च ॥ १६ ॥
अङ्गुलीद्वयरेखाणि वृत्तरेखाणि कुत्रचित् ।
सुश्लक्ष्णानि सुसूक्ष्मानि घनानि विरलानि च ॥ १७ ॥
लघूनि गुरुमूल्यानि दृढानि च गुरूणि च ।
मञ्जिष्ठरागयुक्तानि लाक्षारागयुतानि च ॥ १८ ॥
कुसुम्भरसयुक्तानि सिन्धूरारुणकानि च ।
हरिद्रारागमिश्राणि नीलीरागोत्कटानि च ॥ १९ ॥
अभयारसकृष्णानि निशानीलीमयानि च ।
शुकपिञ्छसवर्णानि केकीकण्ठनिभानि च ॥ २० ॥
वसन्ते बिभृयाद्राजा क्षौमकार्पासजानि च ।
सुश्लक्ष्णानि मनोज्ञानि सूक्ष्मानि विरलानि च ॥ २१ ॥
निदाघे धारयेद्राजा सितानि वसनानि च ।
रोमशानि सुसूक्ष्मानि श्लक्ष्णानि च घनानि च ॥ २२ ॥
माञ्जिष्ठानि च रक्तानि प्रावृट्काले विधारयेत् ।
पाटलान्यभिरामाणि धूम्राणि मधुराणि च ॥ २३ ॥
शरत्कालेऽतिसूक्ष्माणि वसनानि विधारयेत् ।
कौसुम्भानि सुरम्याणि लाक्षिकानि घनानि च ॥ २४ ॥
शीते वाते प्रयाणे च बिभृयाद्वीरचेलनौ ।
आङ्गिकोष्णीषकांश्चैव बिभृयात्सर्वदा नृपः ॥ २५ ॥
सूक्ष्माणि बहुमूल्यानि वर्णाढ्यानि वराणि च ।
नानाद्वीपसमुत्थानि [1]शृंगारे धारयेन्नृपः ॥ २६ ॥
ऋतूनामनुसारेण शृङ्गाररस्यानुरूप्यतः ।
एवं यो बिभृयाद्वस्त्रं वस्त्रभोगः प्रकीर्त्तितः ॥ २७ ॥
अधुना कथ्यते सम्यङ्माल्यभोगो मनोहरः ।
वस्त्रप्रसाधनं कृत्वा ततो माल्यानि धारयेत् ॥ २८ ॥

1) शृंगारी.

चम्पकं मल्लिका जातीपुन्नागवकुलानि च ।
केतकीशतपत्राणि गन्धाढ्यं करवीरकम् ॥ २९ ॥
पाटला यूथिका चैव सुरभिर्गिरिकर्णिका ।
तगरं मुचुकुन्दं च कुन्दमिन्दीवरं तथा ॥ ३० ॥
गन्धोत्पलं च शेफालीमतिमुक्तकमेव च ।
वल्लीचंपकजंवीरमिरुवन्तीमथापि च ॥ ३१ ॥
वाणपुष्पं च माल्येषु शोभनार्थं विधारयेत् ।
चंपकं मल्लिकायुक्तं चंपकान्युत्पलैस्सह ॥ ३२ ॥
चंपकं सुरभीयुक्तं चंपकं पाटलीयुतम् ।
मल्लिकापाटलीयुक्ता मल्लिका सुरभीयुता ॥ ३३ ॥
मल्लिका वकुलैर्युक्ता मल्लिकोत्पलसंयुता ।
मालतीमल्लिकोपेता मालतीसुरभीयुता ॥ ३४ ॥
करवीरेण संयुक्ता शतपत्रमनोहरा ।
शतपत्रं समरुकं शतपत्रं सपाटलम् ॥ ३५ ॥
मालती मल्लिका यूथी वाणपुष्पेण संयुता ।
एवं माल्यानि चित्राणि भवन्त्यन्योन्ययोगतः ॥ ३६ ॥
धारयेत्तानि परतो गुरुदेवसमर्पणात् ।
कुटजस्य तु पुष्पाणि मल्लिका [1]वनमल्लिका ॥ ३७ ॥
वर्षाशिशिरकाले तु धारणीया महीभृताम् ।
नागचंपकसेवन्तीपुन्नागान्युत्पलानि च ॥ ३८ ॥
शरत्काले वसन्ते च धारयेद्धरणीपतिः ।
जाती च केतकी कुन्दचंपकानि सुमानि च ॥ ३९ ॥
इतरेषु प्रधार्याणि भोगिना वसुधाभृता ।
वीर्येणोष्णं मल्लिकायाः प्रसूनं श्लेष्मघ्नं स्याद् दृष्टिपुष्टिं करोति ।
भूयोभूयस्सेव्यमानं विशेषाद् यूकप्रायं केशजालं करोति ॥ ४० ॥
नात्युष्णशीतं सुभगातिगन्धि दृष्टिप्रसादं वितनोति कैश्यम् ।
शिरोभ्रमं हन्ति शरीरजाड्यं शतच्छदं पुष्पसुदीर्णमेवम् ॥ ४१ ॥
जाती त्रिदोषान् सकलान् गदांश्च हरेत् सुगन्धातिशया मनोज्ञा ।
विदग्धकान्ताजनमोहनीया निवारयन्ती नयनादिरोगान् ॥ ४२ ॥
केतकयाः कुसुमं निहन्ति पवनं श्लेष्माणमुन्मूलये-
दुष्णत्वाद्वितनोति कोपमधिकं पित्तस्य संसेवनात् ।
कान्तानां हृदयारविन्ददलने शीतांशुकल्पोदयं
कन्दर्पोत्सवमूलभूतममलं भूपैस्सदा सेव्यते ॥ ४३ ॥
अन्येषामपि पुष्पाणामेवं वोध्यं गुणान्तरम् ।
मलिने मल्लिका धार्या निर्मले जातिचंपके ॥ ४४ ॥

1) नवमालिका

अभ्यंगे केतकी धार्या कल्हारं धारयेत्सदा ।
मुहूर्तं जातिकुसुमं कुटुजं च तदष्टकम् ॥ ४५ ॥
त्रिरात्रमुत्पलं चैव पञ्चरात्रं च केतकी ।
द्विरात्रं शतपत्रं स्यादर्धरात्रं तु मल्लिका ॥ ४६ ॥
अहोरात्रं चंपकं च यूथिका च तदर्धकम् ।
धृतान्येतानि पुष्पाणि जनयन्ति गुणोदयम् ॥ ४७ ॥
ऋतूनामनुसारेण तत्तत्पुष्पविधारणम् ।
यद् भूपैः क्रियते सैष माल्यभोगः प्रकीर्त्तितः ॥ ४८ ॥
अथ भूषणभोगस्तु राजयोग्यः प्रकीर्त्यते ।
स्थूलमुक्ताफलैः कार्या कण्ठे त्वेकावली वरा ॥ ४९ ॥
मध्ये मुक्ताफलैः कार्यं त्रिसरं सुविचक्षणैः ।
ततः पञ्चसरं कुर्यान्नवसप्तसरं तथा ॥ ५० ॥
उपान्ते नीलमाणिक्यमिश्रितं सुमनोहरम् ।
काञ्चनीभिर्मण्डलीभिः पंक्तिस्थाभिस्सुशोभितान् ॥ ५१ ॥
क्रमतो हीयमानांश्च सरान् कुर्यान्मनोहरान् ।
गुच्छीकृतमृणालाभिर्हारैस्सर्वैर्मनोहरान् ॥ ५२ ॥
नीलमाणिक्यसंयुक्तान् पूर्ववत्परिकल्पयेत् ।
नीलैर्युक्ता तथा मुक्ताफलैर्मध्यत्रिके युताः ॥ ५३ ॥
नीललंबिनिका ख्याता हारे माणिक्यजा तथा ।
तथैव नीलसंयुक्ता मुक्ताः पूर्वक्रमेण तु ॥ ५४ ॥
कृता वर्णसरो नाम दर्शनीयो मनोहरः ॥ ५५ ॥
सरे भूषणं मणीनां सहस्रमष्टोत्तरं चतुर्हस्तम् ।
इन्द्रच्छन्दो नाम्ना विजयच्छन्दस्तदर्धेन ॥ ५६ ॥
शतमष्टयुतं हारो देवच्छन्दो ह्यशीतिरेकयुता ।
अष्टाष्टकोऽर्धहारो रश्मिकलापश्च नवषट्कः ॥ ५७ ॥
द्वात्रिंशद्भिर्गुच्छो विंशत्या कीर्त्तितोऽर्धगुच्छाख्यः ।
मन्दासंज्ञोऽष्टाभिः पञ्चलताहारफलकसंज्ञं तत् ॥ ५८ ॥
मुक्तास्सप्त च विंशतिरुक्ता नक्षत्रमालेति ।
सुवर्णपरिविन्यस्तरत्नराजिसमन्वितम् ॥ ५९ ॥
हरिमाणिक्यनीलेन प्रभासा नायकेन च ।
मध्यदेशनिविष्टेन मणिना परिशोभितम् ॥ ६० ॥
पदकं रुचिरं रम्यं वक्षस्स्थलविभूषणम् ।
नानारत्नविचित्रं च मध्यनायकसंयुतम् ॥ ६१ ॥
सरकैरन्वितं रम्यं पदकं वन्धुरं विदुः ।
सिंहवक्त्रसमाकारं नानारत्नविचित्रितम् ॥ ६२ ॥

सूसकैर्लम्बकैर्युक्तं बाहुसंधिविभूषणम् ।
सौवर्णमणिविन्यस्तमुक्ताजालकमङ्गदम् ॥ ६३ ॥
पेचाकपिच्छसंयुक्तं बाहुसंधिविभूषणम् ।
सुवर्णोपरि विन्यस्तनानारत्नविराजितम् ॥ ६४ ॥
हस्तस्य कटकं रम्यं सुप्रभापरिशोभितम् ।
वज्रद्वितयमध्यस्थहरिमाणिक्यनीलकम् ॥ ६५ ॥
द्विहीरकमिति ख्यातमंगुलीयक भूषणम् ।
अष्टकोणनिविष्टैश्च पविभिः परिशोभितम् ॥ ६६ ॥
मध्ये वज्रसमायुक्तमष्टवज्रमुदीरितम् ।
वृत्ताकारनिविष्टैश्च कुलिशैः परिवेष्टितम् ॥ ६७ ॥
मध्ये च मणिना युक्तं रविमण्डलमीरितम् ।
रत्नैर्नवग्रहच्छायैर्नवभिः परिकल्पितम् ॥ ६८ ॥
नानाग्रहमिति ख्यातमंगुलीयकमुत्तमम् ।
अंगुलीवेष्टकैर्वज्रैर्निर्मितं वज्रवेष्टितम् ॥ ६९ ॥
अन्यै रत्नैश्च तत्रैवं तत्तद्वेष्टितमुच्यते ।
हीरयोरुभयोर्मध्ये कीलितं हीरमुत्तमम् ॥ ७० ॥
त्रिहीरकमिति ख्यातमंगुलीयकमुत्तमम् ।
यत्तु नागफणाकारं बहुरत्नविभूषितम् ॥ ७१ ॥
अंगुलीवलयैर्वज्रैर्वेष्टितैस्सुक्तिमुद्रया ।
अन्यैश्च विविधैरत्नैस्सन्निवेशनिवेशितैः ॥ ७२ ॥
मुक्तामण्डलसंज्ञं तत्कर्णभूषणमुत्तमम् ।
वलयद्वयविन्यस्तं मुक्ताफलविराजितम् ॥ ७३ ॥
मध्ये नीलेन संयुक्तं द्विराजितमुदाहृतम् ।
एवं त्रिराजितं प्रोक्तं पूर्णमध्यं च मौक्तिकैः ॥ ७४ ॥
तत्पूर्णमध्यमाख्यातं मुक्ताराजिविराजितम् ।
मौक्तिकानि बहिःपंक्तौ तन्मध्ये वलयं ततः ॥ ७५ ॥
वज्राणि च ततोऽप्येतद्वज्रगर्भमितीरितम् ।
एवं बहिस्स्थमुक्तं यन्मध्ये वज्रैश्च भूषितम् ॥ ७६ ॥
मध्ये माणिक्यसंयुक्तं रविमण्डलमुच्यते ।
नीलैर्मरकतैश्चैव माणिक्यैश्च कदम्बितम् ॥ ७७ ॥
यद्भूपैरञ्जितं मध्ये तत्तत्संज्ञितमुच्यते ।
सोपानक्रमविन्यस्तवज्रपंक्तिविराजितम् ॥ ७८ ॥
षड्बन्धनेमिभिः कान्तं कुण्डलं तत्प्रचक्षते ।
शोधितेन सुवर्णेन रुचिरेणातिकान्तिना ॥ ७९ ॥
शृंखला विविधाः कार्यास्ताभिश्च कटकावि च ।
स्त्रीपुंसयोस्समानानि भूषणान्यत्र विस्तरात् ॥ ८० ॥

कथितान्यत्र वक्ष्यामि स्त्रीणां पुंसां पृथक्पृथक् ।
अश्वत्थपत्रसङ्काशं सुवर्णेन विनिर्मितम् ॥ ८१ ॥
माणिक्यवज्रलिखितमायतैर्मौक्तिकैर्युतम् ।
तत्र मुक्ताफलैः पार्श्वे सूसकाभ्यां विराजितम् ॥ ८२ ॥
ताभ्यां बहिर्मरालाभं नानारत्नैः प्रकल्पयेत् ।
तदूर्ध्वं वज्रमाणिक्यमौक्तिकैर्बहुभिर्युतम् ॥ ८३ ॥
तदिदं हंसतिलकं योषित्सीमन्तभूषणम् ।
कलत्काञ्चनपट्टेन पिनद्धं वलयाकृति ॥ ८४ ॥
मुक्ताजालं तदूर्ध्वं तु कृतं नाम्ना च दण्डकम् ।
क्रमशो वर्धमनं तच्चूडामण्डनमुत्तमम् ॥ ८५ ॥
केतकीदलसङ्काशं कलत्काञ्चनकल्पितम् ।
दण्डकादूर्ध्वभागस्य भूषणं तदुदाहृतम् ॥ ८६ ॥
सौवर्णकल्पितं पद्मं नानारत्नविराजितम् ।
चूडिकापरभागस्य भूषणं परिकीर्त्तितम् ॥ ८७ ॥
सौवर्णकुसुमैः क्लृप्तं मुक्ताजालविभूषितम् ।
बृहन्माणिक्यनीलैश्च लम्बनं वेणिभूषणम् ॥ ८८ ॥
पिचुमन्दफलाकारैर्मौक्तिकैर्नीलकैः कृतम् ।
माणिक्यैर्मण्डितैर्हारैर्मुकुलं कर्णभूषणम् ॥ ८९ ॥
नवभिर्दशभिर्वापि स्थूलमुक्ताफलैर्वृता ।
कण्ठप्रमाणरचिता सरिका गलभूषणम् ॥ ९० ॥
तस्या बहिश्च संलग्ना वक्रश्रृंखलिका शुभा ।
सिंहवक्त्रसमाकारौ स्वर्णरत्नैर्विनिर्मितौ ॥ ९१ ॥
मुक्तामाणिक्यसंयुक्तौ नीलमाणिक्यलम्बितौ ।
कञ्चुके कीलितौ कार्यौ भुजभूषणकौ वरौ ॥ ९२ ॥
नामतो बाहुवलयौ पुरुषारयाङ्गदाभिधौ ।
काञ्चिनीभिश्शलाकाभिस्सुसूक्ष्माभिर्विनिर्मितौ ॥ ९३ ॥
मणिबन्धमितादूर्ध्वं वलयैर्विहितैः क्रमात् ।
प्रादेशमात्रकं दैर्घ्ये विस्तारे बहुवेष्टनम् ॥ ९४ ॥
द्विधा विभज्य कर्तव्यं ग्रथितं कीलकेन तु ।
अनेनैव प्रकारेण वज्रमाणिक्यमौक्तिकैः ॥ ९५ ॥
चूडकं मङ्गलं स्त्रीणां प्रकोष्ठस्य विभूषणम् ।
अनेनैव प्रकारेण तदर्धेन विनिर्मितम् ॥ ९६ ॥
अर्धचूडमिति ख्यातं स्त्रीणां प्रियतमं सदा ।
चतुरङ्गुलविस्तारं जघनाभोगवेष्टनम् ॥ ९७ ॥
सौवर्णरत्नखचितं सूसकैर्लम्बनैर्वृतम् ।
हेमघर्घरघण्टाभिर्निचितं रवसंयुतम् ॥ ९८ ॥
काञ्चीदामेति विख्यातं कटिभूषणमुत्तमम् ।
हस्तचूडकवद्रम्यौ जङ्घाकाण्डप्रमाणकौ ॥ ९९ ॥
नानारत्नैश्च खचितौ विख्यातौ पादचूडकौ ।
सुवर्णरजतौ कार्यौ विभागकृतखेटकौ ॥ १०० ॥
सन्धिदेशे सुसंश्लिष्टौ कीलकेन च कीलितौ ।
चतुरस्रौ षडस्रौ वा तथाष्टास्रौ च कारयेत् ॥ १०१ ॥
सौवर्णैर्विविधै रम्यैः पङ्क्तिस्थैर्वा विराजितैः ।
श्लक्ष्णौ च कान्तिसंयुक्तौ नादवन्तावथापि वा ॥ १०२ ॥
रत्नैर्वा विविधैर्युक्तौ कटकौ [1] पादभूषणम् ।
त्रिपञ्चश्रृङ्खलाक्लृप्तौ नानारत्नसरैः कृतौ ॥ १०३ ॥
कीलितौ हीरसन्धानौ पादपद्मावितीरितौ ।
किंकिण्यस्स्वर्णरचिता गुणगुम्फितविग्रहाः ॥ १०४ ॥
नादवत्यस्सुरम्यास्ताः पादघर्घरिकाभिधाः ।
ईदृग्रूपसमायुक्ता नानारत्नविनिर्मिताः ॥ १०५ ॥
ध्वनिहीनास्सुवेषाढ्या राढकाः परिकीर्त्तिताः ।
आयताश्च सुवक्त्राश्च कटका रवनिर्मिताः ॥ १०६ ॥
अन्दुका इति विख्याता योषितां पादभूषणम् ।
पादतर्जनिमानेन कलत्काञ्चनशोभितम् ॥ १०७ ॥
सूलाश्च ध्वनिसंयुक्तास्सुशुभा मुद्रिका वराः ।
शिखरैश्शोभितं यत्तु शेखरं तद्विदुर्बुधाः ॥ १०८ ॥
मुकुलाभं भवेद्यत्तु मकुटं तत्प्रकीर्त्तितम् ।
मध्ये चाष्टाङ्गुलः पञ्चपञ्चभिश्शिखरैर्युतः ॥ १०९ ॥
सौवर्णरत्नसंयुक्तः पट्टो राज्ञां प्रशस्यते ।
केवलं सरलैर्यत्र शिरोवेष्टनमुच्यते ॥ ११० ॥
एवं विरचितै रत्नै राज्ञां [2] मस्तकभूषणम् ।
दलकं रञ्जितं वेमव्याघ्रपुच्छविनिर्मितम् ॥ १११ ॥
मुक्तामाणिक्यखचितं पुरुषाणां विभूषणम् ।
मुक्ताफलेन स्थूलेन शोभिताग्रं मनोहरम् ॥ ११२ ॥
कोशाकारं रत्नविद्धं स्त्रीणां नासाविभूषणम् ।
पवित्रं पुण्यजनकं कर्णाभरणधारणम् ॥ ११३ ॥
मौक्तिकं स्वर्णसंयुक्तं भूरिभाग्याय कल्पते ।
काञ्चनोपरिविन्यस्तनानारत्नविराजितम् ॥ ११४ ॥
पदकं श्रीकरं मेध्यं प्रशस्तं कान्तिवर्धनम् ।
यशस्यं धन्यमायुष्यं यथारत्नगुणं चतत् ॥ ११५ ॥

1) नूपुरौ मतौ. 2) चूडामणिश्शुभः.

वश्यकारि पवित्रं स्यादङ्गुलीयकधारणम् ।
प्रभुत्वकारणं नृणां विषदोषनिवारकम् ॥ ११६ ॥
शुचिना भूषणं धार्यं दिव्यरत्नविनिर्मितम् ।
तत्राधिदेवतास्तुष्टा यच्छन्ति महतीं श्रियम् ॥ ११७ ॥
यथारुचि यथाभोगं प्रेयसीचित्तसम्मतम् ।
धत्ते यद् भूषणं राजा भूषाभोगः प्रकीर्त्तितः ॥ ११८ ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
वस्त्र-माल्य-भूषणोपभोगवर्णनं नाम षोडशस्तरङ्गः.

अथ सप्तदशस्तरंगः

राजोपभोगकथनप्रस्तावे करुणानिधे! ।
श्रुतिः प्रोक्ता भूषणानां नानारत्नैर्विराजताम् ॥ १ ॥
कियद्विधानि रत्नानि? तानि ब्रूहि गुरोऽधुना ।
शृणु नन्दन! वक्ष्यामि संसदाश्चर्यकारकम् ॥ २ ॥
रत्नानि धारयेत्कोशे शुद्धानि गुणवन्ति च ।
सम्भवन्ति तथा जातं गुणं तेषां परीक्ष्य च ॥ ३ ॥
कृते युगे कलिङ्गे च कौसले वज्रसंभवः ।
हिमालये मतङ्गादौ त्रेतायां कुलिशोद्भवः ॥ ४ ॥
पौण्ड्रके च सुराष्ट्रे च द्वापरे पविसंभवः ।
वैराकरे च सौवीरे कलौ हीरसमुद्भवः ॥ ५ ॥
गुणाः पञ्च समाख्याता दोषाः पञ्च प्रकीर्त्तिताः ।
छायाश्चतस्रो विज्ञेया वज्राणां रत्नकोविदैः ॥ ६ ॥
षट्कोणत्वं लघुत्वं च समस्तदलता तथा ।
तीक्ष्णाग्रता निर्मलतेत्येवं पञ्च गुणाः स्मृताः ॥ ७ ॥
मलो विन्दुस्तथा रेखा त्रासः काकपादं च यत् ।
एते दोषास्समाख्याताः पञ्च वज्रेषु कोविदैः ॥ ८ ॥
श्वेता रक्ता तथा पीता कृष्णा छाया चतुर्विधा ।
विप्रक्षत्रियवैश्यानां शूद्रजातेर्यथाक्रमम् ॥ ९ ॥
गुणयुक्तस्य वज्रस्य विप्रजातेस्तु धारणात् ।
यज्ञैर्दानैस्तपोभिश्च यत्फलं तदवाप्नुयात् ॥ १० ॥
मलं मलिनताख्यं तद्धारणे दंष्ट्रिणो भयम् ।
कोणे व्याधिभयं प्रोक्तं मध्ये वह्निभयं भवेत् ॥ ११ ॥
दोषेषु विन्दुरावर्तः परिवर्ता यवाकृतिः ।
चतुर्धैवं समाख्याता विन्दवो रत्नसंश्रयाः ॥ १२ ॥
रक्तोऽत्र वर्तुलो विन्दुरावर्तस्सव्यवर्तनः ।
संरक्तः परिवर्तस्तु यव एवापसव्यकः ॥ १३ ॥
विन्दुरायुर्धनं हन्यादावर्तो भयमावहेत् ।
परिवर्ताद्भवेद् व्याधिर्यवे तु फलमुच्यते ॥ १४ ॥
स च रक्तस्तथा पीतः श्वेतश्चेति त्रिधा मतः ।
रक्तवर्णो यवः ख्यातो जात्यश्वस्य विनाशकः ॥ १५ ॥
यवे पीते कुलस्यान्तो धनमायुस्सितो हरेत् ।
एवं दोषा गुणाः प्रोक्ता यवविन्दोरशेषतः ॥ १६ ॥
सव्यवक्त्रा शुभा रेखा वामवक्त्राशुभङ्करी ।
भेदभ्रान्तिकरी भिन्ना रेखा शस्त्रभयप्रदा ॥ १७ ॥
पक्षद्वयप्रदृश्या या छेदना सम्प्रकीर्त्तिता ।
रेखा बन्धुविनाशाय जायते वज्रसंश्रिता ॥ १८ ॥
रेखा काकपदाकारा दृश्यते वज्रसंश्रिता ।
सा मृत्युमादिशत्याशु धनं वा सकलं हरेत् ॥ १९ ॥
भग्नाग्रं भग्नधारं च दलहीनं च वर्तुलम् ।
कान्तिहीनं च यद्वज्रं दोषाय न गुणाय तत् ॥ २० ॥
छिन्नं भ्रान्तिकरं त्रासस्सन्त्रासं जनयेत् स्फुटम् ।
एवं दोषा गुणाः प्रोक्ता वज्राणां रत्नकोविदैः ॥ २१ ॥
स्त्रीपुन्नपुंसकमिति त्रिविधा रत्नजातयः ।
वृत्ताः फलकसम्पूर्णास्तेजस्वन्तो महत्तराः ॥ २२ ॥
पुरुषास्ते निबोद्धव्या रेखाविन्दुविवर्जिताः ।
रेखाविन्दुसमायुक्तास्ते सखण्डाश्च योषितः ॥ २३ ॥
त्रिकोणतनवो दीर्घा विज्ञेयास्ते नपुंसकाः ।
स्त्रीपुंनपुंसकं वज्रं योज्यं स्त्रीपुंनपुंसकैः ॥ २४ ॥

व्यत्यासो नैव फलदः पुंवज्रेण विना क्वचित् ।
ऐन्द्रं षडश्रयुक्तं याम्यं सर्पास्यरूपमसितं च ।
कदलीकाण्डनिकाशं वैष्णवमिति सर्पसंस्थानम् ॥ २५ ॥
वारुणमबलागुह्योपमं भवेत्कर्णिकारपुष्पनिभम् ।
शृङ्गाटकसंस्थानं व्याघ्राक्षिनिभं च हौतभुजम् ॥ २६ ॥
वायव्यं च यवोपममशोककुसुमप्रभं समुद्दिष्टम् ।
रक्तं पीतं कपिशं राजन्यानां सितं द्विजातीनाम् ॥ २७ ॥
शैरीषं वैश्यानां शूद्राणां शस्यतेऽसिनिभम् ॥ २८ ॥
इभाहिकिटिमत्स्यानां शीर्षे मुक्ताफलोद्गमः ।
त्वक्सारशुक्तिशङ्खानां गर्भे मुक्ताफलोद्भवः ॥ २९ ॥
धाराधरेषु जायेत मौक्तिकं जलविन्दुभिः ।
दुर्लभं तन्महारत्नं देवैस्तन्नीयते ऽम्बरात् ॥ ३० ॥
गजादिजं सुदुष्प्रापं मौक्तिकं तपसा विना ।
मौक्तिकं शुक्तिजं लभ्यमाकरेषु कलौ नृभिः ॥ ३१ ॥
कुक्कुटाण्डसमं वृत्तं मौक्तिकं निविडं गुरु ।
घनजं भानुसङ्काशं देवयोग्यममानुषम् ॥ ३२ ॥
काम्भोजकुम्भिसंभूतं धात्रीफलनिभं समम् ।
आताम्रपिञ्जरच्छायं मौक्तिकं मन्ददीधिति ॥ ३३ ॥
फणिजं वर्तुलं रम्य नीलच्छायं महाद्युति ।
पुण्यहीना न पश्यन्ति वासुकेः कुलसम्भवम् ॥ ३४ ॥
कोलजं चाङ्कोलनिभं तद्दंष्ट्रासदृशच्छवि ।
अलभ्यं मनुजै रत्नं पुण्यसम्पद्विवर्जितैः ॥ ३५ ॥
गुञ्जाफलसमस्थूलं निविडं मौक्तिकं लघु ।
पाटलीपुष्पसदृशं मत्स्यजं स्यात्सुवर्तुलम् ॥ ३६ ॥
वंशजं शशिसङ्काशं मञ्जालीफलमात्रकम् ।
प्राप्यते वहुभिः पुण्यैस्तद्रक्ष्यं वेदमन्त्रतः ॥ ३७ ॥
पुरुषोत्तमसच्छायं पाञ्चजन्यकुलोद्भवम् ।
कपोताण्डप्रमाणं यच्छान्तं दोषहरं परम् ॥ ३८ ॥
विद्रुमाभलतायुक्तो यस्य पारेऽस्ति पर्वतः ।
शरच्चन्द्रसमाभाससमुत्तुङ्गतरङ्गयुक् ॥ ३९ ॥
यस्य वेलास्त्वुधेश्शुक्ता महामकरसङ्कुला ।
एवं लक्षणसंयुक्ते सागरे मौक्तिकोद्भवः ॥ ४० ॥
सिंहलकपारलौकिकसौराष्ट्रकताम्रपर्णिपारशिकाः ।
कौवेरपाण्ड्यवाटकसंज्ञा मुक्ताकरास्त्वष्टौ ॥ ४१ ॥
वहुसंस्थाना स्निग्धा हंसाभास्सिंहलाश्शिरस्स्थूलाः ।
कृष्णाः श्वेताः पीताश्शर्करकाः पारलौकिका विषमाः ॥ ४२ ॥
न स्थूला नात्यल्पा नवनीतनिभाश्च सौराष्ट्राः ।
ज्योतिष्मन्तश्शुभ्रा गुरवोऽतिमहागुणाश्च पारसिकाः ॥ ४३ ॥
लघुवर्वरा दधिनिभाश्शङ्खनिभाश्च ताम्रपर्णिभवाः ।
विम्बफलविपुटाकृतियुक्ताः ख्यातास्तु पाण्ड्यवाटभवाः ॥ ४४ ॥
अतसीकुसुमश्यामं वैष्णवमैन्द्रं शशाङ्कसङ्काशम् ।
हरितालनिभं वारुणमभ्राभं याम्यदैवतं भवति ॥ ४५ ॥
परिणतदाडिमकलिकागुञ्जाताम्रं च वायुदैवत्यम् ।
निर्धूमानलकमलप्रभकान्तं वह्निदैवत्यम् ॥ ४६ ॥
इति वर्णास्समाख्याता देवताभेदतः क्रमात् ।
शुक्तिजन्मास्त्वुधेर्मध्ये सिंहे चैवारवायके ॥ ४७ ॥
पारशीके मच्छले च भवेन्मुक्ताफलं शुभम् ।
स्वात्यां स्थिते रवौ मेघैर्ये मुक्ता जलविन्दवः ॥ ४८ ॥
ते शुक्तौ पतिता मुक्ता जायन्ते निर्मलत्विषः ।
स्थूला मध्यास्तथा सूक्ष्मा विन्दुमानानुसारतः ॥ ४९ ॥
भवन्ति मुक्तास्तासां च मौल्यं तन्मानमापतः ।
रुग्मिण्याख्या भवेच्छुक्तिस्ततो जातं च मौक्तिलम् ॥ ५० ॥
निर्मलं कुंकुमच्छायं जातीफलसमाकृति ।
अमूल्यं तद्विनिर्दिष्टं रत्नलक्षणवेदिभिः ॥ ५१ ॥
दुर्लभं नृपयोग्यं तत् स्वल्पपुण्यैर्न लभ्यते ।
स्निग्धं सुमधुरच्छायं मौक्तिकं सितमुत्तमम् ॥ ५२ ॥
शुक्तिगर्भसमुत्पन्नं पीतच्छायं सुनिर्मलम् ।
चत्वारस्स्युर्महादोषाः पञ्च मध्याः प्रकीर्त्तिताः ॥ ५३ ॥
मौक्तिकस्य च रत्तस्य नव दोषान् परीक्षयेत् ।
शुक्तिखण्डं च परुषं मत्स्याक्षं चातिरक्तताम् ॥ ५४ ॥
महादोषांश्च चतुरस्त्यजेल्लक्षणविन्मणौ ।
त्रिवृत्तं चर्पटं त्र्यस्रं दीर्घपार्श्वं च यत्कृशम् ॥ ५५ ॥
सामान्याः पञ्च दोषाः स्यू रत्नशास्त्रपरीक्षिणाम् ।
मधुपीतसितत्वं च छाया सा त्रिविधा मता ॥ ५६ ॥
ह्लादि श्वेतं गुरु स्निग्धं रश्मिमन्निर्मलं महत् ।
ख्यातं तोयप्रभं वृत्तं मौक्तिकं नवलक्षणम् ॥ ५७ ॥
मौक्तिकं विशदं वृत्तं सितं श्रीदं सुशीतलम् ।
सदा सुधाकरप्रीतिमावहेद् धारणेन तु ॥ ५८ ॥

रूक्षाङ्गं निर्मलं श्यामं ताम्राभं लवणोपमम् ।
अर्धखण्डं च विकृतं मौक्तिकं ग्रन्थिलं त्यजेत् ॥ ५९ ॥
शंखतिमिवेणुवारणवराहभुजगाभ्रजान्यवेद्यानि ।
अमितगुणत्वाच्चैषामर्थोऽयं शास्त्रनिर्दिष्टः ॥ ६० ॥
शस्तेऽवनिप्रदेशे रजतमये भाजने स्थिते यस्मिन् ।
वर्षति दिवोऽकस्मात् तद्ज्ञेयं नागसम्भूतम् ॥ ६१ ॥
एतानि सर्वाणि महागुणानि सुतार्थसौभाग्ययशस्कराणि ।
संकीर्तितान्येव तु पार्थिवानां मुक्ताफलान्यर्थितकाममानि ॥ ६२ ॥
सिद्धावरणगङ्गायास्सिंहले जन्म कीर्तितम् ।
क्षेत्राणि तस्य चत्वारि माणिक्यस्य बुधा जगुः ॥ ६३ ॥
सिंहलं प्रथमं क्षेत्रं ततः कालपुरं परम् ।
आन्ध्रं तृतीयमादिष्टं चतुर्थं तुम्बुरं स्मृतम् ॥ ६४ ॥
सिंहले तद्भवेद्रक्तं पद्मरागमनुत्तमम् ।
पीतं कालपुरोद्भूतं कुरुविन्दमिति स्मृतम् ॥ ६५ ॥
अशोकपल्लवच्छायमान्ध्रसौगन्धिकं विदुः ।
तुम्बुरे छायया नीलं नीलग्रन्थि प्रकीर्त्तितम् ॥ ६६ ॥
उत्तमं सिंहलोद्भूतं निकृष्टं तुम्बुरोद्भवम् ।
मध्ययोर्मध्यमं ज्ञेयं माणिक्यं क्षेत्रयोगतः ॥ ६७ ॥
माणिक्यस्य समाख्याता अष्टौ दोषा मुनीश्वरैः ।
गुणाश्चत्वार आख्यातारछायाष्षोडश कीर्त्तिताः ॥ ६८ ॥
छायाद्वितयसम्बन्धि द्विच्छायं बन्धुनाशनम् ।
द्विरूपं द्विपदं तेन माणिक्येन पराभवः ॥ ६९ ॥
समेदं भिन्नमित्युक्तं शस्त्रघातभयावहम् ।
कर्करं कर्करायुक्तं पशुबन्धुविनाशकम् ॥ ७० ॥
दुग्धमस्तुसमाकारं लशुनापटमुच्यते ।
अशोभनं तदुद्दिष्टं माणिक्यं मणिकोविदैः ॥ ७१ ॥
मधुबिन्दुसमच्छायं कोमलं परिकीर्त्तितम् ।
आयुर्लक्ष्मीं जयं हन्ति सदोषं तन्न धारयेत् ॥ ७२ ॥
रागहीनं जडं प्रोक्तं धनहान्यापवादकृत् ।
धूम्रं धूमसमाकारं धुत्रं तद्भयमावहेत् ॥ ७३ ॥
ईदृग्दोषयुता निन्द्या मणयो मूल्यवर्जिताः ।
अपि प्राप्ता न ते धार्या गृहे शुभमभीप्सता ॥ ७४ ॥
माणिक्यस्य गुणाः प्रोक्ताश्चात्वारो मुनिपुङ्गवैः ।
स्निग्धच्छाया गुरुत्वं च नैर्मल्यमतिरक्तता ॥ ७५ ॥
कुशेशयदलच्छायं स्वच्छं स्निग्धं गुरुस्फुटम् ।
वृत्तायतप्रमाणं च माणिक्यं श्रेष्ठमुच्यते ॥ ७६ ॥

लाक्षारससनिभं चैव हिंगुलीकुंकुमप्रभम् ।
ईषन्नीलं च रक्तं च ज्ञेयं सौगन्धिकं बुधैः ॥ ७७ ॥
भ्रमरशिखिशिखण्डवर्णो दीपशिखासुप्रभा भुजङ्गानाम् ।
भवति मणिः किल मूर्धनि नित्यं धार्यस्स विज्ञेयः ॥ ७८ ॥
यस्तं बिभर्ति मनुजाधिपतिर्न तस्य
दोषा भवन्ति विषरोगकृताः कदाचित् ।
राष्ट्रे च नित्यमभिवर्षति तस्य देव-
श्शत्रुविनाशमुपयाति मणिप्रभावात् ॥ ७९ ॥
ब्राह्मणः पद्मरागः स्याज्जातरङ्ग इतीरितः ।
क्षत्रियः कुरुविन्दाख्यो वैश्यसौगन्धिकः स्मृतः ॥ ८० ॥
गवाङ्गो नीलगन्धी च शूद्रस्तूभयनामवान् ।
अस्याश्छाया दशविधा द्वितीयस्याष्टधा स्मृता ॥ ८१ ॥
तृतीयस्य च षोढा स्यात्तुरीयस्य चतुर्विधा ।
पद्मकल्हारखद्योतदहनान्यमृताक्षिभिः ॥ ८२ ॥
दीपदाडिमबीजार्कदाडिमी प्रसवैरपि ।
इन्द्रगोपैश्च तुल्याः स्युश्छायाः प्रथमवर्णजाः ॥ ८३ ॥
लोध्रकिंशुकबन्धूकजपाकुसुमसन्निभम् ।
गुञ्जाशशासृक्सिन्दूरतप्तलोहाभमष्टधा ॥ ८४ ॥
लाक्षारसः कोकिलदृक्छाल्मली सप्तपर्णयोः ।
प्रसूनं तप्तलोहश्च षष्ठं चाशोकपल्लवम् ॥ ८५ ॥
छाया जातेस्तुरीयस्याश्चतुर्धा सातु कथ्यते ।
कुसुम्भकुसुमेनापि पक्वबिम्बफलेन च ॥ ८६ ॥
तथाकुरवपुष्पेण धातुना च समास्स्मृताः ।
लघु वज्रं प्रशंसन्ति गुरुत्वं पद्मरागके ॥ ८७ ॥
ऊर्ध्वरश्मिरधोरश्मिः पार्श्वरश्मिरिति क्रमात् ।
पद्मरागास्तु विज्ञेया उत्तमाधममध्यमाः ॥ ८८ ॥
1) गोभूमिविद्याकन्यानां दातुर्वाजिमखस्य च ।
कर्तुश्च पुण्यमाप्नोति जातरङ्गस्य धारणात् ॥ ८९ ॥
धारयेत्कुरुविन्दं यस्स सम्राड् भवति ध्रुवम् ।
यस्तु सौगन्धिकं धत्ते सम्पदा यशसाधिकः ॥ ९० ॥
गवाङ्गं धारयेद्यस्तु क्षीरसस्यसमृद्धिमान् ।
सर्वलक्षणसम्पूर्णे पद्मरागे गृहे स्थिते ॥ ९१ ॥
अश्वमेधफलं तस्य वित्तमायुर्जयो भवेत् ।
कामपात्रे बीजपूररसे सप्तदिनावधि ॥ ९२ ॥

1) गोभूकन्याज्ञानदातुरश्वमेधेन याजिनः.

अधिवासेन माणिक्ये वर्णोत्कर्षः प्रजायते ।
नीलं तु द्विविधं प्रोक्तं रत्नसिद्धान्तशासने ॥ ९३ ॥
जलनीलेन्द्रनीले च शक्रनीलं तयोर्वरम् ।
श्वेतगर्भितनीलाभं लघु तज्जलनीलकम् ॥ ९४ ॥
कार्ष्ण्यगर्भितनीलाभं सुगात्रं शक्रनीलकम् ।
इन्द्रनीलस्य सम्भूतिस्सिंहलद्वीपमध्यतः ॥ ९५ ॥
सिद्धावरणगङ्गायाः कूले पद्माकरान्तरे ।
सितच्छायो भवेद्विप्रस्ताम्रः क्षत्रियजातिमान् ॥ ९६ ॥
पीतस्तु वैश्यजातीयोऽवृषलः कृष्णदीधितिः ।
दोषांस्तस्य प्रवक्ष्यामि नामभिर्लक्षणैश्च षट् ॥ ९७ ॥
गुणांश्च कथयिष्यामि पञ्च चाष्टविधां छविम् ।
अभ्रवत्पटलं यत्तु तदभ्रममितद्युति ॥ ९८ ॥
धारणं तस्य सम्पत्तिमायुश्चैव समं हरेत् ।
शर्करामिश्रितं यत्तु तद्विज्ञेयं सशर्करम् ॥ ९९ ॥
तस्मिन् धृते शरीरार्तिर्दैशत्यागश्च जायते ।
भेदसंशयकृद्यत्तु तेन दंष्ट्रिभयं भवेत् ॥ १०० ॥
भिन्नं भिन्नमिति ज्ञेयं धर्तुर्भार्यां विनाशयेत् ।
मृत्तिका यस्य गर्भस्था लक्ष्यते रत्नकोविदैः ॥ १०१ ॥
मृत्तिकागर्भकं नाम तद्दोषजनकं भवेत् ।
दृषत् प्रत्यक् पतेद्यस्य गर्भे नीलस्य कोविदैः ॥ १०२ ॥
अश्मगर्भं तदाख्यातं [1] तद्वर्णपरिभूतिकृत् ।
गुरुत्वं स्निग्धकान्तित्वं सुरागं पार्श्वरञ्जनम् ॥ १०३ ॥
तृणग्राहित्वमित्येते गुणाः पञ्च प्रकीर्त्तिताः ।
नीलीरससमा भासा वैष्णवीपुष्पसन्निभा ॥ १०४ ॥
लवलीपुष्पसङ्काशा नीलेन्दीवरसप्रभा ।
अतसीपुष्पसङ्काशा चाषपक्षसमद्युतिः ॥ १०५ ॥
कृष्णागकर्णिकापुष्पसमानद्युतिधारिणी ।
मयूरकण्ठसच्छायेत्येवं छायाष्टधा स्मृता ॥ १०६ ॥
दोषैस्त्यक्तो गुणैर्युक्त इन्द्रनीलो महामणिः ।
यस्य हस्ते वशे तस्य वित्तमायुर्बलं यशः ॥ १०७ ॥
एकच्छायं गुरु स्निग्धं स्वच्छं पिण्डितविग्रहम् ।
मृदु मध्योल्लसज्जोतिस्सप्तधा नीलमुत्तमम् ॥ १०८ ॥
कोमलं निहतं वर्णं सिर्भारं रक्तगन्धि च ।
चपिटाभं वरूक्षं च जलनीलं च सप्तधा ॥ १०९ ॥

1) वर्णधिक्कारहेतुकम्.

यस्य मध्यगता भाति नीलस्येन्द्रायुधप्रभा ।
तदिन्द्रनीलमित्याहुर्महार्घं भुवि दुर्लभम् ॥ ११० ॥
यस्य वर्णस्य भूरित्वात् क्षीरं शतगुणाधिकं ।
नीलस्याञ्जनशोभा स्यात् स महानील उच्यते ॥ १११ ॥
इन्द्रनीले धृते सौरिर्मुदितस्सततं भवेत् ।
आयुश्च महतीं लक्ष्मीमारोग्यं च प्रयच्छति ॥ ११२ ॥
नीलीरसे वीजपूररसमिश्रे निवेशिते ।
कांस्यपात्रे तु नीलस्य वर्णोत्कर्षः प्रजायते ॥ ११३ ॥
तुरुष्कविषयाम्भोधेस्समीपे विषमस्थले ।
भवेन्मरकतं रत्नं गुणो दोषोऽस्य कथ्यते ॥ ११४ ॥
दोषास्सप्त भवन्त्यस्य गुणाः पञ्चस्मृतास्तथा ।
भवेदष्टविधा छाया गुणैर्मरकतस्य हि ॥ ११५ ॥
अस्निग्धं रुक्षमित्युक्तं व्याधिस्तस्मिन् धृते भवेत् ।
सस्फोटं स्यात्तु पिटकं व्याधिस्तस्मिन् धृते भवेत् ॥ ११६ ॥
सपाषाणे भवेद्बन्धुनाशो मरकते धृते ।
विच्छायं मलिनं प्राहुर्वाधिर्यं तेन जायते ॥ ११७ ॥
कर्कशं शर्करायुक्तं पुत्रशोककरं ध्रुवम् ।
जठरं कान्तिहीनं स्याद् दंष्ट्रिवह्निभयापहम् ॥ ११८ ॥
कश्मलवर्णं शवलं ततो मृत्युभयं भवेत् ।
इति दोषास्समाख्याता वर्ण्यन्ते साम्प्रतं गुणाः ॥ ११९ ॥
निर्मलं कथितं त्वच्छं गुरु स्याद् गुरुतायुतम् ।
स्निग्धं रौक्ष्यं विनिर्मुक्तमरजस्कमरेणुकम् ॥ १२० ॥
सुरागं रागवहुलमिति पञ्च गुणाः स्मृताः ।
केकपिञ्छसमा भासा चाषपक्षसमप्रभा ॥ १२१ ॥
हरितालनिभा चान्या तथा शैवालसन्निभा ।
खद्योतपृष्ठसङ्काशा बालकीरगरुत्समा ॥ १२२ ॥
नवशाद्वलसच्छाया शिरीषकुसुमोपमा
एवमष्टौ समाख्याताश्छाया मरकताश्रयाः । ॥ १२३ ॥
छायाभिर्युक्तमेताभिश्श्रेष्ठं मरकतं भवेत्
कृत्वा करतले चैव भास्कराभिमुखं धृतम् ॥ १२४ ॥
रञ्जयेदात्मपार्श्वं यन्महामरकतं मतम् ।
पद्मरागस्य नीलस्य ये दोषाः परिकीर्त्तिताः ॥ १२५ ॥
तैरेव दूषितं रत्नं त्याज्यं मरकतं नृपैः ।
इति गुणगणयुक्तं दोषसङ्घैर्विहीनं

1) मरकतमवनीन्द्रो धारयेद्रत्नमेकम् ।
जयति रिपुमहीपानाहवे मध्यवर्ती
नयति मुदमुदग्रां शीतधाम्नस्तनूजात् ॥ १२६ ॥
वज्रं च जलबिन्दुश्च पद्मरागेन्द्रनीलके ।
गारुत्मतेन संयुक्तं स्यान्महारत्नपञ्चकम् ॥ १२७ ॥
पुष्परागं च वैडूर्यं गोमेधस्फटिके तथा ।
पञ्चोपरत्नान्येतेषां प्रवालं पञ्चमं स्मृतम् ॥ १२८ ॥
हिमालये सिंहले च विन्ध्ये वापीतटे तथा ।
स्फटिकं जायते रत्नं नानारत्नसमुद्भवम् ॥ १२९ ॥
हिमाद्रौ हिमसङ्काशं स्वच्छकान्तियुतं भवेत् ।
सूर्यकान्तं चन्द्रकान्तं ताराकान्तं तथापरम् ॥ १३० ॥
सूर्यांशुस्पर्शमात्रेण वह्निं वमति यत् क्षणात् ।
सूर्यकान्तं समाख्यातं दुर्लभं तत् कलौ युगे ॥ १३१ ॥
स्वच्छं स्निग्धं गुरु श्वेतं शर्करापरिवर्जितं ।
शीतलं च विदोषं च ताराकान्तमुदीरितम् ॥ १३२ ॥
अशोकपल्लवच्छायं दाडिमीबीजसन्निभम् ।
विन्ध्ये वापीतटोद्देशे जायते मन्दकान्तिकम् ॥ १३३ ॥
सिंहले जायते कृष्णमाकरे नीलगन्धिके ।
पद्मरागोद्भवस्थाने विविधं स्फटिकं भवेत् ॥ १३४ ॥
ईषत्पीतं च सुच्छायं स्वच्छं कान्त्या मनोहरम् ।
पुष्परागमिति ख्यातं रत्नं रत्नपरीक्षकैः ॥ १३५ ॥
कर्णिकारप्रसूनाभं मसृणं शुभमष्टधा ।
निष्प्रभं कर्कशं रूक्षं वीतश्यामं विवर्णकम् ॥ १३६ ॥
कपिलं हरितं पाण्डु पुष्परागं परित्यजेत् ।
बृहस्पतिर्भवेत्तुष्टः पुष्परागस्य धारणात् ॥ १३७ ॥
गोमेदलक्षणं वक्ष्ये तद्गुणानपि संश्रृणु ।
गोमेदसमरागत्वाद् गोमेदं रत्नमुच्यते ॥ १३८ ॥
सुस्वच्छगोलकच्छायं स्वच्छं स्निग्धं समं गुरु ।
निर्दलं मसृणं दीप्तं शस्तं गोमेदमष्टधा ॥ १३९ ॥
विच्छायं लघु रूक्षं च चिपिटं पटलान्वितम् ।
निष्प्रभं पीतकाचाभं गोमेदं न शुभावहम् ॥ १४० ॥
गोमेदं दोषरहितं शुभं लक्षणसंयुतम् ।
तद्रत्नधारणात् पुंसां पावित्र्यं पापनाशनम् ॥ १४१ ॥
पूर्वरत्नवदत्रापि ज्ञेयं जातिचतुष्टयम् ।
वैडूर्यलक्षणं वक्ष्ये क्रमाद्दोषान् गुणानपि ॥ १४२ ॥

वैडूर्यं श्यामशुभ्राभं समं स्वच्छं गुरु स्फुटम् ।
भ्रमच्छुभ्रोत्तरीयेण गर्भितं शुभमुच्यते ॥ १४३ ॥
श्यामं तोयसमच्छायं चिपिटं लघु कर्कशम् ।
सत्रगर्भोत्तरीयं च वैडूर्यं न प्रशस्यते ॥ १४४ ॥
जीवरत्नाभिधस्यास्य लक्षणं सुमनोहरम् ।
वृत्तिं गात्रं गुणान् दोषान् कथयामि स्वरूपतः ॥ १४५ ॥
नवमेघोदयारम्भे विदूरधरणीतले ।
उद्भिद्य जायते रत्नं खद्योतइव सुप्रभम् ॥ १४६ ॥
अन्यत्र पीतरत्नानि तन्नामानि भवन्ति हि ।
दोषाश्चैकादश प्रोक्तास्सूत्राण्यत्र त्रयोदश ॥ १४७ ॥
पञ्च वर्णा गुणाष्षट् च कथयामि पृथक् पृथक् ।
पीतं रक्तं सितं श्याममिति वर्णचतुष्टयम् ॥ १४८ ॥
जातिक्रमेण विज्ञेयं पञ्चमं मधुबिन्दुवत् ।
उत्तमं हेमवर्णं च मध्यं गोमेदकच्छवि ॥ १४९ ॥
अधमं सितवर्णं च कृष्णं स्यादधमाधमम् ।
दर्पणोपरि संस्थाप्य प्रादक्षिण्यक्रमेण तु ॥ १५० ॥
सम्मुखं जायते यत्तु ब्रह्मसूत्रं तदुच्यते ।
एकं द्वे त्रीणि चत्वारि पञ्च षड्वा बहूनि वा ॥ १५१ ॥
सूत्राण्यत्र भवन्त्येव द्वे त्रीणि च शुभानिवै ।
चत्वारि पञ्च सूत्राणि मध्यमानि बहूनि च ॥ १५२ ॥
अर्धसूत्रं पार्श्वसूत्रं पृष्ठसूत्रं विकीर्णकम् ।
गर्भसूत्रं धूमसूत्रं षट् सूत्राण्यधमानि वै ॥ १५३ ॥
रौक्ष्यं कार्कश्यमालिन्यं निष्प्रभत्वं च लाघवम् ।
चिपिटं त्रासि हीनाङ्गं शर्कराकोमलच्छवि ॥ १५४ ॥
सुप्तगर्भोत्तरीयं च दोषा एकादश स्मृताः ।
निर्मलत्वं गुरुत्वं च पीनत्वं स्निग्धता तथा ॥ १५५ ॥
तिर्यग्भ्रमस्त्रिरेखा च गर्भवर्तिस्समुज्ज्वला ।
रत्नमानस्सुसूक्ष्मत्वं वैडूर्यस्योत्तमा गुणाः ॥ १५६ ॥
दक्षप्रसृतजीवं स्याद्वैडूर्यं ब्राह्मणाह्वयम् ।
सव्यप्रसृतजीवं तु वैडूर्यं क्षत्रमुच्यते ॥ १५७ ॥
पश्चात्प्रसर्पिजीवं तु वैडूर्यं तद्विशो मतम् ।
प्राचीविसर्पिजीवं तु वैडूर्यं शूद्रमुच्यते ॥ १५८ ॥
नित्यमेतानि पूज्यानि मतिमान् धारयेन्नृपः ।
भूतप्रेतपिशाचादिभयं तस्य न विद्यते ॥ १५९ ॥
सेतौ सागरमध्ये तु जायते वल्लरी तु या ।
विद्रुमाख्या समाख्याता पृथ्वीपादप्रदेशके ॥ १६० ॥

1) मरकतमवनीन्द्रैर्धार्यमेकं सुकान्ति.

सागरस्य च वेलायां संभवन्त्यरुणारुणाः ।
पाषाणत्वं भजत्येषा प्रयत्नात् खण्डिता सती ॥ १६१ ॥
प्रवालं नाम तद्रत्नं वर्णाढ्यं रक्तकान्तिकम् ।
पक्वबिम्बफलच्छायं वृत्तायतमवक्रकम् ॥ १६२ ॥
स्निग्धमव्रणकं स्थूलं प्रवालं सप्तधा शुभम् ।
पाण्डरं धूसरं रूक्षमवृत्तं कोटरान्वितम् ॥ १६३ ॥
निर्भरं शुभ्रवर्णं च प्रवालं सप्तधा त्यजेत् ।
क्षयपित्तास्रकासघ्नं दीपनं पाचनं लघु ॥ १६४ ॥
विषभूतादिशमनं विद्रुमं नेत्ररोगहृत् ।
धारयेत्तत्सुखायुष्यपुत्रारोग्यप्रसिद्धये ॥ १६५ ॥
रत्नानां रूपसाम्यं तु धूर्ताः कुर्वन्ति यत्नतः ।
तेषां परीक्षां वक्ष्यामि प्रोक्तां रत्नविचक्षणैः ॥ १६६ ॥
वज्रेण भेदयेद्वज्रं कृत्रिमं चेद्विभिद्यते ।
कृत्रिमं मौक्तिकं चैव क्षालयेल्लवणाम्भसा ॥ १६७ ॥
माणिक्यादीनि रत्नानि घर्षणात्तोदनादपि ।
शोधयेद्रत्नवित्प्राज्ञः कृत्रिमं शुद्धमेव च ॥ १६८ ॥
शुद्धानि दीप्तिं दधति कृत्रिमं न प्रकाशते ।
मार्दवं दृश्यते घृष्टौ ज्ञेयं तत्कृत्रिमं बुधैः ॥ १६९ ॥
वारक्रमेण वीक्षेत माणिक्यादीन् मणीनथ ।
रविवारे तु माणिक्यं सोमवारे तु मौक्तिकम् ॥ १७० ॥
विद्रुमं भौमवारे तु सौम्ये मरकतं तथा ।
पुष्यरागं गुरोर्वारे वज्रं वारे भृगोरपि ॥ १७१ ॥
नीलं रविभुवो वार इति वीक्षाविनिर्णयः ।
पद्मं जातिप्रसूनं च रक्तकैरवमेव च ॥ १७२ ॥
शिलीध्रं मालतीपुष्पं शतपत्रप्रसूनकम् ।
कालासं चैव कल्हारं श्वेतमन्दारमेव च ॥ १७३ ॥
वीक्षको धारयेन्मूर्ध्ना शुचिर्धर्मपरायणः ।
शुद्धवस्त्रावृतं पीतं शुद्धदेशे निधाय च ॥ १७४ ॥
माणिक्यादीनि रत्नानि मण्डलाकारतो न्यसेत् ।
मध्ये तु पद्मरागं च मुक्तादीनि यथाक्रमम् ॥ १७५ ॥
पूर्वादिदिक्षु विन्यस्य तत्र तत्र समर्चयेत् ।
आदित्यादिग्रहान्नित्यं तत्तत्पुष्पैर्यथाक्रमम् ॥ १७६ ॥
आदित्यस्य तु पद्मरागममलं मुक्ताफलं शीतगो-
र्महियस्य तु विद्रुमं मरकतं सौम्यस्य गारुत्मतम् ।
देवेज्यस्य च पुष्यरागमसुरामात्यस्य वज्रं शने-
र्नीलं निर्मलमन्ययोश्च गदिते गोमेदवैडूर्यके ॥ १७७ ॥
ग्रहाणां प्रीतये कार्या तत्तद्रत्नैस्तु मुद्रिका ।
माणिक्यं मध्यतः प्राक्कुलिशमणिरथाग्नेयभागे च मुक्ता
याम्ये चापि प्रवालं निशिचरदिशि गोमेदकं नीलरत्नम् ।
वारुण्यां पुष्यरागं वरमनिलदिशि स्यादुदीच्यां विदूरो-
त्पन्नं गारुत्मतं चेश्वरदिशि च यथा मुद्रिका सा ग्रहाख्या ॥ १७८ ॥
रत्नानां विक्रये सङ्ख्यां विद्यादंगुलिसंख्यया ।
एकद्वित्रिचतुस्संज्ञास्तर्जन्याद्यङ्गुलीग्रहे ॥ १७९ ॥
सांगुष्ठानां पुनस्तासां ग्रहणे पञ्चसंज्ञकाः ।
कनिष्ठादितलस्पर्शे षट् सप्ताष्टौ नव क्रमात् ॥ १८० ॥
तर्जन्यां दश विज्ञेयास्तदादीनां नखाहतौ ।
एकद्वित्रिचतुर्युक्ता दश ज्ञेया यथाक्रमम् ॥ १८१ ॥
हस्तान्यस्ततलस्पर्शे पुनः पञ्चदश स्मृताः ।
तले कनिष्ठिकादीनां षट् सप्ताष्टनवाधिकाः ॥ १८२ ॥
क्रमशो दश विज्ञेया हस्तसंज्ञाविशारदैः ।
तर्जन्यादिद्वित्रिचतुःपञ्चग्राहे यथाक्रमम् ॥ १८३ ॥
विंशत्रिंशच्च चत्वारिंशत्पञ्चाशत्प्रकल्पना ।
कनिष्ठाद्यङ्गुलितलैः षष्टिसप्तत्यशीतयः ॥ १८४ ॥
नवतिश्च क्रमाद् ज्ञेया स्तर्जन्यर्धग्रहे शतम् ।
सहस्रमयुतं लक्षं प्रयुतं चात्र विश्रुतम् ॥ १८५ ॥
मणिबन्धे पुनः कोटिं हस्तसंज्ञाविदो विदुः ।
अनया संज्ञया रत्नविक्रयं कारयेद्वणिक् ॥ १८६ ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
भूषणोपभोगे रत्नस्वरूपवर्णनं नाम सप्तदशस्तरङ्गः ।

अथाष्टादशस्तरंगः

स्वामिन्! भूषणमाल्याद्यानुपभोगान् प्रकीर्त्तितान् ।
आकर्ण्य विस्मयानन्दमन्थरं मामकं मनः ॥ १ ॥

अधुना कथयान्नस्य भोगं सर्वजगद्धितम् ।
षड्विधैश्च रसैर्यत्तु स्वरूपेण मनोहरैः ॥ २ ॥

यदेव सर्वजगतां प्रभवेत्तृप्तिकारणम् ।
तस्य भेदं तथान्नस्य ब्रूमस्तेऽवहितः शृणु ॥ ३ ॥

अन्नभोगोऽयमधुना हृद्यो रुच्यो निगद्यते ।
तत्रादौ पाकशालादिसाधनानि प्रचक्ष्महे ॥ ४ ॥

द्वात्रिंशद्धस्तविस्तारा व्यायामे चाष्टहस्तिका ।
पाकशाला प्रकर्तव्या धूमनिर्गमनान्विता ॥ ५ ॥

पूर्वभागे तु तत्रान्तश्चुल्लीं संस्थापयेद् बुधः ।
चुल्लीं गोपुच्छसद्रूपां लोहेष्टकमयीं तथा ॥ ६ ॥

अथवा मृण्मयीं कुर्याच्चुल्लीं लक्षणसंयुताम् ।
चुल्या उपरि च छिद्रं कारयेन्नवसंख्यया ॥ ७ ॥

आग्नेयेऽग्निं च संस्थाप्य याम्ये काष्ठं तु निक्षिपेत् ।
नैर्ऋते कल्पनी स्थाप्या वारुणे जलकुम्भकम् ॥ ८ ॥

उलूखलं च वायव्ये कौबेरे शूर्पमार्जनी ।
ऐशे मुसलपेषिण्यौ शाकं तत्रैव शोधयेत् ॥ ९ ॥

भाण्डं च पूर्वदिग्भागे क्रम एवमुदीरितः ।
ताम्रपात्रे पचेदन्नं वातघ्नं गुल्मशूलहृत् ॥ १० ॥

किञ्चित्पित्तकरं सौख्यं योगिनां परमं हितम् ।
लोहपात्रे पक्वमन्नं पाण्डुक्षयविनाशनम् ॥ ११ ॥

कांस्यपात्रे पक्वमन्नं त्रिदोषघ्नं रसायनम् ।
पचेद्यदन्नं कनकस्य पात्रे विषघ्नमामक्षयपाण्डुहारि ।
वीर्यप्रदं प्राणकरं च वृष्यं वातादिरोगान् विनिहन्ति सद्यः

रूप्यपात्रे पचेदन्नं श्लेष्मपित्तामयापहम् ।
कलायलेपिते पात्रे पचेदन्नं सुशीतलम् ॥ १३ ॥

मृण्मये भाजने पक्वं शीतलं पित्तनाशनम् ।
रक्तप्रसादं [1]त्वग्दोषविसर्पिव्रणनाशकम् ॥ १४ ॥

जांगलस्थलसंभूतमृत्स्नाभाण्डेषु पाचितम् ।
दीपनं च बलं चैव सुखसौभाग्यमावहेत् ॥ १५ ॥

अनूपमृत्स्नापात्रेषु पाचितं गुरु शीतलम् ।
रक्तपित्तहरं रुच्यं कफपीनसनाशनम् ॥ १६ ॥

देशे साधारणे मृत्स्ना बलवर्णकरी परा ।
श्वेतमृत्स्नामये पात्रे पाचितं पित्तदाहजित् ॥ १७ ॥

कृष्णमृत्स्नामये पात्रे क्षयपाण्डुनिवारणम् ।
मृण्मये गौरवर्णे च पाचितं चान्नमुत्तमम् ॥ १८ ॥

दर्वी हस्तसमायामा द्वादशांगुलमुन्नता ।
त्र्यंगुलं दर्विकाग्रे तु रजतस्वर्णलोहजा ॥ १९ ॥

नारिकेलास्थिभिर्वापि दर्वी दारुभिरेववा ।
उलूखलं चतुर्हस्तं दीर्घविस्तारभेदतः ॥ २० ॥

चतुरस्रप्रमाणं तदायामे नेत्रहस्तकम् ।
अंगुलीनां चतुष्कं तु वलयं तत्र कल्पयेत् ॥ २१ ॥

षोडशांगुलदीर्घं तथायामेऽङ्गुलसप्तकम् ।
उलूखलस्य मध्ये तु विवरं परिकल्पयेत् ॥ २२ ॥

गजकर्णसमाकारं शूर्पमित्युच्यते बुधैः ।
जालिनीत्युच्यते तत्र तुषपाषाणवारिणी ॥ २३ ॥

मध्ये सूक्ष्मैश्च विवरैस्संयुता वेणुनिर्मिता ।
एवं पाके साधनानां स्वरूपं परिकीर्त्तितम् ॥ २४ ॥

सूदस्य लक्षणं तावद्वक्ष्ये संक्षेपतः शृणु ।
स्वदेशसंभवः प्राज्ञो विशिष्टकुलसंभवः ॥ २५ ॥

सदाचारसमायुक्तः [2]स्वदारानिरतश्शुचिः ।
रागद्वेषविनिर्मुक्तो धर्माधर्मविभागवित् ॥ २६ ॥

धातुज्ञो देशकालज्ञो वयोऽवस्थाविशेषवित् ।
प्रक्षाल्य पाणिचरणं कृतदेशप्रसाधनः ॥ २७ ॥

---

1) वाग्दोष. 2) परदारपराङ्मुखः

संपूर्णकामो हृष्टात्मा पाकं रुच्यं समाचरेत् ।
रक्तशालिर्महाशालिर्गन्धशालिः कलिंगकः ॥ २८ ॥
मुण्डशालिस्स्थूलशालिस्सूक्ष्मशालिश्च षाष्टिकः ।
रक्तत्वग्रक्तशालिः स्यान्महाशालिर्महाकृतिः ॥ २९ ॥
सुगन्धो गन्धशालिः स्यात्कलिंगोत्थः कलिंगकः ।
शूकशून्यो मुण्डशालिः स्थूलशालिस्तदाकृतिः ॥ ३० ॥
सूक्ष्मस्तु सूक्ष्मशालिः स्याद्द्विमासष्षाष्टिकः स्मृतः ।
एतान् शालीन् पृथक् सर्वान् मुसलैर्वितुषीकृतान् ॥ ३१ ॥
निक्षिप्य तण्डुलान् पट्टे विसृजेत्कणकांस्ततः
पाषाणमृत्तिकाशालितृणपर्णतुषांस्तथा ॥ ३२ ॥
एतान् विमृश्यापनयेद्वारिभिस्तण्डुलास्थितान् ।
अखण्डान् पोथितानेवं क्षालितान् बहुशो जलैः ॥ ३३ ॥
तण्डुलान् कुन्दसंकाशांस्तोयान्तर्धारितांश्चिरम् ।
स्थाल्यां स्वर्णकृतायां वा मृज्जातायामथापिवा ॥ ३४ ॥
तण्डुलात्रिगुणं तोयं निक्षिप्य च विधानतः ।
वाससा शशिशुभ्रेण धौतेन च घनेन च ॥ ३५ ॥
चुल्ल्यां निधाय निर्धूमे वह्नौ [1] तत्क्वाथयेत्ततः ।
सुतप्ते बुद्बुदोपेते स्वबाष्पसमान्विते ॥ ३६ ॥
तण्डुलानावपेत् स्थाल्यां दर्व्या च परिकल्कयेत् ।
सिक्थं विमृज्य वीक्षेत वारं वारं विचक्षणः ॥ ३७ ॥
मृदुभूते च तत्सिक्थे किञ्चिद्वा कणगर्भिते ।
तत्र दुग्धं घृतं वापि निक्षिप्योत्तारयेत्ततः ॥ ३८ ॥
स्थाल्यास्ये पिटकं दत्वा मण्डमास्रावयेद् द्रुतम् ।
ईषदुद्वर्तितं मण्डमुष्मणा परिशोषयेत् ।
एवं भक्तं सुपक्वं यद्राजयोग्यं तदुच्यते ॥ ३९ ॥
दोषाष्टकेन रहितमाहरेदन्नमुत्तमम् ।
(अन्नमाश्रित्य तिष्ठन्ति दोषास्सर्वे महीतले
तस्मादन्नं प्रयत्नेन लभेतापापविद्धकम्)
एतेऽन्नमाश्रिता दोषा अनृतः पिच्छिलोऽशुचिः ॥ ४० ॥
क्वथितः शुष्कितो दग्धो विरूपो वर्तुजस्तथा ।
स्वरूपं लक्षणं चैषां गुणश्चैव निगद्यते ॥ ४१ ॥

अस्रावीति यवागूकमन्नमस्तुतमुच्यते ।
तद्भक्तं भुज्यते येन तस्य चामादिरुग्भवेत् ॥ ४२ ॥
अन्नमाश्रयते जीर्णमातिपाकेन पिच्छिलम् ।
तद्भक्तं भुज्यते येन तं त्यजेदौरसोऽनलः ॥ ४३ ॥
क्रिमिकीटादिसंयुक्तं यदन्नमशुचि स्मृतम् ।
तद्भक्षणे स्यादरुचिर्लाला स्रवति नित्यशः ॥ ४४ ॥
ईषत्तण्डुलमिश्रं यत्क्वथितं परिकीर्त्तितम् ।
आत्ध्मादिदोषकृत्तस्य कायस्थं तस्ययद्भवेत् ॥ ४५ ॥
यत्कालविरहादन्नं शुष्कितं परिकीर्त्तितम् ।
भक्षितं येन तत्तस्य वीद्रधिर्भवति ध्रुवम् ॥ ४६ ॥
अतिपावकसंयोगाद् दग्धो भवति चौदनः ।
भक्षितस्स च कुक्षिस्थस्सकुर्याद्धातुशोषणम ॥ ४७ ॥
ओदनं च विरूपाख्यं पाकादक्षुण्णतण्डुलात् ।
कुक्षिस्थं यस्य तद्भक्तं हन्ति पुंसस्तथायुषम् ॥ ४८ ॥
अनर्तुजाभिधानं यदन्नं पर्युषितं भवेत् ।
निद्राशीतादिदोषाः स्युर्भक्षकस्य नरस्य च ॥ ४९ ॥
एते चान्नाश्रिता दोषा मया सम्यक् प्रदर्शिताः ।
एभिर्दोषैर्विहीनं यत्तदन्नं हि नृपोचितम् ॥ ५० ॥
(योऽदत्वातिथिभिक्षुभ्योऽन्नमश्नाति मानवः
विफलं तस्य तत्सर्वं धनरत्नादिकं च यत् ।
प्रत्याचक्षीत नैवान्नं सदा न परिभावयेत्)
राजमुद्गास्त्वचापेता निष्पावाश्चणका अपि ।
कृष्णाढकास्तथा माषा मसूरा राजमाषकाः ॥ ५१ ॥
सूपकर्मणि सस्तैते नियोज्यास्सूपकारकैः ।
दलितादलिताश्चैते पचनीया यथारुचि ॥ ५२ ॥
चणका राजमाषाश्च मसूरा माषमुद्गकाः ।
घरट्टैर्दलिताः कार्याः पाकार्थं हि विचक्षणैः ॥ ५३ ॥
किञ्चिद्भृष्टास्तथाढक्यो यन्त्रकैश्च द्विधा कृताः ।
मुसलैर्घट्टितास्सम्यक् शूर्पके वितुषीकृताः ॥ ५४ ॥
स्थाल्यां शीतोदकं दत्वा द्विदलैस्सममानतः ।
आवपेद् द्विदलान् पश्चाच्चुल्ल्यामारोपयेत्ततः ॥ ५५ ॥

[1] क्वाथयेज्जलम्.

मृद्वग्निपच्यमानेषु हिंगुतोयं विनिक्षिपेत् ।
वर्णार्थं रञ्जनीचूर्णं किञ्चित्तत्र नियोजयेत् ॥ ५६ ॥
मुहुर्मुहुः क्षिपेत्तोयं यावत्पाकस्य पूर्णता ।
सुश्लक्ष्णं सैन्धवं चूर्णं विंशत्यंशेन निक्षिपेत् ॥ ५७ ॥
वर्णतः स्वादुतो गन्धान्मार्दवाल्लाघवादपि ।
एवं द्विदलपाकस्य सम्यक् कृतिरुदाहृता ॥ ५८ ॥
निष्पावमेचकाढक्यो हिंगुना परिवर्जिताः ।
अभिन्नाः पूर्ववत्पाच्या हरिद्राचूर्णकं विना ॥ ५९ ॥
मसूरमाषपाकेषु हिंगुतोयं विनिक्षिपेत् ।
इतरान् पूर्ववत्कुर्युः पाकान् पाकविशारदाः ॥ ६० ॥
फलशाकः पत्रशाकः कन्दशाकश्च मूलकः ।
पुष्पशाकश्शम्बिशाकः पक्वापक्वविभेदतः ॥ ६१ ॥
योगान् वदामि शाकानां तत्तद्दोषनिवारकान् ।
अमृताख्यलतायाश्च दोषहृत्कदलीदलम् ॥ ६२ ॥
लशुनश्च पलाण्डुश्च निष्पावदलसंयुतः ।
शतावर्या बदरिका बदर्या अपि काञ्जकम् ॥ ६३ ॥
अर्कस्य तिलपत्राणि कुमार्यास्स्नुहिभस्मकम् ।
स्नुह्या निष्पावपत्राणि ताम्बूली सूरणस्य च ॥ ६४ ॥
निम्बपत्रस्य वकुलमूलं दोषहरं भवेत् ।
ईरितं तु कुबेराक्षिवीजतत्पर्णयोः क्रमात् ॥ ६५ ॥
चूर्णार्धचान्द्रिके पाकात्तत्तद्दोषनिवारके ।
[1] फलं बृहत्यास्तरुणमानीय सुमनोहरम् ॥ ६६ ॥
वृन्ताग्रं विसृजेद् भित्वा कर्त्तर्या तीक्ष्णधारया ।
पुनश्च तत्फलं छिन्द्याद् द्विधा भिन्नं तु बुद्धिमान् ॥ ६७ ॥
सजले निक्षिपेद्भाण्डे बृहत्यास्तादृशं फलम् ।
सिञ्चेदपो निशां भाण्डे निक्षिपेदपरे घटे ॥ ६८ ॥
रामठं तत्र कैदर्यं धान्याकं च विनिक्षिपेत् ।
पुनश्च निक्षिपेत्तत्र लशुनार्द्रकयोः कणान् ॥ ६९ ॥
एतान् संमेलनं कृत्वा पचेच्चुल्ल्यां विचक्षणः ।
बृहत्याश्च फलं भित्वा निक्षिपेत्पक्ववारिणा ॥ ७० ॥

[1] फलं वार्ताकमानीय तरुणं सुमनोहरम्.

आदाय तानि पक्वानि निक्षिपेद्भाजने शुभे ।
संभारैर्मरिचादीनां कल्कं कुर्याद्विधानतः ॥ ७१ ॥
चिञ्चापक्वफलाम्लेन दग्ध्वा कल्कं विलोडयेत् ।
कुर्यात्कल्केन तेषां च लेपनं बहिरन्ततः ॥ ७२ ॥
भर्जयेत्तानि लिप्तानि गोघृतेनाथ सूपवित् ।
अवतार्य पुनस्तानि [1]कर्पूरेण विलेपयेत् ॥ ७३ ॥
शुचौ तु पूगपट्टस्य पत्रे तानि विनिक्षिपेत् ।
नेत्रेण पूगपट्टस्य वेष्टयेत्सूदराट् पुनः ॥ ७४ ॥
पाटलीं वेष्टितां गाढं तप्ते सर्पिषि निक्षिपेत् ।
स्वादु वृष्यं रुचिकरं त्रिदोषशमकं भवेत् ॥ ७५ ॥
इदं बृहत्यास्तरुणं फलं पुष्टिविवर्धनम् ।
तिन्त्रिणीचूतफलयोर्भाण्डे कुर्याच्च मेलनम् ॥ ७६ ॥
कुम्भीं कुस्तुंभरीं तत्र निक्षिपेत्सल्लकीफलम् ।
सैन्धवादीनि निक्षिप्य पचेत्तत्पाकवित्पुनः ॥ ७७ ॥
घनसारादिना सम्यक् पुनस्तदधिवासयेत् ।
बध्नीयाद्भर्जितं नेत्रे पूगपट्टस्य तत्फलम् ॥ ७८ ॥
पूर्ववन्निक्षिपेद्विद्वांस्तप्ते सर्पिषि तत्फलम् ।
पित्तश्लेष्मप्रशमनं बृहत्यास्तरुणं फलम् ॥ ७९ ॥
फलं बृहत्यास्तरुणं सवृन्तं दारयेद् द्विधा ।
वेष्टयेदार्द्रवस्त्रेण भागमेकं तयोर्बुधः ॥ ८० ॥
भाण्डे निधायाप्यपरं भागं चुल्ल्यां पचेत् पुनः ।
पाकावसानपर्यन्तमन्यस्य जलमासिचेत् ॥ ८१ ॥
पाकायुक्ते पुनर्भागे सम्भारं समुपाक्षिपेत् ।
भर्जयेत्पूर्ववद्भागं सुपक्वं सूदराट् पुनः ॥ ८२ ॥
भर्जितं पूर्ववद्भागं कर्पूरेणाधिवासयेत् ।
पक्वं च वेष्टयेद्भागमपक्वं पूगनेत्रयोः ॥ ८३ ॥
इदं च निक्षिपेद्विद्वांस्तप्ते सर्पिषि पूर्ववत् ।
बृहत्याः फलभागस्य चित्रपाकः प्रकीर्त्तितः ॥ ८४ ॥
पाकापाकसमायुक्तभागद्वितययोगतः ।
पनसस्य फलं रम्यं तरुणं कोमलं नवम् ॥ ८५ ॥

[1] कर्पूरेणाधिवासयेत्.

आनीय विसृजेच्छित्वा कण्टकांश्च बहिः स्थितान् ।
पुनस्तद्बहुधा छिन्द्याद् दण्डमन्तास्थितं त्यजेत् ॥ ८६ ॥
पाकार्हं च पुनश्छित्वा प्रवेणीभाण्डमाविशेत् ।
निशारामठकैदर्यधान्याकांस्तत्र निक्षिपेत् ॥ ८७ ॥
पनसस्य फलान्यप्सु पचेद्भिन्नानि तैस्सह ।
नीरसं पीडयेत्तानि समादायाथ वाससा ॥ ८८ ॥
समादाय पुनस्तेषां कानिचिच्छकलानि च ।
कुर्यात् सूक्ष्मं च दीर्घं च कराग्रेण विचक्षणः ॥ ८९ ॥
कल्कं च मरिचादीनां जम्बीराम्लेन मेलयेत् ।
कल्केन मेलयेत्तानि भर्जयेत्सर्पिषा पुनः ॥ ९० ॥
यदा कुंकुमकान्तिः स्यात्तदा तान्यवतारयेत् ।
कर्पूरं मृगनाभिं च कुंकुमं हिमवारि च ॥ ९१ ॥
मातुलुंगदलच्छेदान् केतकीकुसुमानि च ।
कुम्भीं कुसुम्भरीं तत्र सर्वाण्येतानि निक्षिपेत् ॥ ९२ ॥
दीपनं पाचनं रुच्यं पनसस्य फलं त्विदम् ।
शोधितं कृमिभिस्सम्यक् कटुष्णं कोमलं नवम् ॥ ९३ ॥
पाकार्थमाहरेद्विद्वान् कारवल्ल्याः फलं ततः ।
मूलाग्रं विसृजेच्छित्वा [1] कल्पन्यास्यविचक्षणः ॥ ९४ ॥
निक्षिपेत्प्रवणे भाण्डे कारवल्लीफलं ततः ।
काञ्चिकामिश्रितं सिञ्चेज्जलं तत्र पुनर्बुधः ॥ ९५ ॥
चुल्ल्यां निधाय तद्भाण्डं पचेदातिक्तमोचनात् ।
ततस्तस्मात् समादाय पुनरन्यत्र निक्षिपेत् ॥ ९६ ॥
पुनः पाकं प्रकुर्वीत पटुजम्बीरसैर्बुधः ।
भर्जयित्वा पुनस्सूदस्सर्पिषा तत्फलं शनैः ॥ ९७ ॥
तस्यैकदेशं प्रच्छिद्य पणमात्रं शलाकया ।
शकलं भक्षयित्वा तत्फलमादाय सूदराट् ॥ ९८ ॥
शलाकया सकोशं च बीजं छिद्रात्समुद्धरेत् ।
रक्षेत्तत्पुटिकाकारकारवल्लीफलं बुधः ॥ ९९ ॥
बीजकोशं तनुं भित्वा कल्पित्या तीक्ष्णधारया ।
तत्रैव निक्षिपेत्कारवटकानाम्लसंभवान् ॥ १०० ॥

1) छेदिन्या.

पुनश्च निक्षिपेत्तत्र लशुनार्द्रकयोः कणान् ।
मरीचादिसमुद्भूतचूर्णं चापि विनिक्षिपेत् ॥ १०१ ॥
कर्पूरादीन् समावेश्य घनीभूतघृतं क्षिपेत् ।
सर्वानेतान् प्रकुर्वीत कल्काकारं करैर्बुधः ॥ १०२ ॥
सुस्निग्धे प्रवणे भाण्डे कल्कमेतत् समाविशेत् ।
पर्पटस्य कणैर्माषवटकैस्सह भर्जयेत् ॥ १०३ ॥
कल्कमेतत्समादाय यथायोग्यं प्रवेशयेत् ।
कारवल्लीफलोद्भूतपुटकान् पूरयेत्ततः ॥ १०४ ॥
तद्रन्ध्रं छादयेद्विद्वां स्तदुत्थशकलेन च ।
नेत्रेण वेष्टयित्वाथ पूगपट्टस्य शोभिना ॥ १०५ ॥
उष्णे सर्पिषि निक्षिप्य फलमेतत्प्रपाचयेत् ।
सर्वामयप्रशमनं कारवल्लीफलं त्विदम् ॥ १०६ ॥
निष्पावफलमानीय कोमलं कृमिवर्जितम् ।
त्वचमुत्सृज्य तद्बीजमाहरेच्छोधयेत्पुनः ॥ १०७ ॥
पचेत प्रवणीभाण्डे क्षीरेणैव ततः परम् ।
नालिकेरफलक्षीरे वटकान् पेषयेत्तिलान् ॥ १०८ ॥
मरीचान् सर्षपान् पिष्ट्वा कल्कं तत्र विनिक्षिपेत् ।
रामठक्षीरमासिच्य तानि पक्वावतारयेत् ॥ ११९ ॥
ततश्च घनसाराद्यैस्सूदस्तान्यधिवासयेत् ।
पुनस्तत्पूगपट्टेन वेष्टयित्वा प्रदापयेत् ॥ ११० ॥
इदं स्वादुतरं हृद्यं वृष्यं कफहरं गुरु ।
कोशातकीबिम्बपटोलरम्भा फलाम्रकूष्माण्डककर्कटानाम् ।
भूकन्दकर्कोटफलादिकानां पाकक्रमः पूर्वमिहोक्त एव ॥
घनीभूतदलैर्युक्तं चक्रवर्तं सुकोमलम् ।
तरुणं नवमानीय कृमिभ्यश्शोधयेच्च तत् ॥ ११२ ॥
प्रक्षाल्य पात्रे निक्षिप्य छादयेदार्द्रवाससा ।
निधाय प्रवणीं चुल्ल्यां तत्र किञ्चिज्जलं क्षिपेत् ॥ ११३ ॥
रामठस्य पुनस्तत्र क्षारमल्पं च सेचयेत् ।
चक्रवर्तसमुद्भूतरसैस्सह पचेच्च तत् ॥ ११४ ॥
तिरोधाय मुखं तस्य ह्यर्धपाको यथा भवेत् ।
तमालोक्य पुनस्तत्र यथार्हं लवणं क्षिपेत् ॥ ११५ ॥

शकलानि पुनस्तत्र लशुनार्द्रकयोः क्षिपेत् ।
जाते पाके तमादाय कर्पूराद्यैश्च वासयेत् ॥ ११६ ॥
बध्द्वा तं पूगपट्टेन भुक्तिकाले प्रदापयेत् ।
(वातनारायणं चैव गोली वाघन्घमीरितम् ।
चिञ्चाप्रवालं मधुरं मेहदोषविनाशकृत् ॥)
चक्रवर्तः परं पथ्यो ग्रहण्यर्शोविकारवत् ॥ ११७ ॥
चक्रवर्तं तण्डुलीयं वैकुण्ठं चाप्युपोदकिम् ।
शकुटं च महाबाष्पं गोणीराजगिरिस्तथा ॥ ११८ ॥
गन्धलक्ष्मीश्च मत्स्याक्षी कालशाकश्च शाकिनी ।
मेन्थी चणकपत्री च तथा सर्षपपत्रकम् ॥ ११९ ॥
एवमादीनि पत्राणि शाकयोग्यानि भूरिशः ।
पूर्ववत्क्रम एतेषां पत्राणां समुदीरितः ॥ १२० ॥
जालिनीलुलितं तक्रं किञ्चिदम्लेन संयुतम् ।
सुगन्धगुणसंयुक्तं कुसुमैरधिवासयेत् ॥ १२१ ॥
मुहूर्तमात्रं संस्थाप्य कुसुमानि परित्यजेत् ।
[1] लशुनार्द्रकयोश्छेदान् पुनस्तत्र विनिक्षिपेत् ॥ १२२ ॥
कुम्भीदलं च धान्याकं शुण्ठिचूर्णं च निक्षिपेत् ।
निशाचणकशालीनां पिष्टं चापि ततः क्षिपेत् ॥ १२३ ॥
सैन्धवं च यथायोगं जम्बीराम्लं च निक्षिपेत् ।
रामठं तत्र निक्षिप्य कुर्यादालोडनं बुधः ॥ १२४ ॥
चुल्ल्यां पचेच्च तत्तक्रं दर्व्यालोडनपूर्वकम् ।
पाकार्थे निक्षिपेत्तत्र सूचीभिन्नमरीचिकान् ॥ १२५ ॥

[1] नागरं रामठं मेन्तीलशुनं शालिपिष्टकम्.

तद्यावता कटु भवेत्तावत्पक्वावतारयेत् ।
प्रवर्णी भाण्डमारोप्य चुल्ल्यामन्यं प्रतापयेत् ॥ १२६ ॥
गोघृतं तत्र निक्षिप्य तस्मिंस्तप्ते विचक्षणः ।
रामठं लशुनं तत्र खण्डान्वै पर्पटस्य च ॥ १२७ ॥
सर्षपं जीरकं तत्र निक्षिप्यैतांश्च भर्जयेत् ।
दर्व्या विघट्टनं कृत्वा तेमनं तत्र निक्षिपेत् ॥ १२८ ॥
पिधानेन समाच्छाद्य तन्मुखं तत्पुनः पचेत् ।
पक्वे तस्मिंस्तदादाय मातुलुंगदलं क्षिपेत् ॥ १२९ ॥
कर्पूरं मृगनाभिं च केतकीकुसुमं न्यसेत् ।
स्वादु पथ्यं लघुकरं तेमनं तक्रसम्भवम् ॥ १३० ॥
अयमेव क्रमः पाके तेमनानामुदीरितः ।
रसं तथाढकीजातं लशुनैर्मरिचैर्युतम् ॥ १३१ ॥
रामठं सैन्धवं तत्र निक्षिपेन्मानवित्तमः ।
जम्बीररससंयुक्तं प्रदद्यात्सूदराट् पुनः ॥ १३२ ॥
रक्तपित्तज्वरश्वासातिसारकृच्छ्रनाशनम् ।
कषायमधुरं शीतमाढकीयूषमादिशेत् ॥ १३३ ॥
एवं मुद्गकुलुत्थादियूषपाकः [1] प्रकीर्तितः ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले

सूपशाकेऽन्नादियूषान्तवर्णनं नामाष्टादशस्तरगः

[1] प्रदश्यताम्.

अथ एकोनविंशस्तरंगः

भोज्यभेदास्संग्रहेण मयैव प्रतिपादिताः ।
इदानीं भक्ष्यलेह्यादिविभेदान् वर्णये क्रमात् ॥ १ ॥
गोधूमाः क्षालितास्शुभ्रास्शोषिता रविरश्मिभिः ।
घरट्टे चूर्णितास्श्लक्ष्णं जालिन्या वितुषीकृताः ॥ २ ॥
गोधूमचूर्णकं श्लक्ष्णं किञ्चिद्घृतसमन्वितम् ।
लवणेन समायुक्तं क्षीरनीरेण पिण्डितम् ॥ ३ ॥
सुमहत्यां काष्ठपत्र्यां करास्फालैर्विमर्दयेत् ।
मर्दितं चिक्कणीभूतं गोलकान् परिकल्पयेत् ॥ ४ ॥
स्नेहाभ्यक्तैः करतलैश्चापि चूर्णैर्विलेपितान् ।
प्रसार्य गोलकांस्तांस्तान् करसञ्चारवर्तनैः ॥ ५ ॥
विश्रुता मण्डका रुच्यास्सितपद्मसमप्रभाः ।
प्रयत्नान्निक्षिपेत् प्राज्ञस्तप्तकर्परमस्तके ॥ ६ ॥
पक्कांश्चोपनयेच्छीघ्रं यावत् कार्ष्ण्यं न जायते ।
चतस्रश्च चतस्रश्च घुटिका मण्डका वराः ॥ ७ ॥
गोलान् प्रसारितान् पाणावङ्गारेषु विनिक्षिपेत् ।
अङ्गारपोलिकाश्शस्ताः किञ्चित् कृष्णत्वमागताः ॥ ८ ॥
गोलकान् पिष्टकैर्लिप्तान् पेषिण्या तान् प्रसारितम् ।
सुतप्तशालिनीक्षिप्तानीषत्पक्कान् विवर्तयेत् ॥ ९ ॥
कर्परेऽपि पचेदेवं पूरिकानामयं क्रमः ।
तैलपूर्णकटाहे तु सुतप्ते सोहलाः पचेत् ॥ १० ॥
उत्तानपाकसंसिद्धाः कथितास्सोहलास्सिताः ।
तैलमग्नाः पीतवर्णा मृद्व्यो वा हरिकास्स्मृताः ॥ ११ ॥
गोधूमचूर्णादुद्धृत्य क्षुद्रानभ्याहतान् कणान् ।
दुग्धाक्तान् घृतपक्कांश्च सितया च विमिश्रितान् ॥ १२ ॥
एलामरीचचूर्णेन संयुक्तान् रसरञ्जितान् ।
गोलकेन समावेष्ट्य घृतेनौदुम्बरान् पचेत् ॥ १३ ॥
उन्मथ्य विदलान् सर्वांश्चणकप्रभृतींछुभान् ।
हिंगुसैन्धवसंयुक्तान् शर्करापरिमिश्रितान ॥ १४ ॥
एलामरीचचूर्णेन युक्तान् गोलकवेष्टितान् ।
किञ्चित्प्रसारितांस्तैले पूरिकास्संपचेच्छुभाः ॥ १५ ॥
एवमेवान्यधान्यानां करणे पूरिका विदुः ।
माषाणां राजमाषाणां तण्डुलानां च दोवकान् ॥ १६ ॥

ताभ्यां तैलविलिप्तायां विपचेत्पाकतत्त्ववित् ।
माषस्य च दलान् भिन्नान् वितुषान् हस्तलोडनैः ॥ १७ ॥
ततस्संपिष्य पेषिण्या संभारेण विमिश्रितान् ।
स्थाल्यां विमृज्य बहुलं स्थापयेत्तद्दहस्ततः ॥ १८ ॥
अम्लीभूतं माषपिष्टं पट्टिकासु विनिक्षिपेत् ।
वस्त्रगर्भाभिरन्याभिः पिधाय परिपाचयेत् ॥ १९ ॥
अवतार्यात्र मरिचचूर्णकं विकिरेदनु ।
घृताक्तहिंगुसर्पिर्भ्यां जीरकेण च धूपयेत् ॥ २० ॥
सशीता धवलाश्श्लक्ष्णा एता इड्डलिका मताः ।
आरनालेन सान्द्रेण दध्ना सुमथितेन च ॥ २१ ॥
सैन्धवार्द्रकधान्याकजीरकांश्च विमिश्रयेत् ।
मरीचानि द्विधाकृत्वा विक्षिपेत्तत्र पाकवित् ॥ २२ ॥
दर्व्या विघट्टयेत्सर्वं पचेद्यावत् घनीभवेत् ।
उत्तार्य वटकान् क्षिप्त्वा विकिरेन्मारिचं रजः ॥ २३ ॥
हिंगुना धूपयेत्सम्यग्वटकांस्तेमनाभिधान् ।
दुग्धमुत्क्वाथ्य तन्मध्ये तक्रमम्लं विनिक्षिपेत् ॥ २४ ॥
हित्वा तोयं घनीभूतं वस्त्रबन्धपृथक्कृतम् ।
शालितण्डुलपिष्टेन मिश्रितं परिवेष्टितम् ॥ २५ ॥
नानाकारैस्सुघटितं सर्पिषा परिपाचितम् ।
पक्वशर्करया युक्तमेलाचूर्णेन वासितम् ॥ २६ ॥
क्षीरपाकाभिधं चैतद्भक्ष्यं मृष्टं मनोहरम् ।
शर्करां वासनायुक्तां ताम्रपात्रे विपाचयेत् ॥ २७ ॥
अर्धपात्रे क्षिपेद्दुग्धं तक्रं वापि यथारुचि ।
तेन मुञ्चेन्मलं सा तु शर्करा क्वथिता सती ॥ २८ ॥
निर्मलेन च वस्त्रेण गालयेच्च मुहुर्मुहुः ।
मृदुपाके मृदुः पेया मध्यमे मधुसन्निभा ॥ २९ ॥
खरे तु कठिना भक्ष्या सारिके शर्करा भवेत् ।
1) खरपाकसुसिद्धायां सितायां वज्रसम्पुटैः ॥ ३० ॥
नानारूपाणि कुर्वीत खण्डपाकविशारदः ।
शोधितायां सितायां तु क्षीरं सम्मिश्रयेत्समम् ॥ ३१ ॥

---

1) खरपाकसुसिद्धायास्सितायाः

खरपाकावधिर्यावत्तावत्तत् क्राथयेत्पुनः ।
उत्तार्य नागरं तीक्ष्णैरेलाकर्पूरकेसरैः ॥ ३२ ॥
उत्क्षिप्य गोलकाः कार्या नाम्ना वर्षेल्लकास्तु ते ।
अथ भेदान् प्रवक्ष्यामि पायसस्य विचित्रकान् ॥ ३३ ॥
श्यामाककङ्गुनीवारगन्धशालीसुतण्डुलैः ।
रसवेष्टितसेवाकैर्घुटिका लघुविस्तृतैः ॥ ३४ ॥
चिरप्रसूतमहिषीपयसा पायसं पचेत् ।
पायसं लेहने योग्यं स्वादुगन्धि मनोहरम् ॥ ३५ ॥
त्वचं लशुनखण्डानां समुत्सृज्य प्रयत्नतः ।
अग्रतो मूलतः किञ्चिच्छित्वा छेदांत्समुत्सृजेत् ॥ ३६ ॥
विद्धार्थं स्रजं तेषां कुर्यात्सूच्याथ तन्तुभिः ।
पायसं यावता सिद्धं तावदेव परिग्रहेत् ॥ ३७ ॥
यावच्च स्याक्रियासिद्धिस्तावत्तच्च प्रयोजयेत् ।
भागान् लशुनकन्दस्य छिन्यात्सूदश्चतुर्विधान् ॥ ३८ ॥
तेषां विरूढं गर्भस्थं समादाय समुत्सृजेत् ।
तानेव पोटलीं विद्यात्कुर्याद्वै सूक्ष्मवाससा ॥ ३९ ॥
काञ्जिकामिश्रिते पाके यावनाल्कसम्भवे ।
निधाय पोटलीं विद्वान् स्रजं च लशुनोद्भवाम् ॥ ४० ॥
कृत्वा स्थाल्यां पचेद्विद्वानागन्धकटुमोचनात् ।
पक्कं लशुनमादाय वस्त्रतन्तून् समुत्सृजेत् ॥ ४१ ॥
क्षालयेद्वारिणा सम्यक् पचेत् क्षीरेण तान् पुनः ।
चतुःकृत्वः पञ्चकृत्वः क्षालयेद्वारिणा मुहुः ॥ ४२ ॥
भाण्डद्वये च लशुनं निक्षिपेत्तादृशं पुनः ।
एकस्मिन्निक्षिपेद्भाण्डे सूदो लशुन[1] खण्डकान् ॥ ४३ ॥
अन्यस्मिन्विन्यसेद्भाण्डे सूदस्सरलिकांस्तथा ।
श्रितमर्धावशिष्टं च क्षीरं विश्रामयेत्ततः ॥ ४४ ॥
यथार्हं शर्करायुक्तं क्षीरं भाण्डद्वये क्षिपेत् ।
निक्षिपेत्पायसेऽन्यस्मिन् रम्भाफलमनुत्तमम् ॥ ४५ ॥
पनसस्य फलं रम्यमन्यस्मिन्पायसे न्यसेत् ।
कल्कं च घनसारादि निक्षिपेदुभयत्र हि ॥ ४६ ॥
निक्षिपेत्तत्र जात्यादिकुसुमान्युभयत्र हि ।
पायसं लघुवातघ्नमिदं व्याधिहरं शुभम् ॥ ४७ ॥
नवगोधूममानीय समुत्सार्याश्ममृत्कणान् ।
ईषज्जलेन संक्लिन्नमवहन्यादुलूखले ॥ ४८ ॥

[1] सेवकान्.

मोचयेत्तत्तुषं सम्यक्कुर्यादिवं द्विधा त्रिधा ।
अवहन्याच्च तक्रेण श्वेतं यावद्भवेत्पुनः ॥ ४९ ॥
दशविंशतिकृत्वस्तानवहन्याच्च सर्पिषा ।
संस्पृश्य केन चित्सम्यक्कुर्यात्तुषविमोचनम् ॥ ५० ॥
त्रिभागं माहिषं क्षीरं क्षीरभाण्डे प्रसिच्य ततः ।
एकेन जलभागेन सह मन्दाग्निना पचेत् ॥ ५१ ॥
जलं संशुष्यते यावत्तावत् पाकं प्रसाधयेत् ।
तप्तं पयस्तथा सिञ्चेत्पयोभाण्डेऽष्टभागकम् ॥ ५२ ॥
एकभागं च गोधूमं तादृशं तत्र निक्षिपेत् ।
यथा च धूमसंस्पर्शो न भजेत्तं तथा पचेत् ॥ ५३ ॥
दर्व्या प्रदक्षिणं सम्यक् पचेदालोड्य पाकवित् ।
कल्केन लेपयेद्भाण्डं कर्पूरादेः परं ततः ॥ ५४ ॥
जात्यादिकुसुमैस्तत्र कुर्याद्वै वासनां ततः ।
यथा तु दर्वीलेपः स्यात्पायसं तत्र निक्षिपेत् ॥ ५५ ॥
पूरितं पायसेनाल्पमङ्गारे तं न्यसेत्पुनः ।
कुर्यादिवं ततो विद्वांस्तण्डुलस्य च पायसम् ॥ ५६ ॥
सुधासममिदं ज्ञेयं वृष्यं लघु बलप्रदम् ।
रसावहं दीर्घपर्वदण्डमिक्षोस्समाहरेत् ॥ ५७ ॥
उत्पाट्य कर्त्रिकाकोष्ठ्या त्वचं तस्य परित्यजेत् ।
कल्पिन्या तं पुनश्छिन्द्या चक्राकारं गतत्वचम् ॥ ५८ ॥
भाण्डे निक्षिप्य तांश्छेदान्पचैच्चूर्णजलैः पुनः ।
तद्गन्धस्य निवृत्त्यर्थं बहुशः क्षालयेज्जलैः ॥ ५९ ॥
प्रवण्यां तु पचेत्तांश्च क्षीरमाश्रित्य पाकवित् ।
पुनश्च क्षालयेत्तांश्च वारिभिस्तु प्रयत्नतः ॥ ६० ॥
वासिते पूगपट्टे तानिक्षुखण्डान् पुनः [1] पुनः ।
क्षीरं सुपक्कं तत्रापि यथार्हं सम्प्रसेचयेत् ॥ ६१ ॥
शर्करां च विनिक्षिप्य पूगपट्टेन वेष्टयेत् ।
क्षीरवर्त्तीति पाकज्ञाः प्राहुरिक्षोस्समुद्भवम् ॥ ६२ ॥
इदं पित्तहरं पथ्यं बलपुष्टिविवर्धनम् ।
जम्बीरबीजपूराम्रमुख्याम्लफलसंभवम् ॥ ६३ ॥
विचित्रं पायसं वक्ष्ये त्रिषु लोकेषु विश्रुतम् ।
फलमन्यतमं तेषामादाय त्वचमुत्सृजेत् ॥ ६४ ॥
अच्छिन्नकेसरान् गृह्य बीजान्यान्तराणि संत्यजेत् ।
समालोड्य नवे भाण्डे चूर्णे चुल्ल्यां पचेजलम् ॥ ६५ ॥

[1] पचेत्.

पाके बुद्बुदसंयुक्ते निक्षिपेत्तत्र केसरान् ।
तान्पचेत्पाकवित्तावद्यावदम्लत्वमोचनात् ॥ ६६ ॥
वस्त्रेण शोधयेत्पक्वान् केसरांश्चूर्णवारिणा ।
भक्षणादीक्षयेत्स्थाल्यां केसरानम्लतश्च्युतान् ॥ ६७ ॥
क्षालयेच्च पुनस्सम्यक् तांश्चतुःपञ्चवारकम् ।
एवं प्रक्षालितान् वस्त्रे शुभ्रे तान्प्रक्षिपेद्बुधः ॥ ६८ ॥
अर्धावशेषदुग्धे तान्निक्षिपेच्छर्करान्विते ।
जात्यादिपुष्पकल्कं च कूर्परादि च निक्षिपेत् ॥ ६९ ॥
कृष्णरम्भाफलं तत्र निक्षिपेन्मानवित्पुनः ।
मातुलुङ्गफलादीनां कथितं पायसं वरम् ॥ ७० ॥
इदं हन्ति शरीरस्थानामयानरुचिं तथा ।
अथ चिञ्चाचूतधात्रीपायसानां फलं परम् ॥ ७१ ॥
पाकवित्पूर्ववत्कुर्याद्विधानेन विचक्षणः ।
पाकभेदाः प्रवक्ष्यन्ते भुक्तान्नस्य विपाचकाः ॥ ७२ ॥
हिरण्मये घटे चित्रे नानारत्नविराजिते ।
शर्करोद्भवमेकं च खण्डं तत्र विनिक्षिपेत् ॥ ७३ ॥
गाङ्गं तद्द्विगुणं तोयं सिञ्चिद्वस्त्रेण शोधितम् ।
यावत्प्रलीयते खण्डं तावत्तत्रैव विन्यसेत् ॥ ७४ ॥
तदादाय न्यसेद्यन्त्रे लुलितं पट्टनिर्मिते ।
भवेद्विसाम्बुवद्यावत्तावत्तत्र पुनः पुनः ॥ ७५ ॥
शोधयेच्छर्करातोयं सम्यक् सूदः प्रमाणवित् ।
दशविंशतिपात्रेषु सूक्ष्मरूपेषु शोभिषु ॥ ७६ ॥
प्रत्येकं पूगपट्टस्य लोचनानि न्यसेत् क्रमात् ।
फलानां तेषु नेत्रेषु रसान् पुष्पाणि च न्यसेत् ॥ ७७ ॥
एकस्मिन् सहकारस्य रसं सूदः प्रसेचयेत् ।
चम्पकस्य प्रसूनानां मल्लिकाकुसुमानि च ॥ ७८ ॥
अन्यस्मिन् प्रक्षिपेत्पात्रे रसंवै पनसस्य च ।
तत्रैव केतकीजातिकुसुमानि न्यसेद् बुधः ॥ ७९ ॥
अन्यत्र रसमासिञ्चेदन्यत्ताम्रं सपुष्पकम् ।
कल्हारकुसुमं चैव न्यसेत्तत्रैव बुद्धिमान् ॥ ८० ॥
एवं सुगन्धपुष्पैश्च भक्ष्यैर्नानाफलैरपि ।
शर्करारससंमिश्रैस्सम्भवन्ति रसाल्याः ॥ ८१ ॥
सुपक्वफलसन्दोहं सहकारादिसंभवम् ।
मर्दयेच्छोधयित्वाथ पृथक् शर्करया तथा ॥ ८२ ॥
तदुत्थमाहरेत्कल्पं तद्वीजानि समुत्सृजेत् ।
द्रव्ये तस्मिन् घनीभूते सिञ्चेत्किञ्चिज्जलं सुधीः ॥ ८३ ॥
तद्द्रव्यं सूक्ष्मवस्त्रेण यावल्लेह्यं विशोधयेत् ।
आनयेत्पूगपट्टस्य नेत्राणि रुचिराणि च ॥ ८४ ॥
अनेकेषु च पात्रेषु मध्ये तानि पुनर्न्यसेत् ।
लेह्यं च लुलितं तेषु निक्षिपेच्च पृथक्पृथक् ॥ ८५ ॥
ततश्च घनसारादिकल्कं तेषु च मेलयेत् ।
विचित्रवाससा पुष्पैर्लेह्यं सम्यग् विवासयेत् ॥ ८६ ॥
ततः पुष्पाणि सन्त्यज्य तानि कुर्याच्च पोटलीम् ।
पूर्ववत् स्थापनं कृत्वा कुर्याच्छैत्योपचारकम् ॥ ८७ ॥
एवं विधानि लेह्यानि कर्तव्यानि बहून्यपि ।
सर्वपायसभेदानां कथितानां विधानकम् ॥ ८८ ॥
करिष्यमाणदध्यादिकार्याणां मूलकारणम् ।
अतोऽत्र कथ्यते सम्यक् क्षीरपाकं मनोहरम् ॥ ८९ ॥
महिषीसम्भवं क्षीरं सवत्सायास्समाहरेत् ।
तदादाय शुभे भाण्डे निदध्यात्सूपकोविदः ॥ ९० ॥
गाङ्गं जलं च लुलितं पूरयेदपरे घटे ।
वासयेत्तज्जले पुष्पैर्नानापरिमलान्वितैः ॥ ९१ ॥
मुहूर्तमात्रमालोड्य तानि पुष्पाणिसंत्यजेत् ।
क्षीरं जलं समंकृत्वा क्षीरभाण्डे पचेद्बुधः ॥ ९२ ॥
विनिष्क्रमानयुक्तानि प्रत्येकं तत्र मानवित् ।
घानानि त्रीणि निक्षिप्य कान्तिस्त्वरकराणि च ॥ ९३ ॥
दर्व्या मुहुर्मुहुः क्षीरं सम्यगालोड्य शोषयेत् ।
एवं द्विस्त्रिश्शुभे पात्रे पचेदाजलसंक्षयात् ॥ ९४ ॥
यदा दर्वी सज्यतेऽन्तरवतार्य तदा सुधीः ।
पिधाय रन्ध्रं भाण्डेन चाङ्गारे विन्यसेच्च तत् ॥ ९५ ॥
तस्मिन् मन्ते तु सञ्जाते यथार्हं शर्करां क्षिपेत् ।
ईषदुष्णेन संयुक्तं दापयेत् क्षीरमुत्तमम् ॥ ९६ ॥
वृष्यं पित्तादिरोगघ्नं शरीरबलवर्धनम् ।
विना जलेन तत् क्षीरं क्षीरभाण्डे निधापयेत् ॥ ९७ ॥
स्थाल्यां पचेन्मन्दवह्नौ दर्वीघट्टनपूर्वकम् ।
अर्धावशिष्टमिति तत्पनं प्राहुर्विचक्षणाः ॥ ९८ ॥
त्रिभागशेषमिति तल्लेह्यमाहुश्च कोविदाः ।
षड्भागशेषमिति तद्घुटिकां प्रवदन्ति हि ॥ ९९ ॥
ब्रुवन्त्यष्टावशिष्टं तच्छर्करामिति साधवः ।
चतुर्विधमिदं क्षीरं न्यसेद्भाण्डचतुष्टये ॥ १०० ॥
सम्यग्विश्राम्य तत्क्षीरं मानविद्भाण्डसंस्थितम् ।
तेषु क्षीरेषु मानज्ञः फलपुष्पाणि निक्षिपेत् ॥ १०१ ॥

पानरूपे पुनः क्षीरे पनसस्य फलं क्षिपेत् ।
रसामृतं पुनस्तत्तु रसनाजाड्यहृद्भवेत् ॥ १०२ ॥
जात्यादि कुसुमं तत्र पुनस्सूदो विनिक्षिपेत् ।
भूयो लेह्यमये दुग्धे खर्जूरीफलमाहरेत् ॥ १०३ ॥
न्यसेच्चम्पकपुन्नागकुसुमं तत्र मानवित् ।
भूयश्च घुटिकारूपे क्षीरे चूतफलं क्षिपेत् ॥ १०४ ॥
सर्पिश्च माक्षिकं तत्र निक्षिपेत्सर्वरोगनुत् ।
कुसुमं सप्तलादीनां न्यसेत्तत्र मनोहरम् ॥ १०५ ॥
क्षीरे तु शर्कराकारे कृष्णरम्भाफलं न्यसेत् ।
पुनश्च शर्कराखण्डं जिह्वाजाड्यहरं न्यसेत् ॥ १०६ ॥
कुसुमं विन्यसेत्तत्र पुन्नागादिसमुद्भवम् ।
तेषु क्षीरेषु सर्वेषु निक्षिपेत् [1]केतकीरसम् ॥ १०७ ॥
कर्पूरमृगनाभ्योश्च कल्कं कुङ्कुमवर्जितम् ।
सूदस्तु पानलेह्यादिक्षीरेषु प्रविनिक्षिपेत् ॥ १०८ ॥
एतत्पित्त कफश्लेष्मसम्भवामयवारकम् ।
अनपश्चिलसंयुक्तः क्षीरपाकः प्रदर्शितः ॥ १०९ ॥
दर्श्यते दधिभेदस्तु साम्प्रतं विविधो मया ।
अर्धावशिष्टं मधुरं सुपक्वं क्षीरमुत्तमम् ॥ ११० ॥
समन्तं पाकविद्भाण्डे समादाय शुचौ न्यसेत् ।
सुपक्वं मातुलुङ्गस्य फलं स्थूलं समानयेत् ॥ १११ ॥
फणाकरसमायुक्तशलाकाग्रसुधाग्रया ।
वृन्तमूले ततस्तस्य किञ्चिच्छित्वा प्रमाणवित् ॥ ११२ ॥
उद्धरेत्तद्गतान् सर्वान् बीजत्वक्केसरान् बुधः ।
एकवारं द्विवारं वा क्षालयेद्वारिणा च तत् ॥ ११३ ॥
कल्केन घनसारादेस्तदन्तर्लेपयेद् बुधः ।
वासयेद्बहुभिस्तच्च जात्यादिकुसुमैः पुनः ॥ ११४ ॥
तत्र स्थितानि पुष्पाणि दध्यर्धं च समुत्सृजेत् ।
कोष्णं समण्डकं क्षीरं पूरयेत्तत्र पात्रके ॥ ११५ ॥
पूरयेन्नवनीतं च सद्यो दध्ना समाहृतम् ।
छेदेन पूर्वं छिन्नेन तन्मुखं छादयेत्सुधीः ॥ ११६ ॥
अनेनैव प्रकारेण दधि कृत्वा प्रदापयेत् ।
इदं रुचिकरं पथ्यं सर्वारुचिनिवारणम् ॥ ११७ ॥
बलपुष्टिकरं रम्यं मातुलुङ्गाभिधं दधि ।
अनन्तरं पुनर्भागैस्त्रिभिर्दिशिष्टं पयश्शुभम् ॥ ११८ ॥

पक्वं समण्डं मधुरं दध्यर्धं माहिषं पुनः ।
समादाय शुभे भाण्डे तदङ्गारेषु विन्यसेत् ॥ ११९ ॥
सद्योविपाकपूगस्य पुष्पपट्टं समानयेत् ।
कर्पूरं मृगनाभिं च कुंकुमं हिमवारिणा ॥ १२० ॥
पेषयित्वा पुनस्तद्वत् तेन कल्केन लेपयेत् ।
केतकीचम्पकाद्यैश्च वासयेत्तानि सन्त्यजेत् ॥ १२१ ॥
ईषदुष्णेन संयुक्तं तत्क्षीरं तत्र पूरयेत् ।
निक्षिपेन्नवनीतं च चक्रस्थं नक्रमानवित् ॥ १२२ ॥
तादृशं पूगपट्टं तु वेष्टयेत्तनुतन्तुभिः ।
एवं स्थिते च तद् दुग्धं दधिभावं त्यजेत्ततः ॥ १२३ ॥
गन्धवासमिदं नाम्ना दधिप्राहुर्विचक्षणाः ।
उच्यते दधिभेदस्तु घुटिकाक्षीरसंभवः ॥ १२४ ॥
रसैश्च भावयित्वैतत्सहकारफलोद्भवैः ।
भाण्डं चतुःपञ्चकृत्वश्शोषयेत्तमनातपे ॥ १२५ ॥
कल्केन घनसारादेर्जात्यादिकुसुमैश्च तम् ।
भावज्ञो भावयेद्भाण्डमापञ्चदशवासरम् ॥ १२६ ॥
निक्षिपेद् घुटिकाकारं क्षीरं भाण्डे च तादृशे ।
तावत्येव कृते सम्यक् कुंकुमाभं भवेच्छुभम् ॥ १२७ ॥
कुंकुमाभमिदं प्राहुस्सूपशास्त्रविशारदाः ।
न्यसेच्च शर्कराकारं क्षीरं पात्रे प्रमाणवित् ॥ १२८ ॥
तदर्धं घुटिकाकारं क्षीरं तत्रैव निक्षिपेत् ।
कल्केन घनसारदेः कुर्यात् संमेलनं बुधः ॥ १२९ ॥
केतकीचम्पकाद्यैश्च कुसुमैरधिवासयेत् ।
पुनश्च पूगपट्टस्य नेत्रे तत्क्षीरमर्पयेत् ॥ १३० ॥
नेत्रे निक्षिप्य तत् क्षीरं वेष्टयेत्तन्तुभिः पुनः ।
एवं कृते दधि भवेद्राजयोग्यं बलावहम् ॥ १३१ ॥
एतच्च शर्कराखण्डं नाम्ना प्राहुर्मनीषिणः ।
सुपक्वं राजशाल्यन्नमानीय सुमनोहरम् ॥ १३२ ॥
विशाले श्रापयेद्देशे पात्रेषु विविधेष्वथ ।
स्थितेषु सर्वपात्रेषु क्षिपेदन्नेषु सैन्धवम् ॥ १३३ ॥
हैयङ्गवीनमेकस्मिन् सिञ्चेत्पात्रे सुसंयुते ।
क्षिपेच्चूर्णं पुनस्तत्र दग्धपर्पटकस्य च ॥ १३४ ॥
निक्षिपेच्च ततस्तत्र लशुनार्द्रकयोः कणान् ।
चूर्णं निवेशयेत् किञ्चिन्मेन्थीभेरणसम्भवम् ॥ १३५ ॥

---

1) दलम्.

कुस्तुम्बरु च कैदर्यं केतकीकुसुमं न्यसेत् ।
बीजपूरदलं तत्र निक्षिपेत्सूदराट् ततः ॥ १३६ ॥
एभिर्द्रव्यैर्भाजनस्थमन्नं कुर्याद्विमिश्रितम् ।
पुनश्च तत्र कस्तूरीं कर्पूरं च विनिक्षिपेत् ॥ १३७ ॥
पुनश्च पूगपट्टेन बद्ध्वा भोक्त्रे निवेदयेत् ।
घृतान्नमेतदुदितं बलवृद्धिकरं मतम् ॥ १३८ ॥
रुच्यं पित्तहरं नित्यं चक्षुरिन्द्रियवर्धनम् ।
अन्यस्मिन्नपि पात्रस्थे शाल्यन्ने शीतलान्विते ॥ १३९ ॥
तिलतैलं नवं रम्यं सिञ्चेत् सूदस्समन्ततः ।
जम्बीराम्लं ततस्तत्र प्रमाणेन निवेशयेत् ॥ १४० ॥
चूर्णं च निक्षिपेत्तत्र पिण्याकवटकोद्भवम् ।
लशुनार्द्रककैडर्यधान्याकानां क्षिपेत् कणान् ॥ १४१ ॥
तप्ततैलं पुनस्तत्र हिंगुना सहितं क्षिपेत् ।
कृत्वा तन्मेलनं तत्र कर्पूरादींश्च निक्षिपेत् ॥ १४२ ॥
तद्बध्वा पूगनेत्रेण निक्षिपेदपरस्थले ।
तैलान्नस्य क्रमस्त्वेष बलकृद्दीपनप्रदः ॥ १४३ ॥
एवमादीनि भक्तानि तिन्त्रिणीदधिसर्पिषा ।
कुंभीकल्पप्रभृतिभिर्बहुधा संभवन्तिहि ॥ १४४ ॥
एतेषामन्नभेदानां तत्तद्द्रव्यगुणो भवेत् ।
अर्धावशेषदुग्धोत्थदधिनिर्मथनोद्भवम् ॥ १४५ ॥
नवनीतं नवं गव्यं लघु पित्तहरं शुभम् ।
दशकृत्वः क्षालयित्वा तक्रेणैव मुहुर्मुहुः ॥ १४६ ॥
तदादाय पुनस्सूदश्शोधयेत्सूक्ष्मवाससा ।
द्विवारमेकवारं वा क्षालयेद्वारिणा ततः ॥ १४७ ॥
निधाय वासितं शुभ्रे पूगपट्टस्य लोचने ।
सुगन्धपुष्पैर्बहुभिस्तद्द्रव्यमधिवासयेत् ॥ १४८ ॥
वेष्टयित्वा पुनस्तत्र स्थापये त्सजले घटे ।
इदमित्थं साधयित्वा नवनीतं प्रदापयेत् ॥ १४९ ॥
नवनीतमिदं गव्यं वृष्यं व्याधिविनाशनम् ।
कान्तिकृत्पुष्टिदं सम्यक् ज्ञानेन्द्रियविवर्धनम् ॥ १५० ॥
अनेनैव प्रकारेण माहिषे नवनीतके ।
क्षालनं शोधनं सम्यक् कुर्याद्वै वासनां पुनः ॥ १५१ ॥
नवनीतं नवं धौतं सम्यङ्मृद्वग्निना पचेत् ।
तदीषद्द्रवसंयुक्तं जालिन्या च विशोधयेत् ॥ १५२ ॥

शोधितं तत्पचेत्सम्यक् दर्वीघट्टनपूर्वकम् ।
बुद्बुदेषु विलीनेषु रक्तवर्णं यथा भवेत् ॥ १५३ ॥
सौरभ्यार्थं क्षिपेत्तत्र किञ्चिद् गोधूमचूर्णकम् ।
तदावलोक्य सूपज्ञस्तद्घृतं चावतारयेत् ॥ १५४ ॥
न्यसेत्तत्र च ताम्बूल्याः पत्रकं कृष्णवर्णकम् ।
घनसारादिना सूदो वासयेत् सर्पिरुत्तमम् ॥ १५५ ॥
इदमाज्यं नवं पूज्यं प्रदद्याद्भोजनार्थिने ।
वातपित्तप्रशमनं सुरभि स्वादु बृम्हणम् ॥ १५६ ॥
नवनीते क्रमस्त्वेष प्रोक्त एवहि माहिषे ।
घृतस्य पाकभेदं च वक्ष्ये लोकहिताय च ॥ १५७ ॥
पूतिगन्धपरित्यागात् सुगन्धग्रहणाय च ।
पूतिगन्धसमायुक्ते सर्पिषि प्रक्षिपेदिदं ॥ १५८ ॥
रक्तवर्णसमायुक्तां मृदमीषत्प्रमाणतः ।
दध्यम्लयुक्तं तत्रैव निक्षिपेत्तत्प्रमाणवित् ॥ १५९ ॥
जम्बीराम्लं च तत्रैव भस्म किञ्चिच्च निक्षिपेत् ।
पुनर्नवीदलं शिग्रुताम्बूलीदलमर्पयेत् ॥ १६० ॥
इदमेतैस्समालोड्य दर्व्या चुल्ल्यां पचेद् बुधः ।
दुर्गन्धस्य निवृत्तिस्स्याद्यावत्तावत्पचेद् बुधः ॥ १६१ ॥
अनेनैव प्रकारेण सर्पिर्विद्वान् प्रसाधयेत् ।
सधितं च पुनर्दद्याद्भोजनाय मनोहरम् ॥ १६२ ॥
अन्नभोजनवेलायां प्रदद्याद् द्रवरूपकम् ।
ईषद्घनीकृतं सर्पिर्दद्यात्पायसभक्षणे ॥ १६३ ॥
भक्ष्यादिभक्षणे दिष्टे घृतं दद्याद् घनीकृतम् ।
सजलं निर्जलं चेति तक्रं तावद् द्विधा मतम् ॥ १६४ ॥
पादाम्ब्वर्धाम्बुभेदेन सजलं च द्विधा पुनः ।
माहिषं स्वादु गुरु तल्लघु गोसंभवं मतम् ॥ १६५ ॥
महिषं मथितं तावद्वक्ष्ये सम्यग्विधानतः ।
मातुलुङ्गफलोद्भूतं दधि निर्मथ्य निर्जलम् ॥ १६६ ॥
उद्धरेन्नवनीतं च शुभ्रवस्त्रेण शोधयेत् ।
तत्पूगपट्टेनैतस्य शुभे पात्रे निवेशयेत् ॥ १६७ ॥
सिञ्चेत्तन्मथितं तत्र यावदिष्टं प्रमाणवित् ।
सैन्धवं मातुलुङ्गस्य छेदान् पुष्पाणि च न्यसेत् ॥ १६८ ॥
तादृशं मथितं बद्ध्वा नेत्रस्थं च प्रदापयेत् ।
इदं नराणां सततं शुभं स्वादुतरं परम् ॥ १६९ ॥

पूगपट्टस्य नेत्रस्थं घुटिकारूपकं दधि ।
समोदकेन निर्मथ्य नवनीतं समुद्धरेत् ॥ १७० ॥
उदश्वित्स्खलितं नेत्रपालस्थं विन्यसेच्च तत् ।
सैन्धवं केतकीकल्कं कर्पूरादींश्च निक्षिपेत् ॥ १७१ ॥
सहकारफलच्छेदान् जम्बीराम्लं च विन्यसेत् ।
उदश्वित्पूगपट्टस्थं वासितं वेष्टयेद् बुधः ॥ १७२ ॥
उदश्वित्सहकाराख्ये सहकारफलोद्भवम् ।
एवमेव कपित्थादिसंभवं तक्रमीक्ष्यताम् ॥ १७३ ॥
तैले वापि जले वापि राजिकालवणान्विते ।
प्रक्षाल्य वृन्तसहितं फलं चूतादिकं न्यसेत् ॥ १७४ ॥
पूर्ववत्तैलजलयोः प्रक्षिपेदंकुरादिमान् ।
मागिणीमार्द्रकं मूलं ख चोरं वनमागिणीम् ॥ १७५ ॥
कर्पूरमागिणीमूलं तथैवाम्लहरिद्रिकाम् ।
सूरणं मधु शिग्रुं च तथा शवलकन्दकम् ॥ १७६ ॥
एतानि पूर्ववत्तैले सलिले वा विनिक्षिपेत् ।
हिंगूजीरककैडर्यमेन्थीसर्षपसंभवम् ॥ १७७ ॥
कल्कं विनिक्षिपेद्रम्यमुपदंशेष्वयं विधिः ।
अपक्वं जलपक्वं च तैलपक्वाग्निपक्वकम् ॥ १७८ ॥
भाजनोदरपक्वं च पक्वं पञ्चविधं स्मृतम् ।
सूपाद्या उपदंशान्ताः पाका एवं प्रदर्शिताः ॥ १७९ ॥

इति श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
भक्ष्यलेह्याद्युपदंशान्तवर्णनं नामैकोनविंशस्तरङ्गः

अथ विंशस्तरंगः

स्वामिन्! पाकक्रमोऽन्नादिपदार्थानां प्रदर्शितः ।
श्रुत्वैतदभवच्चित्तं मामकं कौतुकान्वितम् ॥ १ ॥
भोजनस्य क्रमं पश्चात् कर्तव्यमपि शंस मे ।
पुत्र! ते कथयिष्यामि भोजनस्य क्रमं तथा ॥ २ ॥
भोजनानन्तरं यच्च कर्तव्यं तदपि क्रमात् ।
आप्तैः कञ्चुकिभिर्गुप्तं सुवृत्तपरिवारकम् ॥ ३ ॥
शुक्लवस्त्रपरिच्छन्नं मणिस्तम्भविभूषितम् ।
मुक्तादामपरिच्छन्नं वितानपरिशोभितम् ॥ ४ ॥
शीतगन्धजलासिक्तं मृष्टकुट्टिमशोभितम् ।
पुष्पोपहारललितं बहुदीपैरलंकृतम् ॥ ५ ॥
गुरुभिः पुत्रपौत्राद्यैर्वनिताभिस्सुहृज्जनैः ।
बन्धुभिस्संश्रितैस्साकं विशेद्भोजनमण्टपम् ॥ ६ ॥
वञ्जुलाम्रमधूकानां पनसोदुम्बरस्य च ।
आयतं चतुरश्रं च काञ्चनेनोपशोभितम् ॥ ७ ॥
श्लक्ष्णं मनोहरं पीठं भोजनाय समाश्रयेत् ।
प्राचीमुखस्तु भुञ्जान आयुष्यं लभते बहु ॥ ८ ॥
यशश्च लभतेऽत्यर्थमश्नन् दक्षिणदिङ्मुखः ।
श्रियं च लभते पुष्टिं भुञ्जानः पश्चिमाननः ॥ ९ ॥
नित्यवाक्यफलं प्राप्नोत्यश्नन् धनददिङ्मुखः ।
सौवर्णे राजते पात्रे रीतियन्त्रविराजिते ॥ १० ॥
नानारत्नोपरचितसौवर्णचषकैर्युते ।
जलप्रक्षालिते सम्यक् सितवस्त्रप्रमार्जिते ॥ ११ ॥
क्रमेण फलशाकादीन् पदार्थान् परिवेषयेत् ।
ततश्च फलशाकादीन् पदार्थान् परिवेषितान् ॥ १२ ॥
स्वयं परीक्ष्य मतिमानाददीत महीपतिः ।
तत्परीक्षाप्रकारं च दोषचिह्नानि च ब्रुवे ॥ १३ ॥
मित्रोदासीनविद्वेषिमये चात्र जगत्त्रये ।
भवत्यभ्यवहार्येषु विषाश्लेषोऽपि कर्हिचित् ॥ १४ ॥
धीमन्तस्सहितास्सम्यगमीभिर्लक्षणे[1] र्युतैः ।
प्रयुक्तमरिभिर्गुप्तं विषं जानन्ति तद्यथा ॥ १५ ॥

[1] स्स्फुटैः

अपिक्लेद्यं भवेदन्नं पच्यमानं विषान्वितम् ।
चिराच्चपच्यते सद्यः पक्वं पर्युषितोपमम् ॥ १६ ॥
स्तब्धमूष्मविनिर्मुक्तं पिच्छिलं चन्द्रिकान्वितम् ।
वर्णगन्धरसान्यत्वदूषितं च प्रजायते ॥ १७ ॥
सविषाणि क्षणादेव शुष्यन्ति व्यञ्जनान्यपि ।
क्वाथे तूद्वामतापेन सीमन्ता बुद्बुदास्तथा ॥ १८ ॥
जायन्ते राजयो नीला रसे क्षीरे च लोहिताः ।
स्युर्मध्यतोऽन्ययोः कृष्णा दध्नि श्यामास्तु राजयः ॥ १९ ॥
तक्रे तु नीलपीता स्यात् कपोताभा तु मस्तुनि ।
कृष्णा सौवीरके राजिर्घृते तु जलसन्निभा ॥ २० ॥
द्रवौषधे तु कपिला क्षौद्रेऽपि कपिला भवेत् ।
तैलेऽरुणा वसागन्धा पाक आमीपुले क्षणात् ॥ २१ ॥
सपाकानां फलानां च प्रकोपस्सहसा तथा ।
जायते म्लानिरार्द्राणां सङ्कोचश्च विषादिह ॥ २२ ॥
शुष्काणां श्यामतोपेतं वैवर्ण्यं म्रदिमा पुनः ।
कर्कशानां मृदूनां च काठिन्यं जायते विषात् ॥ २३ ॥
माल्यानां म्लानता स्वल्पा विकारो गन्धहीनता ।
स्याद्ध्याममण्डलत्वं च सव्यानास्तरणे विषात् ॥ २४ ॥
मणिलोहमयानां च पात्राणां मलदिग्धता ।
वर्णरागप्रभास्पर्शगौरवस्नेहसंक्षयः ॥ २५ ॥
तनूनां शातनं लोम पक्ष्मणां च भवेद्विषात् ।
सन्देहे तु परीक्षेत तान्यन्यादिषु तद्यथा ॥ २६ ॥
अन्नं हालाहलाकीर्णं प्राप्य वैश्वानरो भृशम् ।
एकावर्तस्तथा रूक्षो मुहुश्चटचटायते ॥ २७ ॥
इन्द्रायुधमिवानेकवर्णज्वाला दधाति च ।
स्फुरत्कुणपगन्धैश्च मन्दतेजाश्च जायते ॥ २८ ॥
शिरोक्तिः पीनसश्लेष्म लाला नयनयोस्तथा ।
आमलत्वं क्षणाद्रोमहर्षस्तद्धूमसेवनात् ॥ २९ ॥
विषदुष्टाशनास्वादात् काकः क्षामस्वरो भवेत् ।
लीयते मक्षिका नात्र विलीना वा विपद्यते ॥ ३० ॥
अन्नं सविषमाघ्राय भृङ्गः कूजति चाधिकम् ।
शारिका सविषेऽन्नेतु विक्रोशति तथा शुकः ॥ ३१ ॥
विषान्नदर्शनान्नेत्रे चकोरस्य विरज्यतः ।
म्रियते कोकिलो मत्तः क्रौञ्चो माद्यति तत्क्षणात् ॥ ३२ ॥

नकुलो हृष्टरोमा स्यान्मयूरस्तु प्ररोदिति ।
अस्य चालोकमात्रेण विषं मन्दायते क्षणात् ॥ ३३ ॥
उद्वेगं याति मार्जारः पुरीषं कुरुते कपिः ।
गतिः स्खलति हंसस्य ताम्रचूडो विरौति च ॥ ३४ ॥
सविषं देहिभिस्सर्वं वक्ष्यमाणं करोत्यलम् ।
ओष्ठे चिमिचिमामास्ये दाहं लालाजलप्लवम् ॥ ३५ ॥
हनुस्तम्भं रसज्ञायां कुरुते शूलगौरवे ।
तथा क्षाररसाज्ञानं दाता चास्याकुलो भ्रमेत् ॥ ३६ ॥
विषदः श्यावशुष्कास्यो विलक्षो वीक्षते दिशः ।
स्वेदवेपथुमां स्तब्धो भीतः स्खलति जृम्भते ॥ ३७ ॥
स्फाटिकश्लक्ष्णः क्षारो धार्यः पुंसा मुखान्तरे ।
वेत्ति न क्षारतां यावदित्युक्तं स्थावरे विषे ॥ ३८ ॥
आकस्मिकं कृत्रिमं च विषं तद् द्विविधं मतम् ॥ ३९ ॥
एवं परीक्षितान् राज्ञा पदार्थांस्तूपविन्यसेत् ।
पात्रस्यादौ निधायाथ परमान्नं घृतं दधि ॥ ४० ॥
ततश्चेतरभागे तु फलमूलादिकं न्यसेत् ।
वामभागे तु पानीयं भक्ष्याणि परिवेषयेत् ॥ ४१ ॥
तन्मध्यभागे शाल्यन्नं सूपं तस्माच्च दक्षिणे ।
रसायनं पार्श्वभागे क्षीरं च परिवेषयेत् ॥ ४२ ॥
पात्रे दत्तानि देवाय समर्प्य स्वयमाहरेत् ।
आदौ मधुरमश्नीयान्मध्ये तु लवणाम्लकम् ॥ ४३ ॥
अन्ते तिक्तं कषायं च कटुकं चापिभक्षयेत् ।
यथारुचि यथा सात्म्यं सुखं भुञ्जीत भूपतिः ॥ ४४ ॥
सूपैर्नानाविधैश्शाकैः फलपत्रसमुद्भवैः ।
वटकैः पर्पटैस्साज्यैरन्नमश्नीत मिश्रितम् ॥ ४५ ॥
पक्वान्नं पायसं मध्ये शर्कराघृतमिश्रितम् ।
ततः फलानि भुञ्जीत मधुराम्लरसानि च ॥ ४६ ॥
पिबेच्च पानकं हृद्यं लिहेच्च कठिनं तथा ।
चूषेच्च मथितं पश्चात् सैन्धवेन च संयुतम् ॥ ४७ ॥
ततस्तक्रान्नमश्नीयाद्दधि वाद्यात्ततोऽनघम् ।
क्षीरं शर्करया सार्धं किञ्चिदुष्णं पिबेच्च वा ॥ ४८ ॥
वसन्ते कटुमश्नीयाद् ग्रीष्मे मधुरशीतलम् ।
वर्षासु च तथा क्षारं मधुरं शरदि स्मृतम् ॥ ४९ ॥
हेमन्ते स्निग्धमुष्णं च शिशिरेऽप्युष्णमाहरेत् ।
एवं भुञ्जीत यद्भूपो भाज्यभोगस्स उच्यते ॥ ५० ॥

मध्ये मध्ये पिबेद्वारि स्तोकं स्तोकं सुशीतलम् ।
भोजनस्य च रुच्यर्थं पाकार्थमशितस्य च ॥ ५१ ॥
भुक्तयादौ सलिलं पीतं कार्श्यमन्दाग्नि [1] कृत् सदा
अन्त्ये करोति स्थूलत्वं मध्ये धातुसुखावहम् ॥ ५२ ॥
पिपासायां तु जातायां स्वेच्छया पीयते जलम् ।
नियमो नात्र कालस्य तृषावेगोऽत्र वार्यते ॥ ५३ ॥
आवासः प्राणिनामापो जीवनं यत्तदाश्रितम् ।
मूर्छिता अपि जीवन्ति शीततोयेन सेचिताः ॥ ५४ ॥
दिव्यान्तरिक्षनादेयं निष्यन्दं सारसं जलम् ।
भौमं कौण्डं च ताटाकं नैर्झरं नवमं स्मृतम् ॥ ५५ ॥
स्थाल्यां पयोदनिर्मुक्तं सूर्यरश्मिविमिश्रितम् ।
सर्वदोषापहं स्वादु दिव्यमित्युच्यते जलम् ॥ ५६ ॥
प्रावृड्जलदनिर्मुक्तमव्यक्तस्वादुलक्षणम् ।
वारि स्फटिकसङ्काशमान्तरिक्षमिति स्मृतम् ॥ ५७ ॥
नद्यां शैलप्रसूतायामिन्द्रनीलसमप्रभम् ।
प्रशस्तभूमिभागस्थं नादेयं नीरमुच्यते ॥ ५८ ॥
वालुकासूकरैर्गर्तं कृत्वा यत्प्राप्यते जलम् ।
उष्णेक्षेण नैर्मल्यं याति निष्यन्दजं हि तत् ॥ ५९ ॥
नद्याश्शैलवराद्वापि स्रुतमेकत्र यत्स्वयम् ।
कुमुदाम्भोजसंछन्नं तोयं सारसमुच्यते ॥ ६० ॥
वापीकूपसमुद्भूतं नीलोत्पलसमप्रभम् ।
विमलं मधुरं स्वादु भौममम्भोऽभिधीयते ॥ ६१ ॥
स्वयं दीर्घशिलापात्रेष्वतसी पुष्पसन्निभम् ।
निर्मलं मधुरं पथ्यं सलिलं कौण्डमुच्यते ॥ ६२ ॥
शिलाबन्धेन संरुद्धं कुर्यात्पूरागतं रसम् ।
प्रतिवर्षं नवाम्भोभिर्मिश्रं ताटाकमुच्यते ॥ ६३ ॥
निर्मलं लघुपानीयमुत्तमं स्वादु शीतलम् ।
शैलसानुसमुद्भेदान्नैर्झरं परिकीर्त्तितम् ॥ ६४ ॥
दशमं केचिदिच्छन्ति वार्यं जीवनमुत्तमम् ।
नारिकेलसमुद्भूतं स्वादु वृष्यं मनोहरम् ॥ ६५ ॥
हंसोदकं तथा चान्यक्रियासंस्कारसम्भवम् ।
दिवा सूर्यांशुसंतप्तं रात्रौ चन्द्रांशुशीतलम् ॥ ६६ ॥
सकर्दमं सशैवालं पल्वलोत्थं च पाल्वलम् ।
वर्जयेद्दूषरोद्भूतं गन्धवर्णादिदूषितम् ॥ ६७ ॥

[1] दोषकृत.

अशोकपल्लवप्रख्यं शुद्धस्फटिकसन्निभम् ।
नीलोत्पलदलश्यामं कषायं मधुरं वरम् ॥ ६८ ॥
फणामुस्तकसंयुक्तैरेलोशीरकचन्दनैः ।
मृदितं मृत्तिकापिण्डं खदिराङ्गारपाचितम् ॥ ६९ ॥
निक्षिपेन्निर्मले तोये सर्वदोषहरे शुभे ।
कथितः पिण्डवासोऽयं सलिलेषु विचक्षणैः ॥ ७० ॥
सहकाररसेनापि पाटलोत्पलचम्पकैः ।
वासयेच्च यथाकालं पुष्पवासोऽयमीरितः ॥ ७१ ॥
लवङ्गोशीरकर्पूरकाश्मीरागरुचन्दनैः ।
शैलामलकतक्कोलपथ्याकर्पूरसंयुतैः ॥ ७२ ॥
विचूर्णितैस्समैरेभिस्सुशीतामलवारिणा ।
चूर्णाधिवासनं प्रोक्तं जलमाधुर्यकारकम् ॥ ७३ ॥
करकैर्मृण्मयैः श्लक्ष्णैः प्रवालारुणकान्तिभिः ।
शुल्वपात्रैस्सुरम्यैर्वा त्रिवारं परिशोधितैः ॥ ७४ ॥
नालैश्च बहुचित्राढ्यै रौप्यस्फाटिककाञ्चनैः ।
सहितैस्तैश्शुभाकारैश्शीतवस्त्रावकुण्ठितैः ॥ ७५ ॥
हृतं सुशीतलं तोयं निर्मलं मृदुवीजितम् ।
पिबेच्च स्वर्णचषकैरथवा पद्मपत्रकैः ॥ ७६ ॥
दिव्यं शरदि पानीयं हेमन्ते सरिदुद्भवम् ।
शिशिरे वारि ताटाकं वसन्ते सारसं पयः ॥ ७७ ॥
निदाघे नैर्झरं तोयं भौमं प्रावृषि पीयते ।
हंसोदकं तथा पथ्यं वार्यं पेयं यथारुचि ॥ ७८ ॥
सहजं निर्मलं वापि संस्मृतं गन्धवासनैः ।
पीयते सलिलं यत्तु पानभोगोऽयमीरितः ॥ ७९ ॥
अन्नेन पूरयेदर्धं पानेनैकं प्रपूरयेत् ।
वायुसंचलनार्थाय चतुर्थमवशेषयेत् ॥ ८० ॥
यथोक्तं भोजनं कृत्वा क्षालयेदुष्णवारिणा ।
कपोलदन्तमध्यस्थमुच्छिष्टं संत्यजेत्ततः ॥ ८१ ॥
काष्ठेन पिचुमन्दस्य रेचकस्य तृणस्य च ।
उत्तमं पिचुमन्दस्य व्रणकृद्वेणुजस्य च ॥ ८२ ॥
लक्ष्मीं हरति सर्वत्र [1] व्रणकृत् काष्ठमायतम् ।
सौवर्णं राजतं ताम्रमुत्तमं मध्यमाधमे ॥ ८३ ॥
मुद्गपिष्टेन हस्तस्य चिक्कणं संत्यजेत्ततः ।
करं च वासनायुक्तं वस्त्रेण परिमार्जयेत् ॥ ८४ ॥

[1] व्रणजं.

यामादर्वाङ् न भुञ्जीत यामयुग्मं न लंघयेत् ।
रात्रौ यामान्तरे भुक्त्वा शय्यां यामत्रयं भजेत् ॥ ८५ ॥
अन्नादुदीर्णे जातायां बुभुक्षायां च भोजनम् ।
आयुर्बलं च वर्णं च संवर्धयति देहिनाम् ॥ ८६ ॥
अङ्गमर्दननिर्हारभारोत्क्षेपोपवेशनम् ।
स्नानाद्यं च कियत्कालं भुक्त्वा कुर्यान्न बुद्धिमान् ॥ ८७ ॥
भोजनानन्तरं वामपार्श्वस्थो घटिकाद्वयम् ।
शयीत निद्रया हीनो यद्वा शतपदं व्रजेत् ॥ ८८ ॥
पादाभ्यङ्गस्य भोगोऽयमधुना परिकीर्त्यते ।
वामपार्श्वे शयानस्सन् पादावभ्यञ्जयेत्सुधीः ॥ ८९ ॥
सर्पिषा शतधौतेन नवनीतेन वा नृपः ।
दध्ना तैलेन पयसा तक्रेणाभि षुतेन वा ॥ ९० ॥
श्रीखण्डक्षोदनीरेण वदर्याः फेनकेन वा ।
पादसंवाहदक्षाणां कामिनीनां मनोहरैः ॥ ९१ ॥
अशोकपल्लवप्रख्यैः करैरत्यन्तपेशलैः ।
वसन्ते सर्पिषा दध्ना शीतेन पयसापि वा ॥ ९२ ॥
निदाघे नवनीतेन काञ्जिकैः कोरिफेनकैः ।
वर्षासु पयसाभ्यङ्गः पादौ तक्रेण वा पुनः ॥ ९३ ॥
शतधौतेन शरदि सर्पिषा चन्दनोदकैः ।
हेमन्ते शिशिरे चैव तैलेनाभ्यञ्जयेत्पदे ॥ ९४ ॥
पश्चात्प्रक्षालयेत्पादौ सुखस्पर्शेन पाथसा ।
मसूरयवपिष्टैश्च हरिद्राचूर्णमिश्रितैः ॥ ९५ ॥
उद्वर्त्य च पुनः पादौ क्षालयेत्सुखवारिणा ।
एवं यः कारयेद्राजा भोजनादूर्ध्वमन्वहम् ॥ ९६ ॥
पादाभ्यङ्गस्य भोगोऽयं कथितो भोगवेदिभिः ।
पादाभ्यङ्गे कृते पश्चात्प्रविश्य सुखमन्दिरम् ॥ ९७ ॥
ताम्बूलभोगमन्विच्छं स्ताम्बूलास्वादनं चरेत् ।
वेलावर्तिसमुद्भूतां स्तथेश्वपुरोद्भवान् ॥ ९८ ॥
कोट्टिकापुरजान्वापि क्रमुकौघान् सुपाकिनः ।
भङ्क्त्वा पाटलसंकाशान् कषायमधुरात्मकान् ॥ ९९ ॥
दलीकृत्योष्णतोयेन पक्त्वा शोष्य सुधर्षितान् ।
माकन्दफलवृन्तोत्थनिर्यासिन सुभावितान् ॥ १०० ॥
कर्पूरवारिणा सिक्तान् श्रीखण्डक्षोदमिश्रितान् ।
कस्तूरीकल्कसंयुक्तां श्छायाशुष्कान् मनोहरान् ॥ १०१ ॥

तरुणानि सवल्कानि क्वथितानि प्रयत्नतः ।
वनवासप्रभूतानि क्रमुकस्य फलानि वा ॥ १०२ ॥
कृत्वा त्वचा वियुक्तानि छायायां शोषितानि च ।
चतुर्भागैर्वियुक्तानि ताम्बूलार्थं समाहरेत् ॥ १०३ ॥
वनवासे राष्ट्रराज्ये संभूतानि वराणि च ।
कर्पूरवल्लीजातानि नागवल्ल्युद्भवानि च ॥ १०४ ॥
उषितानि समावल्ल्यां वत्सरं भारकेषु च ।
नारियोदकसिक्तानि पाण्डुराणि वराणि च ॥ १०५ ॥
पर्णानि प्रान्तकृष्णानि द्वापञ्चाशन्मितानि च ।
वहिस्थकृष्णवर्णानि पिटके पिहितानि च ॥ १०६ ॥
शैलोदकसमुद्भूतशिलापाकसमुद्भवम् ।
मुक्ताशुक्तिभवं चूर्णं पिटकेषु विधारितम् ॥ १०७ ॥
अपक्वमुज्ज्वलं स्वच्छं कर्पूरं स्फटिकोपमम् ।
मलयाचलशृङ्गोत्थलतानिर्याससंभवम् ॥ १०८ ॥
सहकारसमानेन सौरभेण समन्वितम् ।
ईशावासाभिधानं च कर्पूरं सहजं वरम् ॥ १०९ ॥
समानाय्य महीपालस्ताम्बूलार्थं प्रकल्पयेत् ।
कस्तूरीचूर्णकं श्लक्ष्णं घनसारस्य चूर्णकम् ॥ ११० ॥
मिश्रयित्वा समं कृत्वा ताम्बूलार्थं नियोजयेत् ।
कस्तूरीशशितक्कोलजातीफलसुचूर्णकम् ॥ १११ ॥
श्लक्ष्णं करम्भकं हृद्यं नानापरिमलोत्कटम् ।
खदिरक्वाथचूर्णं च कस्तूरीक्षोदमिश्रितम् ॥ ११२ ॥
श्रीखण्डकल्कसंयुक्तं कर्पूररजसान्वितम् ।
मेलयित्वा समैर्भागैर्गुटिकाः कल्पितास्शुभाः ॥ ११३ ॥
त्रिदोषशमनीः कण्ठ्या दन्तानां च बलावहाः ।
अन्यत्खादिरसारस्य चूर्णं कोष्ठार्धसम्मितम् ॥ ११४ ॥
जातीफलस्य चूर्णेन मिश्रितं सुखरञ्जनम् ।
जम्बीरवीजपूरस्य कलिकाभिस्समन्वितम् ॥ ११५ ॥
कर्पूरपूर्वं खादेच्च तदनुक्रमुकान्वितम् ।
प्रातः पूगफलाधिकं मध्याह्ने चूर्णकं बहु ॥ ११६ ॥
सायाह्ने च दलाधिकयमायुरारोग्यवर्धनम् ।
ताम्बूलं नातिबालं च नातिवृद्धं न जन्तुजम् ॥ ११७ ॥
न भवेद्वत्सरातीतं नैव दग्धं न शोषितम् ।
न सेव्यं श्यामलं क्लिन्नं तिलकाक्तं च धीमता ॥ ११८ ॥

खण्डितं घर्षितं लिप्तं शशिकस्तूरिकादिभिः ।
वासितं विविधैः पुष्पैः पूगं शोधितमुच्यते ॥ ११९ ॥
पर्णमूले वसेद् व्याधिः पर्णाग्रे पापसंभवः ।
चूर्णपर्णं हरेदायुश्शिरा बुद्धिविनाशिनी ॥ १२० ॥
तस्मादग्रं च मूलं च शिरां चैव विवर्जयेत् ।
ताम्बूलपत्राणि हरन्ति वातं पूगीफलं हन्ति कफातिवृद्धिम् ॥ १२१ ॥
चूर्णं हरत्याशु च वह्निमान्द्यं निहन्ति पित्तं खदिरस्य सारः ॥
ताम्बूलाग्रे निवसति रमा दक्षिणे वागधीशः
पृष्ठे ज्येष्ठा गिरिवरसुता वामभागे स्थिता स्यात् ।
अन्तर्विष्णुर्बहिरुडुपतिश्शङ्करस्सर्वकोणे
मूले मृत्युर्वसति मदनस्सर्वतो नागवल्ल्याः ॥ १२२ ॥
जातीफलं कषायोष्णं कटु कण्ठामयापहम् ।
वातातिसारमेहघ्नं वृष्यं दीपनदं लघु ॥ १२३ ॥
लवङ्गं लघु चक्षुष्यं कटु स्वादु क्षयापहम् ।
तृट्छर्दिहिध्मशूलघ्नं वह्निकृच्छ्वासखासजित् ॥ १२४ ॥
कर्पूरश्शीतलो वृष्यश्चक्षुष्यश्चित्तरञ्जकः ।
कफदाहस्य वैरस्य मेदस्वेद विषापहः ॥ १२५ ॥
प्रियंगुश्शीतलो वातज्वरपित्तास्रदाहजित् ।
आस्यदोषहरो हृद्यश्शुक्रवृद्धिकरो वरः ॥ १२६ ॥
दन्तदौर्बल्यपाण्डुत्वनेत्ररोगबलक्षयान् ।
वितनोत्याशु मेहांश्च ताम्बूलमतिसेवनात् ॥ १२७ ॥
कुष्ठं भवति मेहो वा मूत्रदोषोऽथवा भवेत् ।
क्षीरं पीत्वा मुहूर्ते तु ताम्बूलं यदि खादते ॥ १२८ ॥
हृच्छूलीजायते सद्यः पित्ताधिक्यं भवेत्तथा ।
तस्मान्मुहूर्तादुपरि ताम्बूलं भक्षयेत्सदा ॥ १२९ ॥
भुक्त्वान्ते सलिलं पीत्वा गृहीत्वा विश्वभेषजम् ।
प्रतीक्ष्य घटिकामेकां कार्यं ताम्बूलचर्वणम् ॥ १३० ॥
निष्कद्वयं पूगफलं तु पर्णं निष्कैर्दशतं चूर्णमितं तु शाणम् ।
पूर्वाह्णकाले त्वथ भोजनान्ते वेदं निशायां लयमेवखादम् ॥ १३१ ॥
आदौ विषोपमं पीतं द्वितीये भेदकं स्मृतम् ।
पश्चात्सुधोपमं विद्याद्रसं ताम्बूलचर्वणे ॥ १३२ ॥
स्वर्णवर्णानि ताम्बूलीपर्णानि सुमृदूनि च ।
मीलितानि सुगन्धैश्च नवपूगदलान्यपि ॥ १३३ ॥
जितेन्दुवर्णं चूर्णं च कर्पूरघुटिकायुतम् ।
खादिरैस्सकलैर्युक्तं मृगनाभिविमिश्रितम् ॥ १३४ ॥

ताम्बूलं लोलनेत्राणां करसंपुटसंस्थितम् ।
तदीयकरभूषाणां रत्नैः किम्मीरितप्रभम् ॥ १३५ ॥
विलसद्दशनज्योतिर्मिश्रं हासप्रभायुतम् ।
लोलपाङ्गव्यतिकरप्राप्तनीलोत्पलच्छवि ॥ १३६ ॥
तदीयाधरतश्चापि माधुर्येण विराजितम् ।
चर्वेत्सर्वातिशायिन्या प्रेयस्या वेष्टितो नृपः ॥ १३७ ॥
इत्थं विविधयोगेन ताम्बूलं पृथिवीभुजा ।
यत् खाद्यते स ताम्बूलभोगश्चतुरवर्णितः ॥ १३८ ॥
एवं चर्वितताम्बूलः शय्यामधिसमाश्रयेत् ।
शय्याभोगोऽयमधुना वर्ण्यते सुखदायकः ॥ १३९ ॥
हंसपिञ्छमयी कापि शाल्मलीतूलजा वरा ।
कार्पासरचिता चान्या केसरैरितरा कृता ॥ १४० ॥
पल्लवैः कल्पिता काचित् काचित् कुसुमनिर्मिता ।
पानीयपूरिता काचिच्छय्यैवं सप्तधा स्मृता ॥ १४१ ॥
दन्तांघ्रिर्लोहचरणस्साष्टापदपदस्तथा ।
अचलश्चपलश्चैव वेष्टिकः पट्टिकामयः ॥ १४२ ॥
डोलाख्यश्चेति कथिता मञ्चा विद्वद्भिरष्टधा ।
शय्याया लक्षणं वक्ष्ये मञ्चकानां तथैवच ॥ १४३ ॥
मरालजठरोद्भूतैर्मृदुभिः पिञ्छगुच्छकैः ।
श्लक्ष्णेन चर्मणा नद्धैश्शय्या हंसी महीभुजाम् ॥ १४४ ॥
शाल्मलीफलगर्भोत्थैस्तूलकैर्बीजवर्जितैः ।
घनेन वाससा नद्धैश्शल्मलीतूलिका भवेत् ॥ १४५ ॥
निर्बीजतूलमास्तीर्य मृदुनावेष्ट्य वाससा ।
या शय्या क्रियते मृद्वी सा तु कार्पासजा मता ॥ १४६ ॥
केसरैः पद्मसंभूतैर्नागपुष्पसमुद्भवैः ।
सुरभीकुसुमोत्थैश्च तथा कुंकुमसंभवैः ॥ १४७ ॥
पट्टवस्त्रेण चित्रेण गुम्फितैश्चारुचित्रितैः ।
शय्या केसरजा ख्याता सुगन्धिः पृथिवीभुजाम् ॥ १४८ ॥
कोमलोत्पलकल्हाररम्भाकङ्केलिपल्लवैः ।
कोमलैः कल्पिता शय्या शीतला पल्लवाभिधा ॥ १४९ ॥
मल्लिकापाटलीपुष्पैः कुसुमैश्चम्पकैस्तथा ।
अन्यैस्सुगन्धिभिः पुष्पैरपवृत्तैः कृता तु या ॥ १५० ॥
शय्या कुसुमजा नाम कामकेलिसुखावहा ।
चर्मजा वारिणा पूर्णा तोया शय्या प्रकीर्त्तिता ॥ १५१ ॥

द्विपदन्तकृतैः पादैश्चतुर्भिरुपशोभितैः ।
दन्तांघ्रिर्नाम मञ्चोऽयं सर्वदन्तमयश्शुभः ॥ १५२ ॥
ताम्रारकूटघटितचरणैस्तन्मयैश्शुभैः ।
लोहमञ्चकनामायं सुदृढः परिकीर्त्तितः ॥ १५३ ॥
चारुचामीकरानद्ध रचनापरिरञ्जितः ।
अष्टापदमयः प्रोक्तो मञ्चकोऽयं चतुष्पदः ॥ १५४ ॥
यन्त्रप्रतिकृतैर्नालैरानन्दं तनुते नदन् ।
रवमञ्चस्समाख्यातो रतिकेलिषु कामिनाम् ॥ १५५ ॥
उपवेशनमात्रेण गच्छन्नूर्ध्वमधश्चयः ।
दृढांघ्रिश्चारुरूपश्च चलमञ्चः प्रकीर्त्तितः ॥ १५६ ॥
त्वग्भिर्वेत्रस्य वाह्याभिस्तनुभिर्गुम्फितो घनैः ।
कुटिलैश्चरणैर्युक्तो वेत्रमञ्चः प्रकीर्त्तितः ॥ १५७ ॥
कार्पासगुणकूलसाभिः पट्टिकाभिस्सुगुम्फितः ।
दीर्घाभिश्चित्रवर्णाभिर्मञ्चोऽयं पट्टिकाभिधः ॥ १५८ ॥
श्रीखण्डदारुघटितो लसत्काञ्चनभूषितः ।
खचितो दिव्यरत्नैश्च मत्तवारणशोभितः ॥ १५९ ॥
सौवर्णश्रृंखलाबद्धो लम्बमानस्स दोलनः ।
किञ्जल्कशय्यया युक्तो दोलामञ्चस्सुखप्रदः ॥ १६० ॥
मञ्चयोग्यानथो वक्ष्ये वृक्षान्मानं च तद्गतम् ॥ १६१ ॥
असनस्यन्दनचन्दनहरिद्रसुरदारुतिन्दुकास्साला: ।
काश्मर्यञ्जनवर्त्मकशाकोटाशिंशुपाश्च शुभाः ॥ १६२ ॥
अवनिजलानिलहस्तिप्रपातिता मधुविहङ्गकृतनिलया: ।
चैत्यश्मशानपतितार्धशुष्कवल्लीपिनद्धाश्च ॥ १६३ ॥
कण्टकिनो ये च स्युर्महासङ्गमोद्भवा ये च ।
सुरभवनजाश्च न शुभा चे चापरयाम्यदिक्पतिता: ॥ १६४ ॥
प्रतिषिद्धवृक्षनिर्मितशयनासनसेविनां कुलविनाशः ।
व्याधिभयं व्ययकलहा भवन्त्यनर्थाश्च नैकविधाः ॥ १६५ ॥
अन्योन्यमुदरासक्तं विषमं तु यवाष्टकम् ।
कर्मांगुलमिति प्रोक्तं तेनमानेन कारयेत् ॥ १६६ ॥
नृपाणामंगुलशतं शय्या दीर्घा जयावहा ।
नवतिर्नृपपुत्रस्य सा षड्ना तु मन्त्रिणः ॥ १६७ ॥
द्वादशोना बलेशस्य षट्त्रिकोना पुरोधसः ।
दैर्घ्यार्धमष्टभागोनो विष्कम्भः परिकीर्त्तितः ॥ १६८ ॥
आयामत्र्यंशतुल्यश्च पादोच्छ्रायः प्रकीर्त्तितः ।
सकुन्ये शिरसि ज्ञेयश्शय्यायां शुभकारकः ॥ १६९ ॥

ऊनाधिका तु या शय्या स्वामिनो न शुभप्रदा ।
खट्वादैर्घ्ययुता शय्या तदर्धं विस्तृता मता ॥ १७० ॥
उत्सेधोहस्तमात्रं वा तदर्धं वा क्वचिन्मतः ।
हंसरोमभिराकीर्णं तूलैः कार्पासकैस्तु वा ॥ १७१ ॥
देवाङ्गवेष्टितं कुर्यादुपधानं मनोहरम् ।
वसन्ते हंसजा शय्या क्रीडायां पुष्पपत्रजा ॥ १७२ ॥
निदाघे तूलजा शय्या मध्याह्ने तोयजा शुभा ।
हेमन्ते शिशिरे चैव वर्षासु च विचक्षणः ॥ १७३ ॥
भजेत शय्यां कार्पासीं नृपश्शीतापनुत्तये ।
शरत्काले तु कैञ्जल्कं डोलामञ्चं मनोहरम् ॥ १७४ ॥
अधितिष्ठेन्महीपालो भोगार्थं सुविचक्षणः ।
एवंविधेषु मञ्चेषु शय्यास्वेवंविधासु च ॥ १७५ ॥
शेते विशां पतिर्यत्तु शय्याभोगः प्रकीर्त्तितः ।
धूपभोगोऽयमधुना वक्ष्यते सौरभोत्कटः ॥ १७६ ॥
लाक्षागुग्गुलकर्पूरकालकुन्दुरुसिंह्लकम् ।
श्रीखण्डदारु सरलं लघु कोष्ठं च वालकम् ॥ १७७ ॥
मांसी कुंकुमपथ्याश्च कस्तूरी पूतिवीजकं ।
शङ्खो नाभिर्नखश्चैव शिलामधु घृतं गुडः ॥ १७८ ॥
समान्येतानि चूर्णानि द्रवद्रव्यं विहाय च ।
द्विगुणं लघुकर्पूरचूर्णभूतोऽयमुत्तमः ॥ १७९ ॥
एतान्येव हि सिल्हेन मिश्रयेन्मधुसर्पिषा ।
गुडेन पिण्डयेत् पश्चात् पिण्डधूपोऽयमुत्तमः ॥ १८० ॥
द्रव्याण्येतानि तोयेन पिष्टानि मधुसर्पिषा ।
वर्त्तिरूपाणि कल्प्यानि वर्त्तिधूपो मनोहरः ॥ १८१ ॥
रीतिरूप्यमयो वापि सुवर्णघटितोऽपि वा ।
खगोऽवापि मृगो वापि सुरन्ध्रस्संपुटार्धकः ॥ १८२ ॥
अङ्गारगर्भिते पिण्डे नालतो धूपमुद्गिरेत् ।
मुखकर्णादिभिश्छिद्रैः पिण्डधूपेत्वयं क्रमः ॥ १८३ ॥
एवं नानाविधैर्धूपैर्भवने सुरभीकृतं ।
शयीत भूपश्शय्यायां रत्नदीपप्रभान्वितं ॥ १८४ ॥
दीपः प्रदक्षिणावर्तो निष्प्रकम्पोऽतिभासुरः ।
आयतो घनमूर्त्तिश्च निश्शब्दो रुचिरस्तथा ॥ १८५ ॥
चञ्चत्काञ्चनसङ्काशः प्रभामण्डलमण्डितः ।
गृहालोकाय माङ्गल्यः कर्तव्यश्शुभकांक्षिणा ॥ १८६ ॥

सस्फुलिङ्गोऽल्पमूर्तिश्च वामावर्तस्तनुप्रभः ।
वातकीटाद्यभावेऽपि विधूमे तैलवर्त्तिमान् ॥ १८७ ॥
विकीर्णार्चिस्सशब्दश्च प्रदीपो मन्दिरे स्थितः ।
पुरुषाणामनिष्टानि प्रकाशयति निश्चितम् ॥ १८८ ॥
मङ्गलावहदीपार्चिःप्रभामण्डलमण्डिते ।
भवने काञ्चनमये पुष्पमाल्यसुशोभिते ॥ १८९ ॥
कान्तया सह निर्वर्त्य नर्मगोष्ठीपरम्पराम् ।
सुप्तो मङ्गलवाद्यानां वन्दिनां ध्वनिभिश्शुभैः ॥ १९० ॥
ब्राह्मे मुहूर्ते सम्प्राप्ते प्रबुध्येत महीपतिः ।
उत्थाय माङ्गल्यद्रव्याण्यवेक्षेत ततः परम् ॥ १९१ ॥
दक्षिणे हस्तमाकाशमग्निं धेनुं सवत्सकाम् ।
रत्नानि दर्पणं दीपं वामे च वनिताननम् ॥ १९२ ॥
गोक्षीरं स्वर्णकलशं राजानं गुरुमेव च ।
मर्कटं दधि दूर्वाञ्च पित्रोर्वक्त्रं च देवताः ॥ १९३ ॥
एवं दृढशरीरस्सन् तत्तत्कालोचितान् शुभान् ।
नानाविधान् भोगभेदान् निषेवेत महीपतिः ॥ १९४ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारण चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद- श्रीमत्केलदिबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसार- भूते श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले भोजनादिशयनोत्थानान्त वर्णनं नाम विंशस्तरङ्गः.

अथ एकविंशस्तरंगः

स्वामिन्! दृढशरीरेण भोगास्सेव्या इतीरितम् ।
किन्तच्छरीरदार्ढ्यस्य कारणं तद्वदस्व मे ॥ १ ॥
पुत्र! ते तद् ब्रवीम्यद्य यच्छ्रोतुमभिकांक्षसे ।
आयुर्वेदविधानेन सेवेतैकं रसायनम् ॥ २ ॥
दृढगात्रो भवेत्तेन वलीपलितवर्जितः ।
जीवेच्च सुचिरं कालं सर्वरोगविवर्जितः ॥ ३ ॥
तमायुर्वेदमधुना ब्रवीम्यवहितः शृणु ।

आयुर्वेदः ॥

ब्रह्मा स्मृत्वायुषो वेदं प्रजापतिमजिग्रहीत् ॥ ४ ॥
सोऽश्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान् मुनीन् ।
तेऽग्निवेश्यादिकांस्ते तु पृथक् तन्त्राणि तेनिरे ॥ ५ ॥
आयुः कामयमानेन धर्मार्थसुखसाधनम् ।
आयुर्वेदोपदेशेषु विधेयः परमादरः ॥ ६ ॥
अष्टाङ्गस्थानषट्कश्च शल्यदंष्ट्रजराविषान् ।
कायबालग्रहोर्ध्वाङ्गशल्यदंष्ट्राजराविषान् ॥ ७ ॥
अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संस्थिता ।
सर्वाङ्गसंस्थितानां च ज्वरादीनां रुजामपि ॥ ८ ॥
यत्स्यादुपशमे युक्तं कायतन्त्रं तदुच्यते ।
बालरोगचिकित्सा स्याद्बालतन्त्रमुदीरितम् ॥ ९ ॥
यक्षरक्षःपिशाचादिग्रहोपहतचेतसाम् ।
शान्तिकर्मविधानं यद् ग्रहतन्त्रं प्रकीर्त्तितम् ॥ १० ॥
कण्ठादूर्ध्वस्थिताङ्गेषु संस्थितानां रुजामपि ।
यच्चोपशमनं तत्तु शालाक्यं तन्त्रमीरितम् ॥ ११ ॥
तृणकाष्ठाश्मनखरजातदुष्टव्रणेषु च ।
गर्भस्थशल्योद्धरणं यत्तत्स्याच्छल्यतन्त्रकम् ॥ १२ ॥
सर्पादिविषशान्त्यर्थं यत्तन्त्रमगदाभिधम् ।
वयसो वृद्धिकृद्यत् स्यात्तन्त्रं तद्धि रसायनम् ॥ १३ ॥
अल्पदुष्टपरिक्षीणविशुष्यद्रेतसामपि ।
आप्यायनादिजननं वृषतन्त्रं तदीरितम् ॥ १४ ॥
इत्यष्टाङ्गानि चोक्तानि स्थानषट्कमितीरितम् ।
शिरोऽन्तरादिर्द्वौ बाहू सक्थिनी च समासतः ॥ १५ ॥

षडङ्गमङ्गं प्रत्यङ्गं तस्याक्षे हृदयादिकम् ।
आदानं रोगहेतुः स्यान्निदानं रोगलक्षणम् ॥ १६ ॥
चिकित्सा तत्प्रतीकार इति स्कन्धत्रयं [1] विदुः । ॥ १७ ॥
रसं वैद्यं भवेद्दैवं मानुषं मूलिकादिभिः ।
आसुरं शस्त्रदाहाभ्यां सिद्धवैद्यं तु मान्त्रिकम् ॥ १८ ॥

वैद्यलक्षणम्=

गुरोरधीताखिलवैद्यविद्यः पीयूषपाणिः कुशलः क्रियासु ।
गतस्पृहो धैर्यधरः कृपालुश्शुद्धोऽधिकारी भिषगीदृशस्स्यात् ॥ १९ ॥
पताकाकुम्भपाथोजमत्स्यचापाङ्कपाणिमान् ।
अनामा दग्धरेखाङ्कस्स स्यादमृतहस्तकः ॥ २० ॥
अनैष्ठिकः कृपामुक्तो लुब्धो गुरुविवर्जितः ।
कृष्णरेखाकरो वैद्यो दग्धहस्तस्स निन्दितः ॥ २१ ॥
त्यजेदार्तभिषग्भूपैर्दिष्टं तेषां द्विषं द्विषम् ।
हीनोपकरणं व्यग्रमविधेयं गतायुषम् ॥ २२ ॥
चण्डं शोकातुरं भीरुं कृतघ्नं वैद्यमानिनम् ।

दोषाः तद्भेदाः=

प्रदद्याद्भेषजं त्वेतदन्यस्मै गुणशालिने ॥ २३ ॥
देहे चर्मास्थिमांसासृङ्मज्जाशुक्रादिसंयुते ।
वायुः पित्तं कफश्चेति त्रयो दोषास्समासतः ॥ २४ ॥
विकृताविकृता देहं घ्नन्ति ते वर्तयन्ति च ।
ते व्यापिनोऽपि हृन्नाभ्योरधो मध्योर्ध्वसंश्रयाः ॥ २५ ॥
वयोहोरात्रिभुक्तानां तेऽन्तमध्यादिगाः क्रमात् ।
तैर्भवेद्विषमस्तीक्ष्णो मन्दाग्निश्च समैस्सम: ॥ २६ ॥
कोष्ठक्रूरो मृदुर्मध्यो मध्यस्स्यात्तैस्समैरपि ।
शुक्रार्तवस्थैर्जन्मादौ विषेणेव विषक्रमेः ॥ २७ ॥
तैश्च तिस्रः प्रकृतयो हीनमध्योत्तमाः [2] क्रमात् ।
समधातुस्समस्तासु श्रेष्ठानन्दा द्विदोषजा ॥ २८ ॥
पक्वाशयकटीसक्थिश्रोत्रार्थिस्पर्शनेन्द्रियम् ।
स्थानं वा तस्य तत्रापि पक्वाधानं विशेषतः ॥ २९ ॥
नाभिरामाशयः स्वेदो लसिको रुधिरं रसः ।
दृक् स्पर्शनं च पित्तस्य नाभिरत्र विशेषतः ॥ ३० ॥
उरः कण्ठशिरः क्लोमपर्वाण्यामाशयो रसः ।
मेदो घ्राणं च जिह्वा च कफस्य सुतरामुरः ॥ ३१ ॥

---

1) मतम्. 2) पृथक्.

प्राणादिभेदात् पञ्चात्मा वायुः प्राणोऽत्र मूर्धगः ।
उरः कण्ठचरो बुद्धिहृदयेन्द्रियचित्तधृत् ॥ ३२ ॥
ष्ठीवनक्षवथूद्गारनिश्वासान्नप्रवेशकृत् ।
उरः स्थानमुदानस्य नासानाभिगले चरेत् ॥ ३३ ॥
वाक्प्रवृत्तिप्रयत्नोर्जा बलवर्णस्मृतिक्रियः ।
व्यानो हृदि स्थितः कृत्स्नदेहचारी महाजवः ॥ ३४ ॥
गत्यवक्षेपणोत्क्षेपनिनिमेषोन्मेषमादिकाः ।
प्रायस्सर्वाः क्रियास्तस्मिन् प्रतिबद्धाश्शरीरिणाम् ॥ ३५ ॥
समानोऽग्निसमीपस्थः कोष्ठे चरति सर्वतः ।
अन्नं गृह्णाति पचति विवेचयति मुञ्चति ॥ ३६ ॥
अपानोऽपानगश्श्रोणिबस्तिमेढ्रोरुगोचरः ।
शुक्रार्तवशकृन्मूत्रगर्भनिष्क्रमणक्रियः ॥ ३७ ॥
पित्तं पञ्चात्मकं तत्र पक्वमाशयमध्यगम् ।
पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयात् ॥ ३८ ॥
त्यक्तद्रवत्वं पाकादिकर्मणा नलशब्दितम् ।
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा ॥ ३९ ॥
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् ।
करोति बलदानेन पाचकं नाम तत् स्मृतम् ॥ ४० ॥

अग्निप्रमाणम्=

गजोष्ट्रतुरगादीनां वह्नेरंगुष्ठमात्रतः ।
मनुष्यादिमृगादीनां यवमात्रोऽनलो भवेत् ॥ ४१ ॥
गृध्रोलूकवकादीनामणुमात्रोऽनलो भवेत् ।
पिपीलिकादिजन्तूनां केशाग्रं स्याद्धुताशनः ॥ ४२ ॥
रसस्सप्तघटीजीर्णः संहिता घटिपञ्चके ।
शीताम्बु जीर्यते यामे यामार्धे श्रितशीतकम् ॥ ४३ ॥
तदर्धे च श्रितोष्णं स्यात् क्वाथं च घटिकात्रये ।
षष्ठे चान्नरसो जीर्णस्त्वन्नं यामद्वयेऽपि च ॥ ४४ ॥
पिष्टं विंशद्घटीजीर्णं घटीद्वादशके पयः ।
चतुर्दशसु दध्यन्नं त्रयोदशसु तक्रयुक् ॥ ४५ ॥
अष्टादशे तु पललं घृतान्नं यामयुग्मके ।
द्रव्याणामेवमाख्याता जीर्णता शास्त्रकोविदैः ॥ ४६ ॥
वायुश्शीतः खरो रूक्षः पित्तमुष्णं च पाचनम् ।
स्निग्धश्शीतो गुरुर्मन्दश्श्लक्ष्णो मृत्स्नस्स्थिरः कफः ॥ ४७ ॥
संसर्गस्सन्निपातश्च तद्द्वित्रिक्षयकोपतः ।

षड्रसाः=

रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः ॥ ४८ ॥

षड्द्रव्यमाश्रितास्ते च यथापूर्वं बलावहाः ।
तत्राद्या मारुतं घ्नन्ति त्रयस्तिक्तादयः कफम् ॥ ४९ ॥
कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते ।
मधुरो बृम्हणस्स्निग्धस्त्वम्लो हृद्यश्च लोचकः ॥ ५० ॥
तिक्तस्तु शोषणश्शोधी कषायस्त्वधिरोपणः ।
लवणः पाचनः क्लेदी कटुश्शोष्योऽनलापहः ॥ ५१ ॥
आदौ षड्रसमप्यन्नं मधुरीभूतमीरयेत् ।
फेनभूतं कफं यातं विदाहादम्लतां ततः ॥ ५२ ॥
पित्तमामाशयात्कुर्याच्च्यवमानं च्युतं पुनः ।
अग्निना शोषितं पक्वं पिण्डितं कटु मारुतम् ॥ ५३ ॥
भौमाप्याग्नेयवायव्याः पञ्चोष्माणस्सनाभसाः ।
पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यनु ॥ ५४ ॥
चयप्रकोपप्रशमा वायुर्ग्रीष्मादिषु त्रिषु ।
वर्षादिषु तु पित्तस्य श्लेष्मणश्शिशिरादिषु ॥ ५५ ॥
रोगाक्रान्तशरीरस्य स्थानान्यष्टौ परीक्षयेत् ।

रोगपरीक्षा.

नाडीमूत्रमलं जिह्वा शब्दस्पर्शशरीरदृक् ॥ ५६ ॥
दोषे कोपे घने चाल्पे पूर्वं नाडीं परीक्षयेत् ॥ ५७ ॥
तन्वत्कूर्मो देहिनां नाभिदेशे वामे पुच्छं तस्य वक्त्रं तु याम्ये ।
ऊर्ध्वे भागौ हस्तपादौ च वामौ तस्यैवाधस्संस्थितौ दक्षिणौ च ॥
वक्त्रे नाडीद्वयं तस्य पुच्छे नाडीद्वयं तथा ।
पञ्च पञ्च करे पादे वामदक्षिणभागयोः ॥ ५९ ॥
नाभेरधः प्रसृतयोर्दश यान्त्यधस्था
दूर्ध्वं तथा प्रसृतयोर्दश तद्वदेव
द्वे द्वे शिरं प्रविततं प्रसृते च तिर्यक्
युक्ताश्चतुर्भिरिति विंशतिरत्र काये ॥ ६० ॥
द्विसप्ततिसहस्राणि नाड्यो मुख्यास्तु षोडश ।
तासां स्थानानि वक्ष्यामि बाह्वोर्हस्तिनिचित्तिनी ॥ ६१ ॥
कुहूः कुचे दक्षिणे च पूषा वामकुचे तथा ।
अलम्बुसा च हृदये नसीडा पिङ्गला मते ॥ ६२ ॥
सुषुम्ना च भ्रुवोर्मध्ये गजजिह्वा गले तथा ।
गुह्यनाभिप्रदेशे च नेत्रयोस्सूक्ष्मरन्ध्रके ॥ ६३ ॥
पादांगुष्ठे रुद्रनाडी ब्रह्मनाडी च गुह्यके ।
ऊर्ध्वनाडी कपोले च गान्धारी ब्रह्मरन्ध्रके ॥ ६४ ॥
पुंसां च दक्षिणे हस्ते वामहस्ते च योषिताम् ।
कराग्रे मणिबन्धे च स्फुरन्नाडीं परीक्षयेत् ॥ ६५ ॥

यथा वीणागता तन्त्री सर्वरागप्रकाशिका ।
तथा हस्तगता नाडी सर्वरोगप्रकाशिका ॥ ६६ ॥
निपीड्यांगुष्ठमूलादावंकुशाकृतिकांगुलिः ।
त्र्यंगुल्यग्रैः परीक्ष्येत धमनीं रोगभेदिनीम् ॥ ६७ ॥
ब्रह्मनाडी वायुजन्या विष्णुनाडी च पित्तजा ।
रुद्रनाडी कफोत्पन्ना तर्जन्यादिषु वक्ष्यते ॥ ६८ ॥
वाता वक्रगतिर्नाडी पित्ता चपलवाहिनी ।
श्लेष्मा स्थिरगतिश्चैव सर्वलिङ्गा तु सर्वगा ॥ ६९ ॥
व्यायामतृष्णातपपीडितस्य बुभुक्षतो भुक्तवतोऽपि जन्तोः ।
अभ्यञ्जनस्नानवधूपभोगक्रियासु नाडी न विबोधनीया ॥ ७० ॥
पादयोर्हस्तयोर्घ्राणमूलयोः कर्णमूलयोः ।
पादयोर्नाडिकास्थानं गुल्फस्याधोऽङ्गुलत्रयम् ॥ ७१ ॥
हस्तयोस्तु प्रकोष्ठान्ते मणिबन्धेऽङ्गुलत्रयम् ।
नासामूलेऽङ्गुलद्वन्द्वं कर्णमूलेऽङ्गुलान्वितम् ॥ ७२ ॥
इत्येवं नाडिकास्थानं स्पर्शनाद् ज्ञेयमीरितम् ।
अजीर्णे रक्तपित्ते च पादनाडीं विनिर्दिशेत् ॥ ७३ ॥
क्षयश्वासादिगुल्मेषु ज्वरे शीतज्वरेऽपि च ।
सन्निपातादिरोगेषु हस्तनाडीं विनिर्दिशेत् ॥ ७४ ॥
व्रणे भगन्दरे चार्शोल्लताशीर्षव्यथासु च ।
एवमादिषु रोगेषु नासानाडीं विनिर्दिशेत् ॥ ७५ ॥
वातापस्मारकुष्ठेषु कण्ठनाडीं विनिर्दिशेत् ।
कर्णरोगे च दृग्रोगे प्रमेहे पादरोगके ॥ ७६ ॥
क्रमेण बुद्धिमान्वैद्यः कर्णनाडीं परीक्षयेत् ॥ ७७ ॥
सर्पजलूकादिगतिं वदन्ति विबुधाः प्रभञ्जने नाड्याम् ।
पित्ते तु काकलावृकमण्डूकगतिं विदुस्सुधियः ॥ ७८ ॥
राजहंसमयूराणां पारावतकपोतयोः ।
कुक्कुटस्य गतिं धत्ते धमनी कफसंज्ञिनी ॥ ७९ ॥
मुहुस्सर्पगतिं नाडी मुहुः काकगतिं तथा ।
वातपित्तसमुद्रिक्तां प्रवदन्ति विचक्षणाः ॥ ८० ॥
ज्वरासृक्कामिलापाण्ड्वतिसारे प्रमेहके ।
चटभेकगतिं पश्येद्वैद्यविद्याविशारदः ॥ ८१ ॥
अशीतिवातेष्वानाहे तथोदावर्तसंज्ञके ।
जलूकागतिमाश्रित्य नाडी नित्यं प्रवर्तते ॥ ८२ ॥
अष्ठीला च प्रतिष्ठीला तुनी प्रतितुनी तथा ।
श्वासखासे यक्ष्मरोगे पिटकागुल्मकोदरे ॥ ८३ ॥

बकहंसमयूरादिगतिर्नाडी निगद्यते ।
चाञ्चल्यं दोषपूर्णत्वं काठिण्यमतिमन्दता ॥ ८४ ॥
अस्वस्थनाडीं जानीयात् क्रमेणैव तु बुद्धिमान् ।
चाञ्चल्यरहिता दोषहीना काठिन्यवर्जिता ॥ ८५ ॥
अवक्रा चाप्यसूक्ष्मा च स्वस्था नाडी प्रकीर्त्तिता ॥ ८६ ॥
मन्दं मन्दं शिथिलशिथिलं व्याकुलं व्याकुलं वा
स्थित्वा स्थित्वा वहति धमनी याति नाशं च सूक्ष्मा ।
नित्यं स्कन्धे वहति पुनरप्यंगुलीस्पर्शवेद्या
भावैरेवं बहुतरविधा सन्निपाता त्वसाध्या ॥ ८७ ॥
भारप्रहारमूर्छाभयशोकप्रमुखसङ्गता नाडी ।
सम्मूर्छितापि गाढं पुनरपि संजीवनं लभते ॥ ८८ ॥
पूर्वं पित्तगतिं प्रभञ्जनगतिं श्लेष्माणमाबिभ्रती—
मत्यन्तं भ्रमणं मुहुर्विदधती चक्राधिरूढामिव ।
भीष्मत्वं दधतीं कलाविरहितां सूक्ष्मत्वमातन्वतीं
दुस्साध्यां धमनीं वदन्ति मुनयो नाडीपरिज्ञानिनः ॥ ८९ ॥
निमिषं चनिवृत्यान्ते पुनर्वहति चेत्तदा ।
वर्षमायुर्विजानीयान्निमेषा द्वादशापि च ॥ ९० ॥
पुनर्वहत्यपि वदेत् पञ्च मासो गतायुषः ।
अतिसूक्ष्मातिवेगा चेदातुरो न निवर्तते ॥ ९१ ॥
नाड्यां पित्तं यदा लीनमनुभूतं दिनेदिने ।
स्थिता नाडी मुखे यस्य विद्युत्पात इवेक्षिते ॥ ९२ ॥
एकाहं जीवितं तस्य द्वितीये म्रियते ध्रुवम् ।
जम्बीरमातुलुङ्गादिचिञ्चाम्लरससेवने ॥ ९३ ॥
चटकामीनसदृशीं गतिं नाडी समाश्रयेत् ।
लवणे सेविते तावदतिशीघ्रं प्रवर्तते ॥ ९४ ॥
मधुरे राजहंसानां कषाये च जलौकसाम् ।
कटुतिक्तरसे भुक्ते गजोष्ट्रादिसमाश्रिता ॥ ९५ ॥
बालायास्सङ्गमे सौम्या तरुण्याः केकिनां गतिः ।
प्रौढाया राजहंसस्तु वृद्धाया महिषीगतिः ॥ ९६ ॥
द्विसप्ततिसहस्राणि नाड्यस्सन्ति नृणां तनौ ।
चत्वारिंशत्तथाश्वानां गजानां त्वेकमिश्रितम् ॥ ९७ ॥
गवादिके चतुष्पादजीवे त्रिंशत्सहस्रकम् ।
नाड्यस्सर्पादिकीटानां सहस्रार्धं पृथक् पृथक् ॥ ९८ ॥
त्रिंशज्जलचराणां स्युः पक्षिणां त्रिशतं भवेत् ।
पिपीलिकानां तस्यार्धं मृज्जातानां तु विंशतिः ॥ ९९ ॥

त्र्यधिका मक्षिकादीनां द्वयं दारुभुवां तथा ।
एवं प्राणभृतां नाड्यश्शरीरेषु वसन्ति हि ॥ १०० ॥

वातप्रकोपकारणम्.

सर्वेषामेव रोगाणां निदानं कुपिता मलाः ।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ॥ १०१ ॥
अहितस्त्रिविधो योगस्त्रयाणां प्रागुदाहृतः ।
तिक्तोषणकषायाल्परूक्षाप्रमित भोजनैः ॥ १०२ ॥
धारणोदीरणनिशाजागरात्युच्चभाषणैः ।
क्रियाभियोगभीशोकचिन्ताव्यायामसङ्गमैः ॥ १०३ ॥
ग्रीष्मेऽहोरात्रिभुक्तयन्ते प्रकुप्यति समीरणः ।

पित्तोद्रेककारणम्.

पित्तं कट्वम्ल[1] तिक्तोष्णकटुक्रोध विदाहिभिः ॥ १०४ ॥
शरन्मध्याह्नरात्र्यर्धविदाहसमयेऽपि च ।
स्वाद्वम्ललवणस्निग्धगुर्वभिष्यन्दशीतलैः ॥ १०५ ॥
आश्यास्वप्नसुखाजीर्णदिवास्वापविजृम्भणैः ।
प्रच्छर्दनाद्ययोगे च भुक्तमात्रवसन्तयोः ॥ १०६ ॥
पूर्वाह्णे पूर्वरात्रौ च श्लेष्मद्वन्द्वं तु सङ्करात् ।
मिश्रीभावात्समस्तानां सन्निपातस्तथा पुनः ॥ १०७ ॥
सङ्कीर्णाजीर्णविषमविरुद्धाद्यशनादिभिः ।

त्रिदोषकाणम्.

व्यापन्नमद्यपानीयशुष्कशाकाममूलकैः ॥ १०८ ॥
पिण्याकमृन्नवसुरापूतिशुष्ककृशामिषैः ।
दोषत्रयकरैस्तैस्तैस्तथान्नपरिवर्तनैः ॥ १०९ ॥
ऋतोर्दुष्टात्परो वाताद् ग्रहावेशाद्गराद्विषात् ।
दुष्टामात्पर्वताश्लेषाद् ग्रहजन्मर्क्षपीडनैः ॥ ११० ॥
मिथ्यायोगाच्च विविधपापानां च निषेवणात् ।
स्त्रीणां प्रसववैषम्यात्तथा मिथ्योपचारतः ॥ १११ ॥
व्यामिश्रसेवनाच्चापि सन्निपातः प्रकुप्यते ।
प्रतिरोगमिति क्रुद्धा रोगाधिष्ठानगामिनीः ॥ ११२ ॥
रसायनीः प्रपद्याशु दोषा देहे विकुर्वते ।
वातव्याध्यश्मरी कृच्छ्रमेहोदरभगन्दराः ॥ ११३ ॥
अर्शोसिग्रहणीत्यष्टौ महारोगाः[2] प्रकीर्त्तिताः ।
ज्वरो रोगपतिः पाप्मा मृत्यू रोगोऽशनोऽन्तकः ॥ ११४ ॥

---

1) तीक्ष्णोष्ण. 2) सुदुस्तराः.

क्रोधो दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भवः ।
जन्मान्तको मोहमयस्सन्तापात्मापचारजः ॥ ११५ ॥
विविधैर्नामभिः क्रूरो नानाजातीषु वर्तते ।

ज्वरभेदाः.

ज्वरोऽष्टधा पृथग् द्वन्द्वसंघातागन्तुकः स्मृतः ॥ ११६ ॥
मिथ्याहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः ।
वहिर्निरस्य कोष्ठाग्निं ज्वरादीन् जनयन्ति हि ॥ ११७ ॥
स्वेदावरोधस्सन्तापस्सर्वाङ्गग्रहणं तथा ।
युगपद्यत्र रोगेषु स ज्वरो व्यपदिश्यते ॥ ११८ ॥
वैरोधिकैरन्नपानैरजीर्णात्यशनादिभिः ।
व्यामिश्रसेवनाच्चापि सन्निपातः प्रकुप्यते ॥ ११९ ॥
क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजः ।
सस्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने ॥ १२० ॥
सस्वनौ सरुजौ कर्णौ कण्ठश्शूकैरिवावृतः ।
संज्ञा मोहः प्रलापश्च खासश्वासरुचिभ्रमाः ॥ १२१ ॥
परिदाहः खरस्पर्शजिह्वास्रस्ताङ्गतापनम् ।
ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च ॥ १२२ ॥
शिरसो लुण्ठनं तृष्णा निद्रानाशो हृदि व्यथा ।
स्वेदो मूत्रपुरीषाणां चिराद्दर्शनमल्पशः ॥ १२३ ॥
कृशत्वं नातिगात्राणां शीर्णता कण्ठकूजनम् ।
कोशानां श्यावरक्तानां मण्डलानां च दर्शनम् ॥ १२४ ॥
मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च ।
चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः ॥ १२५ ॥
दोषे विबन्धे नष्टेऽग्नौ सर्वसंपूर्णलक्षणाः ।
सन्निपातज्वरोऽसाध्यः कृच्छ्रसाध्यस्ततोऽन्यथा ॥ १२६ ॥
सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा ।
पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा ॥ १२७ ॥
सप्तमी द्विगुणा चैव दशमी द्वादशी तथा ।
एषापि गतिरुद्दिष्टा मोक्षाय च वधाय च ॥ १२८ ॥
कण्ठकूजत्सन्धिगश्च तान्द्रिको भग्ननेत्रकः ।
रुदाहे रुधिरष्ठीवी ह्यभिन्यासश्च कर्णिकः ॥ १२९ ॥
जिह्वकश्चान्तकश्चैव प्रलापश्चित्तविभ्रमः ।
शीताङ्गश्चेति विख्यातास्सन्निपातास्त्रयोदश ॥ १३० ॥
सन्धिगस्तान्द्रिकश्चैव साध्यस्स्याच्चित्तविभ्रमः ।
कष्टसाध्यः कण्ठकूजि: कर्णिको जिह्वकस्तथा ॥ १३१ ॥
कष्टात्कष्टतरो ज्ञेयो रुदाहो हन्ति मानवम् ।
अन्तको भग्ननेत्री च रक्तष्ठीवी प्रलापकः ॥ १३२ ॥
शीताङ्गश्चेत्यभिन्यासष्षट् साध्यास्सप्तमारकाः ।
गुरुता हृदये क्लेशस्सदनच्छर्द्यरोचकम् ॥ १३३ ॥
रसस्थेषु ज्वरे लिङ्गं दैन्यं चास्योपजायते ।
रक्तनिष्ठीवनं दाहो मोहश्छर्दनविभ्रमौ ॥ १३४ ॥
प्रलापः पिटकस्तृष्णा रक्तं प्राप्ते ज्वरे नृणाम् ।
पिण्डकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता ॥ १३५ ॥
ऊष्मान्तर्दाहविक्षेपौ ग्लानिः स्यान्मासके ज्वरे ।
भृशं स्वेदस्तृषा मूर्छा प्रलापश्छर्दिरेव च ॥ १३६ ॥
दौर्गन्ध्यारोचके ग्लानिर्मेदस्थे चासहिष्णुता ।
भेदोऽस्थ्नां कूजनं शोषो विरेकश्छर्दिरेव च ॥ १३७ ॥
विक्षेपणं च गात्राणामेतदस्थिगते ज्वरे ।
तमः प्रवेशनं हिक्का कासश्शैत्यं वमस्तथा ॥ १३८ ॥
अन्तर्दाहो महाश्वासो मर्मच्छेदश्च मज्जगे ।
मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ॥ १३९ ॥
शोफस्सशब्दता मोहश्शुक्रस्थे तु विशेषतः ।
सन्निपातज्वररुजोरित्यादाननिदानके ॥ १४० ॥
एवमन्येषु रोगेषु द्रष्टव्यं तद्द्वयं बुधैः ।
अथ रोगचिकित्सार्थमौषधं प्रतिपाद्यते ॥ १४१ ॥

वातहराः

एरण्डामरदारुगोक्षुरवरीकोरण्टकैरातकै—
र्वारीशिंशुमती फलत्रययुता वृश्चीवशोभाञ्जनैः ।
पूतीकद्वितयामृतार्कजटिलारास्नाश्वगन्धामयै—
रेरण्डादिरयं बुधैरभिनुतो वातामयघ्नो गणः । ॥ १४२ ॥

पित्तहराः

काकोलीद्वयमृद्धिवृद्धिमधुकं मेदाद्वयं पद्मकं
शृङ्गीकीचकरोचना मृतलता द्वे मुद्गमाषच्छदे ।
जीवन्ती च सजीवका सवृषभा स्यात्पुण्डरीकान्विता
काकोल्यादिरुदीरितोऽयमृषिभिः पित्तापहास्तद्गुणाः ॥ १४३ ॥

श्लेष्महराः

कृष्णाग्रन्थिकचव्यचित्रकवृषा विश्वौषदिव्यादिभिः
पादाराममरेणुकामधुरसा सिद्धार्थतिक्तोषणैः ।
सक्राशक्रयवाजमोदतृटिभिर्भार्जीविलङ्गान्वितै—
रेभिर्विंशतिभिः कफामयहरः कृष्णादिरुक्तोगणः ॥ १४४ ॥

स्थिराप्रथक्पर्णिपुनर्नवाभिस्त्रिकण्टकैरञ्जटोज्झटाभिः
विदारिकानागबलावराभिरयं गणः पित्तसमीरणघ्नः ॥ १४५ ॥

रोगाचिकित्सा.

कट्फलाम्बुदरधान्यकभार्ङ्गीश्रृङ्गिपर्वटकपिश्ववचाभिः ।
साधयामरसुगन्धतृणाभिर्वर्ग एष कफवातनिहन्ता ॥ १४६ ॥
त्रायन्तिकाकुटजबीजवृषामृताभिस्तिक्तापटोलपिचुमन्ददुरालभाभिः ।
भूनिम्बराजितुपद्मकपर्पटाख्यैरेभिर्गणोऽयमिति पित्तकफामयघ्नः ॥
उदुम्बराश्वत्थमधूकलोध्रनन्दीवटप्लक्षपलाशपार्थाः ।
जम्बूत्रयं चेति गणः प्रमेहपित्तार्तिहा योगिगदापहश्च ॥ १४८ ॥
हिंगुचव्यमरिचानि यवानि ग्रन्थिविश्वतृटिमागधिकाभिः ।
श्रेयसी च परमामयहन्ता गुल्महा निगदितश्च गणोऽयम् ॥ १४९ ॥
श्रीवृक्षपाटलसकट्फल वैजयन्त्या डुण्डुकसंभृतमिदं गुरु पञ्चमूलम् ।
एरण्डयुक्च बृहतीद्वयसालपृश्निपर्णाभिरप्यभिहितं लघु पञ्चमूलम् ॥
आम्द्यों तु पूर्वमुदितं कफमारुतघ्नं ।
पित्तानिलापहमतः परतः प्रदिष्टम् ॥ १५१ ॥
ज्वरे पर्पटकः प्रोक्तो रास्ना वातामये तथा ।
पित्ते छिन्नरुहा शस्ता कफे विश्वं विशेषतः ॥ १५२ ॥
कुटजो ग्रहणीरोगे शोफे सति पलंकषम् ।
छर्द्यो लाजास्समुदिष्टा मेहे धात्रीरसः परः ॥ १५३ ॥
प्लीहायां पिप्पली ज्ञेया पथ्या पाण्ड्वामये तथा ।
त्रिफला नेत्ररोगेषु कुष्ठेषु खदिरं तथा ॥ १५४ ॥
खासेषु कण्टकारिः स्याद्द्राक्षा सर्वेषु यक्ष्मसु ।
क्रिमिघ्नं क्रिमिषु श्रेष्ठं स्यादर्शस्याप्यरुष्करः ॥ १५५ ॥
उरः क्षते बला ख्याता गोमूत्रमुदरेषु च ।
स्यात् कास्मीरं शिरोरोगे श्वासे भार्ङ्गी प्रशस्यते ॥ १५६ ॥
गलग्रहे पटोलानि तृष्णास्वम्लानि शान्तये ।
व्यासेनापि समासेन प्रोक्तोऽयं द्रव्यसङ्ग्रहः ॥ १५७ ॥
एतैस्तैले सर्पिषि वा प्रलेपान् पानकान्यपि ।
ज्ञात्वौषधान् प्रकुर्वीत यथाव्याधि भिषग्वरः ॥ १५८ ॥

छर्दिनीगणः

मदनमधुकलंबा निम्बबिम्बी विशाल
त्रपुसकुटजमूर्वा देवदाली क्रिमिघ्नाः ।
विदलदहनचित्राः कोशवत्याः करञ्जः
कणलवणवचैलासर्षपाः 1) छर्दकार्याः ॥ १५९ ॥

1) छर्दकाः स्युः

विरेचनगणः

निकुम्भकुम्भत्रिफला गवाक्षी स्नुक्शंखिनी नीलिनितिल्वकानि ।
शम्याककम्पिल्लकहेमदुग्धं दुग्धं च मूत्रं च विरेचनानि ॥ १६० ॥
मदनमधुककुष्ठदेवदाली मधुकवचा दशमूलदारुरास्नाः ।
यवमिशिकृतवेधनं कुलुत्था मधु लवणं त्रिवृतानि रूक्षणानि ॥

नश्यगणः

वल्लापामार्गव्योषदार्वी सुराला बीजं शैरीषं बार्हतं शैग्रवं च ।
सारो मधूकसैन्धवं तार्क्ष्यशैलं तृट्यौ पृथ्वीका शोधयत्युत्तमाङ्गम् ॥

फलसारः

द्राक्षा दाडिमखर्जूररम्भापनसचूतकाः ।
तालविल्वकतुङ्गश्लेष्मातककपित्थकाः ॥ १६३ ॥
नारङ्गलुङ्गलिकुचपारावतप्रियालकाः ।
सुरसौवीरबदरगुञ्जाकर्कन्धुतोरणाः ॥ १६४ ॥
वल्लीफलादयश्चान्ये फलसाराः प्रकीर्तिताः ।

पत्रसारः

भृङ्गालर्कोज्झटा चिल्ली हरिन्मञ्जरिकाम्लिका ॥ १६५ ॥
उपानदंष्ट्री डुत्तूरकारवेल्लपटोलिकाः ।
निर्गुण्डी मत्स्यदङ् मुण्डी कुण्डली कासमर्दका ॥ १६६ ॥
मण्डूकपर्णी लवणी तलहाटार्ककिंशुकाः ।
जयाग्निमन्था शार्ङ्गेरी शाङ्गिष्ठा द्विपुनर्नवा ॥ १६७ ॥
ब्राह्मी कुरण्टिकानन्ता सहदेवी हरिप्रिया ।
लक्ष्मी द्वितीया जीवन्ती मुर्वावास्तुकवल्गुजाः ॥ १६८ ॥
पुष्पाखुकर्णिकालिङ्गा निम्बाद्याः पत्रसारकाः ।

पुष्पसारः

पुष्पसारास्तु चाम्पेयकेतकाशोकपाटलाः ॥ १६९ ॥
पुन्नागभूर्जवकुलमाधवी जातिमल्लिकाः ।
शेफाली यूथिका शिग्रुशतपत्रनृपद्रुमाः ॥ १७० ॥
वरालधातकीनन्द्यावर्तोत्पलजपादयः ।

मूलसारः

बृहत्यौ सुमती द्वन्द्वफला चम्पकबर्बराः ॥ १७१ ॥
तण्डुली यवगोकण्टकुण्डलीद्विपुनर्नवाः ।
पुंखी वालुकला मज्जा यासहिंस्रा सुवर्चलाः ॥ १७२ ॥
पाठा कुरण्टश्यामाद्या मूलसाराः प्रकीर्तिताः ।

कन्दसाराः

कन्दसारास्तु मांजिष्ठाः कुष्ठयोरविदारकाः ॥ १७३ ॥

हरिद्रा लाङ्गली मुस्ता वरी रास्ना घुणप्रिया: ।
शारिवार्द्रकवाराहिवचाब्दवनसूरणा: ॥ १७४ ॥
निकुम्भमौर्वेम्लिका च वाजिगन्धा शुकानना ।
बीजसारा:
रक्ताद्याश्शालयस्तद्वन्मुद्गाद्याद्शिम्बिजातय: ॥ १७५ ॥
एरण्डयुग्मं पुन्नागनन्नजिच्चक्रमर्दना: ।
प्रियालनिम्बवकुलमुनिशिग्रुकरञ्जका: ॥ १७६ ॥
ज्योतिष्मती कुबेराक्षी शंखिनी युग्मचूतका: ।
जातीफलैलातकोलब्रह्मद्रुममयूरका: ॥ १७७ ॥
(पिप्पली मरिचा जाजी यवान्याधान्यसर्षपा:
कनकारुष्कणशणपथ्या धात्री विभीतक:
वाकुच्यङ्कोलवदरवेल्लाद्या वीजसारका:)
त्वक्सारा:
मधूकचन्दनद्वन्द्वरोहिण्यामरभूरुहा: ।
खदिरासननिम्बाद्यास्सारसारा: प्रकीर्त्तिता: ॥ १७८ ॥
न्यग्रोधोदुम्बराश्वत्थपारीषप्लक्षपादपा: ।
पञ्चैते क्षीरिण: प्रोक्तास्तेषां त्वक् पञ्चवल्कलम् ॥ १७९ ॥
विश्वोपकुल्यामरिचैस्त्र्यूषणं कटुकं कटु ।
व्योषं कटुत्रयं तच्चेत् षड्ग्रन्थि च तुरूषणम् ॥ १८० ॥
त्रिफलानि
जया विभीतको धात्री फलत्रयमुदाहृतम् ।
त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धैस्त्रिजातकम् ॥ १८१ ॥
नागकेसरसंयुक्तं चतुर्जातकमुच्यते ।
अङ्गेऽप्यनुक्ते विहितं तु मूलं भागेऽप्यनुक्ते समभाग एव
कालेऽप्यनुक्तेऽप्युषसि प्रयोज्यं द्रव्येऽप्यनुक्ते विहितं तु तोयम् ॥
कषाया:
अर्धं पादं पदार्धं पदपदशकलं पञ्चभागावशिष्टं
द्वात्रिंशत् षष्ठमष्टौ चरकमतविधौ शास्त्रतत्त्वार्थकारै: ।
सेके स्नेहे कषाये व्रणमलहरणे त्वेवमाश्च्योतनार्थे
गण्डूषाद्यैर्निरूहै: क्रम इति कथितस्सप्तभेदे कषाये ॥ १८३ ॥
सचतुर्विंशतिपले तोयं द्रव्यपलं क्षिपेत् ।
पाने कषाये तत्कुर्यादष्टभागावशोषितम् ॥ १८४ ॥
पानीयं कार्षिकद्रव्यं प्रस्थाम्ब्वर्धावशेषितम् ।
पत्रकन्दप्रसूनत्वक्फलं तत्रापि कालत: ॥ १८५ ॥
एकद्वित्रिचतु: पञ्चयामं वीर्यं विमुञ्चति ।
आदौ सारादि कठिनं मध्ये मध्यं त्वगादिकम् ॥ १८६ ॥
अन्ते मृदूनि पत्राणि क्षिप्त्वा क्वाथं समाचरेत् ।
नाडीचतुष्टये प्रातर्विना भुङ्क्ते न कालत: ॥ १८७ ॥
प्रातस्सेव्यं तु भैषज्यमजीर्णेऽन्नेन शस्यते ।
नाडिकाष्टकवेलायां रात्रौ क्वाथादिकं भजेत् ॥ १८८ ॥
अथवा भोजनादूर्ध्वं नाडिकात्रितयात्परम् ।
देशो जाङ्गल आनूपस्साधारण इति त्रिधा ॥ १८९ ॥
जाङ्गलो विरलात्यल्पकण्टकद्रुमलाञ्छित: ।
अल्पप्रस्रवणो दूरविघातविरसोदक: ॥ १९० ॥
व्योमविस्तीर्णविषमविरूक्षविगतस्थल: ।
कृशास्थिरक्लेशसहवातभूयिष्ठमानुष: ॥ १९१ ॥
अनूपश्शिशिरस्निग्धभूमिर्भूरितृणो वल: ।
प्रभूतशैवलच्छन्नबृहन्मत्स्यजलाशय: ॥ १९२ ॥
महाद्रितुङ्गस्तुङ्गद्रुस्तालहिन्तालवेल्लका: ।
गलरोगोपचिद्ग्रन्थिश्रीपदाद्या उपद्रवा: ॥ १९३ ॥
सुकुमारमृदुस्थूलश्लेष्मभूयिष्ठमानुष: ।
साधारणस्समामलो युक्तश्चाभयलक्षणै: ॥ १९४ ॥
शीतोष्णवर्षपवनैस्समस्साधारणस्तथा ।
त्रिदोषतस्स्थूलवृक्षतृणसस्योज्वला स्थिरा ॥ १९५ ॥
गुरुरसवती श्यामा कृष्णा भूमिर्गुणाधिका ।
शीतला कोमला स्निग्धा द्रुमसस्यतृणोल्वणा ॥ १९६ ॥
आसन्नसलिला पाण्डुस्निग्धा त्वम्बुगुणाधिका ।
अल्पपुष्पा सविरला पाण्डुवृक्षप्ररोहिणी ॥ १९७ ॥
रूक्षा रासभभस्माभवर्णा वायुगुणाधिका ।
समा श्वभ्रवती श्यामा मृदुवृक्षरसोदका ॥ १९८ ॥
सर्जसालमहावृक्षप्राया व्योमगुणाधिका ।
तत्र क्ष्माम्बु गुणोऽद्रिस्थभूमिजातं विरेचनम् ॥ १९९ ॥
वमनं वह्निपवनखगुणोल्वणभूमिजम् ।
शाखापत्रं नवं तत्र ग्राह्यं वर्षावसन्तयो: ॥ २०० ॥
ग्रीष्मे प्ररूढपर्णानां मूलं शिशिरघर्मयो: ।
तत्रापि शिशिरे सौम्यं ग्रीष्मे त्वाग्नेयमिष्यते ॥ २०१ ॥
सारं हिमागमे कन्दत्वक्क्षीराणि घनात्यये ।
पुष्पं फलं यथर्त्वेवमव्यापन्नगुणं भवेत् ॥ २०२ ॥
सर्वर्तुका: कन्दनालशुङ्गस्वरसपल्लवा: ।
क्षारप्ररोहनिर्यासभस्मतैलानि कण्टका: ॥ २०३ ॥
मिथ्याकूपतरुच्छायाप्रेतभूदेवगेहजा: ।
वल्मीकसंभवा वह्निदग्धा: पानीयपीडिता: ॥ २०४ ॥

हिमाम्बुक्रिमिभिर्युक्ता मृदुकाकालसंभवाः
ओषध्यो विधिना नीता न कार्यं साधयन्ति ताः ।
अतः प्रशस्ते नक्षत्रे शुचिना शुभवासरे
औषधं विविधं ग्राह्यं स्मृत्वा देवीं च सुप्रभाम् ॥ २०५ ॥
पुष्यार्के मूलार्के हस्तार्के चोत्तरार्कदिवसे वा ।
ग्राह्यं प्रातर्द्रव्यं निमन्त्रितं भानुसुतदिवसे ॥ २०६ ॥
पात्रेष्वयोमयं श्रेष्ठं प्रायो लेह्यादिसाधने ।
वीर्याधिकयमरिष्टादिस्तत्र सिद्धिस्तु जायते ॥ २०७ ॥
तदभावे दृढं सिद्धं मृद्भाण्डं परिकल्पयेत् ॥ २०८ ॥
लेह्यं पाणितलं तदर्धगुटिका त्वक्षप्रमाणं रजो
मार्जारस्य पदं वदन्ति मुनयो मुद्गप्रमाणाञ्जनम् ।
कर्णे द्वादश विन्दवश्च कथिताष्षड् विन्दवो नश्यके
द्वात्रिंशत् कवलेषु कीर्त्तितमिदं वक्त्रार्धगण्डूषके ॥ २०९ ॥
दोषानुरूपकथितौषधसम्प्रयोगैश्चूर्णेन कल्ककृततैलविलेपनाद्यैः ।
गण्डूषणाञ्जनकषायविरेकपानैः खाद्यावलेह्यवमनाख्यगणैः प्रयोज्यम् ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादनविन्दुकारण-
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद-
श्रीमत्केलदीवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्र-
सारभूते श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
वैद्यशास्त्रेआदाननिदानचिकित्सानिरूपणं नामैकविंशस्तरङ्गः

अथ द्वाविंशस्तरंगः

अथ द्रव्यगुणान् वक्ष्ये येषामत्रोपयोगिता ।
शालयो मधुराः स्निग्धा रक्तशालिस्त्रिदोषकृत् ॥ १ ॥
महाशालिः परं वृष्या कलमाख्यश्च पित्तहा ।
षष्ठिकः स्याल्लघुशिरा नीवारो वातनाशकः ॥ २ ॥
श्यामाकश्शोषणो रूक्षः प्रियंगुः कफवाताजित् ।
कोद्रवो रक्तपित्ताढ्यः पित्तश्लेष्महरो यवः ॥ ३ ॥
कफपित्तहरो मुद्गो गोधूमो वातनाशकः ।
कुलुत्थश्लेष्मवातघ्नो माषो वृष्योऽनिलापहः ॥ ४ ॥
चणका वातकाराः स्युर्मसूरो ग्राहिपित्तहा ।
आढकी कफपित्तघ्नी राजमाषोऽनिलातिकृत् ॥ ५ ॥
स्निग्धश्चोष्मस्तिलो ज्ञेयः सिद्धार्थः कफवातजित् ।
अतसी पित्तला ज्ञेया गृञ्जनं वातनाशनम् ॥ ६ ॥
कलशी श्लेष्महा हृद्यः पिण्डालुः कफवातलः ।
मण्डूकः पित्तरोगघ्नः पित्तकृच्चक्रमर्दकः ॥ ७ ॥
आवर्तः पिचरूक्षश्च कषायश्चातिवातलः ।
वास्तुकः पोतकाचिल्ली पालुकी तण्डुलीयका ॥ ८ ॥
निष्पावश्चाथ जीवन्ती विदारकपिकुञ्चुकाः ।
मीनाक्षी चेरिपित्तघ्ना निरूढा शुक्रवर्धना ॥ ९ ॥
शार्ङ्गेष्टा वृद्दला मुण्डी वृश्चिकाली च दुग्धिका ।
द्रोणकः पर्पटश्चेति जन्तुघ्ना वह्निदीपनाः ॥ १० ॥
छिन्नरुहा कारवल्ली पटोलवार्ताकच्छटा बृहती ।
कर्कोटी च समीरश्लेष्महरा जातयो वृष्याः ॥ ११ ॥
कूष्माण्डोर्वारुभिधा नन्दी कर्कारुककटुत्रपुसाः ।
लम्बा चेति समीरश्लेष्मकराः पित्तरोगनुदः ॥ १२ ॥
हिन्तालतालपनसाः स्निग्धा लघवः कफोत्तरारम्भाः ।
वृष्यास्तु नारिकेला विज्ञेयाः पित्तवातहराः ॥ १३ ॥
चिञ्चा संसनहृद्यो नारंगः पित्तलो मतो वृष्यः ।
जम्बीरो वातहरास्त्रिदोषहा मातुलुंगः स्यात् ॥ १४ ॥
आम्लातकाम्रावुदितौ च वृष्यौ वातापहः स्याल्लिकुचश्च हृद्यः ।
द्रव्याणि शीतान्यपि बाल्यमध्यपारान्तरैर्भिद्यत एव भावः ॥
श्रितशीतलमदहृद्यं त्रिदोषहृत् काशमुदकं च ।
गवां सितानां वातघ्नं कृष्णानां पित्तनाशनम् ॥ १६ ॥

कफघ्नं रक्तवर्णानां कपिलानां त्रिदोषकृत् ।
धृष्टेः क्षीरं तु वातघ्नं मध्यमायास्तु पित्तहृत् ॥ १७ ॥
वृद्धाया वृद्धवत्साया गोक्षीरं श्लेष्मनाशनम् ।
स्निग्धं पित्तहरं रसायनसमं क्षीरं गवां कीर्तितं
बाल्यं वातहरं च पित्तलमिति प्रोक्तं दधि श्लेष्मकृत्
गुल्मार्शोदरपाण्डुरोगशमनं तक्रं त्रिदोषापहं
सर्पिः पित्तसमीरहारि मधुरं हृद्यं तु नीतं नवम् ॥ १८ ॥
अत्यग्निदं दीपनदेहभाजां निद्रांगसंगेषु समुत्सुकानाम् ।
क्षीरं हितं चामिषमामनन्ति शीतं त्वभिष्यन्दकरं गुरु स्यात्॥
लघुरोदनस्वभाद् गुरुरध्युषितश्शोषितश्च गुरुः ।
कफकृत्पायसमुदितं बाल्यं दध्योदनं कफानिलदम् ॥ २० ॥
वातश्लेष्महरस्सूपः किञ्चित्पित्तोत्तरो लघुः ।
कौलुत्था वातहा वृष्या मुद्गः पित्तप्रणाशनः ॥ २१ ॥
रसालं बृंहणं हृद्यं मस्तिस्स्रोतोविशोधनम् ।
मच्छण्डी पित्तजिद् वृष्या पित्तवातहरो गुडः ॥ २२ ॥
सक्तवो भेदिनोरूक्षाः पृथुकाः स्निग्धवातलाः ।
पेष्टिका गुरवो भक्ष्या गुडाक्तावातनाशकाः ॥ २३ ॥
सीदते च भुक्तमन्नं ततोऽनुपानं प्रशस्यते शमनम् ।
कोष्णं वाते शीतं पित्ते रुक्षे कफे क्षीरम् ॥ २४ ॥
अनुपानप्रशस्तं स्वासश्वासोर्ध्वरोगिणां पुंसाम् ।
बलवर्णकारि तैलं वातहरं केश्यमपि च चक्षुष्यम् ॥ २५ ॥
मधुतुल्यं घृतं नाड्या दावनालेन संयुतम् ।
प्रियंगुकल्कदिग्धांगो नोपभुञ्जीत पायसम् ॥ २६ ॥
शाकाम्लफलपिण्याककुलित्थलवणैस्सह ।
करीरदधितक्रैश्च प्रायः क्षीरं विरुध्यते ॥ २७ ॥
कांस्ये दशाहमुषितसर्पिरुष्णमरुष्करे ।
मधुसर्पिर्वसा तैलं पानीयानि द्विशस्त्रिशः ॥ २८ ॥
एकत्र वा समांशानि निरुध्यन्ते परस्परम् ।
अविरुद्धा विरुद्धाश्च समाश्चाहारजातयः ॥ २९ ॥
सर्वा बलवतः पथ्या भवन्त्यन्यस्य चान्यथा ।
अजीर्णे पुनराहारो गृह्यमाणः प्रकोपयेत् ॥ ३० ॥

वातपित्तश्लेष्मदोषमाशु कुर्याच्छरीरिणाम् ।
रोगोत्पत्तिः किलाजीर्णे चतुर्धा तत्पुनः स्मृतम् ॥ ३१ ॥
रसशेषामविष्टब्धविपक्कादिविभेदतः ।
रसशेषे भवेज्जृम्भसमुद्गारस्तथामिके ॥ ३२ ॥
अङ्गभंगश्च विष्टब्धे धूमोद्गारो विपक्वतः ।
निद्रानुवमनस्वेदजलपानादिकर्मभिः ॥ ३३ ॥
सदा पथ्यवतां तानि शान्तिमायान्त्यनुक्रमात् ।
विरुद्धात्यशनाहारदोषदुष्टातुरं नरम् ॥ ३४ ॥
विरेकवमनप्रायैः प्रतिकारैरुपाचरेत् ।
षट्सु मासेषु वमनं त्रिमासेषु विरेचनम् ॥ ३५ ॥
मासे मासे च गण्डूषं नस्यं सप्तदिनान्तरे ।
लोहानामथ वक्ष्यामि क्रमाच्छुध्यादिकाः क्रियाः ॥ ३६ ॥
शुद्धं लोहं कनकरजतं भानुलोहाश्मसारं
पूतीलोहद्वितयमुदितं नागवंगाभिधानम् ।
मिश्रं लोहत्रितयमुदितं पित्तलं कांस्यवर्तं
धातुर्लोहस्त्रिविध उदितो मुण्डतीक्ष्णे च कान्तम् ॥ ३७ ॥
तैले तक्रे गवां मूत्र आरनाले कुलुत्थके ।
रविदुग्धे निम्बनीरे डालयेच्च पुनः पुनः ॥ ३८ ॥
स्वर्णादिसर्वलोहानां शुद्धिर्भवति निश्चिता ॥ ३९ ॥
तैलेन वंगं दरदेन तीक्ष्णं नागेन रीतीश्शिलया च नागम् ।
गन्धाश्मना चैव निहन्ति शुल्वं तारं तथा माक्षिकतो निहन्यात्॥
घनेन नागं शिलया सुवर्णं त्रपुश्च तारेण तथाहिनार्कम् ।
अयश्च ताम्रेण सुवर्णतोऽथ शशी समुत्थाप्यत एव युक्तया ॥
जालिनीचूर्णमत्यन्तं स्वनिर्यासेन भवितम् ।
प्रतिपाकेन कस्यापि काञ्चनं जलवद्भवेत् ॥ ४१ ॥
पनसस्यार्धपक्वस्य वृन्तनिर्यासयोगतः ।
खल्वेतु मर्दनाद्यान्ति सर्वलोहानि नीरताम् ॥ ४२ ॥
रक्तोत्पलस्य नालाम्भो मर्दितं घनचूर्णकम् ।
रसरूपं चिरं तिष्ठेत् कौसुम्भीतैलवर्जितम् ॥ ४३ ॥
एकपत्रे कृतं व्योम स्थितमम्ले दिनाष्टकम् ।
हिंगुलस्य तरोः क्षारं नीरे संस्थापितं स्रवेत् ॥ ४४ ॥

स्यान्मालिनीवसन्ताख्यो वसन्तकुसुमाकरः ।
त्रैलोक्यचिन्तामणिः स्यान्महाभूपतिरेवच ॥ ४५ ॥
लक्ष्मीविलास इत्युक्ता अष्टावेते महारसाः ।
ताप्यौ टंकणहेमताररसकं गन्धं पृथग्भागिकम् ।
ताम्रं विद्रुममौक्तिकं शिखरिणद्व्यंशं पृथग्भागिकम् ।
वंगायोहिरसस्य भस्म गगनं वैक्रान्त
सर्वैर्मध्यविभावनान्मुनिमतं यष्टित्रिजाताग्निभिः ॥ ४६ ॥
मुस्तोशीरवृषामृतशटीकन्या विदारी वरी
गोदुग्धे मुसलेक्षुवारिमृदितं गोलं पचेद्वासरम् ।
मध्याग्नौ च मृगांकवत्पटिरसस्सेव्यस्ततो भावने
द्वे कस्तूरिमृगांकयोर्मधुकर्णैर्युक्तस्तु वल्लद्वयम् ॥ ४७ ॥
मेहार्शोग्रहणे जलोदरमहाव्याधीन् ज्वरान् कामिलाम्
पाण्डुं कुष्ठभगन्दरं वहुतरं मूलं च शुक्लक्षयम् ।
स्त्रीपुंसोरनपत्यतामिहरसास्सर्वेश्वरश्चौषधं
हन्ति स्याद्बलवीर्यवृद्धिरतुला पुष्टिश्च कान्तिस्तथा ॥ ४८ ॥

पूर्णचन्द्रोदयम्.

पलं मृदु स्वर्णदलं रसेन्द्रः पलाष्टकं षोडश गन्धकं च ।
शोणैश्च कार्पासभवप्रसूनैर्दिनं विमर्द्याथ कुमारिकाद्भिः ॥
तत् काचकुप्यां निहितं सुगाढं मृत्कर्पटैस्त्रिदिवसत्रयं च ।
पचेत्क्रमाग्नौ सिकताख्ययन्त्रे ततो रजः पल्लवरागरम्यम् ॥
निगृह्य चैतस्य पलं पलानि चत्वारि कर्पूररजस्तथैव ।
जातीफलं चोषणमिन्द्रपुष्पं कस्तूरिकायामिह शाणमेकम् ॥
चन्द्रोदयोऽयं कथितस्समाषो भुक्तो हि वल्लीदलमध्यवर्ती ।
मदोत्कटानां प्रमदाशतानां गर्वाधिकत्वं शमयत्यकाण्डे ॥
श्रितं खनीभूतमतीव दुग्धं मृदूनि मांसानि समण्ठकानि ।
नवान्नमिष्टानि फलानि पथ्यमानंददायीन्यपराणि चात्र ॥
वलीपलितनाशनस्तनुभृतां वयस्स्तम्भनं
समस्तगदखण्डनं प्रचुररोगपञ्चाननः ।
गृहेनरसराडयं भवति यस्य चन्द्रोदय—
स्सपञ्चशरदर्पितो मृगदृशां कथं वल्लभः ॥ ५५ ॥

महाराजमृगांकः.

माणिक्यगोमेधिकनीलतार्क्ष्यवैडूर्यमुक्ताफलराजवर्ताः ।
पीरोजतारस्याभ्रकपुष्यरागप्रवालवैक्रान्तकवज्रशंखाः ॥ ५६ ॥
पृथक् पृथक्कर्षयुतं सुवर्णं तारार्कमिश्रत्रयतीक्ष्णकान्तम् ।
मण्डूरसूतं वलिसूर्यकान्तं वराटिकाकर्परिसूक्तितालम् ॥ ५७ ॥
वंगाहिमुण्डाश्मजमिन्दुकान्तं प्रत्येकमद्य द्वयमेव दुष्टम् ।
विशोध्य चैतद्रसितं विदध्याद्विमुच्यतं गन्धकमेकमेव ॥
शुभे दिने खल्वतले निधाय संपूजयेद्भैरवविघ्नराजौ ।
लुंगम्बुनामर्द्य दिनत्रयं च गोलं विनिक्षिप्य सुभाण्डमध्ये ॥
तद्भाण्डमध्ये लवणं प्रपूर्य पचेच्चतुर्याममथोत्तराग्नौ ।
तत्सांगशीतं च विमर्द्य भावयेज्जीरद्वयं शिग्रुमुशीरभृंगम् ॥
श्रीपुष्यसिन्धू रजनीद्वयं च मुस्तां पृथग्भाव्य च सप्तवारान् ।
कस्तूरिकाशीतमयूखकर्षं सम्मर्द्य शोष्याथ करण्डमध्ये ॥
शुभे मुहूर्ते च सुचन्द्रतारावले नियोज्यो भिषगुक्तमेव ।
गुञ्जाद्वयं वा त्रि चतुष्ककं वा पणौमधुभ्यां मरिचाज्ययुक्तम् ॥
तत्तद्रोगहितानुपानसहितो देयो मृगांको रसो
यक्ष्मातंकभगन्दराश्मविरुजो वातादिजीर्णज्वरान् ।
अर्शोसिग्रहणीसपाण्डुखसनश्वासोदरप्लीहजा
हिक्काद्यानहरीमकं प्रदरकं कुष्ठं च गुल्मं जयेत् ॥ ६३ ॥
उद्वर्तनाभ्यञ्जनमर्दनं च लाक्षादितैलं च सुगन्धितैलम् ।
दुकूलवस्त्रादिसुशुभ्रवस्त्रं रत्नाद्यलंकारसुवर्णधारणम् ॥ ६४ ॥
कस्तूरिकाचन्द्रसुगन्धलेपनं माहानहापुष्पसमूहधारणम् ।
सुवर्णरूप्यादिपलाशरम्भापात्रेषु भुक्तं च घृताक्तदीपम् ॥
शाल्योदनं मुद्गपटोलवास्तुकं ससूरणं चान्द्रकतण्डुलीयकम् ।
ससौम्यमिष्टान्नयुतं च भुक्तं ताम्बूलसेवा विधिवद्विधेया ॥
वलीपलितनिर्मुक्तो रमयेत् प्रमदाशतम् ।
अप्रजा युवती नारी पुत्रान् सूते महाबलान् ॥ ६७ ॥
आयुष्यं वर्धते दीर्घं जीवेद्वर्षशतं नरः ।
महाराजमृगांकोऽयं महादेवेन भाषितः ॥ ६८ ॥

सुवर्णमाल्यादिवसन्तम्.

स्वर्णं मुक्तादरदमरिचं भागवृध्या क्रमेण
खर्परयष्टासुनवनवनीतेन निम्बाम्बुनाथ ।
यावत्स्निहे व्रजति वलयं मर्द्यते दीयतेऽसौ
गुञ्जे द्वे द्वे मधु चपलया सर्वरोगे वसन्तः ॥ ६९ ॥

प्रदरं नाशयत्याशु तथा दुर्मांसशोणितम् ।
विषमं वा त्रिदोषं वा हन्ति सत्यं न संशयः ॥ ७० ॥

त्रैलोक्यचिन्तामणिः

पृथग्धौतकवं चन्द्रं त्रयं वंगाहिकान्तिजम् ।
चत्वारस्सूतमभ्रं च प्रवालं मौक्तिकं तथा ॥ ७१ ॥
भावना गव्यदुग्धेक्षुवाशाश्रिद्धिनिशाजलैः ।
मोचाकन्दरसेनैव भाव्यास्सप्त पृथक् पृथक् ॥ ७२ ॥
शतपत्ररसेनैव माल्त्याः कुसुमेन च ।
पश्चान्मृगमदो भाव्यस्सुसिद्धो रसराड् भवेत् ॥ ७३ ॥
कुसुमाकर इत्युक्तो वसन्तपदपूर्वकः ।
वल्लद्वयमितस्सेव्यास्सितामध्वाज्यसंयुतः ॥ ७४ ॥
मेहघ्नः पुष्टिदः श्रेष्ठः परं वृष्यो रसायनः ।
वलिपलितहृन्मेध्यः कामदस्सुखदो नृणाम् ॥ ७५ ॥
क्षयखासारुचिश्वासानम्लपित्ताश्मरीर्जयेत् ।
आयुर्वृद्धिकरः पुंसां प्रजाजनकशेखरः ॥ ७६ ॥
रसं वज्रं हेम तारं ताम्रं तीक्ष्णाभ्रकं मृतम् ।
गन्धकं मौक्तिकं शंखं प्रवालं तालकं शिलाम् ॥ ७७ ॥
शोधितं च समं सर्वं सप्ताहं भावयेद्द्रुतम् ।
चित्रमूलकषायेण भानुदुग्धैर्दिनत्रयम् ॥ ७८ ॥
निर्गुण्डीसूरणं द्रावैर्वज्रदुग्धैर्दिनं दिनम् ।
अनेन पूरयेत्सम्यक् पीतवर्णवराटिकाम् ॥ ७९ ॥
टंकणं रविदुग्धेन पिष्ट्वा तासां मुखं लिपेत् ।
दग्ध्वा भाण्डपुटे पश्चात् सांगशीतं विचूर्णयेत् ॥ ८० ॥
चूर्णतुल्यं मृतं सूतं वैक्रान्तं सूतपादकम् ।
शिग्रुमूलद्रवैस्सर्वं सप्तवारं विभावयेत् ॥ ८१ ॥
चित्रमूलकषायेण भावना चैकविंशतिः ।
आर्द्रकस्य रसैस्सप्तत्रिदिनं विजयारसैः ॥ ८२ ॥
जम्बीरैर्मातुलुंगैर्वा सप्तवारं विभावयेत् ।
सूक्ष्मचूर्णं ततः कृत्वा चूर्णपादांशटंकणम् ।
टंकणांशं वत्सनाभिं तत्समं पर्यनुक्षिपेत् ।
लवंगं नागरं पथ्या कणा जातिफलं पृथक् ॥ ८४ ॥
प्रत्येकं वत्सनाभस्य पादांशं चूर्णितं क्षिपेत् ।
मातुलुंगार्द्रकद्रावैस्सर्वमेतद्विलोडयेत् ॥ ८५ ॥
चतुर्गुञ्जामितं खादेत् कणाक्षौद्रे लिहेदनु ।
क्षौद्रैर्वा चार्द्रकद्रावैश्शुण्ठ्या वा सगुडेन वा ॥ ८६ ॥
अनुपाने सदा खादेत् सर्वरोगप्रशान्तये ।
वह्निं दीपयते वलं च कुरुते तेजो महद्वर्च्छति ।
वीर्यं वर्धयते विषं च हरते दार्ढ्यं विधत्ते तनौ ॥
अभ्यासेन निहन्ति मृत्युपलिते पुष्टिं प्रदत्ते नृणां
खासं कृन्तयते क्षयं क्षपयते श्वासं च निष्कासयेत् ॥ ८७ ॥
वातं विद्रधिशूलपाण्डुग्रहणीरक्तातिसारांजयेत्
मेहप्लीहजलोदराश्मरितृषाशोफं हलीमादिकम ॥
मूत्रकृच्छ्रभगन्दरग्रहगणान्यर्शांसि कुष्ठान्यपि
साध्यासाध्यरुजो निहन्ति रसराट् त्रैलोक्यचिन्तामणिः ॥

भूपतिः

तारं हेमभुजंगशुल्बगगनं वैक्रान्तवंगं शिला
तीक्ष्णं ताप्यकतालकान्तम मृतं प्रत्येककर्षं क्षिपेत् ।
सर्वं तत्समसूतसिन्धुरयुतं योज्यं क्षिपेत्कल्पितं
जम्बीरैस्सह हंसपादिमुरसैमर्द्यं दिनैकैककम् ॥ ८९ ॥
तत्कल्कं मरिचप्रमाणघुटिकाश्शोष्यं क्षिपेत् कूपिका
स्वाच्छाद्यं कठिना मुखं द्रढयितुं लेप्यं च मृत्कर्पटे
यन्त्रे वालुकमध्यवेष्टितरसं यामान्पचेत् षोडश
शीतं चोद्धृतश्लक्ष्णचूर्णितरसं दाण्डे करण्डे क्षिपेत् ॥ ९० ॥
गुञ्जैका मधुशर्करात्रिकटुकं लेह्यं रुजं नाशयेद्
वातं पित्तकफादिदोषजनितान् दुस्साध्यनानाक्षयान् ।
पित्ताम्लं च गुडां करान् जलगरं दुस्साध्यनानाज्वरान्
मेहं विंशतिमूत्रकृच्छ्रग्रहणीरोगातिसारान [1] जयेत् ॥ ९१ ॥
चौषष्ट्युत्तरसन्निपातदशकं वातानशीतिं जयेत् ।
सर्वव्याधिकुलान्तको रसवरस्सेव्यो महाभूपतिः ॥ ९२ ॥
भूपतिर्नवलोहाख्यो रत्नसिद्धो लघुर्महान् ।
प्रतापप्राणदिव्याख्य उत्तमश्चेति ते दश ॥ ९३ ॥

---

1) हरेत्.

लक्ष्मीविलासः

सुवर्णताराभ्रकताम्रवंगात्रिलोहनागामृतमौक्तिकं च ।
एतत्समं शुद्धरसस्य सर्वं लक्ष्मीकृतं स्यात्कृतकज्जलीयम् ॥
सम्मर्दयेन्माक्षिकसंप्रयुक्तं संशोषयेद् द्वित्रिदिनं च घर्मे ।
कल्कं च मूषोदरमध्यसंस्थं यन्त्रीकृते तार्क्ष्यघटे विपक्वम् ॥
यामाष्टकं सांगसुशीतलं स्याल्लक्ष्मीविलासप्रवरो रसेषु ।
क्षये त्रिदोषे गरजे सपाण्डौ सकामिले शूलगदाष्टके च ॥
हन्त्यग्निमान्द्यं सकलज्वरांश्च त्रयोदशोक्तानपि सन्निपातान् ।
प्लीहोदरानाहसगुल्मकुष्ठनिवारकोऽयं सुखदो नराणाम् ॥

अर्धनारीश्वररसः

वर्णिताः क्रमशस्सम्यगेवमष्टौ महारसाः ।
रसगन्धामृतं चैव सर्वतुल्यं च टंकणम् ॥ ९७ ॥
मर्दयेत्तप्तखल्वे तु यावत्कज्जलसन्निभम् ।
नकुलस्य मुखे सम्यक्कज्जलं तद्विनिक्षिपेत् ॥ ९८ ॥
सुदृढं तन्मुखं बध्वा तत्कुर्या[1] त्कुण्डलाकृति ।
दृढभाण्डस्य मध्यस्थमूर्ध्वाधो लवणं क्षिपेत् ॥ ९९ ॥
वस्त्रमृत्तिकया सम्यक् चतुर्यामं हराग्निना ।
सांगशीतलमुध्दृत्य खल्वमध्ये विनिक्षिपेत् ॥ १०० ॥
भावयेद्रुक्मनिर्गुण्ड्या पुनश्शाल्मलिकारसैः ।
शोषयेत्सूर्यतापेन रसस्सिद्धो भविष्यति ॥ १०१ ॥
पूजयेद्वटुविघ्नेशौ कुमारीमथ चण्डिकाम् ।
गुञ्जाद्वयप्रमाणेन नस्यं कुर्याद्विचक्षणः ॥ १०२ ॥
वामभागे ज्वरं हन्ति लोकेऽत्याश्चर्यमश्नुते ।
योजयेद्दक्षिणे भागे नीरोगित्वं भवेद् ध्रुवम् ॥ १०३ ॥
गुह्याद्गुह्यातरं गुह्यं गोपनीयं प्रयत्नतः ।
अर्धनारीश्वरो नाम रसस्सारेण निर्मितः ॥ १०४ ॥
रसौषधानि सर्वाणि त्वग्निमध्ये विनिक्षिपेत् ।
किञ्चिद्गन्धं धूमयुक्तं (दरदेन) सुपाचितम् ॥ १०५ ॥
न ज्ञायेते धूमगन्धौ पाकाधिक्यादनौषधम् ।
वल्मीकशिखराकारं भंगे नीलोत्पलद्युति ॥ १०६ ॥
घर्षणे रक्तवर्णं स्यात्सिन्धूरं तत्प्रशस्यते ।

द्रवद्रव्यमानम् ॥

चाम्पेयकुसुमाभासं तद्गन्धेनैवसंयुतम् ॥ १०७ ॥
लघुवारिकरं श्लक्ष्णं वसन्तकुसुमाकरम् ।
बृहतीकुसुमाकारं लघुवारितरं लघु ॥ १०८ ॥
घर्षणे कृष्णवर्णं स्यात् तन्मृगांकस्य लक्षणम् ।
अतसीपुष्पसंकाशो भूपतिर्लघुमानकः ॥ १०९ ॥
दाडिमापुष्पसंकाशं पूर्णचन्द्रोदयाह्वयम् ।
कस्तूर्यामोदसंयुक्तं मेहरोगापहं शुभम् ॥ ११० ॥
किञ्चित्कपिलशुभ्रांशु छेदे गुरु च निर्दलम् ।
मृदुलं वर्णतः श्रेष्ठं स्वच्छवर्णं बलप्रदम् ॥ १११ ॥
राजितं चाप्यतिश्वेतं भसितं नवकर्बुरम् ।
ताम्रं जम्बूफलाभासं गुरु स्याद्रेकवान्तिकृत् ॥ ११२ ॥
नागोऽपि रक्तवर्णः स्यात्किञ्चिच्छोणो जले [1] प्लवेत् ।
शंखाभं वंगभस्म स्यादलघूत्थानवर्जितम् ॥ ११३ ॥
लोहजं लोहसंकाशं कृष्णवर्णं भवेल्लघु ।
प्रवालानलसंकाशं कान्तभस्म लघूच्यते ॥ ११४ ॥
बृहतीपुष्पसंकाशं वैक्रान्तस्य च भस्मकम् ।
लेखापूर्णं वारितरमभ्रकं लघु चोत्तरम् ॥ ११५ ॥
बिन्दुः स्यान्मध्यमांगुल्या मध्यपर्वच्युतो मतः ।
बिन्दुद्वाविंशकमुद्धुरुद्व द्वे शक्तिरिष्यते ॥ ११६ ॥
शक्तिद्वयं प्रकुञ्चं तु तद्द्वयं प्रसृतं स्मृतम् ।
अञ्जलिः प्रसृतिद्वन्द्वं कुडुपं चाञ्जलिद्वयम् ॥ ११७ ॥
चतुः कुडुपिकं प्रस्थं प्रस्थाश्चत्वार आढकः ।
चत्वार आढकाद्रोणः खारी द्रोणचतुष्टयम् ॥ ११८ ॥
घटः खारीचतुष्कं स्याद् द्रवद्रव्यस्य मानकम् ।

अद्रवद्रव्यमानम्

परमाणुचतुष्कं यदणुरित्यभिधीयते ॥ ११९ ॥
त्रसरेणुस्तच्चतुष्कं रेणुस्तस्य चतुष्टयम् ।
लिक्षा रेणुचतुष्कं स्यात्तस्मान्माधुरिका तथा ॥ १२० ॥

---

1) कुण्डलीकृतम्.

1) तरेत्.

तच्चतुष्कं तु विदरं व्रीहिस्तस्मात्तथा मतः ।
व्रीहिस्तस्माच्च कैतद्वच्छकयश्चैव तथा पणः ॥ १२१ ॥
ततः पणाष्टकं शाणं कर्षं शाणचतुष्टयम् ।
कर्षैश्चतुष्ककैः प्रोक्तं पलमित्येव पण्डितैः ॥ १२२ ॥
तुलां पलशतं विद्याद्भारस्तद्विंशतिः स्मृतः ।
द्रव्यस्य चाद्रवस्यैव क्रमान्मानं विधीयते ॥ १२३ ॥
क्राथस्य कल्कस्य रसस्य यामं मासं तु चूर्णं घुटिका द्विमासम् ।
षण्मासंस्थं गुडलेहवीर्यं संवत्सरं तैलघृतस्य तिष्ठेत् ।
रत्नलोहरसैर्युक्तं पुराणं गुणवद्भवेत् ।
मण्डलं च तदर्धं च तदर्धं सप्तकं तथा ॥ १२५ ॥
नव सप्तत्रिदिवसं भैषजानामिति क्रमः ॥ १२६ ॥
कल्कं निष्कं पादहीनं शिशूनां
यूनामक्षं वार्धके च द्विनिष्कम् ।
स्त्रीणां निष्कं शैशवे पादहीनं
वृद्धे निष्कं मध्यमे च द्विनिष्कम् ॥ १२७ ॥
शान्तपाषाणवैक्रान्तगन्धकव्योमटंकणम् ।
हेमादिलोहमखिलं निष्कान्तं च पणाद्यकम् ॥ १२८ ॥
कलादिपणमात्रं तु प्रयोक्तव्यं रसेन्द्रकम् ॥ १२९ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादनबिन्दुकारण चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादासादितशिवाद्वैत विद्याविशारदश्रीमत्केलदिबसवराजेन्द्रावरचिते वेदागमान्तर्गतविविधविद्यातन्त्रसारभूते श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले द्रव्यगुणमहारसादिनिरूपणं नाम द्वाविंशस्तरंगः

अथ त्रयोविंशस्तरंगः

श्रीमद्भिः कथितं पूर्वं बहुधा रसवैभवम् ।
संसेवितं नृणां दद्यादजरत्वमिति स्फुटम् ॥ १ ॥
अत्यद्भुतमिति श्रुत्वा हृष्यतीदं मनोधिकम् ।
तस्योत्पत्त्यादिकं सर्वं रसेन्द्रस्य निरूप्यताम् ॥ २ ॥
सर्वलोकोपकारार्थं गुह्याद् गुह्यतरं हितम् ।
तत्सर्वं च प्रवक्ष्यामि श्रुणु नन्दन! सम्प्रति ॥ ३ ॥
पुरावतंसलीलाढ्यो हिमवद्गिरिकन्दरे ।
कौतुकागारमागत्य क्रीडतोरावयोर्गतम् ॥ ४ ॥
दिव्यं युगशतोपेतं सहस्रयुगमीश्वरि! ।
तदा तारकदैत्येन बाधितास्सर्वदेवताः ॥ ५ ॥
मद्वीर्यजनितं पुत्रं तद्वधार्थमभीप्सवः ।
अग्निमाज्ञापयामासुस्संभोगस्य निवृत्तये ॥ ६ ॥
अग्निः कपोतरूपेण स्मरलीलां विलोकयन् ।
आस्ते तमग्निमाज्ञाय लज्जया रतमत्यजत् ॥ ७ ॥
प्रच्युतं चरमं धातुं स गृहीत्वैकपाणिना ।
तेन दंदह्यमानोऽग्निर्गङ्गायां विससर्ज तत् ॥ ८ ॥
तेन गङ्गा तु संतप्ता तद्बहिर्विससर्ज च ।
तद्विधाभूद्बहिः प्राप चैकः स्कन्दं प्रसूयते ॥ ९ ॥
अपरः क्षेपसंभारादाकाशे पञ्चधाऽभवत् ।
सतु शुद्धरसो भूत्वा ह्यपतद् भुवि भारते ॥ १० ॥
शतयोजननिम्नेषु पञ्चकूपेषु संस्थितः ।
तन्मूलाद्धातवो जाता मणयो दिव्यवस्तु च ॥ ११ ॥
तत्तत्क्षेत्रविशेषेण नामवर्णादिकान् गुणान् ।
भिन्नान्प्राप्तो रसेन्द्रोऽयं जन्मदारिद्र्यभञ्जनः ॥ १२ ॥

मध्यो जातादिनामाङ्काः पञ्च कूपास्तु ते स्मृताः ।
मुखवत्पञ्चवर्णाढ्या स्तत्तत्कर्मोपकारिणः ॥ १३ ॥
पूर्वस्यां पारदः श्वेतो नानारूपगदापहः ।
चञ्चलो दक्षिणस्यान्तो रसेन्द्रो नीलवर्णवान् ॥ १४ ॥
दोषहीनोऽतिरूक्षश्च सुतरां चञ्चलः प्रिये ! ।
तेन जाता भुजङ्गेन्द्रगदाजन्मभयापहाः ॥ १५ ॥
पश्चिमस्यां प्रसूतश्च पीतवर्णोऽतिरूक्षकः ।
सर्वदोषायुतोऽसौ तु शुद्धोष्टादशकर्मभिः ॥ १६ ॥
सर्वसिद्धिप्रदस्सोऽयं देहलोहादिसिद्धिदः ।
उत्तरस्यां रसो रक्तस्सर्वदोषविवर्जितः ॥ १७ ॥
रसायनं तु तेनैव जितं जन्मजराभयम् ।
मध्ये तु मिश्रको ज्ञेयस्सर्ववर्णसमन्वितः ॥ १८ ॥
क्वचिच्चन्द्रकसच्छायोऽशेषदोषसमन्वितः ।
सचाष्टादशसंस्कारैश्शुद्धस्सिद्धिप्रदो भवेत् ॥ १९ ॥
अन्ये च सर्वकार्येषु सिद्धिदा अपि कर्मभिः ।
अष्टादशभिरत्यन्तं शुद्धासिद्धिप्रदा नृणाम् ॥ २० ॥
श्वेतादिवर्णतो ब्रह्मक्षत्रविट्छूद्रमिश्रकाः ।
असाधारणसामर्थ्यात् संधत्ते नामपञ्चकम् ॥ २१ ॥
जन्मरोगजरामृत्युदारिद्र्याम्भोनिधेः परम् ।
पारं ददाति तेनैव पारदः परिकीर्त्तितः ॥ २२ ॥
रसोपरसलोहादिकर्तृत्वाच्च रसेन्द्रकः ।
मम प्रत्यङ्गसूतत्वात् सूत इत्यभिधीयते ॥ २३ ॥
सूते यस्मात् सर्वसिद्धिं तस्मात् सूत इति स्मृतः ।
मम देहे रसो यस्माद्रसस्तस्मात्प्रकीर्त्तितः ॥ २४ ॥
स्वयं च द्रवरूपत्वाद्रसशब्देन कीर्त्तितः ।
मिश्रकस्त्वन्यसंबन्धात् सर्वसिद्धिप्रदानतः ॥ २५ ॥
पारदो व्याधिसंहारे रसेन्द्रो रसकर्मणि ।
धातुकर्मणि सूतः स्याद्रसाख्यश्च रसायने ॥ २६ ॥
सर्वकर्मार्हकतया सर्वरूपतयापि च ।
सर्वसिद्धिप्रदतया मिश्रकोऽयमुदाहृतः ॥ २७ ॥
अमोघशक्तिममलं सर्वसिद्धिप्रदं रसम् ।
आलोक्य त्रिदशास्सर्वे ब्रह्मविष्णुपुरोगमाः ॥ २८ ॥
शिवं संप्रार्थयामासुस्स्तोत्रैश्च विविधैरपि ।
रसेन्द्रदर्शनादत्र नरपक्षिमृगादयः ॥ २९ ॥

सिद्धिं नानाविधां यान्ति तन्निवारय शङ्कर ! ।
तैरिति प्रार्थितो दोषैः कञ्चुकैस्तमयोजयत् ॥ ३० ॥
तदा प्रभृति दोषैश्च कञ्चुकैश्च विवर्जितः ।
शुद्धोऽष्टादशसंस्कारैस्सूतो भवति सिद्धिदः ॥ ३१ ॥
धूमच्छिटिचिटिशब्दो मण्डूकप्लुतिरेव च ।
सकम्पश्च विकम्पश्च पञ्चावस्था रसस्य तु ॥ ३२ ॥
रसावस्थाश्चतस्रोऽपि दृश्यन्ते न तु पञ्चमी ।
ध्यानमन्त्रौषधाद्यैश्च रोद्धव्या पञ्चमी गतिः ॥ ३३ ॥

रसदोषकञ्चुकम्.

पार्थिवश्च तथैवान्य आग्नेयश्चानिलस्तथा ।
नाभसो गजचर्माख्यः पुण्डरीको विसर्पकः ॥ ३४ ॥
हारिद्रो रक्तचर्माख्यो सारङ्गो रक्तविन्दुकः ।
असह्याग्निश्च मण्डूको मला नैसर्गिका मताः ॥ ३५ ॥
कालिका मलिनी चैव कपोती वर्तिका तथा ।
अलोमी गिरिजा चैव पिङ्गली सप्त कञ्चुकाः ॥ ३६ ॥
औपाधिका इमे सप्त पारदं परिकीर्त्तिताः ।
विषं नागश्च वङ्गश्च यौगिकास्तु त्रयस्स्मृताः ॥ ३७ ॥
भौमस्तु कुष्ठदश्चाद्यो दोषोद्रेकं करोति सः ।
आग्नेयः कुरुते दाहं वायव्यश्शूलकृद् भवेत् ॥ ३८ ॥
बाधिर्यं नाभसो दोषं गजत्वग्गजचर्मकृत् ।
पुण्डरीको दद्रुकरो विसर्पिः पिटकादिकृत् ॥ ३९ ॥
हारिद्रः पाण्डुकृत् प्रोक्तो रक्तचर्माक्षि पाटलम् ।
नारङ्गोदुम्बरं कुष्ठं रक्तविन्दुर्मसूरिका ॥ ४० ॥
असह्याग्निर्महकारी मण्डूकश्चर्मकीलकृत् ।
मलो मूर्छाकरो देवि ! ख्याता दोषोद्भवा गुणाः ॥ ४१ ॥
कालिका कृष्णवर्णत्वं मलिनी मलसंग्रहम् ।
कपोती स्वरसारं च विस्फोटं वर्तिका तथा ॥ ४२ ॥
सलोमी वमनं कुर्याद् गिरिजा जाड्यकारिणी ।
पिङ्गल्या नेत्ररोगः स्यादिति कञ्चुकसप्तकम् ॥ ४३ ॥
विषं मृत्युप्रदं नागो जाड्यं यच्छति वङ्गकः ।
कुरुते पूतिगन्धित्वं गुणा यौगिकसंभवाः ॥ ४४ ॥
प्रथमार्तवसुस्नाता सुरूपा शुभलक्षणा ।
शुद्धाम्बरधरा माल्यगन्धयुक्ता सुभूषणा ॥ ४५ ॥
उत्तमाश्वसमारूढा पतिसंगविवर्जिता ।
अभ्यर्च्य गणनाथं च रसेन्द्रं च गुरुं तथा ॥ ४६ ॥

रसेन्द्रमीश्वरं ध्यात्वा कूपस्थं पारदं तथा ।
पर्येच्छीघ्रं ततो गच्छेत्पुनः पृष्ठं न वीक्षयेत् ॥ ४७ ॥
एकयोजनमात्रेण कुमारीहयसाधना ।
तदानीं हरेरतस्तु कुमारीमंजिघृक्षया ॥ ४८ ॥
कूपमध्यात् समुत्पत्य सोऽनुधावति तां प्रति ।
यावद्योजनमागत्य पुनः कूपं विशेत् क्षणात् ॥ ४९ ॥
परितः कृतगर्तेषु तेषु तेषु व्यवस्थितम् ।
तं रसेन्द्रं शुचिर्भूत्वा गृह्णीयाद्रसदेशिकः ॥ ५० ॥
गौरखादग्निवदनात्पतितो दरदः क्षितौ ।
देशेषु सूतो भूरिनिस्तन्द्रैः रसकोविदैः ॥ ५१ ॥
निक्षिप्यमृत्तिकायन्त्रे पातनाख्यं समागतः ।
पारदो गृह्यते शुद्धस्समकञ्चुकवर्जितः ॥ ५२ ॥
एवमेतं तत्र तत्र सिद्धैर्विद्याधरैस्सुरैः ।
निक्षेपतः पारदेन्द्रो विद्यते सर्वसिद्धिदः ॥ ५३ ॥
सेतुकेदारपर्यन्तदिव्यदेशाद्यदर्शने ।
यत्पुण्यं लभते मर्त्यस्तल्लभेत रसेक्षणात् ॥ ५४ ॥
अभिधानानि जानन्ति ये चापि रससंहिताम् ।
सर्वदेशीयभाषाज्ञास्संग्राह्यास्संतुवार्त्तिकाः ॥ ५५ ॥
समस्तमूलिकाभिज्ञश्शुचिर्दक्षो जितश्रमः ।
अनुरक्तो निमित्तज्ञो बुद्धिमान् परिचारकः ॥ ५६ ॥
धर्मिष्ठस्सत्यवान् विद्वान् शिवकेशवपूजकः ।
पद्महस्तश्च संपूज्यो रसवैद्यस्स कथ्यते ॥ ५७ ॥

रसदर्शनफलम्.

भूनागघनवैक्रान्तविमलताप्यतुच्छकाः ।
खर्परी राजवर्तश्च ख्याता अष्टौ महारसाः ॥ ५८ ॥
सुधोपमानि सत्वानि तेषामत्र न संशयः ।

रसवैद्यलक्षणम्.

गन्धकं कुष्ठकासीसशिला कांक्षी वराटिका ॥ ५९ ॥
गौरिकस्तालकश्चाष्टा उपपूर्वा रसा अमी ।

साधारणरसाः

गिरिसिन्दूरमोदाश्रुभृङ्गिगौरिशिलाञ्जनम् ॥ ६० ॥
कम्पिल्लश्चपलः प्रोक्तस्साधारणरसा इमे ।
हिंगुलं सस्यकं चैव शिलाजित्वग्निजारकः ॥ ६१ ॥
एते शक्तिरसाः प्रोक्ताश्चत्वारो रसशासने ।
माणिक्यमुक्तावैडूर्यनीलगारुडविद्रुमाः ॥ ६२ ॥
गोमेधपुष्यरागौ च वज्रश्च मणयो नव ।
सूर्यकान्तश्चन्द्रकान्तस्ताराकान्त इति त्रयः ॥ ६३ ॥
त्रीण्येव चोपरत्नानि लोहकान्तं च कंचन ।
स्वर्णं रौप्यं ताम्रनागवङ्गं कान्तं च तीक्ष्णकम् ॥ ६४ ॥
मुण्डं चेत्यष्टधा लोहा घोषो वर्णश्च तीतिका ।
उपलोहास्त्रयः प्रोक्तास्सूतसिद्धान्तशासने ॥ ६५ ॥
अथैतेषां समुत्पत्तिं लक्षणं च क्रमाद् ब्रुवे ।
वज्राणां द्रावणार्थाय सत्वं भूनागजं ब्रुवे ॥ ६६ ॥
तदेव परमं तेजः सूतराजेन्द्रवज्रयोः ।
भुजङ्गमानुपादाय चतुः प्रस्थसमन्वितान् ॥ ६७ ॥
सुवर्णरौप्यताम्रायस्कान्तसंभूतभूमिजान् ।
प्रक्षाल्य रजनीतोयैश्शीतलैश्च जलैरपि ॥ ६८ ॥
जपापितमयूरं वा शुकं वा चरणायुधम् ।
क्रमेण चारयित्वा वा तद्विष्ठां समुपाहरेत् ॥ ६९ ॥
क्षाराम्लैस्सह संपच्य विशोष्य च खरातपे ।
ततः खर्परके क्षिप्त्वा भर्जयित्वा मषीं चरेत् ॥ ७० ॥
मषीं द्रावणवर्गेण संयुक्तां संप्रमर्दिताम् ।
निरुध्य कोष्ठिकामध्ये प्रथमे घटिकाद्वयम् ॥ ७१ ॥
शीतभूतं तु मूषाया घोटमाहृत्य पेषयेत् ।
प्रक्षाल्य नवकान् पांसून् समादाय प्रयत्नतः ॥ ७२ ॥
सुवर्णमानवध्यात्वा स्वं कृत्वा नियोजयेत् ॥
भूनागोद्भवसत्वमुत्तममतं श्रीसोमदेवोदितं
दत्तं पादमिदं दिशाणकनकेनैकं गतेनोमिकाम् ।
तद्धौताम्बुविलेपनं स्थिरचरोद्भूतं विषं नेत्रह-
द्दुर्नामानि च कर्णरोगमखिलं हन्यात् प्रसूतिग्रहम् ॥ ७३ ॥

अभ्रकवैक्रान्तम्.

कदाचिद् गिरिजा देवी हरं दृष्ट्वा मनोरमम् ।
अमोचयत्तदा शुक्रं तज्जातं शुभ्रमभ्रकम् ॥ ७४ ॥
पीतं रक्तं तथा कृष्णं भेदोऽभूद् भूमिसंगमात् ।
दैत्येन्द्रो महिषस्सिद्धो हरदेहसमुद्भवः ॥ ७५ ॥
दुर्गा भगवती देवी तं शूलेन व्यदारयत् ।
तस्य रक्तं तु पतितं यत्र यत्र स्थितं भुवि ॥ ७६ ॥
तत्र तत्र तु वैक्रान्तो वज्राकारो महारसः ।
विन्ध्यस्य दक्षिणे चास्ते सर्वथा नास्ति चोदरे ॥ ७७ ॥

अष्टास्त्रकोष्टफलकः षट्कोणो मसृणो गुरुः ।
शुद्धमिश्रितवर्णैश्च युक्तो वैक्रान्त उच्यते ॥ ७८ ॥
श्वेतो रक्तश्च पीतश्च नीलः पारावतच्छविः ।
श्यामलः कृष्णवर्णश्च कर्बुरश्चाष्टमः स्मृतः ॥ ७९ ॥
पुरामृतकणा देवि! पतिता देवतामुखात् ।
शुष्कास्ते विमलाः प्रोक्तास्सर्वकर्मकरा वराः ॥ ८० ॥
त्रिविधास्ते महेशानि! हेमाद्यास्तारपूर्विकाः ।
अन्यश्च कांस्यविमलो रत्नसिद्धान्तशासने ॥ ८१ ॥
वर्तुलः कोणसंयुक्तस्तिर्यक्सुफलकान्वितः ।
पूर्वो हेमक्रियायुक्तो द्वितीयो रौप्यकृन्मतः ॥ ८२ ॥
तृतीयो भेषजे तेषु पूर्वः पूर्वो गुणाधिकः ।

माक्षिकम्.

कृष्णापादतले विद्धे व्याधेन मृगशङ्कया ॥ ८३ ॥
तत्र ये पतिता भूमौ क्षताद्रुधिरबिन्दवः ।
ते निम्बफलसङ्काशा जाता माक्षिकगोलकाः ॥ ८४ ॥
माक्षिको द्विविधो हेममाक्षिकस्तारमाक्षिकः ।
तत्राद्यो माक्षिकः कन्याकुब्जोत्थस्स्वर्णसन्निभः ॥ ८५ ॥
ततः पतिरसं भूतः पञ्चवर्णसुवर्णवत् ॥ ८६ ॥
पीत्वा हालहलं तद्वदमृतं च गरुत्मता ।
विषेणामृतयुक्तेन गिरौ मरकताह्वये ॥ ८७ ॥
तद्वान्तं हि खनीभूतं संजातं तुत्थकं खलु ।
मयूरकण्ठसच्छायं भाराढ्यमिति शस्यते ॥ ८८ ॥

खर्परी.

मृत्पाषाणगुडैस्तुल्यस्त्रिविधो रसिको मतः ।
पीतस्तु मृत्तिकाकारो मृत्तिकारसिको वरः ॥ ८९ ॥
गुडाभो मध्यमो ज्ञेयः पाषाणाभः कनिष्ठकः ।
राजावर्तोऽल्परक्तोरुनीलिमाश्रितसुप्रभः ॥ ९० ॥
गुरुश्च मसृणः श्रेष्ठस्तदन्यो मध्यमः स्मृतः ।
क्षीराब्धिमथने चैतदमृतेन सहोत्थितम् ॥ ९१ ॥
निजगन्धेन तान् सर्वान् हर्षयन् सुरदानवान् ।
तत्तु देवगणैर्गुप्तं गन्धकाख्यां समाश्रयत् ॥ ९२ ॥
रसस्य बन्धनार्थाय जारणाय च जायते ।
ये गुणाः पारदे प्रोक्तास्ते चैवात्र भवन्ति हि ॥ ९३ ॥
चतुर्धा गन्धको ज्ञेयो वर्णैश्श्वेतादिभिः स्वयम् ।
श्वेतोऽत्र स्फटिकाभः स्याच्छस्तोऽसौ लोहमारणे ॥ ९४ ॥

तथामलकसाराख्यो यो भवेत् पीतवर्णवान् ।
शुकपिञ्छस्स एव स्याच्छ्रेष्ठोऽसौ तु रसायने ॥ ९५ ॥
रक्तस्तु शुकतुण्डाख्यो धातुवादविधौ परः ।
दुर्लभः कृष्णवर्णश्च ज्वरमृत्युविनाशनः ॥ ९६ ॥
हिमवत्पादशिखरे कंकुष्ठमुपजायते ।
तत्रैकं नालिकाख्यं हि तदन्यद्रेणुकं मतम् ॥ ९७ ॥
पीतप्रभं गुरु स्निग्धं श्रेष्ठं कंकुष्ठमादिमम् ।
श्यामपीतलघुत्यक्तसत्वं नेच्छन्ति रेणुकम् ॥ ९८ ॥
मनश्शिला त्रिधा प्रोक्ता श्यामला करवीरका ।
कन्दाख्या चेति निर्दिष्टा श्रेष्ठा तासूत्तरोत्तरा ॥ ९९ ॥
श्यामा रक्ता च गौरा च भाराढ्या श्यामिका मता ।
तेजस्विनी च निर्गाढा स्वर्णाभा करवीरका ॥ १०० ॥
चूर्णीभूतातिरक्ताङ्गी तृतीया रससंयुता ।
यथोत्तरं गुणैश्श्रेष्ठा भूरिसत्वा प्रकीर्त्तिता ॥ १०१ ॥
सौराष्ट्रखनिसंभूता मृत्सा या तु वरा मता ।
वस्त्रे तु लिप्यते या तु माञ्जिष्ठाङ्गारवर्धिनी ॥ १०२ ॥
पीडिता स्फुटिका चेति द्विधा सा परिकीर्त्तिता ।
ईषत्पीता गुरु स्निग्धा पीतिका विषनाशिनी ॥ १०३ ॥
निर्भरा शुभ्रवर्णा च स्निग्धा साम्ला परा मता ।
वराटिका द्विधा प्रोक्ता बुधैस्स्त्रीपुंविभेदतः ॥ १०४ ॥
पीताभा ग्रन्थिला क्षुद्रा दीर्घा वृत्ता वराटिका ।
रसवैद्यैर्विनिर्दिष्टा सा चराचरसंज्ञिका ॥ १०५ ॥
सार्धनिष्कवरा श्रेष्ठा निष्कभारा च मध्यभा ।
पादोननिष्कभारा तु कनिष्ठा परिकीर्त्तिता ॥ १०६ ॥
द्विविधं गैरिकं प्रोक्तं पाषाणस्वर्णभेदतः ।
तत्राद्यं ताम्रवर्णाढ्यं कठिनं परिकीर्त्तितम् ॥ १०७ ॥
अत्यन्तशोणितं स्निग्धं मसृणं स्वर्णगैरिकम् ।
तालकं द्विविधं प्रोक्तं पत्रपिण्डप्रभेदतः ॥ १०८ ॥
तत्राद्यो बहुपत्राढ्यो भासुरस्तरुपत्रकः ।
स्वर्णवर्णो गुरुः स्निग्धश्शस्यते च रसायने ॥ १०९ ॥
निष्पत्रं पिण्डसदृशं स्वल्पसत्वं तथा गुरु ।
स्त्रीपुष्पहरणे दक्षो द्वितीयः परिकीर्त्तितः ॥ ११० ॥
गिरेरधित्यकायां तु पाषाणं तत् स्थितं रजः ।
शुभ्रश्शोणप्रभः प्रोक्तो गिरिसिन्दूरसंज्ञिकः ॥ १११ ॥

सदलं पीतवर्णं च भवेद् गुर्वरमण्डले ।
अर्जुनस्य गिरेः पार्श्वे जातं पोदारशृङ्गकम् ॥ ११२ ॥
गौरीपाषाणकः पीत ईषद्रक्तस्तु चूर्णकः ।
रसबन्धकरः स्निग्धो दोषघ्नो लोहवेधकृत् ॥ ११३ ॥
सौवीरमञ्जनं प्रोक्तं रसाञ्जनमतः परम् ।
स्रोतोऽञ्जनं तदन्यच्च पुष्पाञ्जनमतः परम् ॥ ११४ ॥
नीलाञ्जनमिति प्रोक्तं भेदपञ्चकसंयुतम् ।
इष्टकाचूर्णसंकाशश्चन्द्रिकाद्युतिरेचनः ॥ ११५ ॥
सौराष्ट्रदेशखनिजो नामतस्सिक्लको मतः ।
चपलस्स्फटिकच्छायष्षडस्रस्स्निग्धको गुरुः ॥ ११६ ॥
चपलो बहुभेदश्च सर्वलोहकरो मतः ।
हेमस्तारो रविमयस्सीसात्मानङ्गरूपधृत् ॥ ११७ ॥
तीक्ष्णरूपः कांस्यरूपो रक्तो विषमयस्तथा ।
तत्र लोहसदृक्षोऽस्ति विषो हरितवर्णभाक् ॥ ११८ ॥
विषाख्यं चपलं बद्ध्वा निर्जने स्थापयेत्क्वचित् ।
तद्धूमालोकनाच्छीर्षपीडा संजायते नृणाम् ॥ ११९ ॥
अज्ञानात्तस्य संस्पर्शे म्रियते सद्य एवहि ।
सर्वेषां चपलानां वै स्वभावोऽयमुदाहृतः ॥ १२० ॥
नागस्तम्भे नागरञ्जे क्रमेणातीव शस्यते ।
सर्वलोहानि कुर्वीत सुवर्णं तारमेव हि ॥ १२१ ॥
युक्तायां साधितस्सूतो विना बीजांशकेन च ।
हिंगुलस्त्रिविधो ज्ञेयश्चर्मारश्शुकतुण्डकः ॥ १२२ ॥
हंसपादश्च तत्राद्यं हेम कुन्त्से नियोजयेत् ।
अधमं तं विजानीयाच्छुकतुण्डं तु मध्यमम् ॥ १२३ ॥
उत्तमं हंसपाद्यं च योजयेद्धेमरौप्ययोः ।
चर्मारस्तीक्ष्णरूपः स्यात् कुपितश्शुकतुण्डकः ॥ १२४ ॥
जपाकुसुमसंकाशो हंसपादो महोत्तमः ।
रसायने सर्वरोगहरणे लोहरञ्जने ॥ १२५ ॥
सूतस्य रञ्जने श्रेष्ठा वर्णोत्कर्षणकर्मणि ।
वैक्रान्त इव सर्वत्र दरदो जायते गुणे ॥ १२६ ॥
मलदोषादिकं नास्ति सर्वरोगेषु युज्यते ।
सस्यकस्तु समायुक्तो भेदैः पञ्चभिरीरितैः ॥ १२७ ॥

पुरा देवसुधापानकाले पञ्चप्रभायुतः ।
भूतले पतितो देवि! सुधाया बिन्दुजालकः ॥ १२८ ॥
ततस्सस्यकनामाभूत् पञ्चभेदसमन्वितः ।
धवलो मेचकः पीतो हरितश्चातिलोहितः ॥ १२९ ॥
रसस्य रागदो लेशमात्रेण न हि संशयः ।
शतं सहस्रं लक्षं वा वेधयेन्नात्र संशयः ॥ १३० ॥
धवलो हरितश्चैव तारकर्मणि शस्यते ।
लोहितो मेचकः पीतः स्वर्णे तु विनियुज्यते ॥ १३१ ॥
माषमात्रं प्रदातव्यं नाधिकं धीमता सदा ।
नागस्य द्रवति क्षिप्रं स्थिररागस्वभावतः ॥ १३२ ॥
शिलाजतुर्धातुविद्भिर्विविधः परिकीर्त्तितः ।
गोमूत्राभस्तत्र पूर्वो रसायनमिति स्मृतः ॥ १३३ ॥
कर्पूरपूर्वकश्चान्त्यस्तत्राद्यो द्विविधो मतः ।
ससत्वश्चैव निस्सत्वस्तयोः पूर्वो गुणाधिकः ॥ १३४ ॥
ग्रीष्मे तीव्रार्कतप्तेभ्यः पादेभ्यो हिमभूभृतः ।
स्वर्णरूप्यार्कगर्भेभ्यश्शिलाधातुर्विनिस्सरेत् ॥ १३५ ॥
स्वर्णगर्भगिरौ जातो जपापुष्पनिभो गुरुः ।
स्वल्पतिक्तश्च सुस्वादुः परमश्च रसायने ॥ १३६ ॥
रूप्यगर्भगिरेर्जातो मधुरः पाण्डुरो गुरुः ।
ताम्रगर्भगिरौ जातो नीलवर्णो गुरुर्घनः ॥ १३७ ॥
शिलाजित् कफवातघ्नस्तिक्तोष्णश्च प्रमेहजित् ।
वह्नौ क्षिप्तो भवेद्योऽसौ लिङ्गाकारो ह्यधूमकः ॥ १३८ ॥
सलिलेऽप्यविलीनश्च स सिद्धो हि शिलाजतुः ।
समुद्रेणाग्निनक्रस्य जरायुर्वहिरुज्झितः ॥ १३९ ॥
संशुष्को भानुतापेन सोऽग्निजार इति स्मृतः ।
रसाश्चोपरसास्तेषां भेदाश्चैव समीरिताः ॥ १४० ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणचिदम्बर-
शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
रसोत्पत्त्यादिवर्णनं नाम त्रयोविंशस्तरङ्गः

अथ चतुर्विंशस्तरंगः

रसोपरसमुख्यानि प्रोक्तान्येवं मयाधुना ।
रसक्रियायां करणमोषध्यादि निरूप्यते ॥ १ ॥

ईश्वरी भूतकेशी च क्षत्रिणी ताम्रवल्लिका ।
ज्योतिर्लता च गोश्रृङ्गी रुदन्ती देवदारिका ॥ २ ॥

पद्मिनी काकिनी रक्तलता लशुनवल्लरी ।
भूतम्बी तुम्बिनी पीतवल्ली गरुडवल्लिका ॥ ३ ॥

त्रिभूरिनी चमरिका गोमाली भगवल्लिका ।
महौषधी व्याघ्रपादी गन्धर्वी कृष्णवल्लरी ॥ ४ ॥

चण्डाली वीरवल्ली च रोहिणी मुनिवल्लिका ।
बिल्विनी रोचनलता मण्डूकी मूलकन्दकम् ॥ ५ ॥

तिलकन्दोऽतर्सावल्ली महामूषः वरीरकम् ।
ब्रह्माणी माधवी निम्बा लता कूर्मलता तथा ॥ ६ ॥

करीवल्लरी चेति रसबन्धं वितन्वते ।
जलोत्पला समङ्गा च रसा जाजलपिप्पली ॥ ७ ॥

स्थलप्रसारिणी चिन्त्या जालिनी जलमूलकम् ।
चन्द्रिका चार्धचन्द्रश्च जलहेमागमस्तथा ॥ ८ ॥

तुषाम्बुः काकमाची च जलकुम्भी तथा परा ।
उत्तमा टोमपुष्पी च दुर्गन्धा सितगन्धिनी ॥ ९ ॥

मण्डूकरोहिणी मांसी पाषाणी वायसी शिखा ।
शारिबालाम्बुसा मेघनादी च शुकनासिका ॥ १० ॥

पताकी क्षितिणी वज्री तण्डूका चापराजिका ।
नन्दिनी शिकपादा च कपोती तुलसी तथा ॥ ११ ॥

वनकूष्माण्डवल्ली च वृश्चिकाली च वेणुका ।
मुसली चित्रपत्रा च कर्णिस्फोटी तथा परा ॥ १२ ॥

अष्टषष्टिरिति प्रोक्ता वनौषध्यो महाबलाः ।
बन्धने मारणे तद्वज्जारणे च नियामने ॥ १३ ॥

बन्धदाने च सूतस्य सर्वदोषापकर्षणे
विन्ध्याद्रौ हिमपर्वते च मलये गोमन्तके श्रीगिरौ
सह्याद्रावथ पारियात्रकगिरौ किष्किन्धनामाचले ।
माहेन्द्रेऽप्यथ माल्यवत्क्षितिधरे तद्रूपनामादिकं
गोपाभीरकसिद्धवैद्यमुखतस्सम्यक् समावेद्यताम् ॥ १४ ॥

सर्पाक्षिवन्ध्यकर्कोटजलबिम्बी च कञ्चुकी ।
पुनर्नवा च मत्स्याक्षी भृङ्गराजश्शतावरी ॥ १५ ॥

सितशंखी च मण्डूकपर्णिका ब्रह्मदण्डिका ।
अनन्ता काकमाची च काकजंघा शिखण्डकम् ॥ १६ ॥

सहदेवी कपोती च विष्णुक्रान्ता कुरण्टका ।
महाबला बला नागबला मुर्वा कुरण्टिनी ॥ १७ ॥

क्षीरनाली प्रपुन्नाटमल्लकयामलकी तथा ।
जालिनी मेघनादश्च गोजिह्वा पद्मचारिणी ॥ १८ ॥

घोण्टा च कोकिलाक्षश्च त्रिपुटा चाम्बुकर्णिका ।
एकपर्णी द्विपर्णी च त्रिपर्णी क्षीरिणी तथा ॥ १९ ॥

तित्तिरी मेघसङ्गी च तुलसी कामचारिणी ।
श्वेता द्विकर्णिका चेति सर्पाक्ष्यादिर्गणोत्तमः ॥ २० ॥

षट्चत्वारिंशदाख्याताः पारदस्य नियामकाः ।
इत्यौषधीनां पञ्चाङ्गं ग्रहीतव्यं विधानतः ॥ २१ ॥

रसादिस्वेदने मूषालेपने शोधने तथा ।
अष्टोपरि यथालाभं ग्राह्यं प्रोक्तेषु कर्मसु ॥ २२ ॥

व्याघ्रिका राक्षसी वह्निश्चण्डाली गजकर्णिका ।
पुटकाली शंखपुष्पी च बृहती बालमोटिका ॥ २३ ॥

मृगालजिह्विका वह्निदमनी लाङ्गली तथा ।
चक्रिणी वज्रिणी व्याघ्री नाकुली पुत्रजीविका ॥ २४ ॥

कञ्चुकी चैव कर्कोटी कुमारी पद्मचारिणी ।
एकवीरा रुदन्ती च लक्ष्मीर्नरकसाधिका ॥ २५ ॥

उज्झटा रक्तचित्रश्च नागिनी नागवल्लिका ।
सप्तकं रक्तशृङ्गी च रक्तस्नुग्वज्रवल्लिका ॥ २६ ॥

शाकोटी मेषश्रृङ्गी च हिमाली व्याघ्रपालिका ।
शमी व्याघ्रपदी सोमवल्लरी चार्कपुष्पिका ॥ २७ ॥

कोशिनी काकमाची च वृक्षराजोऽजमालिका ।
कोटराक्षी हनुमती नरजीवाङ्गनायका ॥ २८ ॥

मालिका काकतुण्डी च मेषपुष्पी च कुंकुणी ।
अन्यातु वरवल्ली च गजाली हंसपादिका ॥ २९ ॥

कुसुंभी वह्निमाची च सूर्यभक्ता च वाकुची ।
रसना जीवकारा च भूतुम्त्री कटुतुम्बिका ॥ ३० ॥

द्रवदाली विशाला च करास्थि ब्रह्मबीजकम् ।
कृष्णजीरं तथा कृष्णदत्तूरो वर्णपीलुकम् ॥ ३१ ॥
श्वेतार्को यवचिञ्ची च कारवल्ली रुदन्तिका ।
गोजिह्वा काकजंघा च श्वेतगुञ्जा च शम्बरी ॥ ३२ ॥
महांकोलस्सितांकोलो माल्लूरश्च पटोलिका ।
व्याघ्रिकादिगणश्चायं रसभस्मकरोऽपरः ॥ ३३ ॥
सर्वासां लोहजातीनां पाषाणानां विशुद्धये ।
एकैकं सुलभं मार्गं वक्ष्ये गन्धाभ्रकं विना ॥ ३४ ॥
अम्लक्षाररविक्षीरस्नुहिदुग्धसमन्वितैः ।
दुत्तूरचित्रत्रिफलास्वरसैर्गोजलान्वितैः ॥ ३५ ॥
अग्नौ पुनः पुनस्ताप्य सप्तवाराणि डोलयेत् ।
स्वर्णादिसर्वलोहानां शुद्धिरेवं विनिश्चिता ॥ ३६ ॥
कुमारीमेघनादादित्रिकटुत्रिफलानि च ।
कूश्माण्डकदलीशिग्रुगुञ्जासोमार्गलारमाः ॥ ३७ ॥
पञ्चत्वङ्मुनिपुष्पाणि कञ्जवृक्षद्रुमार्द्रकाः ।
एतेषां स्वरसं सम्यग्भावयेदेकविंशतिम् ॥ ३८ ॥
वारान् समस्तपाषाणशुद्धिरेवं प्रकीर्त्तिता ।
भृङ्गीकुमारीस्वरसैरारनालेन पूरितम् ॥ ३९ ॥
भाण्डवक्त्रे पुटं बध्वा गन्धचूर्णं विनिक्षिपेत् ।
पुनर्भाण्डं तदाच्छाद्य पुटं दत्वा ततः परम् ॥ ४० ॥
साङ्गशीतलकं कृत्वा पुनरुद्धृत्य शुद्धये ।
पश्चात् पुनश्च गोक्षीरैराज्येन च विशोधयेत् ॥ ४१ ॥
इति गन्धकसंशुद्धिश्शास्त्रज्ञैः परिकीर्त्तिता ।
पीतकृष्णाभ्रकं सम्यग्गोक्षीरैर्भावयेद् दृढम् ॥ ४२ ॥
सर्वदोषविनिर्मुक्तं रसायनकरं भवेत् ।
उदुम्बरवटाश्वत्थन्यग्रोधार्कस्नुहिद्रुमाः ॥ ४३ ॥
कुरण्टिका क्षीरपर्णी कण्टकी च सुगन्धिका ।
एतेषां सर्ववृक्षाणां क्षीरैर्बहु विभावयेत् ॥ ४४ ॥
एकविंशतिवारं तदेकैकं भावयेन्मुहुः ।
क्षीरकन्दं कण्डुकन्दं रम्भाकन्दं च सूरणम् ॥ ४५ ॥
गुडं गुग्गुलुगुञ्जाज्यमधुटङ्कणसंयुतम् ।
सम्मर्दाञ्जनतुल्यं च विशाले चाथ मूषके ॥ ४६ ॥
अधरोत्तरकं क्षिप्त्वा पाषाणं चारयेत्ततः ।
मृत्तिकापटसंयुक्तं सप्तवारान् प्रकारयेत् ॥ ४७ ॥
ध्मात्वा गाढं खराङ्गारे काचबन्धमयं ततः ।
साङ्गशीतलकं कृत्वा समुद्धृत्य निरीक्षयेत् ॥ ४८ ॥
सर्वतस्सूक्ष्मरूपाणि मौक्तिकानि यथा यथा ।
सर्वपाषाणसत्वानि वदन्ति द्रुविधकमे ॥ ४९ ॥
अष्टादश स्युस्संस्कारा रसस्य परमेश्वरि !
तत्राद्यं स्वेदनं कामं द्वितीयं मदनं प्रिये ! ॥ ५० ॥
मूर्छा तृतीयमुत्थानं चतुर्थं पातनं प्रिये !
पञ्चमं रोदनं षष्ठं नियामस्सप्तमं ततः ॥ ५१ ॥
दीपनं चाष्टमं देवि! नवमं चानुवासनम् ।
दशमं चारणं देवि! चारणं रुद्रसंख्यकम् ॥ ५२ ॥
गर्भद्रुतिर्द्वादशं स्याद् द्रुतिर्बाह्या त्रयोदश ।
चतुर्दशं स्याद्रागाख्यं सारणं तिथिसंख्यकम् ॥ ५३ ॥
अनुसारणं षोडशं स्याद्विख्यातं क्रामणं ततः ।
सप्तदशं चाष्टदशं वेदनं देहलोहयोः ॥ ५४ ॥
अथ वक्ष्यामि संस्कारान् रसराजस्य पार्वति! ।
ताम्रजं कान्तजं वापि खल्वं तु स्वर्णरचितम् ॥ ५५ ॥
तन्मध्ये रसराजं तु पलानां शतमात्रकम् ।
तदर्धं वा तदर्धं वा क्षिप्त्वा भक्त्या प्रपूजयेत् ॥ ५६ ॥
साधको रसराजस्य तत्र संस्कारमाचरेत् ।
यवगोधूमकलममाषमुद्गचणादिभिः ॥ ५७ ॥
श्यामाककोद्रवैश्चैव नानाधान्यैश्च निस्तुषैः ।
धान्याच्चतुर्गुणं तोयं मृद्घटे निक्षिपेत् प्रिये ॥ ५८ ॥
प्राप्नोति यावदम्लत्वं तावद्यत्नेन रक्षयेत् ।
तन्मध्ये हंसपादीं च मीनाक्षं च पुनर्नवाम ॥ ५९ ॥
द्विचित्रकं भृङ्गराजं विष्णुकान्तं शतावरीम् ।
सर्पाक्षीं गिरिकर्णीं च मुण्डीं च सहदेविकाम् ॥ ६० ॥
त्रिफलां खण्डशश्छित्वा सर्वानेतान् विनिक्षिपेत् ।
धान्यस्य पञ्च तुल्यांकं धान्याम्लमिदमुत्तमम् ॥ ६१ ॥
स्वेदनादिषु कार्येषु पारदस्य विशिष्यते ।
आतपे काञ्जिके खल्वे रसराजं विनिक्षिपेत् ॥ ६२ ॥
चूर्णं च गृहधूपं च चित्रकं त्रिफलं गुहम् ।
दग्धोर्णमिष्टकां कन्यां लवणं बृहतीद्वयम् ॥ ६३ ॥
मागधीं राजिकां चैव वन्ध्यां कर्कोटकीं तथा ।
एतान् कलांशान् सूतस्य तस्मिन् क्षिप्त्वा विमर्दयेत् ॥ ६४ ॥

दत्वा दत्वाथ धान्याम्लमेवं कृत्वा दिनत्रयम् ।
सम्यक् सोष्णारनालेन रसं प्रक्षालयेत्प्रिये ! ॥ ६५ ॥
पट्ठराजित्रिकटुकं मूलकं चित्रकं वराम् ।
पुनर्नवां मेषश्रृङ्गीं मेघनादं महाबलम् ॥ ६६ ॥
आर्द्रकं रजनीं नागवल्लीं जनवसारकम् ।
समं धान्याम्लकैः पिष्ट्वा श्लक्ष्मवस्त्रं प्रलेपयेत् ॥ ६७ ॥
यावदंगुलमात्रं च तस्मिन् पश्चाद्रसं क्षिपेत् ।
तद्बध्वा ताम्रजे पात्रे क्षिप्त्वा धान्यम्लपूरिते ॥ ६८ ॥
कटिचोलाख्ययन्त्रे च स्वेदयेत्तमहर्निशम् ।
समुद्धृत्य पुनश्चोष्णे सारनाळे शरावके ॥ ६९ ॥
प्रक्षालयेत् सूतराजमेवं कृत्वा त्रिसप्तधा ।
प्रस्वेदयेत् सूतराजं ततस्संमर्दयेत् प्रिये! ॥ ७० ॥
अथातो मर्दनं कर्म वक्ष्यामि श्रृणु पार्वति ! ।
चूर्णादि पूर्णद्रव्यं च विशालं राजवृक्षकम् ॥ ७१ ॥
अङ्कोलं कृष्णदत्तूरं त्रिकटुं च समं समम् ।
सर्वं सूतकलांशेन सप्त खल्वे रसं क्षिपेत् ॥ ७२ ॥
अजाशक्रुतुषाग्निं च खात्वा भूमौ विनिक्षिपेत् ।
तस्योपरि स्थितं खल्वं तप्तखल्वमुदाहृतम् ॥ ७३ ॥
मर्दयेत्पूर्वधान्याम्लैर्दिवारात्रं पुनश्च तम् ।
क्षालयेन्मृण्मये पात्रे ततश्चोष्णारनालकैः ॥ ७४ ॥
मर्दनं क्षालनं चैवमेकविंशतिवारकम् ।
एवं विमर्दितं सूतं समाधायाथ मूर्छयेत् ॥ ७५ ॥
अथ मूर्छां प्रवक्ष्यामि श्रृणुत्वं सावधानतः ।
राजिकामेषश्रृङ्गी च चित्रदं च फलत्रयम् ॥ ७६ ॥
क्षीरकन्दं सूरणं च सर्पाक्षीं काकमाचिकाम् ।
नीली वला वचा कन्या कृष्णोन्मत्तस्तदाकुवि ॥ ७७ ॥
श्वेतापाराजिताङ्कोलगोजिह्वा गरुडी तथा ।
एतेषां स्वरसैर्मर्द्यो रविक्षीरेण पारदः ॥ ७८ ॥
व्यस्तानां वा समस्तानां रसैरेषां दिनावधि ।
मर्दयेत्तप्तखल्वे तु मूषायां तु रसं क्षिपेत् ॥ ७९ ॥
निरुध्य भूधरे यन्त्रे विपश्चित्तं पुनः प्रिये !
राजकाद्यौषधभवैर्द्रवैस्त्रिस्सप्त[1] वारकम् ॥ ८० ॥
मर्दनं भूधरे पाकं श्रुत्वा संमूर्छयेद्रसम् ।
एवं संमूर्छितं सूतं क्षालयेत्काञ्जिकेन तु ॥ ८१ ॥

1) वासरम्.

सोष्णेन वारिणा वापि सूतमुत्थापयेत् प्रिये !
पातनायन्त्रयोगेन रसस्योत्थापनं भवेत् ॥ ८२ ॥
रसस्य पातनं वक्ष्ये पारब्रह्मो च चित्रकम् ।
शार्ङ्गिली काकमाची च मण्डूकी निर्विकर्णिका ॥ ८३ ॥
कुमारी च जया भृङ्गी गोजिह्वा शंखपुष्पिका ।
आर्द्रकं देवदाली च तिलपर्णी च नीलिका ॥ ८४ ॥
आरग्वधः क्षीरकन्दमङ्कोलं देवदारु च ।
एतैरसैस्समस्तानां व्यस्तानां वा दिनं रसम् ॥ ८५ ॥
मर्दयेत्तप्तखल्वे तु शुल्वं सूतचतुर्थकम् ।
तत्पिष्टं पातयेद्यन्त्रमूर्ध्वपातनके दिनम् ॥ ८६ ॥
ऊर्ध्वलग्नं रसं शुद्धं तमादायाथ मर्दयेत् ।
पूर्वोदितोषधरसैः पूर्ववच्छुल्वसंयुतम् ॥ ८७ ॥
पातयेन्मर्दयेदेवं सप्तवारं पुनः पुनः
ऊर्ध्वपातनसंशुद्धं पारदं पातयेदधः ॥ ८८ ॥
अथाधः पातनं वक्ष्ये त्र्यूषणं लवणं पराम् ।
चित्रकं राजिकं शिग्रुं सर्वं सूतसमं क्षिपेत् ॥ ८९ ॥
मर्दयेत्तप्तखल्वे तु रसं धान्याम्लकेन च ।
तत्कल्केन लिपेदूर्ध्वभाण्डं समयङ् निरोधयेत् ॥ ९० ॥
ऊर्ध्वभाण्डस्य पृष्ठे तु दद्याल्लघुपुटं ततः ।
इत्यधः पातनं कुर्यात् सप्तवारं पुनः पुनः ॥ ९१ ॥
अधः पातनशुद्धस्य तिर्यक् पातनामाचरेत् ।
वक्ष्यामि तिर्यक् पतनं सूतं धान्याभ्रकं समम् ॥ ९२ ॥
धान्याम्लैर्मर्दयेद्यामं तिर्यक्पातनयन्त्रकं ।
भाण्डाग्निना पचेदेवं सप्तवारं पुनः पुनः ॥ ९३ ॥
एवं त्रिधा प्रपीतं च पुनस्सूतं निरोधयेत् ।
अभ्रकं वाथ गन्धं वा माक्षिकं विमलं तथा ॥ ९४ ॥
स्वर्णं वा रजतं वापि कान्तं वा तीक्ष्णमेव वा ।
प्रत्येकं शुद्धिकृद्देयं ताम्रपक्वादमात्रकम् ॥ ९५ ॥
पादार्द्रकरसैः कुर्यान्मर्दनं पातनं क्रमात् ।
यद्यद्द्रव्यान्वितस्सूतस्तत्तद् द्रव्यगुणप्रदः ॥ ९६ ॥
पातनात्ताम्रयोगाच्च नागवङ्गौ त्यजेद्रसः ।
अथवा दीपिकायन्त्रे शुद्धस्स्यात् पातितो रसः ॥ ९७ ॥
कदादीरोधने सूतः स्वेदाद्यैः पञ्चकर्मभिः ।
आप्यायनाख्यं सूतस्य कर्मकुर्यान्निरोधनम् ॥ ९८ ॥

अथ कर्मनिरोधाख्यं पेषयेल्लवणं जलैः ।
स्थालीमध्ये रसं क्षिप्त्वा तदूर्ध्वे लवणं क्षिपेत् ॥ ९९ ॥
किञ्चिज्जलं च निवपेत्तं शरावेण रोधयेत् ।
कुर्यात् सम्यक् संधिलेपं तदूर्ध्वे च पुटे लघु ॥ १०० ॥
एवं निरोधनं कर्म विदध्यात् सप्तधा प्रिये ! ।
आप्यायितो भवेत् सूतस्तेन षण्डत्ववर्जितः ॥ १०१ ॥
निरोधकर्मशुद्धोऽसौ वीर्यवान् संनियम्यते ।
अथो नियमनं कर्म कथयामि वरानने! ॥ १०२ ॥
एवं चिञ्चाक्षीरकन्दं सर्पाक्षीं पटुभृङ्गराट् ।
वन्ध्याकर्कोटकीनिम्बं सर्वं धान्याम्लपेषितम् ॥ १०३ ॥
काञ्जिकेन समालोड्य तद्द्रवैः स्वेदयेद्दिनम् ।
यन्त्रे नियामके सप्त वासरांस्तं च दीपयेत् ॥ १०४ ॥
अथातो दीपनं कर्म वक्ष्यामि शृणु पार्वति !
स्वर्णपुष्पी च मरिचं त्रिक्षारं पटुपञ्चकम् ॥ १०५ ॥
भूखगं पञ्चलवणं राजिका शिग्रुमूलकम् ।
कासिसं च तथा कन्या पातालगरुडी कणा ॥ १०६ ॥
क्षीरकन्दं च कर्कोटी गिरिकर्णी जया मधु ।
चित्रकं काकजंघा च स्वर्णमम्लगणेन च ॥ १०७ ॥
कल्कयेत् पारदं तेन मर्दयेत्तद्द्रवैरपि ।
डोलायन्त्रे पचेदेकं दिनमिद्धं च सप्तधा ॥ १०८ ॥
मर्दनं पातनं कुर्याद् ग्रासार्थं दीपितो भवेत् ।
एवं प्रजपितं सूतं शुद्धं तमनुवासयेत् ॥ १०९ ॥
अथानुवासनं कर्म मृत्पात्रे दीपिते रसम् ।
क्षिप्त्वा जम्बीरकं द्रावैस्तत्र घर्मेऽनुवासयेत् ॥ ११० ॥
एवं सप्तदिनं कृत्वा ततश्चारणमाचरेत् ।
नवभिः स्वेदनाद्यैश्च शुद्धः स्यात् कर्मभिः प्रिये ! ॥ १११ ॥
पारदः सर्वरोगघ्नस्सप्तकञ्चुकवर्जितः ।
अथ कुर्याद्रसेन्द्रस्य विशुद्धस्य मुखं ततः ॥ ११२ ॥
दिव्यासुरविभेदेन तन्मुखं द्विविधं प्रिये !
तत्राद्यं वलिनोत्पाद्यं द्वितीयं भूलताजलैः ॥ ११३ ॥
शुद्धं सूतं समादाय यन्त्रे सौमानवे क्षिपेत् ।
एवं शतगुणैर्जीर्णे सम्यग्दिव्यमुखो भवेत् ॥ ११४ ॥
भूनागवारिणा तप्तखल्वके मर्दयेद्रसम् ।
एकविंशत्यहोरात्रं सम्यग्दिव्यमुखो भवेत् ॥ ११५ ॥

दशांशं गन्धकं चित्रकर्मारं वल्लमालकम् ।
पिष्ट्वा पिधानतस्सन्धिं बन्धयेदतियत्नतः ॥ ११६ ॥
तद्यन्त्रं चुल्लिकामध्ये निधाय विधिना पचेत् ।
पुनस्तन्मुखमुद्घाट्य जीर्णे पूर्वप्रमाणतः ॥ ११७ ॥
दैत्यराजं च कर्पूरं दत्वा तद्वच्च जारयेत् ।
एवं शतगुणे जीर्णे निर्धूताशेषकल्मषः ॥ ११८ ॥
जारणा सा द्विधा बालजारणा बद्धजारणा ।
तज्जारणद्वयं सम्यग् जीवन्मुक्तिकरं परम् ॥ ११९ ॥
जारितो रुग्जरामृत्युविध्वंसनकरो भवेत् ।
गन्धकं जारयेदादौ ततो बीजं च जारयेत् ॥ १२० ॥
द्रुतिं च जारयेत्पश्चाद्रञ्जकेन सुरंजयेत् ।
सारणं क्रामणं कृत्वा ततो वेधे प्रयोजयेत् ॥ १२१ ॥
जारणापूजितस्सूतः साधकाय प्रसीदति ।
अतः परं प्रवक्ष्यामि बीजचारणमुत्तमम् ॥ १२२ ॥
तन्नैकमुखमादाय रसं वस्त्रेण गालितम् ।
तप्तखल्वे विनिक्षिप्य चतुष्षष्ठ्यं च बीजकम् ॥ १२३ ॥
दत्वाम्लैर्मर्दयेत्तस्मिन्नथ चारणयन्त्रके ।
निम्बाम्बुसहिते क्षिप्त्वा तद्यन्त्रं तीव्र आतपे ॥ १२४ ॥
धारयेद्दिनमेकं तु चारितो जायते रसः ।
चालितं तं रसं पिण्डं दत्वा सोमानवेदिनम् ॥ १२५ ॥
पचेज्जीर्णे पुनर्बीजं दत्वा चार्यं च पूर्ववत् ।
अजीर्णे च पुनः पच्यात् तस्मिन् सोमानवेदिनम् ॥ १२६ ॥
अष्टमांशं विडं दत्वा जीर्णो भवति निश्चितम् ।
एवमेव प्रतिग्रासे कुर्याच्चारणजारणे ॥ १२७ ॥
अथ जारितसूतस्य कुर्याद्रागग्रहक्रियाम् ।
राजसैन्धवदग्धोर्णागृहधूमेष्टिकागुडम् ॥ १२८ ॥
सर्वं सूतकलांशेन दत्वा घर्मे ख्लवर्गतः ।
मर्दयित्वा दिनैकं तद्राजिकाद्यम्लवर्गके ॥ १२९ ॥
डोलायन्त्रे दिनं पच्याद्ग्रासग्राही भवेद्रसः !
जीर्णे जीर्णे प्रतिग्रासं कुर्याद्रागस्य च ग्रहम् ॥ १३० ॥
अथ ग्रासप्रमाणानि कथयामि यथाक्रमम् ।
चतुष्षष्ट्यंशको बीजग्रासस्तु प्रथमः प्रिये ! ॥ १३१ ॥
चत्वारिंशांशकं चापि द्वितीयो ग्रास उच्यते ।
त्रिंशांशकस्तृतीयस्स्याद्विंशांशस्तु चतुर्थकः ॥ १३२ ॥

पञ्चमष्षोडशांशस्तु षष्ठः स्यादष्टमांशकः ।
सप्तमस्तु चतुर्थांशस्त्वष्टमो द्व्यंशसंमितः ॥ १३३ ॥

नवमस्तु समांशश्च दशमो द्विगुणांशकः ।
रुद्रश्चतुर्गुणः पश्चाद्द्वादशोऽष्टगुणो भवेत् ॥ १३४ ॥

कलागुणश्च त्रिदशो द्वात्रिंशद्गुणितो मनुः ।
ततः पञ्चदशो ग्रासश्चतुष्षष्टिगुणान्वितः ॥ १३५ ॥

एतान् पञ्चदश ग्रासान् जीर्णे जीर्णे प्रदापयेत् ।
चारयेज्जारयेत्तं च रञ्जयेच्च ततः परम् ॥ १३६ ॥

अथ जारितसूतस्य वक्ष्ये गर्भद्रुतिक्रियाम् ।
जारितं सूतमादाय स्थापयेत्तप्तखल्वके ॥ १३७ ॥

तत्र पादांशकं सूतं निक्षिप्य रुचकं बलिम् ।
शिलामाक्षिककासीसटङ्कान् सूतकलांशकान् ॥ १३८ ॥

मर्दयेच्चणकाम्लेन सर्वमेकदिनावधि ।
अपामार्गपलाशोत्थभस्मक्षारं सुवर्चलम् ॥ १३९ ॥

कासीसं टङ्कणं राजयवक्षारं च माक्षिकम् ।
नवसारं च सामुद्रं माणिमाण्डं सकाञ्जिकम् ॥ १४० ॥

कर्पूरं सममादाय स्नुह्यर्कक्षीरमर्दितम् ।
अनेन विडकल्केन यन्त्रे सोमानलोदरे ॥ १४१ ॥

अङ्गुलोत्सेधमात्रेण तत्र पूर्वं रसं क्षिपेत् ।
रुध्वा दिनं पचेत्सम्यग्गर्भो द्रवति निश्चितम् ॥ १४२ ॥

द्रविडं जारयेदेवं यावद्वीजं च षड्गुणम् ।
अथ वक्ष्ये क्रमाद्बाह्यद्रुतिमेलापजारणे ॥ १४३ ॥

तप्तखल्वे विनिक्षिप्य पारदं तत्समां द्रुतिम् ।
माक्षिकं चामृतं हिंगुं कृष्णागरु च सैन्धवम् ॥ १४४ ॥

सर्वं कलांशकं क्षिप्त्वा गुडूची मुसलीबलाः ।
चित्रकं नीलिनीपाठा गुञ्जास्त्रीस्तन्यमार्द्रकम् ॥ १४५ ॥

मकरन्दं क्षीरकन्दं वन्ध्यानिम्बस्य पल्लवम् ।
द्विफणिज्यासोमवल्लीहयलालास्समं समम् ॥ १४६ ॥

एतेषां ग्रासयेत् स्वच्छरसं वस्त्रेण गालितम् ।
एतद्द्रुतियुतं सूतं क्षिप्त्वा क्षिप्त्वा विमर्दयेत् ॥ १४७ ॥

मिलन्ति द्रुतयस्सर्वाः पारदेन न संशयः ।
अथ मेलापकल्केन लिम्पेत् सोमानलोदरम् ॥ १४८ ॥

मिलितं पारदं तत्र निक्षिप्य विडयोगतः ।
जारयेदनया युक्त्या षड्गुणां जारयेद् द्रुतिम् ॥ १४९ ॥

द्रुतिजारितसूतस्य प्रवक्ष्ये रञ्जनक्रियाम् ।
पूर्वोक्तं रञ्जितं बीजं पादांशद्रुतिजारिते ॥ १५० ॥

तप्तखल्वे स्थले सूते निक्षिप्य चणकाम्लनः ।
मर्दयेद् विडयोगेन जारयेत्पूर्ववत्प्रिये ! ॥ १५१ ॥

एवं षड्गुणबीजस्य जारणाद्रञ्जितो भवेत् ।
अथ रञ्जितसूतस्य सारणात्रयमाचरेत् ॥ १५२ ॥

मण्डूकमत्स्यकच्छपमेषजलूकाहिसूकरादीनाम् ।
संयोज्यैकत्र वसां तया पचेत्सारणातैलम् ॥ १५३ ॥

पूर्वोक्तसारणातैलं सारणायन्त्रके क्षिपेत् ।
तत्र सूतान्वितं बीजं द्रावितुं परिडालयेत् ॥ १५४ ॥

एवं डालितमात्रेण सारितो जायते रसः ।
सारितं सममादाय तप्तखल्वेऽनु निक्षिपेत् ॥ १५५ ॥

मर्दयेदम्लयोगेन जारयेत् पूर्ववत् प्रिये ! ।
पूर्ववत् सारणायन्त्रे बीजेन द्विगुणेन च ॥ १५६ ॥

डालयेज्जारयेत्तद्वदेवं स्यादनुसारणा ।
अथानुसारितं ज्ञात्वा सारणायन्त्रके क्षिपेत् ॥ १५७ ॥

तद्वत्त्रिगुणबीजेन डालयेज्जारयेत् प्रिये ! ।
अथ सारितसूतस्य कुर्वीतमुखबन्धनम् ॥ १५८ ॥

तं रसं तत्समं तालं दिव्यौषधिगणद्रवम् ।
धुत्तूरशैलं तत्सर्वं दिनमेकं तु मर्दयेत् ॥ १५९ ॥

वज्रमूषागतं रुध्वा दिनैकं भूधरे घटे ।
एवमेव त्रिधा कुर्यात् सूतो बद्धमुखो भवेत् ॥ १६० ॥

अथ बद्धमुखं सूतं धौतं तीक्ष्णार्कजं रजः ।
तारं ताप्यं समांशेन देवदालिद्रवैर्दिनम् ॥ १६१ ॥

त्रिदिनं मधुसर्पिभ्यां मर्दितं गोलकं चरेत् ।
तद्गोलं वज्रमूषायां क्षिप्त्वा सम्यङ् निरोधयेत् ॥ १६२ ॥

शोषयित्वा धमेद्गाढं खादिराङ्गारयोगतः ।
घोटबद्धो भवेत्सूतस्तद्घोटं शोधयेत् प्रिये ! ॥ १६३ ॥

घोटं निक्षिप्य मूषायां शोषयेत् काचटङ्कणैः ।
धमितं तु रसस्साक्षाद् बलार्कसदृशो भवेत् ॥ १६४ ॥

अथ तं चूर्णितं श्लक्ष्णमादौ लोहे परीक्षयेत् ।
पश्चाद्देहे नियुञ्जीत तयोर्वेधक्रमं ब्रुवे ॥ १६५ ॥

अष्टानवतिभागानां प्रत्येकं लोहवेधकम् ।
एकैकांशं शतादीनामेवं वेधक्रमो भवेत् ॥ १६६ ॥

एवं वेधकबीजाभ्यां वेधयेत्प्रमाणान्वितम् ।
सर्वलोहानि कुर्वीत सुवर्णं तारमेव वा ॥ १६७ ॥
तस्य वेधस्य नामानि कथयामि यथाक्रमम् ।
लेपः क्षेपश्च कुन्तश्च धूमश्शब्दश्च पञ्चधा ॥ १६८ ॥
वेधप्रकारो लोहानां वर्त्तिकैः परिकीर्त्तितः ।
लोहं शुद्धरसालिप्तं पुटतो याति हेमताम् ॥ १६९ ॥
तारतां वापि निर्दिष्टो लेपो वेधविदुत्तमैः ।
प्रक्षेपणाद् द्रुते लोहे शुद्धसूतस्य हेमता ॥ १७० ॥
क्षेपवेधस्य विज्ञेयो वेदविद्याविशारदैः ।
तदंशतस्तु सूतेन युतो लोहस्तु विद्यते ॥ १७१ ॥
स्वर्णरौप्यत्वमायाति यत्रासौ कुन्तवेधकः ।
वह्नौ धूमायमानेऽन्तः प्रक्षिप्तरसधूमतः ॥ १७२ ॥
स्वर्णत्वोत्पादनं लोहे धूमवेधस्स उच्यते ।
मुखस्थिते रसे सर्वलोहासधमने सति ॥ १७३ ॥
स्वर्णरूप्यत्वसंपत्तिश्शब्दवेधस्य उच्यते ।
लोहे परीक्षितं सूतं पश्चाद्देहे नियोजयेत् ॥ १७४ ॥
शतवेधकरं सूतं गुञ्जामात्रं तु भक्षयेत् ।
गुञ्जार्धं दशसाहस्रं तस्यार्धं लक्षवेधकम् ॥ १७५ ॥
तस्यार्धं दशलक्षार्धं तदर्धं कोटिवेधकम् ।
रसायनविधानेन सेव्यमानो दिने दिने ॥ १७६ ॥
ब्रह्मत्वं चापि विष्णुत्वं मत्साम्यं चापि स व्रजेत् ।
तीव्रत्वं जायते स्वेदादमलत्वं च मर्दनात् ॥ १७७ ॥
मूर्छनाद् दोषराहित्यमुत्थानात् पूतिनाशनम् ।
रसायनं पातनेन रोधादाप्यायनं भवेत् ॥ १७८ ॥
अचापल्यं नियमानात् सुमुखोदय उच्यते ।
प्रमाणायोगसाङ्गत्यं चारणाद्बलशालिता ॥ १७९ ॥
जारणाद्बन्धनं प्रोक्तमेकत्वं द्रावणात्तथा ।
रक्तत्वं रञ्जनात्तस्य व्यापित्वं च त्रिसारणात् ॥ १८० ॥
क्रामित्वं क्रामणाद् देहलोहादिष्वपि वेधनात् ।
वेधकत्वं च संशुद्धो रसराजस्ततो भवेत् ॥ १८१ ॥
इत्यष्टादश कर्माणि रसस्योक्तानि शम्भुना ।
ताम्रेण साधयेत् स्वर्णं रूप्यं वङ्गेन साधयेत् ॥ १८२ ॥
शुक्लपुष्पपलाशस्य पुष्पं संशोष्य चूर्णयेत् ।
छागदुग्धेन तच्चूर्णं त्रीन् वारान् परिकल्पयेत् ॥ १८३ ॥
वङ्गषष्ठांशचूर्णेन पिष्टेनैतत्प्रलेपयेत् ।
पुटपाकेन तद्दग्धं तारं भवति शोभनम् ॥ १८४ ॥
श्वेतब्रह्मतरोः पुष्पं स्वरसेन विभावयेत् ।
तारं द्वात्रिंशतं वारान् तेन वङ्गं प्रलेपयेत् ॥ १८५ ॥
पुटपाकेन तद्दग्धं वङ्गं व्रजति तारताम् ।
मार्दवं कालिमा गन्धं वङ्गं त्यजतिनिश्चितम् ॥ १८६ ॥
श्वेतब्रह्मतरोर्बीजं तैलेन परिभावयेत् ।
गन्धकं सप्तकृत्वोऽथ तेन ताम्रदलानि च ॥ १८७ ॥
प्रलिप्तं तत्पुटे दग्धं शुल्वं काञ्चनतां व्रजेत् ।
दाहच्छेदनिकर्षादिकर्मयोग्यं भवेत्ततः ॥ १८८ ॥
तस्य तैलेन दरदं गन्धकं पारदं तथा ।
मर्दयेत्खल्वपाषाणे यावत्तत्कर्मतां व्रजेत् ॥ १८९ ॥
लेपयेत्तेन कल्केन वङ्गपत्राणि सर्वतः ।
दग्ध्वा दग्ध्वा पुनर्लिम्पेद्वारान् द्वात्रिंशतं क्रमात् ॥ १९० ॥
ततो वङ्गं भवेत् पर्णं रजतं दरदादिभिः ।
व्यवहारक्षमं शुद्धं कर्मयोग्यं भवेच्च तत् ॥ १९१ ॥
निर्यासं शाकवृक्षस्य श्लक्ष्णवस्त्रेण गालयेत् ।
समूलं शिग्रुचूर्णेन निर्याससहितेन च ॥ १९२ ॥
परितस्ताम्रपत्राणि दग्ध्वा दग्ध्वा विलेपयेत् ।
दाहैः पञ्चभिस्तत्तु काञ्चनं जायते भृशम् ॥ १९३ ॥
सचूर्णवल्कं शाकेयं तद्रसेन विभावितम् ।
करवीररसैर्युक्तं तेन पत्रं विलेपयेत् ॥ १९४ ॥
ताम्रं संजायते तारं 1) घटपाकेन तापितम् ।
एतत्तारं भवेत्सम्यग्व्यवहारक्रियोचितम् ॥ १९५ ॥
एवमादिभिरन्यैश्च स्वर्णतारक्रिया भवेत् ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादनबिन्दुकारण-
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद-
श्रीमत्केलदीवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्र-
सारभूते श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
रसंसंस्कारादिनिरूपणं नाम चतुर्विंशस्तरङ्गः

1) पुटपाकेन.

अथ पञ्चविंशस्तरंगः

एवं प्राग्रससंस्काराः संग्रहेण निरूपिताः ।
रसक्रियोपयुक्तानि शालादीन्यभिदध्महे ॥ १ ॥

रसशालां प्रकुर्वीत सर्वबाधाविवर्जिताम् ।
1) सर्वौषधसमे देशे रम्यकूपसमन्विते ॥ २ ॥

यक्षत्र्यक्षसहस्राक्षदिग्भागे च सुशोभने ।
नानोपकरणोपेतां प्राकारेण सुशोभिताम् ॥ ३ ॥

शालायाः पूर्वदिग्भागे स्थापयेद् रसदेवताः ।
वह्निकर्माणि चाग्नेये याम्ये पाषाणदेवताः ॥ ४ ॥

नैर्ऋत्यां शस्त्रकर्माणि वारुण्यां क्षालनादिकम् ।
शोषणं वायुकोणे च क्वाथश्चापि तथोत्तरे ॥ ५ ॥

स्थापनं सिद्धवस्तूनां प्रकुर्याद्दिशि कौणपे ।
पदार्थसंग्रहः कार्यो रससाधनहेतुकः ॥ ६ ॥

सत्वपातनकाष्ठी च गारकाष्ठी च शोधना ।
भूमिकाष्ठी ज्वलत्काष्ठी जलद्रोण्योऽप्यनेकशः ॥ ७ ॥

भस्त्रिकायुगलं तत्र नालिके वंशलोहयोः ।
स्वर्णायोघोषशुल्वाश्च कुब्यकर्मकृतां तथा ॥ ८ ॥

करणानि विचित्राणि सर्वाण्यपि समाहरेत् ।
मन्थानपेषिणी खल्वा द्रोणिरूपाश्च वर्तुलाः ॥ ९ ॥

आयसास्तप्तखल्वाश्च मर्दनाश्च तथाविधाः ।
सूक्ष्मछिद्रसहस्राढ्या द्रव्यजालनहेतवे ॥ १० ॥

चालिनी करपत्राणि सशिलालोहखण्डने ।
तत्रोपयोगि यच्चान्यत्तत् सर्वं तत्र निक्षिपेत् ॥ ११ ॥

उत्सेधेन नवांगुलः खलु कलासंख्यांगुलायामको
विस्तारेण दशांगुलो मुनिमितैर्निम्नस्तथैवांगुलैः ।
पालिर्द्व्यर्धङ्गुलविस्तृता च मसृणा द्रोण्यर्धचन्द्रोपमा
घर्षी द्वादशकांगुली च तदयं खल्वो मतस्सिद्धये ॥ १२ ॥

षोडशांगुलविस्तारः खल्वो भवति वर्तुलः ।
चतुरंगुलनिम्नश्च मध्ये तु मसृणाकृतिः ॥ १३ ॥

मर्दनी चपिटाधस्तात् सुग्रहा च सुखोपरि ।
अयं हि वर्तुलः खल्वो मर्दनेऽतिसुखावहः ॥ १४ ॥

आयसाः कान्तलोहा वा लोहखल्वा अपीदृशाः ।
अधस्ताद् द्रोणिका कार्या वह्निप्रज्वालनोचिता ॥ १५ ॥

अथ यन्त्राणि वक्ष्यामि रसतन्त्राण्यनेकशः ।
समालोक्य समांशेन स्वेदादिकरणाय च ॥ १६ ॥

यन्त्र्यते पारदो यस्मात्तस्माद्यन्त्रं समीरितम् ।
निबद्धमौषधं सूतं सभूर्जे त्रिगुणान्तरे ॥ १७ ॥

रसघोट्टालिका कार्या दृढं बध्वा गुणैरपि ।
संधानपूर्वं कुम्भान्तमवलम्ब्य च संस्थिता ॥ १८ ॥

अधस्ताज्ज्वालयेदग्निं तन्त्रयुक्तक्रमेण वा ।
डोलायन्त्रमिति प्रोक्तं स्वेदनाख्यं तदेवहि ॥ १९ ॥

उपर्यधःस्थितस्थाल्यां क्षिपेदन्यामधोमुखाम् ।
स्थालिकां चिपुटीभूतां तत्र संलिप्तपारदाम् ॥ २० ॥

क्षिप्त्वा तां पंकिले गर्ते ज्वालयेन्मूर्ध्नि पावकम् ।
अधःपातनयन्त्रं हि तदेतत् परिकीर्तितम् ॥ २१ ॥

1) क्षिपेद्रसं घटे दीर्घेऽधोनालकसमन्विते ।
तन्नालं निक्षिपेदन्यघटकुक्ष्यान्तरे खलु ॥ २२ ॥

तत्र रुध्वा 2) मृडं सम्यग्वदने घटयोरधः ।
अधस्ताद्रसकुम्भस्य ज्वालयेन्मूर्ध्नि पावकम् ॥ २३ ॥

इतरस्मिन् घटे तोयं निक्षिपेत्साङ्गशीतलम् ।
तिर्यक्पातनयन्त्रं हि वार्त्तिकैरभिधीयते ॥ २४ ॥

पातनैश्च विना सूतो नितरां दोषभाग्भवेत् ।
त्रिभिरेवोर्ध्वपातेन तस्माद्दोषान् विमुञ्चति ॥ २५ ॥

विशालवदने भाण्डे तोयपूर्णे निवेशयेत् ।
खर्परं मृदुलं सम्यग्विस्मृतं तस्य मध्यमे ॥ २६ ॥

आलवालं विडैः कृत्वा तन्मध्ये पारदं क्षिपेत् ।
ऊर्ध्वाधश्च विडं दत्वा मल्लेनारुध्य यत्नतः ॥ २७ ॥

---

1) सर्वौषधिमये.

1) क्षिपेद्रसं घटे दीर्घे महानालसमन्विते. 2) मृदं.

घटमौचित्ययोगेन दीयते चेन्निगद्यते ।
यन्त्रं कच्छपसंज्ञं हि यदुक्तं रसजारणे ॥ २८ ॥
अर्धांगुलिमिता सम्यग्वर्तुला चिपिटादले ।
चतुरंगुलतः कण्ठादधोद्रोणे समन्वितः ॥ २९ ॥
चतुरंगुलविस्तारा निम्ना च दृढबन्धना
तत्पिधानघटे मूले षोडशांगुलविस्तरा ॥ ३० ॥
नवांगुलकविस्तारकण्ठेन च समन्विता ।
पूर्वघट्यां रसं क्षिप्त्वा ततो दद्यात्परां घटीम् ॥ ३१ ॥
सार्धनिम्ना च परितो दृढपालिकयान्विता ।
पल्यां द्रोण्यां क्षिपेत्तोयं पावकं ज्वालयेदधः ॥ ३२ ॥
ऊर्ध्वपातनयन्त्रं हि तदेतत्परिकीर्त्तितम् ।
कृत्वा लोहमयीं मूषां वृन्ताकाकारधारिणीम् ॥ ३३ ॥
वितस्तिसम्मितां कान्तलोहेन परिनिर्मिताम् ।
तालूलोहोद्भवां वापि कण्ठाधो द्वयंगुलान्तरं ॥ ३४ ॥
द्वयंगुलं वलयं दद्यान्मध्यदेशे च कण्ठतः ।
पिधानाद्द्वारकं चिञ्चा पत्रविस्तीर्णकङ्कणम् ॥ ३५ ॥
पिधानमन्तरादिष्टं सशिकयं श्लिष्टसन्धिकम् ।
तल्लेपपिहितच्छिद्रं भाण्डं कृत्वाप्यधोमुखम् ॥ ३६ ॥
तत्रैवालम्बयेन्मूर्ध्नि निरुध्य च विशोष्य च ।
स्थालीकण्ठं ततो दद्यात्पुटानलविधानकम् ॥ ३७ ॥
एवंभूतं भवेद्यन्त्रमन्तरालिकसंज्ञकम् ।
अनेन जारयेद्गन्धं धृतिं गर्भकृतामपि ॥ ३८ ॥
तापिं मूषामृदा कृत्वा दृढां चारत्निमात्रिकाम् ।
सुदृढां मध्यदेशे च द्व्यंगुलच्छिद्रसंयुताम् ॥ ३९ ॥
कान्तलोहमयीं [1] खारि दद्याद्गन्धस्य चोपरि ।
तापिकां पूरयेच्छुद्धसिकताभिस्समन्ततः ॥ ४० ॥
तां च तुल्यां समारोप्य क्षेपे क्षेपे च तद्द्रवम् ।
पादांगुष्ठमितं जातं ज्वालयेदनलं ततः ॥ ४१ ॥
लोहाभ्रकादिकान् सर्वान् रसस्योपरि जारयेत् ।
तापिकायन्त्रमित्युक्तं सुकरं रसजारणे ॥ ४२ ॥
स्थाल्यां विनिक्षिप्य रसादिवस्तु स्वर्णादिकार्याय पिधाय भूयः ।
मल्लेन चोर्ध्वे लवणादिवस्तु चुल्ल्यां पचेत्तत्प्रतिगर्भयन्त्रम् ॥ ४३ ॥
खोरीं मल्लं ततः स्थालीं निरुध्याददतियन्त्रतः ।
स्थाल्यां मल्ले हि खोर्यां वा क्षिप्त्वा वस्तु निरुध्य च ॥ ४४ ॥
क्षिप्त्वा पक्कादिकं रुध्वा पातः स्याद्गर्भयन्त्रके ।
चषकं वर्तुलं लोहं विनतागोर्ध्वदण्डकम् ॥ ४५ ॥
एतद् द्विपालिकायन्त्रं बलिचारणहेतवे ।
चतुः प्रस्थं जलाधारं चतुरंगुलकाननम् ॥ ४६ ॥
पुट्यन्तमिति प्रोक्तमेतदाप्यायने मतम् ।
स्थालिकोपरि विन्यस्य स्थालीं सम्यङ् निरुध्य च ॥ ४७ ॥
ऊर्ध्वस्थल्यां रसं क्षिप्त्वा वह्निं प्रज्वालयेदधः ।
एतद्विद्याधरं यन्त्रं हिंगुलाकृष्णहेतवे ॥ ४८ ॥
यन्त्रस्थाल्युपरि स्थालीमन्यां दत्वा निरुध्य च ।
यन्त्रं डमरुकाख्यं हि रसभस्मकृते हितम् ॥ ४९ ॥
मल्लमध्ये चरेद्वृत्तं तत्र सूतं सुगन्धकम् ।
मल्लस्य परितः कुर्यात्प्रकुर्यात्त्र्यङ्गुलोच्छ्रयम् ॥ ५० ॥
ततस्तां छादयेत् सम्यग्गोस्तनाकारमूषया ।
भस्मतोयमृदा रुध्वा सम्यगवोच्यमानया ॥ ५१ ॥
जङ्घावत्कृतखर्जूरकाथेन परिमर्दितम् ।
जीर्णकिट्टरजस्सूक्ष्मं गुडचूर्णसमन्वितम् ॥ ५२ ॥
इयं हि जलमृत् प्रोक्ता दुर्भेदा सलिलैः खलु ।
घटिकापट्टकिट्टैश्च महिषीदुग्धमर्दितैः ॥ ५३ ॥
वह्निमृत्स्ना भवेद् घोरा वह्नितापसहा खलु ।
एतया मृत्सया रुद्धो निर्गन्तुं क्षमते रसः ॥ ५४ ॥
ततो जलं विनिक्षिप्य वह्निं प्रज्वालयेदधः ।
नाभियन्त्रमिदं नाम्ना शिवेन परिकीर्त्तितम् ॥ ५५ ॥
अनेन जीर्यते सूतो विधूमश्शुद्धगन्धकः ।
मूषामूषोदराविष्टा चात्यन्तवलवत्तरा ॥ ५६ ॥
चिपिटा च ततः प्रोक्ता गर्तयन्त्रं मनीषिभिः ।
सूतेन्द्रबन्धनार्थं हि रसविद्भिरुदीरितम् ॥ ५७ ॥
भाण्डं कण्ठादधश्छिद्रवेणुनालं विनिक्षिपेत् ।
कांस्यपात्रद्वयं कृत्वा सम्पुटं जलगर्भितम् ॥ ५८ ॥
नालं च तत्र संयोज्य दृढं तच्चापि कारयेत् ।
युक्तद्रव्यं विनिक्षिप्य पूर्वं तत्र रसे घटम् ॥ ५९ ॥
अग्निना तापिता नाले तोयं तस्मात्पतत्यधः ।
जायते रससंधानं ढेङ्कियन्त्रमिदं भवेत् ॥ ६० ॥
ऊर्ध्वं वह्निरधःस्थाल्योर्मध्ये तु रससंग्रहः ।
सोमानलमिदं प्रोक्तं जारयेद्गन्धकादिकम् ॥ ६१ ॥

[1] भूरि.

लोहनालगतं सूतं भाण्डे लवणपूरिते ।
निरुद्धं विपचेत्पाकं नालिकायन्त्रमीरितम् ॥ ६२ ॥
इत्यस्मिन् यन्त्रराजे कृतसुकृतशतैर्देशिकेन्द्रप्रसादा-
ल्लब्धं सूतं सवह्निस्सहभवमुभयोश्शात्रवं मोचयित्वा ।
सख्यं कर्तुं प्रवीणे स्थिरमुखकरणे जारणे भस्मकन्धे
प्रोक्तान्यैर्यन्त्रपाकैः किमु भवति फलं क्लेशदैर्युक्तिसाध्यैः ॥ ६३ ॥
वडवानलयन्त्रं च भूपकन्दुकनामके ।
खेचरस्थालिकायन्त्रे तुलालवणयन्त्रके ॥ ६४ ॥
इष्टकाकोष्ठयन्त्रे च घटगर्भाख्ययन्त्रके ।
प्रतिगर्भकयन्त्रं चेत्यादियन्त्राणि सन्ति हि ॥ ६५ ॥
मूषाविधानं मृत्स्ना च संस्थानं विविधाकृति ।
विधानं विनियोगाश्च देवदेवेन कीर्त्तिताः ॥ ६६ ॥
मूषा हि [1]शोविकाः प्रोक्ताः कुमुदे करहाटकाः ।
पालिनी वह्निमित्रा च रसवादिभिरिष्यते ॥ ६७ ॥
मुष्णाति दोषान् सकलांस्तस्मान्मूषेति गद्यते ।
उपधानं भवेत्तस्य मृत्तिका लोहमेव च ॥ ६८ ॥
मूषामुखविनिष्क्रान्तवरमृत्स्नादिकारिते ।
मूषापिधानयोर्मध्यरन्ध्राणां च विलेपनम् ॥ ६९ ॥
सत्वपातनमूषा च गोस्तन्याप्यायिनी तथा ।
पाकस्वेदनमञ्जूषा मूषल्यो वज्रमूषिका ॥ ७० ॥
वर्णयोगाह्वये चान्ये गोलाद्यास्सन्ति भूरिशः ।
कोष्ठिकाधारकोष्ठे च यन्त्रं पातालकोष्ठकम् ॥ ७१ ॥
निम्नविस्तरतः कुण्डे द्विहस्तचतुरस्रके ।
वनोत्पलसहस्रेण परीते पुटमौषधम् ॥ ७२ ॥
कोट्यां रुद्धं प्रयत्नेन पिष्टकोपरिनिक्षिपेत् ।
वनोत्पलसहस्रार्धं कोष्ठिकोपरि निक्षिपेत् ॥ ७३ ॥
वह्निं प्रज्वालयेत्तत्र महाघटमिदं स्मृतम् ।
राजहस्तप्रमाणेन चतुरस्रं च निम्नकम् ॥ ७४ ॥
चूर्णं चोत्पलसाहस्रं कण्ठावधि विनिक्षिपेत् ।
विन्यसेत् कुमुदं तत्र पुटद्रव्येण पूरितम् ॥ ७५ ॥
पूर्णाच्च गुणतोऽर्धानि परिधानानि निक्षिपेत् ।
एतद्गजपुटं प्रोक्तं महागुणविधायकम् ॥ ७६ ॥
उत्थं चारत्निके कुण्डे पुटं वाराहमुच्यते ।
पुटं भूमितले यत्तु वितस्तिद्वितयोच्छ्रिते ॥ ७७ ॥

[1] कोविकाः.

तावच्च तलविस्तीर्णं तत् यात् कुक्कुटकं पुटम् ।
यत्पुटं दीयते भूमावष्टसंख्यैर्वनोत्पलैः ॥ ७८ ॥
तद्वालसूतभस्मार्थं कपोतपुटमुच्यते ।
गोष्ठांगर्तोर्तुरक्षुण्णं शुष्कं चूर्णितगोर्वरम् ॥ ७९ ॥
पुटं च तत्समुद्दिष्टं पक्वेष्टरसशोधने ।
गोर्वरैर्वा तुषैर्वापि पुटं यत्तत्प्रतीयते ॥ ८० ॥
तद्गोर्वरपुटं प्रोक्तं रसभस्मकरं च तत् ।
स्थूलभाण्डे तुषैः पूर्णे मध्ये मूषासमन्विते ॥ ८१ ॥
वह्निना विहिते पाके तद्भाण्डपुटमुच्यते ।
अधरतादुपरिष्टाच्च [1] कोलिकाच्छाद्यते खलु ॥ ८२ ॥
वालुकाभिः प्रतप्ताभिर्यद्तद्वालुकापुटम् ।
वह्निमित्रं क्षितं सम्यङ् निहन्याद् द्व्यंगुलादधः ॥ ८३ ॥
उपरिष्टात् पुटं यत्तु पुटं तद्भूधराभिधम् ।
ऊर्ध्वं षोडशीकामात्रैस्तुषैर्वा गोर्वरैः पुटम् ॥ ८४ ॥
यन्त्रं तल्लावकाख्यं स्यात् सुमृदुद्रव्यशोधने ।
अनुक्तद्रव्यमात्रे तु साध्यद्रव्यबलाबलात् ॥ ८५ ॥
पुटं विज्ञाय दातव्यमूहापोहविचक्षणैः ।
खल्वं तु पीठिका देवि ! रसेन्द्रो लिङ्गमुच्यते ॥ ८६ ॥
मर्दनं मार्जनं स्नानं दिव्यौषधिगणद्रवैः ॥ ८७ ॥
पूजनं पक्वबीजेन रत्नजालोपजारकम् ।
नैपथ्यं रञ्जनं द्रावैस्सारणा स्याद्विसर्जनम् ॥ ८८ ॥
[2] वेदेन देहलोहानां सम्यक् पूजाविधिः फलम् ।
इत्यष्टादशसंस्कारैर्विशुद्धे [3] लोहदंवके ॥ ८९ ॥
निषेविते रसेन्द्रे तु प्रमाणेन दिने दिने ।
सर्वरोगविनिर्मुक्तो वलीपलितवर्जितः ॥ ९० ॥
जीवेच्च सुचिरं कालं वज्रकायो महाबलः ।
स्थावरं जङ्गमं नैव विषं तस्मिन् प्रवर्तते ॥ ९१ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणचिदम्बर-
शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
रसशालायन्त्रादिनिरूपणं नाम पञ्चविंशस्तरङ्गः

[1] कोविका. [2] वेधनं. [3] वेधके.

अथ षड्विंशस्तरंगः

विषं न संभवेत्तस्य यः कुर्याद्रससेवनम् ।
इत्याख्यातमभूत् तत्किं विषं कीदृग्विधं भवेत् ॥ १ ॥
तत्स्वरूपं समाचक्ष्व स्वामिन्! मयि कृपावलात् ।
कुमार! वर्णये सर्वं यच्छ्रोतुमभिकांक्षसे ॥ २ ॥
अतः परं प्रवक्ष्यामि विषमोक्षं समासतः ।
स्थावरं जङ्गमं चेति मूर्तद्रव्याश्रयं विषम् ॥ ३ ॥
सौम्यभागाश्रयं सूक्ष्मं स्थूलमाग्नेयभागकम् ।
सौम्याः स्थिरास्समाख्याता वीरुद्वृक्षोदकादयः ॥ ४ ॥
आग्नेयाः प्राणिनस्सर्वे माहानागादयश्चराः ।
त्वक्पत्रफलमूलाग्रपुष्पच्छायापयोरसैः ॥ ५ ॥
विषं सौम्यांशसंभूतं प्रयोगाद् वध्यज्यते स्फुटम् ।
दंष्ट्रादशनश्रृङ्गाग्रशिश्नरेतोवसानखैः ॥ ६ ॥
वालाग्रनेत्रमूत्रैश्च विषं वह्न्यंश [1] मिश्रितम् ।
तत्रोरगविषं दिव्यमारभ्यादावुदीर्यते ॥ ७ ॥
कार्कोटकमहापद्मशेषवासुकितक्षकाः ।
अम्बुजश्शंखपालश्च गुलिकोऽष्टौ महोरगाः ॥ ८ ॥
विप्रौ वह्निभवावनन्तगुलिकौ सन्ध्यारुणाभ्रप्रभौ
पीतौ वासुकिशंखपालभुजगाविन्द्रोद्भवौ भूभृतौ ।
वैश्यौ वायुभवौ तु तक्षकमहापद्मावही श्यामलौ
शूद्रावम्बुधिसंभवौ हिमनिभौ पद्माख्यकार्कोटकौ ॥ ९ ॥
वह्नीन्द्रवायुवरुणसंभूताः फणिनः क्रमात् ।
दशाष्टपञ्चैकशतसङ्ख्याफणविभूषिताः ॥ १० ॥
पृथक् पृथक् पन्नगपुङ्गवानामासन् सुताः पञ्चशतं क्रमेण ।
रसातले वारिनिधौ धरायां त्रिविष्टपे ते च वसन्ति नागाः ॥ ११ ॥
तदन्वयेऽप्यसङ्ख्येयास्सर्पास्संजज्ञिरे [2] क्रमात् ।
गुणदोषत्रयात्मानस्सत्ववन्तो महाबलाः ॥ १२ ॥
दर्वीकरा मण्डलिनो राजिलाश्चेति विश्रुताः ।
कृशानुः काश्यपिर्वायुपाथोबिम्बैर्विलक्षणैः ॥ १३ ॥
अथवा शक्तिकुलिशकेतुशूलैश्शिरोपरि ।
मुद्रिकाफणिनश्शीर्षे सर्पा दर्वीकराः स्मृताः ॥ १४ ॥

[1] संश्रितम्. [2] पृथक्.

शैलोद्यानतटाककोटरगुहासस्यालयेषु द्विजाः
प्राकारादिचतुष्कतोरणमहाहर्म्येषु नागा नृपाः
शालागोकुलयन्त्रकेषु बहुशो वैश्या रमन्तेऽधिकं
कासाराम्बुतटाश्मकूटविषमस्थानेषु शूद्राः स्मृताः ॥ १५ ॥
ते च मण्डलिनो मन्दा नानाविन्दुविराजिताः ।
चपलाः प्राणिनो रूक्षाश्शीतलानूपचारिणः ॥ १६ ॥
राजिला राजिभिश्चित्राः पांसुप्रस्निग्ध [1] भोजिनः ।
स्थूलाश्च समसन्नाश्च सोष्णजाङ्गलभूचराः ॥ १७ ॥
वाल्ययौवनवृद्धत्वकर्षशीतोष्णसङ्गमे ।
विषोल्वणाः क्रमादेते सर्पा दर्वीकरादयः ॥ १८ ॥
ये विपर्यस्तचिह्नाः स्युस्सर्पास्तेव्यान्तराः स्मृताः ।
षट्त्रिंशत् फणिनां भेदा गोनसानां तु षोडश ॥ १९ ॥
त्रयोदश तथान्येषां मित्राणामेकविंशतिः ।
आषाढे श्रावणे वापि नागी गर्भेण संयुता ॥ २० ॥
कार्त्तिके मार्गशीर्षे वा प्रसूते स्वदिनोदये ।
अण्डानि स्युर्नवदिनं भिन्नेष्वेष्वर्धमासतः ॥ २१ ॥
शिशवस्तत्र दृश्यन्ते रक्तोर्णातन्तुसन्निभाः ।
निश्चेष्टान् निर्विषास्तांस्तु क्रमाद् ग्रसति पन्नगी ॥ २२ ॥
त्रयस्त्रयोऽवशिष्यन्ते ते च पुंस्त्रीनपुंसकाः ।
सितेतरा भवन्त्येते सप्तभिर्दिवसैः पुनः ॥ २३ ॥
तैस्संज्ञा लभ्यते भूयः परस्तात् सप्तमे दिने ।
दन्तोद्गमो भवेदेषामेकविंशे तथा दिने ॥ २४ ॥
मासाच्छनैश्शनैश्चक्षुरुन्मील्यालोलतारकाः ।
ते पश्यन्ति यथाचित्रं भवन्ति सविषास्तथा ॥ २५ ॥
ये जाताः कार्त्तिके मासे स्वल्पवीर्यविषान्विताः ।
मार्गशीर्षे वलोद्रिक्तविषातिशयसंयुताः ॥ २६ ॥
मासं मात्रा समं नागा विहरन्ति ततस्ततः ।
ततश्चरन्ति स्वच्छन्दं क्रमेण वलशालिनः ॥ २७ ॥
त्वचं मुञ्चन्ति षण्मासाद्धस्तायामा [2] भवन्ति हि ।
मयूरश्येननकुलविडालवृकसूकरैः ॥ २८ ॥

[1] भोगिनः [2] यदा मताः

1) गोजराशनिदावैर्वा हेतुभिर्वाथवा परैः ।
न यदि स्यान्मृतिस्तेषां जीवेयुश्शरदां शतम् ॥ २९ ॥
विंशोत्तरशतद्वन्द्वं तेषां दन्ताश्च कीर्त्तिताः ।
नवैव सविषास्तेषां दंष्ट्रास्ताश्चेति कीर्त्तिताः ॥ ३० ॥
कालरात्रिः कराली च यमदूती विभीषणी ।
भद्रकाली च मकरी शिवदूत्युग्रभाषिणी ॥ ३१ ॥
अत्युग्रभाषिणी चेति दंष्ट्रास्ता नामभिः श्रुताः ।
वामदक्षिणपार्श्वस्थास्तदन्तश्चाग्रतः स्थिताः ॥ ३२ ॥
आसां कतिपयाभिस्तु दंष्ट्राभिरुरगा भृशम् ।
दशन्ति तत्कथं विद्यादन्वेष्टव्यं चतुर्विधम् ॥ ३३ ॥
अवलुप्तं च दष्टं च विद्धं खण्डितमित्यपि ।
अदंशमवलुप्तं स्याद्दष्टमेकक्षतं तथा ॥ ३४ ॥
विद्धं क्षतद्वयं प्रोक्तं खण्डितं तु बहुक्षतम् ।
भीतिरुन्मत्तता क्षुच्च पूर्ववैरं च दस्तता ॥ ३५ ॥
2) आश्रान्तस्थानकामित्वं कालचोदनमित्यपि ।
भुजङ्गमानां दशने हेतवः परिकीर्त्तिताः ॥ ३६ ॥
ऋजुवक्रक्षतं विद्धं निर्विषं भीतसर्पजम् ।
ऋजुक्षतद्वयं विद्धं नानाकपिलपिच्छिलम् ॥ ३७ ॥
रुण्मत्तसर्पजं ज्ञातं मनाक् तत्र विषं भवेत् ।
लालाक्तं खण्डितं विद्यात् क्षुधार्तभुजगोद्भवम् ॥ ३८ ॥
कृच्छ्रसाध्यं विषं तत्र विषमं किल जायते ।
3) वक्रैकक्षतसंयुक्तं खण्डितं पूर्ववैरिणा ॥ ३९ ॥
कृतं नागेन तत् क्ष्वेलमसाध्यमिह लक्ष्यते ।
लालाविलालसंयुक्तं खण्डितं यत्र दृश्यते ॥ ४० ॥
तद् दमनागसंभूतं तद्विषं नैव बाधते ।
यत्र वा खण्डितं रक्तं मांसासङ्गीव लक्ष्यते ॥ ४१ ॥
तदाक्रान्ताहिसंजातं क्षिप्रसाध्यं विनिर्दिशेत् ।
खण्डितं मांसमध्यस्थं यवालालासृगन्वितम् ॥ ४२ ॥
स्थानार्थिना कृतं विद्यान्नागेन सुकरक्रियम् ।
दष्टं वा खण्डितं वापि रुधिरोद्गारभीषणम् ॥ ४३ ॥
यत्र वा दृश्यते तत्तु कालोत्थेनाहिना कृतम् ।
पिपासिकादाहस्पर्शकण्डूशोफरुजान्वितः ॥ ४४ ॥
सविषस्सर्वथा दंशस्तस्मादन्यस्तु निर्विषः ।
दंष्ट्रावालाग्रसंरोधाद्यत्राङ्कं जायते स्फुटम् ॥ ४५ ॥

आनीलमथवा रक्तमवलुप्तं तदुच्यते ।
तच्च हेतुभिरष्टाभिस्संभूतैर्वोपजायते ॥ ४६ ॥
तत्साध्यासाध्यभावस्तु शिक्षितैरेव लक्ष्यते ।
शुष्कः पीतेतरो रूक्षो दंशो दर्वीकरोद्भवः ॥ ४७ ॥
पीतस्सशोफस्सोष्णश्च दंशो मण्डलिकाश्रितः ।
स्निग्धोऽतिशोफश्शीतासृग्दंशो राजिलसंभवः ॥ ४८ ॥
व्यंतराभिगतो दंशो विज्ञेयो मिश्रलक्षणः ।
मर्मावयवसंस्थाने यदा दंशो भविष्यति ॥ ४९ ॥
तत्रापि कृच्छ्रसाध्यं स्याद्विषं वीर्याधिकोद्धतम् ।
हृद्गुह्यतालुवदनोदरकर्णनेत्रभ्रूमध्यशंखगुदमण्डलसंज्ञिकानि ।
मर्माणि तेषु दशसु क्षतमाहितं चेन्नागेन यद्यवशतां क्षणमेति मर्त्यः ॥
विषे व्याप्ते तु तद्वेगात् सप्त चेष्टाः प्रकीर्त्तिताः ।
यथा रोमोद्गमः स्वेदो वैवर्ण्यं वेपथुस्तथा ॥ ५१ ॥
हिक्काश्वासोन्नती मूर्छा मरणं चेति ता विदुः ॥ ५२ ॥
गात्रोद्वेगः श्वयथुजडतानेत्रवैवर्ण्यकार्श्यं
ग्रीवाभङ्गो रुधिरवमनं रोमकूपेषु चास्ये ।
पित्तश्लेष्मोद्गमनमवशाद् भारतीसंगभङ्गो
दन्तोष्ठादेरपि च पुटना कालदष्टस्य चेष्टा ॥ ५३ ॥
दृक्पुल्लाविवृतं सवायु वदनं सन्दर्शनं पृष्ठतः
प्रोक्तो मर्मतले च वंश उदकस्पर्शोऽप्यरोमोद्गमः ।
कीलालोद्गमनं न ताडनपदं यष्ट्या न शस्त्रक्षतात्
रक्ताविष्करणं च यस्य नियतं दष्टस्स मृत्युं गतः ॥ ५४ ॥
रवेर्वारे द्विजोऽनन्तो नागः पद्मशिरस्सितः ।
वायवीयविषो यामार्धमात्रमुदये भवेत् ॥ ५५ ॥
वासुकिस्सोमवारे तु क्षत्रियश्शुभविग्रहः ।
नीलोत्पलाङ्क आग्नेये गरलोऽभ्युदयं व्रजेत् ॥ ५६ ॥
भवत्यभ्युदयो भौमे तक्षको विश्वरक्षकः ।
आरक्तः पार्थिवविषो वैश्यः स्वस्तिकलाञ्छनः ॥ ५७ ॥
बुधे लब्धोदयश्शुद्धः कर्कोटोऽञ्जनसन्निभः ।
सकारणविषो रेखात्रितयाञ्चितमूर्तिमान् ॥ ५८ ॥
गुरुवारोदयः पद्मः स्वर्णवर्णसमद्युतिः ।
शूद्रो महेन्द्रगरलः पञ्चचन्द्राभबिन्दुकः ॥ ५९ ॥
भृगुवारोदितो वैश्यो महापद्मो घनच्छविः ।
लक्षिताङ्गस्त्रिशूलेन दधानो वारुणं विषम् ॥ ६० ॥
धत्ते शंखश्शनौ शक्तिं समुदेत्यरुणारुणः ।
क्षत्त्रियो गरमाग्नेयं बिभ्रद्रेखां सितां गले ॥ ६१ ॥

1) गोखुराशनिदावैर्वा. 2) आक्रान्त. 3) वक्रैक.

रामः स्याद्गुलिकः श्वेतो वायवीयविषो द्विजः ।
सर्ववारेषु यामार्धसन्धिष्वस्योदयो मतः ॥ ६२ ॥
अहर्निशमियं वेला ख्याता विषवती किल ।
रविरोहिण्यमावास्या चेद् द्वौ यामौ विषं तथा ॥ ६३ ॥
चन्द्राश्लेषाष्टमीयोगे चतुर्यामं तथा विषम् ।
भौमोत्तराभाद्रनवमी यामाष्षद् सततं विषम् ॥ ६४ ॥
चतुर्थ्यामनुराधा चेद् बुधे यामाष्टकं विषम् ।
गुरौ तु प्रतिपज्ज्येष्ठा षोडश प्रहरा विषम् ॥ ६५ ॥
शुक्रे मघा कृत्तिका चेद् द्वात्रिंशत्प्रहरा विषम् ।
शनावार्द्राचतुर्दश्यौ षड्दिनान्तं महाविषम् ॥ ६६ ॥
कालदष्टोऽपि सूर्यस्य दिनेऽष्टाविंशतिं घटीः ।
जीवत्यतो मृतो नो चेद्दलितं कालमर्म तत् ॥ ६७ ॥
दिनेऽर्कस्यापरान्तेऽपि स्वास्थ्यकृद्विंशतिं घटीः ।
पश्चादष्टादशघटीर्मोहो भवति निश्चितम् ॥ ६८ ॥
सोमादीनां दिनेष्वेषु घटयः कालापरान्तयोः ।
कालस्य प्रथमा पश्चादपरास्तस्य च क्रमात् ॥ ६९ ॥
सोमस्य दिवसे कालो घटिका विंशतिः क्रमात् ।
घटिका द्वादश स्वास्थ्ये षड्विंशन्मोहनाडिकाः ॥ ७० ॥
बुधस्य दिवसे ज्ञेया घटयः कालस्य षोडश ।
स्वास्थ्यस्य घटिका अष्टौ मोहे सार्धदिनं ततः ॥ ७१ ॥
बृहस्पतिदिने कालघटिका द्वादश स्मृताः ।
चतस्रो घटिकाः स्वास्थ्ये द्व्यहं मोहे घटी तथा ॥ ७२ ॥
शुक्रस्य दिवसे कालघटिका अष्ट निश्चिताः ।
घटयोऽष्टाविंशतिः स्वास्थ्ये मोहो दिनचतुष्टयम् ॥ ७३ ॥
शनैश्चरदिने काले घटिकानां चतुष्टयम् ।
घटयो जनैस्समाः स्वास्थ्ये मोहे षट् सार्धकं दिनम् ॥ ७४ ॥
कालान्तेऽर्धेशनेरन्त्या घटी जीवे परान्तकः ।
अनन्तो दक्षिणाङ्गेऽक्षिवासुकिर्वामवीक्षकः ॥ ७५ ॥
तक्षकः श्रवणस्पर्शी नासां कार्कोटकः स्पृशेत् ।
पद्मः कण्ठतलस्पर्शी महापद्मः श्वसित्यलम् ॥ ७६ ॥
शङ्खो हसति भ्रूप्रेक्षो गुलिको नगचेष्टकः ।
विषदंशो द्विपञ्चाशन्मात्रा त्रिष्वत्र तौलिके ॥ ७७ ॥
नेत्रयोर्वदने नाडीष्वथ धातुषु सप्तसु ।
रसस्थं कुरुते कण्डूं रक्तस्थं दाहतापकृत् ॥ ७८ ॥

मांसस्थं जनयेच्छर्दिं मेदस्स्थं हन्ति लोचने ।
अस्थिस्थं मांसपीडां च मज्जास्थं दाहमंकुरम् ॥ ७९ ॥
शुक्रस्थमानयेन्मृत्युं विषं धातूत्क्रमाद्दहेत् ।
निराकर्तुं विषं शक्यं पूर्वे स्थानचतुष्टये ॥ ८० ॥
अतः परमसाध्यं तु कष्टात्कष्टतरं भवेत् ।
आग्नेयः स्याद्विषे तापो जडता वारुणेऽधिका ॥ ८१ ॥
प्रलापो वायवीये तु विविधं विषलक्षणम् ।
निक्षिप्ते मारिचे चूर्णे दशोर्यस्य पयः क्षरेत् ॥ ८२ ॥
तदा जीवति दष्टस्त्वन्यथा तु नहि जीवति ।
पादांगुष्ठेऽपि तत्पृष्ठे गुल्फजानूरुलिङ्गके ॥ ८३ ॥
नाभौ हृदि कुचे कण्ठे नासादृक्छ्रुतिषु भ्रुवोः ।
शङ्खे मूर्ध्नि नृणां तिष्ठेत् पीयूषस्य कलान्वहम् ॥ ८४ ॥
शुक्लप्रतिपदाद्ये तु कृष्णे पक्षे विपर्ययः ।
सुधाकला स्मरो जीवस्त्रयाणामेकवासिता ॥ ८५ ॥
पुंसो दक्षिणभागे स्याद्वामभागेतु योषितः ।
शुक्लस्थानाद्विषस्थानं सप्तमं ज्ञेयमन्वहम् ॥ ८६ ॥
सुधा विषस्थानमाद्यं विषघ्नं वृद्धिकृत्परम् ।
सुधास्थानेषु नैव [1] स्याद्विषदंशोऽपि मृत्यवे ॥ ८७ ॥
विषस्थानेषु दंशस्तु नैव जायेत मृत्यवे ।
विषार्तस्याङ्गिनः पूर्वं विमृश्यं काललक्षणम् ॥ ८८ ॥
भौमभास्करमन्दानां दिने सन्ध्याद्वये तथा ।
सङ्क्रान्तिकाले दष्टो यः स क्रीडति सुरस्त्रिया ॥ ८९ ॥
अष्टमी पञ्चमी षष्ठी नवमी च चतुर्दशी ।
अमावास्याप्यवश्यं च दष्टानां मृतिदायिनी ॥ ९० ॥
मीने चापद्वये कुम्भे वृषे कर्कटकाजयोः ।
कन्यावृश्चिकयोस्सिंहे तथा मृगतुलाख्ययोः ॥ ९१ ॥
एकान्तरा द्वितीयाद्या दग्धाः स्युस्तिथयः क्रमात् ।
सितचन्द्रे तु दष्टानां भवेज्जीवितसंशयः ॥ ९२ ॥
मूलाश्लेषा मघा पूर्वात्रयं भरणिकाश्विनी ।
कृत्तिकार्द्रा विशाखा च रोहिणी दष्टमृत्यवे ॥ ९३ ॥
नैर्ऋत्याग्नेययाम्यास्तु दिशस्तिस्रो विवर्जयेत् ।
अन्यदिग्भिस्समायातो दष्टो जीवत्यसंशयम् ॥ ९४ ॥
तैलाक्तो मुक्तकेशश्च सशस्त्रः प्रस्खलद्वचाः ।
ऊर्ध्वीकृतकरद्वन्द्वो रोगग्रस्तो विहस्तकः ॥ ९५ ॥

---

1) स्यात् कालदंशोऽपि.

रासभं करभं मत्तमाहिषं चाधिरूढवान् ।
अपद्वारसमायातः कान्दिशीकत्वलक्षणः ॥ ९६ ॥

एकवस्त्रो विवस्त्रश्च व्रतस्थो जीर्णचीवरः ।
वाही विनिवृत्तः क्रुद्धो दूतो नूतनजन्मने ॥ ९७ ॥

स्थिरो मधुरवाक् पुष्टो क्षतपाणिर्दिशि स्थितः ।
एकजातिर्वृतो दूतो धूतोरगविषव्यथः ॥ ९८ ॥

विषमश्शस्यते दूतस्स्त्री स्त्रीणां तु नरो नृणाम् ।
एवं सर्वेषु कार्येषु वर्जनीयो विपर्ययः ॥ ९९ ॥

दष्टस्य नाम प्रथमं गृह्णंस्तदनु मन्त्रिणः ।
वक्ति दूतोऽयमाहूतो दष्टोऽयं मुच्यतामिति ॥ १०० ॥

दूतस्तु यदि पादस्य दक्षिणाग्रे स्थितस्तदा ।
पुमान् दष्टोऽथ वामे तु स्त्री दष्टेत्यपि निश्चयः ॥ १०१ ॥

मन्त्रिणोऽग्रे स्थितो दूतो यदङ्गं किमपि स्पृशेत् ।
तस्मिन्नङ्गेऽस्ति दंशोऽपि ज्ञानिना ज्ञेयमित्यपि ॥ १०२ ॥

अग्रतस्स्थे यदा दूते वामा वहति नासिका ।
तदा सुखासिकादेश्या दष्टस्यागदकारिणा ॥ १०३ ॥

वामायामथ नासायां यदि वायोः प्रवेशने ।
दूतस्समागतश्शिष्यस्तदन्ये चान्यथा घनः ॥ १०४ ॥

दूतोक्तगुणसङ्ख्यातो द्विगुणो भज्यते त्रिभिः ।
यद्येकश्शेषतां याति तच्छुभं नान्यथा पुनः ॥ १०५ ॥

वल्मीकोद्यानचैत्येषु श्मशाने देवतालये ।
शृङ्गाटके सरित्सङ्गे शून्यागारे चतुष्पथे ॥ १०६ ॥

यदि सर्पेण सन्ध्यायां दष्टो जीवितसंशयः ।
द्वयोर्दशम्योरष्टम्योस्तथा रिक्तासु च क्रमात् ॥ १०७ ॥

भुजङ्गमेन [1]) दष्टः स्यान्नरः क्लेशेन जीवति ॥ १०८ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणचिदम्बर-
शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
विषनिरूपणे सर्पादिदूतान्तवर्णनं नाम षड्विंशस्तरङ्गः

1) दष्टश्चेन्नरः

अथ सप्तविंशस्तरंगः

अथातस्संप्रवक्ष्यामि मन्त्रागदमनुत्तमम् ।
क्षिपप्रणवबह्निस्थो मन्त्रो गारुड उच्यते ॥ १ ॥

पञ्चभूतात्मकस्साक्षात् प्रत्यक्षगरुडात्मकः ।
आराध्यात्मज्ञमाचार्यं लब्धाभिज्ञो जितेन्द्रियः ॥ २ ॥

साङ्गं मन्त्रं जपेल्लक्षं पूर्वमेवेष्टसिद्धये ।
आत्मानं सङ्कलीकृत्य सृष्टिक्रमविधानतः ॥ ३ ॥

आबिन्दुसंयुतोर्ध्वाधो वह्निस्यान्त्यकर्णिकम् ।
भावयेन्मातृकाम्भोजं हृदये हंसपाण्डुरम् ॥ ४ ॥

तत्रात्मानं समाधाय परमानन्दमीश्वरम् ।
ततः पादोरुहृदयवक्त्रमूर्ध्नि सुविन्यसेत् ॥ ५ ॥

क्षेपादि पञ्चबीजाङ्गं गरुत्मन्तं ततः स्मरेत् । ॥ ६ ॥

आजानूतप्तहेमप्रभममलहिमप्रख्यमानाभि साक्षात्
आकर्णात् कुंकुमाभं भ्रमरकुलमिवश्याममामूर्धकेशम् ।
व्याप्तब्रह्माण्डगर्भं द्विभुजमभयदं पिङ्गनेत्रोर्ध्वतारं
तार्क्ष्यं नीलाभ्रवासं द्युतिविविधमहापक्षलक्ष्यं नमामि ॥ ७ ॥

एवं ध्यात्वा प्रभुं तार्क्ष्यमात्मभेदेन तत्त्ववित् ।
दंष्ट्रं प्रतिवदेन्मन्त्री विषं नास्तीति चिन्तयन् ॥ ८ ॥

सद्यो निर्विषतां याति तार्क्ष्यतादात्म्यभावतः ।
अथ तन्मन्त्रबीजानि स्वांगुष्ठाद्यङ्गुलक्रमात् ॥ ९ ॥

क्षित्यादिवर्णवेश्मानि मध्यपर्वसु निक्षिपेत् ।
कलागुणाख्यतन्मात्रब्रह्मभेदाननुक्रमात् ॥ १० ॥

यथाव्रद् भूननागानामाद्यव्रर्णोश्च निक्षिपेत् ।
न्यस्तेनानेन वामेन हस्तेनाक्षरमूर्तिना ॥ ११ ॥

स्पर्शनं सर्वरोगघ्नं का कथा विषमोक्षणे ।
मुष्टिमन्तस्स्थितांगुष्ठां दर्शयेच्च विषापहाम् ॥ १२ ॥

हृत्पद्मकोशे शशिमण्डलान्तर्विष्टस्य नासार्णवृतं सवीजम् ।
संस्तभ्य कन्दे वरुणं च विन्दुस्थाने स्मरेत् स्यादिति जीवरक्षा ॥

संस्तम्भयेत्तथांगुष्ठचालनात् स्तम्भयेद् विषम् । ॥ १४ ॥

हृत्पद्मशशिनि रुद्धं शिरसि सुधास्राविवारुणं ध्यायेत्
विषदुरितपलितरोगध्वंसि चिराभ्यासतो दिशेद्वायुः ॥ १५ ॥

अतः परं क्रमेणैव वक्ष्ये द्रव्यागदं यथा ।
दष्टाङ्गं छेदयेत्सद्यो दहेद्वा कनकादिभिः ॥ १६ ॥

दूषयेत्तत्क्षणाद्दंशं सिरां चावेधयेत्सुधीः ।
दंशकाहिं दशेद्दंशोपरिष्टाद्बन्धयेद् दृढम् ॥ १७ ॥

श्रवोमलेन वाचाद्भिर्दंशं संपूरयेच्च तम् ।
शीतोदैरभिषिञ्चेद्वा सर्वस्रोतोविसारिभिः ॥ १८ ॥

गोमयाम्बु पिबेत्साज्यमाज्यं वा जीवरक्षणम् ।
हृदयाचरणं नाम तदवश्यं प्रयोजयेत् ॥ १९ ॥

शिरीषवीजपुष्पार्कक्षीरवीजकटुत्रयम् ।
विषं विनाशयेत्पाननश्यलेपाञ्जनान्तरे ॥ २० ॥

रसेन राजसिन्धूत्थविश्वलाक्षानिशाद्वयैः ।
हिंगुमातुलसंयुक्तं हरेत्पानादिना विषम् ॥ २१ ॥

गृहधूमं हरिद्रे द्वे समूलं तण्डुलीयकम् ।
पाननस्यक्रियायोगाद्विषं हरति तत्क्षणात् ॥ २२ ॥

अश्वगन्धावचाव्यूषाशिरीषैस्तुल्यभागतः ।
समं रम्भाम्भसा पिष्टैर्विषं पानादिना हरेत् ॥ २३ ॥

रामठोषणशिग्रुत्वक् समं द्रोणोद्भवाम्भसा ।
ससञ्जाहिंगुवकुलशिग्रुत्वग्रससंयुतम् ॥ २४ ॥

हिंगूग्रवारिजोपेतं कारवल्लीरसान्वितम् ।
निशाद्वयं च मरिचशिरीषरसभावितम् ॥ २५ ॥

स्नुहिहिंगुवचागुञ्जनरमूत्रसमन्वितम् ।
सोग्रां सचित्रकां गुञ्जां पिष्टां खार्यो समाहिताम्. ॥ २६ ॥

मागधीं मरिचं विश्वं वस्तमूत्रेण संयुतम् ।
सप्तैते कथिता योगा विषयोगातुरेऽष्टमी ॥ २७ ॥

पानादिना प्रयोक्तव्या दर्वीकरविषापहाः ।
मांसीचन्दनसिन्धूत्थकृष्णयष्ट्योपणोत्पलैः ॥ २८ ॥

समूत्रे रञ्जनात् सद्यो विषसुप्तप्रबोधनम् ।
हिंगूग्रालशुनव्यूषैः करञ्जामयहिंगुकैः ॥ २९ ॥

हिंगुश्लेष्मातकनखैः कर्णिव्याघातहिंगुभिः ।
शिरीषोद्भवपञ्चाङ्गैः पिष्ट्वा गोमूत्रसंयुतम् ॥ ३० ॥

यथावद् घुटिकाः कृत्वा छायायामेव शोषयेत् ।
ताभिर्नस्याञ्जनं कुर्यादह्नाय विषशान्तये ॥ ३१ ॥

तगरं केसरं कुष्ठं वचोन्मत्तास्थिचन्दनम् ।
तण्डुलाम्वुजतल्लेपो भवेद्विषविसर्पहा ॥ ३२ ॥

हरिद्रायूषकल्केन शकृता माहिषेण वा ।
दुत्तूरकल्कयुक्तेन शोफघ्नमुपलेपतः ॥ ३३ ॥

विभीतकलतावेरीमुसलीवेगजां शिफाम् ।
लिम्पेदाज्येन तक्रेण हरेन्मण्डलिकाविषम् ॥ ३४ ॥

नवनीतं निशालोध्रचूर्णैरालेपनं हरेत् ।
क्ष्वेलं मण्डलिनां क्षीरं सर्पिर्भ्यामञ्जनं तथा ॥ ३५ ॥

नवनीतं दधि मधु सैन्धवं च कटुत्रिकम् ।
लिहेन्मण्डलिदष्टानां रुधिरोद्गारशान्तये ॥ ३६ ॥

नीलीवीजं सनीपत्वाग्रुधिरोद्गारशान्तिदम् ।
तक्रस्थमथवा नीपत्वक्क्वाथं पयसा पिबेत् ॥ ३७ ॥

सक्षीरं क्षीरवृक्षाणां कलायं ससिताकणम् ।
शीतलं पिवतो नस्यात्सद्यो मण्डलिनां विषम् ॥ ३८ ॥

वृषस्य तण्डुलान्नेन लिम्पेन्नाभेरधस्सकृत् ।
विण्मूत्रस्तम्भनात् सद्यश्शाम्यति क्ष्वेलकारिता ॥ ३९ ॥

विडालपत्रिकामूलं सिताद्भिः कुक्षिमालिपेत् ।
स्रंसते क्ष्वेलसंस्तब्धं पुरीषं मूत्रमेव वा ॥ ४० ॥

कोशातकीकटुकक्रमुकदेवदारुं पिष्ट्वा पिबेदुत वचां लवणोदकेन ।
क्वाथं मनोभवफलस्य पिबेत्सतैलं विष्टब्धमुद्गिरति हृद्गतिमग्निजान्तम्॥

सदेवदारुमहिषीशकृत्तन्मूत्रपेषणात् ।
मण्डिलिक्ष्वेलशोफघ्नमुपलेपाय शस्यते ॥ ४२ ॥

निशात्रिशूलिकल्काभ्यां सौवीरेणानुलेपयेत् ।
हन्ति मण्डलिनां क्ष्वेलमिति षोडशसम्मितम् ॥ ४३ ॥

सिन्धूत्थत्रिफलाव्योषामाक्षिकारिष्टवत्सकम् ।
नवनीतान्वितं लिम्पेन्मण्डलिक्ष्वेलशान्तये ॥ ४४ ॥

कोशातकीलवणवायुविडङ्गयोषा पथ्या शिरीषशरपुङ्खवचा हरिद्रा ।
बस्ताण्डसूकरशकृत्कदलीफलानि सस्फोटमण्डलिविषोपशमाय लिम्पेत् ॥
दुरालभाद्रोणनिशातुषाणि सतण्डुलाधिष्ठितकाञ्जिकानि ।
दुष्टाकटूष्णोपहितेन 1) लिम्पेत्कण्डूतिशोफार्तिषु 2) मण्डलेषु ॥ ४६ ॥
कोशातकीकिंशुककारवल्लीदुग्धाहरिद्रासुरसानुसिद्धैः ।
अद्भिः कदुष्णैरसकृन्निषिञ्चेच्छान्त्यै मतं मण्डलिभिः क्षतानाम् ॥
सिंहासुवर्णसुरसामयकारवल्लीपिञ्छप्रवालतुषवत्सकशिग्रुवेगैः ।
धान्याम्लमस्तुमहिषीनवनीतपिण्टैरालेपनं हरति मण्डलिनां विषार्तिम् ॥
कुपितमागधमाक्षिकानि पिष्ट्वा सह सर्पिः प्रयसा पिबेल्लिहेद्वा ।
शरपुंखशिफांसपत्रतोये शमयेद्राजिलसंभवां विषार्तिम् ॥ ४९ ॥
कृष्णासिन्धूद्भवागोलकदुडुकघृतक्षौद्रमिश्रं पिबेद्वा ।
तैलाक्तं द्रोणपुष्पप्रभवरसमुतालोड्य चिञ्चाम्लतैलैः ॥ ५० ॥
दार्वीगोरोचनाभ्यां सह लवणमथो नूतनागास्त्यपुष्पम् ।
पिष्ट्वा क्षीरान्वितं वा शमयति तरसा राजिलानां विषार्तिम् ॥
वेश्मधूमविषवकमागधीविश्वकुष्ठमरिचान्यरेणुकम् ।
लेपयेत्समधुपिष्टमञ्जसा राजिलोत्थविषशान्तये 3) ध्रुवम् ॥ ५२ ॥
नकुलास्थिसुमनितोषणगृहधूमैर्लेपनादिना शमयेत् ।
मूत्रेण राजिलविषं पयसा लिप्तं तथा समुद्रफलम् ॥ ५३ ॥
कृत्वा प्रभञ्जयित्वा भसितं विश्वं च भव्यनन्दाकम् ।
तत्कृतघुटिका नस्यात् प्रशान्तिमुपयाति राजिलक्ष्वेलः ॥ ५४ ॥
अलाबुबीजं सकरञ्जबीजं कोशातकीबीजशिफासमेतम् ।
गोमूत्रपिष्टं परमेतदिष्टं पानादिना 4) सर्पविषापहारि ॥ ५५ ॥
अर्कस्य कृत्वा पयसा समेतं कोशातकीहिंगुवचाशिरीषम् ।
आजेन मूत्रेण कटुत्रयं च पिष्टं विषं हन्त्यपि कालकूटम् ॥ ५६ ॥
क्षौद्रान्वितं नकुलखड्गकपोतगोधामार्जारमर्कटमयूरवराहपित्तम् ।
शृङ्गी गवां विनिहितं विषमाशु हन्या न्नागेन्द्रमुक्तमपि
सर्पविषे कथा का? ॥ ५७ ॥
विषरूक्षशिरीषकारवल्ली सितगुञ्जा गिरिकणिका मधूका ।
मदनामयरामठार्कपातास्सह कोशातकिना विषापहाः स्युः ॥ ५८ ॥
तैलेन चैतत् सिद्धेन तत्सिद्धेन तथाम्बुना ।
स्नापयेच्च कृताभ्यङ्गं विषशान्त्यै विषापहम् ॥ ५९ ॥
शिरीषास्थिसहागौरीदेवीनिर्गुण्डिकान्वितैः ।
अम्भोभिः स्नापयेद्दष्टमभ्यक्तं पयसा शनैः ॥ ६० ॥

1) लिम्पेन्मण्डूति. 2) मण्डलीनाम्. 3) भिषक्. 4) सर्वविषापहारि.

एरण्डचिञ्चार्कतमालनिम्बैस्सकेसराङ्कोलशिरीषलम्बैः ।
समातुलुङ्गत्रितयैर्विषार्तिं कोष्णैर्विषं चाच्छजलैः प्रसिद्धैः ॥ ६१ ॥
कटुशेलुफकुम्भेकद्विमुखाहिवसायुतम् ।
एतल्लिप्तखगस्पर्शाद्विषं सर्पस्य नश्यति ॥ ६२ ॥
द्विमुखाहिपलास्थीनि रक्तचित्रकसर्षपी ।
स्नुहिक्षीरं च तल्लिप्तं तूर्यनादो विषापहाः ॥ ६३ ॥

सर्पोच्चाटनम्.

ओं स्वसर्पकुलायेति स्वाहान्तं मन्त्रमुच्चरन् ।
सप्त जप्त्वा मृदं क्षिप्त्वा सर्पानुच्चाटयेद् गृहात् ॥ ६४ ॥

मूषिकाविषापहरणम्.

अतः परं समासेन सर्वागदमुदीर्यते ।
कुलचन्द्रः कुलघ्नश्च विषघाती भयानकः ॥ ६५ ॥
कूरोऽप्युग्रश्च कुमुदो मेघनादश्च भूतकः ।
तीक्ष्णस्सनासस्सिंहास्यस्सुदन्तस्सुवलस्तथा ॥ ६६ ॥
एकचारी सगर्भश्च कीर्त्तिताष्षोडशाखवः ।
तेषां सामान्यतो ज्ञेया चिकित्सात्र विवेकिना ॥ ६७ ॥
आदौ रे रे पदं प्रोच्य श्वेतमूषकपूस्ततः ।
कपिले धूः कपिलजं आरुद्रपदमुच्यते ॥ ६८ ॥
भूयःपिङ्गलपूश्शब्दमुक्त्वा हर विषं पुनः ।
हरद्वन्द्वं संहरेद्द्वे पूर्मन्त्रक्रमो मतः ॥ ६९ ॥
मूषिकोत्थविषध्वंसी ख्यातोऽयं रुद्रदैवतः ।
अनेन लक्षजप्तेन मन्त्रो भैरवविग्रहः ॥ ७० ॥
साधयेन्मूषिकान् वाचा किमु तत्क्ष्वेलमोक्षणे ।
सौम्याय वनमालायाः प्रतीच्यां पर्णसप्तकम् ॥ ७१ ॥
पिबेच्चामरलोध्रत्वक्पयसा वा वसुप्रवाम् ।
मूषिकाक्ष्वेलनाशाय सिद्धा योगास्त्रयस्स्मृताः ॥ ७२ ॥
मुस्ता मधुघृतोपेता लीढाखुविषनाशिनी ॥ ७३ ॥
कार्पासपत्रस्य रसं सतैलं मूत्रेण कान्ताकुसुमं पिबेद्वा ।
तापिञ्छचव्यप्रभवां शिफां वा ख्याता विषभ्रान्तिषु मूषिकाणाम् ॥
कारस्करोद्भूतनिशालवङ्गप्रियंगुनिष्पावदलं निपीड्य ।
प्रलेपयेदाखुविषोपशान्त्यै सपाटलीमूलनिशां च खार्याम् ॥ ७५ ॥
दुग्धामातुलकोशातकीमूलासरजद्वयम् ।
पीत्वा तुषाम्बुना हन्याद्वमनान्मूषिकाविषम् ॥ ७६ ॥
शिरीशपर्णकाथोत्थां यवागूं वा पिबेत्पुनः ।
मलसङ्गशिरोरोगछर्दिकुष्ठारुजज्वरैः ॥ ७७ ॥

शोफकुक्षिरुजाभ्यां च पीडितं तु विरेचयेत् ।
रेचनं सागरैरण्डबीजताम्बूलखादनम् ॥ ७८ ॥
कपित्थाङ्कोल्कार्पासशिरीषार्कदलान्वितैः ।
विविक्तं स्नापयेत्क्वाथैर्मूषिकक्ष्वेलशान्तये ॥ ७९ ॥

लूताविषहरणम्.

लूतास्तु विंशतिः प्रोक्ताश्चतस्रस्तासुदुर्जयाः ।
दर्शनाच्छायया चात्मदर्शनाद्द्वन्ध संभवात् ॥ ८० ॥
अन्यास्ताः किल तच्छेषास्साध्या मन्त्रौषधोद्यमैः ।
सर्पाशनोदकस्रावदंशैस्स्याल्लूतिकाविषम् ॥ ८१ ॥
सहस्ररश्मिरादित्योन्हिंहुं फडिति मन्त्रतः ।
निर्गुण्डी मारिचोशीरकुष्ठाम्बु नव चन्दनाः ॥ ८२ ॥
पाटलः पद्मकश्शेलुर्लूताविषहरा इमे ।
उग्रारसोनरजनीसमहिङ्गुवर्धनागरम् ॥ ८३ ॥
पानादिना सगोमूत्रं हरेल्लूताविषं क्षणात् ।
ताम्बूलं साङ्गमाचर्व्य निष्ठीवेत्सर्वतो रसम् ॥ ८४ ॥
लूताविषं प्रहन्यात्तत्तथा व्याघ्रपदीरसः ।
गुञ्जानिर्गुण्डिकाङ्कोलपर्णशुण्ठीनिशाद्वयैः ॥ ८५ ॥
सकरञ्जास्थिभिसिद्धैर्लूतोत्थं सेचयेज्जलैः ।
हिंगुतालवचाकुष्ठदेवीव्याघ्रपदीगणैः ॥ ८६ ॥
सराजिभिः कृतो धूपस्सर्वलूतार्तिभञ्जनः ।
सर्पाभ्यन्तरलालाभ्यो भवन्ति विषवृश्चिकाः ॥ ८७ ॥
मोहं कम्पं ज्वरं शोफं सादं स्वेदं मलं तथा ।
लिङ्गस्तब्धिमधोवातं मूत्रं कुर्वन्ति देहिनाम् ॥ ८८ ॥
हरन्ति जीवितं केचिद् विषमास्ते महाविषाः
हेमाभश्चारुणः पीतो हरिद्राभस्सितोऽसितः ॥ ८९ ॥
रेखाराजीस्थिरश्चेति ते त्रयोदशधा मताः ।
रेखास्त्वेकादिरेकोनविंशत्याद्या मणेः क्रमात् ॥ ९० ॥
यस्यैकमणिसंयुक्तस्सितस्स्तु तलीशरः ।
तस्य संस्पर्शमात्रेण नरः प्राणैर्वियुज्यते ॥ ९१ ॥
विषमैर्मणिभिर्युक्ताः कष्टसाध्या उदीरिताः । ॥ ९२ ॥
माञ्जिष्ठचन्दनौ द्वौ च पुष्पैश्शैरीषकौ तथा ।
मांजिष्ठं सजलं लिम्पेद् वृश्चिकस्य विषार्तये । ॥ ९३ ॥
घृताक्तदुग्धलेपेन मधूकस्वेदतोऽथवा ।
सैन्धवोष्णाज्यपानेन वृश्चिकस्य विषं हरेत् ॥ ९४ ॥

मुखेन दशनैः क्षुण्णा कार्पासस्य जटा धृता ।
कर्णफूत्कारतो हन्ति विषं वृश्चिकसंभवम् ॥ ९५ ॥
नक्तमालानिशाद्वन्द्वं पूतिकाकास्थिभिस्समैः ।
सव्योषैर्विषनाशाय गौलिकायाः प्रलेपयेत् ॥ ९६ ॥
पतितं पापसम्पूर्णं द्रोणस्पन्दं सुपेषितम् ।
लिम्पेत्सचूर्णं तैलं वा नस्थिकाविषशान्तये ॥ ९७ ॥
पञ्चाङ्गं शैरीषं सव्योषं शतपदीविषं हरति ।
गोपीनसी च सर्पिर्लेपेन विषं हरेज्जल्काया: ॥ ९८ ॥
सस्नुक्क्षीरं बीजं शैरीषं दौर्दुरं विषं हन्यात् ।
पादामूलं व्योषं ससर्पिरालेपनाच्च मत्स्यविषम् ॥ ९९ ॥
उग्राविलङ्गरजनीव्योषानताम्बष्ठसैन्धवक्षारैः ।
सविषं सहिंगु लिम्पेद्धरति विषं कीटजातीनाम् ॥ १०० ॥
अलर्काधिपते यक्ष सारमेयगणाधिप ।
अलर्कदष्टमेतं मां निर्विषं कुरु मा चिरम् ॥ १०१ ॥
स्वाहामन्त्रश्च मार्जाररशिवाव्याघ्रपदोदितम् ।
मन्त्राभिमन्त्रणात्सिद्धतैलाभ्यङ्गाच्च तद्विषम् ॥ १०२ ॥
शाम्येद् व्याघ्रपदीव्योषपानाच्च घृतदुग्धयुक् ।
अर्कक्षीरं तिलव्योषं सयष्टिव्योषमेव वा ॥ १०३ ॥
सहेमयष्टि व्याघ्रत्वग्व्योषं वापि सवत्सकम् ।
जातिमूलं सकोशातबीजं सव्योषमालिपेत् ॥ १०४ ॥
सगुडं पयसा पिष्टं पिबेच्च् छ्वादिविषं हरेत् ।
सयष्टि माधवीमूलं साधान्यं वा कटुत्रयम् ॥ १०५ ॥
सगुडं पयसा पिष्टं दष्टो मत्तशुना पिबेत् ।
खार्यकरञ्जसर्वाङ्गकायेन स्नात आतपे ॥ १०६ ॥
तिष्ठेस्ततस्तु मत्तेन शुना दष्टविषं हरेत् ।
आलुपीयं लिहेच्छूलं संदंशव्रणरोपणम् ॥ १०७ ॥
तत्पिष्टेन गुडाक्तेन लिप्तं दग्धशलाकया ।
सगुडं शर्करां लिम्पेत् सूकरव्रणशान्तये ॥ १०८ ॥
नमो वैडूर्यवर्णान्ते मातेहलु युगं ततः ।
रक्ष मां सर्वसंग्रह्य विषेभ्यः पुनरुच्चरेत् ॥ १०९ ॥
गौरिगान्धारिचान्तादिमातङ्गीदशनप्रिया ।
अयि माविपुनस्स्वाहा मन्त्रोऽयं सिद्धपूजितः ॥ ११० ॥
स्थावरक्ष्वेलनाशाय ख्यातोऽयं सर्वकर्मसु ।
मुक्तमात्रे स्थिरे क्ष्वेले शीतेन स्नाप्य वारिणा ॥ १११ ॥

पाययेत्सघृतं क्षौद्रं ततस्सद्यो विरेचयेत् ।
पथ्याकोशातकीपातात्पूर्ववल्लयाग्निका मृता ॥ ११२ ॥
सशिरीषशिणीशेलुताश्मरीयामनिद्वयम् ।
पुनर्नवी बृहत्यौ द्वौ शालिजे च कटुत्रयम् ॥ ११३ ॥
एतत्क्काथेन संसिद्धां यवागूं च समाक्षिकाम् ।
शीतलां पाययेत्सद्यः स्थावरक्ष्वेल शान्तये ॥ ११४ ॥
सिन्धूत्थदोषाघृतमाक्षिकानां पानाद्विषं स्थावरमाशु हन्ति ।
श्लक्ष्णीकृतं ताम्रसुवर्णचूर्णं लीढं सिताक्षौद्रयुतं तथै व ॥ ११५ ॥
सर्जकामधुकलोध्रमागधी शालिका मल्यजत्रुटीजटाः ।
सामयास्समधुलेह्नाद्विषं स्थावरं प्रशमयन्ति देहिनाम् ॥ ११६ ॥
मुस्तापथ्याविश्वकोशातकीभिः सिद्धः क्काथस्साश्वमारत्रपूभिः ।
हन्ति क्ष्वेलं स्थावरं विश्वमेलाकार्पासैर्वा सैन्धवक्षौद्रयुक्तः ॥ ११७ ॥
मञ्जिष्ठोत्पलकुष्ठयष्टि फलिनी द्वे शारिते च स्थिरा
दार्वी चन्दननागशैलुबृहती व्योपेन्द्रनामा निशा ।
कीटघ्नामरदारुपत्रकुसुमं तक्रं च तैस्साधितं
तैलं हन्ति तथा च साधु विहितं सर्पिर्विषं स्थावरम् ॥ ११८ ॥
तत्र मन्त्रः ॥
नमः ओषधीभ्यः ऊर्जावन्तो भविष्यर्धतद्वीर्यैः कृत्स्नां
कुरुध्वं पच पच हन हन दह दह मारय मारय तुभ्यं नमः ॥
रक्षार्थं जगतस्सृजन्नभिमता दिव्यौषधीरादरात्
तासामप्यधिदेवता भगवतीं सृष्ट्वा सृजत्सुप्रभाम् ।
देवीमोषधिसन्निधावथ यवानाकीर्य नत्वामुना
मन्त्रेणैकतमां कुतश्चिदुदितां दिव्यौषधीमुद्धरेत् ॥ ११९ ॥
संक्षेपादिति गदिता यथा चिकित्सा
क्ष्वेलार्थ प्रतिपुरुषस्य सायुषः स्यात् ।
पर्याप्तं फलमेतयान्यथा ते
विस्तीर्णैः किमु विविधार्थहृद्यवाक्यैः ॥
आयुर्वेदोक्तमार्गेण रसायननिषेवणात् ।
रोगैरशेषैर्निर्मुक्तो दूरीकृतविषश्रुतिः ॥ १२० ॥
नृपतिर्दृढगात्रस्सन् भोगान् भूपालकोचितान् ।
बहुधा स भजन्युक्त्या वेङ्कटक्षितिपालकः ॥ १२१ ॥
पौत्रं राज्येऽभिषिच्याथ वीरभद्रपनायकम् ।
ततस्स्वयं च विरतश्शिवयोगपरोऽभवत् ॥ १२२ ॥
अनन्तरं वीरभद्रनामधेयो महीपतिः ।
विधानमनतिक्रम्य संसेवितरसायनः ॥ १२३ ॥
दृढगात्रो महीपालयोग्यान् भोगान् समाश्रयन् ।
अवनवनिमार्याभ्यां पितृव्याभ्यां समं व्यभात् ॥ १२४ ॥
शिववेङ्कटभूपाभ्यां वीरभद्रो महीपतिः ।
बहुकालमवत्यस्मिन् साकं ताभ्यां वसुन्धराम् ॥ १२५ ॥
दायादाः प्रबलैस्सार्धमाजग्मुर्योद्धुमुद्यताः ।
तानुद्धतानयं युद्धे विद्विषस्समुपागतान् ॥ १२६ ॥
धार्तराष्ट्रानशेषेण भीमसेन इवावधीत् ।
जातु याते तु बसवापट्टणाख्यपुराधिपे ॥ १२७ ॥
नृपे पूवलवंशस्थे दृप्ते हनुमनायके ।
आदाय यावनीं सेनामिक्केरीनगरावधि ॥ १२८ ॥
आगत्य योधयित्वा तु प्रयाति स्वपुरं प्रति ।
तदा निजबलैस्सार्धं वीरभद्रमहीपतिः ॥ १२९ ॥
ततः परं तु बसवापट्टणं सन्निरुध्य च ।
तत्प्राकारं समाक्रम्य सद्य एव समं बलैः ॥ १३० ॥
हनुमन्नायकं तं च निर्जित्य निजतेजसा ।
तद्राज्यलक्ष्मीं तत्काले परिणीय ततः परम् ॥ १३१ ॥
सप्ताङ्गं यौतुकमिव ततोऽगृह्णान्महीपतिः ।
ततोऽभीप्सितदायिन्या श्रितनन्दनसम्पदः ॥ १३२ ॥
सन्तानवल्कान्नापश्यदञ्चितं तनुजांकुरम् ।
एवं स चिन्तयामास तदानीं मानसे नृपः ॥ १३३ ॥
किं राज्येन विधातव्यं किं बलेन महीयसा ।
किं भोगैरखिलैर्वाह्यैः फलं पुत्रं विना नृणाम् ॥ १३४ ॥
नयनानन्दनो नैव नन्दनोऽद्याभिरक्षितः ।
अदर्शितात्मबोधं नो जन्म शास्त्रमिवाफलम् ॥ १३५ ॥
यत्प्रसादेन लभ्यन्ते नृणामिष्टान्वितं शिवम् ।
उपास्य नश्वरं मुक्त्वा शाश्वतं फलमश्नुमः ॥ १३६ ॥
इत्यालोच्य निजं राज्यं निधित्सुः स्वपितृव्ययोः ।
आहूय तौ शिवक्ष्मापवेङ्कटक्षोणिपालकौ ॥ १३७ ॥
युवां पितृव्यौ श्णुतं युवयोरुचितां महीम् ।
युवां पालयतं नीत्येत्युदीरयति तावुभौ ॥ १३८ ॥
अवोचतां भवानेव पालयेत्पावनीमिमाम् ।
इत्युदीरितमाकर्ण्य ताभ्यां प्रत्युत्तरं ददौ ॥ १३९ ॥
आयुस्तरङ्गचपलं श्रीश्च सौदामिनीचला ।
यौवनं त्रिदिनं नृणां कुतस्सौख्ये स्थिरत्वधीः ॥ १४० ॥
कुलाचला इव जनाः किंस्थिरत्वमुपागताः ।
तेऽपि सन्ति कियत्कालं किमुतास्मादृशो जनः ॥ १४१ ॥

किन्तेन जन्मनास्माकं येन शम्भुर्न भावित:? ।
[1]शाश्वतं च पदं लब्धुं पुनरावृत्तिवर्जितम् ॥ १४२ ॥

तस्माद्युवां पालयतं क्षोणीं नीतिमनोहराम् ।
वयं भवामस्सततं शिवयोगपरायणा: ॥ १४३ ॥

इति निश्चित्य स परंपरया समुपागते ।
सिंहासने सभासद्भिरशेषै: परिवारिते ॥ १४४ ॥

आस्थानमण्टपे रम्ये सभालक्षणलक्षिते ।
धार्मिकैरपि नीतिज्ञै: क्रियानिर्वहणक्षमै: ॥ १४५ ॥

सुधर्माख्यामपि स्वस्मिन् समर्पयति योगत: ।
ध्रुवमारोपयामास प्रेम्णा स शिवभूपतिम् ॥ १४६ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादनविन्दुकारण
चिद्स्वरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैत
विद्याविशारदश्रीमत्केलदिवसवराजेन्द्रविरचिते
वेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे षष्ठकल्लोले
विषचिकित्सायां मन्त्रद्रव्यागद
वीरभद्रनायकचरित्रवर्णनं
नाम सप्तविंशस्तरङ्ग:

दत्तिलेन कृतं नन्दिभृङ्गिकोहलकादिभि: ।
भरतं चादिभरतं गीतरत्नाकरं तथा ॥
उत्पलाद्यं परिमलं कृतिं शार्ङ्गधरस्य च ।
विश्वकर्माख्यमययोर्मतं च वरुणार्गलम् ॥
वात्स्यायनीयनन्दीशगौणकापुत्रयोर्मतम् ।
मतं शुक्रबृहस्पत्यो रत्नशास्त्रं च सर्वत: ॥
मतं नलस्य गौर्याश्च धन्वन्तर्यश्विनीमतम् ।

रसरत्नाकरं तद्वद्रसादिहृदयं तथा ॥
खनिशास्त्रं मन्त्रशास्त्रं योगरत्नावलीं तथा ।
प्रयोगसारं च तथा विहगेन्द्रस्य संहिताम् ॥
आलोक्यायं संगृहीत: कल्लोल: परिपूरित: ।
त्रिसहस्रं सप्तशती द्वाविंशतिरत: परम् ॥
ग्रन्थानां दृश्यतां सङ्ख्या षष्ठे कल्लोलके त्विह ।
विचित्रार्थाश्च यास्त्वत्र तरङ्गास्सप्तविंशति: ॥

श्रीमत्सद्गुणसोमशेखरलसच्चेन्नाम्बिकासूनुना
श्रीदीक्षागुरुचेन्नवीरकरसञ्जातेन गौरीपते: ।
हेवाकेन पादाम्बुजे च बसवक्षोणीभृता निर्मिते
कल्लोल: परिपूरित: कृतिवरे त्वस्मिन्नभूत्षष्ठक: ॥

---

[1] शाश्वतं न पदं लब्धं.

श्रीः

श्रीशिवतत्त्वरत्नाकरे

सप्तमकल्लोले

प्रथमस्तरंगः

कुम्भौ किं मम मूर्ध्नि वक्षसि कथं मातस्तव स्तस्तथा
दृष्टिं प्रेमयुतां पिता वितनुते सम्मृद्य तौ मोदते ।
नैवं मामककुम्भयोः किमिदमित्युक्तां सुतेन ह्रिया
नम्रां वीक्ष्य हसन् निजप्रियतमां नः पातु गौरीपतिः ॥ १ ॥

स्वामिन्ननन्यसामान्यधिषणाकृतभूषण ! ।
सूक्तानि भवदुक्तानि हर्षयन्ति मनो मम ॥ २ ॥

इहान्यच्छ्रोतुमिच्छामि भवद्वचनगोचरम् ।
सिंहासनं महीपार्हं कीदृग्लक्षणलक्षितम् ॥ ३ ॥

सभा च कीदृशी राज्ञां कैर्वा स्थेयं तदन्तरे ।
कीदृग्विद्यासु कुशलैः कीदृगाकल्पधारिभिः ॥ ४ ॥

कीदृग्गुणसमायुक्तैरेतद् ब्रूहि गुरोऽधुना ।
शृणु नन्दन ! तत्सर्वं यदर्थो भवदुद्यमः ॥ ५ ॥

रुचिरेण सुवर्णेन निर्मितं रत्नरञ्चितम् ।
अष्टाभिस्स्फाटिकैस्सिंहमूर्धभिश्च विराजितम् ॥ ६ ॥

अधः काञ्चनसंयुक्तरत्नवेदिकयान्वितम् ।
आस्थानमण्टपे राज्ञां सिंहासनमुदीरितम् ॥ ७ ॥

अध्यासीतासनं चैतद्राजा विभवभूषितः ।
आस्थानमण्डपे रम्ये विशाले सुखशीतले ॥ ८ ॥

विन्यस्तरत्नशोभाढ्ये रत्नस्तम्भविराजिते ।
चित्रभित्तिमनोरम्ये नानावर्णवितानके ॥ ९ ॥

सुधाकुट्टिमके चित्रे सिंहपीठे स्थितं नृपम् ।
शरच्छशाङ्कसङ्काशैर्यशःपुञ्जनिभैश्शुभैः ॥ १० ॥

मण्डितैर्हेम[1]) दन्तैश्च रत्नकान्तिविराजितैः ।
मयूरपिञ्छसंभूतैश्चमरीपुच्छसंभवैः ॥ ११ ॥

चामरैर्हस्तविन्यस्तैर्वीजयेयुर्वराङ्गनाः ।
वाल्व्यजनकैरन्यैस्सौरभेण मनोहरैः ॥ १२ ॥

[1]) दण्डैश्च.

चन्द्रमण्डलसङ्काशैर्नानारत्नविराजितैः ।
तालपत्रसमुद्भूतैरभ्रकालङ्कृतैश्शुभैः ॥ १३ ॥

चामरैर्व्यजनैरेवं वीज्यमानो महीपतिः ।
आस्थानमण्टपन्यस्तवरसिंहासने स्थितः ॥ १४ ॥

समाहूय प्रतीहारान् सर्वाह्वानं समादिशेत् ।
ततो दौवारिकाहूता विशेयुर्नृपमन्दिरम् ॥ १५ ॥

पटापिनद्धडोलान्तस्स्थिताश्शुद्धान्तयोषितः ।
विचित्रच्छत्रसम्पन्नछायाश्चामरवीजिताः ॥ १६ ॥

सौविदल्लकरोच्चण्डवेत्रदण्डनिवारणैः ।
अपसर्पापसर्पेति गच्छ गच्छेति गर्जनैः ॥ १७ ॥

सुदूरोत्सारिताशेषमार्गस्थजनसञ्चयाः ।
प्रविशेयुर्नृपास्स्थानं सर्वाभरणभूषिताः ॥ १८ ॥

नानारत्नसमाकीर्णचूडामण्डनमण्डिताः ।
सीमन्ताभ्यन्तरं हंसतिलकेन विराजिताः ॥ १९ ॥

मुक्तामरकताकीर्णैर्नीलमाणिक्यलम्बनैः ।
कर्णावतंसैर्मुकुलैः कुण्डलैर्मणिमण्डितैः ॥ २० ॥

अलकाभरणैर्युक्ताः कनत्काञ्चननिर्मितैः ।
कण्ठभूषणकैर्दिव्यैर्मुक्तामाणिक्यसंभवैः ॥ २१ ॥

[1]) पद्मकैरत्नशोभाढ्यैर्दिव्यरत्नयुतैस्सरैः ।
हारैर्मुक्तामयैश्शुभ्रैर्वक्षस्स्थलविभूषणैः ॥ २२ ॥

विचित्ररत्नरचितैरङ्गदैर्बाहुभूषणैः ।
सन्धिभूषणकैर्दीप्तैश्चूडकै रत्नराजितैः ॥ २३ ॥

कटकै रत्नखचितैर्नासिकाभरणैरपि ।
रत्नकाञ्चीकलापैश्च जङ्घाभरणकैरपि ॥ २४ ॥

नूपुरैः पादकटकैर्दिव्यरत्नविभूषितैः ।
पादपट्टकधाराभिः किङ्किणीजालकैरपि ॥ २५ ॥

[1]) पदकै.

अङ्गुष्ठिशाखाविभूषाभिः क्वणन्तीभिः पदं पदं ।
मुद्रिकाभिर्विचित्राभिर्भूषिता नृपयोषितः ॥ २६ ॥
दिव्यवस्त्रपरीधानाः पट्टकञ्चुकसंवृताः ।
श्रीखण्डक्षोदसुभ्राङ्गयः कुंकुमद्रविराजिताः ॥ २७ ॥
सान्द्रकस्तूरिकापत्रवल्लीभिः परिरञ्जिताः ।
तिलकैर्विविधै रम्यैर्नानावर्णैरलंकृताः ॥ २८ ॥
मनोरमा रमण्यस्तु तरुण्यस्सुखभूमयः ।
यथायोग्यं [1] यथास्थानमुपासीरन्महीपतिम् ॥ २९ ॥
काश्चित्तुरङ्गमारूढाः काश्चिदश्वतरीस्थिताः ।
काश्चिच्चरणसञ्चारैश्चालयन्त्यो मनो नृणाम् ॥ ३० ॥
काश्चित्सुरक्तवस्त्रैश्च रञ्जयन्त्यो मनोनृणाम् ।
नीलाम्बरवरैः काश्चिन्निर्लिपन्त्यो दृशो नृणाम् ॥ ३१ ॥
श्वेताम्बरवरैः काश्चित् संविशन्त्यो नृणां मनः ।
मल्लिकामालिकाः काश्चित्काश्चिच्चम्पकमालिकाः ॥ ३२ ॥
मालतीमालिकाः काश्चित्काश्चिद्दुणकमालिकाः ।
काश्चिदुत्पलमालाभिर्भूषिताश्चोत्पलेक्षणाः ॥ ३३ ॥
काश्चित्कुन्तलकामिन्यः कुटिलीकृतकुन्तलाः ।
काश्चिद् द्रविडकामिन्यः प्रकाशितपयोधराः ॥ ३४ ॥
काश्चिच्च लाटललनास्सि[2] न्दूराञ्चितमस्तकाः ।
महाराष्ट्रस्त्रियः काश्चिल्लम्बलम्बन भूषिताः ॥ ३५ ॥
घूर्जर्यो वनिताः काश्चिदापाणि कृतकञ्चुकाः ।
काश्चिद्बालविलासिन्यः काश्चिन्मुग्धा वरस्त्रियः ॥ ३६ ॥
मध्या मनोहराः काश्चित्काश्चित्प्रौढा विचक्षणाः ।
आस्थानभूषणं सर्वास्समागत्य नृपालयम् ॥ ३७ ॥
प्रविश्योभयपार्श्वे च पृष्ठभागे च संस्थिताः ।
कटाक्षैर्वीक्ष्य राजानं हर्षयेयुर्मुहुर्मुहुः ॥ ३८ ॥
प्रतिरूपगुणाकारैरलङ्कारैरलंकृताः ।
कुमारा विनयोपेताः प्रणम्य[3] प्रश्रयान्नृपम् ॥ ३९ ॥
आसने च यथोद्दिष्टे यथार्हं पृथिवीभुजाम् ।
उपविष्टाः पुरोभागे नातिदूरं मनस्विनः ॥ ४० ॥
पुरोधाश्शुद्धवसनो रत्नकुण्डलमण्डितः ।
कुमाराभ्याशदेशे च निवसेदुचितासने ॥ ४१ ॥
अमात्यमन्त्रिसचिवा भूषिता वस्त्रभूषणैः ।
निवसेयुर्यथास्थानं नृपादिष्टासने क्रमात् ॥ ४२ ॥

1) यथाज्येष्ठ्यम्. 2) स्सिन्दूरारुणमस्तकाः 3) विनयान्नृपम्.

मण्डलाधीश्वरास्शूरास्सामन्तास्साधका अपि ।
उदारभूषणैर्युक्ताः [1] पट्टचेलत्वराञ्चिताः ॥ ४३ ॥
वामदक्षिणपङ्क्तिस्थाः पुरोभागे महीभुजः ।
निवसेयुर्यथास्थानमासनेषु नृपाज्ञया ॥ ४४ ॥
देशाधिकारिणः केचित् केचिद् ग्रामाधिकारिणः ।
धर्माधिकारिणः केचित् केचिदर्थाधिकारिणः ॥ ४५ ॥
कामाधिकारिणः केचित् केचिद् भूपाधिकारिणः ।
निष्काधिकारिणः केचित् केचिद्वर्णाधिकारिणः ॥ ४६ ॥
बलाधिकारिणः केचित् केचिच्छुद्राधिकारिणः ।
क्षीराधिकारिणः केचित् केचित्कर्माधिकारिणः ॥ ४७ ॥
शय्याधिकारिणः केचित् केचित्कान्ताधिकारिणः ।
पुत्राधिकारिणः केचित् केचिद्विद्याधिकारिणः ॥ ४८ ॥
वाद्याधिकारिणः केचित् केचिद्गानाधिकारिणः ।
नृत्याधिकारिणः केचित् [2] केचिच्चित्राधिकारिणः ॥ ४९ ॥
वध्याधिकारिणः केचित् केचित्स्वर्णाधिकारिणः ।
शुल्काधिकारिणः केचित् केचिद् द्वाराधिकारिणः ॥ ५० ॥
सत्राधिकारिणः केचित् केचिद्देवाधिकारिणः ।
दानाधिकारिणः केचित् केचिन्मल्लाधिकारिणः ॥ ५१ ॥
गजाधिकारिणः केचित् केचिदश्वाधिकारिणः ।
रथाधिकारिणः केचित् केचित्पात्राधिकारिणः ॥ ५२ ॥
अश्माधिकारिणः केचित् केचिद् दुर्गाधिकारिणः ।
वर्णपट्टाङ्गिकाश्लिष्टा दीर्घबाहुसमन्विताः ॥ ५३ ॥
धारयन्तश्शुभोष्णीषं हेमाभरणभूषिताः ।
विविशेयुर्यथास्थानं भक्तिनम्रा नरेश्वरं ॥ ५४ ॥
कृताञ्जलिपुटास्सर्वे मुखालोकनतत्पराः ।
ताम्बूलधारिणो भक्ता विश्वस्ताः खड्गपाणयः ॥ ५५ ॥
राज्ञस्सकाशे तिष्ठेयुस्सावधाना जितेन्द्रियाः ।
सेवकस्सुगुणो नम्रस्स्वाम्याहूतो विशेत्सदः ॥ ५६ ॥
सुमार्गेणोचितं स्थाने गत्वा चासीत संवृतः ।
आसीनः स्वामिनः पार्श्वे तन्मुखे स्वीकृताञ्जलिः ॥ ५७ ॥
स्वभावं चास्य विज्ञाय दक्षः कार्याणि साधयेत् ।
नाप्यासन्नो न दूरस्थो न समोच्चासने स्थितः ॥ ५८ ॥
न पुरस्स्थो न पृष्ठस्थस्तिष्ठेत् सदसि च प्रभोः ।
असन्ने स्यात्प्रभोर्बाधा दूर स्येऽप्यप्रगल्भता ॥ ५९ ॥

1) पट्टचेलविराजिताः 2) केचिच्छत्राधिकारिणः

पुरः स्थितेऽस्यकोपोऽपि तस्मिन् पश्चाददर्शनम् ।
प्रभुप्रिये प्रियत्वं च तद्वैरिणि च वैरिता ॥ ६० ॥
तस्यैवाव्यभिचारेण नित्यं वर्तेत सेवकः ।
प्रसादात् स्वामिना दत्तं वस्त्रालङ्करणादिकम् ॥ ६१ ॥
प्रीत्या धार्यं स्वयं देयं चान्यस्मै न तदग्रतः ।
स्वामिनो ह्यधिको वेषस्समानो वा न [1] विधते ॥ ६२ ॥
शस्त्रं वस्त्रं क्षुतं जृम्भां नेक्षेतास्य स्त्रियं तथा ।
विजृम्भणक्षुतोद्गारहास्यादीनि वृतानन: ॥ ६३ ॥
कुर्यात्सभासु नो नासाशोधनं हस्तमोटनम् ।
कुर्यात्पर्यासिकां नैव नच [2] पादप्रसारणम् ॥ ६४ ॥
न निन्दां विकथां वापि सभायां [3] कुक्रियां न च ।
श्रोतव्या सावधानेन स्वामिवागनुजीविना ॥ ६५ ॥
भाषितः स्वामिना जल्पेन्न चैकवचनादिभिः ।
आज्ञालाभादयस्सर्वे यस्मिन् सर्वोत्तरा गुणाः ॥ ६६ ॥
स्वामिनं नावजानीयात् सेवको हि कदाचन ।
एकान्तैर्मधुरैर्वाक्यैस्सान्त्वयन्नहितात् प्रभुम् ॥ ६७ ॥
वारयेदन्यथा हि स्याद्देष [4] स्वयमुपेक्षितः ।
प्रभोरग्रे न कुर्वीत वैरिणां गुणकीर्तनम् ॥ ६८ ॥
प्रभोः प्रसादे राज्येऽपि प्रकृतिं नैव कोपयेत् ।
व्यापारितश्च कार्येषु याचेताध्यक्षपूर्वकम् ॥ ६९ ॥
कोपप्रसादकैश्चिह्नैरुक्तिभिस्संज्ञयाथवा ।
अनुरक्तं विरक्तं वा विजानीयात् प्रभोर्मनः ॥ ७० ॥
एतादृग्लक्षणोपेता वसेयुस्तत्र सेवकाः ।
कवयो गमकाश्चैव वादिनो वाग्मिनस्तथा ॥ ७१ ॥
पाठकाः कथका भट्टास्सूतमागधवन्दिनः ।
वाग्गेयकाराश्चतुरा गायका वांशिका अपि ॥ ७२ ॥
वैणिका वाद्यकाराश्च नर्तकाश्चारणा नटाः ।
वैतालीकाश्चाटुकरा प्रहास्यचतुरादयः ॥ ७३ ॥
हरमेखलिकातन्त्रप्रयोगादिविधायिनः ।
विचित्रवर्णैस्सौवर्णैर्भूषणैर्भूषितां नराः ॥ ७४ ॥
दिव्यपट्टांशुकाश्लेषभ्राजिता भव्यमूर्तयः ।
शौर्यौदार्यतपोयुक्ता नृपचित्तानुरञ्जकाः ॥ ७५ ॥
वारं वारं समन्तात्ते जय! जीवेति! वादिनः ।
उपासीरन्नृपश्रेष्ठं सेवाधर्मविशारदाः ॥ ७६ ॥
तच्चित्तवेदिनस्सर्वे विनयानतमस्तकाः ।
आस्थानमण्टपान्तस्थैः नरैस्सेवागतं नृपम् ॥ ७७ ॥
वीक्षमाणैर्नरैर्भाव्यं नवं [1] चन्द्रमिवोदितम् ।
नानादेशाधिपान् भूपान् स्वात्मरक्षार्थमागतान् ॥ ७८ ॥
प्रवेशने प्रतीहारमादिशेत महीपतिः ॥ ७९ ॥
प्रवेशितान् प्रतीहारैः प्रणतान् दण्डवद् भुवि ।
सप्रसादमिति ब्रूयादुत्तिष्ठत [2] निषीदत ॥ ८० ॥
नृपाणामासनं योग्यं दापयेन्मानपूर्वकम् ।
आसनेषूपविष्टानां दृष्ट्वा सन्तोषमावहेत् ॥ ८१ ॥
वचनेन महाप्रीतिं जनयित्वा गतक्रमान् ।
दिव्यैर्वस्त्रैः पट्टमुख्यैर्विचित्रैस्स्वर्णभूषणैः ॥ ८२ ॥
सुरत्नाभरणैर्दिव्यैर्वाजिभिर्वरवारणैः ।
ग्रामैः पुरैस्तथा देशैस्तोषयेत् पार्थिवान्नृपः ॥ ८३ ॥
आवासेषु च रम्येषु स्थापयेत्तान्महीपतिः ।
कांश्चित्प्रसन्नया दृष्ट्या कांश्चिन्मधुरभाषणैः ॥ ८४ ॥
कांश्चित्प्रभूतदानेन कांश्चिन्मानेन हर्षयेत् ।
कुमारान्मन्त्रिणोऽमात्यान् सचिवान् मण्डलाधिपान् ॥ ८५ ॥
सुभगान् सेवकान् दक्षान् सर्वानप्यधिकारिणः ।
तोषयेच्च यथायोग्यं तत्तद्योग्यैश्च माननैः ॥ ८६ ॥
तरुणीः प्रेमदृष्ट्या च मुग्धा मुग्धावलोकनैः ।
प्रौढाश्च चतुरालापैः प्रियवाक्यैर्मनःप्रियाः ॥ ८७ ॥
हारमेखलिकातन्त्रप्रोक्ता बहुविधाः क्रियाः ।
पश्येदाश्चर्यजनिकास्सभामध्ये महीपतिः ॥ ८८ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादान विन्दुकारण
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदीबसवराजेन्द्रविरचिते
वेदागमान्तर्गतविविधविद्यातत्त्वसारभूते
श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले प्रथमस्तरङ्गः

1) युज्यते. 2) पादप्रसादिकाम् 3) कुत्सितं 4) स्वयमुपेक्षकः

1) चन्द्रं सदीधितिम्. 2) न सीदत.

अथ द्वितीयस्तरंगः

स्वामिन्नास्थनमध्ये तु महाश्चर्यविधायिका ।
हरमेखलिकातन्त्रक्रिया वृत्तेति वर्णिता ॥ १ ॥
इदमश्रुतपूर्वं मे तनुते श्रवणे मतिम् ।
तद् विवृत्याधुना ब्रूहि मयि भूरिकृपावशात् ॥ २ ॥
शृणु नन्दन! तत्सर्वं कथयामि सविस्तरम् ।
वञ्चनं परदृष्टीनामग्निस्तम्भनमेव च ॥ ३ ॥
ततो जलस्तम्भनं च वचनस्तम्भनं तथा ।
हरमेखलिकातन्त्रे त्वेवमाद्याः क्रियाश्शुभाः ॥ ४ ॥
पूर्वं रक्षाविधिं कृत्वा पश्चात्कौतुकमारभेत् ।
विना रक्षाविधानेन यत्करोति न सिद्ध्यति ॥ ५ ॥
नासारन्ध्रद्वयं लिप्त्वा गोघृतेन ततो मुखे ।
1) क्षिपेद्बिम्बफलं यस्तु कुयोगैर्न स बाध्यते ॥ ६ ॥
तगराञ्चितनेत्रोऽसौ तगरेण च धूपितः ।
श्मशानतरुमूलेन कुर्यात्पादांगुलीयकम् ॥ ७ ॥
मृतनिर्माल्यसंयुक्तं रक्तसूत्रेण वेष्टयेत् ।
तेन निश्शेषलोकस्य दृष्टिबन्धः प्रजायते ॥ ८ ॥
घृणाकनकपञ्चाङ्गतालकेन युता तथा ।
मुद्रिका सर्वलोकस्य 2) दृष्टिबन्धकरी सदा ॥ ९ ॥
स्वपादे धारयेदेनां पश्चात् सिद्ध्यति कौतुकम् ।
भौमपुष्ये तु सङ्गृह्य कृकलासीं मनोहराम् ॥ १० ॥
स्थापयेन्नवभाण्डेतु रक्तपुष्पैः प्रपूजयेत् ।
3) धूपाद्यैरक्षतैर्गन्धैर्नैवेद्यैर्मन्त्रसंयुतैः ॥ ११ ॥
वामहस्तकनिष्ठायाः स्वस्य रक्तेन सेचयेत् ।
सप्ताहं पूजयेदेवं शस्ता सा सर्वकर्मसु ॥ १२ ॥
4) ओं ह्रां ह्रीं ह्रूं स्वाहा ॥
तन्मृतं छायया शुष्कं चूर्णयित्वा कटिं लिपेत् ।
सवस्त्रमपि तं लोका नग्नमालोकयेद् ध्रुवम् ॥ १३ ॥
वलयीकृत्य तच्चूर्णं कूर्परे मणिबन्धके ।
काकवद् दृश्यते लोकैस्तत्क्षणान्नात्र संशयः ॥ १४ ॥

तच्चूर्णैस्तालपत्रं तु लेपितं सर्पवद्भवेत् ।
नागवल्लीदलं लिप्तं भूमौक्षिप्तं समुत्पतेत् ॥ १५ ॥
तच्चूर्णं कौमुदं कन्दं नागवल्लीदलान्वितम् ।
पेषयित्वा लिपेद्ब्राण्डं तद्ब्राण्डेन विशेज्जलम् ॥ १६ ॥
मयूरं तु शिलां तालं भोजयेद्दिनसप्तकम् ।
तद्विष्ठालिप्तहस्तस्थं द्रव्यं शक्रोऽपि नेक्षते ॥ १७ ॥
सप्ताहं तिलतैलेन भावयेदातपे खरे ।
अङ्कोलबीजचूर्णं तु शोष्यं पेष्यं पुनः पुनः ॥ १८ ॥
तत्तैलं ग्राहयेद्यत्नात् तैलकारस्य यन्त्रतः ।
अथवा ताम्रपात्रे द्वे तेन कल्केन लेपयेत् ॥ १९ ॥
उत्थाप्य स्थापयेद्घर्मे सम्मुखं तु परस्परम् ।
तयोरधः कांस्यपात्रे पतितं तैलमाहरेत् ॥ २० ॥
इदमेवांकुलीतैलं सर्वयोगेषु योजयेत् ।
लिप्तमङ्कोलतैलेन मुण्डितं तत्क्षणाच्छिरः ॥ २१ ॥
पूर्ववत् पूर्यते केशैस्सद्य एव न संशयः ।
तत्तैललिप्तमाम्राण्डं रोपितं भुवि तत्क्षणात् ॥ २२ ॥
सफलो जायते वृक्षस्तत्क्षणान्नात्र संशयः ।
पद्मिनीबीजचूर्णं तु भाव्यमङ्कोलतैलके ॥ २३ ॥
न्यस्तं जले महाश्चर्य 1) जायते पुष्पसञ्चयः ।
बीजं नीलोत्पलोद्भूतं सिक्तमङ्कोलतैलतः ॥ २४ ॥
न्यस्तं जले महाश्चर्यं जायते पुष्पसञ्चयः ।
यानि कानि च बीजानि जलजस्थलजानि च ॥ २५ ॥
अङ्कोलतैललिप्तानि तानि तान्युद्भवन्ति हि ।
यस्य कस्यापि जीवस्य पित्तं तैलेन 2) भावितं ॥ २६ ॥
वलिशस्तं जले क्षिप्तं तद्रूपं स्यात्समुद्भृतम् ।
यत्किञ्चिद्धातुमूलाश्मपत्रपुष्पफलादिकम् ॥ २७ ॥
अङ्कोलतैललिप्तं तदन्यरूपं भवेद् ध्रुवम् ।
छत्राकमंकुलीतैलं स्नुक्पत्रं शशजं मलम् ॥ २८ ॥
तालकं कांस्यविस्फोटं शशिपित्तेन संयुतम् ।
रवौ कन्यकया पिष्टं छायाशुष्कं वटीकृतम् ॥ २९ ॥

---

1) क्षिपेद्बिम्बीफलं. 2) करस्था दृष्टिबन्धकृत्. 3) धूपदीपाक्षतैः
4) ओं ह्रीं ह्रीं स्वाहा.

1) तत् क्षणात्पद्मसंभवः 2) लेपितम्.

तया कुमुदनालस्य स्पर्शात्सर्पाकृतिर्भवेत् ।
घुटिकास्पर्शमात्रेण मृत्तिका काकवद्भवेत् ॥ ३० ॥
ताम्रभाण्डानि सर्वाणि तया लिप्तानि हेमवत् ।
दृश्यन्ते तप्ततोयेन क्षालितं तच्च पूर्ववत् ॥ ३१ ॥
दृश्यन्ते रक्तगुञ्जास्तु श्वेतास्तल्लेपतो ध्रुवम् ।
अयःपात्रं तया लिप्तं दृश्यते [1] कांस्यपात्रवत् ॥ ३२ ॥
स्नुहिपत्रं तया लिप्तं शुक्रवद् दृश्यते जनैः ।
तया लिप्ते तु कण्ठे तु शीर्षच्छेदः प्रदृश्यते ॥ ३३ ॥
अपूपवद् ब्रह्मपत्रं कपित्थं लड्डुकाकृति ।
नृमुण्डवन्नारिकेलमाश्चर्यं दृश्यते जनैः ॥ ३४ ॥
रवीन्दुग्रहणं दृश्यं तया लिप्तेऽथ दर्पणे ।
अङ्गुली च तया लिप्ता द्विधा संदृश्यते जनैः ॥ ३५ ॥
भाण्डपाकस्थलाद् भस्म कुम्भकारगृहाद्धरेत् ।
तद्भस्म घुटिकासार्धं मुष्टिबद्धं विनिक्षिपेत् ॥ ३६ ॥
समुद्रो दृश्यते लोकैश्चित्रं सत्यं शिवोदितम् ।
गुञ्जाफलं श्लक्ष्णपिष्टं लेपयेत् काष्ठपादुके ॥ ३७ ॥
विना वृन्तं नरो याति क्रोशमेकं न संशयः ।
लघु दारुमयं पीठं गुञ्जापिष्टेन लेपयेत् ॥ ३८ ॥
शुष्कमेतज्जलैस्सार्द्रमुपविष्टो न मुञ्चति ।
गुञ्जाबीजं त्वचा त्यक्तं चूर्णं भाव्यं नृमूत्रके ॥ ३९ ॥
सप्तवारं ततः कांस्यं लिप्तमङ्कोलवद् भवेत् ।
तैलमादाय तल्लिप्तं पूर्ववत्पादुकागतिः ॥ ४० ॥
(कोरण्टकस्य बीजानि निम्बनिर्यासनं तथा ।
पिष्ट्वा प्रलेपयेत् पादौ पूर्ववत्पादुकागतिः)
वज्रीदुग्धेन संमिश्रा तैलार्द्रा वर्तिका जले ।
[2] ज्वालिता दीपवत्तिष्ठेद्यावद्वर्तिर्न संशयः ॥ ४१ ॥
वर्तिस्सर्जरसैः पूर्णा तैले लिप्ता जले स्थिता ।
ज्वालिता दीपवत्तिष्ठेद्यवद्वर्तिर्न संशयः)
स्त्रीजरायुःप्रधूपेन भित्तौ चित्रं प्ररोहति ।
गुग्गुलेन पुनस्साम्यं दिव्याश्चर्यपरम्परा ॥ ४२ ॥
पिष्टकं कज्जलं लाक्षा चैभिः पुत्तलिका कृता ।
स्त्रीजरायुःप्रधूपेन रोदितीह किमद्भुतम् ॥ ४३ ॥
शिलातालकसिन्दूररोचनाञ्जनहिंगुले ।
कूर्मभुक्ते ततः पश्चात् तद्विष्ठां लेपयेत्करं ॥ ४४ ॥

नटा नृत्यान्निवर्तन्ते मुष्टिबन्धस्य दर्शनात् ।
वनकूर्मं तु समाहृं भोजयेत्तालकं शुभम् ॥ ४५ ॥
तन्मलं लेपयेत्पाणिं मुष्टिं बध्याग्नटान्तरे ।
निवर्तन्ते नटास्सर्वे सभा नृत्यति कौतुकम् ॥ ४६ ॥
उलूकस्य कपाले तु घृतेनाहृतकज्जलम् ।
तेनाञ्जितेक्षणश्चित्रं रात्रौ पठति पुस्तकम् ॥ ४७ ॥
उलूकहृदयं पित्तं काकपित्तं च शोणितम् ।
एतद्वर्त्यञ्जनाद्रात्रौ विचरेद् दिवसं यथा ॥ ४८ ॥
रजनीचरजीवानां कारयेदक्षिचूर्णकम् ।
अञ्जिताक्षो नरस्तेन कृष्णरात्रौ च पश्यति ॥ ४९ ॥
करस्थानीव वस्तूनि यथा सूर्योदये [1] तथा ।
शिखिपारावतध्वाङ्क्षखञ्जरीटपुरीषजा ॥ ५० ॥
घुटिकास्पर्शमात्रेण ताल्यन्त्रं भिनत्त्यलम् ।
सतुषाग्निं शिलापृष्ठे शरावेण निरोधयेत् ॥ ५१ ॥
गोमयैरर्धयेत् सन्धिं क्षणार्धेन तु तत्पुनः ।
उत्तिष्ठति शिलाश्चर्यं समाकृष्टे शरावके ॥ ५२ ॥
भल्लूकव्याघ्रमहिषवालगृध्रविलोचनं ।
स्रोतोऽञ्जनयुते चाञ्जन् दिवावत्पश्यते निशाम् ॥
अत्र मन्त्रः ॥ ओन्नमो रुद्राय ज्योतिषां (शिवाय) पतये दातव्यं ते बीजं मे देहि देहि (स्वाहा) ॥
अञ्जनानि च सर्वाणि मन्त्रणानेन [2] लेपयेत् ॥ ५३ ॥
पाठामूलं गले बद्धे क्षीरभाण्डस्य तद्दधि ।
जायते तत्क्षणाच्चित्रं सत्यमेतन्न संशयः ॥ ५४ ॥
गन्धकोत्थेन धूपेन पुष्पाणामन्यवर्णकम् ।
कृष्णश्वानं मृतं रक्षेद्यावत् कृमिकुलोच्चयः ॥ ५५ ॥
श्वेतस्योपोषितस्यैव कुक्कुटस्य चतान् कृमीन् ।
यथेष्टं भक्षणे दद्याद्विष्ठां तस्य समाहरेत् ॥ ५६ ॥
ततो ललाटे तिलकं कृत्वा यं वीक्षते च सः ।
तदन्नं कृमिवल्लोकैर्भक्षयद्भिर्विलोक्यते ॥ ५७ ॥
पलायन्ते च तं दृष्ट्वा मूर्छन्ति च पतन्ति च ।
कटुतुम्ब्युत्थतैलेन पारावतवकोद्भवम् ॥ ५८ ॥
मलं च शिखिमूलं च गर्दभास्थि च पेष्टितम् ।
ललाटे तिलकं तेन कृत्वासौ दृश्यते जनैः ॥ ५९ ॥

---

1) कांस्यभाजनम्. 2) ज्वालिता दीपवत्तिष्ठेत् फेनैर्वा सागरोद्भवैः

1) ध्रुवम्. 2) दापयेत्.

दशास्यो नात्र सन्देहो यथा लङ्केश्वरो नृपः ।
शिग्रुबीजोद्भवं तैलं पारावतपुरीषकम् ॥ ६० ॥

वराहस्य वसायुक्तं शिखिमूलं समं समम् ।
ललाटे तिलकं तेन यः करोति स वै जनैः ॥ ६१ ॥

दृश्यते पञ्चवक्त्रोऽसौ यथा साक्षात् सदाशिवः ।
सद्योहतस्य वीरस्य ग्राह्यं चोरस्य वा शिरः ॥ ६२ ॥

तद्वक्त्रे कृष्णदुत्तूरबीजं वाप्य समृत्तिकम् ।
रात्रौ कृष्णचतुर्दश्यां बलिं दत्वा तु कुक्कुटम् ॥ ६३ ॥

अलिबल्युपहारेण [1] पुष्पधूपोपचारतः ।
शिरः खनेत् कृष्णभूमौ भुक्तोच्छिष्टेन सेचयेत् ॥ ६४ ॥

दीपं रात्रौ सदा दद्याद्रक्तवर्त्याज्यसंयुतम् ।
सफलं तु भवेद्यावत्तावद्रक्षेच्च पूरयेत ॥ ६५ ॥

ग्राह्यं कृष्णचतुर्दश्यां बलिं दत्वा तु कुक्कुटम् ।
पञ्चाङ्गं पेषयेत् सार्धं घुटिकां कारयेद् दृढाम् ॥ ६६ ॥

ललाटे तिलकं कुर्यान्न नरो दृश्यते जनैः ।
तादृक्शतसहस्रैस्तु रूपैः परिवृतो ध्रुवम् ॥ ६७ ॥

रात्रौ कृष्णचतुर्दश्यां मयूरास्ये विनिक्षिपेत् ।
भङ्गिबीजं मुदा कृष्णं कृष्णभूमौ निवापयेत् ॥ ६८ ॥

तज्जातभङ्गीत्वग्ग्राह्या तयाकुर्याच्च रज्जुकाम् ।
तद्बद्धकण्ठः पुरुषो मयूरो दृश्यते जनैः ॥ ६९ ॥

तद्योगे कृष्णमार्जारवक्त्रे चैरण्डबीजकम् ।
तज्जातैरण्डबीजानामेकं वक्त्रे विधारयेत ॥ ७० ॥

तं पश्यन्ति च मार्जारं मनुष्या नात्र संशयः ।
[2] मेषाजश्वसृगालानां वदने वापयेत् पृथक् ॥ ७१ ॥

मयूरास्ये यथा भङ्गी जाता सिद्धिश्च तादृशी ।
मृता या श्वपचा नारी तस्या योनौ च खादिरम् ॥ ७२ ॥

तिलकं निक्षिपेत्तत्र दग्ध्वा चान्तस्समाहरेत् ।
तेनैव तिलकं कृत्वा श्वपचारूपभाग्भवेत् ॥ ७३ ॥

रक्तगुञ्जाफलं चोप्यं स्त्रीकपालेन सेचयेत् ।
जातं फलं क्षिपेद्वक्त्रे स्त्रीरूपो दृश्यते पुमान् ॥ ७४ ॥

विषमुष्टयुत्थतैलेन पाणिलिप्तेन कुञ्जरः ।
भल्लूकः पादलिप्तेन नाभिलिप्तेन चन्द्रमाः ॥ ७५ ॥

गणेशः कुक्षिलिप्तेन स्त्रीवत्सर्वाङ्गलेपतः ।
कपोतो मुखलेपेन दृश्यते नात्र संशयः ॥ ७६ ॥

विषमुष्ट्युत्थितं तैलं सर्पपित्तं च रोचनाम् ।
सकुष्ठं तिलकं यस्य तं पश्यति मयूरवत् ॥ ७७ ॥

रात्राबङ्कोलतैलेन लिप्ताङ्गो दृश्यते नरः ।
दीर्घदंष्ट्रोर्ध्वरोमाङ्कं रूपं रौद्रावहं वहन् ॥ ७८ ॥

नवभाण्डे विनिक्षिप्य भिन्ननासां तु मूषिकाम् ।
सनासं कृकलासं च पृथग्भाण्डे विनिक्षिपेत् ॥ ७९ ॥

उपवासत्रये जाते तयोर्दद्याच्च भोजनम् ।
मलं तयोः प्रथग्ग्राह्यं तेन नासां प्रलेपयेत् ॥ ८० ॥

भिन्ननासास्स दृश्येत क्षीरलेपान्निवर्तते ।
षड्दिनीयं मृतं बालं गृहीत्वा तस्य चोदरं ॥ ८१ ॥

हरिद्राः खण्डशः कृत्वा क्षिपेद्यावत्प्रपूर्यते ।
तं रात्रौ निखनेद् भूमौ मन्त्रेणानेन पूजयेत् ॥ ८२ ॥

पञ्चाहान्ते समुद्धृत्य रजनीं शोषयेत्
तत्रमन्त्रः ॥ अमुकं रूपं कुरु कुरु स्वाहा ॥ ॥ ८३ ॥

मन्त्रेणानेन बालादियोगान् कुर्याद्विचक्षणः ।
श्वेतदूर्वारनालैश्च हरिद्रां तां प्रपेषयेत् ॥ ८४ ॥

तल्लिप्तदेहः पुरुषः पञ्चधा दृश्यते जनैः ।
तां निशां सर्षपं श्वेतं पिष्ट्वा चाङ्कोलतैलतः ॥ ८५ ॥

तल्लिप्ताङ्गा नरास्सर्वे संदृश्यन्ते च सप्तधा ।
गोमूत्रेण पुनः स्नानादेक एव प्रदृश्यते ॥ ८६ ॥

शाल्मिकां तां निशां पिष्ट्वा देहसन्धि प्रलेपयेत्
छिन्नसन्धिः प्रदृश्येत पुनस्स्नानान्निवर्तते ॥ ८८ ॥

नरादिसर्वजीवानां ग्राह्यं सद्योहतं शिरः ।
तत्र कृष्णचतुर्दश्यां शणबीजानि वापयेत् ॥ ८९ ॥

भङ्गिदुत्तूरवातारिबीजानां चैकसंयुतम् ।
निखनेत् कृष्णभूम्यां तद्बलिपूजासमन्वितम् ॥ ९० ॥

संचयेत्फलपर्यन्तं तत्तद्बीजानि चाहरेत् ।
यद्यद्बीजं क्षिपेद्वक्त्रे तत्तद्रूपं [1] भवेद् ध्रुवम् ॥ ९१ ॥

खरस्य नासिकादन्तचूर्णं पाण्योः प्रलेपयेत् ।
हस्तस्पर्शे स्फुटन्त्येव नालिकेराणि निश्चयम् ॥ ९२ ॥

भल्लूकास्थिभवैस्तैलैस्सर्वसन्धिं प्रलेपयेत् ।
सन्धौ सन्धौ नालिकेरं धारयेद्यस्तु कौतुकी ॥ ९३ ॥

तथैवाङ्कोलतैलेन स्फुटन्तीह न संशयः ।
कृष्णसर्पं रवौ गृह्य तद्वक्त्रे कृष्णमृत्तिकाम् ॥ ९४ ॥

---

1) पुष्पधूपाक्षतादिभिः 2) मेषाजाश्वसृगालानां.

1) भवत्यलम्.

दत्वाथ वापयेत्तत्र कृष्णदत्तूरबीजकम् ।
तथा मत्स्यमुखे मृच्च तद्बीजं च प्रवापयेत् ॥ ९५ ॥

पृथक् पृथक् क्षिपेद् भूमौ तयोश्शाखां समाहरेत् ।
सर्पस्य शाखया स्पर्शे पुनर्मत्स्या भवन्ति हि ॥ ९६ ॥

सफले चणकक्षेत्रे धौतवस्त्रं विलोडयेत् ।
प्रातः प्रातः प्रयत्नेन दिनानामेकविंशतिम् ॥ ९७ ॥

ततस्तद्वस्त्रखण्डानि जलेसिक्तानि पीडयेत् ।
मृत्तिकायां ततो धान्यं वापयेत्तत्प्ररोहति ॥ ९८ ॥

तत्तद्वस्त्राम्बुतश्शीघ्रं सर्वधान्यानि कौतुकम् ।
निक्षिपेत्सर्वधान्यानि सार्द्रगर्दभचर्मणि ॥ ९९ ॥

स्नुह्यश्वत्थादिवृक्षाणां क्षीरमौदुम्बरस्य च ।
काष्ठौदुम्बरकाक्षीरं लोहचूर्णं तु गन्धकम् ॥ १०० ॥

इष्टकाभिस्सर्जरसं तिलतैलविमिश्रितम् ।
क्रमोत्तरगुणं मर्द्य कुर्यात्तेन कुठारकम् ॥ १०२ ॥

छुरिकेषुफलं कुन्तं यमदंष्ट्रादिकायुधम् ।
भेदयेदपि दुश्छेदं खेटकं 1) कण्टकादिकम् ॥ १०२ ॥

कृकलासस्य पित्तेन चाधो लिप्ते तु दर्पणे ।
संस्थापिते गिरेर्मूर्ध्नि ग्रहणं दृश्यते जनैः ॥ १०३ ॥

हरितालशिलाचूर्णमंकुलीतैलभावितम् ।
तद्वस्त्रं शिरसि स्थाप्य स्थितं पश्यति चाग्निवत् ॥ १०४ ॥

सिन्धूरं गन्धकं तालं समं पिष्ट्वा मनश्शिलाम् ।
तल्लिप्तवस्त्रच्छन्नाङ्गो लोकैस्संदृश्यतेऽग्निवत् ॥ १०५ ॥

खद्योतभूलताचूर्णे ललाटे तिलकीकृते ।
रात्रौ संदृश्यते ज्योतिः 2) धृते तस्मिन् सकौतुकम् ॥ १०६ ॥

त्र्यूषणं चर्वयेदादौ तत्कल्कं नरमूत्रकम् ।
एकीकृत्य लिपेच्छीर्षे वर्तिं तत्रैव धारयेत् ॥ १०७ ॥

ज्वलन्ति न दहन्त्येते केशमात्रं न संशयः ।
वदने कृष्णसर्पस्य यवबीजानि वापयेत् ॥ १०८ ॥

फलितानि 3) सुभिक्षाणि समादायाथ रक्षयेत् ।
क्षिप्ते सर्पकरण्डे तु फणी तत्र न दृश्यते ॥ १०९ ॥

मुक्तेऽसौ दृश्यते सर्प इत्येतन्महदद्भुतम् ।
पाषाणभेदमूले तु चर्विते सति भक्षयेत् ॥ ११० ॥

पाषाणान् खदिराण्डाभान् चणकानिव कौतुकम् ।
तुम्बिनीफलपृष्ठे तु छिद्रं कृत्वा तु पारदम् ॥ १११ ॥

विक्षिपेत् क्षणमात्रं तु वर्तिं गन्धकपूरिताम् ।
ज्वलन्तं निक्षिपेत्तत्र सद्योऽभ्रंलिहमुत्पतेत् ॥ ११२ ॥

मातुलुङ्गस्य बीजानि पुष्पैसौवीरमञ्जनम् ।
एकीकृत्यैव जुहुयाद्धात्रीकाष्ठान्विते ऽनले ॥ ११३ ॥

दृश्यते सगणो रुद्रो लम्बमाने सिते पटे ।
मुनिपुष्परसैः पुष्पे घृष्ट्वा स्रोतोऽञ्जनं ततः ॥ ११४ ॥

अञ्जिताक्षो नरः पश्येन्मध्याह्ने तारकागणम् ।
मातुलुङ्गस्य बीजोत्थं तैलं ताम्रस्य भाजने ।
स्थापयेदातपे पश्येन्मध्याह्ने सरथम् रविम् ॥ ११५ ॥

अक्षपत्ररसैः पिष्ट्वा गुञ्जामूलं दिनान्तके ।
अञ्जिताक्षो नरः पश्येत् पिशाचानतिकौतुकम् ॥ ११६ ॥

अङ्गारं शिखिपित्तेन पिष्ट्वा चाल दले लिपेत् ।
पावकं तन्मुखे धृत्वा वह्निज्वाला सुदृश्यते ॥ ११७ ॥

दुत्तूरतैलसंसिक्ता विषचूर्णेन लोलिता ।
वर्ती सा ज्वलिता लोकैः पुष्पवद् दृश्यते ध्रुवम् ॥ ११८ ॥

रात्रौ विहगपुच्छे तु निबध्य शिखिदीपकम् ।
उल्का इव प्रदृश्यन्ते सञ्चरन्ति नभस्स्थले ॥ ११९ ॥

कृतं गवयविष्ठाया गोलकं क्रिमिना रतौ ।
स्थापयेच्चयनस्याधो बद्धं लिङ्गं भगे भवेत् ॥ १२० ॥

मुक्ते तस्मिन् भवेन्मुक्तिश्चित्रं हास्यं महाद्भुतम् ।
भल्लातकोद्भवं तैलं मृतमत्स्येषु लेपयेत् ॥ १२१ ॥

ते जीवन्ति जले क्षिप्तास्सद्यस्सद्योद्भवाइव ।
मण्डूकवसया दीपमरण्ये ज्वालयेन्निशि ॥ १२२ ॥

चतुर्दिक्षु च तन्मध्ये सागरो दृश्यते जनैः ।
लघुखर्जूरखद्योतभूलताश्वेतमभ्रकम् ॥ १२३ ॥

पेषयेच्छिखिपित्तेन मुष्टिं बध्वा तु तं निशि ।
गृहोपरि विनिक्षिप्तं दृश्यते ज्वलदग्निवत् ॥ १२४ ॥

रक्तार्जुनस्य मूलेन तिलके जलपेषितं ।
कृते त्वयुतहस्तोऽसौ दृश्यते कुञ्जराकृतिः ॥ १२५ ॥

कृकलासस्य संगृह्य शल्यं दक्षिणपार्श्वतः ।
त्रिलोहवेष्टितं वक्त्रे कृतं चानन्तरूपभृत् ॥ १२६ ॥

अत्र मन्त्रः ॥ ओं सङ्कोचय स्वाहा ॥
अष्टोत्तरजपात् सिद्धिर्मन्त्रेणानेन जायते ॥ १२७ ॥

सिन्दूरपूर्णभूनागवर्तिदीपस्य तेजसा ।
यद्वस्तु दृश्यते तेन तद्वस्तु स्वर्णवद्भवेत् ॥ १२८ ॥

1) कङ्कटादिकम्. 2) तस्मिन् स्थानेऽतिकौतुकम्. 3) सुबीजानि.

कार्पासबीजं सर्पस्य वक्त्रे क्षिप्त्वा खनेद् भुवि ।
तज्जाततूलिकावर्तिस्सर्पतैलेन दीपिता ॥ १२९ ॥
गृहे पश्यति यद्रात्रौ तत्तत्सर्पोपमं भवेत् ।
उन्मत्ततैलजं दीपं शमीपुष्पाहिकञ्चुकम् ॥ १३० ॥
सकार्पासा भवेद्वर्तिश्चित्रं भवति पूर्ववत् ।
श्वेतार्कतूलजां वर्तिं सर्पतैलयुतां निशि ॥ १३१ ॥
प्रज्वाल्य सर्पवत्सर्वं गृहं पश्यति कौतुकम् ।
मण्डूकवसया दीपे सर्वं पश्यति सर्पवत् ॥ १३२ ॥
सचक्षुश्श्रवतायुक्तं तदवं कौतुकं भवेत् ।
हस्तर्क्षे सिन्धुवारस्य मूलं चोदरगतं हरेत् ॥ १३३ ॥
स्पर्शने वन्धविच्छेदं कुरुते शीघ्रमद्भुतम् ॥ १३४ ॥
मासं रक्तोत्पलं तुल्यं कृकलासेन भोजयेत् ।
तन्मलैर्गुटिकास्पर्शात्तालयन्त्रं भिनत्त्यलम् ॥ १३५ ॥
सुपक्वामिष्टकां पिष्ट्वा लोहकिट्टमथापि वा ।
मूलरज्जु द्विधा कृत्वा तिलतैलेन लेपिताम् ॥ १३६ ॥
तच्चूर्णलोलितां कृत्वा वन्धलोहं भिनत्त्यलम् ।
द्विहस्तं लोहनाराचं यन्त्रान्माहिषशृङ्गजात् ॥ १३७ ॥
प्रवेशयन्महीं चित्रमुद्धर्तुं कोऽपि नो वली ।
कच्छपस्य शिरो ग्राह्यं लज्जालुं चेन्द्रगोपकम् ॥ १३८ ॥
काकजंघोत्करं कीटं तथा शतपदं कृमिम् ।
पञ्चभिर्गुटिका कार्या नासिकामध्यवर्तिनी ॥ १३९ ॥
सन्दर्शनात् स्तनं हन्ति स्पृष्ट्वैवाथ महाद्भुतम् ।
कनिष्ठानामिकामध्ये दर्शनाद्याति तत्पुनः ॥ १४० ॥
तया घुटिकया लेपाल्लिङ्गसङ्कोचनं भवेत् ।
निर्लिङ्गो दृश्यते मर्त्यः क्षालिते पूर्ववद्भवेत् ॥ १४१ ॥
अङ्कोलोत्थेन तैलेन लिप्तहस्तेन मर्दयेत् ।
निर्गुण्डीपत्रकं भूमौ क्षिप्तं भवति वृश्चिकः ॥ १४२ ॥
तद्वच्च शिखिपित्तेन निम्वपत्राणि वृश्चिकः ।
इत्येवं 1) स्पर्शयोगानां मन्त्रराजश्शिवोदितः ॥ १४३ ॥
पूर्वमेवायुतं जप्त्वा ततस्सिद्ध्यति कौतुकम् ।
अत्र मन्त्रः ॥ ओं नमो भगवते रुद्रायोड्डामरेश्वराय बहुरूपाय नानारूपधराय हस हस नृत्य नृत्य मद मद नानाकौतुकेन्द्रजालदर्शनाय हुं फट् स्वाहा ॥

1) सर्वयोगानां,

मन्त्रेणानेन सर्वेषां सिद्धिः स्यादभिमन्त्रणात् ।
गोजिह्वां शिखिमूलं वा मुखे शिरसि धारयेत् ॥ १४५ ॥
कुरुते सर्ववादेषु जयं पुष्ये समुद्धृतम् ।
मार्गशीर्षे तु पूर्णायां शिखिमूलं समुद्धरेत् ॥ १४६ ॥
वाहौ शिरसि वा धार्यं विवादे विजयी भवेत् ।
मेघनादस्य मूलं तु मुखस्थं तारवेष्टितम् ॥ १४७ ॥
परवादी भवेन्मूकोऽथवा याति दिगन्तरम् ।
निशि कृष्णचतुर्दश्यां महानारीं श्मशानजाम् ॥ १४८ ॥
आदाय वन्धयेद्धस्ते विवादे विजयी भवेत् ।
श्वेतगुञ्जोत्थितं मूलं मुखस्थं दुष्टतुण्डजित् ॥ १४९ ॥
एतेषामुक्तयोगानां चण्डमन्त्रेण सिद्धयः ।
शुक्लपक्षयुते पुष्ये गुञ्जामूलं समुद्धरेत् ॥ १५० ॥
वद्धं शिरसि तत्सत्यं चोरभीनाशनं भवेत् ।
धात्र्यास्तु वध्रकं ग्राह्यमाश्लेषायां प्रयत्नतः ॥ १५१ ॥
हस्ते वद्धे भयं हन्ति चोरव्याघ्रनृपादिजम् ।
आर्द्रायामाहृतं वंशवध्रकं कर्णधारितम् ॥ १५२ ॥
विजयं प्राप्नुयाद्युद्धे शत्रुमध्ये न संशयः ।
अङ्कोलतैलसंभिन्नं कुर्यात्क्रोडस्य चूर्णकम् ॥ १५३ ॥
अनेन स्पृष्टमात्रेण महाहस्ती वशे भवेत् ।
विल्वपुष्पं तु संचूर्ण्य चुचुन्दर्या तु तत्समम् ॥ १५४ ॥
तल्लिप्ताङ्गं नरं दृष्ट्वा दूरं गच्छति कुञ्जरः ।
मूलं मर्कटवल्लयाश्च वाहौ वद्धं च मूर्धनि ॥ १५५ ॥
दुष्टदन्तिहरं दूराद्युद्धादिभयनाशनम् ।
श्वेतापराजितामूलं हस्तस्थं वारयेद्गजम् ॥ १५६ ॥
सुश्वेतवृहतीमूलं हस्तस्थं व्याघ्रभीतिहृत् ।
रजन्या हरितालैर्वा भूर्जपत्रे समालिखेत् ॥ १५७ ॥
यन्त्रं हरितसूत्रेण वेष्टयित्वा ततः पुनः ।
शिलायां स्तम्भयेत्तत्र गतिस्तम्भकरं भवेत् ॥ १५८ ॥
चर्मकारस्य कुण्डाच्च रजकस्य तथैव च ।
कुण्डान्मृदं समाहृत्य चण्डालीऋतुवाससा ॥ १५९ ॥
वन्धयेत् पोट्टलीं प्राज्ञो यस्याग्रे तां विनिक्षिपेत् ।
तस्योत्थाने भवेत् स्तम्भासिद्धयोगोऽयमीरितः ॥ १६० ॥
सितगुञ्जाफलं वाप्यं नृपात्रे प्रेतमृत्स्नया ।
1) क्षिपेद्यस्याननें तं तु तस्य वाक्स्तम्भनं भवेत् ॥ १६१ ॥

1) क्षिपेद्यस्यासने.

अङ्कुली लक्ष्मणा पुंखी सर्पाक्षी शिखिचूलिका ।
विष्णुक्रान्ता 1) जटा नीली पाठा श्वेतापराजिता ॥ १६२ ॥
पाटली सहदेवी च मूलं चेत् काकजंघिका ।
पुष्यर्क्षे च समुद्धृत्य मुखे शिरसि धारयेत् ॥ १६३ ॥
एकैकधारणेनैव 2) शस्त्रं स्वसंद्रणे रिपोः ।
अग्न्यम्बुव्याघ्रभूपालचोरेभ्यो भयमाहरेत् ॥ १६४ ॥
श्वेतगुञ्जोत्थमूलं तु उत्तराभाद्रऋक्षके ।
उत्तराभिमुखं ग्राह्यं रोपयेद्वारणानने ॥ १६५ ॥
मूलं शुक्लत्रयोदश्यां ग्राह्यं कंपिल्लकन्ययोः ।
बलामूलं तया ग्राह्यं पिष्ट्वा च तिलकीकृतम् ॥ १६६ ॥
धार्यं मूर्ध्नि गले बाहौ सर्वशस्त्रनिवारणम् ।
गोजिह्वा कदली द्राक्षा वटश्वेतापराजिते ॥ १६७ ॥
विष्णुक्रान्ता हस्तिकर्णी सुश्वेता कण्टकारिका ।
मूलान्यादाय पुष्यार्के रम्भासूत्रेण वेष्टयेत् ॥ १६८ ॥
स्वहस्ते कर्णयोर्धार्यं शस्त्रस्तम्भकरं भवेत् ।
शिरीषमूलमादाय रविवारे तु पूर्वगम् ॥ १६९ ॥
तच्च तण्डुलतोयेन पिष्ट्वा पिष्ट्वा दिनत्रयम् ।
ललाटदेशे तस्मिंश्च तिलकत्वेन धारिते ॥ १७० ॥
तप्तदिव्ये तथा सर्गकृतदिव्ये विशुध्यति ।
उत्तराभिमुखं ग्राह्यं मेघनादस्य मूलकम् ॥ १७१ ॥
भक्षयेद्धारयेद्धस्ते दिव्यस्तम्भकरं भवेत् ।
आर्द्रकं च शिखामूलं पिष्ट्वा क्षीरेण तत्पिबेत् ॥ १७२ ॥
स्तंभयेत्तण्डुलं दिव्यमपराधःकृतः पचेत् ।
चूर्णयेद्रोचनं भृङ्गराजसर्पाक्षिके समम् ॥ १७३ ॥
प्रातराज्येन तत्पीतं दिव्यस्तम्भनमुत्तमम् ।
सद्यस्संजातगोवत्सविष्ठा ग्राह्यान्तरिक्षतः ॥ १७४ ॥
भक्षयित्वा विषं खादेद् द्विषद्दिव्यजयो भवेत् ।
क्षीरजो वाल्मोटं च 3) विष्ठां हस्ते प्रलेपयेत् ॥ १७५ ॥
मृद्वग्निना ततो लिप्तपादो वह्निषु संचरेत् ।
कुमारीसूरणं पिष्ट्वा लिप्तहस्तो भवेन्नरः ॥ १७६ ॥
दीप्ताङ्गारान् करे कुर्वन्नपि तेन न दह्यते ।
उलूकमेषमण्डूकवसामादाय मेलयेत् ॥ १७७ ॥
अनया लिप्तगात्रस्तु नाग्निना दह्यते नरः ।
मण्डूकवसया पिष्ट्वा पारिभद्रत्वचं ततः ॥ १७८ ॥

1) हरा. 2) शत्रुसंघाद्रणे रिपोः 3) पिष्ट्वा.

लिप्तगात्रो नरो वह्निं स्तम्भयेन्नात्र संशयः ।
विद्युदाहतकाष्ठेन कलिते विहगे तथा ॥ १७९ ॥
निरालम्बस्थिते वह्निर्न दहत्यपि दीक्षिते ।
कुमारीतैललिप्तस्तु हस्तो लोहैर्न दह्यते ॥ १८० ॥
जलकपाटलीमूलैश्शैवालकुसुमं समम् ।
मण्डूकवसया पिष्ट्वा लिप्तगात्रो न दह्यते ॥ १८१ ॥
उद्भ्रान्तपत्रनिर्माल्यमेरण्डं पारिभद्रकम् ।
मण्डूकवसया सार्धं पिष्ट्वा मृद्वग्निना पचेत् ॥ १८२ ॥
तेन पादप्रलेपेन भ्रमेदङ्गारपर्वते ।
यवकाण्डं समाहृत्य मण्डूकवसया सह ॥ १८३ ॥
घुटिकां कारयेत्तेन क्षिपेद्वह्नौ ततो भ्रमेत् ।
भृङ्गराट्कदलीकन्दं मण्डूकवसया पचेत् ॥ १८४ ॥
मृद्वग्निना ततो लिप्तपादो वह्निषु संचरेत् ।
अङ्गारराशिमध्ये तु भ्रममाणो न 1) दृश्यते ॥ १८५ ॥
रसमेरण्डपल्लवस्य शिरीषस्य च पल्लजम् ।
ताभ्यां च लेपयेच्छीर्षं नरतैलेन कम्बलम् ॥ १८६ ॥
लिप्तं प्रज्वलितं धार्यं शिरस्थोऽग्निर्न दाहयेत् ।
आषाढोद्भवमण्डूकवसया लेपयेत् करम् ॥ १८७ ॥
धारयेत्तप्तलोहं तु वह्निस्तम्भनमुत्तमम् ।
पद्मकं नाम यद्द्रव्यं सूक्ष्मचूर्णं तु कारयेत् ॥ १८८ ॥
वापीकूपतटाकेषु निक्षिपेद्भक्षयेज्जलम् ।
अत्र मन्त्रः ॥ ओन्नमो भगवते रुद्राय ज्वलमहेन्द्रकलहप्रिय कुमारि
हंसध्वनिं जनय हंसध्वनिं स्वाहा ॥
अगस्त्यपुष्पनिर्यासं महिषीपयसा पिबेत् १८९ ॥
खादयेन्नवनीतं च 2) जलदो नावसिञ्चति ।
मकरस्य सृगालस्य नकुलस्य वसायुतम् ॥ १९० ॥
जलसर्पशिरोयुक्तमक्षतैलेन पाचयेत् ।
तेन नश्यं कर्णलेपं कृत्वा संस्तम्भयेज्जलम् ॥ १९१ ॥
त्रिलोहवेष्टितं हस्तं कृकलासस्य दक्षिणम् ।
समन्ताद्धारयेद्वक्त्रे स्वेच्छया संचरेज्जले ॥ १९२ ॥
समुद्रेऽपि न सन्देहो नरस्तोयैर्न बाध्यते ।
मूलं च श्वेतगुञ्जायाः कुसुम्भरसपेषितम् ॥ १९३ ॥
(तेनैव रञ्जयेद्वस्तु तद्वस्त्रं साङ्गवेष्टितम्)
गम्भीरजलमध्ये तु संस्थातुं यावदिच्छति ।
जलस्तम्भमिति ख्यातं मन्त्रेणानेन मन्त्रयेत् ॥ १९४ ॥

1) दह्यते. 2) जलधौ नावसिच्यते.

अलावुफलचूर्णं तु पक्कश्लेष्मातकं जलम् ।
पिष्ट्वा तेनाजिनं लिप्त्वा घनं द्व्यंगुलमात्रकम् ॥ १९५ ॥
तच्छुष्कं निक्षिपेत्तोये महाब्धौ च नदं ह्रदे ।
तस्योपरि स्थितो योऽसौ न कदापि निमज्जति ॥ १९६ ॥
पिष्ट्वा श्लेष्मातकालावू कर्तव्यं पादुकाद्वयम् ।
गोधाचर्ममयं छत्रं कृत्वारुह्यथेरज्जले ॥ १९७ ॥
श्लेष्मातफलचूर्णं तु लेप्यं शुष्कं च मृद्घटे ।
घनमंगुलमात्रं स्याच्छोषयेत्पूरयेज्जलैः ॥ १९८ ॥
क्षणार्धे भिद्यते कुम्भं जलं वद्धं तु तिष्ठति ।
अत्र मन्त्रः ॥ ओं नमो भगवते रुद्राय जलं स्तम्भय स्तम्भय ठ ठ स्वाहा ॥
उक्तेषु जलयोगेषु मन्त्रमेवं जपेद् बुधः ॥ १९९ ॥
पातालगारुडं पत्रं जलेन सह मर्दयेत् ।
1) तज्जलं पूरयेत् कुम्भे तत्क्षणाद्बध्यते जलम् ॥ २०० ॥
कदम्ववृक्षसारस्तु विद्युत्पातनिवारणः ।
विद्युत्पातस्य नो भीतिर्देवराजस्य कीर्तनात् ॥ २०१ ॥
जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च ।
पुलस्त्यः पुलहो विष्णुष्षडेते वज्रवारणाः ॥ २०२ ॥
मुनेः कल्याणमित्रस्य जैमिनेश्चापि कीर्तनात् ।
विद्युदग्निभयं नास्ति लिखितेऽपि गृहोदरे ॥ २०३ ॥
गमनोत्थानवाग्बाणखड्गदिव्याग्निवारिणीम् ।
शत्रुसैन्याशनीनां च स्तम्भनं शम्भुनोदितम् ॥ २०४ ॥
इन्द्रजालप्रयोगास्ते विचित्रा इति दर्शिताः ।
इतएवादिविद्यानां परिज्ञानप्रयोगयोः ॥ २०५ ॥
कुशलास्तत्कला भूरि प्रयोगकृतनिश्चयाः ।
अनन्यलभ्यविरुदाभरणैश्च परिष्कृताः ॥ २०६ ॥
अवर्तन्तक्वचित्क्वापि शिवभूपसभान्तरे ।
भव्यकाव्यमनोहारिनाटकालंक्रियाविदः ॥ २०७ ॥
तदास्थानपुरोभागे तिष्ठन्ति स्म कवीश्वराः ॥ २०८ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणचिदम्बर–
शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले
इन्द्रजालविद्याप्रदर्शनं नाम द्वितीयस्तरङ्गः.

1) तज्जलैः पूरयेत् कुम्भं तत्क्षणाद् बध्यते जलम्.

अथ तृतीयस्तरंगः

स्वामिन्! प्रकाशितं सर्वं कौतुकं विविधं महत् ।
विना गुरूपदेशेन दुर्विज्ञेयतरं नृणाम् ॥ १ ॥
श्रुत्वा प्रहृष्टमभवन्ममान्तःकरणं विभो!
काव्यज्ञा नाटकविदोऽलङ्कारज्ञास्सभान्तरे ॥ २ ॥
स्थिता इति समाख्यातं तत्र किं काव्यशब्दितम् ।
तन्निर्माणप्रकारश्च को वा वर्ण्यं च कीदृशम् ॥ ३ ॥
काव्यस्य कति वा भेदास्तत्र कर्ता च कीदृशः ।
एतत्सर्वं समाख्याहि गुरो! मयि कृपावशात् ॥ ४ ॥
पुत्र! तत्ते प्रवक्ष्यामि काव्यनिष्पत्तिसाधनम् ।
वर्णशुद्धिं काव्यवृत्तिं रसान् भावानन्तरम् ॥ ५ ॥
नेतृभेदानलङ्कारान् दोषानपि च तद्गुणान् ।
नाट्यधर्मान् रूपकोपरूपकाणां भिदा अपि ॥ ६ ॥
चाटुप्रवन्धभेदांश्च विकीर्णास्तत्र तत्र तु ।
सञ्चित्यैकत्र कथये सौकर्याय सतामहम् ॥ ७ ॥
अकारादिक्षकारान्ता वर्णास्तु पदतां गताः ।
पदानि द्विविधानि स्युस्तिङ्सुबन्तप्रभेदतः ॥ ८ ॥

सम्बयं तिङ्सुबन्तानां वाक्यमाहुर्विपश्चितः ।
तान्येव कविक्लृप्तानि सार्थानि सरसानि च ॥ ९ ॥
सालङ्काराणि निर्दोषाण्याहुः काव्यं मनीषिणः ।
पद्यं गद्यं च मिश्रं च त्रिविधं काव्यमुच्यते ॥ १० ॥
पद्यं तु छन्दसा बद्धं गद्यं वाक्यकदम्बकम् ।
गद्यपद्यात्मकं मिश्रं नाटकादिकमुच्यते ॥ ११ ॥
सर्गबद्धं संस्कृतेन साश्वासं प्राकृतेन च ।
तद् द्वयं च महाकाव्यं सेतुरामायणादिकम् ॥ १२ ॥
गद्यं तु गदितं द्वेधा कथेत्याख्यायिकेति च ।
कथा कल्पितवृत्तान्ता सत्यार्थाख्यायिका मता ॥ १३ ॥
आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम् ।
नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः ॥ १४ ॥
उद्यानसलिलक्रीडामधुपानरतोत्सवैः ।
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ॥ १५ ॥
मन्त्र[1] चूतप्रयाणादि नायकाभ्युदयैरपि ।
अलंकृतमसङ्क्षिप्तं रसभावनिरन्तरम् ॥ १६ ॥
काव्यंकल्पान्तरस्थायि कल्पतेऽनल्पभूतये ।
छन्दो यरतमैर्व्याप्तं तथा भजसनैरपि ॥ १७ ॥
गुरुणा लघुना चाष्टौ गणास्तल्लक्षणं यथा ।
आदिमध्यावसानेषु यरता यान्ति लाघवम् ॥ १८ ॥
भजसा गौरवं यान्ति मनौ तु गुरुलाघवे ।
गणास्ते द्विविधाः प्रोक्ता मात्रावर्णविभेदतः ॥ १९ ॥
आद्याश्चतसृभिस्तत्र मात्राभिरुपवर्णिताः ।
लघुगुर्वात्मकैर्वर्णैर्द्वितीया स्यात्त्रिभिस्त्रिभिः ॥ २० ॥
सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः ।
वा पादान्तस्त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रको ऋजुः ॥ २१ ॥
पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः ।
पुरः स्थितेन तेन स्याल्लघुतापि क्वचिद् गुरोः ॥ २२ ॥
गणानां तु फलं ज्ञेयं प्रत्येकं प्रोच्यते यथा ।
यो वारिरूपो धनकृद्रोग्निर्दाहभयप्रदः ॥ २३ ॥
ऐश्वर्यहृन्नरीसस्तो भस्सौम्यस्सुखदायकः ।
चस्सौरो रोगदः प्रोक्तस्सो वायव्यः प्रवासकृत् ॥ २४ ॥
शुभदो मो भूमिमयो दिङ्मयो नश्शुभप्रदः ।
वर्णं गणं च काव्यस्य मुखे कुर्यात्सुशोभनम् ॥ २५ ॥

कर्तृनायकयोस्तेन कल्याणमुपजायते ।
आभ्यां भवति संप्रीतिरिदीद्भ्यां धनमुद्भयात् ॥ २६ ॥
ऋभ्यां लृभ्यामुपख्यातिरचस्सुखकरा मताः ।
चतुर्भ्यः कादिवर्णेभ्यो लक्ष्मीरपयशस्तु चात् ॥ २७ ॥
प्रीतिस्सौख्यं च छान्मित्रलाभो जो झश्च मृत्युकृत् ।
टठाभ्यां खेदसंप्राप्तिः शोभाशोभाकरौ डढौ ॥ २८ ॥
भ्रमणं णात्सुखं तात्तु थाद्युद्धं सुखदौ दधौ ।
नः प्रतापी भयसुखमरणक्लेशदाहकृत् ॥ २९ ॥
पवर्गो यस्तु लक्ष्मीदो रो दाहं व्यसनं लवौ ।
शस्सुखं तनुते षस्तु खेदं सस्सुखदायकः ॥ ३० ॥
हो दाहकृद् व्यसनदो ळक्षौ सर्वसमृद्धिदौ ।
एवं प्रत्येकशः प्रोक्तं वर्णानां वास्तवं फलम् ॥ ३१ ॥
संयोगस्सर्वथा त्याज्यो वर्णानां क्षं विना मुखे ।
शुद्धमप्यन्यसंयुक्तमशुद्धमुप जायते ॥ ३२ ॥
यथा मधु घृतोन्मिश्रं विषतामेति वीर्यतः ।
देवतावाचकाश्शब्दा ये च भद्रादिवाचकाः ॥ ३३ ॥
तेसर्वे नैव निन्द्यास्स्युर्लिपितो गणतोऽपि च ।
उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका ॥ ३४ ॥
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ।
त्रिष्टुप् च जगती चैव तथाति जगती मता ॥ ३५ ॥
शक्करी सातिपूर्वा स्यादष्ट्यत्यष्टी तथा मते ।
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ॥ ३६ ॥
विकृतिस्सङ्कृतिश्चैव तथाति कृतिरुत्कृतिः ।
इत्युक्ताश्छन्दसां संज्ञाः क्रमशो वच्मि साम्प्रतम् ॥ ३७ ॥
आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्धितैः ।
पृथक्छन्दो भवेत्पादैर्यावत् षड्विंशतिं गतैः ॥ ३८ ॥
तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्त्तिताः ।
शेषा गाथास्त्रिभिष्षड्भिश्चरणैरुपलक्षिताः ॥ ३९ ॥
सममर्धसमं वृत्तं विषमं च तथा परम् ।
अङ्घ्रयो यस्य चत्वारस्समलक्षणलक्षिताः ॥ ४० ॥
तच्छन्दश्शास्त्रतत्त्वज्ञास्समवृत्तं प्रचक्षते ।
प्रथमाङ्घ्रिसमो यत्र तृतीयश्चरणो भवेत् ॥ ४१ ॥
द्वितीयस्तुर्यवद् वृत्तं तदर्धसममुच्यते ।
यस्य पादचतुष्कोऽपि लक्ष्मभिन्नः परस्परम् ॥ ४२ ॥

[1] दूत.

तदाहुर्विषमं वृत्तं छन्दश्शास्त्रविशारदाः ।
प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया ॥ ४३ ॥
सङ्ख्या चैवाध्वयोगश्च प्रत्ययाष्षट् प्रकीर्त्तिताः ।
पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः ॥ ४४ ॥
यथोपरि तथाशेषं भूयः कुर्यादमुं विधिम् ।
ऊने दद्याद् गुरूनेव यावत्सर्वलघुर्भवेत् ॥ ४५ ॥
प्रस्तारोऽयं समाख्यातश्छन्दोविचिति तिविदिभिः ।
नष्टस्य यो भवेदंकस्तस्यार्धेऽर्धे समे च लः ॥ ४६ ॥
विषमे चैकमादाय तदर्धेऽर्धे गुरुर्भवेत् ।
उद्दिष्टं द्विगुणानाद्यादुपर्यङ्कान् समालिखेत् ॥ ४७ ॥
लघुस्थाने च तत्राङ्कास्तैस्सैकैर्मिश्रितैर्भवेत् ।
वर्णान् वृत्तभवान् सैकानौत्तराधरतः स्थितान् ॥ ४८ ॥
एकादिक्रमतश्चैतानुत्तरोत्तरतः क्षिपेत् ।
उपान्त्यतो निवर्तेत त्यजन्नेकैकमूर्ध्वतः ॥ ४९ ॥
उपर्याद्याद् गुरोरेवमेकद्व्यादिलगक्रिया ।
लगक्रियाङ्कसन्दोहे भवेत् सङ्ख्या विमिश्रिता ॥ ५० ॥
उद्दिष्टाङ्कसमाहारस्सैको वा जनयेदिमाम् ।
सङ्ख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्त्तिता ॥ ५१ ॥
वृतस्यांगुलिकीव्याप्तिरधः कुर्यात्तथांगुलम् ।
एवं वर्णगणच्छन्दोविचारणविचक्षणः ॥ ५२ ॥
कवित्वकरणस्तोमसंपन्नः कविरुच्यते ।
कायिको वाचिकश्चार्थशिल्पिको मार्दवानुगः ॥ ५३ ॥
विवेकी भूषणार्थी च कवयस्सप्त कीर्त्तिताः ।
आवापोद्वापकव्यावन्मननो रुचिरात्मनः ॥ ५४ ॥
वाचिको वाचिकश्शुद्धवागाडम्बरकारकः ।
अर्थेऽभिधेयचित्रार्थी शिल्पको द्वयचित्रकृत् ॥ ५५ ॥
शब्दार्थमार्दवापेक्षी कविस्स्यान्मार्दवानुगः ।
[1]श्रेष्ठार्थगुणदोषज्ञो महाकविमतानुगः ॥ ५६ ॥
शास्त्रालङ्कारसंस्कारी विवेकी [2] कविरुच्यते ।
अलङ्कारैकनिष्ठस्तु भूषणार्थी बुधैर्मतः ॥ ५७ ॥
शक्तिर्निदानं काव्यस्य कथ्यते काव्यवेदिभिः ।
(शब्दछन्दोभिधानादिशास्त्रलोकावलोकनम् ।
नैपुण्यं कविशिक्षा च त्रितयं काव्यकारणम्
न जातु जायते काव्यं यां विना करणैरपि)
शब्दच्छन्दोऽभिधानाद्यैस्सा शक्तिरभिधीयते ॥ ५८ ॥

1) श्लेषार्थ. 2) कविपुङ्गवः

जातमप्यपहासाय कल्पते कविसन्ततेः ।
शब्दच्छन्दोऽभिधानानां न विधिस्संग्रहादिह ॥ ५९ ॥
तेषां स्वरूपमन्यत्र बोद्धव्यं बुद्धिशालिभिः ।
काव्यानां कविकॢप्तानामर्थाः प्रोक्ताश्चतुर्विधाः ॥ ६० ॥
मुख्यो लक्ष्यस्तथा गौणो व्यङ्ग्यश्चेतीह कथ्यते ।
स मुख्यः कथितस्साक्षात् सङ्केतेनाभिधीयते ॥ ६१ ॥
जातिक्रियागुणद्रव्यभेदात्सोऽपि चतुर्विधः ।
गौश्चलो धवलो डित्थ इत्युदाहरणं मतम् ॥ ६२ ॥
[1] वाच्यार्थानुपपत्तौ यस्तत्सम्बन्धी प्रतीयते ।
प्रयोजनवशादन्यो लक्ष्योऽर्थो लक्षणा त्रिधा ॥ ६३ ॥
वाच्यार्थस्य परित्यागादन्योऽर्थो यत्र लक्ष्यते ।
सा जहल्लक्षणा ज्ञेया गङ्गायां घोष इत्यसौ ॥ ६४ ॥
वाच्यार्थस्यापरित्यागादन्योऽर्थो यत्र लक्ष्यते ।
अजहल्लक्षणा कुन्ताः प्रविशन्तीति सा मता ॥ ६५ ॥
जहती साप्यजहती स्वार्थं या तूभयात्मिका ।
सा च्छत्रिणो व्रजन्तीति तत्रोदाहरणं मतम् ॥ ६६ ॥
एकेन छत्रिणान्येषां छत्रित्वमिह लक्ष्यते ।
स गौणो गुणसादृश्यादन्योऽर्थो यः प्रतीयते ॥ ६७ ॥
उदाहरणमेतस्य सिंहो माणवको यथा ।
मुख्यार्थबाधे तद्योगाद् व्यङ्ग्यो लक्ष्यस्य यत्फलम् ॥ ६८ ॥
नायं मुख्यो नापि लक्ष्यो लक्षणायाः फलं यतः ।
गङ्गा मुख्यस्तथा लक्ष्यो व्यङ्ग्यश्शीतलतादिकः ॥ ६९ ॥
अनेकवाचकश्शब्दो यत्र वाच्यं व्यनक्ति तत् ।
व्यञ्जनं त्वभिधामूलं संयोगादिभिरुच्यते ॥ ७० ॥
संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥ ७१ ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिस्स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ ७२ ॥
सवज्रो हरिरित्यत्र योगादिन्द्रः प्रतीयते ।
अवज्रो हरिरित्यत्र वियोगादपि वासवः ॥ ७३ ॥
साहचर्याद्दाशरथी रामलक्ष्मणयोरिति ।
रामोऽर्जुनविरोधीति विरोधाद्भार्गवो मतः ॥ ७४ ॥
स्थाणुं भज जगद्बन्ध्यमित्यर्थेन शिवो मतः ।
युष्मदर्थः प्रकरणाद्देवो जानाति मामिति ॥ ७५ ॥

1) वाक्यार्थानुपपत्तौ.

कन्तुर्मीनध्वज इति लिङ्गात् कामः प्रतीयते ।
देवः पुरारिरित्यत्र शब्दसन्निधिनशिवं ॥ ७६ ॥
मत्तः पिको विकारीति सामर्थ्यात्सुरभावृतौ ।
औचित्यात्पातु वश्शम्भुरिति संमुख इष्यते ॥ ७७ ॥
अत्र देवो राजतीति देशाद्राजावगम्यते ।
चित्रभानुर्विभातीति कालेनार्थोऽवसीयते ॥ ७८ ॥
रात्रौ चेदनलो ज्ञेयो दिवा चेत्तिग्मदीधितिः ।
मित्रं विभातीति सुहृन्मित्रो भातीति भास्करः ॥ ७९ ॥
पुंनपुंसकव्यक्त्या वा व्यज्येते तौ यथाक्रमम् ।
स्वरेण व्यक्तिरर्थस्य वेदे काव्येषु न क्वचित् ॥ ८० ॥
एतावन्मात्रमेवेति चेष्टयार्थो विभाव्यते ।
अर्थाश्च व्यञ्जकास्तस्य सहकारितया मताः ॥ ८१ ॥
जायमानैर्विभावाद्यैर्व्यक्तस्थायी रसस्स्मृतः ।
भावस्तु मनसो वृत्तिभेदः स्थैर्यमुपेयिवान् ॥ ८२ ॥
रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्साविस्मयशमाः स्थायिभावा नव क्रमात् ॥ ८३ ॥
पोष्यमाणा रतिर्भावैः शृङ्गार इति कथ्यते ।
भावमेव स्थायिनोऽन्ये रसतां प्राप्नुवन्ति हि ॥ ८४ ॥
नवनीतं यथा पाकाद् घृतत्वं प्रतिपद्यते ।
श्रूयमाणैर्विभावाद्यैः काव्येषु रससंभवाः ॥ ८५ ॥
दृश्यमानैस्संदस्यानां नाटकेषु रसोदयः ।
विभावा अनुभावाश्च सात्विका व्यभिचारिणः ॥ ८६ ॥
श्रोतॄणां प्रेक्षकाणां च ते सर्वे रसपोषकाः ।
आलम्बनत्वेनोद्दीपनत्वेन द्विविधा मताः ॥ ८७ ॥
विभावाद्यैर्विशेषेण रसव्यक्तिस्तु भाव्यते ।
सालम्बनविभावस्स यमालम्ब्य रसोदयः ॥ ८८ ॥
उद्दीप्यते रसो भावैर्यैस्त उद्दीपना मताः ।
उत्पन्नो यैरसो भावैर्भावकैरनुभूयते ॥ ८९ ॥
तेन भावाः प्रकीर्त्यन्ते विकारा अङ्गसंभवाः ।
सत्वं नाम मनोवृत्तिस्सात्विकास्तत्समुद्भवाः ॥ ९० ॥
स्तम्भस्स्वेदोऽथ रोमाञ्चो लयो वैस्वर्यवेपथू ।
अश्रुवैवर्णमित्यष्टौ भावाः प्रोक्तास्तु सात्विकाः ॥ ९१ ॥
स्तम्भस्स्यान्निष्क्रियांगत्वं रागभीत्यादिसंभवम् ।
1) प्रलयस्तु मनःखेदैर्गाढमिन्द्रियमूर्छनम् ॥ ९२ ॥
सुखाद्यतिशयाज्जातो रोमाञ्चो रोमविक्रिया ।
रागद्वेषभयाद्युत्थो वेपथुर्गात्रकम्पनम् ॥ ९३ ॥
वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिजः ।
विषादमन्दरोषाद्यैर्वैवर्ण्यं च विवर्णता ॥ ९४ ॥
अश्रु नेत्रोद्भवं वारि सुखरोषप्रहर्षजम् ।
मतं गद्गदभाषित्वं वैस्वर्यंप्रमदादिजम् ॥ ९५ ॥
भावाः स्थायिन्यनैकान्त्याच्चरन्तो व्यभिचारिणः ।
उत्पद्यन्ते विलीयन्ते वारिधाविव वीचयः ॥ ९६ ॥
निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥ ९७ ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ ९८ ॥
सुप्तिर्विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ ९९ ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावास्तेषां लक्षणमुच्यते ॥ १०० ॥
दुःखेर्ष्यातत्त्वबोधादेर्निर्वेदो निष्फलत्वधीः ।
तत्र चिन्ताश्रुनिश्वासा दीनता सम्भवन्ति हि ॥ १०१ ॥
ग्लानिर्बलस्यापचयो वैवर्ण्यारतिकारकः ।
अनिष्टाभ्यागमोत्प्रेक्षा शङ्कारोषादिकारणम् ॥ १०२ ॥
परोत्कर्षासहिष्णुत्वमसूया परिकीर्त्तिता ।
मदिरादिकृतो मोहहर्षव्यतिकरो मदः ॥ १०३ ॥
श्रमः खेदोऽध्वरत्यादेर्जातस्वेदातिभूमिकृत् ।
मन्दोद्यमत्वमालस्यं कर्तव्येषु प्रकीर्त्तितम् ॥ १०४ ॥
सत्वत्यागादनौद्धत्यं दैन्यं कार्पण्यसंभवम् ।
इष्टानभिगमाद् ध्यानं चिन्ता शून्यत्वतापकृत् ॥ १०५ ॥
मोहस्तु मोहनं भीतिचिन्तादुःखानुचिन्तनैः ।
1) पूर्वानुभूतविषयचिन्ता स्मृतिरुदाहृता ॥ १०६ ॥
धृतिश्चित्तस्य नैस्पृह्यं ज्ञानाभीष्टागमादिभिः ।
चेतस्सङ्कोचनं व्रीडानङ्गरागस्तवादिभिः ॥ १०७ ॥
चपलं त्वनवस्थानं रागद्वेषादिसंभवम् ।
प्रसक्तिरुत्सवादिभ्यो हर्षस्वेदादिकम्पकृत् ॥ १०८ ॥
इष्टानिष्टागमाज्जात आवेगश्चित्तविभ्रमः ।
जाड्यमप्रतिपत्तिः स्यादिष्टानिष्टागमोद्भवम् ॥ १०९ ॥

1) प्रलयस्सुखदुःखाद्यैर्बाध.

1) पूर्वानुभूतविषयज्ञानं.

अन्यधिकरणादात्मोत्कर्षो गर्वो [1] बलोदितः ।
विषादश्चेतसो भङ्गउपायाभावचिन्तनैः ॥ ११० ॥
कालाक्षमत्वमौत्सुक्यं मनस्तापत्वरादिकृत् ।
इन्द्रियव्याप्तिराहित्यं निद्रा चित्तनिमीलनम् ॥ १११ ॥
आवेगो मोहदुःखाद्यैरपस्मारोऽङ्गतापकृत् ।
सुप्तिर्निद्रासमुद्रेको मनोवृत्तिविवर्जितः ॥ ११२ ॥
विबोधश्चेतनाव्याप्तिजृम्भाक्षेपविमार्गकृत् ।
अमर्षस्सापराधेषु चेतः प्रज्वलनं मतम् ॥ ११३ ॥
हर्षाद्याकारसंगुप्तिरवहित्थेति कथ्यते ।
दृष्टेऽपराधे चण्डत्वमुग्रता तर्जनादिकृत् ॥ ११४ ॥
तत्वमार्गादिसंधानादर्थनिर्धारणं मतम् ।
मनस्तापाद्यभिभवो ज्वरादिर्व्याधिरिष्यते ॥ ११५ ॥
उन्मादस्समवृत्तित्वं [2] चेतनाचेतनेष्वपि ।
मरणं मरणार्थस्तु प्रयत्नः परिकीर्त्तितः ॥ ११६ ॥
आकस्मिकभयाच्चित्तक्षोभस्त्रासः प्रकीर्त्तितः ।
सन्देहात्कल्पनानन्त्यं वितर्कः परिकीर्त्तितः ॥ ११७ ॥
विभावाद्याः पृथग्भावाः कीर्त्यन्तेऽथ रसाश्रयाः ।
आलम्बनस्तु शृङ्गारे नायिकानायकादयः ॥ ११८ ॥
उद्दीपनास्तु कथिताश्चन्द्रिकोपवनादयः ।
अनुभावाः प्रकीर्त्यन्ते कटाक्षक्षेपणादयः ॥ ११९ ॥
स्तम्भादयस्सात्त्विकाः स्युर्दर्शनस्पर्शनादयः ।
निर्वेदाद्या यथायोगं योग्यास्संचारिणोऽपि च ॥ १२० ॥
संभोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः ।
संभोगस्सन्निकर्षे स्याद्भाषणाद्यैः परस्परम् ॥ १२१ ॥
विप्रलम्भोऽभिलाषेर्ष्याप्रवासाद्यैरनेकधा ।
तेष्वभ्यासंसंभूता विद्यन्तेऽत्र दशा दश ॥ १२२ ॥
चक्षुःप्रीतिर्मनस्सङ्गस्सङ्कल्पो जागरस्तथा ।
तनुता विषयद्वेषस्त्रपानाशस्ततः परम् ॥ १२३ ॥
मोहो मूर्छा मृतिरिति विज्ञेयास्ता यथाक्रमम् ।
आदराद्वीक्षणं यत्तु चक्षुःप्रीतिरुदाहृता ॥ १२४ ॥
चित्तासक्तिर्मनस्सङ्गः प्रतिकृत्यादिभिस्स्मृतः ।
मनोरथैः प्रियावाप्तिस्सङ्कल्पस्समुदीरितः ॥ १२५ ॥
प्रियानवाप्तिचिन्ताभिरस्वापो जागरो मतः ।
कृशता तु तनोः कामज्वरेण तनुता मता ॥ १२६ ॥

अर्थान्तरासहिष्णुत्वं विषयद्वेषणं मतम् ।
मानत्यागस्त्रपानाशो गौरवागणनान्मतः ॥ १२७ ॥
उन्मादश्चित्तवैकल्यान्मोह इत्युच्यते बुधैः ।
मुहुरिन्द्रियवैकल्यान्मूर्छा ज्ञानक्षयो मतः ॥ १२८ ॥
क्षणान्तरप्राणहानिर्मूर्छालाभः स्मृतिर्मता ।
हास एव विभावाद्यैः पुष्टो हास्यत्वमागतः ॥ १२९ ॥
विदूषकादिरालम्बभावो हास्यरसे भवेत् ।
उद्दीपनविभावाः स्युस्तद्भाषाकारविक्रियाः ॥ १३० ॥
भावकाक्षिविकासाद्या अनुभावाः प्रकीर्त्तिताः ।
अश्रुवैवर्ण्यवैस्वर्यप्रमुखास्सात्त्विका मताः ॥ १३१ ॥
अत्र हर्षावहित्थादिभावास्सञ्चारिणो मताः ।
उत्तमादिविभेदेन त्रिधा हास्यरसो मतः ॥ १३२ ॥
[1] आद्यं विकासिगण्डं स्यादीषल्लक्ष्यरदं स्मितम् ।
मध्यमं स्याद्विहसितं तथापहसितं परम् ॥ १३३ ॥
मृदुस्वनं स्यात्प्रथमं शिरः कम्पस्त्वतः परम् ।
अधमं चापहसितं तथातिहसितं मतम् ॥ १३४ ॥
शिरःकम्पाश्रुमत्पूर्वं विक्षिप्ताङ्गं द्वितीयकम् ।
शोक एव विभावाद्यैः पुष्टः करुणतां गतः ॥ १३५ ॥
इष्टनाशादनिष्टाप्तेः करुणोऽपि द्विधा मतः ।
उद्दीपनविभावास्स्युरुस्स्वजनाक्रन्दनादयः ॥ १३६ ॥
अनुभावास्तु निश्वासविलापरुदितादयः ।
स्तम्भाश्रुपातवैस्वर्यप्रमुखास्सात्त्विकाः स्फुटाः ॥ १३७ ॥
अत्रापस्मारदीनत्वमरणालस्यसंभ्रमाः ।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥ १३८ ॥
क्रोध एव विभावाद्यैः पुष्टो रौद्रत्वमाप्नुयात् ।
मात्सर्यादपि च द्वेषाद्रौद्रोऽपि द्विविधो मतः ॥ १३९ ॥
आलम्बनविभावौ द्वौ मात्सर्यद्वेषगोचरौ ।
उद्दीपनविभावास्स्युस्तद्भाषाचेष्टितादयः ॥ १४० ॥
अनुरागभ्रुकुट्यक्षिरागोष्ठस्पन्दनादयः ।
स्वेदवैवर्ण्यवैस्वर्यप्रमुखा[2] स्सात्विकादयः ॥ १४१ ॥
ईर्ष्यामर्षोग्रतागर्वमादाद्या व्यभिचारिणः ।
उत्साहस्तु विभावाद्यैः पुष्टो वीररसो भवेत् ॥ १४२ ॥
दानवीरो दयावीरो युद्धवीरइति त्रिधा ।
आद्ये सत्पात्रमालम्बो द्वितीये दीन उच्यते ॥ १४३ ॥

---

[1] बलादिजः [2] चेतनाचेतनेष्वपि.

[1] आस्यं. [2] सात्त्विका मताः

वैरी तृतीये विज्ञेयस्तत्र तूद्दीपनं क्रमात् ।
दानस्तुतिर्दीनवाक्यरणभेरीस्वनादयः ॥ १४४ ॥
अनुभावाः क्रमाद्दित्सा प्रसादबहुलाग्रहाः ।
अत्र ज्ञेया यथायोग्यं सात्त्विकाः पुलकादयः ॥ १४५ ॥
सञ्चारिणो गर्वहर्षामर्षधृत्यादयोऽपि च ।
भयमेव विभावाद्यैर्भयानकरसो भवेत् ॥ १४६ ॥
आलम्बनविभावाः स्युश्शत्रुव्याघ्रोरगादयः ।
उद्दीपनविभावास्स्युस्तत्र तद्गर्जनादयः ॥ १४७ ॥
अनुभावास्तु वैवर्ण्यकम्पस्वेदादयो मताः ।
तथैव सात्त्विका भावास्तत्राष्टौ स्पष्टलक्षणाः ॥ १४८ ॥
सञ्चारिणो मोहदैन्यत्रासंभ्रमणादयः ।
जुगुप्सैव विभावाद्यैर्याता बीभत्सतां द्विधा ॥ १४९ ॥
जुगुप्स्यदर्शनादेको वैराग्यादपरो भवेत् ।
आलम्बनविभावास्स्युरहृद्या ये जुगुप्सिताः ॥ १५० ॥
उद्दीपनविभावास्तु पूतिगन्धादयो मताः ।
अत्रानुभावना सा स्यात्कूणनावेगपूर्विका ॥ १५१ ॥
ऊह्यास्तत्र यथायोगं सात्त्विकाः पुलकादयः ।
सञ्चारिणो यथायोगं निर्वेदोद्वेजनादयः ॥ १५२ ॥
विस्मयस्तु विभावाद्यैः पुष्टः स्यादद्भुतो रसः ।
अलौकिकचमत्कारि वस्त्वालम्बनमिष्यते ॥ १५३ ॥
अनुभावा नेत्रवक्त्रगण्डविस्फुरणादयः ।
सात्त्विकाः स्वेदरोमाञ्चप्रमुखाः परिकीर्त्तिताः ॥ १५४ ॥
हर्षवेगादयो भावाश्चात्र सञ्चारिणो मताः ।
शम एव विभावाद्यैः पुष्टश्शान्तरसो भवेत् ॥ १५५ ॥
आलम्बनविभावः स्याच्छम्भोस्तच्छाश्वतं पदम् ।
उद्दीपनास्तु वेदान्तवाक्यसंश्रवणादयः ॥ १५६ ॥
अनुभावास्तु कथ्यन्ते समतादर्शनादयः ।
सात्त्विकास्स्तम्भरोमाञ्चप्रमुखाः परिकीर्त्तिताः ॥ १५७ ॥
सञ्चारिणोऽपि निर्वेदमतिधृत्यादयो मताः ।
शृङ्गार उत्पलाभः स्याद्विष्णुस्तस्याधिदेवता ॥ १५८ ॥
हास्यस्सुधांशुभ्रवर्णो हरस्योऽस्याधिदेवता ।
कपोतवर्णः करुणो यमस्तस्याधिदेवता ॥ १५९ ॥
रौद्रो जपारक्तवर्णो रुद्रस्तस्याधिदेवता ।
वीरो रसो गौरवर्णश्शक्रस्तस्याधिदेवता ॥ १६० ॥
धूम्रो भयानकस्तस्य महाकालोऽधिदेवता ।
बीभत्सो नीलमेघाभो नन्दी तस्याधिदेवता ॥ १६१ ॥
अद्भुतः कनकच्छायो ब्रह्मा तस्याधिदेवता ।
शान्तः स्फटिकवर्णः स्याच्छम्भुस्तस्याधिदेवता ॥ १६२ ॥
हास्यश्शृङ्गारसंभूतः करुणो रौद्रसंभवः ।
वीरादद्भुत उत्पन्नो बीभत्सोत्थो भयानकः ॥ १६३ ॥
शृङ्गारबीभत्सरसौ तथा वीरभयानकौ ।
रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ॥ १६४ ॥
शान्तस्सर्वरसोत्कृष्टस्तस्य सर्वविरोधिता ।
इत्थं रसानां प्रत्येकं विभावादय ईरिताः ॥ १६५ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादान विन्दुकारण चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद श्रीमत्केलदीबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातत्त्वसारभूते श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले साहित्यशास्त्रे काव्यलक्षणादि रसान्तवर्णनं नाम तृतीयस्तरङ्गः

अथ चतुर्थस्तरंगः

एवं वर्णगणच्छन्दः काव्यशब्दार्थ तद्रसाः ।
क्रमशो भगवन्! प्रोक्तास्सञ्जाता हृदयंगमाः ॥ १ ॥
अधुना भगवन्! ब्रूहि नेतृभेदांश्च तद्गुणान् ।
नायिकानां विभेदांश्च गुणानपि तदाश्रितान् ॥ २ ॥
रीतिं वृत्तिं च काव्यस्य गुणान् दोषानपि क्रमात् ।
कुमार! भवतः प्रश्नस्तनोति मुदितं मनः ॥ ३ ॥
यस्य श्रवणमिष्टं ते तद्ब्रवीमि पुनः शृणु ।
कुलीनो धार्मिकश्शूरः कृतज्ञो रूपवान् युवा ॥ ४ ॥
1) तेजस्वी स्थैर्यगाम्भीर्यदाक्षिण्यौदार्यसंश्रयः ।
प्राज्ञस्त्यागी महाभोगी नायकः परिकीर्त्तितः ॥ ५ ॥
एवंविधगुणोपेतो नायकस्स चतुर्विधः ।
द्वौ धीरोदात्तललितौ धीरशान्तोद्धतावपि ॥ ६ ॥
क्षमावानतिगम्भीरो महासत्वोऽविकत्थनः ।
कृपालुरनहङ्कारी धीरोदात्तः प्रकीर्त्तितः ॥ ७ ॥
सचिवायत्तसिद्धिः स्यान्निश्चिन्तो भोगतत्परः ।
सुखी मृदुः कलासक्तस्स धीरललितो मतः ॥ ८ ॥
शुचिर्विवेकी सुभगस्सुप्रसन्नो मृदुस्सुखी ।
द्विजाधिको धीरशान्तो विलासी रसिको मतः ॥ ९ ॥
मायामात्सर्यवान् धृष्टश्चण्डश्चपलमानसः ।
विकत्थनो वञ्चकोऽहंकारी धीरोद्धतो मतः ॥ १० ॥
नायकत्वमवस्थाभिरेषां सर्वरसेष्वपि ।
प्रत्येकमेषां शृङ्गारेऽवस्थाभिश्चतुरात्मता ॥ ११ ॥
दक्षिणश्च शठो धृष्टोऽनुकूलश्चेति भेदतः ।
एकस्यां सक्तचित्तोऽपि कान्तास्वन्यासु यस्समः ॥ १२ ॥
वर्तते गूढरागस्सन् प्रोक्तोऽसौ दक्षिणो बुधैः ।
गूढविप्रियकारीतु शठ इत्यभिधीयते ॥ १३ ॥
व्यक्तान्यासङ्गचिह्नस्याद् धृष्टो वितथवाङ् मतः ।
अनुकूलस्त्वेकरसोऽ2) नन्यासक्तमना मतः ॥ १४ ॥
इत्युदात्तादिनेतृणां भेदाष्षोडश कीर्त्तिताः ।
श्रेष्ठमध्याधमत्वेन तेषामेव त्रिरूपता ॥ १५ ॥

1) तेजस्व्यैश्वर्यगाम्भीर्य. 2) अन्यासंसक्तधीर्यतः

उक्तसर्वगुणोपेतश्श्रेष्ठ इत्यभिधीयते ।
द्वित्रैर्वा पञ्चषैर्वापि गुणैर्हीनस्स मध्यमः ॥ १६ ॥
हीनो गुणैश्च बहुभिरधमः परिकीर्त्तितः ।
एतेषां कामसचिवाः पीठमर्दो विटस्तथा ॥ १७ ॥
विदूषकश्चेट इति चत्वारः परिकीर्त्तिताः ।
पीठमध्यास्य सुरतप्रयोक्ता नायकादिषु ॥ १८ ॥
1) पीठमर्दस्स विज्ञेयः कुपितस्त्रीप्रसादकः ।
एकविद्यो विटस्तत्र कामतन्त्रेषु बुद्धिमान् ॥ १९ ॥
कामशास्त्ररहस्यानामुपदेष्टा विटस्स्मृतः ।
2) विकृताङ्गितया वेषैर्हास्यकारी विदूषकः ॥ २० ॥
विटस्सन्धानकुशलः कान्ताकामुकयो 3)स्तथा ।
यौवने सत्वजाः पुंसामष्टौ शोभादयो 4) मताः ॥ २१ ॥
शोभा विलासो माधुर्यं गाम्भीर्यं स्थैर्यतेजसी ।
ललितौदार्यमित्यष्टौ तेषां लक्ष्माभिधीयते ॥ २२ ॥
नीचे गुणाधिकैस्स्पर्धा शोभायां शौर्यदक्षते ।
गतिस्सधैर्या दृष्टिश्च विलासे सस्मितं वचः ॥ २३ ॥
स्वराविकारो माधुर्यं संक्षोभे सुमहत्यपि ।
गाम्भीर्यं यत्प्रभावेन विकारो नोपलक्ष्यते ॥ २४ ॥
व्यवसायादचलनं स्थैर्यं विघ्नशतेष्वपि ।
अधिक्षेपाद्यसहनं तेजः 5) प्राणान्तिकेष्वपि ॥ २५ ॥
शृङ्गाराकारचेष्टत्वं सहजं ललितं विदुः ।
प्रियोक्त्या जीवितस्यापि दानमौदार्यमिष्यते ॥ २६ ॥
स्वान्या साधारणी चेति तद्गुणा नायिका त्रिधा ।
स्वीया शीलार्जवयुता लज्जायुक्ता सती मता ॥ २७ ॥
अन्यान्योढा कन्यका च द्वितीया द्विविधा मता ।
साधारणी स्याद्गणिका कलाप्रागल्भ्यधैर्ययुक् ॥ २८ ॥
मुग्धा मध्या प्रगल्भेति त्रिविधास्ताः प्रकीर्त्तिताः ।
मुग्धा नववयःकान्ता सुरते 6) वाम्यकारिणी ॥ २९ ॥
मध्योदितवयःकामा मोहान्तसुरतक्षमा ।
अन्या रूढवयःकामा प्रगल्भा प्रियवक्षसि ॥ ३० ॥

1) पीठमर्दस्स विश्वास्यः. 2) विकृताङ्गवचोवेषैः.
3) स्सदा. 4) गुणाः 5) प्राणात्ययेष्वपि. 6) वाम्यकर्मणि.

विलीयमानेव रतारम्भेप्यस्ववशा मता ।
मध्या च त्रिविधा धीराधीरा धीरतरेति च ॥ ३१ ॥
धीरा सोत्प्रासवक्रोक्त्या सागसं भेदयेत्पतिम् ।
साश्रुसोत्प्रासवक्रोक्त्या धीराधीरा वदेत् [1] पतिम् ॥ ३२ ॥
साश्रुनिष्ठुरभाषाभिरधीरा भेदयेत् पतिम् ।
प्रगल्भापि त्रिधा धीरा धीराधीरेतरेति च ॥ ३३ ॥
सावहित्थादरोदास्ते सुरते विहितागसम् ।
प्रगल्भधीरा दयितं भेदयेत्कुपिता स्वयम् ॥ ३४ ॥
प्रगल्भधीराधीरा तु वक्रसोत्प्रासवाग्युता ।
अपि प्रगल्भा धीरा संतर्ज्य संताडयेत् पतिम् ॥ ३५ ॥
ज्येष्ठाकनिष्ठाभेदेन पुनर्मध्या तु षड्विधा ।
प्रगल्भापि पुनस्ताभ्यां भेदाभ्यां षड्विधा मता ॥ ३६ ॥
तासामष्टाववस्थास्स्युस्स्वाधीनपतिकादिकाः ।
स्वाधीनपतिका चाद्या तथा वासकसज्जिका ॥ ३७ ॥
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका ।
विरहोत्कण्ठिता चेति खण्डिता चाभिसारिका ॥ ३८ ॥
आसन्नो यत्र रमणः स्वाधीनपतिका तु सा ।
प्रियागमनवेलायां मण्डयन्ती मुहुर्मुहुः ॥ ३९ ॥
केलीगृहं तथात्मानं सा स्याद्वासकसज्जिका ।
विधूय दयितं चार्ता कलहान्तरिता मता ॥ ४० ॥
क्वचित्सङ्केतकं श्रुत्वा प्रेष्य दूतीं मुहुर्मुहुः ।
यां विप्रलभते प्रेयान् विप्रलब्धेति तां विदुः ॥ ४१ ॥
देशान्तरगते कान्ते खिन्ना प्रोषितभर्तृका ।
चिरयत्यधिकं कान्ते विरहोत्कण्ठिता मता ॥ ४२ ॥
ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता ।
याभिसारयते कान्तं स्वतस्साप्यभिसारिका ॥ ४३ ॥
यौवने सत्वजाः स्त्रीणामलङ्कारास्तु विंशतिः ।
भावो हावश्च हेला च त्रयोऽप्यङ्गसमुद्भवाः ॥ ४४ ॥
शोभा कान्तिस्तथा दीप्तिर्माधुर्यं च प्रगल्भता ।
औदार्यं धैर्यमित्येतास्सप्तालङ्कृतयो मताः ॥ ४५ ॥
लीलाविलासो विच्छित्तिर्विभ्रमं किलिकिञ्चितम् ।
मोट्टायितं कुट्टमितं बिब्बोको ललितं तथा ॥ ४६ ॥
विहृतं चेति विज्ञेयाः स्त्रीणां स्वाभाविका दश ।
निर्विकारो मनोवृत्तिर्विशेषस्सत्वमुच्यते ॥ ४७ ॥

तस्याथ विक्रियाभावो भाव्यलंकारकृन्मतः ।
भावो मानसश्रृङ्गारो हावोऽक्षिभ्रूवादि [1] वक्रता ॥ ४८ ॥
स एव हेलासुव्यक्तः श्रृङ्गारद्योतको भवेत् ।
रूपोपभोगतारुण्यैश्शोभाङ्गालंकृतिर्भवेत् ॥ ४९ ॥
शोभैव रागनिविडा कान्तिरित्यभिधीयते ।
कान्तेरेवद्दि विस्तारो दीप्तिरित्युच्यते बुधैः ॥ ५० ॥
अश्लाघ्यवस्तुयोगेऽपि माधुर्यं रम्यता श्रुता ।
व्रीडोत्थ [2] साहसत्यागः प्रागल्भ्यमिति गीयते ॥ ५१ ॥
औदार्यं प्रश्रयोत्कर्षो वह्वायासेऽपि सम्मतः ।
अचापल्यहता चित्तवृत्तिर्धैर्यं निरूप्यते ॥ ५२ ॥
प्रियानुकरणं लीलामधुरैरङ्गचेष्टितैः ।
प्रिये दृष्टे विलासोऽङ्गक्रियाद्यतिशयो भवेत् ॥ ५३ ॥
विच्छित्तिर्भूषणैरल्पैरङ्गानां तु प्रसाधनम् ।
विभ्रमस्त्वरया काले भूषास्थानविपर्ययः ॥ ५४ ॥
क्रोधाश्रुहर्षभीत्यादेस्सङ्करः किलिकिञ्चितम् ।
चित्रादावपि तत्त्वेन बुद्धिर्मोट्टायितं मतम् ॥ ५५ ॥
केशाधरादिग्रहणे मोदमानापि मानसे ।
दुःखितेव बहिः कुप्येद्यत्र कुट्टमितं मतम् ॥ ५६ ॥
गर्वाभिमानावेशेन बिब्बोकोऽनादरो मतः ।
सुकुमाराङ्गविन्यासो रुचिरो ललितं मतम् ॥ ५७ ॥
वक्तव्यमपि यन्नोक्तं व्रीडया विहृतं तु तत् ।
इत्यलंकृतयः प्रोक्ता नायकेष्वपि सन्ति हि ॥ ५८ ॥
रीतिरात्मात्र काव्यस्य कथिता सा तु षड्विधा ।
वैदर्भी चाथ पाञ्चाली गौडीयाऽवन्तिका तथा ॥ ५९ ॥
लाटीया मागधी चेति रीतिष्षोढा निगद्यते ।
श्लेषः प्रसादस्समता माधुर्यं सुकुमारता ॥ ६० ॥
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ।
अल्पप्राणाक्षरैश्श्लेषः पदैरशिथिलैर्मतः ॥ ६१ ॥
पदैः प्रसन्नो यत्रार्थः प्रसादोऽसौ निगद्यते ।
प्रक्रान्तबन्धो यत्र स्यात्समन्तात् समता मता ॥ ६२ ॥
सरसौ यत्र शब्दार्थौ माधुर्यं श्रुतिमोदकृत् ।
अनिष्ठुरैश्श्रुतिसुखैर्वर्णैस्स्यात् सुकुमारता ॥ ६३ ॥
अर्थव्यक्तिरनेयार्थः साक्षाद् यत्राभिधीयते ।
शब्दार्थयोर्गुणोत्कर्षो यत्र सा स्यादुदारता ॥ ६४ ॥

1) प्रियम्.

1) भ्रूवादि विक्रिया. 2) साध्वसत्यागः

वाक्ये समासबाहुल्यं ह्ययमोजो निगद्यते ।
कमनीयोऽलौकिकोऽपि यत्रार्थः कान्तिरुच्यते ॥ ६५ ॥
समाधिरन्यधर्माणामध्यासादर्थगौरवम् ।
एतैस्समग्रा वैदर्भी वर्ण्यते दशभिर्गुणैः ॥ ६६ ॥
असमस्ता द्वित्रिपदसमस्ता वा मनोहरा ।
अल्पप्राणाक्षरप्रायपदबन्धसमन्विता ॥ ६७ ॥
समस्तात्युद्भटपदामोजःकान्तिसमन्विताम् ।
महाप्राणाक्षरवतीं गौडीं प्राहुर्विचक्षणाः ॥ ६८ ॥
माधुर्यसौकुमार्यौजःकान्तिभिस्सहिता गुणैः ।
समस्तपञ्चषपदा पाञ्चाली परिकीर्त्तिता ॥ ६९ ॥
समस्तरीतिसंमिश्रा लाटी मृदुसमासिनी ।
प्रयुक्तवर्णभूयिष्ठा स्वल्पघोषाक्षरैर्युता ॥ ७० ॥
अन्तराले तु वैदर्भीपाञ्चाल्योर्या वतिष्ठते ।
सावन्तिका समस्तैस्स्याद् द्वित्रित्रिचतुरैः पदैः ॥ ७१ ॥
लाटीरीतेः प्रतिद्वन्द्वरीतिर्युक्ता तु मागधी ।
शृङ्गारहास्यकरुणशान्तमाधुर्यशालिनः ॥ ७२ ॥
वीररौद्राद्भुतभयबीभत्सेष्वोज उच्यते ।
रसेष्वेतेषु सर्वेषु प्रसादः परिकीर्त्तितः ॥ ७३ ॥
विकासे चाथ संक्षेपे या शब्दानां परस्परम् ।
चेतसो वर्तयित्री च सा वृत्तिरथ षड्विधा ॥ ७४ ॥
कैशिक्यारभटी चैव सात्वती भारती तथा ।
मध्यमारभटी चैव तथा मध्यमकैशिकी ॥ ७५ ॥
अत्यन्तसुकुमारार्थसन्दर्भा कैशिकी मता ।
अतिप्रौढार्थसन्दर्भा वृत्तिरारभटी मता ॥ ७६ ॥
ईषत्प्रौढार्थसन्दर्भा सात्वती वृत्तिरिष्यते ।
ईषन्मृद्वर्थसन्दर्भा भारती वृत्तिरिष्यते ॥ ७७ ॥
अत्यन्तसुकुमारौ द्वौ शृङ्गारकरुणौ मतौ ।
अत्युद्धतरसौ रौद्रबीभत्सौ परिकीर्त्तितौ ॥ ७८ ॥
ईषत्प्रौढौ समाख्यातौ रसौ वीरभयानकौ ।
हास्यशान्ताद्भुताः किञ्चित् सुकुमाराः प्रकीर्त्तिताः ॥ ७९ ॥
मध्यमारभटी त्वन्या तथा मध्यमकैशिकी ।
वृत्ती इमे उभे [1] सर्वरससाधारणे मते ॥ ८० ॥
मृद्वर्थेऽप्यनतिप्रौढबन्धा मध्यमकैशिकी ।
मध्यमारभटी प्रौढेऽप्यर्थेनातिमृदुक्रमा ॥ ८१ ॥

[1] तीव्ररससाधारणे.

या पदानां परान्योन्यमैत्री शय्येति कथ्यते ।
अर्थगम्भीरिमा पाकस्स द्विधा हृदयङ्गमः ॥ ८२ ॥
द्राक्षापाको नारिकेलपाकश्च प्रस्फुटान्तरौ ।
द्राक्षापाकस्तु कथितो बहिरन्तस्स्फुरद्रसः ॥ ८३ ॥
स नारिकेलपाकस्स्यादन्तर्गूढरसोदयः ।
अथ दोषाः प्रकीर्त्यन्ते पदानां प्रथमं क्रमात् ॥ ८४ ॥
श्रुतिकट्वसमर्थं च च्युतसंस्कृत्यवाचकम् ।
निरर्थकं चाप्रयुक्तमश्लीलं ग्राम्यमेवच ॥ ८५ ॥
नेयार्थानुचितार्थौ च सन्दिग्धं क्लिष्टमेव च ।
अविमृष्टविधेयांशं विरुद्धमतिकृत्तथा ॥ ८६ ॥
[1] अप्रतीतमथैतेषां क्रमाल्लक्षणमुच्यते ।
परुषाक्षरविन्यासं श्रुतिकट्विति कीर्त्यते ॥ ८७ ॥
असमर्थमभिप्रेतं यद्वक्तुं न क्षमं भवेत् ।
शास्त्रोक्तलक्षणापेतं च्युतसंस्कृति कथ्यते ॥ ८८ ॥
अवाचकं न यत्रार्थे प्रयुक्तं वक्ति तन्मतम् ।
निरर्थकं भवेत्पादपूरणैकप्रयोजनम् ॥ ८९ ॥
आम्नातमप्यप्रयुक्तं कविभिर्नादृतं तु यत् ।
येनासभ्यः पदेनार्थो द्योत्यतेऽश्लीलमीरितम् ॥ ९० ॥
ग्रामीणयोग्यं ग्राम्यं स्यान्निन्द्यं नागरिकादिभिः ।
नेयार्थं यदसंबाधान्मूलार्थाद्योतकं भवेत् ॥ ९१ ॥
तदेवानुचितार्थं स्याद्यस्सार्थोऽनुचितो भवेत् ।
विवक्षितार्थादन्यच्च संदिग्धं द्योतयेच्च तत् ॥ ९२ ॥
[2] क्लिष्टं व्यवहितार्थस्य द्योतकं [3] यत्परं भवेत् ।
अविमृष्टविधेयांशं प्रधानं यत्र भासते ॥ ९३ ॥
इष्टान्यदुष्टधीकारी विरुद्धमतिकृद्भवेत् ।
शास्त्रमात्रप्रयुक्तं यदप्रतीतं निगद्यते ॥ ९४ ॥
दोषान्पदैकदेशेषु यथायोग्यं विलोकयेत् ।
शब्दहीनं क्रमाद् भ्रष्टं विसन्धि पुनरुक्तिमत् ॥ ९५ ॥
व्याकीर्णं वाक्यसङ्कीर्णं [4]मपूर्णं वाक्यगर्भितम् ।
द्वे भिन्नलिङ्गवचने द्वे च न्यूनाधिकोपमे ॥ ९६ ॥
भग्नच्छन्दो यतिभ्रष्टमशरीरमरीतिमत् ।
विसर्गलुप्तमस्थानसमासं वाच्यवर्जितम् ॥ ९७ ॥
समाप्तपुनरात्तं च तथा संबन्धवर्जितम् ।
पतत्प्रकर्षमधिकपदं प्रक्रमभङ्गवत् ॥ ९८ ॥

[1] प्रतिषिद्ध. [2] क्लिष्ट. [3] यत्पदं. [4] सपदं.

पञ्चविंशतिरुच्यन्ते दोषा वाकयसमाश्रिताः ।
शब्दशास्त्रविरुद्धं यच्छब्दहीनं प्रकीर्त्तितम् ॥ ९९ ॥

क्रमभ्रष्टं भवेदर्थश्शब्दो वा यत्र विक्रमः ।
विसन्धिर्तो विरूपो वा यत्र सन्धिर्विसन्धि तत् ॥ १०० ॥

शब्दार्थयोः पौनरुक्तये तद्वाक्यं पुनरुक्तिमत् ।
व्याकीर्णं तद्विभक्तीनां व्याकीर्णे च मिथोन्वये ॥ १०१ ॥

वाक्यान्तरपदैः कीर्णं वाक्यसङ्कीर्णमुच्यते ।
अपूर्णं तद्भवेद्यत्र न सम्पूर्णः क्रियान्वयः ॥ १०२ ॥

तद्वाक्यगर्भितं यस्य मध्ये वाक्यान्तरं भवेत् ।
यत्रोपमा भवेद्भिन्नवचना भिन्नलिङ्गका ॥ १०३ ॥

तद्भिन्नवचनं भिन्नलिङ्गं चाहुर्मनीषिणः ।
यत्रोपमानमधिकं न्यूनं वा स्याद्विशेषणैः ॥ १०४ ॥

तत्राधिकोपमं पूर्वं न्यूनोपममतः परम् ।
छन्दोभङ्गं यत्र वाक्यं तद् भग्नछन्द उच्यते ॥ १०५ ॥

यतिस्थाने यतिभ्रंशे तद्यतिभ्रष्टमुच्यते ।
क्रियापदेन रहितमशरीरं तदुच्यते ॥ १०६ ॥

रसाननुगुणा रीतिर्यत्रारीति तदुच्यते ।
ओत्वं लोपो विसर्गस्य स्यात्तल्लुप्तविसर्गकम् ॥ १०७ ॥

अपदस्थसमासं तत्समासो यत्र नोचितः ।
नोक्तं स्याद्यत्र वक्तव्यं तदाहुर्वाच्यवर्जितम् ॥ १०८ ॥

समाप्य पुनरादाने समाप्तपुनरात्तकम् ।
पतत्प्रकर्षमित्याहुः प्रकर्षो यत्र विश्लथः ॥ १०९ ॥

संवन्धवर्जितं तत् स्याद्यत्रेष्टेनान्वयो हतः ।
यत्राधिकपदोक्तिः स्यात्तच्चाधिकपदं मतम् ॥ ११० ॥

प्रक्रान्तनियमत्यागे भग्नप्रक्रममुच्यते ।
अपार्थं व्यर्थमेवार्थं ससंशयमपक्रमम् ॥ १११ ॥

भिन्नं चैवातिमात्रं च परुषं विरसं तथा ।
हीनाधिकोपमे स्यातामसदृक्षोपमं ततः ॥ ११२ ॥

अप्रसिद्धोपमं हेतुशून्यं च निरलंकृति ।
अश्लीलं च विरुद्धं च तथा सहचरच्युतम् ॥ ११३ ॥

एवमष्टादश प्रोक्ता दोषा अर्थसमाश्रयाः ।
समुदायार्थशून्यं तदपार्थं परिकीर्त्तितम् ॥ ११४ ॥

यत्प्रयोजनशून्यं स्यात्तद् व्यर्थं परिकीर्त्तितम् ।
उक्ताभिन्नार्थकं यत्स्यादेकार्थं तन्निगद्यते ॥ ११५ ॥

यत्र चार्थस्य सन्देहस्तत्सन्दिग्धार्थमुच्यते
यत्र पूर्वापरीभावव्यत्ययस्तदपक्रमम् ॥ ११६ ॥

संवन्धवर्जितं यत्स्यात्तदभिन्नं प्रकीर्त्तितम् ।
यत्सर्वलोकातीतं तदतिमात्रं प्रकीर्त्तितम् ॥ ११७ ॥

अतिक्रूरार्थसहितं परुषं परिकीर्त्तितम् ।
अप्रस्तुतरसं यच्च विरसं तत्प्रकीर्त्तितम् ॥ ११८ ॥

हीनं त्वयोपमानं स्यात्तद्धीनोपममीरितम् ।
यत्रोपमानमधिकं तद्भवेदधिकोपमम् ॥ ११९ ॥

यदतुल्योपमानं तद् भवेदसदृशोपमम् ।
अप्रसिद्धोपमानं [1] यत्तदसिद्धोपमं मतम् ॥ १२० ॥

अलङ्कारण रहितं निरलङ्कारमुच्यते ।
अश्लीलार्थस्य कथनमश्लीलं परिकीर्त्तितम ॥ १२१ ॥

विरुद्धं देशकालाभ्यां तद्विरुद्धमितीरितम् ।
मतं सहचरभ्रष्टमकुल्यानां निवन्धनम ॥ १२२ ॥

इति दोषास्समुद्दिष्टाः पदवाकयार्थगोचराः ।
उदाहरणकाव्येषु न दुष्टं श्रुतिकट्वपि ॥ १२३ ॥

प्रहेलिकाद्व्यर्थवन्धैकाक्षरद्व्यक्षरादिषु ।
क्लिष्टासमर्थनेयार्थावाचकाद्या न दूषिताः ॥ १२४ ॥

निरर्थकमदुष्टं स्याद्वाक्ये छान्दसभाषिते ।
व्रीडाश्लीलमपि ग्राह्यं कामतन्त्रे न दूषितम् ॥ १२५ ॥

जुगुप्साश्लीलमप्यत्र विरक्तोक्तौ न दूषणम् ।
सन्दिग्धमप्रतीतं च वक्तृभेदेन दूषितम् ॥ १२६ ॥

विषादे विस्मये हर्षे कोपे दैन्येऽवधारणे ।
प्रसादनेऽनुकम्पायां द्वित्रिरुक्तं न दूष्यते ॥ १२७ ॥

आभासो रसभावानां स्वशब्दग्रहणं ततः ।
श्लिष्टकल्पनमव्याप्तिरनुभावविभावयोः ॥ १२८ ॥

प्रतिकूलविभावादिग्रहोऽङ्गस्याति [2] विस्तृतिः ।
अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः ॥ १२९ ॥

अनङ्गस्याभिधानं च रसे दोषास्स्युरीदृशाः ।
इति साहित्यविषयाः केचिदर्थाः प्रकीर्त्तिताः ॥ १३० ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारण चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद श्रीमत्केलदीवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातत्त्वसारभूते श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले साहित्यशास्त्रे नायकनायिकागुणरीतिवृत्तिशय्यागुणदोषनिरूपणं नाम चतुर्थस्तरङ्गः

[1] यदप्रसिद्धोपमं. [2] विस्मृतिः

अथ पञ्चमस्तरंगः

स्वामिन्! साहित्यशास्त्रोक्तान् पदार्थान् प्रतिपादितान्।
श्रुत्वाभवं प्रमुदितश्श्रोत्रानन्दविधायिनः ॥ १ ॥
अथान्यच्छ्रोतुमिच्छामि श्रीमत्संसूचितं पुरा।
अलङ्काराभिधं शास्त्रं विचित्रार्थसमाश्रितम् ॥ २ ॥
पुत्र! यद्भवता पृष्टमिष्टं साहित्यकांक्षिभिः।
तद्वर्णयामि भवतं समाकर्णय सम्प्रति ॥ ३ ॥
काव्यं ध्वनिर्गुणीभूतव्यंगयं चित्रमिति त्रिधा।
वाधाभिधाविनाभावानपेक्षाप्रतिपत्तिमान् ॥ ४ ॥
इन्द्रियाविषयो योऽर्थो ध्वनिरित्यभिधीयते।
अविवक्षाविवक्षाभ्यां पदवाक्याश्रयादपि ॥ ५ ॥
स चानेकविधः प्रोक्तो लक्षणाशक्तिमूलकः।
व्यंगयं यत्रच वाच्यार्थानतिशायि प्रतीयते ॥ ६ ॥
तदेवहिगुणीभूतव्यंगय मित्यभिधीयते।
व्यंगयाप्रतीतावधमं चित्रकाव्यमितीर्यते ॥ ७ ॥
तच्चित्रं द्विविधं प्रोक्तं शब्दार्थाश्रयभेदतः।
उपकुर्वन्ति सततं येऽङ्गद्वारेण संश्रिताः ॥ ८ ॥
हारादिवदलङ्कारास्तेऽनुप्रसोपमादयः।
भवेदव्यवधानेन द्वयोर्व्यञ्जनयुग्मयोः ॥ ९ ॥
आवृत्तिर्यत्र संवन्धे छेकानुप्रास इष्यते।
एकद्विप्रभृतीनां तु व्यञ्जनानां यदा भवेत् ॥ १० ॥
पुनरुक्तिरसौ नाम्ना वृत्त्यनुप्रास इष्यते।
यमकं पौनरुक्त्ये तु स्वरव्यञ्जनयुग्मयोः ॥ ११ ॥
आदिमध्यान्तमध्याद्या मध्यादाद्यन्तसर्वशः।
यत्रार्थः प्रमुखैः किञ्चिद् भासते पुनरुक्तवत् ॥ १२ ॥
पुनरुक्तवदाभासस्सोलङ्कारस्सतां मतः।
शब्दार्थयोः पौनरुक्त्यं यत्र तात्पर्यभेदतः ॥ १३ ॥
स काव्यतात्पर्यविदां लाटानुप्रास इष्यते।
पद्याद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ॥ १४ ॥
चित्रभेदा इमे चित्रं पद्मं काकपदं यथा।
गोमूत्रं सर्वतोभद्रं गतप्रत्यागतं वहु ॥ १५ ॥
वर्धमानाक्षरं तद्वत् क्षीयमाणाक्षरं ततः।
शृङ्खला नागपाशं च विचित्रं शुद्धमेव च ॥ १६ ॥
प्रहेलिका तथा हृद्यं पदपादार्थगूढकम्।
स्तुतिं निन्दा तथा द्व्यर्थं सह्यापह्नुतिविन्दुमत् ॥ १७ ॥
क्रियाकारकसम्वन्धगुप्तान्यामन्त्रितस्य च।
गुप्तं तथा समासस्य लिङ्गसुव्वचनस्य च ॥ १८ ॥
मात्राविन्दुविसर्गाणां च्युतकान्यक्षरस्य च।
स्थानव्यञ्जनयोश्चापि च्युतदत्ताक्षरं तथा ॥ १९ ॥
एवमादीनि चित्राणि सन्त्यन्यान्यपि भूरिशः।
चत्वार्यराणि पादाभ्यां नेमिं पादद्वयेन च ॥ २० ॥
लिखितं दक्षिणावर्तं चक्रप्रभ्रमवह्नि तत्।
वर्णद्वयद्वयैकैकदलभूतदशाष्टकम् ॥ २१ ॥
सर्वोत्तराद्यवर्णेन पद्मं स्यात्कृतकर्णिकम्।
काकस्येव पदं [1] व्यस्तं यत्तत्काकपदं मतम् ॥ २२ ॥
तिर्यगन्योन्यरेखाभिर्गोमूत्रे द्विपदी द्वयोः।
वर्णैनैकेन च द्वाभ्यां सर्वैर्वा सर्वदिग्गतैः ॥ २३ ॥
उत्तरैस्सर्वतोभद्रं दुष्करं तदिदं भवेत्।
प्रतिलोमानुलोमाभ्यामुत्तरेण गतागतम् ॥ २४ ॥
मध्यवर्णविलोपेन तच्चानेकप्रकारकम्।
आदौ मध्ये तथा चान्ते वर्धन्ते वर्णजातयः ॥ २५ ॥
एकद्वित्र्यादयो यत्र वर्धमानाक्षरं हि तत्।
अन्योन्याक्षरवर्तिन्या चैकान्तरितयाथ वा ॥ २६ ॥
शृङ्खलावन्ध इत्युक्तो ग्रन्थिमान्नागपाशकः।
क्रियादिकं स्थितं यत्र पदसन्धानकौशलात् ॥ २७ ॥
स्फुटं न लक्ष्यते यत्र क्रियागुप्तादिकं तु तत्।
अन्योऽप्यर्थस्फुटो यत्र मात्रादिच्युतकेष्वपि ॥ २८ ॥
प्रतीयते विदुस्तद्ज्ञास्तन्मात्राच्युतकादिकम्।
शब्दालंकृतयः काश्चिदुक्ता ऊह्यास्तथापराः ॥ २९ ॥
अथार्थनिष्ठालङ्कारः कीर्त्यन्ते क्रमशो मया।
उपमानन्वयस्तद्वदुपमेयोपमा स्मृतिः ॥ ३० ॥
रूपकं परिणामश्च सन्देहो भ्रान्त्यपह्नुती।
उल्लेखश्च तथोत्प्रेक्षातिशयोक्तिसहोक्तयः ॥ ३१ ॥

1) त्र्यश्रं.

विनोक्तिश्च समासोक्तिरुक्तिर्वक्रस्वभावयोः ।
व्याजोक्तिर्मीलनं चैव सामान्यं तद्गुणस्तथा ॥ ३२ ॥

अतद्गुणो विरोधश्चाप्यधिकं च विभावना ।
विशेषोक्तिर्विचित्रं चाप्यन्योन्यं विषमं समम् ॥ ३३ ॥

तुल्ययोगो दीपकं च प्रतिवस्तूपमा तथा ।
निदर्शना च दृष्टान्तः श्लेषश्च व्यतिरेककः ॥ ३४ ॥

तथा परिकराक्षेपौ व्याजस्तुतिरतः परम् ।
अप्रस्तुतप्रशंसा च पर्यायोक्तं प्रतीपकम् ॥ ३५ ॥

अनुमाकाव्यलिङ्गार्थान्तरन्यासास्ततः परम् ।
यथासङ्ख्यं तथार्थापत्तिः परिसङ्ख्या तथोत्तरम् ॥ ३६ ॥

समुच्चयो विकल्पश्च समाधिर्भाविकं तथा ।
स्यात्प्रत्यनीकं व्याघातः पर्यायस्सूक्ष्ममेव च ॥ ३७ ॥

उदात्तं परिवृत्तिः कारणमाला ततः परम् ।
एकावली ततश्चैव मालादीपकसारकौ ॥ ३८ ॥

संसृष्टिस्संकरश्चेति सप्तषष्टिरलङ्क्रियाः ।
उदीरितानामेतासां क्रमाल्लक्षणमुच्यते ॥ ३९ ॥

स्वतस्सिद्धेन भिन्नेन सम्मतेन च धर्मतः ।
साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकदोपमा ॥ ४० ॥

सोपमा द्विविधा प्रोक्ता पूर्णलुप्तप्रभेदतः ।
श्रौत्यार्थी चेति पूणापि द्विविधापि पुनस्त्रिधा ॥ ४१ ॥

समासे तद्धिते वाक्ये स्थितैवं सा तु षड्विधा ।
वर्ण्योपमानधर्माणामुपमावाचकस्य च ॥ ४२ ॥

एकद्वित्र्यनुपादानाद् भिन्ना लुप्तोपमाष्टधा ।
एकस्यैवोपमानोपमेयत्वेऽनन्वयो मतः ॥ ४३ ॥

पर्यायेण द्वयोस्तस्मिन्नुपमेयोपमा मता ।
सदृशानुभवादन्यस्मृतिस्स्मरणमुच्यते ॥ ४४ ॥

आरोपविषयस्य स्यादतिरोहितरूपिणः ।
उपरञ्जकमारोप्यमाणं तद्रूपकं मतम् ॥ ४५ ॥

तदादौ त्रिविधं प्रोक्तमाद्यं सावयवं परम् ।
तद्धीनं च तृतीयं स्यात् परंपरितनामकम् ॥ ४६ ॥

मालाकेवलरूपाभ्यां द्वितीयं द्विविधं भवेत् ।
तृतीयमपि च द्वेधा श्लिष्टाश्लिष्टनिबन्धनम् ॥ ४७ ॥

एवं रूपकभेदास्तु भवन्ति पुनरष्टधा ।
आरोप्यमाणमारोपविषयात्मतया स्थितम् ॥ ४८ ॥

प्रकृतस्योपयोगित्वात् परिणाम उदाहृतः ।
विषयो विषयी यत्र सादृश्यात् कविसम्मतात् ॥ ४९ ॥

सन्देहगोचरौ स्यातां सन्देहालङ्कृतिस्तु सा ।
शुद्धा निश्चयगर्भा च निश्चयान्तेति सा त्रिधा ॥ ५० ॥

कविसम्मतसादृश्याद् विषये पिहितात्मनि ।
आरोप्यमाणानुभवो यत्र स भ्रान्तिमान् मतः ॥ ५१ ॥

निषिद्धे विषये साम्यादन्यारोपस्त्वपह्नुतिः ।
अर्थयोगरुचिश्लेषैरुल्लेखनमनेकधा ॥ ५२ ॥

ग्रहीतृभेदादेकस्य स उल्लेखस्सतां मतः ।
यत्रान्यधर्मसम्बन्धादन्यत्वेनोपतर्कितम् ॥ ५३ ॥

प्रकृतं हि भवेत्प्राज्ञास्तामुत्प्रेक्षां प्रचक्षते ।
विषयस्यानुपादानाद्विषय्युपनिबध्यते ॥ ५४ ॥

यत्र सातिशयोक्तिः स्यात् कविप्रौढोक्ति[1] जीविका ।
सहार्थेनान्वयो यत्र भवेदतिशयोक्तितः ॥ ५५ ॥

कल्पितौपम्यपर्यन्ता सा सहोक्तिरितीष्यते ।
विना सम्बन्धि यत् किञ्चिद्यत्रान्यस्य परापतेत् ॥ ५६ ॥

रम्यतारम्यता वापि सा विनोक्तिरनुस्मृता ।
विशेषणानां साम्येन यत्र प्रस्तुतवर्तिनाम् ॥ ५७ ॥

अप्रस्तुतस्य गम्यत्वं सा समासोक्तिरिष्यते ।
अन्यथोक्तस्य वाक्यस्य चान्यथैव विवक्षया ॥ ५८ ॥

योजना क्रियते सा तु वक्रोक्तिरिति कीर्तिता ।
स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् ॥ ५९ ॥

व्याजोक्तिस्सा समुद्भूतं यत्र वस्तु निगुह्यते ।
मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनम् ॥ ६० ॥

सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता ।
तद्गुणस्स्वगुणत्यागादन्योत्कृष्टगुणग्रहः ॥ ६१ ॥

सति हेतावतद्रूपस्वीकारस्स्यादतद्गुणः ।
आभासत्वे विरोधस्य विरोधाभास इष्यते ॥ ६२ ॥

जातिक्रियागुणद्रव्यैर्मिश्रैर्दशभेदवान् ।
आधाररहिताधेयमेकं चानेकगोचरम् ॥ ६३ ॥

अशक्यवस्तुकरणं विशेषालंकृतिस्तथा ।
आधाराधेययोरानुरूप्याभावोऽधिको मतः ॥ ६४ ॥

कारणेन विना कार्यस्योत्पत्तिस्स्याद्विभावना ।
सत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यते ॥ ६५ ॥

---

1) जीविता.

कार्यकारणयोर्भिन्नदेशत्वे स्यादसङ्गतिः ।
विचित्रं स्वविरुद्धस्य फलस्याप्त्यर्थमुद्यमः ॥ ६६ ॥
तदन्योन्यं मिथो यत्रोत्पाद्योत्पादकता भवेत् ।
ओपम्यं गम्यते यत्र सा मता तुल्ययोगिता ॥ ६७ ॥
प्रस्तुताप्रस्तुतानां च वस्तूनां तुल्यधर्मतः ।
औपम्यं गम्यते यत्र दीपकं तन्निगद्यते ॥ ६८ ॥
यत्र सामान्यनिर्देशः पृथग्वाक्यद्वये सति ।
गम्यौपम्याश्रिता सा स्यात्प्रतिवस्तूपमा मता ॥ ६९ ॥
यत्र वाक्यद्वये विम्बप्रतिविम्बतयोच्यते ।
सामान्यवाक्यं वाक्यज्ञैस्स दृष्टान्तो निगद्यते ॥ ७० ॥
असंभवद्धर्मयोगादुपमानोपमेययोः ।
प्रतिविम्बक्रिया गम्या यत्र सा स्यान्निदर्शना ॥ ७१ ॥
भेदप्रधानं साधर्म्यमुपमानोपमेययोः ।
आधिक्याल्पत्वकथनाद् व्यतिरेकस्स उच्यते ॥ ७२ ॥
प्रकृताप्रकृतोभयगतमुक्तं चेच्छब्दमात्रसाधर्म्यम् ।
श्लेषोऽयं श्लिष्टत्वं सर्वत्राद्यद्वये नान्त्ये ॥ ७३ ॥
यत्राभिप्रायगर्भा स्याद् विशेषणपरम्परा ।
तत्राभिप्रायविदुषामसौ परिकरो मतः ॥ ७४ ॥
विशेषबोधायोक्तस्य वक्ष्यमाणस्य वा भवेत् ।
निषेधाभावकथनमाक्षेपस्स उदाहृतः ॥ ७५ ॥
निन्दया वाच्यया यत्र स्तुतिरेवावगम्यते ।
स्तुत्या वा ज्ञायते निन्दा व्याजस्तुतिरसौ मता ॥ ७६ ॥
अप्रस्तुतस्य कथनात्प्रस्तुतं यत्र गम्यते ।
अप्रस्तुतप्रशंसेयं सारूप्यादिनियन्त्रिता ॥ ७७ ॥
कारणं गम्यते यत्र प्रस्तुतं कार्यवर्णनात् ।
अप्रस्तुतत्वेन वद्धं तत् पर्यायोक्तमुच्यते ॥ ७८ ॥
आक्षेपमुपमानस्य कैमुतिक्येन कथ्यते ।
यत्रोपमेयभावस्स्यात् तत्प्रतीपमुदाहृतम् ॥ ७९ ॥
साध्यसाधननिर्देशादनुमानमुदीर्यते ।
हेतोर्वाक्यपदार्थत्वे [1] काव्यलिङ्गमुदाहृतम् ॥ ८० ॥
कार्यकारणसामान्यविशेषाणां परस्परम् ।
समर्थनं यत्र सोऽर्थान्तरन्यास उदाहृतः ॥ ८१ ॥
उद्दिष्टानां पदार्थानां पूर्वं पश्चाद्यथाक्रमम् ।
अन्योद्देशो भवेद्यत्र तद्यथासङ्ख्यमुच्यते ॥ ८२ ॥

[1] काव्यलिङ्गं द्विधा मतम्.

एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यथा पतेत् ।
कैमुक्तन्यायतस्सा स्यादर्थापत्तिरलङ्क्रिया ॥ ८३ ॥
एकस्य वस्तुनः प्राप्तावनेकत्रैकदा यदा ।
एकत्र नियमस्सा तु परिसङ्ख्या निगद्यते ॥ ८४ ॥
उत्तरात्प्रश्न उन्नेयो यत्र प्रश्नोत्तरे तथा ।
बहुधा च निवध्येते तदुत्तरमुदीर्यते ॥ ८५ ॥
विरोधे तुल्यवलयोर्विकल्पालंकृतिर्मता ।
गुणक्रियायौगपद्यं समुच्चय उदाहृतः ॥ ८६ ॥
एकस्मिन् कारणे कार्यसाधकेऽन्यत् समापतेत् ।
काकतालीन्यायतस्तु सा समाधिरुदीर्यते ॥ ८७ ॥
अतीतानागते यत्र प्रत्यक्ष इव लक्ष्यते ।
अत्यद्भुतार्थकथनाद् भाविकं तदुदाहृतम् ॥ ८८ ॥
बलिनः प्रतिपक्षस्य प्रतीकारे सुदुष्करे ।
यत्तदीयतिरस्कारः प्रत्यनीकं तदुच्यते ॥ ८९ ॥
येन यत्साधितं वस्तु तेनैव क्रियतेऽन्यथा ।
अन्येन तदलङ्कारो व्याघात इति कथ्यते ॥ ९० ॥
क्रमेणैकमनेकस्मिन्नाधारे वर्तते यदि ।
एकस्मिन्नथ वानेकं पर्यायालङ्कृतिर्द्विधा ॥ ९१ ॥
असंलक्षितसूक्ष्मार्थप्रकाशस्सूक्ष्म उच्यते ।
तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते ॥ ९२ ॥
समं न्यूनाधिकाभ्यां च यथा विनिमयो भवेत् ।
साकं समाधिकंन्यूनैः परिवृत्तिरसौ मता ॥ ९३ ॥
पूर्वं पूर्वं प्रति यदा हेतुस्स्यादुत्तरोत्तरम् ।
अदः कारणमालाख्यमलङ्करणमुच्यते ॥ ९४ ॥
यत्रोत्तरोत्तरेषां स्यात्पूर्वं पूर्वं प्रति क्रमात् ।
विशेषणत्वकथनमसावेकावली मता ॥ ९५ ॥
यदा तु पूर्वपूर्वस्य संभवेदुत्तरोत्तरम् ।
प्रत्युत्कर्षावहं यत्तन्मालादीपकमुच्यते ॥ ९६ ॥
उत्तरोत्तरमुत्कर्षस्सारालङ्कार उच्यते ।
तिलतण्डुलसंश्लेषन्यायाद्यत्र परस्परम् ॥ ९७ ॥
संश्लिष्येयुरलङ्कारास्सा संसृष्टिर्निगद्यते ।
क्षीरनीरन्यायाद्यत्र सम्बन्धस्स्यात् परस्परम् ॥ ९८ ॥
अलङ्कृतीनामेतासां सङ्करस्स उदाहृतः ।
अङ्गाङ्गिभावसन्देहैकवाक्यानुप्रवेशतः ॥ ९९ ॥

समप्रधानतथेति सङ्करस्स चतुर्विधः ।
शब्दार्थसंश्रयास्त्वेवमलङ्काराः स्वरूपतः ॥ १०० ॥
उदीरिता न दृष्टान्तैरस्माभिः[1] सङ्ग्रहेच्छुभिः ॥

[1] स्संग्रहीतृभिः

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारण-चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्र-सारभूते श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले साहित्यशास्त्रे अलंकारनिरूपणं नाम पञ्चमस्तरङ्गः

अथ षष्ठस्तरंगः

अलङ्कारा जगदलङ्काराः स्वामिन्! प्रदर्शिताः ।
आनन्दयन्ति हृदयं ममैते हृदयङ्गमाः ॥ १ ॥
अधुना नाटकाख्यस्य प्रवन्धस्य सुविस्तृतम् ।
लक्षणं श्रोतुमीहा मे मानसं सम्प्रवर्तते ॥ २ ॥
एतन्मह्यं समाख्याहि विख्यातगुणवारिधे! ।
पुत्र! यच्छ्रोतुमिष्टं ते वर्णयामि पुनः शृणु ॥ ३ ॥
चतुर्विधैरभिनयैस्सात्विकाङ्गिकपूर्वकैः ।
धीरोदात्ताद्यवस्थानुकृतिर्नाट्यं रसाश्रयम् ॥ ४ ॥
भावाश्रयं तु नृत्यं स्यान्नृत्तं ताललयान्वितम् ।
मधुरोद्धतभेदेन तद् द्वयं द्विविधं पुनः ॥ ५ ॥
लास्यताण्डवभेदेन नाटकाद्युपकारकम् ।
नाटकं सप्रकरणं भाणः प्रहसनं डिमः ॥ ६ ॥
व्यायोगस्समवाकारो वीध्यङ्केहामृगा इति ।
वस्तुनेतृरसास्तेषां रूपकाणां हि भेदकाः ॥ ७ ॥
प्रख्यातोत्पाद्यमिश्रत्वभेदाद् वस्तु त्रिधा मतम् ।
मुखं प्रतिमुखं गर्भस्सावमर्शोपसंहृतिः ॥ ८ ॥
इत्येवं सन्धयः पञ्च नाटके परिकीर्त्तिताः ।
वीजविन्दुपताकाख्यप्रकरीकार्यलक्षणाः ॥ ९ ॥
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ।
अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः ॥ १० ॥
यथासङ्ख्येन जायन्ते मुखाद्याः पञ्चसन्धयः ।
औत्सुक्यमात्रमारम्भः फललाभाय भूयसे ॥ ११ ॥

प्रयत्नस्तु [1] फलप्राप्तौ व्यापारोऽतित्वरान्वितः ।
उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसंभवः ॥ १२ ॥
अपायाभावतः कार्यनिश्चयो नियताप्तिका ।
समग्रफलसम्पत्तिः फलागम उदाहृतः ॥ १३ ॥
स्तोकोद्दिष्टः कार्यहेतुर्वीजं विस्तार्यनेकधा ।
अवान्तरार्थविच्छेदे विन्दुरच्छेदकारणम् ॥ १४ ॥
प्रतिपाद्यकथाङ्गं स्यात् पताका व्यापिनी कथा ।
अव्यापिनी प्रकरिका कार्यनिर्वाहकृत् फले ॥ १५ ॥
मुखं वीजसमुत्पत्तिर्नानार्थरससंश्रयः ।
अङ्गानि द्वादशैतस्य वीजारम्भसमन्वयात् ॥ १६ ॥
उपक्षेपः परिकरः परिन्यासो विलोभनम् ।
युक्तिः प्राप्तिस्समाधानं विधानं परिभावनम् ॥ १७ ॥
उद्भेदभेदकरणान्यन्वर्थानि यथाक्रमम् ।
बीजन्यास उपक्षेपस्तद्बाहुल्यं परिक्रिया ॥ १८ ॥
तन्निष्पत्तिः परिन्यासो लक्षणाख्यं विलोभनम् ।
सम्प्रधारणमर्थानां युक्तिः प्राप्तिस्सुखागमः ॥ १९ ॥
वीजागमस्समाधानं विधानं सुखदुःखकृत् ।
परिभावोऽद्भुतावेश उद्भेदो गूढभेदनम् ॥ २० ॥
करणं प्रकृतारम्भो भेदः प्रोत्साहनं भवेत् ।
अङ्गानि द्वादशैतस्य मुखसन्ध्युदितानि हि ॥ २१ ॥
लक्ष्यालक्ष्यस्य वीजस्य व्यक्तिः प्रतिमुखं मतम् ।
विलासः परिसर्पश्च विधूतं शमनर्मणी ॥ २२ ॥

[1] त्वत्प्राप्तौ

नर्मद्युतिः प्रगमनं विरोधः पर्युपासनम् ।
वज्रं पुष्पमुपन्यासो वर्णसंहार इत्यपि ॥ २३ ॥
रत्यर्थेहा विलासः स्याद् दृष्टनष्टानुसर्पणम् ।
परिसर्पो विधूतं स्यादरतिस्तच्छमश्शमः ॥ २४ ॥
परिहासवचो नर्मद्युतिस्तज्जाद्यनिर्मिता ।
यथोत्तरं वाक्प्रगमो हितरोधो निरोधनम् ॥ २५ ॥
प्रसाधनमुपन्यासो वज्रं निष्ठुरभाषणम् ।
पुष्पं वाक्यविशेषः स्यादनुरागप्रकाशकम् ॥ २६ ॥
चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते ।
एवं त्रयोदशाङ्गानि सन्धेः प्रतिमुखस्य तु ॥ २७ ॥
गर्भस्तु दृष्टनष्टस्य वीजस्यान्वेषणं मुहुः ।
अस्याप्त्याशापताकानुगुण्येनाङ्गोपकल्पनम् ॥ २८ ॥
अभूताहरणं मार्गो रूपोदाहरणे क्रमः ।
सङ्ग्रहश्चानुमानं च तोटकाधिपदे तथा ॥ २९ ॥
उद्वेगसंभ्रमाक्षेपा द्वादशाङ्गान्यनुक्रमात् ।
अभूताहरणं छद्म मार्गस्तत्त्वार्थदर्शनम् ॥ ३० ॥
रूपं वितर्कवद्वाक्यं सोत्कर्षं स्यादुदाहृतिः ।
क्रमस्संचिन्त्यमानाप्तिर्भावज्ञानमथापरे ॥ ३१ ॥
सङ्ग्रहस्सामदानोक्ति रनुमानमथोहनम् ।
अधिसन्धिस्त्वधिवलं संरब्धं तोटकं वचः ॥ ३२ ॥
उद्वेगो रिक्तता भीतिश्शङ्कात्रासौ च संभ्रमः
गर्भवीजसमुत्क्षेपादाक्षेपः परिकीर्त्तितः ॥ ३३ ॥
गर्भाख्यसन्धेरङ्गानि द्वादशैतानि चक्षते ।
गर्भसन्धौ प्रसिद्धस्य वीजस्यार्थावमर्शनम् ॥ ३४ ॥
हेतुना येन केनापि विमर्शस्सन्धिरिष्यते ।
नियताप्तिप्रकर्युक्तेरङ्गान्यस्य त्रयोदश ॥ ३५ ॥
तत्रापवादस्संफेटो विद्रवद्रवशक्तयः ।
द्युतिः प्रसङ्गश्छलनं व्यवसायो विरोधनम् ॥ ३६ ॥
प्ररोचना विचलनमादानं च त्रयोदश ।
दोषप्रख्यापवादस्स्यात् संफेटो रोषभाषणम् ॥ ३७ ॥
विद्रवो वधबन्धादिर्द्रवो 1) गुरुतरस्मृतिः ।
विरोधशमनं शक्तिस्तर्जनोद्वेजने द्युतिः ॥ ३८ ॥
गुरुकीर्त्तिः प्रसङ्गस्स्याच्छलनं चावमाननम् ।
व्यवसायस्स्वशक्त्युक्तिस्संरब्धोक्तिर्विरोधनम् ॥ ३९ ॥

सिद्धामन्त्रणता भाविदर्शिका स्यात्प्ररोचना ।
गुणोक्तिःस्याद्विचलनमादानं कार्यसङ्ग्रहः ॥ ४० ॥
अवमर्शाख्यसन्धौ स्युरङ्गान्येवं त्रयोदश ।
वीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ॥ ४१ ॥
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ।
फलाप्तिकार्यानुगुण्यादङ्गान्यस्य चतुर्दश ॥ ४२ ॥
सन्धिर्विरोधो ग्रथनं निर्णयः परिभाषणम् ।
प्रसादानन्दसमयाः कृतिर्भाषोपगूहनम् ॥ ४३ ॥
पूर्वभावोपसंहारौ प्रसक्तिश्च चतुर्दश ।
सन्धिर्वीजोपगमनं विरोधः कार्यमार्गणम् ॥ ४४ ॥
ग्रथनं तदुपक्षेपोऽनुभूताख्यातनिर्णयः ॥ ४५ ॥
परिभाषा मिथो जल्पः प्रसादः पर्युपासनम् ।
आनन्दो वाञ्छितावाप्तिस्समयो दुःखनिर्गमः ॥ ४६ ॥
कृतिर्लब्धार्थगमनं मानाद्व्याप्तिस्तु भाषणम् ।
कार्यं दृष्टयद्भुतप्राप्तिपूर्वं भावस्तु गूहने ॥ ४७ ॥
फलाप्तिरुपसंहारः प्रशस्तिश्शुभशंसनम् ।
एवं चतुर्दशाङ्गानि भवेयुरुपसंहृते ॥ ४८ ॥
1) उक्तान्यङ्गचतुष्षष्टिष्षोढा चैषां प्रयोजनम् ।
इष्टस्यार्थस्य रचना गोप्यगुप्तिः प्रकाशनम् ॥ ४९ ॥
रागप्रयोगश्चाश्चर्यं वृत्तान्तस्य च विस्तरः ।
त्रेधा विभागः कर्तव्यस्सर्वस्यापीह वस्तुनः ॥ ५० ॥
सूच्यमेव भवेत् किञ्चिद् दृश्यं श्राव्यं तथापरम् ।
दृश्यं तु मधुरोदात्तरसभावनिरन्तरम् ॥ ५१ ॥
अर्थोपक्षपकैस्सूच्यं पञ्चभिः प्रतिपादयेत् ।
विष्कम्भचूलिकाङ्कास्यप्रवेशाङ्कावतारणैः ॥ ५२ ॥
वृत्तवर्तिष्यमाणानां कथांशानां प्रदर्शकः ।
सङ्क्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥ ५३ ॥
स द्विधा कोविदैः प्रोक्तश्शुद्धमिश्रविभेदतः ।
संस्कृतप्रायिकश्शुद्धो भाषामिश्रस्तु मिश्रकः ॥ ५४ ॥
तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः ।
प्रवेशोऽङ्कद्वयस्यान्तश्शेषार्थस्योप 2) पूरकः ॥ ५५ ॥
अन्तर्यवनिकासंस्थैश्चूलिकार्थस्य सूचना ।
अङ्कातपात्रैरङ्कास्यमुत्तराङ्कार्थसूचना ॥ ५६ ॥

1) गुरुतिरस्कृतिः

1) उक्ताङ्गानां. 2) सूचकः

अङ्कावतारस्त्वङ्कान्तो यतोऽङ्कस्य विभागतः ।
एभिस्सूच्यं सूचयित्वा दृश्यमङ्कैः प्रयोजयेत् ॥ ५७ ॥
नाट्यधर्ममवेक्ष्यैषां पुनर्वस्तु त्रिधेष्यते ।
सर्वेषां नियतश्राव्यं श्राव्यमश्राव्य [1] भेदतः ॥ ५८ ॥
सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम् ।
द्विधान्यन्नाट्यधर्माख्यं जनान्तमपवारितम् ॥ ५९ ॥
त्रिपताकाकरेणान्यानपवार्यान्तरा कथाम् ।
रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम् ॥ ६० ॥
किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ।
श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम् ॥ ६१ ॥
प्रत्यक्षनेतृचरितो विन्दुव्यक्तिपुरस्कृतः ।
अङ्को नानाप्रकारार्थसंविधानरसाश्रयः ॥ ६२ ॥
सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् ।
स्वकार्यप्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ॥ ५३ ॥
प्रस्तावना वा तत्र स्यात् कथोद्घातः प्रवर्तकम् ।
प्रयोगातिशयश्चेति त्रीण्यङ्गान्यामुखस्य तु ॥ ५४ ॥
स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः ।
गृहीत्वा प्रविशेत् पात्रं कथोद्घातो द्विधैव सः ॥ ६५ ॥
प्रस्तूयमानकालस्य गुणवर्णनयान्वितः ।
प्रविशेत् सूचितं पात्रं यत्र स्यात्तत्प्रवर्तकम् ॥ ६६ ॥
एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः ।
पात्रप्रयोगो यत्रायं प्रयोगातिशयो मतः ॥ ६७ ॥
वीथ्यङ्गान्यामुखाङ्गत्वादुच्यन्तेऽत्र स्वभावतः ।
उद्घात्यकावलगिते प्रपञ्चत्रिगते छलम् ॥ ६८ ॥
वाक्केल्यधिवले गण्डमवस्यन्दितनालिके ।
असत्प्रलापव्याहारमृदवानि त्रयोदश ॥ ६९ ॥
ग्रन्थार्थपदपर्यायमूलः प्रश्नोत्तरस्य च ।
यत्रान्योन्यं समालापो द्वयोरुद्घात्यकं मतम् ॥ ७० ॥
यत्रैकत्र समावेशात् कार्यमन्यत् प्रकाश्यते ।
प्रस्तुतेऽन्यत्र चान्यत् स्यात्तच्चावलगितं द्विधा ॥ ७१ ॥
असद्भूतं मिथस्स्तोत्रप्रपञ्चो हास्यकृन्मतः ।
श्रुतिसाम्यादनेकार्थयोजनं त्रिगतं मतम् ॥ ७२ ॥
प्रियाभैरप्रियैर्वाक्यैर्विलोभाच्छलनं छलम् ।
विनिवृत्तस्य वाक्केलिर्द्विस्त्रिः प्रत्युक्तितोऽपि वा ॥ ७३ ॥

अन्योन्यवाक्याधिक्योक्तिः स्पर्धयाधिवलं मतम् ।
गण्डं प्रस्तुतसंबंधि भिन्नार्थं सहसोदितम् ॥ ७४ ॥
रसोक्तस्यान्यथा व्याख्या यत्रावस्कन्दितं हि तत् ।
सोपहासा निगूढार्था नालिकैव प्रहेलिका ॥ ७५ ॥
असम्बन्धकथाप्रायः स्यात्प्रलापो यथोत्तरम् ।
अन्यार्थमेव व्याहारो हास्यलोभकरं वचः ॥ ७६ ॥
दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत् ।
एषामन्यतरेणार्थं पात्रं वाक्षिप्य सूत्रभृत् ॥ ७७ ॥
प्रस्तावनान्ते निर्गच्छेत् ततो वस्तु प्रपञ्चयेत् ।
साङ्गैर्मुखप्रतिमुखगर्भमर्शोपसंहृतैः ॥ ७८ ॥
पूर्वं प्रकृतिरन्येषामाधिकारिकवृत्तितः ।
वीरशृङ्गारयोरेकः प्रधानं यत्र वर्ण्यते ॥ ७९ ॥
प्रख्यातनायकोपेतं नाटकं तदुदाहृतम् ।
अर्थतश्शब्दतो वापि मनाक् काव्यार्थसूचनम् ॥ ८० ॥
यत्राष्टभिर्द्वादशभिरष्टादशभिरेव वा ।
द्वाविंशत्या पदैर्वापि सा नान्दी परिकीर्त्तिता ॥ ८१ ॥
रङ्गं प्रसाध्य मधुरैः श्लोकैः काव्यार्थसूचकैः ।
ऋतुं कञ्चिदुपादाय भारतीं वृत्तिमाश्रयेत् ॥ ८२ ॥
उत्पाद्येनेतिवृत्तेन धीरशान्तप्रधानकम् ।
शेषं [1] नाटकवच्चाङ्गं भवेत्प्रकरणं हि तत् ॥ ८३ ॥
भारतीवृत्तिभूयिष्ठं शौर्यसौभाग्यसंस्तवैः ।
सूच्येते वीरशृङ्गारौ विटेन निपुणोक्तिना ॥ ८४ ॥
कल्पितेनेतिवृत्तेन धूर्तचारित्रवर्णनम् ।
एकाङ्के मुखनिर्वाहौ यत्र भाणस्स सम्मतः ॥ ८५ ॥
यत्र सन्ध्यङ्गवृत्त्यङ्ग वर्णनं भाणवन्मतम् ।
हास्यो रसः प्रधानं स्याद्भवेत् प्रहसनं हि तत् ॥ ८६ ॥
पाषण्डविप्रप्रभृतिविटचेटसमाकुलम् ।
वेषभाषादिसहितं शुद्धं हास्यवचोऽन्वितम् ॥ ८७ ॥
कामुकादिवचोवेषैष्षण्डकञ्चुकितापसैः ।
प्रवासाभिनयप्रायं वैकृतं तत्प्रकीर्त्तितम् ॥ ८८ ॥
वीथ्यङ्गैस्समाकीर्णं सङ्कीर्णं धूर्तसंकुलम् ।
यत्र वस्तु प्रसिद्धं स्याद् वृत्तयः कैशिकीं विना ॥ ८९ ॥
नेतारो देवगन्धर्वयक्षराक्षोमहोरगाः ।
भूतप्रेतपिशाचाद्याष्षोडशात्यन्तमुद्धताः ॥ ९० ॥

[1] मेवच.

[1] नाटकतुल्याङ्गं.

हास्यश्रृङ्गाररहिता रसा रौद्रप्रधानकाः ।
चत्वारोऽङ्कास्सन्धयश्च चत्वारोऽमर्शवर्जिताः ॥ ९१ ॥

महेन्द्रजालसङ्ग्रामसूर्यचन्द्रग्रहादयः ।
शेषं नाटकवत् सर्वं स डिमः परिकीर्तितः ॥ ९२ ॥

प्रख्यातमितिवृत्तं स्यादुद्धतो नायको मतः ।
गर्भावमर्शराहित्यं डिमवद्रसपोषणम् ॥ ९३ ॥

एकवासरकार्यं च स व्यायोगो महारणः ।
यथामुखं नाटकवत् सन्धयोऽमर्शवर्जिताः ॥ ९४ ॥

नेतारो द्वादश पृथङ् नरदेवासुरादयः ।
वीरप्रधानाश्च रसास्त्रयोऽङ्कास्तेषु च क्रमात् ॥ ९५ ॥

वस्तुस्वभावदेवादिकृतास्स्युः पाठकास्त्रयः ।
पुरोधरणाग्न्यादिनिमित्तोपद्रवास्त्रयः ॥ ९६ ॥

धर्मार्थकामानुगुणास्तिस्रः श्रृङ्गाररीतयः ।
प्रथमेऽङ्के निबद्धव्या कथा यामत्रयावधि ॥ ९७ ॥

यामावधिर्द्वितीयेऽङ्के तृतीये त्वर्धयामिका ।
असौ समवकारः स्याद्वीथ्यङ्गैः कैश्चिदन्वितः ॥ ९८ ॥

यत्र भाणवदङ्गानां कूल्हप्तिर्वृत्तिश्च कैशिकी ।
श्रृङ्गारोऽपरिपूर्णत्वात् सूचनीयोऽतिभूयसा ॥ ९९ ॥

उद्घात्यादीनि चाङ्गानि सा वीथी वीथिवन्मता ।
यत्रेतिवृत्तं प्रख्यातं प्रधानं करुणो रसः ॥ १०० ॥

स्त्रीणां विलासो वाग्युद्धं नेतारः प्राकृता नव ।
भाणवत् सन्धिवृत्त्यादिस्स उत्कृष्टोऽङ्कसंज्ञकः ॥ १०१ ॥

मिश्रमीहामृगे वृत्तं चतुरङ्कं त्रिसन्धिकम् ।
मर्त्यदिव्यौ च नियमान्नायकप्रतिनायकौ ॥ १०२ ॥

धीरोद्धतौ स्त्रियं दिव्यां हर्तुकामौ च कामुकीम् ।
अवधं युद्धमन्योन्यमाभासरसयोस्तयोः ॥ १०३ ॥

इत्युक्तं दशसङ्ख्यानां रूपकाणां च लक्षणम् ।
व्यासवाल्मीकिमुख्यैस्तु प्रोक्ता भारतपूर्वकाः ॥ १०४ ॥

इतिहासास्तु बहवस्तत्स्वरूपं प्रचक्ष्महे ।
सत्वादिगुणभेदानां त्रिमूर्तीनां च लक्षणम् ॥ १०५ ॥

देवासुरादिजननक्रमाणामपि वर्णनम् ।
युधिष्ठिरादिवृत्तान्तकीर्तनं श्रुतवर्त्मनः ॥ १०६ ॥

धर्माणां भूयसां चैव साकल्येन दृढीकृतिः ।
एवमादीनि बहुधा प्रमेयाणीतिहासके ॥ १०७ ॥

एवं समासदां दृश्यैश्श्राव्यैरपि मनोहरैः ।
कौतुकैर्विविधाकारैर्विनियोगैः पृथग्विधैः ॥ १०८ ॥

काव्यादीनां श्रुतिसुधाहर्षकृद्भिर्वचोभरैः ।
आनन्दितान्तःकरणस्सिंहासनवरे वसन् ॥ १०९ ॥

शशास धरणीं कृत्स्नां शिवनामा महीपतिः ।
एवं कतिपयेष्वस्य प्रयातेषु दिनेष्वभूत् ॥ ११० ॥

शिवस्य जगतीभर्तुः कुमारो भद्रनामकः ।
तत्तत्कालोचितैस्तैस्तैरुत्सवैस्तनुजस्य सः ॥ १११ ॥

अवर्तत महीपालो लब्धानन्दपरम्पराम् ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणचिदम्बर-
शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले
साहित्यशास्त्रे नाटकेतिहासस्वरूपनिरूपणं नाम षष्ठस्तरङ्गः.

अथ सप्तमस्तरंगः

स्वामिन्! पुत्रोचितास्ते के? कथयस्व महोत्सवाः ।
गैरानन्दमसामान्यमवापेति प्रकीर्त्तितम् ॥ १ ॥

तेषां च श्रवणे प्रीतिरधिका वर्तते हृदि ।
पुत्र! यत्तेऽभिलषितं तद्ब्रवीमि पुनश्शृणु ॥ २ ॥

पुत्राणामुपभोगोऽयमधुना परिकीर्त्यते ।
जाते गर्भे भवेत् स्त्रीणां पाण्डुरं गण्डमण्डलम् ॥ ३ ॥

कुचयोश्चूचुकं कृष्णं जठरं किञ्चिदुन्नतम् ।
तृतीये मासि संप्राप्ते कुर्यात् पुंसवनक्रियाम् ॥ ४ ॥

श्रवणे मृगशीर्षे च हस्ते पुष्ये पुनर्वसौ ।
मूले पुंसंज्ञिते धिष्ण्ये वारेऽङ्गारे बृहस्पतौ ॥ ५ ॥

माषद्वितयमध्यस्थं यवं घृतसमन्वितम् ।
प्राशयेत्तु पतिः पत्नीं वेदमन्त्रमनुस्मरम् ॥ ६ ॥

एवं पुंसवने जाते गर्भस्थः पुरुषो भवेत् ।
अष्टमे मासि षष्ठेवा धिष्ण्ये पुन्नामके पुनः ॥ ७ ॥

सीमन्तोन्नयनं कुर्यादष्टमङ्गलसंयुतम् ।
उदुम्बरफलैः कूलृप्तं कुर्यात् कण्ठविभूषणम् ॥ ८ ॥

कुशपुष्पविमिश्रेण शलल्यग्रेण मूर्धनि ।
सीमन्तोन्नयनं कुर्याद् भार्यायाः पृथिवीपतिः ॥ ९ ॥

वैणिकैर्वादयद्भिश्च [1] सोमरागं मनोहरम् ।
उच्चारयत्सु विप्रेषु साममन्त्रान् शुभाक्षरान् ॥ १० ॥

पटहादिभिरन्यैश्च तूर्यैः पञ्चमहास्वनैः:
अष्टमङ्गलनामानं कुर्यादुत्सवमूर्जितम् ॥ ११ ॥

तोषयेद् द्विजमुख्यांश्च गोभूस्वर्णाम्बरादिभिः ।
संपूर्ण नवमे मासि जाते पुत्रे मनोहरम् ॥ १२ ॥

जातकर्म प्रकुर्वीत स्वगृह्योक्तविधानतः ।
सौवर्णमुद्रिकालिप्ते प्राशयेन्मधुसर्पिषी ॥ १३ ॥

बालकं तु ततो मातुः पाययेच्च पयोधरम् ।
तत्राभ्युदयिकं श्राद्धं हेम्ना कुर्वीत भूपतिः ॥ १४ ॥

दशमाद्दिवसादूर्ध्वमुत्तरात्रितये मृगे ।
अश्विनी रोहिणी स्वाती रेवती मूल पुष्ययोः ॥ १५ ॥

चित्रानुराधाहस्तेषु श्रवणादित्रयेऽपि च ।
शुभे वारे तिथौ लग्ने पुत्रराश्यनुरूपतः ॥ १६ ॥

विख्यातं राजवंश्यानां नाम कुर्यान्महीपतिः ।
सुतत्रये सुता चेत्स्यात् तत्त्रये वा सुतो यदि ॥ १७ ॥

मातापित्रोः कुलस्यापि तदानिष्टं महद्भवेत् ।
करत्रये वैष्णवरेवतीषु तिथिद्वये चाश्विनिकाध्रुवेषु ।
कुर्याच्छिशूनां नृपतिश्च तद्वदान्दोलनं वै सुखिनो भवन्ति ॥ १८ ॥

आन्दोलशयने पुंसो द्वादशो दिवसश्शुभः ।
त्रयोदशस्तु कन्याया न नक्षत्रविचारणा ॥ १९ ॥

अन्यस्मिन् दिवसे चेत् स्यात्तिर्यगास्ये? प्रशस्यते ।
एकत्रिंशदिने चैव पयश्शङ्खेन पाययेत् ॥ २० ॥

अन्नप्राशस्सुनक्षत्रदिवसोदयराशिषु ।
मासे षष्ठे सप्तमे वाप्यष्टमे मासि वत्सरे ॥ २१ ॥

कर्णवेधं प्रकुर्वीत पुष्ट्यायुश्श्रीविवृद्धये ॥ २२ ॥

हरिहरकरचित्रासौम्यपौष्णोत्तरार्यादितिवसुषु घटालीसिंहवर्ज्ये च लग्ने ।
शशिगुरुबुधकाव्यानां दिने पर्वरिक्ता रहिततिथिषु शुद्धे नैधने कर्णवेधः

कार्त्तिकः पौषमासो वा चैत्रोवा फाल्गुनोऽपि वा ।
द्वितीया दशमी षष्ठी सप्तमी च त्रयोदशी ॥ २४ ॥

द्वादशी पञ्चमी शस्ता तृतीया कर्णवेधने ।
सौवर्णे राजपुत्रस्य राजते विप्रवैश्ययोः ॥ २५ ॥

शूद्रस्य चायसे सूची मध्यमानाङ्गुलात्मिके ।
सार्धमासद्वये दद्यात्ताम्बूलं प्रथमं शिशोः ॥ २६ ॥

कर्पूरादिकसंमिश्रं विलासाय हिताय च ।
मूलार्कचित्रकरतिष्यहरीन्द्रभेषु पौष्णे तथा मृगशिरोदितिवासवेषु ।
अर्केन्दुजीवबुधबोधनवासरेषु ताम्बूललक्षणविधिर्मुनिभिः प्रदिष्टः ॥

तृतीये वा चतुर्थे वा मासि निष्क्रमणं भवेत् ।
ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनम् ॥ २८ ॥

चतुर्थे मासि कर्तव्यं शिशोश्चन्द्रस्य दर्शनम् ।
मैत्रे पुष्यपुनर्वसुप्रथमभे पौष्णेऽनुकूले तिथौ

---

[1] सामगानं.

हस्ते चैव सुरेश्वरे च मृगभे तारासु शस्तासु च ।
कुर्यान्निष्क्रमणं शिशोर्बुधगुरौ शुक्रेऽत्वरिक्ते तिथौ
कन्याकुम्भतुलामृगारिभवने सौम्यग्रहालोकिते ॥ २९ ॥

अग्रतोऽथ प्रतिन्यस्य शिल्पभाण्डानि सर्वशः ।
शस्त्राणि चैव वस्त्राणि ततः पश्येत्तु लक्षणम् ॥ ३० ॥

प्रथमं यत्स्पृशेद्बालस्ततो भाण्डं स्वयं तथा ।
जीविका तस्य बालस्य तेनैव तु भविष्यति ॥ ३१ ॥

पञ्चमे च ततो मासि तं भूमावुपवेशयेत् ।
तत्र सर्वे ग्रहाश्शस्ता भौमोऽप्यत्र विशेषतः ॥ ३२ ॥

उत्तरात्रितयं सौम्यं पुष्यर्क्षं शक्रदैवतम् ।
प्राजापत्यं च हस्तश्च शस्तमाश्विनमित्रभम् ॥ ३३ ॥

वराहं पूजयेद्देवं पृथिवीं च विशेषतः ।
रक्षैनं वसुधे! देवि! सदा सर्वगतं शुभे! ॥ ३४ ॥

आयुःप्रमाणं सकलं निक्षिपस्व हरिप्रिये! ।
अचिरादायुषस्त्वस्य ये केचित्परिपन्थिनः ॥ ३५ ॥

जीविकारोग्यवित्तेषु निर्दहस्वाचिरेण तान् ।
कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यताम् ॥ ३६ ॥

इति संप्रार्थ्य भूमौ तु शिशुं तत्रोपवेशयेत् ।
षष्ठे मासे तथा कुर्यादन्नप्राशनमुत्तमम् ॥ ३७ ॥

रेवती रोहिणी हस्ता पुष्यश्रवणयुग्मके ।
उत्तरात्रितये वापि वारे चन्द्रे बृहस्पतौ ॥ ३८ ॥

बुधभार्गवयोश्चैव शस्ते लग्ने शुभे तिथौ ।
देवतापुरतस्तस्य धात्र्युत्सङ्गगतस्य च ॥ ३९ ॥

अलंकृतस्य दातव्यमन्नं पात्रे सकाञ्चनम् ।
मध्वाज्यदधिसंयुक्तं पायसं प्राशयेत्ततः ॥ ४० ॥

बालकानां स्वकीयानामव्यक्तं शृणुयाद्वचः ।
अर्धार्धं भाषितं तेषां गालिदानं मनोहरम् ॥ ४१ ॥

जानुसंक्रमणं पश्येत् स्खलितं च पदक्रमम् ।
मातृहस्तावलम्बेन ललितं गमनं शनैः ॥ ४२ ॥

फलप्रदर्शनाद्बालमाश्रितं मातुरङ्कतः ।
अङ्कमारोपयेदेनमुरस्कन्धतलं यथा ॥ ४३ ॥

रक्षामन्त्राङ्कितैः पत्रैर्लाक्षाक्तैः परिवेष्टितम् ।
शार्दूलनखसंयुक्तं प्रवालांकुरशोभितम् ॥ ४४ ॥

कपर्दकेन चित्रेण रत्नाङ्केन विराजितम् ।
अजरोमविमिश्रं च बिभ्राणं कण्ठसूत्रकम् ॥ ४५ ॥

पञ्चलोहविकल्पैश्च वलयैर्भूषिताङ्घ्रिकम् ।
पदयोः कटिदेशे च हेमघर्घरिकायुतम् ॥ ४६ ॥

सौवर्णकुण्डलप्रोतकर्णपालीविराजितम् ।
अश्वत्थपत्रसङ्काशमूर्धभूषाङ्कितालिकम् ॥ ४७ ॥

मातरं पितरं दृष्ट्वा धावमानमितस्ततः ।
कुमारं सुकुमाराङ्गमालिङ्गेदवनीपतिः ॥ ४८ ॥

कर्णौ कचांश्च कर्षन्तं वर्षन्तं हर्षमात्मनि ।
चुम्बंस्तं वदनं भूपः परिष्वज्य सुखीभवेत् ॥ ४९ ॥

योगीन्द्रमिव सानन्दं दिग्वस्त्रमपरिग्रहम् ।
जटिलं भूरि भूपाढयं गङ्गाधरमिवात्मजम् ॥ ५० ॥

पुत्रं गात्रात्समुत्पन्नमीक्षन्ते पुण्यभागिनः ।
वत्सराद्वितयादूर्ध्वं चूडाकर्म यथाक्रमम् ॥ ५१ ॥

हस्ताश्विविष्णुपौष्णाश्च श्रविष्ठादितिपुष्यभम् ।
सौम्यचित्रे नवक्षौरे उत्तमा नव तारकाः ॥ ५२ ॥

रवेरङ्गारकस्यैव सूर्यपुत्रस्य चैव वा ।
निन्दिता दिवसाः क्षौरे शेषा वाराश्शुभावहाः ॥ ५३ ॥

षष्ठ्यष्टमी चतुर्थी च नवमी च चतुर्दशी ।
द्वादशी दर्शपूर्णे द्वे प्रतिपच्चात्र निन्दिताः ॥ ५४ ॥

अक्षरग्रहणं कार्यं प्राप्ते पञ्चमहायने ।
गुरुस्सोमश्च सौम्यश्च श्रेष्ठोऽनिष्टौ कुजस्सितः ॥ ५५ ॥

विद्यारम्भे बुधैः प्रोक्तौ मध्यमौ बुधभास्करौ ।
पूर्वात्रयं श्रुतिद्वन्द्वं विद्यादौ मूलमश्विनी ॥ ५६ ॥

हस्ता शतभिषक् स्वाती चित्रा च मृगपञ्चकम् ।
अकुद्धश्शास्त्रमर्मज्ञोऽनालस्यो व्यसनोज्झितः ॥ ५७ ॥

हस्तसिद्धस्तथा वाग्मी कलाचार्यो मतस्सताम् ।
पितृभ्यामादृतस्यैव कलाचार्यस्य बालकः ॥ ५८ ॥

वत्सरात् पञ्चमादूर्ध्वमर्पणीयः कृतोत्सवः ।
इष्टानामप्यनिष्टानां वरं भवतु मूर्खता ॥ ५९ ॥

नास्तिका दुष्टचेष्टाश्च विद्या विद्यागुरोर्नतु ।
विद्ययापि तया किंवा या नास्तिकयादिदूषिता ॥ ६० ॥

स्वर्णेनापि हि किं तेन कर्णच्छेदं करोति यत् ।
आचार्यो मधुरैर्वाक्यैस्साभिप्रायावलोकनैः ॥ ६१ ॥

शिष्यं शिक्ष्यान्न निर्लज्जं कुर्याद्बन्धनताडनैः ।
मस्तके हृदये वापि प्राज्ञश्छात्रं न ताडयेत् ॥ ६२ ॥

अधोभागे शरीरस्य पुनः किञ्चन शिक्षयेत् ।
कृतज्ञाश्शुचयः प्राज्ञाः कल्प्या द्रोहविवर्जिताः ॥ ६३ ॥

गुरुभिस्त्यक्तशाठ्याश्च कार्याश्शिष्या विवेकिनः ।
मधुराहारिणः प्रायो ब्रह्मव्रतविधायिनः ॥ ६४ ॥

1) कंपर्दप्रमुखक्रीडाविनोदपरिहारिणः ।
विनीतेन च शिष्येण पठता भाव्यमन्वहम् ॥ ६५ ॥

गुरुष्वविनयो धर्मे विद्वेषस्स्वगुणैर्मदः ।
गुणेषु द्वेष इत्येताः कालकूटच्छटाः स्फुटाः ॥ ६६ ॥

कलाचार्यस्य चाजस्रं पठता हितमाचरेत् ।
निश्शेषमपि चामुष्मै लब्धं लब्धं निवेदयेत् ॥ ६७ ॥

गुरोस्सनगरग्रामां ददाति यदि मेदिनीम् ।
तथापि न भवत्येव कथंचिदनृणः पुमान् ॥ ६८ ॥

उपाध्यायमुपासीत तदनुद्धतवेषभृत् ।
वर्षे गर्भाष्टमे वापि शुभे चैकादशेऽपि वा ॥ ६९ ॥

व्रतवन्धं प्रकुर्वीत क्षत्रियस्य यथोचितम् ।
वेदमध्यापयेत् पुत्रमस्त्रमविद्यां च शिक्षयेत् ॥ ७० ॥

गजाश्वारोहणाभिज्ञं रथयानविशारदम् ।
शस्त्रशास्त्रकृताभ्यासं गजारोहसुशिक्षितम् ॥ ७१ ॥

अश्ववाहसुनिष्णातं तत्तद्विद्भिः परीक्षयेत् ।
एकैकं क्रमशः पुत्रं परीक्षेत विचक्षणः ॥ ७२ ॥

पाटवं च वलं प्रज्ञां क्रियाकौशलमेव च ।
श्रुतौ नीतौ स्मृतौ तर्के काव्ये व्याकरणेऽपि च ॥ ७३ ॥

धनुर्वेदे भूमिवले स्वरशास्त्रे कलास्वपि ।
दृढघाते भूमिपाते लक्ष्यालक्ष्येषुमोक्षणे ॥ ७४ ॥

विद्योत्कर्षं परीक्षेत वलं कोदण्डकर्षणे ।
गात्रेषु पाटवं पाददार्ढ्यं तल्लाघवं तथा ॥ ७५ ॥

हस्ते निष्ठुरतां चैव दृष्ट्वा स्थैर्यं च चेतसि ।
वितस्तित्रिचतुःपञ्चभेदाख्यानानि धेनुषु ॥ ७६ ॥

खड्गकुन्तगदाचक्रशक्तिशूलपरश्वधे ।
परप्रयुक्तघातेषु वञ्चना 2) प्रौढिमा क्षमा ॥ ७७ ॥

स्वयं प्रयुक्तघातेषु दृढकर्म परीक्षयेत् ।
एवमस्त्रप्रयुक्तं तु कुमाराणां च कौशलम् ॥ ७८ ॥

कृतास्त्राणां परीक्षेत तज्ज्ञैस्सह महीपतिः ।
(तेषामुत्कर्षमन्विच्छेत् स्वस्मादप्यवनीपतिः)
गुणाधिकतराः पुत्राः प्राप्यन्ते सुकृताधिकैः ॥ ७९ ॥

धर्मज्ञानदयोपेताः पितृशुश्रूषणे रताः ।
रूपौदार्यगुणोपेता दृश्यन्ते सुकृतैस्सुताः ॥ ८० ॥

एवं गुणाधिकान् पुत्रान् दृष्ट्वा रोमाञ्चकञ्चुकः ।
गजाश्वरत्नभूषाभिस्तोषयित्वा सुखी भवेत् ॥ ८१ ॥

उपाध्यायेषु सन्दिश्य ग्रामपत्तनखेटकम् ।
शस्त्राणि काञ्चनं भूरि मानपूर्वकमर्पयेत् ॥ ८२ ॥

सम्प्राप्तयौवनान् पुत्रान् कृतगोदानसत्क्रियान् ।
रूपलावण्यवर्णाढ्या लक्षणैस्समलंकृताः ॥ ८३ ॥

महाकुलसमुद्भूतास्समजातिनिरूपिताः ।
कुमारान् प्रापयेत् कन्या धर्मकामार्थसिद्धये ॥ ८४ ॥

वायव्ये नैर्ऋते चान्द्रे पौष्णे मैत्रेऽर्कदैवते ।
चित्राभाग्ये तथा वैश्वे चाहिर्बुध्न्यभवात्मके ॥ ८५ ॥

लग्ने तुलायां कन्यायां मिथुने च तदंशके ।
त्रिभिरेतैः प्रकर्तव्यो विवाहस्तु महीभुजा ॥ ८६ ॥

राशिष्वन्येष्वयत्नेन कर्तव्यास्तत्रयोंऽशकाः ।
तेषामलाभे लग्नानां तुलायां वा विचक्षणः ॥ ८७ ॥

लग्नाश्शुभग्रहाश्शस्तास्सप्ताष्टव्ययवर्जिताः ।
शुक्रं षष्ठे तृतीयेऽपि त्यक्त्वा वैवाहिके विधौ ॥ ८८ ॥

एकादशे द्वितीये च तृतीये शुभदश्शशी ।
पापांस्त्रिषष्ठलाभस्थान् त्यक्त्वा मङ्गलमष्टमे ॥ ८९ ॥

शुक्लपक्षे तिथौ शस्ते शोभनग्रहवासरे ।
कुर्याद्विवाहं भूपालः पुत्रस्याखिलदर्शनः ॥ ९० ॥

शोभने सुविशाले च मध्यवेदिविराजिते ।
पटीपट्टविताने च स्तम्भैः पट्टावकुण्ठितैः ॥ ९१ ॥

तोरणालंकृतद्वारे गोमयालिप्तभूमिके ।
पुष्पप्रकरशोभाढ्ये मण्टपे सुमनोहरे ॥ ९२ ॥

कृत्वा नान्दीमुखं श्राद्धं संपूज्य कुलदेवताः ।
पुण्याहवाचनं कृत्वा मुहूर्ते च गुणान्विते ॥ ९३ ॥

मधुपर्केण सम्मान्य सितवस्त्रैर्विभूषितम् ।
मुद्रिकालंकृतं पुत्रं वेदिमारोपयेत् सुधीः ॥ ९४ ॥

तण्डुलैः कारयेत् पुञ्जौ पूर्वापरसमाश्रितौ ।
सितं दुकूलं तन्मध्येकल्पयेदवधानकम् ॥ ९५ ॥

1) कन्दुकप्रमुख. 2) प्रौढिमीक्षयेत्.

पुत्रं प्राचीमुखं कृत्वा तण्डुलोर्ध्वेव्यवस्थितम् ।
पश्चिमाशामुखीं कन्यां पुञ्जस्योपरि वर्त्तिनीम् ॥ ९६ ॥

उभाभ्यां करयोर्धृत्वा तण्डुलान् जीरकान्वितान् ।
जाते लग्ने तु मध्यस्थं पटमुत्सारयेत्ततः ॥ ९७ ॥

हस्तस्थान् तण्डुलान् कन्या कुमारोपरि निक्षिपेत् ।
कुमारश्च तथा कन्यामूर्धोपरि क्षिपेन्मिथः ॥ ९८ ॥

परस्परमुखाम्भोजविनिवेशितलोचनौ ।
कन्याया दक्षिणं पाणिं कुमारकरमध्यगम् ॥ ९९ ॥

कृत्वा कन्यापिता कन्यां धारापूर्वं समर्पयेत् ।
कुमारं च तथा कन्यां वेष्टयेत् पञ्चतन्तुभिः ॥ १०० ॥

प्रादक्षिण्यात् पञ्च वारान् कृतसूत्रं समाहरेत् ।
निष्कासितं प्रयत्नात्तदुभाभ्यां पादयोरधः ॥ १०१ ॥

कुङ्कुमेन समालिप्य कङ्कणं तद्विधीयते ।
अनेनैव प्रकारेण कन्यायाः कङ्कणं न्यसेत् ॥ १०२ ॥

ततो होमं प्रकुर्वीत तथोक्तविधिना द्विजः ।
कनिष्ठामंगुलिं धृत्वा पत्युः पत्नी व्रजेदनु ॥ १०३ ॥

प्रदक्षिणं क्रमेणैव कृत्वा होमं यथाविधि ।
वारत्रयं परिक्रम्य सप्ततण्डुलपुञ्जकान् ॥ १०४ ॥

आक्रमेत् पदनिन्यासैस्ततः पट्टासने विशेत् ।
वामपार्श्वे विधातव्या पत्युः पत्नी शुभावहा ॥ १०५ ॥

ततो वस्त्राणि रत्नानि काञ्चनं भूषणानि च ।
गजाश्वमहिषीगाश्च दासीर्दासान् भुवं तथा ॥ १०६ ॥

दद्यात्पुत्राय तत्पत्न्यै विवाहोत्सवकर्मणि ।
विप्रांश्च तोषयेत्तत्र वस्त्रकाञ्चनभूषणैः ॥ १०७ ॥

वादित्राणां महानादैश्शोभनैर्मङ्गलस्वनैः ।
गीतैर्मङ्गलवाद्यैश्च वेदमन्त्रैश्शुभावहैः ॥ १०८ ॥

वन्दिभिः पठ्यमानैश्च जयमालाशुभाक्षरैः ।
पूरयेद् व्योम सर्वत्र दिशश्च विदिशस्तथा ॥ १०९ ॥

तोषयेदन्नपानैश्च ताम्बूलैरितरान् जनान् ।
एवं निरन्तरं कार्यं विवाहोऽह्नां चतुष्टयम् ॥ ११० ॥

चतुर्थीवासरे रात्रौ कुर्याच्च् छृङ्गारमूर्जितम् ।
वरवध्वोर्यथाशोभं सकृल्लोचनहारकम् ॥ ११२ ॥

आहूय करिणीवृन्दं हेमघण्टानिनादितम् ।
वर्णचामरशोभाढ्यं सिन्दूरारुणमस्तकम् ॥ ११३ ॥

पुष्पकैश्शोभितं कान्तं महामात्रनियोजितम् ।
आरोहार्हं कुमारस्य तत्सेवकजनस्य च ॥ ११३ ॥

उद्दीप्य हस्तदीपांश्च शतशोऽथ सहस्रशः ।
तारालोकमिवातन्वन्मेदिन्यां मेदिनीपतिः ॥ ११४ ॥

कुमारं कृतशृङ्गारं तद्वन्धुकृतमण्डनम् ।
आरोप्य करिणीं यत्नान्मुक्तापुष्पकधारिणीम् ॥ ११५ ॥

आरोपयेद्वशां तस्यां कान्तावृन्दमनिन्दितम् ।
इन्दुवक्त्रं सलावण्यमिन्दीवरसमेक्षणम् ॥ ११६ ॥

ततः पञ्चमहाशब्दैर्वाद्यमानैर्व्रजेद्वरः ।
पुरवीथ्यां पुरन्ध्रीभिः पूजितः पुरवासिभिः ॥ ११७ ॥

वरो यात्रां विनिर्वर्त्य समागच्छेत् स्वमालयम् ।
अवतीर्य वशापृष्ठात् प्रणमेज्जनकं नृपम् ॥ ११८ ॥

एवं विवाहिताः पुत्रा रमन्ते रमणीयुताः ।
रमन्ते च प्रजाश्श्रेष्ठा रूपशीलगुणान्विताः ॥ ११९ ॥

तेषां पुत्रांश्च पौत्रांश्च स्वांकमारोप्य लालयन् ।
निर्भरानन्दसन्दोहः पुत्रभोगमवाप्नुयात् ॥ १२० ॥

इत्युक्तरीत्या रचयन् जातकर्मादिकाः क्रियाः ।
पुत्रस्य भद्रभूपस्य शिवभूमिपतिश्शुभाः ॥ १२१ ॥

रम्यां सुलग्ने संजातां सर्वग्रहबलान्विते ।
सर्वाङ्गलक्षणोपेतां कन्यामुद्वाह्य वैभवात् ॥ १२२ ॥

तथा गजानामश्वानां शुभलक्षणशालिनाम् ।
आरोहणे रथानां च कुशलं बुद्धिशालिनम् ॥ १२३ ॥

पुत्रं विलोकय बहुधा प्रमोदभरितोऽभवत् ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारण-
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्र-
सारभूते श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले
पुत्रोपभोगनिरूपणं नाम सप्तमस्तरङ्गः

अथ अष्टमस्तरंगः

स्वामिन्! सुलग्ने संजातां कन्यां ग्रहबलान्विते।
सुलक्षणैस्समायुक्तामुद्वहेदिति कीर्त्तितम् ॥ १ ॥

ग्रहाणां च बलं कीदृग्यस्मिन् जन्म शुभं भवेत्।
तन्मे समस्तमाचक्ष्व शास्त्रं जातकगोचरम् ॥ २ ॥

पुत्र! यत्र तव प्रीतिस्तद् ब्रवीमि मुदा शृणु।
बुधैर्भावादयस्सर्वे ज्ञेयाः पूर्वोक्तवर्त्मना ॥ ३ ॥

एतच्छास्त्रानुरूपेण संज्ञां ब्रूमो विशेषतः।
पश्यन्ति सप्तमान् सर्वे शनिजीवकुजाः पुनः ॥ ४ ॥

विशेषतश्च त्रिदशत्रिकोणचतुरष्टमान्।
सर्वे त्रिकोणनेतारो ग्रहाश्शुभफलप्रदाः ॥ ५ ॥

पतयस्त्रिषडायानां यदि पापाः फलप्रदाः।
संदिशन्ति फलं नृणां सौम्याः केन्द्राधिपा यदि ॥ ६ ॥

क्रूराश्चेदशुभं त्वेते प्रबला उत्तरोत्तरम्।
लग्नाद् व्ययद्वितीयेशौ परेषां साहचर्यतः ॥ ७ ॥

स्थानान्तरानुगुण्येन भवतः फलदायकौ।
भाग्यव्ययाधिपत्येन रन्ध्रेशो न शुभप्रदः ॥ ८ ॥

स एव शुभसन्धाता लग्नाधीशोऽपि चेत्स्वयम्।
केन्द्राधिपत्यदोषस्तु बलवान् गुरुशुक्रयोः ॥ ९ ॥

मारकत्वेऽपिच तयोर्मारकस्थानसंस्थितिः।
बुधस्तदनु चन्द्रो वै भवेत्तदनु तद्विधः ॥ १० ॥

न रन्ध्रेशत्वदोषस्तु सूर्याचन्द्रमसोर्भवेत्।
कुजस्य कर्मनेतृत्वप्रयुक्तशुभकारिता ॥ ११ ॥

त्रिकोणस्यापि नेतृत्वे न कर्मेशत्वमात्रतः।
यद्यद्भावगतौ वापि यद्यद्भावेशसंयुतौ ॥ १२ ॥

तत्फलानि प्रदेयानि प्रदिशेतां तमोग्रहौ।
केन्द्रित्रिकोणपतयस्सम्बन्धेन परस्परम् ॥ १३ ॥

इतरैरप्रसक्ताश्चेद्विशेषशुभदायकाः।
केन्द्रत्रिकोणनेतारौ दोषयुक्तावपि स्वयम् ॥ १४ ॥

(निवसेतां व्यत्ययेन तावुभौ धर्मकर्मणोः।
एकत्रान्यतरो वापि वसेच्चेद्योगकारकः)
त्रिकोणाधिपयोर्मध्ये सम्बन्धो येन केनचित् ॥ १५ ॥

केन्द्रनाथस्य बलिनो भवेद्यदि स योगकृत्।
दशास्वपि भवेद्योगः प्रायशो योगकारिणोः ॥ १६ ॥

दशाद्वयीमध्यगतस्तदायुश्शुभकारिणाम्।
योगकारकसम्बन्धात् पापिनोऽपि ग्रहास्स्वतः ॥ १७ ॥

तत्तद्भुक्त्यनुसारेण दिशेयुर्यौगिकं फलम्।
यदि केन्द्रे त्रिकोणे वा निवसेतां तमोग्रहौ ॥ १८ ॥

नाथेनान्यतरस्यैव संबन्धाद्योगकारकौ।
केन्द्रत्रिकोणाधिपयोरैक्यात्तौ योगकारकौ ॥ १९ ॥

अस्य त्रिकोणपतिना सम्बन्धो यदि किं परम्।
धर्मकर्माधिनेतारौ रन्ध्रलाभाधिपौ यदि ॥ २० ॥

तयोस्संयोगमात्रेण न योगं लभते नरः।
अष्टमं ह्यायुषस्स्थानमष्टमादष्टमं च यत् ॥ २१ ॥

तयोरपि व्ययस्थानं मारकस्थानमुच्यते।
एवं द्वादशभावानामायुर्मारकचिन्तनम् ॥ २२ ॥

तत्राप्याद्याद् व्ययस्थानादुत्तरं बलवत्तरम्।
तदीशितुस्तत्रगताः पापिनस्तेन सङ्गताः ॥ २३ ॥

तेषां दशाविपाकेषु संभवेन्निधनं नृणाम्।
तेषामसंभवे साक्षाद् व्ययाधीशदशास्वपि ॥ २४ ॥

अलाभे पुनरेतेषां संबन्धेन व्ययेशितुः।
क्वचित् सुखानां च दशास्वष्टमेशदशासु च ॥ २५ ॥

केवलानां च पापानां दशासु निधनं क्वचित्।
कल्पनीयं बुधैर्नृणां मारकानामदर्शने ॥ २६ ॥

मारकैस्सह संबन्धान्निहन्ता पापकृच्छनिः।
अतिक्रम्येतरान् सर्वान् भवत्येव न संशयः ॥ २७ ॥

न दिशेयुर्ग्रहास्सर्वे स्वदशासु स्वभुक्तिषु।
शुभाशुभफलं नृणामात्मभावानुरूप्यतः ॥ २८ ॥

आत्मसंबन्धिनो ये च ये ये निजसधर्मिणः।
तेषामन्तर्दशास्वेव दिशन्ति स्वदशाफलम् ॥ २९ ॥

स्वदशायां त्रिकोणेशो भुक्तौ केन्द्रपतेश्शुभम्।
दिशेत् सोऽपि तथा नोचेदसंबन्धेऽपि पापकृत् ॥ ३० ॥

आरम्भो राजयोगस्य भवेन्मारकभुक्तिषु।
प्रथयन्ति तमारभ्य क्रमशः पापभुक्तयः ॥ ३१ ॥

तत्सम्बन्धिशुभानां च तथा पुनरसंयुजाम् ।
शुभानां च समत्वेन नासंयुग्योगकारिणाम् ॥ ३२ ॥

शुभस्य स्वनियुक्तस्य दशायां योगकारका: ।
स्वस्वभुक्तिषु यच्छन्ति कुत्रचिद्योगजं फलम् ॥ ३३ ॥

तमोग्रहौ शुभारूढावसंबन्धेन केन चित् ।
अन्तर्दशानुरूपेण भवेतां योगकारकौ ॥ ३४ ॥

पापा यदि दशानाथाश्शुभानां यदि संयुजाम् ।
भुक्तय: पापफलदास्तत्संयुक्छुभभुक्तय: ॥ ३५ ॥

भवन्ति मिश्रफलदा भुक्तयो योगकारिणाम् ।
अत्यन्तपापफलदा भवन्ति तदसंयुजाम् ॥ ३६ ॥

सत्यपि स्वेन संबन्धे न हन्ति शुभभुक्तिषु
हन्त्यसत्यपि संबन्धे मारक: पापभुक्तिषु ॥ ३७ ॥

परस्परदशायां स्वभुक्तौ सूर्यजभार्गवौ ।
प्रदिशेतां व्यत्ययेन विशेषेण शुभाशुभम् ॥ ३८ ॥

प्रतिलग्नं समालक्ष्य पूर्वोद्दिष्टाविरोधत: ।
तत्तद्ग्रहस्वरूपाणि क्रमेणैव विवृण्महे ॥ ३९ ॥

मन्दसौम्यसिता: पापाश्शुभौ गुरुदिवाकरौ ।
न शुभं योगमात्रेण प्रभवेच्छनिजीवयो: ॥ ४० ॥

परं तु तेन जीवस्य पापत्वमपि सिद्ध्यति ।
कविस्साक्षान्निहन्ता स्यान्मारकत्वेन लक्षित: ॥ ४१ ॥

मन्दादयो न हन्तारो भवेयु: पापिनो ग्रहा: ।
शुभाशुभफलान्येवं ज्ञातव्यानि क्रियाभुव: ॥ ४२ ॥

जीवशुक्रेन्दव: पापाश्शुभौ शनिदिवाकरौ ।
राजयोगकरस्साक्षादेक एवांशुमत्सुत: ॥ ४३ ॥

जीवादयो ग्रहा: पापा घ्नन्ति मारकलक्षणा: ।
बुधैस्तत्तत्फलान्येवं ज्ञेयानि वृषजन्मय: ॥ ४४ ॥

भौमजीवारुणा: पापा: एक एव शुभ: कवि: ।
शनैश्चरेण जीवस्य योगो मेषबुधो यथा ॥ ४५ ॥

नालं [1]शशी निहन्तुं तं लक्षणा: पापिनस्त्वलम् ।
ज्ञातव्यानि द्वन्द्वजस्य फलान्येतत्प्रकारत: ॥ ४६ ॥

भार्गवेन्दुसुतौ पापौ भूसुताङ्गिरसौ शुभौ ।
एक एव भवेत् साक्षाद् भूसुतो योगकारक: ॥ ४७ ॥

न हन्ता रविरन्ये च पापिनो मारकाह्वया: ।
कुलीरसंभवस्यैवं फलान्यूह्यानि सूरिभि: ॥ ४८ ॥

रौहिणेयसितौ पापौ कुज एकश्शुभावह: ।
प्रभवेद्योगमात्रेण न शुभं गुरुशुक्रयो: ॥ ४९ ॥

घ्नन्ति सौम्यादय: पापा ग्रहा लक्षणलक्षिता: ।
एवं फलानि ज्ञेयानि सिंहजस्य मनीषिभि: ॥ ५० ॥

कुजजीवेन्दव: पापा एको भृगुसुतश्शुभ: ।
भार्गवेन्दुसुतावेव भवेतां योगकारकौ ॥ ५१ ॥

न हन्ति कविरन्ये तु मारकाख्या: कुजादय: ।
घ्नन्ति पापा: फलान्यूह्यान्येवं कन्योद्भवस्य हि ॥ ५२ ॥

जीवार्कमहिजा: पापाश्शनैश्चरबुधौ शुभौ ।
भवेतां राजयोगस्य कारकाविन्दुतत्सुतौ ॥ ५३ ॥

कुजो न हन्ति जीवाद्या: परे मारकलाञ्छना: ।
निहन्तार: फलान्येव ज्ञातव्यानि तुलाभुव: ॥ ५४ ॥

सौम्यभौमसिता: पापाश्शुभ एको निशाकर: ।
सूर्याचन्द्रमसावेव भवेतां योगकारकौ ॥ ५५ ॥

जीवो न हन्ता सौम्याद्या हन्तारो मारकध्वजा: ।
तत्तत्फलानि विज्ञेयान्येवं वृश्चिकजन्मन: ॥ ५६ ॥

एक एव कवि: पापश्शुभौ भौमदिवाकरौ ।
योगो भास्करसौम्याभ्यां स्यान्नहन्तांशुमत्सुत: ॥ ५७ ॥

घ्नन्ति शुक्रादय: पापा मारकत्वोपलक्षिता: ।
ज्ञातव्यानि फलान्येवं विबुधैश्चापजन्मन: ॥ ५८ ॥

कुजजीवेन्दव: पापाश्शुभौ भार्गवचन्द्रजौ ।
स्वयं नैव निहन्ता स्यान्मन्दो भौमादय: परे ॥ ५९ ॥

तल्लक्षणा निहन्तार: कविरेकस्सुयोगकृत् ।
ज्ञातव्यानि बुधैरेवं फलानि मृगजन्मन: ॥ ६० ॥

जीवशुक्रकुजा: पापा एको दैत्यगुरुश्शुभ: ।
राजयोगकरो भौमस्स्वयमेको बृहस्पति: ॥ ६१ ॥

न हन्ता हन्ति भौमाद्या मारकत्वेन निश्चिता: ।
एवमेव फलान्येतान्यूह्यानि घटजन्मन: ॥ ६२ ॥

मन्दशुक्रांशुमत्सौम्या: पापा भौमविधू शुभौ ।
महीसुतगुरू योगकारिणौ नैव भूसुत: ॥ ६३ ॥

मारको मारकाभिख्या मन्दाद्या घ्नन्ति पापिन: ।
इत्यूह्यानि बुधैस्तत्तत्फलानि झषजन्मन: ॥ ६४ ॥

शुभपापात्मकतया निर्दिष्टेभ्य: परे ग्रहा: ।
भवन्ति फलदास्स्थानसाहचर्यानुगुण्यत: ॥ ६५ ॥

[1] शनिर्निहन्तुं.

पुत्रदारादिलाभस्य शुभात्मकतया ग्रहाः ।
प्रदिशन्ति शुभा एव स्वदशासु स्वभुक्तिषु ॥ ६६ ॥

पापिनश्चेद् ग्रहास्तेषामुच्चत्वे सति किं फलम् ।
बलवत्वे घातुकानां यत्फलं लभ्यते हि तत् ॥ ६७ ॥

भावास्सर्वे शुभपति युता वीक्षिता वा शुभेशै-
स्तत्तद्भावास्सकलफलदाः पापदृग्योगहीनाः ।
पापास्सर्वे भवनपतयश्चाशुभाश्चेत्तथैव
खेटास्सर्वे शुभमपि फलं निम्नमूढारिहीनैः ॥ ६८ ॥

तत्तद्भावात्त्रिकोणस्वसुखमदनखेटास्पदे सौम्ययुक्ते
पापानां दृष्टिहीने भवनपसहिते पापखेटैरयुक्ते ।
भावानां पुष्टिमाहुस्सकलशुभकरीमन्यथा चेत्प्रणाशो
मिश्रं मिश्रैर्ग्रहेन्द्रास्सकलमपि तथा मूर्त्तिभावाधिकानाम् ॥ ६९ ॥

नाशस्थानगतो दिवाकरकरैर्लुप्तस्तु यद्राशिपो
नीचारातिगतोऽथवा यदि भवेत् सौम्यैरयुक्तेक्षितः ।
तद्भावस्य विनाशनं मुनिगणाश्शंसन्ति खेटैर्युता-
श्चेत्तत्रापि फलप्रदो नहि तथा लग्नादिभावाः क्रमात् ॥ ७० ॥

यस्माद्यस्माद्भावाद् द्विर्द्वादशसप्तमस्थितास्सौम्याः ।
तस्मिन् तस्मिन् वृद्धिर्दशमचतुर्थस्थितैस्तद्वत् ॥ ७१ ॥

भ्रातृपः कारको वापि पुत्रपः कारकोऽपि वा ।
कलत्रेशः कारको वा धनपः कारकोऽपि वो ॥ ७२ ॥

यस्य जन्मनि काले तु यावद्ग्रहसमन्वितः ।
तावद्भिर्भ्रातृभिः पुत्रैः कलत्रैश्च भवेद्युतः ॥ ७३ ॥

भ्रातृपुत्रकलत्रेषु तत्तद्भावोपकारकाः ।
रिप्फारिरन्ध्रसंस्थाश्चेत्तदीशेन युताश्च वा ॥ ७४ ॥

मन्दाहिशिखिनामेकयुक्तास्तद्वीक्षिताश्च वा ।
भ्रातृपुत्रकलत्राणामभावं तस्य निर्दिशेत् ॥ ७५ ॥

क्रूरास्स्वभवनोच्चस्थाश्शुभभावेशसंयुताः ।
भावानां तत्र वृद्धिस्स्याद् विपरीते विपर्ययः ॥ ७६ ॥

विलग्नहोरालग्नोत्थैरायुर्योगानथ ब्रुवे ।
लग्नादेकघटीमात्रं योनिलग्नं दिने दिने ॥ ७७ ॥

परं तु घटिकालग्नं निर्दिशेद्दैववित्तमः ।
तथा सार्धद्विघटिकामितं कालाद्विलग्नभाक् ॥ ७८ ॥

प्रयाति लग्नं तन्नाम होरालग्नमितीरितम् ।
चरे चरस्थिरद्वन्द्वाः स्थिरे द्वन्द्वचरस्थिराः ॥ ७९ ॥

द्वन्द्वे स्थिरोभयचरा दीर्घमध्याल्पकायुषः ।
लग्नेशरन्ध्रपत्योश्च लग्नेन्द्वोर्लग्नहोरयोः ॥ ८० ॥

सूत्रमेतत्प्रयुञ्जीत संवादादायुरुच्यते ।
राहुः केतुः पितरि वा नीचभे वापि संस्थिते ॥ ८१ ॥

पूर्णमल्पतरं ज्ञेयं विपरीते विपर्ययः ।
दिनेशाविनशुक्रौ च राजायोगकराः स्मृताः ॥ ८२ ॥

कारकस्य त्रिकोणर्क्षे यदा चरति साथवा ।
तदा तेषां तु निर्याणमपमृत्युस्तथा श्रयेत् ॥ ८३ ॥

पत्नीभावात् स्वस्य पितुश्वराभ्यां धनभावतः ।
मुकुरर्क्षदशां मातुरानयेद् बुद्धिमान्नरः ॥ ८४ ॥

तस्मात्तदीशपर्यन्तसङ्ख्यामत्र दशां विदुः ।
देहाधिपेन पापे वा षष्ठाष्टव्ययगेऽपि वा ॥ ८५ ॥

न देहसुखमाप्नोति शत्रवे तत्र रोगवान् ।
देहे पापे देहपे च बलहीने च रोगवान् ॥ ८६ ॥

वाहनाधिपतेर्देहसम्बन्धो भाग्यपेन चेत् ।
गुरुणापि च संदृष्टो राजपूज्यो भवेद् ध्रुवम् ॥ ८७ ॥

कुटुम्बपुत्रपौ पापयुक्तौ शुक्रेण संयुतौ ।
षष्ठादित्रिषु संस्थौ च तावत्सङ्ख्यकलत्रहा ॥ ८८ ॥

कलत्रकारकः केन्द्रं त्रिकोणं वा गतो यदि ।
स्वस्थानं तेषु चैको वा गत एकविवाहकृत् ॥ ८९ ॥

गृहाधिपेन देहस्य देहपेन गृहस्य वा ।
योगो भवति चेत्तस्य वेश्मलाभस्सुखाद् भवेत् ॥ ९० ॥

देहेशो नेत्रसम्बद्धस्स शुक्रो नेत्रहानिदः ।
आदित्येन तु जात्यन्धश्चन्द्रेण तु निशान्धता ॥ ९१ ॥

वाक्स्थानाधिपवागीशौ षष्ठारित्रिषु संस्थितौ ।
षडादिस्थानपे हीने मूकत्वं च भवेद् ध्रुवम् ॥ ९२ ॥

धनाधिपे लाभगते लाभेशे धनमागते ।
तादृशौ केन्द्रगौ वापि धनलाभ उदीर्यते ॥ ९३ ॥

वित्तलाभाधिपे स्वोच्चे स्वक्षेत्रे मित्रभेऽपि वा ।
लग्नात् केन्द्रत्रिकोणे वा वित्तलाभं विनिर्दिशेत् ॥ ९४ ॥

वित्तेशे चारिभावस्थे व्ययेशे वित्तगेऽपि वा ।
लाभेशेऽन्त्यादिरन्ध्रस्थे धनहानिं वदेद् बुधः ॥ ९५ ॥

चन्द्रेण देहपेनैव देहसंबन्धमाश्रितः ।
वाहनाधिपतिस्तस्य वाहनं भवति ध्रुवम् ॥ ९६ ॥

विद्यास्थानाधिपे जीवे बुधे केन्द्रत्रिकोणगे ।
विद्यालाभो विनिर्देश्यश्शास्त्रेष्वपि च वत्कृता ॥ ९७ ॥

षष्ठादिस्थानगे वापि विद्याहीनो भवेद् ध्रुवम् ।
भाग्यवाहनदेहेशाः कर्मस्थास्तत्पतिस्तनौ ॥ ९८ ॥
लग्नं पश्यन्ति च यदा सिंहासनपतिर्भवेत् ।
चन्द्रवाहेशदेहानां सम्बन्धे त्वश्ववाहनम् ॥ ९९ ॥
शुक्रेणान्दोलिकासिद्धिर्गुरुणा हेमवाहनम् ।
भाग्यपो वाहनेशश्च लाभस्थाने यदि स्थितौ ॥ १०० ॥
पश्यन्तौ वाहनस्थानं तस्य भाग्यं भवेद् ध्रुवम् ।
भाग्यपो वाहनस्थश्चेद् दृष्टो वापि शुभैर्युतः ॥ १०१ ॥
शुभदृष्टियुतो वापि गुरुभार्गवसंयुतः ।
हेमवाहनमाप्नोति चन्द्रवान् चन्द्रयोगतः ॥ १०२ ॥
सप्तमेशबलाच्छत्रं चामरं शुक्रयोगतः ।
वाहनाधिपतिर्भाग्ये तदीशः केन्द्रगो यदि ॥ १०३ ॥
शुभक्षेत्रे शुभयुते लग्नेशे चापि केन्द्रगे ।
आन्दोलिका भवेत्तस्य लग्नपे वाहने स्थिते ॥ १०४ ॥
भाग्यपो वाहनेशश्च शुभश्चेद्देववाहनम् ।
धनेशे वाहनेशे च केन्द्रस्थे शुभसंयुते ॥ १०५ ॥
चन्द्रयोगो यदि भवेदश्वप्राप्तिर्न संशयः ।
लाभेशे वाहनं याते लग्ने वाहेश्वरे शुभे ॥ १०६ ॥
दृष्टे वा वाहनस्थाने निधिलाभो भवेन्नृणाम् ।
यदुक्तं तु फलं पूर्वं तत्तत् स्त्रीपुंसयोस्समम् ॥ १०७ ॥
एतावान् वर्तते तत्र विशेषस्स तु कथ्यते ।
वैधव्यं निधनगृहे पतिस्सौभाग्यं सुखं च जामित्रे ॥
सौन्दर्यं लग्नगृहे विचिन्तयेत् पुत्रसंपदं नवमे ॥ १०८ ॥
एषु स्थानेषु युतास्सौम्याश्शुभदा बलान्विता ज्ञेयाः ।
क्रूरास्त्वनिष्टफलदा भवनेशविवक्षितास्सदा चिन्त्याः ॥ १०९ ॥
अष्टमे शुभसंयुक्ते धने पापग्रहान्विते ।
कन्या सुमङ्गली ज्ञेया मदे पापविवर्जिते ॥ ११० ॥
सप्तमे नवमे सौम्ये लाभे भूसूनुसंयुते ।
बहुक्षेत्रधनैर्युक्ता पुत्रपौत्रादिसम्पदा ॥ १११ ॥
चतुर्थे दशमे सौम्ये चाष्टमे पापवर्जिते ।
कन्या सुमङ्गली ज्ञेया व्यत्यये विधवा भवेत् ॥ ११२ ॥
जामित्रे गुरुसंयुक्ते पूर्णे शीतकरे तनौ ।
मदेशे बलसंयुक्ते दीर्घायुश्श्रीसुतैर्युता ॥ ११३ ॥
धने शुभग्रहैर्युक्ते चाष्टमे पापवर्जिते ।
मदेशे शुभसंदृष्टे सौमङ्गल्यादिकं भवेत् ॥ ११४ ॥

हयाङ्गे पञ्चमे जीवे लाभे रविसितान्विते ।
चतुर्थेऽष्टमगे शुद्धे सौमङ्गल्यादिसम्पदः ॥ ११५ ॥
लग्नात्त्वष्टमगे पापे मदेशे नीचपापगे ।
विधवा सा भवेन्नारी सदा क्लेशसमन्विता ॥ ११६ ॥
धनव्ययगतैः पापैरष्टमे सप्तमेऽपि वा ।
धूने शुभाशुभैर्युक्ते सपापश्चाष्टमे शशी ॥ ११७ ॥
वित्ते पापग्रहैर्युक्ते सा नारी विधवा भवेत् ।
मदेशे स्वोच्चगे कोणे शुभग्रहनिरीक्षिते ॥ ११८ ॥
शुभक्षेत्रे शुभांशे वा स्थिते सौमङ्गलं भवेत् ।
पञ्चमे नवमे सौम्ये व्यये भार्गवसंयुते ॥ ११९ ॥
सुमङ्गली च सुभगा राजपत्नीत्वमाप्नुयात् ।
गुरौ शुक्रे मृतापत्या मृतगर्भा च मङ्गले ॥ १२० ॥
अष्टमस्था ग्रहा नूनं न स्त्रियाश्शोभनप्रदाः ।
भवन्ति षट् सुतास्तस्याः पञ्चमस्थो यदा रविः ॥ १२१ ॥
मङ्गले च त्रयः पुत्रा गुरौ पञ्च प्रकीर्तिताः ।
पञ्चमस्थे निशानाथे स्त्रियाः कन्याद्वयं भवेत् ॥ १२२ ॥
बुधे कन्याश्चतस्रस्तु शुक्रे सप्तैव कन्यकाः ।
षडेव कन्या जायन्ते धर्मस्थाने यदा स्थितः ॥ १२३ ॥
सप्तमे च यदा राहुस्त्रयः पुत्रा भवन्ति हि ।
कर्कटे मध्यमश्चान्त्यः कीटे प्रथममध्यमौ ॥ १२४ ॥
मकरे प्रथमो भागो मीनेऽन्त्यांशाः श्रियः कलाः ॥ १२५ ॥
आषोडशाब्दात् पुरतश्च पित्रोः फलं तदूर्ध्वं [1] सुत एव भुङ्क्ते ।
स्त्री चेन्नवाब्दात् परतश्च भर्तुर्विभर्तृका चेत् स्वयमेव भुङ्क्ते ॥
ग्रहाणां दृष्टियोगाद्यैर्नानारूपाणि विग्रहे ।
चिह्नान्यपि च दृश्यन्ते स्त्रीणां पुंसां पृथक् पृथक् ॥ १२७ ॥
जातकेष्वितरे योगा दर्शिताः पूर्वसूरिभिः ।
मार्गप्रदर्शनं चात्र कृतं [2] दर्शनकांक्षिभिः ॥ १२८ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारण
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदीबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातत्त्वसारभूते
श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले
होराशास्त्रनिरूपणं नामाष्टमस्तरङ्गः.

1) शुभ. 2) सङ्ग्रह.

अथ नवमस्तरंगः

होराशास्त्रं समुद्दिष्टमाकर्ण्यानन्दितोऽभवम् ।
स्त्रीणां पुंसां च देहेषु सन्ति लक्ष्माण्यनेकधा ॥ १ ॥

इत्याख्यातमभूत् पूर्वमपूर्वगुणार्णव ! ।
लक्षणानि पुनः कानि? श्रोतुं मे वर्तते स्पृहा ॥ २ ॥

तानि ब्रूहि कृपाम्भोधे! पूरयास्मदभीप्सितम् ।
पुत्र! तत्रादितस्स्त्रीणामङ्गलक्ष्माणि चक्ष्महे ॥ ३ ॥

सदा गृही सुखं भुङ्क्ते स्त्री लक्षणवती यदि ।
अतस्सुखसमृद्ध्यर्थमादौ लक्षणमीर्यते ॥ ४ ॥

वपुरावर्तगन्धाश्च छाया सत्त्वं स्वरो गतिः ।
वर्णश्चेत्यष्टधा प्रोक्ता बुधैर्लक्षणभूमिका ॥ ५ ॥

पादस्य तलमारभ्य यावन्मौलिरुहाः क्रमात् ।
शुभाशुभानि वक्ष्यामि लक्षणान्यधुना शृणु ॥ ६ ॥

आदौ पादतले रेखास्ततोऽङ्गुष्ठांगुलीनखाः ।
पृष्ठं गुल्फद्वयं पार्ष्णिजङ्घारोमाणि जानुनी ॥ ७ ॥

ऊरू कटिनितम्बस्फिग्भगो जघनवस्तिगे ।
नाभिः कुक्षिः पार्श्वयुग्मोदरमध्यवलित्रयम् ॥ ८ ॥

रोमाली हृदयं वक्षो वक्षोजद्वयचूचुकम् ।
जत्रुस्कन्धौ च कक्षौ द्वौ मणिवन्धकरद्वयम् ॥ ९ ॥

पाण्योस्तलं पारिपृष्ठं रेखांगुष्ठांगुलीनखाः ।
पृष्ठं कृकाटिका कण्ठचुबुके च हनुद्वयम् ॥ १० ॥

कपोलौ वक्त्रमधरोऽधरोष्ठद्विजजिह्विकाः ।
घुण्टिका तालुहसिता नासिका क्षुतमक्षिणी ॥ ११ ॥

पक्ष्मभ्रूकर्णफालानि मौलिस्सीमन्तमौलिजाः ।
षष्टिष्षडुत्तरा योषिदङ्गलक्षणसत्खनिः ॥ १२ ॥

स्त्रीणां पादतलं स्निग्धं मांसलं मृदुलं तथा ।
अस्वेदमुष्णमरुणं बहुभाग्योचितं स्मृतम् ॥ १३ ॥

रूक्षं विवर्णं परुषं खण्डितं प्रतिविम्बितम् ।
शूर्पाकारं विशुष्कं च दुःखदौर्भाग्यसूचकम् ॥ १४ ॥

चक्रस्वस्तिकशंखाब्ज ध्वजमीनातपत्रवत् ।
यस्याः पादतले रेखा सा भवेत् क्षितिपाङ्गना ॥ १५ ॥

रेखास्स्युस्सर्पकाकाभा दुःखदारिद्र्यसूचकाः ।
उन्नतो मांसलोऽङ्गुष्ठो वर्तुलोऽतुलभोगदः ॥ १६ ॥

चक्रो ह्रस्वश्च चिपिटस्सुखसौभाग्यभञ्जकः ।
विधवा विपुलेन स्याद्दीर्घाङ्गुष्ठेन दुर्भगा ॥ १७ ॥

मृदवोऽङ्गुलयश्शस्ता घना वृत्तास्समुन्नताः ।
दीर्घाङ्गुलीभिः कुलटाः कृशाभिरतिनिर्धनाः ॥ १८ ॥

अल्पायुषश्च ह्रस्वाभिर्भुग्नाभिर्भुग्नवर्तिनी ।
चिपिटाभिर्भवेद् दासी विरलाभिर्दरिद्रता ॥ १९ ॥

परस्परसमारूढा यदांगुल्यो भवन्तिहि ।
हत्वा बहूनपि पतीन् परप्रेष्या भवेत्तथा ॥ २० ॥

यस्याः प्रतिसमायान्त्या रजो भूमेस्समुच्चरेत् ।
[1] षडंगुला प्रजायेत कुलत्रयविनाशिनी ॥ २१ ॥

यस्याः कनिष्ठा भूमिं न गच्छन्त्यास्तु पथि स्पृशेत् ।
सा निहत्य पतिं योगाद् द्वितीयं लभते पतिम् ॥ २२ ॥

अनामिका मध्यमा च यस्या भूमिं न संस्पृशेत् ।
पतिद्वयं निहन्त्याद्या द्वितीया तु पतित्रयम् ॥ २३ ॥

प्रदेशिनी भवेद्यस्या अंगुष्ठादतिरेकिणी !
कन्यैव कुलटा सा स्यादेष एव विनिश्चयः ॥ २४ ॥

स्निग्धास्समुन्नतास्ताम्रा वृत्ता पादनखाश्शुभाः ।
राज्ञीत्वसूचकं नृणां पादपृष्ठं समुन्नतम् ॥ २५ ॥

अस्वेदमसिराढ्यं च मांसलं मसृणं मृदु ।
दरिद्रा नम्रमध्येन शिरालेन सदाध्वगा ॥ २६ ॥

रोमाढ्येन भवेद् दासी निर्मांसेन च दुर्भगा ।
गूढौ गुल्फौ शुभौ प्रोक्तौ वर्तुलावशिरालकौ ॥ २७ ॥

स्थपुटौ शिथिलौ दृश्यौ स्यातां दौर्भाग्यसूचकौ ।
समपार्ष्णिश्शुभा नारी मृदुपार्ष्णिस्तु दुर्भगा ॥ २८ ॥

कुलटोन्नतपार्ष्णिश्च दीर्घपार्ष्णिश्च दुःखभाक् ।
रोमहीने समे स्निग्धे जङ्घे चङ्क्रमवर्तुले ॥ २९ ॥

सा राजपत्नी भवति विशिरे च मनोहरे ।
एकरोमा राजपत्नी द्विरोमा सुखिनी सदा ॥ ३० ॥

1) सा पांसुला.

स्त्रिरोमा रोमकूपेषु भवेद् वैधव्यदुःख भाक् ।
वृत्तं पिशितसमग्रं जानुयुग्मं प्रशस्यते ॥ ३१ ॥
निर्मांसं स्वैरचारिण्या दरिद्रायास्तु विश्लथम् ।
विशिरैः करभाकारैरूरुभिर्मसृणैर्घनैः ॥ ३२ ॥
सुवृत्तैः रोमरहितैर्भवेयुर्भूपवल्लभाः ।
वैधव्यं रोमसंयुक्तैर्दौर्भाग्यं चिपिटैरपि ॥ ३३ ॥
मध्यच्छिद्रैर्महादुःखं रूक्षत्वग्भिर्दरिद्रता ।
चतुर्भिरङ्गुलैश्शस्ता कटिर्विंशतिसंयुतैः ॥ ३४ ॥
समुन्नतनितम्बाढ्या चतुरश्रा मृगीदृशा ।
विनता चिपिटा दीर्घा निर्मांसा सङ्कटा कटिः ॥ ३५ ॥
ह्रस्वा रोमयुता नार्या दुःखवैधव्यसूचिका ।
नितम्बबिम्बौ नारिणामुन्नतौ मांसलौ पृथू ॥ ३६ ॥
महा भोगाय संप्रोक्तौ तदन्यौ दुःखदौ मतौ ।
कपित्थफलवद् वृत्तौ पृथुलौ मांसलौ घनौ ॥ ३७ ॥
स्फिजौ वलिविनिर्मुक्तौ रतिसौख्यविवर्धनौ ।
शुभः कमठपृष्ठाभो गजस्कन्धोपमो भगः ॥ ३८ ॥
वामोन्नतस्तु कन्यासूः पुत्रसूर्दक्षिणोन्नतः ।
आखुरोमा गूढमणिः सुश्लिष्टस्संहतः पृथुः ॥ ३९ ॥
तुङ्गः कमलवर्णाभः शुभोऽश्वत्थदलाकृतिः ।
कुरङ्गखुररूपोऽथ चुल्लीकोटरसन्निभः ॥ ४० ॥
रोमशो विवृतास्यश्च द्रव्यनाशोतिदुर्भगः ।
शङ्खावर्तो भगे यस्यास्सा गर्भमिह नेच्छति ॥ ४१ ॥
चिपिटः खर्पराकारः किङ्करीपददो भगः ।
वंशवेतसपत्राभो राजिरोमोच्चनासिका ॥ ४२ ॥
विकटः कुटिलाकारो लम्बगल्लश्श्लथोऽशुभः ।
भगस्य फालं जघनं विस्तीर्णं तुङ्गमांसलम् ॥ ४३ ॥
पृथुलं मृदुरोमाढ्यं दक्षिणावर्तमीडितम् ।
वामावर्तं च निर्मांसं भुग्नं वैधव्यसूचकम् ॥ ४४ ॥
सङ्कटं स्थपुटं रूक्षं जघनं दुःखदं सदा ।
वस्तिः प्रशस्ता विपुला मृद्वी स्तोकसमुन्नता ॥ ४५ ॥
रोमशा च शिराला च रेखाङ्का सैव शोभना ।
गम्भीरा दक्षिणावर्ता नाभिः स्यात् सुखसम्पदे ॥ ४६ ॥
वामावर्ता समुत्ताना व्यक्तग्रन्थिर्न शोभना ।
सूते सुतान् बहून्नारी पृथुकुक्षिस्सुखास्पदान् ॥ ४७ ॥

क्षितीशं जनयेत्पुत्रं मण्डूकाभेन कुक्षिणा ।
उन्नतेन वलीभाजा सावर्तेनापि कुक्षिना ॥ ४८ ॥
वन्ध्या प्रव्रजिता दासी क्रमाद्योषा भवेदिह ।
समैस्समांसैर्मृदुभिर्योषिन्मग्नास्थिभिश्शुभैः ॥ ४९ ॥
पार्श्वैस्सौभाग्यसुखयोर्निधानं स्यान्नसंशयः ।
यस्या दृश्ये सिरे पार्श्वे उन्नते रोमसंयुते ॥ ५० ॥
अनपत्या च दुश्शीला सा भवेद् दुःखशेवधिः ।
उदरेणातितुच्छेन विशिरेण मृदुत्वचा ॥ ५१ ॥
योषिद्भवति भोगाढ्या नित्यं मृष्टान्नसेविनी ।
कुम्भाकारं दरिद्राया जठरं च मृदङ्गवत् ॥ ५२ ॥
कूष्माण्डाभं यवासं वा दुष्पुत्रो जायते स्त्रियाः ।
सुविशालोदरा नारी निरपत्या च दुर्भगा ॥ ५३ ॥
प्रलम्बजठरा हन्ति श्वशुरं चापि देवरम् ।
मध्यक्षामा च सुभगा भोगाढ्या सुवलित्रया ॥ ५४ ॥
ऋज्वी तन्वी च रोमाली यस्यास्सा नर्मशर्मभूः ।
कपिला कुटिला स्थूला प्रोद्भिन्ना रोमराजिका ॥ ५५ ॥
वैरं वैधव्यदौर्भाग्ये विदध्यादिह योषिताम् ।
निर्लोम हृदयं यस्यास्समं निम्नत्ववर्जितम् ॥ ५६ ॥
ऐश्वर्यं चाप्यवैधव्यं प्रिया पत्युश्च सा भवेत् ।
विस्तीर्णहृदया योषा पुंश्चली निर्दया तथा ॥ ५७ ॥
उद्भिन्नरोमहृदया पतिं हन्ति विनिश्चितम् ।
अष्टादशांगुलततमुरः पीवरमुन्नतम् ॥ ५८ ॥
सुखाय दुःखाय भवेद्रोमशं विषमं पृथु ।
घनौ वृत्तौ दृढौ पीनौ समौ शस्तौ पयोधरौ ॥ ५९ ॥
स्थूलाग्रौ विरलौ शुष्कौ वामोरूणां न शर्मदौ ।
दक्षिणोन्नतवक्षोजा पुत्रिणीष्वग्रणीर्मता ॥ ६० ॥
वामोन्नतकुचा सूते कन्यां सौभाग्यसुन्दरीम् ।
आबद्धद्विपुटीतुल्यौ कुचौ दौश्शील्यसूचकौ ॥ ६१ ॥
पीवरास्यौ सान्तरालौ पृथूपान्तौ न शोभनौ ।
मूले स्थूलौ क्रमकृशावग्रे तीक्ष्णौ पयोधरौ ॥ ६२ ॥
सुखदौ पूर्वकाले तु पश्चादत्यन्तदुःखदौ ।
सुदृशां चूचुकयुगं शस्तं श्यामं सुवर्तुलम् ॥ ६३ ॥
अन्तर्मग्नं च दीर्घं च कृशं क्लेशाय जायते ।
पीवराभ्यां च जत्रुभ्यां धनधान्यनिधिर्वधूः ॥ ६४ ॥

श्लथास्थिभ्यां च निम्नाभ्यां विषमाभ्यां दरिद्रिणी ।
अवद्धावनतौ स्कन्धावदीर्घावकृशौ शुभौ ॥ ६५ ॥
शुष्कौ स्थूलौ च रोमाढ्यौ प्रेष्यवैधव्यसूचकौ ।
सुगूढसन्धिसस्ताङ्गौ शुभावंसौ सुसंहतौ ॥ ६६ ॥
वैधव्यदौ समुच्चाग्रौ निर्मांसावतिदुःखदौ ।
कक्षे सुसूक्ष्मरोमाढ्ये तुङ्गे स्निग्धे च मांसले ॥ ६७ ॥
शस्ते न शस्ते गम्भीरे शिराले स्वेदमेदुरे ।
स्यातां दोषौ सुनिर्दोषौ गूढास्थिग्रन्थिकोमलौ ॥ ६८ ॥
विशिरौ च विरोमाणौ सरलौ हरिणीदृशाम् ।
वैधव्यं स्थूलरोमाणौ हूस्वौ दौर्भाग्यसूचकौ ॥ ६९ ॥
पतिक्लेशाय नारीणां परिदृश्यशिरौ भुजौ ।
अम्भोजकुड्मलाकारमंगुष्ठांगुलि सन्नखम् ॥ ७० ॥
हस्तद्वयं मृगाक्षीणां वहुभोगाय कल्पते ।
मृदु मध्योन्नतं रक्तं तलं पाण्योररन्ध्रकम् ॥ ७१ ॥
प्रशस्तं शस्तरेखाढ्यमल्परेखं शुभाश्रयम् ।
विधवा वहुरेखेण विशिरेण दरिद्रिणी ॥ ७२ ॥
भिक्षुकी च शिराढ्येन नारी करतलेन वै ।
विरोम विशिरं शस्तं पाणिपृष्ठं समुन्नतम् ॥ ७३ ॥
वैधव्यदायि रोमाढ्यं निर्मांसस्नायुमुत्सृजेत् ।
रक्ताव्यक्ता गभीरा च स्निग्धा पूर्णा च वर्तुला ॥ ७४ ॥
करे रेखाङ्गनायास्स्याच्छुभा भाग्यानुसारतः ।
मत्स्येन सुभगा नारी स्वस्तिकेन च सुप्रजाः ॥ ७५ ॥
पद्मेन भूपतेः पत्नी जनयेद् भूपतिं सुतम् ।
चक्रवर्त्तिप्रिया पाणौ नन्द्यवर्तः प्रदक्षिणः ॥ ७६ ॥
शङ्खातपत्रकमठा देवमातृत्वसूचकाः ।
तुलामानाकृती रेखा [1] वणिक्पत्नीत्वसूचिका ॥ ७७ ॥
गजवाजिवृषाकाराः करे वामे मृगीदृशः ।
रेखाः प्रासादवज्राभा भूयस्तीर्थकराश्शुभाः ॥ ७८ ॥
कृषीवलस्य पत्नी स्याच्छकटेन युगेन वा ।
चामरांकुशकोदण्डै राजपत्नी भवेद् ध्रुवम् ॥ ७९ ॥
अङ्गुष्ठमूलान्निर्गत्य रेखा याति कनिष्ठिकाम् ।
यदि सा पतिहन्त्री स्याद् दूरतस्तां त्यजेत् सुधीः ॥ ८० ॥
त्रिशूलासिगदाशक्तिदुन्दुभ्याकृतिरेखया ।
नितम्बिनी कीर्त्तिमती त्यागिनी पृथिवीतले ॥ ८१ ॥

कङ्कजम्बूकमण्डूकवृकवृश्चिकभोगिनाम् ।
रासभोष्ट्रविडालानां करे रेखास्सुदुःखदाः ॥ ८२ ॥
शुभदस्सरलोंगुष्ठो वृत्तो वृत्तनखो मृदुः ।
अङ्गुल्यश्च सुपर्वाणो दीर्घवृत्ताः क्रमात् कृशाः ॥ ८३ ॥
चिपिटा स्थपिटा रूक्षाः पृष्ठरोमयुजोऽशुभाः ।
अतिहूस्वाः कृशा वक्रा विरला रोमसंयुताः ॥ ८४ ॥
अधिकांगुलयस्स्त्रीणां वहुपर्वयुजोऽशुभाः ।
अरुणास्ससिखास्तुङ्गाः करजास्सुदृशां शुभाः ॥ ८५ ॥
निम्ना विवर्णाश्शुक्तयाभाः पीता दारिद्र्यदायकाः ।
नखेषु विन्दवश्श्वेताः कुर्युस्ते स्वैरिणीं स्त्रियम् ॥ ८६ ॥
अन्तर्निमग्नवंशास्थिपृष्ठं स्यान्मांसलं शुभम् ।
पृष्ठेन रोमयुक्तेन वैधव्यं लभते ध्रुवम् ॥ ८७ ॥
भुग्नेन विनतेनापि सशिरेणापि दुःखिता ।
ऋज्वी कृकाटिका श्रेष्ठा समांसा च समुन्नता ॥ ८८ ॥
शुष्का शिराला लोमाढ्या विशाला कुटिला शुभा ।
मांसलो वर्तुलः कण्ठः प्रशस्तश्चतुरंगुलः ॥ ८९ ॥
शस्ता ग्रीवा त्रिरेखाङ्का त्वयक्तास्थिस्सुसंहता ।
निर्मांसा चिपिटा दीर्घा स्थपुटा न शुभप्रदा ॥ ९० ॥
स्थूलग्रीवा च विधवा नतग्रीवा च किङ्करी ।
वन्ध्या च चिपिटग्रीवा हूस्वग्रीवा च निर्धना ॥ ९१ ॥
चुवुकं द्व्यंगुलं शस्तं वृत्तं पीनं सुकोमलम् ।
स्थूलं द्विधा संविभक्तमायतं रोमशं त्यजेत् ॥ ९२ ॥
हनुस्चुवुकसंलग्ना निर्लोमा सुघना शुभा ।
वक्रा स्थूला कृशा हूस्वा रोमशा न शुभप्रदा ॥ ९३ ॥
शस्तौ कपोलौ वामांग्याः पीनौ वृत्तौ सुकोमलौ ।
रोमशौ परुषौ निम्नौ निर्मांसौ परिवर्जयेत् ॥ ९४ ॥
समं समांसं सुस्निग्धं सामोदं वर्तुलं मुखम् ।
जनयित्रा न सच्छायं धन्यानामिह जायते ॥ ९५ ॥
पाटलो वर्तुलस्स्निग्धो रेखारूषितमध्यभूः ।
सीमन्तिनीनामधरो धराजानिप्रियो भवेत् ॥ ९६ ॥
कृशः प्रलम्वः स्फुटितो रूक्षो दौर्भाग्यसूचकः ।
श्यामस्स्थूलोऽधरोष्ठस्स्याद्वैधव्यकलहप्रदः ॥ ९७ ॥
मसृणो मत्तकाशिन्याश्चोत्तरोष्ठस्सुभोगदः ।
किञ्चिन्मध्योन्नतो रोमपरीतश्च विरुद्धकृत् ॥ ९८ ॥

[1] वणिक्पत्नीत्वकारणम्.

गोक्षीरसन्निभाः स्निग्धा द्वात्रिंशद्दशनाश्शुभाः ।
अधस्तादुपरिष्टाच्च समास्स्तोकं समुन्नताः ॥ ९९ ॥
पीताः श्यामाश्च दशनास्स्थूला दीर्घा विपर्ययः ।
शुक्त्याकाराश्च विरला दुःखदौर्भाग्यसूचकाः ॥ १०० ॥
अधस्तादधिकैर्दन्तैर्मातरं भक्षयेत् स्फुटम् ।
पतिहीना च विकटैः कुलटा विरलैर्भवेत् ॥ १०१ ॥
जिह्वेष्टा मृष्टभोज्यस्याच्छोणा मृद्वी तथा सिता ।
दुःखाय मध्यसङ्कीर्णा पुरोभागे सविस्तरा ॥ १०२ ॥
सितया तोयमरणं श्यामया कलहप्रिया ।
दरिद्रा स्यान्मांसलया लम्बयाभक्ष्यभक्षिणी ॥ १०३ ॥
विशालया रसनया प्रमदातिप्रमादभाक् ।
स्निग्धं कोकनदाभासं प्रशस्तं तालु कोमलम् ॥ १०४ ॥
सिते तालुनि वैधव्यं पीते प्रव्रजिता भवेत् ।
कृष्णेऽपत्यवियोगार्ता रूक्षे रौद्रकुटुम्बिनी ॥ १०५ ॥
घुण्टी स्थूला सुवृत्ता च निगूढास्थिसुलोहिता ।
अप्रलम्बा शुभा घुण्टी स्थूला कृष्णा च दुःखदा ॥ १०६ ॥
अलक्षितद्विजं किञ्चित् किञ्चित्फुल्लकपोलकम् ।
स्मितं प्रशस्तं सुदृशामनिमीलितलोचनम् ॥ १०७ ॥
समवृत्तपुटा नासा लघुच्छिद्रा शुभावहा ।
स्थूलाग्रा मध्यनम्रा च न प्रशस्ता समुन्नता ॥ १०८ ॥
आकुञ्चिता च भुग्ना च वैधव्यक्लेशदायिनी ।
परप्रेष्या च चपिटा ह्रस्वा दीर्घा कलिप्रिया ॥ १०९ ॥
दीर्घायुःकृत् क्षुतं दीर्घं युगपद् द्वित्रिसंयुतम् ।
ललनालोचने शस्ते रक्तान्ते कृष्णतारके ॥ ११० ॥
गोक्षीरवर्णे पिशिते सुस्निग्धे कृष्णपक्ष्मणी ।
उन्नताक्षी न दीर्घायुस्सुवृत्ता कुलटा भवेत् ॥ १११ ॥
मेषाक्षी महिषाक्षी च केकराक्षी न शोभना ।
कामग्रहाढ्या नितरां गोपिङ्गाक्षी सुदुर्व्रता ॥ ११२ ॥
पारावताक्षी दुश्शीला रक्ताक्षी भर्तृघातिनी ।
कोटरामग्ननयना गजनेत्रा न शोभना ॥ ११३ ॥
पुंश्चली वामकाणाक्षी वन्ध्या दक्षिणकाणिका ।
रमणी मधुपिङ्गाक्षी धनधान्यसमृद्धिभाक् ॥ ११४ ॥
पक्ष्मभिस्सुघनैस्स्निग्धैः कृष्णैस्सूक्ष्मैस्सुभाग्यभाक् ।
कपिलैर्विरलैस्स्थूलैर्निन्द्या भवति कामिनी ॥ ११५ ॥

भ्रुवौ सुवर्तुले तन्व्यौ स्निग्धे कृष्णे असंहते ।
प्रशस्ते मृदुरोमाणौ सुभ्रुवः कार्मुकाकृती ॥ ११६ ॥
खररोमा च पृथुला विकीर्णा सरला स्त्रियः ।
न भ्रूः प्रशस्ता मिलिता दीर्घरोमा च पिङ्गला ॥ ११७ ॥
लम्बौ कर्णौ शुभावर्तौ सुखदौ च शुभप्रदौ ।
शष्कुलीरहितौ निन्द्यौ सिरालौ कुटिलौ कृशौ ॥ ११८ ॥
फालस्सिराविरहितो निर्लोमार्धेन्दुसन्निभः ।
अनिम्नस्त्र्यंगुलो नार्यास्सौभाग्यारोग्यकारणम् ॥ ११९ ॥
व्यक्तस्वस्तिकरेखाङ्कं ललाटं राज्यसम्पदि ।
प्रलम्बमलिकं यस्या देवरं हन्ति सा द्रुतम् ॥ १२० ॥
रोमशेन शिरालेन प्रांशुना रोगिणी मता ।
सीमन्तस्सरलश्शस्तो मौलिश्शस्तस्समुन्नतः ॥ १२१ ॥
गजकुम्भनिभो वृत्तः सौभाग्यैश्वर्यसूचकः ।
स्थूलमूर्धा च विधवा दीर्घशीर्षा तु बन्धकी ॥ १२२ ॥
विशालेनापि शिरसा भवेद् दौर्भाग्यभाजनम् ।
केशा अलिकुलच्छायास्सूक्ष्मस्निग्धास्सुकोमलाः ॥ १२३ ॥
किञ्चिदाकुञ्चिताग्राश्च कुटिलाश्चातिशोभनाः ।
परुषास्स्फुटिताग्राश्च विरलाश्च शिरोरुहाः ॥ १२४ ॥
पिङ्गला लघवो रूक्षा दुःखदारिद्र्यदायकाः ।
भ्रूवोरन्तर्ललाटे वा मशको राज्यसूचकः ॥ १२५ ॥
वामे कपोले मशकश्शोणो मृष्टान्नदस्स्त्रियाः ।
तिलकं लाञ्छनं वापि हृदि सौभाग्यकारणम् ॥ १२६ ॥
यस्या दक्षिणवक्षोजे तिलकं शोणलाञ्छनम् ।
कन्याचतुष्टयं सूत्वा सूते सा च सुतत्रयम् ॥ १२७ ॥
तिलकं लाञ्छनं शोणं यस्या वामे कुचे भवेत् ।
एकं सुतं प्रसूयादौ ततस्सा विधवा भवेत् ॥ १२८ ॥
गुह्यस्य दक्षिणे भागे तिलकं यदि योषितः ।
तदा क्षितिपतेः पत्नी सूते वा क्षितिपं सुतम् ॥ १२९ ॥
नासाग्रे मशकश्शोणो महिष्या एव तिष्ठति ।
कृष्णस्स एव भर्तृघ्नः पुंश्चल्याश्च प्रकीर्तितः ॥ १३० ॥
नाभेरधस्थं तिलकं मशको लाञ्छनं शुभम् ।
मशकस्तिलकं चिह्नं गुल्फे दारिद्र्यदायकम् ॥ १३१ ॥
करे कर्णे कपोले वा कण्ठे वामे स्फुरेद्यदि ।
एषां त्रयाणामेकं तु प्राग्गर्भे पुत्रदं भवेत् ॥ १३२ ॥

फालगेन त्रिशूलेन निर्मितेन स्वयम्भुवा ।
नितम्बिनीसहस्राणां स्वामित्वं योषिदाप्नुयात् ॥ १३३ ॥

सुप्ता परस्परं यातु दन्तान् कटकलायते ।
सुलक्ष्मापि न सा शस्ता यत् किञ्चित् प्रलपेत्सदा ॥ १३४ ॥

पाणौ प्रदक्षिणावर्तो धन्यो वामे न शोभनः ।
नाभौ श्रुता उरसि वा दक्षिणावर्त ईरितः ॥ १३५ ॥

शुभाय दक्षिणावर्तः पृष्ठवंशस्य जायते ।
अन्तः पृष्ठे नाभिसमो बह्वायुः पुष्टिवर्धनः ॥ १३६ ॥

राजपत्न्याः प्रदृश्येत भगमौलौ प्रदक्षिणः ।
स चेच्छकटभङ्गी स्याद् बहुपत्यसुखप्रदः ॥ १३७ ॥

कटिगो गुह्यवेदन पत्यपत्यविनाशनः ।
स्यातामुदरवेधेन पृष्ठावर्तौ न शोभनौ ॥ १३८ ॥

एकेन हन्ति भर्तारं भवेदन्येन पुंश्चली ।
मस्तके वा ललाटे वा स्तनमध्ये गुदेऽपिवा ॥ १३९ ॥

आवर्तद्वयमातिष्ठेन्मृतपुत्रा भवेद् ध्रुवम् ।
जिह्वायां वा कपोले वा कण्ठे वा बाहुमूलयोः ॥ १४० ॥

यद्यावर्तद्वयं तिष्ठेत् सा भूयो निष्प्रजा भवेत् ।
काकदृष्टिः केकराक्षी या नारी पृष्ठदर्शिनी ॥ १४१ ॥

मार्जारदृष्टिर्या नारी स्वदुर्भा भवेद् भुवि ।
कण्ठगो दक्षिणावर्तो दुःखवैधव्यकारकः ॥ १४२ ॥

सीमन्ते वा ललाटे वा त्याज्या दूरात्प्रयत्नतः ।
सा पतिं हन्ति दर्पेण यस्या मध्येकृकाटिकम् ॥ १४३ ॥

प्रदक्षिणो वा वामो वा लोम्णामावर्त कस्स्त्रियाः ।
एको वा मूर्धनि द्वौवा वामावामगते अपि ॥ १४४ ॥

आद्शाहात् पतिघ्नी तु त्याज्या दूरात्प्रयत्नतः ।
गन्धच्छायादिकान् पुंसो लक्षणेऽनुपदं ब्रुवे ॥ १४५ ॥

अलक्षणैस्सुचारित्रैरपि मन्दायुषं पतिम् ।
दीर्घायुषं प्रकुर्वन्ति प्रमदाः प्रमदास्पदम् ॥ १४६ ॥

अतस्सुलक्षणा योषा परिणेया विचक्षणैः ।
लक्षणानि परीक्ष्यादौ भुञ्जेद् दुर्लक्षणास्स्त्रियः ॥ १४७ ॥

अर्चिता जगतां माता याभिर्नृपवधूरिह ।
ता भवन्ति सुचारित्रा योषाः स्वाधीनभर्तृकाः ॥ १४८ ॥

स्वाधीनभर्तृकाणां च सुशीलानां मृगीदृशाम् ।
स्वर्गापवर्गावत्रैव सुलक्षणफलं हि तत् ॥ १४९ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारण-
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्र-
सारभूते श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले
सामुद्रिकाशास्त्रे स्त्रीलक्षणनिरूपणं नाम नवमस्तरङ्गः

अथ दशमस्तरंगः

एवमुक्तानि योषाणां लक्षणानि समासतः ।
अतः परं वर्णयामि नराणां लक्षणान्यहम् ॥ १ ॥

उन्मानमानगतिसंहतिसारवर्णस्नेहस्वरप्रकृति [1]) सत्वमनूकमादौ ।
क्षेत्रं [2]) ऋचां च विधिवत्कुशलो विलोक्य सामुद्रविद्वदति
यातमनागतं वा ॥ २ ॥

अस्वेदिनौ मृदुतलौ कमलोदराभौ
श्लिष्टांगुली रुचिरताम्र नखौ सुपार्ष्णी ।
उष्णौ शिराविरहितौ विनिगूढगुल्फौ
कूर्मोन्नतौ च चरणौ मनुजेश्वराणाम् ॥ ३ ॥

शूर्पाकारविरूक्षपाण्डरनखौ वक्रौ शिरासन्ततौ
संशुष्कौ विरलांगुली च चरणौ दारिद्र्यदुःखप्रदौ ।

1) सत्कमनीयमादौ. 2) मचां.

मार्गे चोत्कटिकौ कषायकलुषौ वंशस्य विच्छित्तिदौ
ब्रह्मघ्नौ परिपक्कमृत्समतलौ पीतावगम्यौ रतौ ॥ ४ ॥

दीर्घाः पादतले रेखा यस्य दृश्या हलांकुशाः ।
स धराधिपतिर्ज्ञेयः पुरुषो नात्र संशयः ॥ ५ ॥

क्रमाद् ध्रस्वे प्रशस्येते जंघे स्निग्धे त्वरोमले ।
सिंहव्याघ्रसमे जंघे धनिनां परिकीर्त्तिते ॥ ६ ॥

कृशजंघो भवेद्राजा मृगजंघोऽपि तादृशः ।
जंघे च मीनवद्यस्य सोऽपि साम्राज्यभाजनम् ॥ ७ ॥

स्थूलजंघा दीर्घजंघा जायन्ते पथिकास्सदा ।
सृगालकाकजंघा ये ते नरा दुःखभागिनः ॥ ८ ॥

एकरोमा भवेद्राजा द्विरोमा धनिको भवेत् ।
त्रिरोमा रोमकूपेषु नरो भाग्यविवर्जितः ॥ ९ ॥

ऊर्ध्वरोमा भवेद्धीरो ह्रद्रोमा चातिभीरुकः ।
मांसले जानुनी वृत्ते समे शब्दविवर्जिते ॥ १० ॥

निगूहितास्थिनी किञ्चिदुन्नते धरणीभुजाम् ।
ऊरू करिकराकारौ रोमभिः परिवर्जितौ ॥ ११ ॥

सुश्लक्ष्णौ निबिडौ नातिस्थूलौ नातिकृशौ समौ ।
स्थूलस्फिक् स धनी ज्ञेयो मांसलस्फिक् सुखी भवेत्
व्याघ्रभेकसमाकारस्फिग्भवेत् पृथिवीपतिः ॥ १२ ॥

लिङ्गेऽल्पे धनवानपत्यरहितस्स्थूलेऽपि हीनो धनै-
स्तस्मिन् वामनते सुतार्थरहितो वक्रेऽन्यथा पुत्रवान् ।
दारिद्र्यं विनतेऽल्पतनयो लिङ्गे शिरासन्तते
स्थूलग्रन्थियुते सुखी मृदुतरे सान्तप्रमेहादिमान् ॥ १३ ॥

कोशैर्निगूढैर्भूपाला दीर्घैर्भुग्नैश्च वित्तपरिहीनाः ।
ऋजुवृत्तभेदनाल्लघुशिरालशिश्नाश्च धनवन्तः ॥ १४ ॥

जलमृत्युरेकवृषणे विषमे स्त्रीचञ्चलस्समे क्षितिपः ॥
ह्रस्वायुश्चोद्बन्धे प्रलम्बवृषणश्च दीर्घायुः ।
रक्तैराढ्या मणिभिर्निर्द्रव्याः पाण्डुरैश्च मलिनैश्च ॥ १५ ॥

सुखिनस्सशब्दमूत्रा निस्स्वा निश्शब्दधाराश्च ।
द्वित्रिचतुर्धाराभिः प्रदक्षिणावर्तवलितमूत्राभिः ॥ १६ ॥

पृथिवीपतयो ज्ञेया विकीर्णमूत्राश्च धनहीनाः ।
एकैव मूत्रधारा वलिता रूपप्रधानसुतधारा ॥ १७ ॥

स्निग्धानतसममणयो धनवनितारत्नभोक्तारः ।
मणिभिश्च मध्यनिम्नैः कन्यापितरो भवन्ति निस्स्वाश्च ॥ १८ ॥

बहुपशुभाजो मध्योन्नतैश्च नात्युल्वणैर्धनिनः ।
परिशुष्कवस्तिशीर्षा धनरहिता दुर्भगाश्च विज्ञेयाः ॥ १९ ॥

कुसुमसमगन्धशुक्रा विज्ञातव्या महीपालाः ।
मधुगन्धैर्बहुवित्ता मत्स्यसुगन्धैर्बहून्यपत्यानि ॥ २० ॥

तनुशुक्लस्स्त्रीजनको मांससुगन्धिर्महाभोगी ।
मदिरागन्धे यज्वा क्षारसगन्धे च रेतसि दरिद्रः ॥ २१ ॥

शीघ्रं मैथुनकारी दीर्घायुरतोऽन्यथाल्पायुः ।
सिंहकटिर्मनुजेन्द्रः कपिकरभकटिर्धनैस्त्यक्तः ॥ २२ ॥

समजठरा रोमयुता घटपीठसमोदरा निस्वाः ।
अविकलपार्श्वा धनिनो निम्नैर्वक्रैश्च भोगसंत्यक्ताः ॥ २३ ॥

उन्नतकक्षाः क्षितिपाः कुटिलास्युर्मानवा विषमकक्षाः ।
सर्पोदरा दरिद्रा भवन्ति बह्वाशिनश्चैव ॥ २४ ॥

वृत्तविस्तीर्णगम्भीरनाभयस्सुखिनो नराः ।
विषमा वलिमध्यस्था नाभिर्दारिद्र्यकारिणी ॥ २५ ॥

दक्षिणावर्त्तिनी शस्ता वामावर्ता प्रहारिणी ।
सरोजकर्णिकाकारा नाभिः कुर्यान्महीश्वरम् ॥ २६ ॥

आढ्यो वलित्रयो ज्ञेयो बहुपुत्रश्चतुर्वलिः । ॥ २७ ॥

शस्त्रान्तं स्त्रीभोगिनमाचार्यं बहुसुतं यथाक्रमशः ।
एकद्वित्रिचतुर्भिर्विद्यावन्तं नृपं च पञ्चवलिः ॥ २८ ॥

विषमवलयो मनुष्या भवन्त्यगम्यागामिनः पापाः ।
ऋजुवलयस्सुखभाजः परदारद्वेषिणश्चैव ॥ २९ ॥

मांसलमृदुभिः पार्श्वैः प्रदक्षिणावर्तरोमभिर्भूपाः ।
विपरीतैर्निर्द्रव्यास्सुखत्वहीनाः परप्रेष्याः ॥ ३० ॥

सुभगा भवन्त्यनुत्पन्नचूचुका निर्धना विषमदीर्घैः ।
पीनोपचितनिमग्नैः क्षितिपतयश्चूचुकैस्सुखिनः ॥ ३१ ॥

हृदयं समुन्नतपृथ्ववेपनं मांसलं च नृपतीनाम् ।
अधनानां विपरीतं खररोमचितं सिरालं च ॥ ३२ ॥

समवक्षसोऽर्थवन्तः पीनैश्शूरा अकिञ्चनास्तनुभिः ।
विषमं वक्षो येषां ते निस्स्वाश्शस्त्रनिधनाश्च ॥ ३३ ॥

विषमैर्विषमो जत्रुभिरर्थविनाशोऽस्थिभिश्च परिणद्धैः ।
उन्नतजत्रुर्भोगी निम्नैर्निम्नोऽर्थवान् पीनैः ॥ ३४ ॥

चिपिटग्रीवो निस्स्वश्शुष्कशिरा यस्य च ग्रीवा ।
मेषग्रीवश्शूरश्शस्त्रान्तो मृगसमग्रीवः ॥ ३५ ॥

कम्बुग्रीवो राजा प्रलम्बकण्ठः प्रभक्षणो भवति ।
पृष्ठमभुग्नमरोमशमर्थवतामशुभदं ततश्चान्यत् ॥ ३६ ॥

अस्वेदिनः पीनोन्नतसुगन्धिसमरोमसंकुलाः कक्षाः ।
विज्ञातव्या धनीनामतोऽन्यथार्थैर्विहीनानाम् ॥ ३७ ॥

निर्मांसौ रोमचितौ भुग्नौ वक्रौ च निर्धनस्यांसौ ।
तौ विपुलावत्युच्चौ सुश्लिष्टौ शौर्यवित्तवताम् ॥ ३८ ॥

करिकरसदृशौ वृत्तावाजानुविलम्बिनौ समौ पीनौ ।
बाहू पृथिवीशानामधनानां रोमशौ ह्रस्वौ ॥ ३९ ॥

मणिबन्धात् परः पाणिस्तस्य लक्षणमुच्यते ।
तत्र चांगुष्ठ एकः स्याच्चतस्रोऽङ्गुल्यः पुनः ॥ ४० ॥

नामान्यासां यथार्थानि ज्ञेयान्यंगुष्ठतः क्रमात् ।
तर्जनी मध्यमानामा कनिष्ठा च चतुर्थिका ॥ ४१ ॥

अकर्म[1] करणः पाणिर्दक्षिणो वीक्ष्यते नृणाम् ।
वामभ्रुवां पुनर्वामस्स प्रशस्तोऽतिकोमलः ॥ ४२ ॥

श्लाघ्यश्चोष्णोऽरुणोऽस्वेदोऽच्छिद्रस्स्निग्धश्च मांसलः ।
श्लक्ष्णस्ताम्रनखो दीर्घांगुलिको विपुलः करः ॥ ४३ ॥

पाणिस्थलेन शोणेन धनी नीलेन मद्यपः ।
पीतेनागम्यनारीगः कल्मषेन धनोज्झितः ॥ ४४ ॥

(शठो नततले पाणौ निम्ने पितृधनोज्झितः)
धनी संवृतनिम्ने स्याद् विषमे निर्धनः पुनः ।
अरेखं बहुरेखं वा येषां पाणितलं नृणाम् ॥ ४५ ॥

ते स्युरल्पायुषो निस्स्वा दुःखिनो नात्र संशयः ।
करपृष्ठं सुविस्तीर्णं पीनं स्निग्धं समुन्नतम् ॥ ४६ ॥

श्लाघ्यं गूढशिरं नृणां फणाभृत्फणसन्निभम् ।
विवर्णं परुषं रूक्षं रोमशं मांसवर्जितम् ॥ ४७ ॥

मणिबन्धसमं निम्नं न श्रेष्ठं करपृष्ठकम् ।
पाणिमूलं दृढं गूढं श्लाघ्यं सुश्लिष्टसन्धिकम् ॥ ४८ ॥

श्लथं सशब्दं हीनं च निर्धनत्वादिदुःखदम् ।
दीर्घनिर्मांसपर्वाणस्सूक्ष्मा दीर्घास्सुकोमलाः ॥ ४९ ॥

सुघनास्सरला वृत्तास्तिस्रोऽप्यंगुल्यश्श्रिये ।
यच्छन्ति विरलाश्शुष्कास्स्थूला वक्रा दरिद्रताम् ॥ ५० ॥

शस्त्रघातं वहिर्नम्राश्चेटत्वं चिपिटाश्च ताः ।
अनामिकान्त्यरेखायाः कनिष्ठा स्याद्यदाधिका ॥ ५१ ॥

धनवृद्धिस्तथा पुंसां मातृपक्षो बहुस्तथा ।
मध्यमाप्रान्तरेखाया अधिका यदि तर्जनी ॥ ५२ ॥

प्रचुरस्तत्पितुः पक्षस्त्रिया व्यत्ययतोऽन्यथा ।
अङ्गुष्ठस्यांगुलीनां वा यद्यूनाधिकता भवेत् ॥ ५३ ॥

धनधान्यैस्तथा हीनो नरस्स्यादायुषापि च ।
मणिबन्धे यवश्रेण्यस्तिस्रश्चेत्तापसो भवेत् ॥ ५४ ॥

ईरिताः पाणिपृष्ठेऽपि ततोऽधिकतरं फलम् ।
द्वाभ्यां तु यवमालाभ्यां राजमन्त्री धनी बुधः ॥ ५५ ॥

एकया यवपङ्क्त्यातु श्रेष्ठो बहुधनाञ्चितः ।
सूक्ष्मास्स्निग्धाश्च गम्भीराः प्रसम्वा मधुपिंगलाः ॥ ५६ ॥

[1]अव्यापृतांगसंभेदाः कररेखाश्शुभावहाः ।
त्यागाय शोणगम्भीरास्सुखाय मधुपिंगलाः ॥ ५७ ॥

सूक्ष्माश्श्रिये भवेयुस्तास्सौभाग्याय सुमूलकाः ।
भिन्नास्सपल्लवा रूक्षा विषमास्स्थानकच्युताः ॥ ५८ ॥

विवर्णाः स्फुटिताः कृष्णा [2]लीना रेखाश्चनोत्तमाः ।
क्लेशं सपल्लवा रेखा भिन्ना जीवितसंशयम् ॥ ५९ ॥

कदनं परुषा द्रव्यविनाशं [3]परुषार्पयेत् ।
मणिबन्धात् पितुर्लेखा करभाद्विभवायुषोः ॥ ६० ॥

रेखे द्वे यान्ति तिस्रोऽपि तर्जन्यंगुष्ठकान्तरम् ।
येषां रेखा इमास्तिस्तस्संपूर्णा दोषवर्जिताः ॥ ६१ ॥

तेषां गोत्रधनायूंषि संपूर्णान्यन्यथा नतु ।
उल्लंघ्यन्ते च यावत्यांगुल्यो जीवितरेखया ॥ ६२ ॥

पञ्चविंशतयो ज्ञेयास्तावत्यश्शरदां बुधैः ।
मणिबन्धोन्मुखा आयुर्लेखायां येऽत्र पल्लवाः ॥ ६३ ॥

सम्पदस्ते बहिर्याता विपदोऽङ्गुलिसम्मुखाः ।
गत्वा मिलितयोः प्रान्ते द्रव्यपित्रोश्च रेखयोः ॥ ६४ ॥

गृहबन्धो विनिर्देश्यो गृहभङ्गोऽन्यथा पुनः ।
ऊर्ध्वरेखा मणेर्बन्धादूर्ध्वगा सा तु पञ्चधा ॥ ६५ ॥

अङ्गुष्ठाश्रयिणी सौख्यराज्यलाभाय कल्पते ।
राजा राजसदृक्षो वा तर्जनीगतया तया ॥ ६६ ॥

मध्यमायातयाचार्यः ख्यातो राजा धनैर्नृपः ।
अनामिकां प्रयान्त्या तु सार्थवाहो धनाधिपः ॥ ६७ ॥

कनिष्ठां गतया श्रेष्ठस्सप्रतिष्ठो भवेद् ध्रुवम् ।
आयुर्लेखाकनिष्ठान्तर्लेखास्युर्गृहिणीप्रदाः ॥ ६८ ॥

समाभिश्शुभशीलास्ता विषमाभिः कुशीलकाः ।
आयूरेखावसानाभिर्लेखाभिर्मणिबन्धतः ॥ ६९ ॥

---

1) कठिनः

1) अव्यावृत्ताउतच्छेदाः 2) नीलस्तन्व्यश्च 3) विषमर्पयेत्.

स्पृष्टाभिर्भ्रातरस्स्पृष्टतराभिर्जामयः पुनः ।
अस्पृष्टाभिरदीर्घाभिर्भ्रातृजाम्यायुषस्त्रुटिः ॥ ७० ॥
यवैरंगुष्ठमूलस्थैस्तत्सङ्ख्यास्सूनवो नृणाम् ।
यवैरंगुष्ठमध्यस्थैर्विद्याख्यातिविभूतयः ॥ ७१ ॥
शुक्लपक्षे तथा जन्म दक्षिणांगुष्ठजैश्चतैः ।
कृष्णपक्षे नृणां जन्म वामांगुष्ठगतैश्चतैः ॥ ७२ ॥
बहूनामथ वैकस्य यवस्य स्यात्फलं समम् ।
एकोऽप्यभिमुखस्स्वस्य मतश्श्रीवृद्धिकारणम् ॥ ७३ ॥
संपूर्णौ किं पुनस्तौ द्वौ पाणिमूलस्थितौ नृणाम् ।
शफरो मकरश्शंखः पद्मः पाणौ स्वसम्मुखः ॥ ७४ ॥
फलदस्सर्वदैवान्त्यकाले पुनरसम्मुखः ।
शतं सहस्रं लक्षं च कोटिं दद्युर्यथाक्रमम् ॥ ७५ ॥
मीनादयः करे स्पष्टा भिन्नाभिन्नादयोऽल्पदाः ।
सिंहासनदिनेशाख्यनन्द्यावर्तेन्दुतोरणैः ॥ ७६ ॥
पाणौ रेखास्थितैर्मर्त्यास्सार्वभौमा न शंशयः ।
आतपत्रं करे यस्य दण्डेन सहितं पुनः ॥ ७७ ॥
चामरद्वितयं वापि चक्रवर्ती स जायते ।
श्रीवत्सेन सुखी चक्रेणोर्वीशः पविना धनी ॥ ७८ ॥
भवेद्देवकुलाकाररेखाभिर्धार्मिकः पुमान् ।
याप्ययानरथाश्वेभवृषरेखाङ्किताः कराः ॥ ७९ ॥
येषां ते परसैन्यानां [1] हृतग्रहणकर्मकाः ।
एकमप्यायुधं पाणौ षट्त्रिंशन्मध्यतो यदि ॥ ८० ॥
तदा परैरयोध्यः स्याद् वीरो भूमिपतिर्जयी ।
उडुपो मङ्गिनी पोतो यस्य पूर्णाः करान्तरे ॥ ८१ ॥
स रूप्यस्वर्णरत्नानां पात्रं सांयात्रिकः पुमान् ।
त्रिकोणरेखया सीरमुसकोलूखलादिना ॥ ८२ ॥
वस्तुना हस्तजातेन पुरुषस्स्यात् कृषीवलः ।
गोमन्तस्स्युर्नरास्सौधैर्दामभिः पाणिसंस्थितैः ॥ ८३ ॥
कमण्डलुद्वयी कुम्भस्वस्तिकौ श्रीप्रदौ नृणाम् ।
अनामिकान्तपर्वस्था प्रतिरेखा प्रभुत्वकृत् ॥ ८४ ॥
ऊर्ध्वा पुनस्तले तस्य धर्मरेखेयमुच्यते ।
रेखाभ्यां मध्यमास्ताभ्यामाभ्यां प्रोक्तो विपर्ययः ॥ ८५ ॥
तर्जनीगृहबन्धान्तर्लेखा स्यात् सुखमृत्युदा ।
अङ्गुष्ठपितृरेखान्तस्तिर्यग्रेखापदप्रदा ॥ ८६ ॥

अपत्यरेखास्सर्वास्स्युर्मत्यांगुष्ठतलान्तरे ।
अङ्गुष्ठस्य तले यस्य रेखा काकपदाकृतिः ॥ ८७ ॥
तस्य स्यात्पश्चिमे काले विपत्तिश्शूलरोगतः ।
श्लिष्टान्यंगुलिमध्यानि द्रव्यसंचयहेतवे ॥ ८८ ॥
तानि चेच्छिद्रयुक्तानि त्यागशीलस्ततो नरः ।
तर्जनीमध्यमारन्ध्रे मध्यमानामिकान्तरे ॥ ८९ ॥
अनामिकाकनिष्ठान्तश्छिद्रे सति यथाक्रमम् ।
जन्मनः प्रथमे त्र्यंशे द्वितीयेऽथ तृतीयके ॥ ९० ॥
भोजनावसरे दुःखं केप्याहुश्श्रीमतामपि ।
आवर्ता दक्षिणाश्शस्तास्सांगुष्ठांगुलिपर्वसु ॥ ९१ ॥
रेखायां प्रतिरेखास्तु जायन्ते सूक्ष्मरूपकाः ।
अपमृत्युस्तदा तेषां रेखामानेन निर्दिशेत् ॥ ९२ ॥
अनामिकापर्व यदा विलंघते कनिष्ठिकाग्रेण शतं च जीवितम् ।
समे त्वशीतिर्विषमे च सप्ततिर्यवार्धहीने खलु पष्ठिमादिशेत् ॥ ९३ ॥
ताम्रस्निग्धोच्चकोत्तुङ्गपर्वार्धस्था नखाश्शुभाः ।
श्वेतैर्यतित्वमस्थ्याभैर्नैस्वं पीतैस्सरोगता ॥ ९४ ॥
पुष्पितैर्दुःखशीलत्वं क्रौर्यं व्याघ्रोपमैर्नखैः ।
शुक्त्याभैश्शवलैस्स्थूलैस्स्फुटिताग्रैश्च नीलकैः ॥ ९५ ॥
अद्योतरूक्षवक्त्रैश्च नखैः पातकिनोऽधमाः ।
नखेषु विन्दवश्श्वेताः पाण्योश्चरणयोरपि ॥ ९६ ॥
आगन्तारः प्रशस्तास्स्युरिति भोजनृपोऽभ्यधात् ।
तर्जन्यादिनखैर्भग्नैर्जातमात्रस्य तु क्रमात् ॥ ९७ ॥
अथ त्र्यंशचतुर्थांशाष्टांशास्स्युस्सहजायुषः ।
अङ्गुष्ठस्य नखे भग्ने धर्मतीर्थरतो नरः ॥ ९८ ॥
कूर्मोन्नतेऽङ्गुष्ठनखे नरस्स्याद् भाग्यवर्जितः । ॥ ९९ ॥
अतिकृशदीर्घैश्चुटुकैर्निर्द्रव्या मांसलैर्धनोपेताः ।
शिम्बोपमैरवक्रैरधरैर्भूपास्स्तनुह्रस्वैः ॥ १०० ॥
ओष्ठैस्स्फुटितविखण्डितविवर्णरूक्षैर्धनैः परित्यक्ताः ।
स्निग्धा घनाश्च दशनास्सुतीक्ष्णदंष्ट्रास्समाश्च शुभाः ॥ १०१ ॥
द्वात्रिंशद्दशनै राजैकत्रिंशद्भिश्च भोगवान् ।
त्रिंशद्दन्ता नरा ये च सुखदुःखैकभागिनः ॥ १०२ ॥
एकोनत्रिंशकैर्दन्तैर्मनुजा दुःखभागिनः ।
जिह्वा रक्ता दीर्घा श्लक्ष्णा सुसमा च भोगिनां ज्ञेया ।
श्वेता कृष्णा परुषानिर्द्रव्यानां तथा तालु ॥ १०३ ॥

[1] हठग्रहणकर्मठाः

वक्त्रं सौम्यं संवृतममलं श्लक्ष्णं समं च भूपानाम् ।
विपरीतं क्लेशभुजां महामुखं दुर्भगानां च ॥ १०४ ॥
पूर्णचन्द्रसमाकारं मनुजानां मुखं शुभम् ।
स्त्रीमुखा निरपत्यास्स्युश्शठानां वर्तुलं मुखम् ॥ १०५ ॥
निस्स्वास्स्युर्दीर्घवदना भीतास्याः पापकारिणः ।
चतुरस्राननाः धूर्ता निम्नास्याः पुत्रवर्जिताः ॥ १०६ ॥
कृपणा ह्रस्ववक्त्रास्स्युः दुःखिनो निष्प्रभास्यकाः ।
अभिन्नाग्रं मृदु स्निग्धं घनं श्मश्रु प्रशस्यते ॥ १०७ ॥
आरक्तं विषमं कूर्चं स्थूलरोम न शोभनम् ।
लम्बमांसलकर्णास्स्युस्सुखिनो मानवास्सदा ॥ १०८ ॥
1) शंखकर्णाश्चभूपाला रोमकर्णाश्शतायुषः ।
विस्तीर्णकर्णा धनिनश्शिराकर्णास्तु निष्ठुराः ॥ १०९ ॥
कृपणा ह्रस्वकर्णास्स्युः पापान्ताश्शुष्ककर्णकाः ।
राजानः प्रोन्नतैर्गण्डैः श्लक्ष्णैः कान्तिसमन्वितैः ॥ ११० ॥
समैश्च मन्त्रिणः प्रोक्ता निम्नैर्दारिद्र्यभागिनः ।
शुकनासस्सुखी प्रोक्तश्चिरायुश्शुष्कनासिकः ॥ १११ ॥
अगम्यगामी पुरुषो नासया भिन्नकल्पया ।
सुभगो दीर्घया प्रोक्तश्चोरः कुञ्चितया तया ॥ ११२ ॥
अवटीटो वधूमृत्युर्धनी वक्राग्रनासिकः ।
क्रूराणां दक्षिणे वक्रा नासिका कथिता बुधैः ॥
समाल्पविवरा ऋज्वी नासा भाग्यवतां भवेत् ॥ ११३ ॥
धनिनां क्षुतं सकृद्द्विस्त्रिर्मिलितं ह्लादि सानुनादं च ।
दीर्घायुषां प्रयुक्तं विज्ञेयं संहतं चैव ॥ ११४ ॥
दृक्स्वरूपमथो वक्ष्ये स्वभावोपाधिसंभवम् ।
रक्तत्वं धवलत्वं च श्यामत्वमतिनिर्मलम् ॥ ११५ ॥
पर्यन्तपार्श्वतारासु दृशोस्तु स्याद्यथाक्रमम् ।
हरितालप्रभैश्चोरो नेत्रैर्नीलैरहंकृतः ॥ ११६ ॥
रक्तैर्नृपस्सितैर्ज्ञानी मधुपिङ्गैर्महाधनः ।
सेनाध्यक्षो गजाक्षस्स्याद् दीर्घाक्षश्चिरजीवितः ॥ ११७ ॥
विस्तीर्णाक्षो महाभोगी कामी पारावतेक्षणः ।
कमलाक्षा मयूराक्षा मध्यमाः पुरुषाः पुनः ॥ ११८ ॥
काकाक्षा धूसराक्षाश्च मण्डूकाक्षाश्च तेऽधमाः ।
दुष्टो दारुणदृष्टिस्स्यात् कुक्कुटाक्षः कलिप्रियः ॥ ११९ ॥

दृष्टिरोगी भुजङ्गाक्षो मार्जाराक्षस्तु पातकी ।
श्यामदृक् सुभगस्तिर्यग्लोचनो भोगभाजनम् ॥ १२० ॥
स्थूलाक्षो धनिको दीनदृष्टिस्स्यादधमो नरः ।
निम्नयोः प्रचुरं प्रायस्स्तोकमुन्नतयोः पुनः ॥ १२१ ॥
वृत्तयोर्नेत्रयोरल्पतरमायुस्तनूभृताम् ।
विवर्णैः पिङ्गलैर्वान्तश्चञ्चलैरतिखर्वकैः ॥ १२२ ॥
अधमाःस्युः कृशौ रूक्षैस्सजलैर्निर्धनाः पुनः ।
अचक्षुरेकचक्षुश्च तथा केकानेत्रकः ॥ १२३ ॥
अर्धकेकरनेत्रस्स्यादेषां क्रूरः परस्परः ।
ऋजु शुक्लं प्रसन्नस्य रौद्रं तिर्यक् च कोपिनः ॥ १२४ ॥
सविकासं सपुण्यस्याधोमुखं पापसूचिनः ।
शून्यं व्यग्रमनस्कस्य वलितं चानुरागिणः ॥ १२५ ॥
मध्यस्थं वीतरागस्य सरलं सुजनस्य च ।
असंमुखं विलक्षस्य सविकारं तु कामिनः ॥ १२६ ॥
भ्रूभङ्गयुक्तमीर्ष्यालोर्भ्रान्तं मत्तस्य सर्वतः ।
जलाविलं च दीनस्य चञ्चलं तस्करस्य च ॥ १२७ ॥
अलक्षितार्थं निद्रालोर्वित्रस्तं भीरुकस्य च ।
वहवो वीक्षणस्यैवं भेदाः केचन दर्शिताः ॥ १२८ ॥
भूताविष्टस्य दृष्टिस्स्यात् प्रायेणार्धनिमीलिता ।
मीलिता मुद्गलार्तस्य देवतार्तस्य दुस्सहा ॥ १२९ ॥
शाकिनीभिर्गृहीतस्याधोमुखी च भयावहा ।
अरुणाः श्यामिला वापि जायन्ते वातरोगिणः ॥ १३० ॥
पित्तदोषवतः पीता नीला च शुकपिच्छवत् ।
श्लेष्मलस्य तथा पाण्डुर्मिश्ररोगस्य मिश्रिता ॥ १३१ ॥
दृष्टिः प्रतिजनं भिन्ना भवत्येकमनेकधा ।
द्विमात्रास्पन्दिनो ये तु धनिनस्ते प्रकीर्त्तिताः ॥ १३२ ॥
त्रिमात्रास्पन्दिनो ज्ञेयाः पुरुषास्सुखजीविनः ।
चतुर्मात्रानिमेषस्तु धनवान् परिकीर्तितः ॥ १३३ ॥
दीर्घायुषो धनयुताः पञ्चमात्रानिमेषिणः ।
अत्युन्नताभिरल्पायुषो विशालोन्नताभिरतिसुखिनः ॥ १३४ ॥
विषमभ्रुवो दरिद्रा बालेन्दुनिभभ्रुवश्च धनिनः ।
मध्यविनतभ्रुवो ये ते सक्तास्स्त्रीष्वगम्यासु ॥ १३५ ॥
धनिनश्च विपुलश्शङ्खैः खण्डाभिश्चार्थपरिहीनाः ।
विषमललाटा विधना धनवन्तोऽर्धेन्दुसदृशेन ॥ १३६ ॥

1) शंखकर्णाश्च भूपालाः

शुक्तिविशालैराचार्यकाशिशरासन्तर्तरधर्मरताः ।
उन्नतशिराभिराढ्या वस्तिकवत्संततामिश्च ॥ १३७ ॥

निम्नललाटा वधवन्धभागिनः क्रूरकर्मनिरताश्च ।
अत्युन्नतैश्चभूपाः कृपणाः स्युस्संवृतललाटाः ॥ १३८ ॥

रुदितमदीनमनश्रु स्निग्धं च शुभावहं मनुष्याणाम् ।
रूक्षं दीनं प्रचुराश्रु चैव न शुभप्रदं पुंसाम् ॥ १३९ ॥

हसितं शुभदमकम्पं निमीलितविलोचनं च ।
पापस्य दुष्टस्य च हसितमसकृत् सोन्मादसीमाकृति प्रोक्तम् ॥

तिस्रो रेखाश्शतजीविनां ललाटाश्रिता यदि वा ।
चतसृभिरवनीशत्वं नवतिश्चायुस्सपञ्चाब्दा ॥ १४१ ॥

विच्छिन्नाभिरगम्यागमनरता भवन्ति रेखाभिः ।
केशान्तोपगताभिर्लेखाभिरशीतिवर्षायुः ॥ १४२ ॥

पञ्चभिरायुस्सप्ततिरेकाभ्यधिकाभिरपि षष्टिः ।
बहुभिस्समाश्शतार्धं चत्वारिंशत्तु वक्राभिः ॥ १४३ ॥

क्षुद्राभिस्स्वल्पायुर्द्व्यूनाभिरतोन्तरं कल्प्यम् ।
परिमण्डलैर्धनाढ्याश्छत्राकारैश्शिरोभिरवनीशाः ॥ १४४ ॥

चिपिटैः पितृमातृघ्नाः करोटिशिरसोऽचिरान्मृत्युः ।
घटमूर्धा चाध्वरुचिर्विमस्तकः पापकृद्धनैस्त्यक्तः ॥ १४५ ॥

निम्नशिरोमतां बहुनिम्नमनर्थदं भवति ।
एकैकभवैस्स्निग्धैः कृष्णैराकुञ्चितारभिन्नाग्रैः ॥ १४६ ॥

मृदुभिर्न चातिबहुभिः केशैस्सुखभाङ् नरेन्द्रो वा ।
बहुमूलविषमकपिलाः स्थूलस्फुटिताग्रपरुषह्रस्वाः ॥ १४७ ॥

अतिकुटिलाश्चातिघनमूर्धरुहा वित्तहीनानाम् ।
यद्यद् गात्रं रूक्षं मांसविहीनं शिरानद्धम् ॥ १४८ ॥

तत्तदनिष्टं प्रोक्तं विपरीतमतश्शुभं सर्वम् ।
त्रिषु विपुलो गम्भीरस्त्रिष्वेव षडुन्नतश्चतुर्ह्रस्वः ।
सप्तसु रक्तो राजा पञ्चसु दीर्घश्च सूक्ष्मश्च ॥ १४९ ॥

नाभिस्स्वरस्सत्वमिदं प्रदिष्टं गम्भीरमेतत्त्रितयं नराणाम् ।
उरो ललाटं वदनं च पुंसां विस्तीर्णमेतत्त्रितयं प्रशस्तम् ॥ १५० ॥

कक्षाथ वक्षो नखनासिकास्यं कृकाटिका चेति षडुन्नतानि ।
ह्रस्वानि चत्वारि च लिङ्गपृष्ठे ग्रीवा च जंघा च शुभप्रदानि ॥

नेत्रान्तपादकरताल्वधरोष्ठजिह्वा रक्ता नखाश्च खलु सप्त शुभावहानि ।
सूक्ष्माणि पञ्च दशनांगुलिपर्वकेशाः साकं त्वचा कररुहाश्च न
दुःखितानाम् ॥ १५२ ॥

हनुलोचनबाहुनासिकास्स्तनयोरन्तरमत्र पञ्चमम् ।
इति दीर्घमिदं तु पञ्चकं न भवत्येव नृणामभूभृताम् ॥ १५३ ॥

छाया शुभाशुभफलानि निवेदयन्ती
लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः ।
तेजो गुणान् बहिरपि प्रविकासयन्ती
दीपप्रभा स्फटिकरत्नघटस्थितेव ॥ १५४ ॥

स्निग्धद्विजत्वङ्नखरोमकेशाश्छाया सुगन्धा च महीसमुत्था ।
पुष्ट्यर्थलाभाभ्युदयान् करोति धर्मस्य चाहन्यहनि प्रवृद्धिम् ॥

स्निग्धा सिता च हरिता नयनाभिरामा
सौभाग्यमार्दवसुखाभ्युदयान् करोति ।
सर्वार्थसिद्धिजननी जलसंभवा स्यात्
छाया फलं तनुभृतां शुभमातनोति ॥ १५६ ॥

चण्डा दृष्टिः पद्महेमाग्निवर्णा युक्ता तेजोविक्रमैश्चातितीव्रैः ।
आग्नेयीति प्राणिनां स्याज्जयाय क्षिप्रं सिद्धिं वाञ्छितार्थस्य धत्ते ॥

मलिनपरुषकाया पापगन्धानिलोत्था
जनयति वधशोकौ पुत्रदारार्थनाशम् ।
स्फटिकसदृशरूपा भाग्ययुक्तात्युदारा
निधिरिव गहनोत्था श्रेयसां स्वच्छवर्णा ॥ १५८ ॥

करिवृषरथौघभेरीमृदङ्गसिंहस्वनाश्शस्ताः ।
गर्दभजर्झररूक्षस्वराश्च धनसौख्यसंत्यक्ताः ॥ १५९ ॥

सप्त भवन्ति च सारा मेदो मज्जा त्वगस्थिशुक्राणि ।
रुधिरं मांसं चेति प्राणभृतां तत्समस्तफलम् ॥ १६० ॥

ताल्वोष्ठदन्तपाली जिह्वानेत्रान्तपायुकरचरणैः ।
रक्तैस्सुरक्तसारा बहुसुखवनितार्थपुत्रयुताः ॥ १६१ ॥

स्निग्धत्वग्भिर्धनिनो मृदुभिस्सुभगा विचक्षणास्तनुभिः ।
मज्जामेदस्सारास्सुशरीराः पुत्रवित्तयुताः ॥ १६२ ॥

स्थूलस्थिरास्थिसारो बलवान् विद्यान्वितस्सुरूपश्च ।
बहुगुरुशुक्रास्सुभगा विद्वांसो रूपवन्तश्च ॥ १६३ ॥

उपचितदेहो विद्वान् धनी सुरूपश्च मांससारयुताः ।
संहततनवश्श्लिष्टास्सुसन्धयस्सुखभुजो ज्ञेयाः ॥ १६४ ॥

स्नेहः पञ्चसु लक्ष्यो वाग्जिह्वादन्तनेत्रनखसंस्थः ।
सुखधनसौभाग्ययुताः स्निग्धैस्तैर्निर्धना रूक्षैः ॥ १६५ ॥

द्युतिमान् वर्णस्स्निग्धः क्षितिपानां मध्यमस्सुतार्थवताम् ।
रूक्षो धनहीनानां शुद्धश्शुभदो न सङ्कीर्णः ॥ १६६ ॥

साध्यमनूकं वक्त्राद् गोवृषशार्दूलसिंहगरुडमुखाः ।
अप्रतिहतप्रतापा जितरिपवो मानवेन्द्राश्च ॥ १६७ ॥

वानरमहिषवराहाजतुल्यवदनास्सुतार्थसुखभाजः ।
गर्दभकरभप्रतिभैर्मुखैःश्शरीरैश्च निस्स्वसुखाः ॥ १६८ ॥

साष्टशतं षण्णवतिः परिमाणं चतुरशीतिरपि पुंसाम् ।
उत्तमसमहीनानामंगुलसङ्ख्यास्यमानेन ॥ १६९ ॥

भारार्धतनुसुखभाक् तुलितो दुःखी भवत्यूनः ।
विंशतिवर्षा नारी पुरुषः खलु पञ्चविंशतिभिरब्दैः ॥ १७० ॥

अर्हति मानोन्मानं जीवितभागे चतुर्थे वा ।
भूजलशिख्यनिलाम्बरसुरनररक्षःपिशाचतिर्यग्भिः ॥ १७१ ॥

सत्वेन च भवति नरो लक्षणमेतद्भवेत्तेषाम् ।
महीस्वभावश्शुभपुष्पगन्धस्संभोगवान् सौख्ययुतस्स्थिरश्च ।
तोयस्वभावो वहुतोयपायी प्रियाभिलाषी [1] रतिभोजनेच्छुः ॥

अग्निप्रकृत्या चपलोऽतितीक्ष्णश्चण्डः क्षुधालुर्वहुभोजनश्च ।
वायोस्स्वभावे चपलः कृशश्च क्षिप्रं प्रकोपस्य वशं न याति ॥

खप्रकृतिर्निपुणो विवृतास्यश्शब्दगतौ कुशलस्सुषिरोजः ।
त्यागयुतः पुरुषो मृदुकोपस्स्नेहयुतश्च भवेत् सुरसत्वः ॥ १७४ ॥

मनुष्यसत्वसंयुतस्सुगीतभूषणप्रियो ।
असंविभागशीलवान् स नित्यमेव मानवः ॥ १७५ ॥

तीक्ष्णप्रकोपः खलचेष्टितश्च पापश्च सत्वेन निशाचराणाम् ।
पिशाचसत्वश्चपलो मूलाक्तो वृहुप्रलापी च समुल्वणाङ्गः ॥ १७६ ॥

भीरुः क्षुधालुर्वहुभुक् च यः स्याद् ज्ञेयस्सुसत्वेन नरः स्थिरश्च ।
एवं नराणां प्रकृतिः प्रदिष्टा यल्लक्षणज्ञाः प्रवदन्ति सत्वम् ॥ १७७ ॥

शार्दूलसिंहसमदद्विपगोपतीनां
तुल्या भवन्ति शिखिनां गतिमिश्च भूपाः ।
एतानि यस्य पुरुषस्य भवन्ति
काये धन्यान् वदन्ति पुरुषान् नरलक्षणज्ञाः ॥ १७८ ॥

क्षतजप्रवालसदृशं काञ्चनसदृशं च भूमिपस्य वपुः ।
श्यामलपाटलसदृशो वर्णस्सैन्याधिपे ज्ञेयः ॥ १७९ ॥

विवर्णश्चातिकृष्णश्चाप्यतिरक्तस्तथैव च ।
यस्य वर्णस्तु वपुषो दरिद्रस्स भवेन्नरः ॥ १८० ॥

आवर्तको वक्षसि मूर्ध्नि यस्य पापी स योषित्तु मृतप्रजाः स्यात् ।
सा भ्रातरं देवरकं च हन्यात् पृष्ठे ललाटे यदि दृश्यते सः ॥ १८१ ॥

मणिवन्धे यदावर्तो वामतो दक्षिणेऽथ वा ।
स पुमान् ब्रह्महत्यादिपापकारी न संशयः ॥ १८२ ॥

[1]) रसभोजनेच्छुः

आवर्तौ चेच्छिरोमध्ये कुर्यातां योषितावुभे ।
दक्षिणे करमध्ये तु आवर्तो दक्षिणाकृतिः ॥ १८३ ॥

स नरः पुत्रसम्पन्नो धनधान्ययुतो भवेत् ।
वामश्च करमध्ये तु यद्यावर्तः प्रदृश्यते ॥ १८४ ॥

स नरः पापकारी च मध्ये वयसि सौख्यवान् ।
ललाटे च यदावर्तो जायते पुरुषश्शुभः ॥ १८५ ॥

गण्डद्वये यदावर्तो धनभोक्ता भविष्यति ।
चुबुके यदि चावर्तः पापकर्मरतो भवेत् ॥ १८६ ॥

तालुस्थाने यदावर्तः पुण्ययुक्तो भविष्यति ।
पादद्वये यदावर्तस्सोऽगम्यागमने रतः ॥ १८७ ॥

पद्मजातीमाल्लिकादिगन्धो वपुषि चेद्यदि ।
स नरो [1])राजराजश्च सत्ययुक्तो भविष्यति ॥ १८८ ॥

पुन्नागस्य च वा गन्धः पाटल्याश्चम्पकस्य वा ।
स पुमान् सैन्यनाथस्स्यान्नारदस्य वचो यथा ॥ १८९ ॥

घृतगन्धस्तैलगन्धो गुडगन्धस्तथैव च ।
नानाफलसुगन्धश्च भवेद् वाणिज्यजीवनः ॥ १९० ॥

करिदानद्रवामोदो महाशूरो भविष्यति ।
गोगन्धो भूमिगन्धो वा स पुमान् भूमिसेवकः ॥ १९१ ॥

मांसगन्धो मद्यगन्धः पुंसस्स्यात् पापकर्मणः ।
कटुगन्धः क्षारगन्धस्स नरः पण्डितो भवेत् ॥ १९२ ॥

नानागन्धो भवेद्यस्य दरिद्रस्स भवेन्नरः ।
गजरथशंखच्छायायुक्तो भूमिपतिर्भवति ॥
गोमेषसमच्छायस्सेनानीर्जायते मनुजः ॥ १९३ ॥

व्याघ्रच्छायायुतः पापकर्मैकनिरतो भवेत् ।
कपिच्छायानरो यस्तु स भवेच्च धनाधिपः ॥ १९४ ॥

वृकच्छायो महायोगी सर्पच्छायो महायशाः ।
सिंहच्छायो महाविद्यस्तुरङ्गो वीरनायकः ॥ १९५ ॥

सिंहः पिपीलिका चैव तुरङ्गो यदि वा भवेत् ।
एतानि त्रीणि सत्वानि सोऽपि राजा भविष्यति ॥ १९६ ॥

गजो वराहो व्याघ्रश्च सत्वे सैन्याधिनायकः ।
उरगो वृश्चिकश्चैव कपिमण्डूकलावुकाः ॥ १९७ ॥

एतत्सत्वो भवेद्यस्तु विद्यावान् धनिको भवेत् ।
काकोलूकक्षीरपक्षिकुक्कुटक्रौञ्चकास्तथा ॥ १९८ ॥

[1]) राजयोगश्च.

एतत्सत्वो भवत्येव कालज्ञानी ध्रुवं नरः ।
कन्याया मक्षिकायाश्च गोधारस्य च सत्वतः ॥ १९९ ॥
वाणिज्यवृत्त्या जीवन्ति मनुजास्ते न संशयः ।
क्रौञ्चदुन्दुभिहंसाभस्वरवान् पार्थिवो मतः ॥ २०० ॥
शङ्खनीरदघोषश्च महाशूरो भविष्यति ।
कोकिलस्य मयूरस्य स्वरैस्सेनाधिनायकः ॥ २०१ ॥
व्याघ्रोष्ट्रमेषमहिषखरकाकस्वरो भवेत् ।
दरिद्रः पापकर्मा स्यादगम्यागमने रतः ॥ २०२ ॥
राजहंसमृगेभानां गमनेन नराधिपः ।
सिंहस्य तुरगस्यापि गत्या सेनाधिनायकः ॥ २०३ ॥
व्याघ्रवानरगत्या च स भवेत् पापकर्मकृत् ।
श्वानोष्ट्रमहीषाणां च गत्या दारिद्र्यमाप्नुयात् ॥ २०४ ॥
गतिर्जलचरस्येव काकोलूकसमाथवा ।
गतिर्यस्य समाख्याता जारश्चोरो भविष्यति ॥ २०५ ॥

अत्यन्तदीर्घो ह्रस्वो वा यस्य देहः प्रदृश्यते ।
सोऽल्पायुश्च दरिद्रश्च सामुद्रवचनं यथा ॥ २०६ ॥
सम्पूर्णं सर्वाङ्गे हस्ते चैकत्र दीर्घता भवति ।
अङ्गुलिशितवपुषि स्याद्धनवानदुःखितस्स विज्ञेयः
ये जन्मनि पुरा शम्भुं मनुजास्तु सिषेविरे ॥ २०७ ॥
सर्वलक्षणसम्पूर्णा भाग्यभाजो भवन्ति ते ।
इति स्त्रीपुंसयोरुक्तो लक्षणानां समुच्चयः ॥ २०८ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणचिदम्बर–
शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले
सामुद्रशास्त्रे पुरुषलक्षणनिरूपणं नाम दशमस्तरङ्गः.

अथ एकादशस्तरंगः

स्त्रीपुंसलक्षणान्युक्तान्याकर्ण्यानन्दितोऽभवम् ।
यच्च प्रोक्तं गुरो! पूर्वं शुभलक्षणशालिनाम् ॥ १ ॥
आरोहणं गजाश्वानां पुत्रस्यापदयदित्यपि ।
तत्र कौतूहलं भूयश्श्रोतुं मे वर्तते हृदि ॥ २ ॥
तल्लक्षणानि कानि स्युस्तान्याचक्ष्व गुरोऽधुना ।
शृणु ते कथयाम्यद्य तेषां लक्ष्म समासतः ॥ ३ ॥
या पुरा महिषी जाता कश्यपस्य त्रयोदशी ।
क्रोधेति विदिता जातास्तस्या द्वादशा कन्यकाः ॥ ४ ॥
तन्मध्ये भद्रमुद्राया अभूदैरावतो गजः ।
शताख्यायास्तु कन्याया जज्ञिरेऽन्येपि दिग्गजाः ॥ ५ ॥
मातङ्गीसंज्ञिकायास्तु जाता मातङ्गसंज्ञिकाः ।
द्विधा विधाय ब्रह्माण्डं ताल्वादनकारिणी ॥ ६ ॥
मतङ्गे शिवसन्तुष्ट्यै सामगानपरे मुनौ ।
तदा साम्नोऽथ ये जातास्तेन ते सामजास्स्मृताः ॥ ७ ॥

पुरा स्वर्गे सुखेनासन् कामगाः खेचरा गजाः ।
मुनिशापाहता भूमौ ततो जाता वनेचराः ॥ ८ ॥
गङ्गासागरहेमाद्रिप्रयागाणां च मध्यतः ।
वनं प्राच्यमिति प्रोक्तं लोहितार्धे च पश्चिमे ॥ ९ ॥
त्रिपुर्यां कोसलादौ च चेदिकारूषकं वनम् ।
1) स्त्रीक्षेत्रे गौडवङ्गालमांसलीयं वनं परम् ॥ १० ॥
विन्ध्याचलत्रिकूटाद्रिकालिङ्गमिडाश्रितम् ।
वनं कालिङ्गकं नाम समुद्रावधि कीर्त्यते ॥ ११ ॥
श्रीशैले देवशैले च समयाद्रौ तथैव च ।
वनं दाशार्णकं नाम करिणां जन्मकारणम् ॥ १२ ॥
सह्याद्रिभृगुकच्छान्तमपरान्तं वनं स्मृतम् ।
द्वारावत्यामवन्त्यां च सौराष्ट्रं वनमुच्यते ॥ १३ ॥

1) श्री.

कलिञ्जरे कुरुक्षेत्रे 1) सिन्धुसिन्धुसमागमे ।
वनं पञ्चानलं प्रोक्तं हिमालयकृतावधि ॥ १४ ॥
कलिङ्गं चेति कारूषं दाशार्णं च वनं परम् ।
अङ्गारेयं वनं प्राप्यं मध्यमं वनमिष्यते ॥ १५ ॥
अपराष्ट्रं पञ्चनदं सौराष्ट्रं चाधमं वनम् ।
एवमष्टवनान्याहुर्गजानां जन्मने परम् ॥ १६ ॥
सूक्ष्मरोमम‍ृदुत्वक्का: कलविङ्कनिभेक्षणा: ।
शूरोत्कास्ते चिरमदास्सर्वदा प्रस्रवन्मदा: ॥ १७ ॥
कलिङ्गदेशसञ्जातकरिणां लक्षणं त्विदम् ।
ह्रस्वपीनशिरोग्रीवा विषाणैर्मधुसन्निभैः ॥ १८ ॥
उदग्राश्च महाकाया: पृथुदीर्घकरान्विता: ।
स्वभावबलिनः पीना वराहजघना वरा: ॥ १९ ॥
सुदीर्घवालवंशाश्च पद्मप्रालपपेचका: ।
2) मनोरमा: क्लेशसहा, कलिङ्गवनचारिण: ॥ २० ॥
पृथुत्वक्काश्च दीर्घाश्च सूक्ष्मरोमाण एव च ।
ह्रस्वहीनमुखग्रीवा विषाणैर्मधुसन्निभैः ॥ २१ ॥
तनूदरा दीर्घजंघा नोज्झन्ति च चिरं मदम् ।
क्लेशक्षमा धनुर्वंशा: कालिङ्गवनसंभवा: ॥ २२ ॥
महोत्तुङ्गोष्ठमूर्धाक्षिदन्ताष्ठीवांसनोरस: ।
दीर्घताम्रास्यताल्वोष्ठा: पद्मगन्धिमदाश्च ते ॥ २३ ॥
धनुर्वंशास्सुपर्वाणो ह्रस्वग्रीवापरस्थिरा: ।
श्यामोदग्रास्सत्ववन्तस्सेवन्ते नितरां च ते ॥ २४ ॥
सत्वप्रतीपास्तत्र स्युर्ह्रस्वग्रीवापराङ्गका: ।
वक्षोमस्तशिरोदग्रास्श्यामाश्चाप्यपराजिता: ॥ २५ ॥
त्वक्पादनखकर्णैस्तु रूक्षैस्तनुभिरेव च ।
पिङ्गाक्षाश्चाल्पवलिनस्तनुरोमाल्पपेचका: ॥ २६ ॥
सौराष्ट्रनामकेऽरण्ये संजातास्तु गजा मता: ।
सप्तारत्निसमुत्सेधो नवारत्न्यायतश्च स: ॥ २७ ॥
दशारत्निपरीणाहस्स गजो मानतश्शुभ: ।
अरत्निमात्रेणाधिक्यादराल: परिकीर्त्तित: ॥ २८ ॥
अत्यरालस्तथाधिक्यान्निन्द्यो मानाधिको गज: ।
अरत्निद्वयहीनस्तु कनिष्ठ: परिकीर्त्तित: ॥ २९ ॥
कनिष्ठादपि यो हीनो वामनस्स्तु निन्दित: ।
भद्रो मन्द्रो मृगश्चेति ज्ञेयास्ते त्रिविधा गजा: ॥ ३० ॥

पञ्चोन्नतिस्सप्तमृगस्य दैर्घ्यमष्टौ च हस्ता: परिणाहमानम् ।
एकद्विवृद्धावथ भद्रमन्द्रो सङ्कीर्णनागो नियतप्रमाण: ॥ ३१ ॥
मुखादापेचकं दैर्घ्यं पृष्ठपार्श्वोदरान्तरात् ।
आनाह उच्छ्रय: पादाद् विज्ञेयो यावदासनम् ॥ ३२ ॥
भद्रा द्विपा: पर्वतचारिणस्ते कक्षाण्डकोशेषु समा घनाश्च ।
कूर्माभपार्ष्ण्यश्च नखान्तरेषु युक्ताश्च मांसैश्च तनूरुहैश्च ॥ ३३ ॥
पादै: प्रशस्तैश्च नखैश्च सान्द्रैस्समन्तत: पद्मकलाञ्चिताश्च ।
न कृशा न चातिवृद्धा मधुनिभदन्तेक्षणा धनुर्वंशा:
समसुविभक्तशरीरास्सुवृत्तगात्रा: परा भद्रा: ॥ ३४ ॥
आरोहणं भद्रनाम्नो मातङ्गस्य यशस्कर: ।
आयुष्करं पापहरं बलतेजोविवर्धनम् ॥ ३५ ॥
मन्द्रा गजाश्शैवलिनीसुचारास्समुन्नताश्चानतपूर्वकाया: ।
सुनिर्वलीभिस्तनुभिस्तथांस्सैस्सहिष्णवस्संहरणप्रियाश्च ॥ ३६ ॥
विपुलकरकर्णवदना महोदरास्स्थूलपेचकविषाणा: ।
चलवलम्बमांसा हर्यक्षा: कुञ्जरा मन्दा: ॥ ३७ ॥
मृगा वने सञ्चरणा भवन्ति समन्वितास्ते शिथिलैश्च मांसै: ।
मृद्वीक्षणा दीर्घविषाणगात्रास्स्युस्निग्धवर्णास्सुवृद्धलीका: ॥ ३८ ॥
सुस्निग्धपद्माक्षि1) निभास्यफाला अतीववक्रास्सुविशालवेशा: ॥
कृशकरचरणग्रीवास्थूला ह्रस्वास्यवालमेढ्रोष्ठा: ।
सङ्क्षिप्तपृष्ठवंशास्तनुमुखदन्ता मृगा ज्ञेया: ॥ ३९ ॥
भद्रादीनां लक्षणानि क्रमेणोक्ता पृथक् पृथक् ।
सङ्कीर्णानां प्रवक्ष्यामि भेदानष्टादशोदितान् ॥ ४० ॥
अष्टादशैव सङ्कीर्णा जातीर्जानाति काश्यप: ।
गतिं चेष्टां स्वरं सत्वमन्यस्यानुकरोति यत् ॥ ४१ ॥
अनूकमिति तद् ज्ञेयं गजचेष्टितकोविदै: ।
शुभानां प्राणिनां चेष्टा शुभानूकं परं हि तत् ॥ ४२ ॥
निन्दितानां तथा चेष्टामनूकं निन्दितं विदु: ।
सुव्यक्ता विन्दवो यस्य गौरवर्णा मनोहरा: ॥ ४३ ॥
लोहितौ नेत्रयो: प्रान्तौ पुष्टौ च वलिनौ रदौ ।
एवं लक्षणसंयुक्तो गजो ब्रह्मांशको मत: ॥ ४४ ॥
पूजार्होऽसौ नरेन्द्राणां विजयारोग्यवृद्धिद: ।
कक्षभागे तथा कण्ठे यस्सम: 2) पृथुलासन: ॥ ४५ ॥
मुखे कोकनदच्छायो युग्मरोमविराजित: ।
वहुकालमदश्शूरो घननादेन हृष्यति ॥ ४६ ॥

1) सिन्धुसागरसङ्गमे. 2) घनरोम्ण:.

1) नखास्यफाला. 2) पृथुलानन:

प्राजापत्यांशको नागः प्रजावृद्धिं करोत्यसौ ।
बिन्दवो वलिरेखाश्च दृश्यन्ते मुखवक्षसोः ॥ ४७ ॥

स्वस्तिकैर्वर्धमानाद्यैर्नन्द्यावर्तैश्च सन्निभाः ।
रक्तोत्पलसमे नेत्रे स स्यादिन्द्रांशको गजः ॥ ४८ ॥

समरे विजयं दद्यात् किञ्च भूपालसम्पदः ।
ताम्रावोष्ठौ तथा जिह्वा धात्रीफलसमद्युतिः ॥ ४९ ॥

नयने रदनौ यस्य कुसुमामोदसन्निभौ ।
धनदांशसमुद्भूतो धनरत्नसमृद्धिकृत् ॥ ५० ॥

नृपाणां भवने तिष्ठन् पूजितः कुञ्जरोत्तमः ।
गजः कृष्णप्रभो वर्णे घनसर्पिस्सदृग्रदः ॥ ५१ ॥

आसने सुभगो मूर्ध्नि गम्भीरो घनगर्जितः ।
स्रवति प्रचुरं दानं वरुणांशकसंभवः ॥ ५२ ॥

आहवे रिपुसंहारी निजभर्तुर्जयप्रदः ।
त्रिवलीमण्डितः कण्ठे क्षौद्रपीतविलोचनः ॥ ५३ ॥

केतकीच्छायदशनः पृथुरक्ताग्रपुष्करः ।
बिन्दुमान् पाण्डुवर्णश्च शशाङ्कांशसमुद्भवः ॥ ५४ ॥

सङ्गरप्राङ्गणे राज्ञां गजोऽयं विजयप्रदः ।
अग्निज्वालासदृग्रोमा केशवातेषु पिङ्गलः ॥ ५५ ॥

पिङ्गाक्षः पिङ्गपुच्छश्च पिङ्गपुष्करशोभितः ।
अग्न्यंशकसमुद्भूतस्साक्षादग्निरिवाहवे ॥ ५६ ॥

भस्मसात् कुरुते सैन्यमशेषं द्विषतां सदा ।
कृष्णायसतनुच्छायो गौरवर्णश्च कर्णयोः ॥ ५७ ॥

नखा दीपशिखाभासो निबिडा मांसला तनुः ।
अग्निमारुतयोरंशात् संजातः कोपनो बली ॥ ५८ ॥

तस्य दोषोऽयमेकस्स्यादंकुशं यन्न मन्यते ।
प्रचण्डत्वाद् भयं दत्ते रिपुसैन्येष्वयं गजः ॥ ५९ ॥

दन्तमध्यात् समारभ्य क्रमशो हीयते करः ।
सुगन्धिरशीकराकारा यस्य निश्वाससन्ततिः ॥ ६० ॥

घनवद् गर्जितध्वानो परिहीनो भृशं दृढः ।
मृदुसूक्ष्माञ्जनश्यामस्सर्वाङ्गीणतनूरुहः ॥ ६१ ॥

सुवर्णकेतकोद्योतौ रदनौ वर्तुलौ दृढौ ।
आयतो रोमवानोष्ठस्सुगण्डौ च समौ शुभौ ॥ ६२ ॥

मुखमण्डलमत्यर्थं रम्यं दृष्टिमनोहरम् ।
पुष्पसारसमे नेत्रे पक्ष्मले प्रान्तलोहिते ॥ ६३ ॥

वलिनौ मृदुविस्तीर्णौ समौ भेदविवर्जितौ ।
शिराविरहितौ कर्णौ तालदुन्दुभिनिस्स्वनौ ॥ ६४ ॥

वर्तुलावुन्नतौ कुम्भौ समौ लक्ष्मीकुचोपमौ ।
कन्धुर्ह्रस्वो गलोद्देशो दीर्घांसौ च मांसलौ ॥ ६५ ॥

बाहू दीर्घावृजू पीनावधोऽधः क्रमशः कृशौ ।
कूर्माकारतला स्निग्धार्धेन्दुनिभा नखाः ॥ ६६ ॥

विंशतिर्वा दशाष्टौ वा शोभनाः परिकीर्तिताः ।
उरो विशालहृद्बन्धमुदरं प्रतनू कुचौ ॥ ६७ ॥

सज्जचापनिभो वंशो वालधिश्चायतः कृशः ।
शङ्खचक्रगदाकारा बिन्दवो वलयोऽथ वा ॥ ६८ ॥

दृश्यन्ते यस्य नागस्य स विष्ण्वंशकसंभवः ।
अभिषेकोचितः पूज्यस्सर्वकार्यप्रसाधकः ॥ ६९ ॥

पुष्णाति रत्नदो राज्यं धनधान्यसमृद्धिकृत् ।
सूक्ष्माहाररतो नित्यं वलिरेखाविवर्जितः ॥ ७० ॥

अनुमेयस्स्थिरश्शूरो देवसत्वो भवेद्गजः ।
मेधावी च क्रियादक्षः कामुकश्च मृदुः पटुः ॥ ७१ ॥

स्तब्धः प्रेक्षणकासक्तो गजो गन्धर्वसत्त्वजः ।
सदावगाहने सक्तः कोपनः कातरो भृशम् ॥ ७२ ॥

भोजने लम्पटो नित्यं कुञ्जरो विप्रसत्त्वजः ।
दान्तश्शूरस्सदोत्साही द्वन्द्वयुद्धविशारदः ॥ ७३ ॥

अभीरुराहवे धीरः क्षत्रसत्वो मतङ्गजः ।
चत्वार्येतानि सत्त्वानि सात्त्विकस्य भवन्ति हि ॥ ७४ ॥

सात्त्विकः कफसंयुक्तश्श्लेष्मलस्स्निग्धदीधितिः ।
सञ्चिन्वन् कवलं वक्त्रे दन्तसन्धौ तथैव च ॥ ७५ ॥

प्रज्ञावान् दीर्घरोषश्च वैश्यसत्त्वो भवेद् द्विपः ।
दण्डसाध्यस्सदा नीचो मूर्खश्च मलिनाशयः ॥ ७६ ॥

आहवे नितरां शूरश्शूद्रसत्त्वोद्भवः करी ।
विश्वासघातुकः क्रूरो गमने कुटिलक्रमः ॥ ७७ ॥

भुक्तेन मदसंयुक्तस्सर्पसत्त्वः करी मतः ।
एतानि त्रीणि सत्त्वानि राजसस्य भवन्ति हि ॥ ७८ ॥

राजसः पित्तभूयिष्ठः पित्तलस्तप्तविग्रहः ।
उन्मार्गेण सदा याति विवेकरहितो भृशम् ॥ ७९ ॥

उन्मत्त इव चेष्टायां द्विपः पैशाचसंभवः ।
निशायां स्वैरसञ्चारी मनुष्यहननोद्यतः ॥ ८० ॥

वेगवान् सबलो हस्ती रक्षस्सत्त्वसमुद्भवः ।
एते द्वे तामसे सत्त्वे तामसे वातले शुभे ॥ ८१ ॥

समरे दृश्यते रूक्षो निद्रालुश्चपलो गजः ।
जायते पाण्डुरा यस्य केशालोमानि वालधिः ॥ ८२ ॥

बस्तौ च नेत्रयोश्चैव स स्यादैरावतान्वयः ।
अध्यक्षस्सारसहतौ स्वेच्छायुद्धविशारदः ॥ ८३ ॥

कुञ्जरस्स्थूलशीर्षश्च पुण्डरीकान्वयो गजः ।
श्यामवर्णस्सुदेहश्च कृष्णकेशः कृशोदरः ॥ ८४ ॥

स्थूलविन्दुश्चृतावंसौ पुष्पदन्तान्वयः करी ।
अग्निवर्णसुवर्णाक्षो वेगवान् जललम्पटः ॥ ८५ ॥

आयतो विस्तृतोऽत्यर्थं वामनो वामनान्वयः ।
प्रचण्डः कुमुदच्छायः कपोतनयनच्छविः ॥ ८६ ॥

मेधावी तनुरोमा च सुप्रतीकान्वयो गजः ।
स्निग्धवालधिगण्डो यश्श्वेतोदरकरान्वितः ॥ ८७ ॥

उन्नतस्थूलजघनस्सोऽञ्जनान्वयसम्भवः ।
श्रोत्रपृष्ठसितो ह्रस्वश्रोत्रहस्तसमन्वितः ॥ ८८ ॥

धेनुकाध्यक्षकस्थूलस्सार्वभौमान्वयो गजः ।
कुमुदाभरस्स्थूलतनुस्तिग्मलोहितलोचनः ॥ ८९ ॥

कृष्णविस्तीर्णहस्ताग्रः कुञ्जरः कुमुदान्वयः ।
धैर्यं शौर्यं पटुत्वं च विनीतत्त्वं सुकर्मता ॥ ९० ॥
अन्वर्थवेदिनश्चैव भयस्थानेष्वमूढता ।
दौर्मनस्यं तथालस्यं निद्रालुत्वं च मूढता ॥ ९१ ॥
गम्भीरवेदिता चैव दुष्टत्वं च तमोगुणाः ।
तेजस्विता च चण्डत्वं चपलत्वं तथैव च ॥ ९२ ॥
शीघ्रता क्रीडनत्वं च तथैवोत्तानवेदिनः ।
धृतो धावति चात्यर्थं [1] प्रियं स्वमनुगच्छति ॥ ९३ ॥
[2] प्रत्यर्थिवेदीविज्ञेयो व्यालो मिश्रगजो मतः ।
दशसंवत्सरादूर्ध्वमा चतुर्दशवत्सरात् ॥ ९४ ॥
गजानामुत्तमं प्रोक्तं वयश्शास्त्रविशारदैः ।
ऊर्ध्वं चतुर्दशाब्देभ्यस्त्रिंशत्संवत्सरावधि ॥ ९५ ॥
मध्यमं तु वयस्तस्मादूर्ध्वं यावच्च सप्ततिः
वयोऽधमं ततोऽप्यूर्ध्वं न योग्या वाहनादिषु ॥ ९६ ॥
सर्वं कर्म क्रियायोग्यं पूर्वे वयसि कारयेत् ।
मध्ये वयसि नागानामधमे च प्रदृश्यते ॥ ९७ ॥

अन्त्ये वयसि मातंगान्न कर्मसु नियोजयेत् ।
सुस्निग्धं श्यामकान्तिं सघुरभिवदनं सप्तधातुस्थिरांगं
सुव्यक्तोत्तुंगकुम्भं शशिधवलनखं सान्द्रसिन्दूरविन्दुम् ।
मध्याभोत्तुङ्गरङ्गस्थिरतररदनं धैर्यवन्तं द्विपेन्द्रं
संप्राप्तो भूमिपालस्सजलधिपरिघां शास्ति पृथ्वीमशेषाम् ॥ ९८ ॥

मध्वाभदक्षिणसमुन्नतदन्तकोशाः
सुस्निग्धचारुनयना अतिदीर्घहस्ताः ।
संपूर्णविंशतिनखाः पृथुपीनकुम्भाः
निश्छिद्रविन्दुरुचिरोज्ज्वलकर्णतालाः ॥ ॥ ९९ ॥

क्षोणीमन्डलकुन्डलीकृतकरायामोऽतिरामो दृशः
क्षौद्राम्भोरुहगन्धदक्षिणमहादन्तोऽभिरामेक्षणः ।
स्फूर्जद्विंशतिसन्नखः परभृतव्याहारचारुस्वनो
निच्छिद्रश्रवणाञ्चलो नृपकरी स्याद्बिन्दुजालोज्ज्वलः ॥ १०० ॥

आभूमिदीर्घऋजुवृत्तसरोमवालश्चूतप्रवालऋजुकोमलकोशदण्डः ।
रक्तारविन्दनयनः कलकण्ठनादस्सोऽयं करी शुभकरः खलु पार्थिवानाम् ॥

शिक्षितः पञ्चधारासु सर्वभूमिषु शिक्षितः ।
अन्धवत्सर्वभूतेषु शब्देषु बधिरो भवेत् ॥ १०२ ॥

रसेष्वजिह्ववन्नागो भयस्थानेष्वशङ्कितः ।
स्त्रीवालवृद्धमत्तानामारोहेषु सुखावहः ॥ १०३ ॥

अन्वर्थविन्मनस्वी च मधुसन्निभलोचनः ।
ईदृशश्च द्विपेन्द्रेषु प्रदिष्टो राजवाहनम् ॥ १०४ ॥

वलसत्त्वसमायुक्तो जीवनेऽतीव संयुतः ।
साधुशीलो विभक्ताङ्गः प्रज्ञावान्नामवान् शुचिः ॥ १०५ ॥

आवालवृद्धवोढा च कालिङ्गवनसंभवः ।
आङ्गदेयकजातो यस्सम्पूर्णाग्रिस्सुलक्षणः ॥ १०६ ॥

सन्तापरहितो दान्तो विशालासनमस्तकः ।
ताम्रचूडहलाकारदन्तद्वयशुभाननः ॥ १०७ ॥

समाङ्गस्समपादश्च स भवेदुपवाहनम् ।
मधुदृङ्मधुदन्तश्च मनोज्ञस्सूक्ष्मविन्दुमान् ॥ १०८ ॥

दीर्घाङ्गुलिस्सुपूज्येन पुष्करेण समन्वितः ।
भद्रजातिस्स्थिरतनुर्गोलाङ्गूलो महाशिराः ॥ १०९ ॥

हर्यक्षस्स्फटिकाक्षो वा सर्वसत्वमदोद्यतः ।
विप्रयुक्तस्स्वकेभ्यो वा विच्छिन्नश्चापि सङ्गरे ॥ ११० ॥

एकएव समायाति निश्शङ्को देशकालयोः ।
गुणैरेतैस्समायुक्तो गजस्सान्नाह्यिको भवेत् ॥ १११ ॥

---

[1] प्रियत्वम. [2] प्रत्यर्थिवेधी.

कालयोगविशेषेण मत्तासु करिणीषु च ।
तादृग्गजसमायोगाज्जायन्ते गन्धहस्तिन: ॥ ११२ ॥

गन्धश्च मधुना तुल्यो मूत्रस्वेदपुरीषज: ।
स्वेदमूत्रपुरीषाणि मदं चैव मतङ्गजा: ।
यस्य चाघ्राय माद्यन्ति तं विद्याद् गन्धहस्तिनम् ॥ ११३ ॥

मदमूत्रपुरीषाणि संजिघ्रन्नस्य हस्तिन: ।
दीप्तकोपाग्निना नागो यस्तु दंदह्यते स्वयम् ॥ ११५ ॥

तं गन्धहस्तिनं विद्यान्नृपतेर्विजयावहम् ।
तथैव मदयुक्तस्य प्राप्तैश्वर्यस्य हस्तिन: ॥ ११६ ॥

जायते यस्ततो नागस्सोऽपि गन्धेन हन्ति च ।
मदगन्धेन नागानां य: परावर्तते गज: ॥ ११७ ॥

स गन्धमदहस्ती स्याद्बाल्यप्रभृति वारण: ।
यस्त्वरोगादरोगायां जायते तु वसन्तके ॥ ११८ ॥

सोपि गन्धद्विपो नागस्सर्वर्त्तुमदसंश्रय: ।
पुनरस्य प्रभिन्नायामप्रभिन्नस्य हस्तिन: ॥ ११९ ॥

प्रभिन्नस्याप्रभिन्नायां पुनरस्याभिजायते ।
पुरावृत्तमदादन्य उपस्थितमदात् पर: ॥ १२० ॥

यादृशी च नवावस्था तादृशं गन्धमादिशेत् ।
तरुण्यां मत्तजातो वा शूरस्सम्पूर्णलक्षण: ॥ १२१ ॥

तेजस्विनस्त्वभिजना हन्तार: क्रोधसंयुता: ।
कुर्वते शुभजातस्य पदं गन्धद्विपा नृपम् ॥ १२२ ॥

व्यक्तता बाहुशिरसोरुन्नतत्वं तथोरस: ।
दन्तयोस्स्वर्णवर्णत्वं नेत्रयोर्मधुपिङ्गल: ॥ १२३ ॥

आसनस्य पृथक्त्वं च पूर्णता कुक्षिपार्श्वयो: ।
पृथुत्वं पृष्ठभागस्य घनत्वं समसन्धिता ॥ १२४ ॥

स्निग्धच्छायत्वमायाम: परिणाहस्तथैव च ।
श्रीमत्त्वं सुभगत्वं च कायस्यैते गुणास्स्मृता: ॥ १२५ ॥

हस्तस्स्यात् प्रथमं क्षेत्रं द्वितीयं वदनं तथा ।
तृतीयं दन्तयोर्युग्मं चतुर्थं शिर उच्यते ॥ १२६ ॥

पञ्चमं नयने चापि षष्ठं कर्णाभिधं भवेत् ।
ग्रीवा च सप्तमं ज्ञेयं गात्रमष्टममुच्यते ॥ १२७ ॥

उरश्च नवमं ज्ञेयं कायश्च दशमं भवेत् ।
एकादशं तथा मेढ्रं द्वादशं चापरद्वयम् ॥ १२८ ॥

एवं द्वादशसंख्यानि क्षेत्राणि करिणां क्रमात् ।
द्वादशैव दशा ज्ञेया दशवर्षाभिलक्षिता: ॥ १२९ ॥

विंशोत्तरं वर्षशतं भद्रस्यायु: प्रकीर्त्तितम् ।
अब्दा अशीतिर्मन्द्रस्य चत्वारिंशन्मृगस्य च ॥ १३० ॥

सर्वै: क्षेत्रैस्तु संपूर्णैस्सम्पूर्णायुर्गतो भवेत् ।
हीनैश्च हीयते चायुस्तत्रापदभिधीयते ॥ १३१ ॥

दशाब्दानां क्षयं कुर्याद्धस्तो लक्षणवर्जित: ।
विंशत्यब्दविनाशश्च हीने क्षेत्रद्वये भवेत् ॥ १३२ ॥

एकं दशाब्दनाशं तु क्षेत्रं कुर्यादलक्षणम् ।
एवमायु:क्षयं विद्याद् गजस्य गजकोविदै: ॥ १३३ ॥

हस्तो मुखं रदौ नेत्रे शिर: कर्णौ च कन्धरा ।
गात्रापरश्च नागानामङ्गान्यष्टौ विनिर्दिशेत् ॥ १३४ ॥

ओष्ठकक्षोदरं नाभिरण्डकोशश्च पेचक: ।
तलानि च नखान्यष्टा उपाङ्गानि विनिर्दिशेत् ॥ १३५ ॥

अङ्गुलीपुष्कर: कुम्भो मस्तकं केसरो मणि: ।
वक्ष: पादासनं चाष्टौ प्रत्यङ्गानि विनिर्दिशेत् ॥ १३६ ॥

तन्मूर्ध्नि निवसेद् ब्रह्मा ललाटे स्कन्द एव च ।
मस्तके वीरभद्रस्स्यादक्ष्णोश्च शशिभास्करौ ॥ १३७ ॥

नासिकायां तु विघ्नेशो रुद्राश्च श्वास एव च ।
मुखे च भाग्यलक्ष्मीस्तु वीरलक्ष्मी रदद्वये ॥ १३८ ॥

शृङ्गाग्रयो: कृतान्तस्स्यान्नरसिंह: कपोलयो: ।
पादेषु वेदाश्चत्वारो विष्णुरस्य करे स्थित: ॥ १३९ ॥

नखाग्रेष्वष्टमीचन्द्रस्तद्वेगे मारुतस्तथा ।
अग्निर्नाभौ विधाता च कुक्षौ मेढ्रे प्रजापति: ॥ १४० ॥

अन्येषु नागास्तिष्ठन्ति सर्वे लोकधुरंधरा: ।

पृथुर्वृत्त: पीनस्तनुरुचिरविन्दुर्वलयित—
स्फुरद्दर्जाराव: किसलयनिभो भास्वदुदर: ।
सवर्णैस्स्वर्णेन प्रकटतनुभिर्युग्मजनितै —
स्समेतो रोमौघैस्सुरभितरनिश्वासपवन: ॥ १४१ ॥

स्निग्धश्रीरानुपूर्व्येण सुस्रोतोघनपुष्कर: ।
कुण्डलीकृतरस्याग्रहस्तो दीर्घाङ्गुलि: कर: ॥ १४२ ॥

मार्दवं धनवृद्धौ स्यात् सुवृत्तत्वं च पुत्रदम् ।
रोमभिर्जातिवृद्धि स्याद् विन्दुभिर्धान्यसम्पद: ॥ १४३ ॥

ताम्रकुक्ष्या कोशवृद्धिर्महापुष्करतश्शुभम् ।
पुत्रपौत्राभिवृद्धिश्च निश्वासेन सुगन्धिना ॥ १४४ ॥

स्निग्धता वैरिनाशाय कीर्त्यै कुण्डलितौ रदौ ।

तप्तस्वर्णमरन्दकेतकघृतक्षौद्रेन्दुकुन्दप्रभौ
नीरेखौ पृथुलौ समौ स्थिरतरौ स्निग्धौ दृढौ प्रोन्नतौ
चक्रेन्द्रायुधपविशूलयमराड्दण्डान्वितौ छेदने ।
स्यातां निर्व्रणिनौ यथायुधहलाभौ दक्षिणे चोन्नतौ ॥ १४५ ॥

दन्तवेष्टसमुन्नद्धमूलौ स्थूलौ प्रहारिणौ ।
समायतौ पेशलौ च मुसलाग्रौ रदौ शुभौ ॥ १४६ ॥

दन्तस्य मूलपरिधिं द्विरायतं प्रोज्झ्य कल्पयेच्छेषम् ।
अधिकमनूपचराणां न्यूनं गिरिचारिणां किञ्चित् ॥ १४७ ॥

श्रीवृक्षवर्धमानच्छत्रध्वजचामरादिरूपेषु ।
भेदे पृष्ठेऽथारोग्यविजयधनवृद्धिसौख्यानि ॥ १४८ ॥

प्रदरणसदृशेषु जयो नन्द्यावर्ते प्रणष्टदेशाप्तिः ।
लोष्टेत्वलब्धपूर्वस्य भवति देशस्य सम्प्राप्तिः ॥ १४९ ॥

स्त्रीरूपैश्च विनाशो भृङ्गारेऽभ्युत्थिते सुतोत्पत्तिः ।
कुम्भेन निधिप्राप्तिर्यात्राविघ्नश्च दण्डेन ॥ १५० ॥

कृकलासकपिभुजङ्गैरसुभिक्षव्याधयो रिपुवशित्वम् ।
गृध्रोलूकध्वांक्षश्येनाकारेषु [1] जनमदकः ॥ १५१ ॥

पाशेऽथवा कबन्धे नृपमृत्युर्जनविपत्सुते रक्ते ।
कृष्णश्यामे रूक्षे दुर्गन्धे चाशिवं भवति ॥ १५२ ॥

शूलं शशाङ्कधवलं चक्रमग्निसमप्रभम् ।
कालदण्डस्तु पिङ्गाभः कुलिशं काञ्चनोपमम् ॥ १५३ ॥

विन्दुमत् पृथुवाहार्धं स्निग्धप्रद्योतवच्छुभम् ।
अभयं पाटलामोदि मनोज्ञं मुखमण्डलम् ॥ १५४ ॥

रक्तकृष्णतनुश्लक्ष्णमण्डले नीलदीर्घमृदुरोमपक्ष्मणी ।
आयते शुभदर्शनान्विते प्रान्तलोहितविलोचने शुभे ॥ १५५ ॥

कर्णौ दुन्दुभिनिस्वनौ मृदुतरौ विन्द्वङ्कितौ वर्त्तिनौ
लम्बौ मन्दरयौ शिराप्रविततौ रेखावलीवर्जितौ ।
निश्छिद्राश्चलकावलोमरुचिकालोलौ स्फुरच्चूलिकौ ।
कुर्यातां निजभर्तुराहवजयं नित्यां श्रियं दन्तिनः ॥ १५६ ॥

उन्नतं रोमशं चैव व्यक्तपिण्डकसंयुतम् ।
शुभदृष्टियुतं स्निग्धं करिणां मस्तकं वरम् ॥ १५७ ॥

शिरः कुर्यादुन्नतत्वाज्जयलक्ष्मीसमुन्नतिम्
रोमशत्वाद्वंशवृद्धिमाह्लादं शुभदर्शनात् ॥ १५८ ॥

समृद्धिं धनधान्यानां सुव्यक्तं यूथमस्तकम् ।
असंमृष्टा कृशा दीर्घा चातिलम्बगला तथा ॥ १५९ ॥

ग्रीवा भ्रष्टांसका तन्वी निर्वाणे मृष्टपिण्डका ।
न प्रशस्तेदृशी ग्रीवा तदन्या तु शुभावहा ॥ १६० ॥

समे दीर्घे शुभे गात्रे किञ्चिदानम्रपश्चिमे ।
वक्रहीने मांसले च घने गात्रे शुशोभने ॥ १६१ ॥

दीर्घं यत्र जयस्तत्र समता समदृष्टिता ।
प्रतिष्ठितैः पदन्यासै राष्ट्रस्थैर्यं भवेत्ततः ॥ १६२ ॥

कदलीदलपाश्चात्यादण्डरूपोऽतिशोभितः ।
शस्तः कोदण्डदण्डाभो वंशादण्डोऽतिमांसलः ॥ १६३ ॥

कोदण्डदण्डसादृश्यं वंशवृद्धिकरं प्रभोः ।
विपुलं चार्जवोपेतं पीनं मांसातिशोभितम् ॥ १६४ ॥

स्कन्धं करोति भूभर्तुर्दीर्घं सिंहासनस्थितम् ।
देहच्छायासवर्णत्वं मृदुत्वं च तथा परम् ॥ १६५ ॥

अनाविलत्वं दृश्यत्वं तथा चास्पृश्यगात्रता ।
अयुग्मत्वं च सूक्ष्मत्वं रोम्णि सप्त गुणास्स्मृताः ॥ १६६ ॥

मुखे च पृष्ठवंशे च कर्णयोरासने तथा ।
स्कन्धे कुक्षौ च कोशे च मुष्के पेचकयोस्तथा ॥ १६७ ॥

रक्तवर्णकरोमाढ्या दन्तिनः स्वामिघातुकाः ।
द्वे रोमकूपे नागस्य दृश्येते कुलनाशके ॥ १६८ ॥

श्वेतश्च पीतवर्णश्च अरविन्दनिभस्तथा ।
स्वर्णवर्णसमायुक्तो विन्दुः स्वामिविवर्धनः ॥ १६९ ॥

मयूरगर्दभश्येनकपीन्द्रसदृशैस्तथा ।
काकगृध्रनिभश्चैव विन्दुभिश्चैभिरन्वितान् ॥ १७० ॥

मेघतारकसङ्काशान् दृष्ट्वा दूरेण वर्जयेत् ।
सर्वलक्षणसम्पूर्णो दन्ताभ्यां परिवर्जितः ॥ १७१ ॥

मोक्कलीयस्समाख्यातस्संग्रामे प्राणघातुकः ।
पादयोस्सन्निघर्षस्स्याद् यस्य नागस्य गच्छतः ॥ १७२ ॥

स षण्डो लक्ष्मयुक्तोऽपि लक्षणज्ञैर्न पूजितः ।
जघनं चाधिकं किञ्चिद्विस्तृतं च स्तनान्तरम् ॥ १७३ ॥

पिष्टकस्स तु निर्दिष्टो दुर्गतिर्निन्दितो गजः ।
तथा वामैकदन्तस्तु कुर्याद्राज्ञः कुलक्षयम् ॥ १७४ ॥

दक्षिणेऽधोमुखे दन्ते निहन्यान्मन्त्रिणं नृपम् ।
कुब्जवामनकमेषविषाणान् दृश्यकोशवलपुष्करहीनान् ॥ १७५ ॥

श्यामनीलशवलासितपूर्णस्वल्पवत्करुहमत्कुणगन्धान् ।
गर्भिणीश्च नृपतिः परदेशान् प्रापयेदतिविरुद्धफलस्ताः ॥ १७६ ॥

[1] जनमरणम्.

सङ्कुक्षितो वस्तिजघने पृष्ठवंशे समुन्नतः ।
बलहीनस्तनूनाभिस्स कुब्जो वारणाधमः ॥ १७७ ॥

पूतनो मातृकश्चैव मत्कुणो मायुकस्तथा ।
स्विन्नदेहो लक्ष्यमुष्कस्स्थूलह्रस्वकरस्तथा ॥ १७८ ॥

गात्राभ्यामपराभ्यां च पुष्कराभ्यां तथैव च ।
कर्णाभ्यां मस्तकाभ्यां च नेत्राभ्यां वापि वारणः ॥ १७९ ॥

द्वाभ्यामेकेन वा हीनो व्यालहस्ती निगद्यते ।
विषाणेन च कर्णेन नयनेन पदेन च ॥ १८० ॥

पार्श्वेनैकेन हीनश्च सम्यगेकत्र संयुतः ।
नीलजीमूतसङ्काशच्छवियुक्तस्तथैव च ॥ १८१ ॥

माञ्जिष्ठनखरोमा च नाम्नायं पूतनो गजः ।
त्यक्त्वा च तं यूथघातं ततश्शान्तिं प्रयोजयेत् ॥ १८२ ॥

हीनो विषाणकर्णाद्यैर्यो गजो वामपार्श्वतः ।
मातृतस्स तु विज्ञेयो दरिद्रस्तेन पार्थिवः ॥ १८३ ॥

ईदृशं वारणं दृष्ट्वा रिपुराष्ट्रे विसर्जयेत् ।
सुदीर्घपद्मवांश्चापि रूपवान् बलवानपि ॥ १८४ ॥

अविषाणो गजो यस्तु मत्कुणस्स गजाधमः ।
ह्रस्वाल्पतनुकर्णं च तनुवालधिमेहनम् ॥ १८५ ॥

दीर्घहस्तं तनुग्रीवं दुर्गन्धं दुर्मनस्विनम् ।
कालकायं कालजिह्वं निर्दिशेन्मायुकं गजम् ॥ १८६ ॥

सेनापतिं च राष्ट्रं च नाशयेन्मायुको गजः ।
आवर्तष्षट्प्रदेशेषु त्वग्जो दशनभङ्गजः ॥ १८७ ॥

केशजः पद्मजातश्च वालजो रोमजोऽपि च ।
केशरोमभरौ शस्तौ दन्तकल्पनजश्शुभः ॥ १८८ ॥

शोकानर्थप्रदाः प्रोक्तास्त्वग्जपक्ष्मजवालजाः ।
भूमिदो रोमजावर्तः केशावर्तो जयप्रदः ॥ १८९ ॥

दन्तभङ्गभवावर्तस्सुतदारप्रदस्तथा ।
प्रशस्तो दक्षिणावर्तो वामावर्तोऽतिनिन्दितः ॥ १९० ॥

शस्तो मतो मृदुस्निग्धस्सवर्णः पीतरोमकः ।
वामे च दक्षिणावर्तो वामावर्तश्च दक्षिणे ॥ १९१ ॥

आवर्तास्तेऽपि नाभीष्टा द्विपदेहसमुद्भवाः ।
शुभोऽप्यक्षेत्रजातोऽसौ शुभं नैव प्रयच्छति ॥ १९२ ॥

अशुभक्षेत्रजातश्च नानिष्टफलदस्स्मृतः ।
अवग्रहग्रहस्थे च स्तनयोरन्तरे तथा ॥ १९३ ॥

ग्रीवायामक्षिकूटोर्ध्वकुम्भाभ्यन्तरतस्स्थितौ ।
तन्मूले दन्तवेष्टे च कर्णमध्ये तु वक्षसि ॥ १९४ ॥

आवर्ता वारणानां हि विजयाख्याश्शुभप्रदाः ।
स्तनान्तरे शिरोमध्ये कुम्भान्तश्चूलिकान्तरे ॥ १९५ ॥

वक्षस्यावर्तयोगेन कुञ्जरः पञ्चमङ्गलः ।
शीर्षावर्तोऽभिषेकाय स्तनावर्तो जयाय च ॥ १९६ ॥

मुखाय चूलिकावर्तः कुम्भावर्तः प्रियाय च ।
वंशे पोथेऽथवाहित्थे मन्यायां गलकोष्ठके ॥ १९७ ॥

कर्णेक्षिकूटे नाभौ च कक्षपक्ष्मांसकुक्षिषु ।
वालधौ पेचके मेढ्रे रन्ध्रसन्धिकलासु च ॥ १९८ ॥

आवर्ता न प्रशस्यन्ते मर्मभागे तथैव च ।
दन्तभङ्गफलमत्र दक्षिणे भूपदेशबलविघ्नप्रदम् ।
वामतस्सुतपुरोहितादिकान् हन्ति साटविकदारनायकान् ॥ १९९ ॥

आदिशेदुभयभङ्गदर्शनात् पार्थिवस्य सकलं कुलक्षयम् ।
वाममध्यरदखण्डनं भवेच्छत्रुनाशकृदतोऽन्यथान्यथा ॥ २०० ॥

कटिश्च श्रवणे नेत्रं वक्षः कोशः करस्तनौ ।
पादश्च करिणामेवमष्टस्थाने स्रवेन्मदः ॥ २०१ ॥

वासा च नागरं शीथुर्घर्मश्च मदशीकरौ ।
छिक्का मुखश्च करिणां मदनामानि चाष्टधा ॥ २०२ ॥

दन्तघातान्न जानाति यो रणे निष्फलो हि सः ।
दन्तघातेषु कुशलं कारयेद् युद्धकर्मणि ॥ २०३ ॥

सम्पातश्च तथोल्लेखः परिखलस्तथैव च ।
कर्तरीतलघातश्च पार्श्वघातस्तथैव च ॥ २०४ ॥

आराघातस्तु सूचीवान् ताडितस्सन्धितस्तथा ।
प्रतियुद्धेषु नागानां दन्तघातस्तु कर्तरी ॥ २०५ ॥

तलघातस्तु दन्ताधः क्रियतेऽधोमुखेन च ।
पार्श्वघातस्स विज्ञेयो यस्तलेन प्रयुध्यति ॥ २०६ ॥

आराघातस्स विज्ञेयस्सम्मुखाभ्यामलक्षितः ।
करमध्यप्रदेशे तु सूचीघातस्स उच्यते ॥ २०७ ॥

अन्योन्यदन्तसंघर्षजनितस्ताडितो मतः ।
सन्धितस्तु स विज्ञेय उपर्युपरि यो भवेत् ॥ २०८ ॥

हस्तिनीनां प्रवक्ष्यामि साम्प्रतं शुभलक्षणम् ।
सुवृत्तौ मस्तको यस्यास्सुविभक्ते स्तनावली ॥ २०९ ॥

सुकेशी कलविङ्काक्षी श्वेता स्निग्धमुखी च या ।
महारक्ता महाश्रोणी सुभगा चरुगामिनी ॥ २१० ॥

रक्तोत्पलदलाभासा यस्याश्च दशनावली ।
हस्तिनी तादृशाकारा यूथपं जनयेद् द्विपम् ॥ २११ ॥
यस्यैषा हस्तिनी राज्ञस्स्वस्तिसौभाग्यवान् भवेत् ।
गन्धमाल्यानुलेपैश्च चारुभिर्द्विविधात्मकैः ॥ २१२ ॥
धूपाद्यैर्मधुपर्कैश्च दशां पर्वसु पूजयेत् ।
यादृशं लक्षणं पूर्वं नागानां प्रतिपादितम् ॥ २१३ ॥
तदेव लक्षणं तज्ज्ञो हस्तिनीष्वपि योजयेत् ।
शूरमारोहकं कुर्याद्वशगं च विशेषतः ॥ २१४ ॥
शूरत्वं वाहकत्वं च तदायत्तं गजे यतः ।
स जितः कल्पितश्शूरश्शूरारूढः प्रतापवान् ॥ २१५ ॥
जयत्येकोऽपि मातङ्गष्षट् सहस्राणि वाजिनाम् ।
शरतोमरहस्ताश्च गजस्कन्धस्थिता नराः ॥ २१६ ॥
क्षणात् सर्वे प्रयान्त्येव तस्मात्स्वर्गोपमा गजाः ।
प्राकारतः पुरद्वारकपाटोद्घाटनादिषु ॥ २१७ ॥
भञ्जने मर्दने चैव नागा वज्रोपमास्स्मृताः ।
एकशक्तिप्रहारेण म्रियतेऽश्वो नरोऽपि च ॥ २१८ ॥
सहेन्महाप्रहाराणां शतं युद्धेषु वारणः ।
रक्षन्ति पक्षं मुदितास्स्वकीयं मृद्नन्ति सैन्यं कुपिताः परेषाम्
प्राणैरपीच्छन्ति हितं 1) गजं नृपा गजैस्समानं क्व बलं महीयः ॥

1) प्रभूणां.

स्खलितगतिरकस्मात् स्रस्तकर्णोतिदीनः
श्वसिति मृदु सुदीर्घं न्यस्तहस्तः पृथिव्याम् ।
धृतमुकुलितदृष्टिस्स्वप्नशीलो विलोमो
भयकृदहितपक्षास्यैकतोऽश्रु प्रमुञ्चन् ॥ २२० ॥

वल्मीकस्थाणुपल्लीक्षुपतरुमदनस्वेच्छयादृष्टदृष्टि-
र्यायाद्यात्रानुलोमं त्वरितपदगतिर्वल्क्मुन्नम्य चोच्चैः ।
कक्ष्यासन्नाहकाले जनयति च महत् सीकृतं बृंहितं वा
तत्कालं वा मदाप्तिर्जयकृदथ रदं वेष्टयेद्दक्षिणं च ॥ २२१ ॥

एवं गजानां लक्ष्माणि कथितानि समासतः ।
एवं परीक्षयेत्तेन लक्षयेदुत्तमान् गजान् ॥ २२२ ॥
स्त्रीकुर्यादवनीपालो विपरीतान् परित्यजेत् ॥ २२३ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारण-
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्र-
सारभूते श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले
गजलक्षणनिरूपणं नामैकादशस्तरङ्गः

अथ द्वादशस्तरंगः

पूर्वं गजानां लक्ष्माणि प्रोक्तान्येवं समासतः ।
अश्वानामथ कीर्त्यन्ते साम्प्रतं संभवादिकाः ॥ १ ॥
अमृताद्बाष्पतो वह्नेर्देवेभ्योऽण्डाच्च गर्भतः ।
साम्नो हयानामुत्पत्तिस्सप्तधा परिकीर्त्तिता ॥ २ ॥
अमृतेनार्णवात्सार्धमुदतिष्ठत् पुरा किल ।
उच्चैश्श्रवा नाम हयस्स एकोऽमृतसंभवः ॥ ३ ॥
अम्भोजयोनेर्मुखतो जिह्वातो जातवेदसः ।
अश्रूणि सुस्रुवुः पाण्योस्रयस्तत्र प्रजज्ञिरे ॥ ४ ॥
तुरङ्गमा युगादौ ते एते स्युर्बाष्पसंभवाः ।
सरसीरुहसंभूतहूयमानहुताशनात् ॥ ५ ॥
आविरासीत् पुरा वाह एष वह्निसमुद्भवः ।
इन्द्रादयोऽष्टौ विबुधास्सृष्ट्यादौ प्रसृता यदा ॥ ६ ॥
तज्जाता दिक्षु तुरगा यदा विश्वसृजः किल ।
एष देवसमुत्पन्नस्संभवः परिकीर्त्तितः ॥ ७ ॥
अत्र प्रजापतिर्लक्ष्मीतपोवनसमीपतः ।
मृगयुलब्धत्वमापन्नो तौ परस्परशापतः ॥ ८ ॥

तास्यामण्डान्यजायन्त स स्यादण्डसमुद्भवः ।
तुङ्गप्रसूकायोगाज्जातो गर्भसमुद्भवः ॥ ९ ॥
साम्ना ततोऽसृजत् स्रष्टा सृष्टिकाले तुरङ्गमान् ।
इति सप्तविधोत्पत्तिस्सप्तिनां परिकीर्तिता ॥ १० ॥
वेदस्विदाम्बुसंयुक्तभस्मोत्पन्नाः खराः पुरा ।
एवं खराणामुत्पत्तिः कथिता पूर्वसूरिभिः ॥ ११ ॥
खराश्च योनिसंभूता वक्ष्यन्ते खरजातयः ।
बडबायां खराज्जातस्स्यादश्वतरनामकः ॥ १२ ॥
प्रसूकायां प्रजातो यस्तस्माद् गौरीखरस्स्मृतः ।
मुकुवस्तु ततोऽश्वायां संसर्गाज्जायते तु यः ॥ १३ ॥
बडबायां किणाज्जातो मुकुवस्तु ततः परम् ।
मुकुवायां किणाज्जातः किंषष्ठः इति कीर्त्तितः ॥ १४ ॥
किंषष्ठात्तु विजानीयात् [1] प्रसूतो यः खरः परः ।
पुरा सपक्षा हरयो विचेरुः खेचराः किल ॥ १५ ॥
तानालोक्यावदच्छक्रश्शालिहोत्रं मुनिं प्रति ।
छिन्धि पक्षानमीषां त्वं यथा स्युर्वाहनानि मे ॥ १६ ॥
इषीकास्त्रेण सोऽप्येषां पक्षांस्तत्प्रीतयेऽच्छिनत् ।
ततः प्रसादितस्तैस्तु प्रादाद्वरमिमं मुनिः ॥ १७ ॥
युष्मत्पक्षोपमो वेगश्चरणानां भविष्यति ।
यूयं शक्रादिदेवानां वाहनत्वं गमिष्यथ ॥ १८ ॥
तथा भूमिपतीनां च गौरवेण समन्विताः ।
यो राजा भवतां पुष्टिमन्नपानादिभिस्सदा ॥ १९ ॥
करिष्यति स सर्वत्र जयभागी भविष्यति ।
अथागत्य भुवं राज्ञां गता वाहनतां हयाः ॥ २० ॥
तेषां धर्मोश्च कामांश्च [2] साधयन्ति मनीषिणः ।
दुर्लक्ष्यं हि तुरङ्गाणां चातुर्वर्ण्यं प्रचक्ष्महे ॥ २१ ॥
संयुताश्शीलवन्तश्च शुद्धाचारसमन्विताः ।
लक्ष्मीवन्तश्च धीराश्च सुहृदस्सर्ववाजिनाम् ॥ २२ ॥
शूद्रगन्धर्वसत्वाश्च तत्तदाचारगोचराः ।
अर्जुनारुणवर्णाश्च हया वा मधुपिङ्गलाः ॥ २३ ॥
उशीरघृतलाजानां तुल्यगन्धा मनस्विनः ।
स्रग्गन्धपायसाज्येषु संसक्ता ब्राह्मणा हयाः ॥ २४ ॥
तेजस्विनो धुराधीराः कोपनास्सत्वसंयुताः ।
क्रूरा महास्वनास्तीक्ष्णा महाकाया महाबलाः ॥ २५ ॥
यक्षगन्धर्वसत्वाश्च तत्समाचारगोचराः ।
सितासितास्सुवर्णा वा पुण्याः पुष्पसुगन्धिनः ॥ २६ ॥
मल्लिकापुष्पनेत्राश्च मणिनेत्रास्तुरङ्गमाः ।
विभक्तावयवा वाहाः क्षत्रिया दुःखशीलिनः ॥ २७ ॥
वातातपसहाः श्रान्ता भारोद्वाहक्षमाः स्थिराः ।
हर्षसन्तापहीनाश्च मध्यवेगसमन्विताः ॥ २८ ॥
पानप्रियाः पल्लवाभाः क्रौञ्चपत्रसुपाटलाः ।
छागवानरगन्धाश्च रक्षस्सत्वसमाश्रिताः ॥ २९ ॥
ईद्दग्लक्षणसंयुक्ता हया वैश्या जितेन्द्रियाः ।
अप्रशस्तगुणा वाहास्त्वशुद्धाचारगोचराः ॥ ३० ॥
परभुक्तोज्झितं चापि तथान्नं भक्षयन्ति हि ।
न वर्जयन्त्यशुद्धानि प्रहरन्ति च पोषकान् ॥ ३१ ॥
विच्छिन्नरक्षनादाश्च हयास्सालसुगन्धिनः ।
पिशाचसत्वसंयुक्ताश्शूद्रा ज्ञेया हयाधमाः ॥ ३२ ॥
पृथक् च स्थापयेदेतान् ब्राह्मणादीन् भिषग्वरः ।
अतः परं तुरङ्गाणां प्रकृतिर्वक्ष्यते क्रमात् ॥ ३३ ॥
निस्साररूक्षयवसवल्लीपत्रादिसेवनात् ।
ग्रीष्मान्ते प्रावृडारम्भे तुरगाः प्रसुका अपि ॥ ३४ ॥
वातप्राया भवन्त्येभ्यो जायन्ते वातिका हयाः ।
अन्वर्थवेदी विकृतो हीयते रूक्षरोमवान् ॥ ३५ ॥
कार्श्यचञ्चलतायुक्तः कार्कश्यसहितोऽशुचिः ।
भद्रो निद्राति दुर्मेधा वातप्रकृतिरुच्यते ॥ ३६ ॥
घनागमान्तकाले तु हेमन्तादौ तुरङ्गमाः ।
दिवाकरकरैस्तप्ता नितरां तरुणा अपि ॥ ३७ ॥
यवसान्यतिसेवन्ते भवेयुः पित्तला भृशम् ।
वडबायां ततो जातस्तीक्ष्णशूलो जलप्रियः ॥ ३८ ॥
आरक्ततालुर्मतिमान् घस्मरोऽस्थैर्यरोषणः ।
उत्तानवेदी तुरगः पित्तप्रकृतिको भवेत् ॥ ३९ ॥
बलमांसोपसम्पन्नाः पटवश्च तुरङ्गमाः ।
शिशिरे च ततो जाता महाकाया महाबलाः ॥ ४० ॥
मदासहिष्णुर्मतिमानरोगः प्रियदर्शनः ।
गम्भीरवेदी विज्ञेयश्श्लेष्मप्रकृतिको हयः ॥ ४१ ॥
शरीररोमजच्छाया गतिर्गन्धो स्वस्तथा ।
वर्णस्सत्वमितिख्यातमष्टधा लक्षणं बुधैः ॥ ४२ ॥

[1] प्रसूकायां खरः परः [2] साधयन्त्युपकारिणः

लक्षणाश्रयभूतत्वाच्छरीरस्य विशेषतः ।
शरीरलक्षणं तस्मात् प्रथमं सम्प्रवक्ष्यते ॥ ४३ ॥

आताम्रावूर्जितौ चेष्टौ वलिहीनो मृदुत्वचौ ।
जिह्वा रक्ता च तन्वी च तालु रक्तं प्रशस्यते ॥ ४४ ॥

घनास्स्निग्धास्सुबद्धाश्च समा दन्तास्सुशोभनाः ।
नातिदीर्घौ पृथू नैव हनू वाहस्य शोभनौ ॥ ४५ ॥

नेत्रे सुबद्धे सुस्निग्धे मृदुपक्ष्मसमन्विते ।
विशाले मधुपिङ्गे च प्रसन्ने वाजिनां शुभे ॥ ४६ ॥

कपिञ्जलकुरङ्गेभक्रौञ्चाक्षिसदृशे तथा ।
टिट्टिभोष्ट्रमयूराक्षिसन्निभे पूजिते मते ॥ ४७ ॥

स्वावर्तं च विशालं च ललाटं वाजिनां शुभम् ।
शस्तं शिरस्समं वृत्तमावर्तद्वयभूषितम् ॥ ४८ ॥

ह्रस्वता कर्णयोश्शस्ता तीक्ष्णता तनुता तथा ।
सुदृढां कुञ्चितां दीर्घां ग्रीवां धन्यां विदुर्बुधाः ॥ ४९ ॥

केसरं च जटाहीनं दीर्घं चैव प्रशस्यते ।
शुभावर्तो दृढश्चैव स्कन्धो वाहस्य पूजितः ॥ ५० ॥

वक्षो विशालं दीर्घं च कक्षे दीर्घोन्नते वरे ।
ऊरू वृत्तौ समौ बाहू गूढजानू शुभावहौ ॥ ५१ ॥

सुवृत्ते मांसहीने च वाजिजंघे सुशोभने ।
कूर्चं समं सुगन्धि स्याद् ग्रन्थिव्रणविवर्जितम् ॥ ५२ ॥

1) दृढमण्डूकयकाः श्लक्ष्णा वर्तुलाः पृथुलाः खुराः ।
पार्श्ववत्युन्नतो दीर्घौ सुदृढौ च समौ शुभौ ॥ ५३ ॥

अवलम्बि सुवृत्तं च जठरं वाजिनां वरम् ।
नातिदीर्घं समं पृष्ठं किञ्चिच्च विनतं शुभम् ॥ ५४ ॥

लीना कटिस्सुवृत्ता च पश्चाद्भागः पृथुश्शुभः ।
मृदुस्निग्धायतै वृत्तं वालैः पुच्छं प्रशस्यते ॥ ५५ ॥

वृषणौ च समौ वृत्तौ बिल्वमात्रौ मतौ वरौ ।
कृष्णवर्णविहीनं च ह्रस्वं मेहनमिष्यते ॥ ५६ ॥

ऋजुनी सक्थिनी वृत्ते पूजिते किञ्चिदानते ।
एतैर्गुणैर्विहीनं यच्छरीरं शुभकृन्न च ॥ ५७ ॥

समानं लक्षणं चैतद्वडवायाः प्रकीर्तितम् ।
तस्या योनिस्तथौष्ठौ च स्थिरौ दीर्घौ सुसंस्थितौ ॥ ५८ ॥

ऋज्वी विशाला श्रोणिश्च कीर्तिता मुनिभिश्शुभा ।
ऊर्ध्वं व्रीहित्रयं मानमंगुलस्य निगद्यते ॥ ५९ ॥

हस्तोऽपि च समाख्यातश्चतुर्विंशद्भिरंगुलैः ।
द्वात्रिंशदंगुलं वक्त्रमुत्तमाश्वस्य कीर्तितम् ॥ ६० ॥

अंगुलद्वयहीनं तु मुखं स्यान्मध्यवाजिनः ।
ततोऽपि द्व्यङ्गुलं न्यूनं कनिष्ठस्य मुखं स्मृतम् ॥ ६१ ॥

ग्रीवोत्तमस्य वाहस्य षट्पञ्चाशन्मितांगुलैः ।
चत्वारिंशत् षडधिका मध्यमाश्वस्य कीर्तिता ॥ ६२ ॥

षट्त्रिंशदंगुलैर्ग्रीवा हीनाश्वस्य प्रकीर्तिता ।
उरः पृष्ठं कटिश्चैव मुखतुल्यं समादिशेत् ॥ ६३ ॥

कर्णौ सप्तांगुलौ प्रोक्तौ ताल्कं च षडंगुलम् ।
सूक्ष्मं जानु पृथुर्दण्डः कथितो विंशदंगुलः ॥ ६४ ॥

द्वाविंशत्यंगुलोत्सेधे जंघे चैवोत्तमे स्मृते ।
अष्टादश तथा मध्ये हीने चैव चतुर्दश ॥ ६५ ॥

सप्तांगुलः खुरः प्रोक्त उत्तमाश्वस्य पण्डितैः ।
षडंगुलो भवेन्मध्यः कनिष्ठः पञ्चसम्मितः ॥ ६६ ॥

चतुर्हस्तश्च विख्यात उत्सेधे हय उत्तमः ।
अर्धहस्तेन हीनस्तु भवेन्मध्यस्तुरङ्गमः ॥ ६७ ॥

तथा हस्तेन हीनस्तु हीन एव स्मृतो हयः ।
पञ्चहस्तप्रमाणेन दैर्घ्यमुत्तमवाजिनः ॥ ६८ ॥

चतुर्भिर्मध्यमः प्रोक्तस्त्रिभिस्सार्धैस्तथाधमः ।
खुराग्रात् पुच्छमूलान्तं तिर्यगश्वं प्रमाणयेत् ॥ ६९ ॥

खुरान्तात् ककुदं यावद्धस्तमानेन बुद्धिमान् ।
श्वेतः कृष्णोऽरुणः पीतश्शुद्धाश्चत्वार एवहि ॥ ७० ॥

मिश्रास्त्वनेकधा वर्णास्तेषां भेदः प्रदृश्यते ।
केशवालाश्च रोमाणि चर्म चैव खुरास्तथा ॥ ७१ ॥

श्वेतैरेतैर्भवेदश्वश्शंखाभो विप्रजातिजः ।
पूर्ववत् सर्वशुक्लांगस्त्वचा कृष्णो भवेद्यदि ॥ ७२ ॥

वर्णो नाम्ना तुरङ्गो यो विज्ञेयः कर्तलस्तु सः ।
लोमभिः केशवालैश्च त्वचा कृष्णः खुरैरपि ॥ ७३ ॥

काल इत्युच्यते वाजी शूद्रश्शौर्याधिको भवेत् ।
केशप्रभृति वालान्तं सर्वाङ्गं लोहितं यदि ॥ ७४ ॥

कुङ्काभ इति विख्यातः क्षत्रजातिस्तुरङ्गमः ।
केशैस्तनूरुहैर्वालैः काञ्चनाभस्तुरङ्गमः ॥ ७५ ॥

शोरभा इति विख्यातो वैश्यजातिसमुद्भवः ।
पीतलोहितरोमाणि यदङ्गे मिश्रितानि चेत् ॥ ७६ ॥

1) दृढमण्डूकृताः

मुखांघ्रिवालकेशेषु रोहितश्चोर उच्यते ।
शेषो वालांघ्रितुण्डेषु मेचको रुरुसंज्ञक: ॥ ७७ ॥
नील इत्युच्यते वाजी सितैः कृष्णैस्तनूरुहैः ।
पाटलीपुष्पसंकाशो नलीकेषु सितेतर: ॥ ७८ ॥
मधूकवल्कलच्छायो मेघ इत्युच्यते हय:
पक्वजम्बूफलच्छायो जाम्बूव इत्यभिधीयते ॥ ७९ ॥
केशवालेषु पीतश्चेल्लोहितो हारितो मत: ।
उदुम्बरसमच्छायस्सप्ती रुचिर उच्यते ॥ ८० ॥
केशकेसरपुष्पेषु जानुनोऽधश्च मेचक: ।
सर्वाङ्गलोमभिः पीतैस्सुमनाः कथ्यते हय: ॥ ८१ ॥
सर्वश्वेतो हयो यस्तु श्यामैकश्रवणो भवेत् ।
स वाजी वाजिमेधार्हः श्यामकर्णः प्रकीर्त्तित: ॥ ८२ ॥
यस्य पादास्सितास्सर्वे तथा वक्त्रं च मध्यत: ।
कल्याणपञ्चक: प्रोक्तस्सदा कल्याणकृन्मत: ॥ ८३ ॥
केशेषु वदने पुच्छे वत्से पादेषु पाण्डर: ।
अष्टमङ्गलनामाश्वस्सर्ववर्णैर्विशिष्यते ॥ ८४ ॥
मुखे चन्द्रकसंवीतो जम्बूफलसमाकृतिः ।
श्वेतपादस्स विज्ञेयो मल्लिकाक्षस्सुपूजित: ॥ ८५ ॥
श्वेतस्सर्वेषु पादेषु पादयोर्वापि यो भवेत् ।
धौतपादस्स विज्ञेयः प्रशस्तो [1] मुखचन्द्रक: ॥ ८६ ॥
विशालैः पट्टकैश्श्वेतैस्स्थाने स्थाने विराजितः ।
येन केनापि वर्णेन हलाभ इति कथ्यते ॥ ८७ ॥
विचित्रः पार्श्वदेशेषु श्वेतविन्दुकदम्बकैः ।
यो वा कोवा भवेद्वर्णः करञ्ज: कथ्यते हय: ॥ ८८ ॥
सितस्य बिन्दवः कृष्णास्स्थूलास्सूक्ष्मास्समन्ततः ।
दृश्यन्ते वाजिनो यस्य बिम्बकस्स निगद्यते ॥ ८९ ॥
वर्णेनैकेन वर्णैर्वा स्निग्धवर्णो भवेद्यदि ।
स हन्याद्वर्णजान् दोषान् स्निग्धस्सर्वत्र शस्यते ॥ ९० ॥
चत्वारोऽप्यसिताः पादास्सर्वश्वेतस्य वाजिनः ।
भवन्ति यस्य स त्याज्यो यमदूतस्स रूपत: ॥ ९१ ॥
पुच्छेन शिरसा वापि हीनवर्णस्स निन्दितः ।
अन्यवर्णं शिरो यस्य पुच्छं वा यस्य वाजिन: ॥ ९२ ॥
हीनदन्तोऽधिकश्चैव करालः कृष्णतालुकः ।
उद्दालो मुसली शृङ्गी सप्तैते स्वामिघातुका: ॥ ९३ ॥

व्याघ्राभस्सस्तनश्चैव द्विखुरः ककुदी तथा ।
एकाण्डश्चैव जाताण्डो दाहः पापः प्रकीर्त्तित: ॥ ९४ ॥
पञ्चभिस्सप्तभिर्दन्तैर्वाहो हीनाधिकौ मतौ ।
कराली चाधरैर्दन्तैः खाद्यन्ते यस्य चोत्तराः ॥ ९५ ॥
कृष्णं तालु भवेद्यस्य स भवेत्कृष्णतालुक: ।
उद्दालश्चोत्तरैर्दन्तैश्छाद्यन्ते यस्य चाधरा: ॥ ९६ ॥
सितैकचरणः पुष्पी हीनस्तु मुसली मत: ।
कीले चावर्तकः कर्णदेशे यस्य स शृङ्गिक: ॥ ९७ ॥
व्याघ्राभो व्याघ्रवर्णः स्यात् स्तनयुक्तस्तनी मत: ।
द्विखुरं गोखुराकारैः खुरैर्विद्याद्विचक्षण: ॥ ९८ ॥
आवर्तः ककुदो यस्य ककुदी स उदाहृत: ।
मुष्केणैकेन लम्बेन हयस्त्वेकाण्डसंज्ञक: ॥ ९९ ॥
अण्डाभ्यां रोमशाभ्यां तु जाताण्डो न हितस्स्मृत: ।
भस्माभ वक्रपुच्छं वा कृष्णनीलं परित्यजेत् ॥ १०० ॥
निन्द्यः केवलकृष्णस्तु सर्वश्वेतश्च पूजित: ।
नानावर्णमनोरमाः स्थिरतराः स्निग्धाश्च ये पार्थिव-
च्छायानूनघनाम्बुजातसलिलप्रख्याश्च ते वारुणाः ।
आग्नेयी कनकप्रवालरुचिरा च्छाया शुभा वायवी
निर्भिन्ना परुषा च लोचनशुभा व्योमप्रभा नाभसी ॥ १०१ ॥
सिंहव्याघ्रेभहंसैश्शिखिशरभवृषैर्वभ्रुशाखामृगोष्ट्रैः
ये गत्यास्युस्समाना विदधति हयस्स्वामिनो भूरिवृद्धिम् ।
वक्रा वैषम्ययुक्ता स्खलितपरिगता सौष्ठवश्रीविहीना
सङ्कीर्णा नात्र शस्ता गतिरिह विकटा वाजिनां पूजितानाम् ॥ १०२ ॥
अथाक्षकर्णाननानासिकासु स्वेदे तथा मूलपुरीषयोश्च ।
सुगन्धयोगे प्रवरा मतास्ते दुर्गन्धिनश्चेन्न वरास्तुरङ्गाः ॥ १०३ ॥
अर्जुनेन कदम्बेन कुटजेन घृतेन च ।
बिल्वक्षीरैस्समा गन्धैस्स्वेदादिषु शुभावहा: ॥ १०४ ॥
वीणावेणुमृदङ्गदुन्दुभिगजक्रौञ्चाब्दकण्ठीरव-
व्याघ्रारावसमानहेषितजुषो ये सप्तयस्ते शुभाः ।
विच्छिन्नं तनु गद्गदं च परुषं ये दर्दुरं विस्वरं
गृध्रोष्ट्रादिसमं स्वनन्ति न शुभास्ते भर्तृभूतिच्छिदः ॥ १०५ ॥
ब्रह्मेशवासवकुबेरपरेतराज गन्धर्वपाशधरसत्वयुता वरेण्याः ।
ये राक्षसास्सुरपिशाचपितृद्विजिह्व पक्षिस्वभावमलिनास्तु
भवन्ति मध्याः ॥ १०६ ॥

[1] मुखपुण्ड्रक:

वर्णावर्तप्रभङ्गस्वरगतिसहितास्सत्वगन्धैरुपेता-
श्शौचाचाराभिजातिस्मृतगुणविनयैरन्विता देवसत्वाः ।
गन्धर्वैर्यातुधानैर्मुनिवरयतिभिस्तुल्यसत्वाश्च शस्ताः
ये चान्ये हीनसत्वाश्शुचिकलहरता भीरवस्तेत्र वर्ज्याः ॥ १०७ ॥

अथावर्ताः प्रवक्ष्यन्ते ध्रुवाश्चान्याश्शुभाशुभाः ।
संस्थानमानस्थानानि तेषां चापि फलोदयः ॥ १०८ ॥

गर्भस्थस्य शिशोर्वायुरतिवेगेन संचरन् ।
आवर्तयति रोमाणि ते चावर्ता हयोद्भवाः ॥ १०९ ॥

आावर्तश्शतपादी च शुक्तिश्चाप्यवलीढकः ।
पादुका पादुकार्धं च समूहो मुकुलं तथा ॥ ११० ॥

एवमष्टविधं रूपमावर्तानां प्रकीर्त्तितम् ।
यो वाम्बावर्तसदृशस्स स्यादावर्तसंज्ञकः ॥ १११ ॥

शतपादी तदाकारा शुक्तिश्शुक्तिसमा भवेत् ।
वत्सजिह्वावलीढेन सदृशोऽप्यवलीढकः ॥ ११२ ॥

पादुका पादुकाकारा तदर्धं चार्धपादुकम् ।
मुकुलं मुकुलाकारमेकेषां वा द्वयोरपि ॥ ११३ ॥

बहूनां पापसंघातस्समूहः स तु कीर्त्तितः ।
एतेभ्योऽन्ये न दृश्यन्ते यदि रोमविकारजाः ॥ ११४ ॥

तेषां च स्थानसंस्थानैश्शुभाशुभफलं भवेत् ।
आवर्तस्य प्रमाणं तु विभागांगुलमिष्यते ॥ ११५ ॥

अर्धांगुलेन मानेन शतपादी प्रकीर्त्तिता ।
अङ्गुलानां त्रयं सार्धं शुक्तिर्मानमिहोच्यते ॥ ११६ ॥

आवलीढप्रमाणं तु त्र्यंगुलं समुदाहृतम् ।
चतुर्भागांगुलं मानं मुकुलस्य विधीयते ॥ ११७ ॥

षड् यवाः पादुकार्धं तु संघातोऽर्धांगुलं भवेत् ।
एतैस्स्वरूपैस्सुव्यक्तास्स्वे स्वे स्थाने व्यवस्थिताः ॥ ११८ ॥

शुभा देहसमुद्भूताश्शुभदास्स्युः प्रदक्षिणाः ।
स्थानच्युतो विवर्णश्च दुस्स्थितस्तिर्यगायतः ॥ ११९ ॥

विन्यस्तो विनिगूढश्च छिन्नाकारस्ततः परः ।
ओमश्चापि महांश्चैव वामे यो दक्षिणाकृतिः ॥ १२० ॥

दक्षिणे वामसंस्थाने निन्द्या एते प्रकीर्त्तिताः ।
स्थानच्युतश्च्युतो यस्तु स्वस्थानाद्रोमजावृतः ॥ १२१ ॥

अन्यवर्णविवर्णस्स्याद्रोमजस्स तु निन्दितः ।
लक्ष्यालक्ष्यो भवेद्यस्तु रोमजस्स तु दुस्स्थितः ॥ १२२ ॥

तेन दौःस्थित्यमायाति नृपतिर्न च संशयः ।
आवर्तेऽत्यायते तिर्यग् राज्यहानिर्भयं भवेत् ॥ १२३ ॥

विवर्णैर्विषमैस्स्थूलैरल्पवर्णैर्वा सुदक्षिणैः ।
चित्ररोमभिरत्यर्थं पुञ्जीभूत इव स्थितः ॥ १२४ ॥

स विन्यस्तो भवेद्राज्ञामायुर्धनविनाशनः ।
न लक्ष्यते गतिर्यस्य रोम्णां स स्याद्विमूढकः ॥ १२५ ॥

येन मूढो भवेद् भूपो द्विधा भिन्नस्तु रोमभिः ।
शिरश्छेदं विधत्ते वा स्वामिनश्शीघ्रमेव हि ॥ १२६ ॥

हीनमानो भवेद्रोमस्स्तु सत्वविनाशनः ।
महान् मानातिरिक्तस्तु रोमजो व्यसनप्रदः ॥ १२७ ॥

वामे दक्षिणसंस्थानो दक्षिणे दक्षिणेतरः ।
कुरुतश्च्यवनं राज्ञस्स्वस्थानाच्छत्रुवर्धनः ॥ १२८ ॥

निन्द्यस्थानेषु निन्द्या ये ते ते कष्टफलप्रदाः ।
प्रशस्तेषु प्रशस्ताश्च सम्पूर्णफलदा मताः ॥ १२९ ॥

प्रशस्तदेशे निन्द्याः स्युर्निन्द्ये शस्तो भवेद्यदि ।
शस्ताशस्तफलं तत्र तुच्छमिच्छन्ति पण्डिताः ॥ १३० ॥

शुभाशुभानां संयोगे बाहुल्यात् फलमादिशेत् ।
दश ध्रुवाः प्रवक्ष्यन्ते स्वस्थानाच्च च्युता अपि ॥ १३१ ॥

एवं चापानजं विद्यात्तथा चैकं ललाटजम् ।
द्वौ मस्तक्यौ तथोरस्यौ द्वौ द्वौ रंध्रोपरंध्रजौ ॥ १३२ ॥

प्रपाने दक्षिणं भागं मध्यमं भागमेव वा ।
आश्रितौ दक्षिणावर्तौ वित्तसौभाग्यदौ ध्रुवम् ॥ १३३ ॥

वामभागाश्रितोऽपाने रोमजो वित्तनाशकः ।
भ्रुवोर्मध्ये दक्षिणतो मध्यतो वा तथोपरि ॥ १३४ ॥

ललाटे दक्षिणावर्तो ध्रुवो यस्य प्रदृश्यते ।
स दीर्घायुर्भवेदश्वस्सुखसौभाग्यवर्धनः ॥ १३५ ॥

ललाटे मध्यभागस्थो रोमजो यस्य वाजिनः ।
स मध्यमायुर्विज्ञेयो वाजी लक्षणकोविदैः ॥ १३६ ॥

भ्रुवोर्मध्ये ललाटे वा वामभागसमाश्रितः ।
ध्रुवो यस्य प्रदृश्येत सोऽश्वोऽल्पायुरनर्थकः ॥ १३७ ॥

मस्तकस्थौ च मस्तक्यौ यस्यावर्तौ समौ ध्रुवौ ।
स जीवत्यष्टवर्षाणि वाहो वित्तप्रणाशनः ॥ १३८ ॥

कर्णान्तरस्थौ मस्तक्यौ विन्यस्ताकारसंयुतौ ।
यस्य सोऽल्पायुरित्युक्तस्सुखवित्तापहो हयः ॥ १३९ ॥

मस्तक्यौ शुक्तिसंस्थानौ यस्य केशान्तमाश्रितौ ।
स्थानच्युतौ स चाल्पायुर्निन्दनीयस्सुखार्थिभिः ॥ १४० ॥

मस्तकस्थौ विदेशस्थौ यस्य स्यातां प्रदक्षिणौ ।
वर्णस्तुरगो नित्यं धनगोत्रविवर्धनः ॥ १४१ ॥
आवर्तो वाथ शुक्तिर्वा यस्योरसि च दक्षिणे ।
भवेतां यस्य सोऽप्यश्वो धनधान्यशुभावहः ॥ १४२ ॥
रन्ध्रोपरन्ध्रजौ शस्तौ द्वौ द्वौ स्वस्थानमाश्रितौ ।
अन्योन्यसंश्रितौ यस्य नाभिदंशसमीपगौ ॥ १४३ ॥
उपरन्ध्रौ स चाल्पायुर्निन्दनीयश्शुभार्थिभिः ।
विरोमको ध्रुवो यस्य सोऽल्पायुरशुभप्रदः ॥ १४४ ॥
एते दश ध्रुवाः प्रोक्तास्स्वस्थानाच्च च्युता अपि ।
प्रपानाद्येषु हीनेषु यत्फलं तत्प्रवक्ष्यते ॥ १४५ ॥
प्रपानजविहीनोऽश्वः स्वामिघ्नः कुलनाशनः ।
अललाटो हयो भर्तुर्विधत्ते मोहमक्षयम् ॥ १४६ ॥
अमस्तकदिशरदशूलं भर्तुः कुर्यादमङ्गलम् ।
स मुण्डकी भवेन्नाम्ना वर्जनीयो विशेषतः ॥ १४७ ॥
ककुदावर्त्तिनि प्रोक्ता दोषाः शृङ्गिणि भाषिताः ।
काकसावर्तनिष्ठा ये चासनावर्तिनीरिताः ॥ १४८ ॥
हृदयावर्तिनी प्रोक्ता अमस्तक्ये भवन्त्यमी ।
उरोजातविहीनोऽश्वो भर्तुः पुत्रघ्नईरितः ॥ १४९ ॥
रन्ध्रजाभ्यां विहीनाभ्यां जठरान्तं सकृद्द्वयः ।
शून्योपरन्ध्रजो वाहो भर्तुर्वेधकरस्स्मृतः ॥ १५० ॥
इति शून्यध्रुवाणां तु फलमुक्तं पृथक् पृथक् ।
अशुभाश्च प्रवक्ष्यन्ते फलं वैशेषिकं तथा ॥ १५१ ॥
उत्तरोष्ठोद्भवो भर्तुरावर्तो मातृघातुकः ।
प्रपानस्योपरिष्ठात्तु पितृघ्नो दक्षिणस्थितः ॥ १५२ ॥
अधरोष्ठस्थितश्चैव चुबुकप्रोथसंभवः ।
घोणागण्डस्थितो येषां तेऽश्वा भर्तृविनाशकाः ॥ १५३ ॥
वृत्तिघ्नौ कामजौ स्यातां नासापुटसमुद्भवौ ।
दुःखाश्रुपातिनौ भर्तुरश्रुपातस्थितौ मतौ ॥ १५४ ॥
वर्त्मजौ नेत्ररोगाय भ्रूमध्यौ द्वेषिवर्धनौ ।
द्वौ शंखकटिजौ घोटशिरस्स्थौ भर्तृरोगदौ ॥ १५५ ॥
कूर्पकक्षकलामन्युहनुस्कन्धभवौ तथा ।
कर्णाग्रजौ तथैवार्थं हरेतां विधुमर्मजौ ॥ १५६ ॥
ग्रीवास्थौ यदि भर्तृघ्नौ गलस्थोऽशनिभीतिकृत् ।
जत्रुस्थौ दिशतोऽल्पायुर्वाहस्थौ स्वामिघातकौ ॥ १५७ ॥
ककुदस्थो हरेत् सर्वं त्यक्त्वा तं शान्तिमाचरेत् ।
काकसावर्तिना भर्ता काकैर्भक्ष्येत संयुगे ॥ १५८ ॥
शूलेन स्वामिनं हन्यादासनावर्तसंयुतः ।
ओमक्रोडस्थितावर्तौ हन्यातां समरे पतिम् ॥ १५९ ॥
अंसस्थे शत्रुसंक्षोभो जाङ्गलस्थे पराजयः ।
मन्दुरस्थावर्धहरौ जानुस्थौ भर्तृनाशनौ ॥ १६० ॥
जङ्घास्थौ रोमजौ भर्तुर्निगलैर्बन्धनप्रदौ ।
ईषिकास्थौ जूषिकास्थौ स्वामिघ्नौ परिकीर्तितौ ॥ १६१ ॥
मूत्रजौ कुक्षिकस्थौ च रणे भर्तृवधप्रदौ ।
रोमान्तजौ तु स्वामिघ्नौ क्लेशदौ पार्श्वशीर्षजौ ॥ १६२ ॥
हृदयावर्तिना भर्ता हृच्छोकैर्मृतिमृच्छति ।
पतिघ्नावक्षजौ शंखपार्श्वयोर्भर्तृनाशनौ ॥ १६३ ॥
ककुन्दरस्थौ वंशस्थौ स्वामिवंशविनाशकौ ।
रोगदावोष्ठनाभिस्थौ मूत्रकोशत्रिके तथा ॥ १६४ ॥
पत्युरल्पायुषं पुत्रं दद्यातां मुष्कसंभवौ ।
रोहिणीभासलोद्भूतौ चरकस्थौ पतिद्रुहौ ॥ १६५ ॥
पुच्छमूलस्थितौ भर्तुर्भवेतां मूलघातिनौ ।
रोमजातौ शिरोजातौ स्थानभ्रंशकरौ मतौ ॥ १६६ ॥
पुच्छस्थितस्तथा कुर्याद्भर्तुश्शत्रोः पराजयम् ।
कुक्षिरोगप्रदा एते सेवनीपायुकुक्षिजाः ॥ १६७ ॥
स्फिक्पिण्डाण्डोद्भवौ सक्थिवंक्षणस्थौ पतिद्रुहौ ।
रोमजौ शंखजौ चैव स्फुरजौ क्लेशदायिनौ ॥ १६८ ॥
इति निन्द्यास्समाख्याता वक्ष्यन्ते रोमजाश्शुभाः ।
आवर्तौ नैव संजातौ शुक्तौ वा जयवर्धनौ ॥ १६९ ॥
यमौ ललाटजावर्तौ शुभौ स्यातां प्रदक्षिणौ ।
त्रयो ललाटजा यस्य रोमजास्स्युः प्रदक्षिणाः ॥ १७० ॥
त्रेताग्निस्स भवेत्तेन [1] भवेच्छत्रुञ्जयो नृपः ।
यस्य प्रदक्षिणावर्तो ललाटस्थश्चतुर्दिशम् ॥ १७१ ॥
चतुरन्तस्स विज्ञेयस्तेन जित्वा विवर्धते ।
जयदौ मुकुलाकारावपाङ्गस्थानभागजौ ॥ १७२ ॥
प्रदक्षिणस्सुप्रमाणो रोमजस्तुवसंस्थितः ।
वृषभावित्ति विज्ञेयौ रोमजौ कर्णमूलजौ ॥ १७३ ॥
भर्तृजयप्रदौ स्यातामार्थदौ भूषदायिनौ ।
यो रोमजो निगालस्थस्स हि देवमणिश्शुभः ॥ १७४ ॥

1) शत्रुं जित्वाहवे नृपः

अशुभान् पूर्वकायस्थान् हन्याद् भर्तुर्जयप्रदः ।
कण्ठनाभ्यांघ्रिगौ यस्य रोमजौ चक्रवत् स्थितौ ॥ १७५ ॥
सुचक्री नाम हयो रिपुक्षयकरस्स्मृतः ।
रोचमानस्तु कण्ठस्थो जयमित्रधनावहः ॥ १७६ ॥
यस्य केशान्तजे शुक्ती द्वे तु मीत्रासमायते ।
अचिरात्तस्य भर्ता तु शत्रून् जित्वा नृपो भवेत् ॥ १७७ ॥
शुभारोग्यप्रदा वामे स्यादेका शुक्तिरायता ।
उरोजा यस्य चत्वारो रोमजास्स्युश्चतुर्दिशम् ॥ १७८ ॥
स शत्रुघ्नो रणे भर्तुर्वाजी सम्पत्प्रदो मतः ।
यस्य प्रदक्षिणावर्ताश्चत्वारो वहसि स्थिताः ॥ १७९ ॥
कण्ठस्थो रोचमानस्स्याच्छ्रीवृक्ष इति कीर्त्तितः ।
हयश्श्रीवृक्षको नाम्ना भर्तुरिष्टार्थसाधकः ॥ १८० ॥
तिस्रो वक्षसि दृश्यन्ते शुक्तयश्चोर्ध्वरोमजाः ।
तेन मथ्नाति शत्रूणां संघान् सांख्ये महीपतिः ॥ १८१ ॥
आवर्तौ बाहुजौ यस्य स मतो भूषणप्रदः ।
यस्योपरन्ध्रयोरस्यातामुपरिष्टात्तु रोमजौ ॥ १८२ ॥
स मेखली भवेन्नाम्ना धनधान्यविवर्धनः ।
श्रीवृक्षस्वस्तिकाब्जध्वजकलशगदाशंखचक्रासिचापाः
नन्द्यावर्तार्धचन्द्रास्सकलशशिकलावर्धमानौ पताकः ।
वज्रो मत्स्योऽङ्कुशो वा व्यजनकवचमृङ्गारकाया हयानां
वक्षस्येतादृशा ये शुभतरफलजा रोमजास्युर्ललाटे ॥ १८३ ॥
दन्तोद्भेदं प्रवक्ष्यामि वाजिनां मुखलक्षणम् ।
येन विज्ञातमात्रेण वयोज्ञानं प्रजायते ॥ १८४ ॥
षड्भिर्दन्तैस्सितामैर्भवति हयशिशुस्तैः कषायैर्द्विरब्द-
स्संदंशैर्मध्यमान्त्यैः पतितसमुदितैस्त्रिश्चतुःपञ्चवर्षः ।
संदंशानुक्रमेण त्रिकसमगुणितैः कालिकापीतशुक्लैः
काचामाक्षीकशंखावटचलनमतश्चावपातं च विद्धि ॥ १८५ ॥
कालिका हरिणी शुक्ला काचा चापि समाक्षिका ।
शङ्खश्चोलूखलं कर्षः पतनं व्यजनं क्रमात् ॥ १८६ ॥
ऊर्ध्वं च पञ्चवर्षेभ्यो यावद् द्वात्रिंशदब्दकम् ।
त्रयं त्रयं च वर्षाणामेकैकं व्यजनं भवेत् ॥ १८७ ॥
कर्णाग्रे पीडिते येषां सिन्दूराभस्य दर्शनम् ।
शोणितस्य भवेत् क्षिप्रं ते वाहाश्चिरजीविनः ॥ १८८ ॥
नृणां करतले यद्वद्रेखास्समभिलक्षयेत् ।
आयुस्तद्वत्तुरङ्गाणां प्रोथजाभिर्व्यवस्थितम् ॥ १८९ ॥

रेखोर्ध्वगामिनी यस्य प्रोथमध्यसमुद्भवा ।
अर्धैकाब्दान्मृतिं याति मुखरोगेण शैशवे ॥ १९० ॥
दृश्येते तादृशे माने द्व्यंगुले प्रोथमध्यगे ।
रेखे यस्य स नश्येत्तु जिह्वास्तम्भाद् द्विहायने ॥ १९१ ॥
यस्य तादृग्विधे रेखे द्वे स्यातां तिर्यगायते ।
स च त्रिहायने नश्येद्धनुर्ग्रहणपीडितः ॥ १९२ ॥
रेखे नते भवेतां द्वे सुव्यक्तं यस्य तं हयम् ।
हन्याद् गलग्रहव्याधिश्चतुर्थेऽब्दे सुदारुणः ॥ १९३ ॥
रेखोर्ध्वगा नताग्रा या वामतः प्रोथजा भवेत् ।
यस्य तं मृगजृम्भेण हन्यादब्देतु पञ्चमे ॥ १९४ ॥
अङ्गुलद्वयमानोर्ध्वा प्रोथे यस्य स्थिता भवेत् ।
हन्यात् षष्ठाब्दिके प्राणाननतातङ्कं निपीडितम् ॥ १९५ ॥
अर्धांगुलायता रेखा यस्य मध्योन्नता भवेत् ।
तं सप्तहायने हन्याद् ध्वनिरुग्रस्तुरङ्गमम् ॥ १९६ ॥
या रेखा त्र्यंगुलमिता यस्य स्यात् प्रोथसंभवा ।
स वध्येताष्टमेऽब्दे तु तुरङ्गो ज्वरपीडितः ।
मध्ये स्थूला रुजा रेखा यस्य चैवापि तादृशे ॥ १९७ ॥
नवमे दशमे चाब्दे क्रमान्मृत्युं प्रपद्यते ।
अङ्गुलद्वितयायामा प्रोथमध्योर्ध्वगायता ॥ १९८ ॥
यस्य स द्वादशे वर्षे रूक्षावर्त्तेन नश्यति ।
यस्य प्रोथोपरि स्थूला दीर्घा स्यात्स तुरङ्गमः ॥ १९९ ॥
वर्षे त्रयोदशे मृत्युं प्राप्नुयाच्छ्वासपीडितः ।
यस्य रेखे भवेतां तु तिर्यगूर्ध्वव्यवस्थिते ॥ २०० ॥
काकांघ्रिवत् स रोगेण नाशं याति चतुर्दशे ।
रेखे यस्य भवेतां द्वे स पञ्चदशहायने ॥ २०१ ॥
पथि गच्छन् भयार्तस्तु पञ्चत्वमुपगच्छति ।
एका चैवंविधा रेखा यस्य गौरस्य दृश्यते ॥ २०२ ॥
स हयष्षोडशे वर्षे मृतस्स्याद् वातपीडनात् ।
कृष्णस्य तद्विधा रेखा प्रोथादीषत्परा भवेत् ॥ २०३ ॥
सच सप्तदशे वर्षे मृत्युं याति न संशयः ।
यूपश्चैत्याकृतिर्वापि प्रोथे यस्योपलक्ष्यते ॥ २०४ ॥
जले निमग्नो म्रियते सोऽष्टादशकवत्सरे ।
यस्य श्यावनिभा रेखा लक्ष्यते प्रोथमध्यगा ॥ २०५ ॥
एकोनविंशकेऽब्दे तु परासुर्विषदूषितः ।
अतः परं तु पूर्णायुस्तुरङ्गाणां विभावयेत् ॥ २०६ ॥

सस्वस्तिको वर्धमानो नन्द्यावर्तोऽथवा भवेत् ।
श्रीवृक्षो यस्य वा प्रोथे दृश्यते स शुभप्रदः ॥ २०७ ॥
त्रिंशद्वर्षे मृतिं याति कृमिगोष्ठे हयोत्तमः ।
यस्य प्रोथे प्रदृश्येत चक्रं वा वज्रमेव वा ॥ २०८ ॥
स तुरङ्गो दिवं गच्छेदेकत्रिंशे तु वत्सरे ।
अर्धेन्दुसन्निभा रेखा भास्करप्रतिमापि वा ॥ २०९ ॥
प्रोथे यस्य भवेत् सोऽश्वो द्वात्रिंशेऽब्देऽन्त्यजीवनः ।
गैर्बुधाः कथयन्त्याशु शुभं वा यदिवाशुभम् ॥ २१० ॥
स्वामिनो वाजिनां चेष्टास्ता विज्ञेया विचक्षणैः ।
यः प्रबुद्धो हयो रावमूर्ध्ववक्त्रः करोति वा ॥ २११ ॥
खुराग्रेण लिखन् भूमिं स शंसति जयं रणे ।
यः करोति शकृन्मूत्रं पुरीषं वाश्रुमोचनम् ॥ २१२ ॥
स शंसति पराभूतिमत्यन्तं भयमेव च ।
निष्कारणं निशान्ते यो हेषारावं करोत्यपि ॥ २१३ ॥
परचक्रागमाशंसी स विज्ञेयो विचक्षणैः ।
पुलकाङ्कितपुच्छो यो जायते यस्य घोटकः ॥ २१४ ॥
स शंसति स्थिरस्यापि स्वामिनस्तु विनिर्गमम् ।
स्फुलिङ्गा इव दृश्यन्ते पुच्छान्ते यस्य वाजिनः ॥ २१५ ॥
निर्गच्छतः प्रभोर्नाशं सूचयन्ति निशागमे ।
खनन् क्ष्मां वामपादेन हेषते दीनमानसः ॥ २१६ ॥
यो वाजी नृपतेस्स स्यात्पराजयनिवेदकः ।
पीनाभिन्नशकृन्मूत्रा हेषन्ते साधुलोचनाः ॥ २१७ ॥
ये तु वाहा वदन्त्याशु राज्ञामपजयं भृशम् ।
श्रूयते हेषितं येषां रुदितोन्मुखिनामिव ॥ २१८ ॥
आयतं दीनतायुक्तं तं विद्यादशुभप्रदम् ।
ज्ञानप्रतिहतानां च पांसून् वक्त्रेषु गृह्णताम् ॥ २१९ ॥
शुष्कं तृणं वा काष्ठं वा हेषितं भयसूचकम् ।
वसुधां वामपादेन विलिखन् यश्च वै हयः ॥ २२० ॥
पृष्ठवालान्विकिरते सहि प्रवसनं वदेत् ।
भूमिं दक्षिणपादेन हत्वा वालान् किरन् हयः ॥
स्वामिनो विजयं कुर्याद्यात्रायां न च संशयः ॥ २२१ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारण चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद श्रीमत्केलदीवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातत्त्वसारभूते श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले अश्वशास्त्रे अश्वोत्पत्त्यादिचेष्टानिरूपणं नाम द्वादशस्तरङ्गः

अथ त्रयोदशस्तरंगः

अथ देशविभागेन व्यञ्जनानि प्रचक्ष्महे ।
हयाः काम्बोजबाह्लीकवनायुजकुलोद्भवाः ॥ १ ॥
आरट्टजाश्च गान्धाराश्चाम्पेयास्सैन्धवास्स्मृताः ।
तैतिलाः पाटलीपुत्रा मेचकाश्चोपमेचकाः ॥ २ ॥
कुलजाश्चोपकुलजास्त्रैगर्ताश्चार्जुनेयकाः ।
सावित्रेयाश्च यौधेया आवन्त्या यावनास्तथा ॥ ३ ॥
हूस्वाश्च यावनास्तद्वत्सुकाराः कान्देरयकाः ।
पार्षतेयास्तथावन्त्या रसकाश्मीरसंभवाः ॥ ४ ॥
साकानकाः पार्वतेया माद्रेया दक्षिणोत्तराः ।
माद्रेया द्वीप्यकैकेय्या अपरान्ता वसन्तकाः ॥ ५ ॥
काम्पिल्ला दारदाश्चैव सैन्धिकाः क्षुद्रकास्तथा ।
आवर्तकाश्च कालिङ्गा मौकुलैरावता अपि ॥ ६ ॥
वानवास्याश्चित्रिलिङ्गाश्च क्रथकाश्च सुराष्ट्रजाः ।
उपावृत्ताश्च साल्वेयाः कुरुक्षेत्रोद्भवास्तथा ॥ ७ ॥
पाञ्चाला वात्सलाश्चैव तथैवाभीरसंभवाः ।
इत्थं कुलानि चाश्वानां चतुःपञ्चाशदूचिरे ॥ ८ ॥
अतः परं व्यञ्जनेश्च प्रत्येकं तु प्रचक्ष्महे ।
तथोद्देशं कुलगुणान् शृणु तांश्च पृथक् पृथक् ॥ ९ ॥
काम्भोजास्सुमहाल्ललाटजघनस्कन्धा महावक्षसो
दीर्घग्रीवमुखा महाबलजवा ह्रस्वाण्डमेढ्राननाः ।

श्रीमन्तश्च समन्विताश्च चरणैर्दीर्घैस्सुजातैर्भुजै-
स्सर्वव्यञ्जनपूजिता दृढशफा वैडूर्यनेत्राश्च ते ॥ १० ॥

श्वेताश्च शोणाश्च भवन्त्यदीना न कृष्णवर्णा न विकर्णकाश्च ।
ह्रस्वैश्च कूर्चैर्मृदुरोमकेशा ह्रस्वेन पृष्ठेन च वर्ष्मवन्तः ॥ ११ ॥

सुसंहताङ्गाः प्रियदर्शनास्ते नित्यं च भर्तुर्वशगा मनोज्ञाः ।
तेजस्विनस्सत्वयुतास्सुशीलाश्श्रेष्ठाश्च रूपेण कुलेन दक्षाः ॥ १२ ॥

समवृत्तजानुजंघा वृत्तोरुह्रस्वकुक्षिखुराः ।
पीनास्तनुलांगूलास्सुस्निग्धाश्शंकुकर्णाश्च ॥ १३ ॥

सुमहास्फिक्प्रोथा महोदरास्ते महोत्साहाः ।
प्रत्यश्वं वडवामपि दृष्ट्वा ते नैव हेषन्ते ॥ १४ ॥

स्पष्टमुखास्स्थिरनादास्त्वत्राभिहितास्ते सुपार्श्वयश्शूराः ।
सुखसञ्चारा वाहाः काम्भोजास्ते समाख्याताः ॥ १५ ॥

बाह्लीकाः काम्बोजैस्समास्सुसंस्थानवर्णरूपास्स्युः ।
तेषामयं विशेषो दीर्घाङ्गा दीर्घतरपृष्ठाश्च ॥ १६ ॥

परिणाहायामाभ्यां किञ्चिद्ध्रस्वा महेक्षणाश्शूराः ।
वृत्ताविधूतपृथुला दीर्घग्रीवाश्च दीर्घमुखाः ॥ १७ ॥

मधुपिङ्गला नदीनाः क्रुद्धास्ते दन्तखादिनः कथिताः ।
नैव त्यजन्ति पतितं सङ्कटेष्वपि सादिनम् ।
एतावतेव विज्ञानं वाह्लीकानां प्रकीर्त्तितम् ॥ १८ ॥

वनायुजाश्वा लघवः प्रचण्डा मध्यप्रमाणाश्चपला न दीनाः ।
वृत्तायताः कायसमास्सुनेत्रा ह्रस्वाण्डमेढ्रास्त्वथ शंकुकर्णाः ॥ १९ ॥

पूर्वार्धकायेषु समुच्छ्रितास्ते ह्रस्वत्रिकाद्याश्च महासुसत्वाः ।
स्थूलैश्च पादैर्दृढयष्टिकाश्च कालानुवर्णा बहुशो भवन्ति ॥ २० ॥

उपाण्डदेशे विकटास्सुदीर्घा मेघभनादाश्च न शङ्किनस्ते ॥ २१ ॥

सत्वतेजोबलोपेता हया वानायुजाः स्मृताः ।
तेषामुपकुले जातान् गान्धारांश्च शृणुष्व मे ॥ २२ ॥

कृष्णकुक्कुटका धूम्राः कृष्णसारा विवर्णिनः ।
श्यामास्सुबहुवर्णाश्च समकायास्सुसंहताः ॥ २३ ॥

दृढपश्चिमकायाश्च दक्षोदग्रास्तथा पुरः ।
पश्चार्धविषमाश्चण्डा वलितस्थूलकेसराः ॥ २४ ॥

तन्वायतमुखाश्चैव गान्धारकुलजा हयाः ।
आरट्टजानां विज्ञानं वक्ष्यमाणं शृणुष्व मे ॥ २५ ॥

ह्रस्वपृष्ठाश्च सुमुखास्तनुकालाश्शुभेक्षणाः ।
उदग्रायतपूर्वार्धा मदश्लक्ष्णतनूरुहाः ॥ २६ ॥

तनुत्वग्ध्रस्वकर्णाश्च मृदुग्रीवास्सुसंस्थिताः ।
सुसंहताश्शंकुकर्णा द्रुतपादास्सुकुष्ठिकाः ॥ २७ ॥

शोणभूयिष्ठवर्णाश्च हरिवर्णानुवर्णकाः ।
महाजवास्सुविक्रान्ता न च विक्षिप्तकारिणः ॥ २८ ॥

आरट्टलकुजा एवं विज्ञेया बलिनो हयाः ।
तेषामुपकुले जाताश्चाम्पेयास्तान् शृणुष्व मे ॥ २९ ॥

परिमण्डलांसपृष्ठास्सुगन्धास्सुप्रतिष्ठिताः ।
एणजंघास्तनूपादा गात्रदन्तास्सुविक्रमाः ॥ ३० ॥

बलवन्तस्सुरोमाणस्तेजस्सारजवान्विताः ।
स्थूलाक्षकूटघाटास्ते स्थिरपादास्सुकुष्ठिकाः ॥ ३१ ॥

समसम्पूर्णकायाश्च चाम्पेयास्तुरगास्स्मृताः ।
सैन्धवाः स्थिरपादाश्च विस्तीर्णजघनाः स्थिराः ॥ ३२ ॥

दीर्घग्रीवमुखाढ्यास्ते स्थूलाक्षास्तनुकेसराः ।
शङ्कुकर्णा महाकाया महोच्छ्वासास्तनुत्वचः ॥ ३३ ॥

तनुस्रक्का महाप्रौढा हयास्ते वडवोद्भवाः ।
लम्बमेहनमुष्काश्च सैन्धवास्समुदाहृताः ॥ ३४ ॥

तेषामुपकुले जातास्तैत्तिला मन्दमेधसः ।
स्थूलग्रीवास्यहनवस्स्थूलवालधिकेसराः ॥ ३५ ॥

स्थूलमेढ्रफलाक्षाश्च बलवन्तो रयान्विताः ।
सारवन्तस्सुगात्राश्च समुच्छ्रितशिरोधराः ॥ ३६ ॥

संस्थानवन्तो लघवो दृढपादास्सुकुष्ठिकाः ।
पृथुकक्षललाटास्ते विशालजघनेक्षणाः ॥ ३७ ॥

भाराध्वनोः क्लेशसहाः क्षुत्पिपासासहाश्च ते ।
सत्ववन्तश्च तुरगास्तैत्तिलास्संप्रकीर्त्तिताः ॥ ३८ ॥

सुसंस्थानाश्च दुर्वृत्ता मेचकाः स्थूलवक्षसः ।
शङ्कुकर्णाः स्पष्टमुखा विस्तीर्णजघनास्तथा ॥ ३९ ॥

दीर्घायतविधुग्रीवा गूढजत्रुमहांसकाः ।
महासनाः पृथुग्रीवास्तनुवृत्तोरुजंघकाः ॥ ४० ॥

ह्रस्वकुष्ठिककूर्चास्ते तनुमध्या मितोदराः ।
रोमशाः पूर्णसर्वाङ्गास्समलीला न कर्कशाः ॥ ४१ ॥

बहुवर्णयुताश्चित्रा हयाः पाटलिपुत्रकाः ।
मृदुमध्या न चपला मध्यसारबलास्तथा ॥ ४२ ॥

सत्वतेजोबलैर्मध्या मेचकास्तुरगाः स्मृताः ।
अथोपमेचका ह्रस्वास्स्थूलवालधिकेसराः ॥ ४३ ॥

मृद्वङ्गा दुर्बलशफास्तनुगात्रास्सुकुक्षिकाः ।
उच्चैर्बद्धशिरोग्रीवा ह्रस्वोरस्काश्च दुर्मुखाः ॥ ४४ ॥

विरूपाक्षास्समाख्याता हयास्स्युरुपमेचकाः ।
कुलजा दीर्घपृष्ठांसा ह्रस्वमेढ्रफलालसाः ॥ ४५ ॥

वृत्तग्रीवायतमुखास्तनुमध्यास्सुकुक्षिकाः ।
दीर्घवालास्यकेशाश्च सूक्ष्मत्वग्रोमकेसराः ॥ ४६ ॥

तनूरस्काश्च तुरगाः कुलजास्समुदाहृताः ।
अथोपकुलजा ह्रस्वास्तनुग्रीवास्तु कुक्षिकाः ॥ ४७ ॥

दीर्घवालधिकेशाश्च दीर्घस्कन्धा महोरसः ।
कुलजैस्समलिङ्गास्ते किञ्चिदायतदेहिनः ॥ ४८ ॥

मन्दप्राणाल्पतेजस्काः कर्कशा ह्रस्वविक्रमाः ।
अल्पसत्वाल्पमध्याश्च तथोपकुलजा हयाः ॥ ४९ ॥

अतः परं तु त्रैगर्ता वलवन्तो न कर्कशाः ।
ह्रस्वग्रीवा महोरस्का रुक्षवालधिकेसराः ॥ ५० ॥

प्रायशश्शशनेत्रास्ते दृढसान्द्रशफास्तथा ।
शशक्रोडाश्शशमुखाश्शशवालधिकेसराः ॥ ५१ ॥

क्रोधना नातिशूराश्च त्रैगर्ता दुःखवाहिनः ।
आर्जुनेया महोरस्काः स्थूलाक्षाः स्थूलकेसराः ॥ ५२ ॥

सुकुक्षिकाश्च सुमुखा लम्बमेढ्रफलास्तथा ।
ऊरुस्कन्धविधुग्रीवाः कृष्णवर्णास्सुवर्णिनः ॥ ५३ ॥

विज्ञेया जविनः क्रूरा आर्जुनेयास्तुरङ्गमाः ।
सावित्रेया ह्रस्वपृष्ठा विस्तीर्णजघना दृढाः ॥ ५४ ॥

दुष्टवक्रानना दीर्घस्थूलवालधिकेसराः ।
दीर्घपृष्ठा रुशफास्स्थिरमांसास्सुगन्धिनः ॥ ५५ ॥

मृद्वङ्गाश्च सुनेत्राश्च पृथुपादा महौजसः ।
दीर्घसकृथ्य्यंसपृष्ठास्ते स्थिरमांसा महोरसः ॥ ५६ ॥

सत्ववन्तश्च शूराश्च सावित्रेयास्तुरङ्गमाः ।
यौधेया ह्रस्वकर्णोष्ठास्सारतेजोवलान्विताः ॥ ५७ ॥

वृत्तायतोन्नतग्रीवा वृत्तमध्योरुकुक्षिकाः ।
दीर्घवालधिकेशाश्च खुरनासास्सुपिङ्गलाः ॥ ५८ ॥

श्रेष्ठा वृत्तमुखाश्चण्डास्सुविभक्तास्सुवक्षसः ।
तनुत्वक्सूक्ष्मरोमाणो विभक्ता मग्नसन्धयः ॥ ५९ ॥

यौधेयाश्च तथावन्त्या भारेऽध्वनि च शीघ्रगाः ।
विज्ञानं यवनाश्वानां श्रृणु वक्ष्याम्यतः परम् ॥ ६० ॥

सुललाटास्सुनेत्राङ्गास्तनुपृष्ठायताननाः ।
तनुत्वक्सूक्ष्मरोमाणश्शंकुकर्णा लघुक्रमाः ॥ ६१ ॥

सुपृष्ठजघनोरस्का वर्ष्मवन्तस्सुमेधसः ।
वहुवर्णास्सुवर्णाश्च मनोज्ञाः प्रियदर्शनाः ॥ ६२ ॥

सारवन्तस्सुगम्भीरास्सत्वतेजोवलान्विताः ।
सुकुक्षिकखुराश्शीघ्रास्सुस्थिरास्सर्वकर्मसु ॥ ६३ ॥

यवनाश्वास्तु वोद्धव्या वृत्तदीर्घाश्च वाडवाः ।
अथेदानीं प्रवक्ष्यन्ते हया वामनयावनाः ॥ ६४ ॥

स्वभावतो ह्रस्वकायास्सत्ववन्तो वलान्विताः ।
सम्पूर्णास्सुविभक्ताङ्गास्संहताङ्गा मनोहराः ॥ ६५ ॥

सुवर्णास्सुशफाश्चैव मांसलाः प्रियदर्शनाः ।
सुरोमकेशवालान्तास्सुभगाश्च सुमेधसः ॥ ६६ ॥

कर्कशाः क्रीडनपरा ज्ञेया यवनवामनाः ।
एते तु भारकाश्चा जवसत्वरसान्विता महाकायाः ॥ ६७ ॥

भाराध्वक्लेशसहा वृषभाकाराः पृथूदरोरस्काः ।
दृढमेधसस्सुशीला वलवन्तस्ते मनस्विनश्चित्राः ॥ ६८ ॥

पृथुजघना दृढपादास्सुकुक्षिकास्स्युः खरैस्तुल्याः ।
सुविक्रान्ता दृढशफास्तुखारा वाजिनस्तथा ॥ ६९ ॥

विषमेयास्तु विज्ञेयाः केशैस्सूक्ष्मतरैस्तथा ।
तनूदरा वृत्तमध्याः पृथूरस्का लघुक्रमाः ॥ ७० ॥

श्वेतगौरास्सुरोमाणो विषमेया हयास्स्मृताः ।
कान्दरेयास्तु ये वाहास्तेषां श्रृणु च लक्षणम् ॥ ७१ ॥

कायवन्तस्सुसंवृद्धा दृढपादास्सुकुक्षिकाः ।
स्थूलत्वक्सूक्ष्मरोमाणस्स्थूलवालधिकेसराः ॥ ७२ ॥

अकोपनास्सुशीलाश्च कान्दरेयास्सुरङ्गमाः ।
वार्षतेया धनुर्ग्रीवा ह्रस्वाङ्गा ह्रस्वकुक्षिकाः ॥ ७३ ॥

पश्चार्धकायेषु समाः पूर्वकायेषु च स्थिराः ।
शोणवर्णाः सुसत्वाश्च वृत्तमध्याः पृथूरसः ॥ ७४ ॥

आवन्त्यास्सूक्ष्मरोमाणो महाजघनवक्षसः ।
दृढपादा वीर्यवन्तः पृथुजंघोरुकुक्षिकाः ॥ ७५ ॥

विज्ञेया औरसा ह्येवं श्वेतवर्णास्सुवर्णिनः ।
काश्मीरिका वर्ष्मवन्तस्तेजोवन्तश्शुभेन्द्रियाः ॥ ७६ ॥

पृथ्वायतललाटास्ते सिद्धा ह्यलघुविक्रमाः ।
तथैव शंकुकर्णास्ते सुरोमाणस्तनुत्वचः ॥ ७७ ॥

उच्छ्रायतमुखाश्शूरास्सुविभक्तास्सुसंहताः ।
दृढाङ्गबलसम्पन्ना दृढपादा मनस्विनः ॥ ७८ ॥

शोणवर्णास्सुवर्णाश्च हयाः काश्मीरजास्तु ते ।
सकानकानामश्वानां यत्तल्लक्ष्म निबोध मे ॥ ७९ ॥

महानदी सका नाम प्रभूतयवसोदका ।
तस्यास्तीरे ये वसन्ति तत्रोत्पन्नास्सकानकाः ॥ ८० ॥

पूर्वकायेऽत्युदग्रास्ते पश्चादीषत् समुन्नताः ।
तन्वायतविधुग्रीवा दीर्घवालधिकेसराः ॥ ८१ ॥

वीक्षमाणास्तु हेषन्ते प्रत्यश्वं वडबामपि ।
शङ्कुकर्णास्स्पष्टमुखास्तनुवृत्ताननाश्चते ॥ ८२ ॥

दीर्घकेशाश्च दीर्घाङ्गा लम्बपार्श्वोदरस्फिजः ।
पुष्टगात्रोरुजघना हयास्साकानकास्स्मृताः ॥ ८३ ॥

पार्वतेयास्तनुग्रीवा महाजघनवक्षसः ।
प्रध्वस्तपृष्ठगात्रास्ते दीर्घवालाधिकेसराः ॥ ८४ ॥

महाजवा बलोपेताः पुरोगास्सर्वकर्मसु ।
धीराश्च दृढपादाश्च पार्वतेयास्तुरङ्गमाः ॥ ८५ ॥

अनूपोत्तरमाद्रेया दीर्घवालधिकेसराः ।
पृथुग्रीवा महाकर्णा हयास्ते शीघ्रगामिनः ॥ ८६ ॥

न च कर्मणि योग्यास्ते न सुशीला हयाश्च ते ।
दुरासदा दुःखशीलाः प्रायशो मधुपिङ्गलाः ॥ ८७ ॥

हरिवर्णास्सुवर्णाश्च दृढपादाःखुराश्च ते ।
एवं दक्षिणमाद्रेया विज्ञेया लघुचारिणः ॥ ८७ ॥

अन्तर्द्वीपेषु ये जाता वक्ष्यन्ते तान्निबोध मे ।
इरावत्या विपाशायाश्शतद्रूचन्द्रभागयोः ॥ ८८ ॥

अन्तर्द्वीपेषु ये जातास्ते तत्तद्द्वीपसंज्ञकाः ।
चित्तस्थायास्सरस्वत्या नादेयास्तु तुरङ्गमाः ॥ ८९ ॥

कल्याणव्यञ्जनोपेता दीर्घग्रीवा मुखोच्छ्रिताः ।
सुवालिनस्सुजंघाश्च सुपद्मा द्वीपजा हयाः ॥ ९० ॥

कैकेयका वर्ष्मवन्तो महाप्रोथमुखा हयाः ।
दीर्घग्रीवा महोच्छ्वासा दीर्घवालधिकेसराः ॥ ९१ ॥

सुबाहुदृढपादास्ते केकया यवनैस्समाः ।
अपरान्तभवास्स्वस्था महास्कन्धा महाबलाः ॥ ९२ ॥

वृत्तग्रीवास्तु तैर्गुणैः पाण्डवो विकटाश्च ते ।
महोरस्का महापक्षा लम्बश्रवणमेहनाः ॥ ९३ ॥

महामेढ्रफलाश्चैव वृत्तकूर्पोरुकुक्षयः ।
अपरान्तोद्भवा एवमश्वा ज्ञेया विचक्षणैः ॥ ९४ ॥

वसन्तकास्तु विक्रान्ता दीर्घग्रीवामुखा हयाः ।
मृगोदरा ह्रस्वपृष्ठा ह्रस्वश्रवणमेहनाः ॥ ९५ ॥

स्पर्शवन्तश्च शान्ताश्च दृढपादास्सुकुक्षिकाः ।
महोरस्कास्सुचपला महाजघनपिङ्गलाः ॥ ९६ ॥

एवं वसन्तका ज्ञेयास्तुरङ्गाश्शीलकर्कशाः ।
सौवीरका ह्रस्वपृष्ठा दृढगात्राः क्षमान्विताः ॥ ९७ ॥

उदग्रगामिनो दृप्ता पादान्तरविहारिणः ।
सुदाम्यमानाश्शीघ्रास्ते स्थिरभारास्तथाध्वनि ॥ ९८ ॥

समास्संपूर्णसर्वाङ्गाहयास्सौवीरकास्स्मृताः ।
दरदा ह्रस्वजघना ह्रस्वकूर्पाल्यमेधसः ॥ ९९ ॥

महोदरशिरस्कन्धा महाकायवलक्रमाः ।
दृढपादास्सारवन्तो वर्णवन्तो जवान्विताः ॥ १०० ॥

ह्रस्वाक्षिपृष्ठलांगूला दरदा वाजिनस्स्मृताः ।
सैन्धवास्स्थूलवालाश्च स्थूलरोमत्वचस्तथा ॥ १०१ ॥

विकटा वर्ष्मवन्तश्च बलवन्तो जवान्विताः ।
स्थूलकुक्षिकजंघाश्च सैन्धवास्तुरगास्स्मृताः ॥ १०२ ॥

क्षुद्रका वर्ष्मवन्तश्च वलवन्तो जवान्विताः ।
महोदरजवस्कन्धा महोरस्का न कर्कशाः ॥ १०३ ॥

चतुरस्रास्सुजघनास्स्वायतास्सुप्रतिष्ठिताः ।
दीर्घश्रवणमेढ्राश्च सुखुराः क्षुद्रकाः स्मृताः ॥ १०४ ॥

मालवा वर्ष्मवन्तश्च विस्तीर्णजघनासनाः ।
पूर्वकायायता दृप्ता लोहिताक्षा मनोरमाः ॥ १०५ ॥

लम्बोष्ठा लम्बकर्णास्ते ह्रस्वग्रीवा महाबलाः ।
तेजोवन्तोऽतिजवना मालवास्ते हयास्स्मृताः ॥ १०६ ॥

ऐरावता रूक्षकर्णा मन्दमध्यजवान्विताः ।
स्थूलरोमास्थिवालास्ते हीनसत्वाल्पतेजसः ॥ १०७ ॥

गौरास्सुवर्णाः प्रायेण विषमाङ्गा दृढैश्शफैः ।
स्थूलसर्वास्थिमांसास्ते हया एरावतास्स्मृताः ॥ १०८ ॥

आवर्तका दक्षिणस्था दीर्घवर्णा महास्वराः ।
महाकाया विधुग्रीवा महाजघनवक्षसः ॥ १०९ ॥

भुग्नास्यास्तनुपादाश्च विदुर्ह्रस्वास्सुशीलिनः ।
दीर्घकेशा मृदुतला मध्यसारजवान्विताः ॥ ११० ॥

एवमावर्तका ज्ञेयास्सत्वहीना न कर्कशाः ।
कालिङ्गकास्स्थूलपादा महाकर्णा दृढैः खुरैः ॥ १११ ॥
कुब्जदण्डायतग्रीवा भुग्नास्या लम्बमेहनाः ।
अल्पतेजोजवबला हयाः कालिङ्गकाः स्मृताः ॥ ११२ ॥
मौकुलास्स्थूलरोमाणो दुर्धियः क्रोधनालसाः ।
ह्रस्वपृष्ठाङ्गजघनास्स्थूलकुक्षिकजानवः ॥ ११३ ॥
भीरवोऽल्पबला मन्दा हीनतेजोबलास्तु ते ।
पृथ्वासना निरुत्साहा मौकुलास्तुरगाः स्मृताः ॥ ११४ ॥
दाक्षिणात्यास्तु तुरगा वक्ष्यन्ते वानवासिकाः ।
ह्रस्वपृष्ठोरुजघनाः पूर्वकायेषु संहताः ॥ ११५ ॥
पश्चार्धविकृता मन्दा दृढपादाः क्षमान्विताः ।
मध्यप्राणा ह्रस्वजवा अल्पत्तेजस्समन्विताः ॥ ११६ ॥
वानवासिकजातानामेतद्भवति लक्षणम् ।
वाजिनस्त्वथ त्रैलिङ्गाः क्रोधनास्सूकरस्वनाः ॥ ११७ ॥
महोरस्का महास्कन्धाः पश्चार्धेषु सुसंहताः ।
दृढकुक्षिकपादाश्च हयास्त्रैलिङ्गकाः स्मृताः ॥ ११८ ॥
क्रोधना दीर्घकर्णाश्च दीर्घोष्ठजघनास्तथा ।
उदग्राः पूर्वकायेषु पश्चार्धविकृताश्च ते ॥ ११९ ॥
हीनवर्णाल्पतेजस्कास्तब्धगात्रा महोदराः ।
स्थूलकुक्षिकलांगूला क्रोधनास्ते हयाः स्मृताः ॥ १२० ॥
अथोपावृत्तका मन्दाः स्थूललांगूलकुक्षिकाः ।
लम्बकर्णा विधुस्कन्धा लम्बसृक्काण्डमेहनाः ॥ १२१ ॥
महापृष्ठाश्च कुब्जाश्च दृढसक्थिसुसंहताः ।
पिङ्गलाक्षाश्च भूयिष्ठा उपावृत्ता हयास्स्मृताः ॥ १२२ ॥
सौराष्ट्राः स्थूलपादाश्च दृढरोमान्तपार्ष्णयः ।
दीर्घविस्तीर्णसकथ्यङ्गा दर्शनीयतमाः पुरः ॥ १२३ ॥
पश्चार्धविकृताश्चैव स्थूलजानूरुकुक्षिकाः ।
एवं सौराष्ट्रिका ज्ञेयास्सुपादा न च संहताः ॥ १२४ ॥
साल्वेया वेसरा ज्ञेयास्स्थिराङ्गा ह्रस्वकुक्षिकाः ।
वृत्तायतविधुग्रीवा दीर्घकर्णा महोरसः ॥ १२५ ॥
पश्चार्धविकृता रूक्षास्तनुवालधिकेसराः ।
वेसरास्साल्वजातास्ते तनुत्वङ्मध्यमेधसः ॥ १२६ ॥
कुरुक्षेत्रजविज्ञानं वेसराणां निबोध मे ।
अव्यग्राः पूर्वकायेषु पश्चाद्ध्रस्वाल्पमेधसः ॥ १२७ ॥
युक्ताः पृष्ठे तथा स्कन्धे न वहन्ति गुरुश्रमाः ।
कुरुक्षेत्रेषु जातास्ते वेसरास्समुदाहृताः ॥ १२८ ॥
पाञ्चालानां तु विज्ञानं वेसराणां निबोध मे ।
पाञ्चालजा दीर्घमुखास्स्थूलाङ्गाः स्थूलकुक्षिकाः ॥ १२९ ॥
विनतायतपृष्ठास्ते मृदुगात्राल्पतेजसः ।
सुप्रतिष्ठितपादास्ते विषमा दृढपाणयः ॥ १३० ॥
एते पाञ्चालसम्भूता वेसराः परिकीर्त्तिताः ।
वाच्छलाः स्थूलसर्वाङ्गा दीर्घपृष्ठास्तनूदराः ॥ १३१ ॥
सृक्ककर्णोदरैर्लम्बैर्महामुखशिरोधराः ।
कायोपचितमांसास्ते सुविभक्ता दृढा भृशम् ॥ १३२ ॥
मन्दतेजोजवाश्चैव वाच्छला वेसरास्स्मृताः ।
आभीरजानां विज्ञानं कुकुराणां तु वक्ष्यते ॥ १३३ ॥
ऊर्ध्वकर्णास्सूक्ष्ममुखा जवना नित्यनिर्वृताः ।
दुरासदा दुराकारा हया आभीरकास्तु ते ॥ १३४ ॥
एवं देशविभेदेन लक्ष्माण्युक्तानि वाजिनाम् ।
मत्तोचका आश्मकेया मलङ्काश्च चकोरकाः ॥ १३५ ॥
वैदर्भाः श्वेतगिरिजा हिमवत्पूर्वदक्षिणाः ।
सासेयोत्तरसामेया घोटका इति कीर्त्तिताः ॥ १३६ ॥
एषां लक्ष्माणि नोक्तानि ग्रन्थविस्तरभीरुभिः ।
सौराष्ट्रकाश्च साल्वेयाः कुरुक्षेत्राश्च वाच्छलाः ॥ १३७ ॥
कुल्या एते च चत्वारो भजन्ते वेसराभिधाम् ।
उत्तमाश्चाधमा मध्या विज्ञेयाः प्रोक्तलक्षणैः ॥ १३८ ॥
द्वात्रिंशद् घोटकस्याहुर्लक्षणानि मुनीश्वराः ।
तान्यहं कीर्त्तयिष्यामि वाजिनां च पृथक् पृथक् ॥ १३९ ॥
दीर्घाणि चत्वार्यथ चोत्थितानि चत्वारि रक्तान्यथ सूक्ष्मकानि ।
आस्यं भुजाकेशकृकाटिका च दीर्घं चतुष्कं तुरगेषु शस्तम् ॥ १४० ॥
तथोन्नतं घ्राणशिरोललाटं शफं चतुष्कं शुभदं हयस्य ।
ओष्ठौ च जिह्वा त्वथ तालुकं च मेढ्रं सुरक्तं शुभदं हयस्य ॥
वक्रं मुखं कन्धरजानुनी च पार्श्वं चतुष्कं शुभदं प्रशस्तम् ॥ १४१ ॥
गुदं तथा श्रोणितटं विशालं दन्ताक्षियुग्मं शुभदं हयस्य ।
कक्षान्तरं चोदरमध्यमं च निम्ना कटी तालु सुनिम्नकं च ॥ १४२ ॥
सूक्ष्माणि च त्वक् च तथोष्ठकेशा जंघा च शस्तानि तथैव पुच्छम् ।
कर्णान्तरं कर्णयुगं च वंशं शस्तं तथा ह्रस्वमुशन्ति सिद्धाः ॥ १४३ ॥
अथातस्संप्रवक्ष्यामि हयारोहणमुत्तमम् ।
येन विज्ञातमात्रेण सर्वतः प्रियतां व्रजेत् ॥ १४४ ॥

रूपावर्तगतिच्छाया सत्वं वर्णोदयो बलम् ।
वेगहीनस्य वाहस्य सर्वमेतन्निरर्थकम् ॥ १४५ ॥
तस्माद्वेगयुतं वाहं तरुणं पुष्टविग्रहम् ।
वाहयेद्वाहकं सज्जस्तुरङ्गं सान्त्वयन्मुहुः ॥ १४६ ॥
धनुश्शतान्तरं गत्वा पुनरागच्छति द्रुतम् ।
मात्राषोडशकेनाश्वो भवेदुत्तमवेगवान् ॥ १४७ ॥
चतुर्विंशतिमात्राभिर्मध्यवेगस्तुरंगमः ।
द्वात्रिंशता तु मात्राभिर्हीनवेगस्तु घोटकः ॥ १४८ ॥
अभ्यासे जितघोटकोऽश्वहृदयज्ञातागमज्ञस्सुधीः
कालज्ञो गुणदोषवित् पवनजित्क्लेशक्षमी विक्रमी ।
लोलाङ्घ्रिस्स्थिरकन्धरोन्नतभुजाश्शस्ता च रश्मीरतः
सोऽयं सादिवरः स्थिरासनपटुर्गाढप्रहारी मतः ॥ १४९ ॥
रागो वल्लाकशाखण्डभूमानं रिपुदर्शनम् ।
अश्वरक्षात्मरक्षा च सादिनोऽष्टावधानकम् ॥ १५० ॥
सरन्ध्रां कठिनां चैव पाषाणोदकसंयुताम् ।
तृणकाष्ठयुतां चैव रङ्गभूमिं विवर्जयेत् ॥ १५१ ॥
समा च विपुला चैव किंचित्पांसुसमन्विता ।
नीरन्ध्रा विजना चैव रङ्गभूमिः प्रशस्यते ॥ १५२ ॥
स्थूलश्च क्रोधनो मूर्खो भीतोत्सुकचलाननः ।
अस्थानदण्डघाती यो वाजी तस्य न धावति ॥ १५३ ॥
ब्राह्मणं भक्ष्यदानेन साम्येन क्षत्रियं तथा ।
वैश्यं च शब्ददण्डेन शूद्रं दण्डेन वाहयेत् ॥ १५४ ॥
हेषिते स्खलिते भीते तथा चोन्मार्गगामिनि ।
कुपिते भ्रान्तचित्ते च षट्सु स्थानेषु दण्डयेत् ॥ १५५ ॥
हेषिते नासिकामध्ये स्खलिते च कपोलयोः ।
भीते च हृदये प्रोक्त उन्मार्गे जानुजंघयोः ॥ १५६ ॥
कुपिते कुक्षिदेशे तु भ्रान्तचित्ते तु कर्णयोः ।
सर्वस्य प्राप्तदण्डस्य दण्डमेवं निपातयेत् ॥ १५७ ॥
अस्थानताडितो वाजी बहुदोषानवाप्नुयात् ।
अवाहिता विनश्यन्ति सर्वकर्मक्षमा अपि ॥ १५८ ॥
कृशा व्याधिपरीताङ्गा जायन्तेऽत्यन्तवाहनात् ।
पञ्च धाराः प्रवक्ष्यामि ऋषिभिर्याः प्रकीर्त्तिताः ॥ १५९ ॥
प्रथमा विभ्रमा धारा द्वितीया तु प्लुता स्मृता ।
तृतीया पूर्णकण्ठी च चतुर्थी त्वरिता मता ॥ १६० ॥

पञ्चमी ताडिता षष्ठी निरालम्बा प्रकीर्तिता ।
विभ्रमा गतिरित्युक्ता चतुःपादी प्लुता मता ॥ १६१ ॥
मुखपादसमायुक्ता पूर्णकण्ठी च सा भवेत् ।
स्वेच्छया त्वरिता धारा सा स्वर्णे केवलं भवेत् ॥ १६२ ॥
मयूरगतिका हंसीतित्तिरीगतिसन्निभा ।
मरालगतिका चापि चतुष्कगतिरेव च ॥ १६३ ॥
गच्छतश्चोन्नमय्याश्वं पुच्छं ग्रीवं विशेषतः ।
त्वरिता गतिरत्यर्थं मयूरीति निगद्यते ॥ १६४ ॥
शीघ्रं पदानि कुरुते यत्र पुच्छं न कम्पते ।
सा गतिस्तैत्तिरी ज्ञेया हयवाहनकोविदैः ।
पार्श्वाभ्यां दोलनं यत्र हंसवद्गच्छतो हरेः ॥ १६५ ॥
शिरसो धूननं तद्वन्मरालगतिरीर्यते ।
पादैश्चतुर्भिस्सञ्चारे ललितं यत्र गच्छति ॥ १६६ ॥
चतुष्कगतिराख्याता सुखदा चोत्तमोत्तमा ।
क्षेत्राणि दशवाहानां दशाश्च परिकीर्त्तिताः ॥ १६७ ॥
आललाटात् प्रपानादि प्रथमं समुदाहृतम् ।
क्षेत्रं द्वितीयं भवति ललाटान्मस्तकावधि ॥ १६८ ॥
ग्रीवास्कन्धपरिच्छिन्नं तृतीयं परिगद्यते ।
चतुर्थं जितवक्षोंऽसकाकसाककुदात्मकम् ॥ १६९ ॥
आसनं पञ्चमं ज्ञेयं कटिष्षष्ठमिहोच्यते ।
सप्तमं स्फिक्प्रदेशस्स्यात् पुरजान्वष्टमं स्मृतम् ॥ १७० ॥
जङ्घा च नवमं विद्याद् दशमं खुरकुट्टकम् ।
इति क्षेत्राणि वाहानां निर्दिष्टानि पृथक् पृथक् ॥ १७१ ॥
खुरादिमुखपर्यन्तं वडवायां विनिर्दिशेत् ।
तत्र यल्लक्ष्यते काये शुभाशुभफलान्वितम् ॥ १७२ ॥
ततस्तुलक्षणं विद्धि व्यञ्जयेद् व्यञ्जनेन तत् ।
वर्षाणां त्रितयं चैव दिवसानां द्विसप्ततिः ॥ १७३ ॥
दशेति पठ्यते क्षेत्रे प्रथमे प्रथमा भवेत् ।
द्वितीये च द्वितीया तु ज्ञेयमेवं यथाक्रमम् ॥ १७४ ॥
एवं क्षेत्रसमानायां दशायां लक्षणात् फलम् ।
सर्वदेवमयो ह्येष वाजिराजः प्रकीर्त्तितः ॥ १७५ ॥
तस्य ब्रह्मा शिरश्चक्षुर्भास्करो हुतभुग्भ्रुवौ ।
शशी ललाटं च भवेन्नासाप्रोथश्च नैरृतिः ॥ १७६ ॥
जिह्वा सरस्वती शुक्रस्तालु चास्यं बृहस्पतिः ।
हनू च मित्रावरुणौ कण्ठस्तु ऋषयस्तथा ॥ १७७ ॥

विधुग्रीवे च गन्धर्वा विद्युतो रोमकेसराः ।
उरस्तु सन्ध्या देवाश्च भुजौ तस्याश्विनावुभौ ॥ १७८ ॥
जानुजंघे दिशश्चास्यं विदिशः कूर्चकुष्ठिकौ ।
पृष्ठपार्श्वोदरं कुक्षिर्देवास्तु मरुतस्तथा ॥ १७९ ॥
धराधरास्तस्य शफा मण्डूक्योऽथ तलास्स्मृताः ।
स्फिग्वालपायुजंघाश्च विश्वेदेवास्तु सीवनी ॥ १८० ॥
नाभिहृत्कोशमांसानि रुद्रो देवास्तथैव च ।
तस्यात्मा परमेष्ठी च मनस्तस्य जलाधिपः ॥ १८१ ॥
जवो विष्णुर्बलं शक्रः प्रसादश्च धनाधिपः ।
(शिश्नमुष्कभगा यक्षाः खुराश्शेषस्तथैव च ।
अग्निस्तस्य तु कायाग्निः कायोष्माथ धनञ्जयः)
एवं प्रोक्तं तुरङ्गाणां लक्षणं शास्त्रसम्मतम् ॥ १८२ ॥
सर्वलक्षणसम्पन्ना न लभ्यास्सुकृतं विना ।
यद्द्वारे मत्तमातङ्गा वायुवेगास्तुरङ्गमाः ॥ १८३ ॥
पूर्णेन्दुवदना नार्यश्शिवपूजाविधेः फलम् ।
भृङ्गराजो मयूरश्च हंसः कुक्कुट एव च ॥ १८४ ॥
कपिञ्जलश्चकोरश्च सरटा रुक्ष एव च ।
अजश्च [1] लवुकश्चैव विडालो वृषभस्तथा ॥ १८५ ॥
मन्दुरायाः पुरो भागे नैतान् संस्थाप्य रक्षयेत् ।
दृष्टिदोषविघाताय वाजिनां च विवृद्धये ॥ १८६ ॥
एको मेषः कपी च द्वौ त्रीन् गावः पञ्च सैरिभाः ।
षड्श्वास्सप्तमातङ्गा हरेयुर्गृहगां श्रियम् ॥ १८७ ॥
अथ प्रचक्ष्महे तावल्लक्षणं स्यन्दनस्य तु ।
द्विचक्रश्शकटः प्रोक्तश्चतुश्चक्रं च पुष्यकम् ॥ १८८ ॥
षट्चक्रो रथ इत्युक्तस्तैरष्टाभिर्महारथः ।
अश्वैश्चतुर्भिर्द्वाभ्यां वा संयुक्तो दृढचक्रकः ॥ १८९ ॥
मत्तवारणकैर्दिव्यैश्चित्रकैरुपशोभितः ।
नानावर्णपताकाभिर्भ्राजितस्सुदृढाक्षकः ॥ १९० ॥
वरुथेन युगुसश्च तथा सुदृढकूबरः ।
सारानुकर्षप्रासङ्गस्सुनेमिवरचक्रकः ॥ १९१ ॥
उत्तमं स्यन्दने यानं नृपाणामेव निर्मितम् ।
द्वाभ्यां स एव चक्राभ्यां संयुक्तस्सुदृढासनः ॥ १९२ ॥
द्वाभ्यां तुरङ्गमाभ्यां वा पुङ्गवाभ्यामथापि वा ।
विहारार्थं भवेद्यानं पुष्ययानं नृपोचितम् ॥ १९३ ॥

[1] वानरश्चैव.

वलिनः पुङ्गवास्तत्र योज्या लक्षणशालिनः ।
अथ वक्ष्ये पुङ्गवानां लक्ष्म शृणु समासतः ॥ १९४ ॥
मृदुसंहतताम्रोष्ठास्ताम्रजिह्वास्तनुस्स्फिजः ।
वैडूर्यमधुवर्णैश्च जलबुद्बुदसन्निभैः ॥ १९५ ॥
रक्तस्निग्धैश्च नयनैस्तथा रक्तवलित्विकैः ।
सिंहस्कन्धा महोरस्काः स्पष्टपुष्टककुद्मिनः ॥ १९६ ॥
भूमौ कर्षन्ति लांगूलं मूलतः स्थूलवालधिम् ।
पुरस्तादुन्नता नीचाः पृष्ठतस्सुसमाहिताः ॥ १९७ ॥
वृत्ताङ्गाः स्थूलगात्राश्च विस्तीर्णजघनाश्च ये ।
स्पष्टाग्रतनुश्लक्ष्णैश्शफैर्द्विदलैर्दृढैः ॥ १९८ ॥
समांसैः कायसंस्थानैस्समास्फुटितपार्ष्णिभिः ।
वृत्तस्थूलोन्नतग्रीवाः ककुदैश्च समुच्छ्रितैः ॥ १९९ ॥
एते भारसहा ज्ञेया धुरि याने च पूजिताः ।
बन्धुराः श्लक्ष्णशृङ्गाश्च लघुविक्रमगामिनः ॥ २०० ॥
तनुवालधयो ये च तनुकर्णतनूरुहाः ।
पूर्णाङ्गास्तनुजंघाश्च तनुसास्नास्तनुत्वचः ॥ २०१ ॥
तनुसंहतमध्याश्च युक्तस्कन्धशिरोऽधराः ।
सिंहाश्वगर्दभोष्ट्राणां शशसूकरयोस्तथा ॥ २०२ ॥
सक्थिनी सदृशे येषामनड्वाहस्तु तेऽर्चिताः ।
आवर्तैर्दक्षिणावर्तैर्युक्ता दक्षिणतश्च ये ॥ २०३ ॥
वामावर्तैर्व्याततैश्च ये युक्तास्तेऽपि पूजिताः ।
शक्तिध्वजपताकाभा येषां राजिर्विराजते ॥ २०४ ॥
अनड्वाहस्तु ते धन्या वित्तसिद्धिहयावहाः ।
रक्तोष्ठशृङ्गवृषणास्समुद्रो रक्तसन्निभैः ॥ २०५ ॥
पद्मोत्पलकदम्बाभा लाक्षारसनिभाश्च ये ।
वाजिभिर्जवनैस्सार्धं धावते तनुवालधिः ॥ २०६ ॥
मुखे मार्जारसदृशो घ्राणदेशे वलीततः ।
श्वेतदक्षिणपादश्च हस्तैस्तुल्यस्स गोपतिः ॥ २०७ ॥
यो रक्तश्वेतवदनः कृष्णाङ्गो मृगसक्थिमान् ।
रक्तज्वालाघृताक्षो वा न भारे व्यवसीदति ॥ २०८ ॥
कृष्णाङ्गो यो ललाटेन रक्तेन सहितो भवेत् ।
गोपतित्वे पुरस्कार्यस्स मतो यूथवर्धनः ॥ २०९ ॥
प्रलम्बवृषणोऽत्यर्थं सङ्क्षिप्तोदरवङ्क्षणः ।
विस्तीर्णपृष्ठजघनो कार्ये याने च पूजितः ॥ २१० ॥

श्यामैकश्रवणश्चैव सावर्तत्रिकमध्यमः ।
सुश्वेतसर्वगात्रश्च स धान्यधनवर्धनः ॥ २११ ॥

स्निग्धः पिङ्गेक्षणश्श्वेतस्ताम्रश्रृङ्गशफाननः ।
गौरश्वेतैश्चित्रतनुश्श्वेतरक्तैश्च मन्दरैः ॥ २१२ ॥

गोरत्नं तं गवां मध्ये वामयेच्छुभवर्धनम् ।
कल्माषो रक्तश्रृङ्गाक्षश्चारुभूस्पर्शवालधिः ॥ २१३ ॥

ककुद्मी स्वामिनो दीर्घो श्रियमावहतेऽधिकम् ।
उच्छ्रितश्वेतलांगूलस्स्निग्धवर्णो मनोहरः ॥ २१४ ॥

शुक्लताम्रहरोऽश्रुद्रामावहत्यचिराच्छ्रियम् ।
महाककुन्नीलवर्णो वृहत्स्कन्धकटिर्वृषः ॥ २१५ ॥

उदग्रो लम्वमध्यश्च यूथं वर्धयतेऽचिरात् ।
कृष्णपार्श्वः श्वेतपृष्ठः कृष्णाक्षस्सितवालधिः ॥ २१६ ॥

तनुकम्वलकर्णो यस्स धन्यो धनवर्धनः ।
श्वेतो रक्ताक्षवदनः प्रजंघो दीर्घवालधिः ॥ २१७ ॥

देवतानां नृपाणां वा रथयोग्यस्स गोपतिः ।
रक्तसारं रक्तनेत्रं शफै रजतसन्निभैः ॥ २१८ ॥

मन्दोदरं क्षमायुक्तं योजयेत्सर्वकर्मसु ।
यस्य नेत्रोपमं शुक्लं लक्ष्यं स्यात् कृष्णतारकम् ॥ २१९ ॥

ललाटमध्यं सुव्यक्तं स पूज्यो देववन्नरैः ।
गन्धमाल्यनमस्कारैस्सततं प्रतिपूजितः ॥ २२० ॥

दद्यात् स वृषभः कामान् हन्यात् कुलमपूजितः ।
मनोहराकृतिः श्रीमान् वृषस्सर्वाङ्गसुन्दरः ॥ २२१ ॥

यो यो भवेत् स्निग्धवर्णस्स विज्ञेयो गुणावहः ।
लक्षणं तु परिज्ञेयं धेनूनामेवमेव हि ॥ २२२ ॥

अस्राविलरूक्षाक्ष्यो मूषकनयनाश्च न शुभदा गावः ।
प्रचलच्चिपिटविषाणाः करटाः खरसंदृशवर्णाश्च ॥ २२३ ॥

दशसप्तचतुर्दन्ताः प्रलम्वमुण्डानना विनतपृष्ठाः ।
ह्रस्वस्थूलग्रीवा यवमध्यदारितखुराश्च ॥ २२४ ॥

श्यामातिदीर्घजिह्वा गुल्फैरतितनुभिरतिमहद्भिर्वा ।
अतिककुदा कृशदेहा नेष्टा हीनाधिकाङ्ग्यश्च ॥ २२५ ॥

कृष्णश्च धवलो धूम्रः कपिलो लोहितस्तथा ।
पञ्चवर्णास्समाख्याता गवामङ्गेषु लक्षिताः ॥ २२६ ॥

एतेषु द्वित्रिवर्णानां चतुर्णामपि मिश्रणात् ।
बहुधा चित्रवर्णास्स्युर्गावस्तास्सर्वशोभनाः ॥ २२७ ॥

सूक्ष्मं मुखं शिराहीनं ह्रस्वश्रृङ्गसमन्वितम् ।
उरो विशालमुदरं पलम्वं कन्धरस्तनुः ॥ २२८ ॥

स्निग्धमूढस्तनाः स्थूला हिंगुदीफलसन्निभाः ।
कर्कशाश्च समा यस्या सा स्याद् गौर्भाग्यवर्धिनी ॥ २२९ ॥

प्रथमा गौरशवला द्वितीया गौरपिङ्गला ।
तृतीया रक्तकपिला चतुर्थी नीलपाटला ॥ २३० ॥

पञ्चमी नीलपिङ्गक्षी स्यात् षष्ठी रक्तपिङ्गला ।
सप्तमी वहुपिङ्गक्षी चाष्टामी नीलरोहिणी ॥ २३१ ॥

नवमी श्वेतपिङ्गाक्षी दशमी श्वेतपिङ्गला ।
ईदृशा वै पयस्विन्यः कपिलाः परिकीर्त्तिताः ॥ २३२ ॥

गावो दीनाः पार्थिवस्याशिवाय पादैर्भूमिं कुट्टयन्त्यश्च रोगम् ।
मृत्युं कुर्वन्त्यश्रुपूर्णायताक्ष्यो भीतिं भीतास्तस्कराणां रुवन्त्यः ॥

अकारणं क्रोशति चेदनार्तो भयाय रात्रौ वृषभश्शिवाय ।
भृशं निरुद्धो यदि मक्षिकाभिस्तदा सुवृष्टिस्सुतदश्च भर्तुः ॥ २३४ ॥

आगच्छन्त्यो हुंभरावेण गेहं जायन्ते ता गोष्ठवृद्ध्यै गवां याः ।
आर्द्राङ्ग्यो वा हृष्टरोम्णः प्रहृष्टा धन्या गावस्युर्महिष्योऽपि चैवम् ॥

चूर्णीकृतेषु पुंखाया लवणान्वितपिण्डकान् ।
वारिस्फोटा विनश्यन्ति धृतं वैसरवाजिनाम् ॥ २३६ ॥

कुष्ठसैन्धवसंयुक्तमधुलिप्ताङ्गवालका: ।
द्वेष्येपि कुरुते प्रीतिं वाजिनी प्रसवान्विता ॥ २३७ ॥

तण्डुलीयकमूलानि तथा विल्वकपित्थयोः ।
गोघृतेन समालोड्य सर्पदष्टं तु पाययेत् ॥ २३८ ॥

चन्दनागरुकुष्ठैश्च लोध्रभार्जिफणिज्यकैः ।
दंशलेपो विषं हन्ति जाङ्गमं स्थावरं पुनः ॥ २३९ ॥

मूलं हि शालिपर्ण्याश्च निवारणनिमन्त्रितम् ।
रवेर्दिने च विधिना वद्धं कण्ठे गदापहम् ॥ २४० ॥

चर्वित्वा लवणामूलं प्रेरितं मुखवायुना ।
योनिमध्यस्थितं गव्यं ग्राहयेन्महिषीगवाम् ॥ २४१ ॥

शाल्मलीतरुनिर्यासदर्भखण्डस्य वन्धनात् ।
श्रृङ्गस्याग्रे त्यजत्याशु जरामुद्वेगकारिणीम् ॥ २४२ ॥

मधुजीरकगोजिह्वातक्रलेपप्रभावतः ।
स्निह्यति त्वरितं वत्से गौः क्षीरं च प्रयच्छति ॥ २४३ ॥

विलिप्तं मधुना चित्रं पाषाणं पुरतस्स्थितम् ।
लिहन्ती मृतवत्सापि प्रस्नौति सुरभिर्द्रुतम् ॥ २४४ ॥

व्रह्मदण्डीशिफानिम्ववद्धा चक्राङ्कमालिका ।
मन्दस्तम्भे सदा रक्षा रक्षामस्य करोति सा ॥ २४५ ॥
अङ्गारैश्शाकवृक्षस्य सघृतैश्चूर्णितैस्त्र्यहम् ।
दन्तैर्नश्यत्यतीसारस्त्र्यहं पानीयवारणात् ॥ २४६ ॥
वरुणस्य फलार्धस्थपीडिताद्गलितो रसः ।
श्रवणे पूरितोऽशेषं कृमिजालं विनाशयेत् ॥ २४७ ॥
प्रियंगुवृक्षपत्राणां लेपो गोमुखरोगहृत् ।
लाक्षा कुष्ठं नखा मांसी गोमयं तगरं घृतम् ॥ २४८ ॥
एतैस्तु लोमहिप्यादेर्गोष्ठे धूपो ज्वरापहः ।
एवं वृषस्य लक्ष्माणि रथार्हस्य विशेषतः ॥ २४९ ॥
प्रोक्तानि संग्रहेणैव शास्त्रेषु विदितानि च ।
एवं पूर्वोक्तया रीत्या शुभलक्षणसंयुताम् ॥ २५० ॥
कन्यां प्राप्य च नागाश्वरथयानेषु कौशलम् ।
दर्शयन्तं सुतं वीरं ततो भद्रपनायकम् ॥ २५१ ॥
विलोकयन् शिवनृपस्सान्द्रानन्दपरोऽभवत् ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारणचिदम्बर-शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले चतुःपंचाशद्देशजाश्वलक्षणरथगोलक्षणतच्चिकित्सावर्णनं नाम त्रयोदशस्तरङ्गः

अथ चतुर्दशस्तरंगः

चरितं परितस्सर्वैस्स्तूयमानं गुरोऽधुना ।
शिवभूपस्य विमलमन्यच्छ्रोतुं ममेप्सितम् ॥ १ ॥
तद् ब्रूहि देहि श्रवसोस्तच्चरित्रामृतद्रवम् ।
पुत्र! ते तद् ब्रुवे प्राज्ञ! राज्ञां यच्चरितं हितम् ॥ २ ॥
अनन्तरं तु चरितं शिवभूपस्य वर्ण्यते ।
वेङ्कटाख्येन सहितश्शिवभूपः कनीयसा ॥ ३ ॥
अभूदनन्यसामान्यविक्रमौदार्यसंयुतः ।
यथारुणेन घर्मांशुर्भुवनानि प्रकाशयेत् ॥ ४ ॥
तथा कनीयसा साकमरक्षत् क्षितिमण्डलम् ।
अवनेवं महीं जातु भ्रात्रा साकमचिन्तयत् ॥ ५ ॥
दुष्टानां निग्रहोऽवश्यं करणीयो महीभृता ।
इयं नीतिस्सर्वसिद्धा साम्प्रतं साप्युपस्थिता ॥ ६ ॥
वेलापुरान्तःप्राकारमध्यवर्ती सुदुर्दमः ।
सार्वभौमप्रतीपत्वमुपेत्य विचरत्यसौ ॥ ७ ॥
आक्रम्याद्यैव तत् स्थानं निगृह्याम्यद्य तद्रिपुम् ।
सार्वभौमाय तत् स्थानं स्वीयं प्रत्यर्पयाम्यहम् ॥ ८ ॥
इति वाक्यं ज्यायसस्तु श्रुत्वा सोऽपीदमब्रवीत् ।
भ्रातः! प्रभ्रष्टराज्याय राज्यप्रत्यर्पणं वरम् ॥ ९ ॥
यशस्करं नृपाणां तु किमन्यत् तादृशं भवेत् ।
तस्मादवश्यं कर्तव्यमिदमित्यमुनेरितः ॥ १० ॥
निधाय राज्यरक्षायै कनीयांसं विचक्षणः ।
तदाक्रमणमाकांक्ष्य ययौ वेलापुरीं प्रति ॥ ११ ॥
ततो वेलापुरीं गत्वा चतुरङ्गबलान्वितः ।
प्राकाराच्च बहिस्तस्माच्छिबिरं पर्यकल्पयत् ॥ १२ ॥
कोटाचक्रविधानज्ञैर्विज्ञाय च बलाबलम् ।
समन्ततश्च प्राकारं रुरोध सहसा बलैः ॥ १३ ॥
दुर्गस्थो दुर्गमश्शत्रुरसाध्यो येन सिद्ध्यते ।
कोटाचक्राभिधं शास्त्रं तद्ब्रवीमि सुधीः! शृणु ॥ १४ ॥
प्रथमा मृण्मयी कोटा द्वितीया तु जलात्मिका ।
तृतीया ग्रामकोटा स्याच्चतुर्थी गह्वराभिधा ॥ १५ ॥
पञ्चमी गिरिकोटा स्यात् षष्ठी कोटा भटावरा ।
सप्तमी वक्रभूमिस्था विषमाख्या तथाष्टमी ॥ १६ ॥

मृण्मये साधयेच्चण्डीं जलस्थे जलमोक्षणम् ।
ग्रामदुर्गाभिदाहं च प्रवेशं गह्वरस्य च ॥ १७ ॥

पर्वतस्थानभेदं च भूबलं च भटावरे ।
चक्राख्ये कवियोगं च विषमे स्थायि यायिनाम् ॥ १८ ॥

आकजाद्याश्चाष्टवर्गा इन्द्रादिदिशि संस्थिताः ।
यस्य वर्गस्य यो भक्ष्यस्सवर्गस्तस्य भञ्जदः ॥ १९ ॥

अस्सुपर्णः को बिडालश्चस्सिंहश्चश्शुनी तथा ।
तस्सर्पश्च प आखुश्च यो गजश्शश्शशस्स्मृतः ॥ २० ॥

दुर्गवर्गस्य यो भक्ष्यो वर्गस्तन्नामको नरः ।
तद्वर्गो ते रणे त्याज्या न कर्तव्या गडाधिपाः ॥ २१ ॥

स्ववर्गात् पञ्चमस्थाने खण्डभङ्गः प्रजायते ।
अवर्गाद्यष्टकं ज्ञेयं पूर्वाद्यष्टदिशां क्रमात् ॥ २२ ॥

कोटाचक्रं लिखेदादौ चतुरस्रं त्रिनाडिकम् ।
कृत्तिकादीनि धिष्ण्यानि साभिजित्कानि विन्यसेत् ॥ २३ ॥

बहिर्दुर्गे च मध्ये च मध्ये दुर्गे बहिर्बहिः ।
प्रवेशो निर्गमस्तत्र ज्ञातव्यस्स्सरवेदिभिः ॥ २४ ॥

बहिर्द्वादश खान्यत्र प्राकारे तारकाष्टकम् ।
दुर्गमध्ये तथा चाष्टौ मध्ये स्तम्भचतुष्टयम् ॥ २५ ॥

कृत्तिकादिरयं न्यासस्सुबोधार्थं प्रदर्शितः ।
दुर्गभाद्गणना चात्र ग्रहैर्वाच्यं ततः फलम् ॥ २६ ॥

दुर्गनामस्थितो वर्णो यद्वर्गोदीरितस्स्फुटः ।
तदाशादि लिखेच्चक्रं क्रमात् स्वरविचक्षणः ॥ २७ ॥

चतुरस्रं च वृत्तं च त्रिकोणं वृत्तदीर्घकम् ।
अर्धचन्द्रं गोस्तनं च सुदीर्घं चतुररतकम् ॥ २८ ॥

धनुराकृतितो न्यासो भूमिभागक्रमेण तु ।
प्रवेशनिर्गमस्तम्भास्तनावृत्तादिसप्तके ॥ २९ ॥

तत्रस्थैः खेचरैस्सर्वैः फलं वाच्यं यथोदितम् ।
बाह्यमे मध्यमे चैव यत्रस्थाः क्रूरखेचराः ॥ ३० ॥

तत्र स्थानकृतो यत्नो हन्ति दुर्गं ससैन्यकम् ।
बुधशुक्रेन्दुजीवाश्च तथा सौम्यग्रहा मताः ॥ ३१ ॥

ग्रहाणां विविधश्चारो वक्रो दीर्घस्तथा समः ।
उच्चनीचसमास्ते च त्रिधा चक्रे भ्रमन्ति च ॥ ३२ ॥

ऊर्ध्वं चाधस्समं तिर्यग् दृष्टिरेवं चतुर्विधा ।
उदिताश्चार्कनिर्मुक्तश्शीघ्राश्चार्के द्वितीयगे ॥ ३३ ॥

समास्तृतीयगे ज्ञेया मन्दे भानौ चतुर्थगे ।
वक्रः पञ्चमषष्ठेऽर्को ह्यतिवक्रोऽष्टसप्तमे ॥ ३४ ॥

नवमे दशमे भानौ जायते कुटिला गतिः ।
शीघ्रगाश्च भवन्त्येते द्वादशैकादशे तथा ॥ ३५ ॥

राहुकेतू सदा वक्रौ रवीन्दू शीघ्रगौ सदा ।
शीघ्रातिचारगत्या च समाश्च सममन्दयोः ॥ ३६ ॥

वक्रातिवक्रकौटिल्या वक्रगत्या ग्रहा मताः ।
क्रूरोऽतिक्रूरतां याति सौम्यो याति सुसौम्यताम् ॥ ३७ ॥

वक्रचारे समुत्पन्ने शीघ्रेऽप्येवं विपर्ययात् ।
मेषो वृषो मृगः कन्या कर्की मीनस्तुला तथा ॥ ३८ ॥

आदित्यादिग्रहोच्चास्तन्नीचं यत्तस्य सप्तमम् ।
उच्चा नीचा समा तिर्यगिति दृष्टिश्चतुर्विधा ॥ ३९ ॥

उच्चस्थं मध्यमं नीचं चक्रे यत्र व्यवस्थितम् ।
ऊर्ध्वदृष्टी च भौमार्कौ केकरौ बुधभार्गवौ ॥ ४० ॥

समदृष्टी च जीवेन्दू शनिराहू अधोमुखौ ।
सुहृदोऽर्केन्दुभौमेज्या एवं शुक्रज्ञभानुजाः ॥ ४१ ॥

अन्योन्यवैरिणस्त्वेते राहोस्सर्वे च शत्रवः ।
स्वक्षेत्रस्थे फलं पूर्णं पादोनं मित्रगेहगे ॥ ४२ ॥

अर्धं समगृहे ज्ञेयं पादश्शत्रुगृहे स्थिते ।
क्रूरा गर्भे शुभा बाह्ये गृह्यते निश्चितं पुरम् ॥ ४३ ॥

सौम्या मध्ये बहिः क्रूरा असाध्यं दुर्गमुच्यते ।
सौम्यग्रहाश्च प्राकारे मध्ये क्रूरचतुष्टयम् ॥ ४४ ॥

भेदभङ्गो भवेत्तत्र विना युद्धेन गृह्यते ।
प्राकारे संस्थिताः क्रूरा मध्ये सौम्यग्रहा यदि ॥ ४५ ॥

दुर्गभङ्गे समुत्पन्ने भङ्गमायाति वेष्टकः ।
मध्यनाडीस्थितास्सौम्याः क्रूरा बहिरवस्थिताः ॥ ४६ ॥

सैन्यावर्तो बहिश्शत्रोर्विना युद्धेन जायते ।
प्राकारे पुरमध्ये च यथा क्रूरा व्यवस्थिताः ॥ ४७ ॥

सौम्यो बाह्ये तदा दुर्गमयत्नेनापि सिध्यति ।
प्राकारे बाह्यगाः क्रूरास्सौम्या मध्यगता यदि ॥ ४८ ॥

युद्धे प्राकारखण्डस्च पुनर्भङ्गो न विद्यते ।
सौम्या बाह्ये तदा दुर्गे मध्ये क्रूरग्रहास्स्थिताः ॥ ४९ ॥

स्वयं दुर्गं प्रापयन्ति वेष्टकस्य पुराधिपाः ।
बाह्याभ्यन्तरगाः क्रूरा प्राकारे शोभनग्रहाः ॥ ५० ॥

रिपुद्वयं क्षयं याति विना युद्धेन निश्चितम् ।
प्राकारस्था ग्रहाः क्रूरा वहिर्मध्ये शुभास्स्थिताः ॥ ५१ ॥
समयुद्धं भवेत्तत्र खण्डपातो दिने दिने ।
सौम्याः क्रूरास्तथा चाष्टप्राकारे मध्यवाह्यगाः ॥ ५२ ॥
एकस्था यत्र कुर्वन्ति संग्रामं तत्र दारुणम् ।
अशुभा वा शुभा वापि समसंख्या भजन्ति चेत् ॥ ५३ ॥
मध्ये वहिर्विहिर्मध्ये तदा सन्धिस्सुनिश्चिता ।
सौम्यग्रहा यथा वाह्ये मध्यमा यान्ति शून्यताम् ॥ ५४ ॥
वाह्यदुर्गे विना युद्धं सैन्यावृत्तिः प्रजायते ।
पापास्सौम्या यदा सर्वे मध्यस्थाने स्थितास्सदा ॥ ५५ ॥
सैन्यावर्तो भवेद् दुर्गे तस्माद् यत्नेन रक्षयेत् ।
आग्नेये पूर्वतो ज्ञेयं नैऋत्यं दक्षिणे मतम् ॥ ५६ ॥
वायव्यं पश्चिमे ज्ञेयमीशानं सौम्यगं मतम् ।
समसंख्यास्शुभाः क्रूरा वहिर्मध्ये व्यवस्थिताः ॥ ५७ ॥
तदा सन्धिं विजानीयात् सैन्ययोरुभयोरपि ।
क्रूरैर्भङ्गो भवेत् सौम्यैश्शुभं मिश्रैश्च मिश्रितम् ॥ ५८ ॥
फलमेवं विजानीयात् क्रूरसौम्यादिषु क्रमात् ।
विचार्य कुरुते युद्धं कोटाचक्रे खरोदये ॥ ५९ ॥
प्रवेशधिष्ण्यगे चन्द्रे जीवे पक्षर्क्षसंस्थिते ।
रात्रौ कलिरणं दुर्गे कर्तव्यं वाह्यसैनिकैः ॥ ६० ॥
निर्गमर्क्षस्थिते चन्द्रे तदाभ्यन्तरगैर्नृपैः ।
कर्तव्यं कवियुद्धं च रात्रौ सुप्ते वहिर्जने ॥ ६१ ॥
प्रवेशनिर्गमे युक्ते सैन्ययोरुभयोरपि ।
कवौ कोटे तथा युद्धे विपरीते पराजयः ॥ ६२ ॥
क्रूरो वक्री प्रवेशर्क्षे पुरमध्ये स्थितो यदा ।
तदा कोटिविनाशस्स्यात् कोटिस्स्याद्वाह्यभूपतेः ॥ ६३ ॥
प्रवेशे वाह्यगे क्रूरे वक्रे सैन्यस्य निग्रहः ।
दुर्भिक्षं मृत्युभङ्गश्च वहिस्सैन्यस्य जायते ॥ ६४ ॥
निर्गमस्थे बहिस्स्थे च क्रूरो वक्रं करोति चेत् ।
प्राकारस्य भवेद्भङ्गः प्राकारस्थे पुरस्य च ॥ ६५ ॥
पुरसे निर्गमे वक्रे भवन्ति क्रूरखेचराः ।
दुर्गं मुक्त्वा तदा काले दुर्गस्थः प्रपलायते ॥ ६६ ॥
तथा क्रूरास्तथा सौम्याः फलं ग्राह्यं विपर्ययात् ।
मिश्रैर्मिश्रं विजानीयात् कोटाचक्रे न संशयः ॥ ६७ ॥

दुर्गसैन्यं भवेदुच्चं प्राकारे मध्यगाङ्गपम् ।
नीचस्थं वेष्टनं सैन्यं ज्ञातव्यं सर्वविदिभिः ॥ ६८ ॥
कोटं कोटाधिपं नीचे निघ्नन्तौ भौमभास्करौ ।
समस्थौ तु पुरं सर्वमुच्चस्थौ निघ्नतस्तु तौ ॥ ६९ ॥
प्राकारे वेष्टकान् घ्नन्तावुच्चस्थौ राहुसूर्यजौ ।
प्राकारस्थो वहिस्सैन्यं नीचस्थौ तौ च निष्फलौ ॥ ७० ॥
समदृष्टिर्गुरुश्चन्द्रः पश्यतस्सर्वतस्सदा ।
तिर्यक्स्थौ बुधशुक्रौ च फलदौ नात्र संशयः ॥ ७१ ॥
ऊर्ध्वदृष्टिग्रहः कुर्याद्व्यंकुलीयन्त्रपातनम् ।
समे च साधयेच्चण्डीं रन्ध्रपातमधोमुखे ॥ ७२ ॥
दुर्गमध्यगते सूर्ये जलशोषः प्रजायते ।
चन्द्रे भङ्गः कुजे दाहो बुधे बुद्धिविनाशनम् ॥ ७३ ॥
वाक्पतौ दुर्गमध्यस्थे सुभिक्षं प्रचुरं जलम् ।
चलचित्तकरश्शुक्रो मृत्युभङ्गकरश्शनिः ॥ ७४ ॥
राहौ मध्यगते दुर्गे भेदभङ्गो महद्भयम् ।
केतौ मध्यगते तद्वद्विषदानं गढाधिपे ॥ ७५ ॥
मध्ये फलं तथेत्युक्तमेवं वाह्यगते ग्रहे ।
उपग्रहसमायोगादत्यन्तं प्राणसंशयः ॥ ७६ ॥
अकारादिस्वराः पञ्च पूर्वाशादिचतुष्टये ।
मध्यान्तात् सव्यमालिख्य चान्तस्थाः खण्डकारकाः ॥ ७७ ॥
दुर्गभांशस्वरो यस्य वालो [1] वा स्थविरोऽपि वा ।
तद्दिने प्रारभेद्युद्धं दुर्गं सिद्ध्यति नान्यथा ॥ ७८ ॥
दुर्गांशकं समारभ्य यावद्भौमांशकावधि ।
गणयित्वा तु तत् स्थाप्यं भौमाद् दुर्गांशकावधि ॥ ७९ ॥
दुर्गांशकाच्च तद्रन्ध्रनाशस्यांशान्तकं समम् ।
एकीकृत्यैव गणयेन्नागमानेन वर्धयेत् ॥ ८० ॥
द्वादशेन हृताच्छिष्टं वत्सरान्तं विदुर्बुधाः ।
तच्छेषं नागमानेन वर्धितं द्वादशैर्हरेत् ॥ ८१ ॥
मासं तत्र विजानीयात् तच्छेषं दिवसं क्रमात् ।
रन्ध्रेशेऽप्युच्चगे मासं सार्धमासं तु स्वर्क्षगे ॥ ८२ ॥
शत्रुराशौ त्रिगुणितं नीचे संवत्सरं भवेत् ।
पूर्वोक्तवर्षमासास्स्युः कोटाचक्रस्वरोदये ॥ ८३ ॥
दुर्गेश्वरर्क्षवृक्षं च खगं च छेदयेत् क्रमात् ।
दुर्गर्क्षाद्रन्ध्रराशौ च तथैवांशदिशि स्थितम् ॥ ८४ ॥

1) वास्तमितोऽपि वा.

कोटायुद्धं करोत्येव कोटं साध्यं विनिर्दिशेत् ।
एवं बहुप्रकारैस्तु चक्रशास्त्रात् समुद्धृतम् ॥ ८५ ॥

खण्डीस्थानं परिज्ञाय तत्र कुर्वीत सङ्गरम् ।
परिघासंस्थितं तोयं खनित्वा परिवाहयेत् ॥ ८६ ॥

सेतुं प्रकारयेत्तत्र पूरयित्वा मृदादिभिः ।
यद्यगाधं भवेत्तोयं तरेद्वा तु प्लवादिभिः ॥ ८७ ॥

एवमुत्तार्य सैन्यानि दुर्गमावेष्ट्य सेनया ।
अप्रवेशाच्च धान्यानां दुर्गस्थानामनिर्गमात् ॥ ८८ ॥

अन्नक्षयान्निरोधाच्च निर्बन्धाद् भेदनेन च ।
एवं विधैरुपायैश्च गिरिदुर्गं प्रसाधयेत् ॥ ८९ ॥

पाषाणैरिष्टकाभिर्वा मृदा वा निर्मितं च यत् ।
तद् दुर्गं यत्र पाषाणैः खननैश्च निपातयेत् ॥ ९० ॥

कण्टकैश्चर्मभिर्नद्धैश्चलद्भिश्चक्रयन्त्रितैः ।
तदन्तस्संस्थितैर्योधैः प्रहरद्भिस्समन्ततः ॥ ९१ ॥

अग्नितैलमुखैर्बाणैर्वायुसंप्रेषणेरितैः ।
आरोहद्भिर्भटानीकैश्शूरैश्श्रेणिवलान्वितैः ॥ ९२ ॥

दन्तिदन्तकराघातैर्योधैर्मुक्तशरोत्करैः ।
गिरिदुर्गविधानेन दुर्गाणां लयमाहरेत् ॥ ९३ ॥

कुठारैश्शतसाहस्रैश्छेदयेद् विटपांस्तरून् ।
दहेद्दावाग्निना वापि वनदुर्गं जयेन्नृपः ॥ ९४ ॥

पूर्णानि जलभाण्डानि तोयैर्दूरसमाहृतैः ।
महिषोष्ट्रबलीवर्दैर्बहुभिर्वाहयेदपि ॥ ९५ ॥

आनीय च निजानीकं सन्तप्य च चतुर्दिशम् ।
आवेष्ट्य च खनेत् कूपाद्बहिः कूपात् समन्ततः ॥ ९६ ॥

आरभेत ततो युद्धं यन्त्रपाषाणभेदनैः ।
आत्मनश्चानुकूलेन वायुना समुदीरयेत् ॥ ९७ ॥

अग्नितैलमयं वह्निं सर्वशोऽभ्युक्षयेत्ततः ।
जलाभावेन संतप्ता नाशमेष्यन्ति दुर्गगाः ॥ ९८ ॥

तोयपानेन संतृप्तं कुर्यादात्मपदं नृपः ।
एवंप्रकारैरन्यैश्च मरुदुर्गं प्रसाधयेत् ॥ ९९ ॥

साधयेद् दारुजं दुर्गं चूर्णनाद् गजघट्टनैः ।
जयेत मतिमान् यत्नैर्दहनैर्दहनेन च ॥ १०० ॥

नरदुर्गं जयेद्राजा गजाश्वबलसंयुतः ।
एवमष्टविधान् दुर्गानुपायैस्संप्रसाधयेत् ॥ १०१ ॥

शास्त्रलोकागतैरेवमुपायैश्शिवभूपतिः ।
वेलापुराख्यं प्राकारं सहसा स्वयमग्रहीत् ॥ १०२ ॥

ततोऽग्रहीत् करेणैव रिपुं तन्मध्यवर्तिनम् ।
श्रीरङ्गसार्वभौमस्तु श्रुत्वोदन्तं प्रहर्षितः ॥ १०३ ॥

वेलापुरं समायातश्शिवभूपदिदृक्षया ।
ततस्समागतस्तेन प्राप्य तद्दर्शनोत्सवम् ॥ १०४ ॥

सन्तोषितः पराक्रान्तस्थानप्रत्यर्पणाद् बहु ।
अदिशद् विरुदान्यस्मै सार्वभौमो महीभृते ॥ १०५ ॥

रामबाणाभिधानं च वारणं परवारणम् ।
अमूल्यमिन्द्रनीलस्य कर्णाभरणमेव च ॥ १०६ ॥

मुक्ताफलमनर्घ्यं च विरुदे शंखचक्रके ।
जगज्झम्पाभिधं छत्रं शात्रवं चापि मस्तकम् ॥ १०७ ॥

एवमादीनि विरुदान्यर्पयित्वांशुकादिभिः ।
बहुधा मानयामास शिवभूपं महीपतिः ॥ १०८ ॥

कीर्त्या शिवमहीपालः स्थानप्रत्यर्पणोत्थया ।
सार्वभौमः पराक्रान्तनिजस्थानाप्तिजात्तथा ॥ १०९ ॥

तौ च स्वस्वेप्सितावाप्त्या तदाभूतां प्रहर्षितौ ।
तत्र स्थितांश्च सामन्तान् सार्वभौमविरोधिनः ॥ ११० ॥

विजित्य तांश्च स नृपो दुष्प्रहर्षपराक्रमः ।
विजयी स्वपुरं गन्तुं प्रातिष्ठत महीपतिः ॥ १११ ॥

ततः स्वपुरमासाद्य चिरं सुखमवर्तत ।
तुंगभद्रानदीतीरे शिवराजपुराह्वयम् ॥ ११२ ॥

पर्याप्तक्षेत्रफलकमग्रहारमकल्पयत् ।
द्विजानतोषयद् वृत्तिपर्याप्ताभिश्च वृत्तिभिः ॥ ११३ ॥

यज्ञाद् भवति पर्जन्यः पर्जन्यादन्नसंभवः ।
इति शास्त्रादाचरच्च वाजपेयादिकान् क्रतून् ॥ ११४ ॥

अनन्तरं केरलेषु भूरि दुर्गाण्यकल्पयत् ।
जीर्णान् कूपतटाकांश्च नष्टान् देवालयानपि ॥ ११५ ॥

उद्धारापरिमितान् स्वयशःकेतुना सह ।
केदारं भद्रपादं च काशी चैव त्रियम्बकम् ॥ ११६ ॥

वैय्याघ्रपादं साम्बाख्यं पुष्करं स्थाणुसंज्ञकम् ।
शिवगङ्गागुहारण्यवृद्धकोटिहरालयम् ॥ ११७ ॥

श्रीशैलं चैव गोकर्णं पुण्यं पुण्याद्रिसंस्थितम् ।
रामेश्वरमतिख्यातं सर्वपापप्रणाशनम् ॥ ११८ ॥

एवं प्रकीर्तितान्यासन् दिव्यक्षेत्राणि षोडश ।
पुष्पैः पुत्रत्वमाप्नोति धूपो दहति पातकम् ॥ ११९ ॥
दीपान्मृत्युविनाशस्स्यान्नैवेद्यात् सर्वसम्पदः ।
इति शास्त्रान्नित्यदीपनैवेद्यादिप्रकल्पनम् ॥ १२० ॥
तेषु क्षेत्रेषु विप्राणां वर्षाशनसमर्पणम् ।
सर्वक्षेत्रोत्तमा काशी सर्वदेवोत्तमश्शिवः ॥ १२१ ॥
सर्वमन्त्राधिको लोके शैवः पञ्चाक्षरो मनुः ।
इति प्रमाणसंसिद्धमहिमाधिक्यशालिनः ॥ १२२ ॥
विश्वेश्वरस्य सौवर्णकिरीटादिसमर्पणम् ।
कारयामास देवस्य प्रसादाय महेशितुः ॥ १२३ ॥
यः करोति नरो भक्त्या लक्षदीपमहोत्सवम् ।
स तु भूमिं समासाद्य राजवर्यो भविष्यति ॥ १२४ ॥
सप्तद्वीपसमुद्रान्तां पालयिष्यति मेदिनीम् ।
एकच्छत्रं महैश्वर्यं भुक्त्वान्ते मोक्षमाप्नुयात् ॥ १२५ ॥
येऽपि पश्यन्त्यमुं धर्मं तेऽपि यान्ति परां गतिम् ।
इति शास्त्रं समालोक्य विश्वेश्वर समीपतः ॥ १२६ ॥
अकारयद् गोघृतेन कोटिदीपमहोत्सवम् ।
रामेश्वरो जम्बुकेशो नंजुण्डेश्वर एव च ॥ १२७ ॥
शिवगङ्गास्थितो गङ्गाधरो हरिहरेश्वरः ।
नासिकात्र्यम्बकाधीशो रामनाथेश्वरस्तथा ॥ १२८ ॥
पम्पनाथेश्वरस्तेषां देवानां षोडशाख्यया ।
उपचारान् विनिर्मातुं क्षेत्रं भूयो वितीर्णवान् ॥ १२९ ॥
काश्यां कपिलधाराख्यतीर्थोद्धारं तथाकरोत् ।
श्रीरङ्गकाञ्चीवरदराजश्रीवेङ्कटेश्वराः ॥ १३० ॥
जगन्नाथेश्वरश्चैषां पूर्णां पूजामकारयत् ।
तत्र तेषु च तीर्थेषु स्नानार्थं वसुधामदात् ॥ १३१ ॥
राममीनविशालाक्षीमुख्याश्शक्तीरपूजयत् ।
केलदीस्थितरामेशवीरभद्रेशयोरपि ॥ १३२ ॥
मूकाम्बिकायाश्च पृथूनालयानप्यकारयत् ।
तेषां विशेषपूजाश्च कारयामास भक्तितः ॥ १३३ ॥
लक्षं षण्णवतिं चैव सहस्राणि महात्मनाम् ।
भूसुराणां बहुविधैर्मृष्टान्नैस्तृप्तिमातनोत् ॥ १३४ ॥
आदिशच्च द्विजातिभ्यो महादानानि षोडश ।
महान्ति तानि दानानि संकीर्त्यन्ते समासतः ॥ १३५ ॥

सार्वभौमस्य योग्यानि मण्डलाधिपतेस्तथा ।
पट्टभद्रस्य योग्यानि प्रभुमात्रोचितान्यपि ॥ १३६ ॥
सिद्ध्यन्ति दानाद् द्रव्याणि नान्यथा द्रव्यशोधनम् ।
कर्तव्यानि द्विजातिभ्यस्तानि पापोपशान्तये ॥ १३७ ॥
तुलाहिरण्यगर्भं च ब्रह्माण्डं लाङ्गलं तथा ।
सुवर्णधेनुर्भूगोलं कनकाद्रिरनन्तरम् ॥ १३८ ॥
कालपूरुषकल्पद्रू रजताचल एव च ।
सहस्रधेनुदानं च सालङ्कारं सदक्षिणम् ॥ १३९ ॥
लक्ष्मीरलंकृता तद्वद् वृषभो हेमरूपवात् ।
सप्ताचलास्स्वर्णमयास्तत्तल्लक्षणलक्षिताः ॥ १४० ॥
सप्तद्वीपार्णवा पृथ्वी सप्त गोत्रकुलाचलाः ।
स्वर्णरूपात्मनश्छाया तुलया यावती भवेत् ॥ १४१ ॥
एतानि सार्वभौमस्य पट्टभद्रस्य वा पुनः ।
कनकाश्वतिला नागाः कन्या सोपस्करं गृहम् ॥ १४२ ॥
शय्या च कपिला पृथ्वी विद्यादानमतः परम् ।
प्रभुमात्रस्य योग्यानि महादानानि वै दश ॥ १४३ ॥
एवं दानानि बहुधा सन्त्यन्यान्यपि भूतले ।
महादानानि देयानि महादेवस्य तुष्टये ॥ १४४ ॥
इति शास्त्रं समालोक्य शिवनामा महीपतिः ।
नानाविधानि दानानि महेशप्रीतयेऽदिशत् ॥ १४५ ॥
कनीयांसं ततः पुत्रं सोमशेखरनायकम् ।
विद्याभ्यासे वेङ्कटप्पनायकस्य वशं व्यधात् ॥ १४६ ॥
तस्मै सहैव पुत्राभ्यां प्रापयद्वसुधामपि ।
भद्रप्पनायकं चैव सोमशेखरनायकम् ॥ १४७ ॥
"एतौ च बालकौ प्रेम्णा नियतं परिपालयन् ।
नित्यां महीमिमां रक्षन् धर्मकीर्तिपराक्रमैः ॥ १४८ ॥
प्रवर्तयाखिलान् धर्मान् नृपाणामुचितान् भुवि ।
अन्तरंगे परं नित्यं शिवयोगपरो भव" ॥ १४९ ॥
इत्युदीर्य नृपस्तस्मै योगविद्यामुपादिशत् ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारण-
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्र-
सारभूते श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले
शिवभूपचरित्रकोटा चक्र निरूपणं नाम चतुर्दशस्तरङ्गः

अथ पञ्चदशस्तरंगः

शिवभूमिपतिर्योगविद्यां समुपदिष्टवान् ।
इत्याख्यातमभूत् स्वामिन्! भवता विदिता किल ॥ १ ॥
योगविद्या पुनः कैषा तां विद्यां परिकीर्तय ।
यत्पृष्टं पुत्र! भवता तद् ब्रवीमि समासतः ॥ २ ॥
मन्त्रो लयो हठो राजा शैवश्चेत्यपि पञ्चधा ।
योगाः पूर्वैस्समाख्यातास्सिद्धैश्शम्भुप्रचोदितैः ॥ ३ ॥
एकाक्षरं द्व्यक्षरं वा षडक्षरमथापि वा ।
अष्टाक्षरं वा मोक्षाय मन्त्रं योगी जपेत्सदा ॥ ४ ॥
एकाक्षरस्स्यात् प्रणवो हंसस्तु द्व्यक्षरो मनुः ।
षडक्षरो मूलमन्त्रो मायाख्यस्त्वष्टवर्णकः ॥ ५ ॥
वाच्यवाचकभावाख्यं सम्बन्धं परिमृश्य च ।
जपो मन्त्रस्य यो मन्त्रयोगस्स तु निगद्यते ॥ ६ ॥
पुनश्च मनुना सार्धं ध्येये वस्तुनि लीयते ।
नादे वा यस्य कस्यायं लययोग इति स्फुटः ॥ ७ ॥
चिण् चिण् चिणिघण्टाघनशंखध्वनयो तु वल्लकीनिनदः ।
सत्तालवेणुभेरीमर्दलनादा दशोदिता नादाः ॥ ८ ॥
स्थूलात् स्थूलो नश्यन् सूक्ष्मात् सूक्ष्मो यदा भवति नादः ।
तस्य क्रमशस्सिद्धिस्तदोत्तरोत्तरतयेति सङ्कलितः ॥ ९ ॥
अष्टाङ्गबन्धमुद्रौघकरणाधारवान् हरः ।
षडङ्गोऽयं मतोऽन्येषां यमैश्च नियमैर्विना ॥ १० ॥
प्राञ्चो विना हठस्ताभ्यां नेत्यष्टाङ्गं हठं विदुः ।
अन्यो यमश्च [1] नियमश्चर्य आहुर्मनीषिणः ॥ ११ ॥
हिंसाभावस्सूनृतमस्तेयं ब्रह्मचर्यमृजुता च ।
मितभोजनक्षमा धृतिशौचदयो दश यमाः प्रोक्ताः ॥ १२ ॥
तुष्टिश्श्रद्धा च मतिश्शिवपूजाभिरतिजपतपोलज्जाः ।
भस्मावगुण्ठनमथो योगश्रुतिरिति दशोदिता नियमाः ॥ १३ ॥
पीठानि चतुरशीतिः स्वस्तिकभद्राब्जसिद्धमुख्यानि ।
ध्यानजपपूजनादौ शस्तानि स्वस्थतार्थमुच्यन्ते ॥ १४ ॥
हठस्य प्रथमाङ्गत्वादासनं पूर्वमुच्यते ।
तत् कुर्यादासनं स्थैर्यमारोग्यं चाङ्गपाटवम् ॥ १५ ॥
स्वस्तिकं सर्वतोभद्रं सिद्धं सिंहासनं तथा ।
सव्यं शूलं मुखं चैव गोमुखं गरुडं तथा ॥ १६ ॥

1) नियमश्चर्येत्याहुष्षडङ्गकम्.

मयूरं मत्स्यमत्स्येन्द्रं मण्डूकं मुद्गरं मृगम् ।
कुञ्जरं कुक्कुटं नागं काष्ठं क्रौञ्चं च कूर्मकम् ॥ १७ ॥
खड्गं च कामदहनं वैय्याघ्रं वेणुकासनम् ।
योन्यासनं वासकं च धीरं पद्मासनं तथा ॥ १८ ॥
वाराहं चैव पर्यङ्कं पतगासनमेव च ।
त्रिपदं हस्तिकर्णं च हैममर्धासनं तथा ॥ १९ ॥
इत्यादीनामासनानामशीतिश्चतुरुत्तरा ।
वसिष्ठाद्यैश्च मुनिभिर्मत्स्येन्द्राद्यैश्च योगिभिः ॥ २० ॥
अङ्गीकृतान्यासनानि लक्ष्यन्ते कतिचिन्मया ।
जान्वोरन्तरे सम्यक् कृत्वा पादतले उभे ॥ २१ ॥
ऋजुकायस्समासीनः स्वस्तिकं तत्प्रचक्षते ।
एकं पादं तथैकस्मिन् वीरासनमिति स्मृतम् ॥ २२ ॥
सीवन्याश्चात्मनः पार्श्वे कुक्षौ निक्षिप्य पादयोः ।
सव्ये दक्षिणगुल्फं तु दक्षिणे सव्यगुल्फकम् ॥ २३ ॥
एतद्वा स्वस्तिकं प्रोक्तं सव्ये न्यस्येतरं करम् ।
सव्ये दक्षिणगुल्फं तु पृष्ठपार्श्वे विनिक्षिपेत् ॥ २४ ॥
दक्षिणेऽपि तथा सव्यं गोमुखं गोमुखं यथा ।
अङ्गुष्ठौ च निबध्नीयाद् हस्ताभ्यां व्युत्क्रमेण च ॥ २५ ॥
ऊर्वोरुपरिभागे च कृत्वा पादतले उभे ।
पद्मासनं भवेदेतत् सर्वेषामपि पूजितम् ॥ २६ ॥
गुल्फौ च वृषणस्याधस्सीवन्याः पार्श्वयोः क्षिपेत् ।
दक्षिणं सव्यगुल्फेन दक्षिणेन तथोत्तरम् ॥ २७ ॥
हस्तौ जान्वोश्च संस्थाप्य स्वांगुली च प्रसार्य च ।
व्यात्तवक्त्रो निरीक्ष्येत नासाग्रं सुसमाहितः ॥ २८ ॥
सिंहासनं भवेदेतत् पूजितं योगिभिस्सदा ।
अवष्टभ्य धरां सम्यग्तलाभ्यां करयोर्द्वयोः ॥ २९ ॥
हस्तयोः कूर्परौ चापि स्थापयेन्नाभिपार्श्वयोः ।
समुन्नतशिरःपादो दण्डवत् व्योम्नि संस्थितः ॥ ३० ॥
मयूरासनमेतद्धि सर्वपापप्रणाशनम् ।
पद्मासनं समास्थाय जानुनोरन्तरे करौ ॥ ३१ ॥
निवेश्य भूमौ संस्थाप्य व्योमस्थः कुक्कुटासनम् ।
गुल्फौ च वृषणस्याधस्सीवन्याः पार्श्वयोः क्षिपेत् ॥ ३२ ॥

पार्श्वपादौ च पाणिभ्यां दृढं बध्वा सुनिश्चलः ।
भद्रासनं भवेदेतत् सर्वव्याधिनिवारणम् ॥ ३३ ॥
गुदं निरुध्य गुल्फाभ्यां व्युत्क्रमेण समास्थितः ।
कूर्मासनं भवेदेतदिति योगविदोऽब्रुवन् ॥ ३४ ॥
सम्पिण्ड्य सेवनीं सूक्ष्मां गुल्फेनैवापसव्यतः ।
सव्यं दक्षिणगुल्फेन मुक्तासनमितीरितम् ॥ ३५ ॥
मुख्यान्युक्तान्यासनानि द्रष्टव्याणीतराण्यपि ।
तनुष्षण्णवत्यंगुलात्मेव तस्यां गुदाद् द्व्यंगुलादूर्ध्वमेवं हि लिङ्गात् ॥
अधो द्व्यंगुलान्मध्यमेकांगुलं यत्तदेतद् बुधा देहमध्ये वदन्ति ॥
अतोऽधेऽङ्गुलेभ्यो नवभ्योऽस्ति कन्दस्त्वगस्थ्यावृतोऽण्डोपमस्तस्य मध्यम् ।
भवेन्नाभिरस्माद्धि चक्रं समुत्थं लसद्द्वादशारं परं नाभितस्स्यात् ॥
स्थिता कुण्डली सप्तधा वक्रभूताष्टरूपा सुषुप्तोरगाभा निधाय ।
फणां कन्दनाभेरधो रन्ध्रदेशे मुखं तेन वास्यं मनस्सन्निरुध्य ॥
समावेष्ट्य पुच्छेन तु ब्रह्मरन्ध्रे स्थितैषा युता पृष्ठशल्येन भाति ।
इयं कुण्डलिन्येव मूढात्मनां बन्धनाय स्थिता मुक्तये संस्कृतानाम् ॥
कवाटं यदोद्घाटयेत् कुञ्चिकैषापवर्गारं तद्वदुद्घाटयन्ती ।
यथा कुण्डलीत्थावनीभारवाही स्वयं सर्वदोद्योगतन्त्राधिवासः ॥ ४० ॥
कुटिलाङ्गी कुण्डलिनी भुजंगी शक्तिरीश्वरी ।
कुण्डल्यरुन्धती चेति शब्दाः पर्यायवाचकाः ॥ ४१ ॥
मूलबन्धं विधायोर्ध्वगामिना घनवायुना ।
संयुक्तेन प्राणनाम्ना संरुद्धेन नभस्वता ॥ ४२ ॥
वह्निमण्डलमावेष्ट्य तप्तां कुण्डलिनीं ततः ।
वायुना तेन रुद्धेन दण्डेनेव प्रबोधयन् ॥ ४३ ॥
समुत्क्षिप्तफणां कृत्वा नरेन्द्र इव नर्तयन् ।
स्थलं विशोध्य तं वायुं मोक्षमार्गे निवेशयेत् ॥ ४४ ॥
कुम्भकात् कुण्डलीबोधस्सुषुम्ना निर्गला ततः ।
हठसिद्धिस्ततस्तस्मात् सिद्धयोऽष्टौ भवन्ति ताः ॥ ४५ ॥
वपुः पटुत्वं च मुखप्रसादो नादस्फुटत्वं नयनाच्छता च ।
कायाग्निदीप्तिर्विजयश्च बिन्दोर्नाडीषु शुद्धिर्विगतामयत्वम् ॥ ४७ ॥
वस्तुस्थितिरियं काचिद् वृद्धिदोर्ध्वमुखी सती ।
अधोमुखं किञ्चिदत्र शम्भुर्दैवनियामकः ॥ ४८ ॥
द्विसप्ततिसहस्राणि नाडीस्थानानि पञ्जरे ।
सुषुम्ना शाम्भवी शक्तिरशेषास्त्ववनिरर्थकाः ॥ ४९ ॥
तत्र कुण्डतो नाडिकास्थिर्यगूर्ध्वं ह्यदो निर्गतास्तूत्तरत्रिंशदुद्भूः ।
सुषुम्नात्र तत्कुण्डमध्यस्थिता मूर्धगा व्यष्टिशल्येव साकं विभाति ॥

सुषुम्ना शून्यपदवी ब्रह्मद्वारं महापथम् ।
श्मशानं शाम्भवी मध्यमार्गं चेत्येकवाचकम् ॥ ५१ ॥
इयं दक्षिणे दक्षनासापुटान्तः स्थितिः पिङ्गलाख्याथ सौषुम्नवामे ।
इडा वामनासापुटान्तस्थितिर्वै सुषुम्नाग्रभागे हि जिह्वान्तसंस्था ॥
सरस्वत्यधः पिङ्गला पृष्ठतो दक्षिणाक्ष्यन्तगा भाषितैषाहि यूषा ।
ततो दक्षकर्णान्तसंस्था पयस्विन्यसौ पार्श्ववर्तिन्यमुष्याहिनाड्याः ॥
इडा पृष्ठसंस्था तु गान्धारिका वामनेत्रान्तगास्यास्तु गान्धारिकायाः ।
सरस्वत्यभिख्यायुतायाश्च मध्यस्थिता शंखिनी वामकर्णान्तगैषा ॥
कुहूर्मेहनान्तस्स्थितालम्बुसा कंदमध्यादधोगा गुदान्तप्रचारा ।
गता दक्षिणांघ्रिं यशस्विन्यधो वामपादान्तगा हस्तिजिह्वा मतैषा ॥
ततश्चारणा सर्वगा दक्षभागेऽथ धविश्वोदरा वामभागे वसन्ती ।
इमा नाडिकास्तासु मुख्याश्चतस्रो दशैतासु चान्यासु वाताश्चरन्ति ॥
कन्दादधस्त्विन्द्रनीलाश्मरोचिः प्राणो धावन्नेऽश्वनासास्य मध्ये ।
नाभावङ्घ्री चारयन्नेव तद्वन्निश्वासोच्छ्वासादिकं तन्तनीति ॥ ५७ ॥
इन्द्रगोपकनिभोपनयन्योपानयत्यभिहितस्समरादिः ।
पायुमेहनपदोपरजङ्घाजनुनाभिवसतिर्बुधगीतः ॥ ५८ ॥
हानादिव्यापारं तनोति गोक्षीरपाण्डुरो व्यानः ।
कर्णाक्षिगण्डगुल्फघ्राणांघ्रिषु वर्तते प्रदेशेषु ॥ ५९ ॥
मर्माण्युद्वेजयति च देहोन्नयनं करोत्ययमुदानः ।
विद्युत्प्रावकसमरुत्करचरणाद्यङ्गनिष्ठोऽयम् ॥ ६० ॥
अन्नं भुक्तं पीतं रसं समं नयति यस्समानोऽयम् ।
तनुमध्यादिसकलगश्शुद्धस्फटिकप्रकाशवानेषः ॥ ६१ ॥
उद्गारं कारयति प्रोद्यद्भास्करसमप्रभो नागः ।
कारयति मील्नादि च कुन्देन्दुसमद्युतिः कूर्मः ॥ ६२ ॥
कारयति हि क्षुधादिं कृकरः कारयेत्तु मेचकच्छायः ।
तन्द्राजृम्भणकारी स्फटिकनिभस्स खलु देवदत्तमरुत् ॥ ६३ ॥
तप्तसुवर्णसुवर्णो धनञ्जयो जयति शोककारयिता ।
न जहाति मृतं दिनपञ्चकं निर्भिद्य निस्सरेद्देहात् ॥ ६४ ॥
प्राणाद्या अन्तस्थाः पञ्च बहिस्स्थाश्च पञ्च नागाद्याः ।
इति नाडीपवनज्ञोऽभ्यसेद् योगं गुरूक्तमार्गेण ॥ ६५ ॥
प्राकारमण्टपसुवेदिपरिष्कृताल्पद्वारान्तरायरहितं मठमेकमादौ ।
कुर्यात् कुशाजिनविभूतियुतं वितानरम्यं निवेशितसुसेवकमात्तगन्धम् ॥
गोधूमशालिघृतदुग्धसितामधूनि चक्षुष्यशाकफलमुद्गनदीजलानि ।
शुण्ठ्यादि योगिवरपथ्यमथोष्णरूक्षकटूवम्लहिंगुलशुनादि तिलं च वर्ज्यम् ॥ ६७ ॥

तस्मान्नित्यं हितं स्निग्धं मधुरं धातुपोषकम् ।
सगव्यं मृदुलं कोष्णं योगी भोजनमाचरेत् ॥ ६८ ॥

अत्याहारः प्रजल्पो नियमविरहिता लोकसङ्गश्च लौल्यं
1) छायादिश्चेतिषड्भिः खलु 2) विविधमुखैर्नाशमायाति योगः ।
उत्साहस्थैर्यधैर्यप्रवलतरयथालाभसन्तुष्टितत्त्व-
ज्ञानोद्यल्लोकसङ्गच्युतिभि3) रभिभवयोगवृद्धिं प्रयाति ॥ ६९ ॥

प्राणायामस्स खलु प्राणाख्यमरुन्निरोधो यः ।
प्राकृतवैकृतकेवलभेदेन प्राणसंयमस्त्रिविधः ॥ ७० ॥

प्राणोऽनिलस्स्वभावश्चरति विशत्येव वैपरीत्येन ।
हंसपदं सोऽहमिति भाषयतः प्राकृतः प्रणीतोऽयम् ॥ ७१ ॥

अजपायोगश्चासावधरे च पूरकुम्भकैर्विधिना ।
प्राणमरुतो निरोधः क्रियते चेदेष वैकृतः प्रोक्तः ॥ ७२ ॥

सविसर्गं हि सकारं प्रवेश्य वीजं निधाय वस्तुगतम् ।
बीजं विन्दुसमेतं वकारमुत्सृजति वीजजप एषः ॥ ७३ ॥

स इति शिवोऽहमितिस्वयमीशादिष्टोऽहमित्यमुष्यार्थः ।
एकस्य पूज्यपूजकभावानुपपत्तिरुपचितौ वीजम् ॥ ७४ ॥

अकृष्यावर्णमथो वर्णेन हि योजयेन्मनोगतदृष्ट्या ।
मुञ्चतुमवर्णं एष प्रणवजपो भवति गोपितश्शैवे ॥ ७५ ॥

उज्जायि सूर्यभेदन शीतलसीत्कारभस्त्रिका मूर्छाः ।
भ्रमरीतिसप्तकमिदं वैकृतमथ केवलं प्रवक्ष्यामि ॥ ७६ ॥

न वहिस्स्थितमादत्ते मुञ्चति नात्मस्थमनिलमचलतया ।
तिष्ठति च पूर्णकलशात् सहामुना कुम्भकाष्टकं प्राहुः ॥ ७७ ॥

प्राकृतवैकृत केवलविधयोऽमी मन्त्रलयहठात्मानः ।
तत्प्राणायामपरैर्भूयो भूयोऽपि लभ्यते श्रेयः ॥ ७८ ॥

अङ्गानि कूर्म इव रविस्स्तं गच्छन् करानिवार्थगणात् ।
इन्द्रियजालं मनसा हरति प्रत्याहृतिप्रणीतिरियम् ॥ ७९ ॥

विन्दुर्नादो व्योम च मन्त्रो भुवनं च विग्रहश्चेति ।
षड्वस्तूनां ध्यानं ध्यानपदेनोच्यते षडब्जेषु ॥ ८० ॥

जान्वन्तं नाभ्यन्तं हृदयान्तं तद्वदेव कण्ठान्तम् ।
मौल्यन्तं भूतस्थलमेताः खलु धारणाभुवः पञ्च ॥ ८१ ॥

तनुष्षण्णवत्यंगुलात्मा विरिञ्चिश्चतुर्विंशतिस्थानमङ्गल्य एव ।
मुरारेश्च रुद्रेशसादाख्यभाजां चतुर्विंशतिर्विंशतिर्वा चतस्रः ॥ ८२ ॥

अत्र शिवे निदधात्वेषा धारणावशिष्टस्तु (?)
यमसुखगुणभरिते स्थितिमात्मनि चित्ततां प्रतीयाय ॥ ८३ ॥

स्वात्मानं परमात्मनि नीरे नीरमिव योजयेद्यत्तु ।
एष समाधिः प्रोक्तः प्राहुर्वै राजयोगमिममार्याः ॥ ८४ ॥

राजयोगस्समाधिश्चाप्युन्मनी च मनोन्मनी ।
अमरौघो लयस्तत्वं शून्याशून्यं परं पदम् ॥ ८५ ॥

अमनस्कं तथाद्वैतं निरालम्बं निरञ्जनम् ।
जीवन्मुक्तिश्च सहजं तुर्यं चेत्येकवाचकम् ॥ ८६ ॥

समाधिर्द्विविधो ज्ञेयो ज्ञातश्चाज्ञात इत्यपि ।
पुटत्रयानुसन्धानाननुसन्धानभेदतः ॥ ८७ ॥

वितर्कस्य विचारस्याप्यानन्दास्मितयोरपि ।
प्रज्ञातोऽनुगमात् पश्चाद्विवेकख्यातिसंभवः ॥ ८८ ॥

सेनात्मात्मभिदास्फूर्तिरसंप्रज्ञातकस्ततः ।
वासनामात्रशेषोऽसौ तस्मान्मुक्तिश्शिवात्मिका ॥ ८९ ॥

उत्कृष्यापानरविं प्राणानिलहिमकरेण सम्बध्य ।
यत्नेन धारणं यत्समूलवन्धो मरुज्जयोपायः ॥ ९० ॥

नाभेरूर्ध्वमधोऽनिलवन्धनमुड्डीयनाभिधो वन्धः ।
अस्मान्मलमूत्रकृमिविनिष्टिरपि रुग्व्यधापरीहारः ॥ ९१ ॥

गलमाकुंच्यतु हृदये चुवुकं संस्थापयेदयं वन्धः ।
जालन्धराभिधानो देहे मृतिपलितवारणो वोध्यः ॥ ९२ ॥

मुदमानन्दं राति ददातीति हि साधु कीर्त्यते मुद्रा ।
मोचयति वन्धमिति वा द्रावयते शैवममृतमिति मुद्रा ॥ ९३ ॥

श्रोत्रे नेत्रे नासापुटयुगमप्यंगुलीभिरवरुध्य ।
नादश्रुतिविन्द्वीक्षणकरणमियं षण्मुखी वह्निमुद्रा ॥ ९४ ॥

अन्तर्मनोवहिर्दृङ्निमेषमुन्मेषमप्यकुर्वाणा ।
शाम्भव्येषा भणिताऽन्तर्मुद्रा दुर्घटेयमसुकृतिनाम् ॥ ९५ ॥

रेचकपूरकहीनो निमीलदम्बको लक्ष्यम् ।
पश्यन्त्यन्तर्मुद्रा खेचर्येषा हि राजयोगिमता ॥ ९६ ॥

कपालकुहरे जिह्वा प्रविष्टा विपरीतगा ।
भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी ॥ ९७ ॥

छेदनचालनदोहैः कलां क्रमेण प्रवर्धयेत्तावत् ।
सा यावद् भ्रूमध्यं स्पृशति तदा खेचरीसिद्धिः ॥ ९८ ॥

गोमांसं भक्षयेन्नित्यं पिवेदमरवारुणीम् ।
कुलीनं तमहं मन्य इतरे कुलघातुकाः ॥ ९९ ॥

गोशब्देनोदिता जिह्वा तत्प्रदेशो हि तालुगे ।
गोमांसभणं तत्तु महापातकनाशनम् ॥ १०० ॥

1) चायासश्चेति. 2) विधिविमुखैर्नाशमायाति. 3) रभवयोगः

जिह्वाप्रदेशसंभूताद् वह्निनोत्थापितात् खलु ।
चन्द्रात् स्रवति यस्मारस्सा स्यादमरवारुणी ॥ १०१ ॥

चित्तं चरति खे यस्माज्जिह्वा चरति खे यतः ।
तेनैषा खेचरी नाम्ना हठयोगिभिरीरिता ॥ १०२ ॥

अपहसितमेतदन्यैरन्यूनावाप्तिचित्सुधास्यन्दैः ।
वरराजयोगनिरतैर्निरस्तचेष्टैश्शिवावधानपरैः ॥ १०३ ॥

लोकेऽन्तःखेचरीमुद्रामज्ञात्वा वाह्यखेचरीम् ।
आलम्ब्य सत्वरां केचिज्जिह्वाच्छेदनकर्मणि ॥ १०४ ॥

अङ्गुष्ठं पार्ष्णिमूलं तदनु गुदमथो मेढ्रमोड्याणनाभी ।
हृद्देशः कण्ठमूलं तदनु च नवमी घुण्टिका लम्बिकाथ ॥ १०५ ॥

दन्ता वे तालु नासास्थलमल्किकतटं भ्रूलतालोचनं चे ।
त्याधाराष्षोडशामी ददति परिचयात् षोडशैते फलानि ॥ १०६ ॥

दृष्टिस्थैर्यं दीपनापानवन्धब्रह्मग्रन्थ्युद्भेदजीर्णान्नताश्च ।
ओङ्कारोद्यन्नादहृत्पद्मबोधघ्राणस्थैर्याभिस्रवत्संत्सुधा च ॥ १०७ ॥

उन्मनस्यं च कविता ज्योतिः केवलकुञ्चितम् ।
सिद्धयः किरणाज्योतिः पुञ्जमाधारजं फलम् ॥ १०८ ॥

अथवाज्ञान्तषट्चक्रं नाभिहृद्गलताल्लु च ।
नासाग्रकूर्चपालाश्च शिरो ब्रह्म च पश्चिमम् ॥ १०९ ॥

रविरूर्ध्वमधश्चन्द्रस्ताल्वधोनाभिरूर्ध्वतः ।
करणं विपरीताख्यं जानीयाद् गुरुवाक्यतः ॥ ११० ॥

अधश्शिरा ऊर्ध्वपादः प्रागभ्यस्येद् दिने क्षणम् ।
दिने दिनेऽधिकमिदमाषण्मासाज्जरापहम् ॥ १११ ॥

रज्ज्वाङ्गानीवबध्वा दृढतरमनलं भस्त्रयेवोदराग्निं
नाडीभ्यां वायुमाकृष्य च वहिरपि निष्कास्य चोद्दीप्य तप्त्वा ।
कुण्डल्यङ्गं विभिद्या य इह तदनु सौषुम्नमार्गं विशोध्यै-
तद्द्वारा सून्मनो वेशयतु हठयुतो योगिराडन्त्यचक्रम् ॥ ११२ ॥

मैत्र्या धर्मिषु वर्तेत पापिषूपेक्षया चरेत् ।
दयया दुःखिषु चरेत्तुष्ट्या तुष्टेषु संचरेत् ॥ ११३ ॥

राजयोगस्त्रिरूपोऽसौ सांख्यस्तारो मनाइति ।
क्रमात् स्वरूपमेतेषां संग्रहेण प्रवक्ष्यते ॥ ११४ ॥

ज्ञानवैराग्यभावेन तृणीकृत्य जगत्रयम् ।
आदौ सद्गुरुमाश्रित्य तत्त्वज्ञानं समभ्यसेत् ॥ ११५ ॥

ज्ञातृत्वमन्तरीक्षं च समानो वायुरेव च ।
श्रोत्रमग्निर्ध्वनिर्वारि वाग्भूः खं तत्त्वपञ्चकम् ॥ ११६ ॥

मन एव वियद्व्यानो वायुश्चर्म धनञ्जयः ।
स्पर्शोऽम्भश्च क्षणा पाणिर्मारुतस्तत्त्वपञ्चकम् ॥ ११७ ॥
(नभो वुद्धिरुदानश्च मरुद् दृग्वह्निरेव च
पाथो रूपं धरा पादौ वह्निरित्यग्निपञ्चकम्)
चित्तं विष्णुपदं वायुरपानो रसनानलः ।
रसो जलमुपस्तम्भूरपां तत्त्वानि पञ्चकम् ॥ ११८ ॥

अहङ्कारो वियत्प्राणो वायुर्घ्राणं हुताशनः ।
आपो गन्धो मही पायुः पृथिव्यां तत्त्वपञ्चकम् ॥ ११९ ॥

पञ्चविंशतितत्त्वानि पञ्चभूतस्थितानि च ।
तानि यो वेत्ति तत्त्वज्ञस्स एव निजमुक्तिभाक् ॥ १२० ॥

आध्यात्मिकाधिभूताधिदैविकानि यथाक्रमम् ।
दशेन्द्रियेषु विभजन् जीवान्तःकरणेषु च ॥ १२१ ॥

नाहं भूतगुणेन्द्रियाणि च मनोऽहंचित्तवुद्धिर्वपुः-
प्राणस्पर्शमधर्मकर्मनिरतो नैव प्रपञ्चोऽखिलः ॥ १२२ ॥

नित्यं निष्कलमेकमच्युतमजं शान्तं शिवं निर्गुणं ।
शुद्धं शुद्धपदं हि यत्तदहमस्मीति स्मरन् जीवति ॥ १२३ ॥

देहत्रयं प्रथितषोडशधा विकारान्
लिङ्गानि सप्तदशधा नवधा पदार्थान् ।
आत्मानमष्टविविधप्रकृतिस्वभावं
जानन् तदन्य इति जीवति यो महात्मा ॥ १२४ ॥

सत्यं ज्ञानमनन्तं ब्रह्मेति वदति श्रुतिः ।
मुक्तानन्दस्वरूपं च न तु तत्त्वमसिस्थितम् ॥ १२५ ॥

नैतदहं नैतदहं चेति यदन्यं विभावयात्मानम् ।
(सोऽहमिति सोऽहमित्यनुभावय सर्वं त्वमात्मानम्)
इति ज्ञानादेव मोक्ष इत्येतद्वाक्यमादरात् ॥ १२६ ॥

गृहीत्वा ज्ञानयोगेऽस्मिन् समाहितमना भव ।
मन्त्रेण लययोगेन हठयोगेन वा पुनः ॥ १२७ ॥

यावद् ब्रह्म न जानन्ति तावत्पश्यन्ति पण्डिताः ।
नेत्रे निमीलिते नित्यं किञ्चिदुन्मीलिते तथा ॥ १२८ ॥

यो मनश्चक्षुषा ब्रह्म पश्येद् योगिवरस्सहि ।
शशिभास्करयोर्मध्यतारयो[1] स्सर्वतेजसोः ॥ १२९ ॥

विन्दुद्वयं च संयोज्य ब्रह्म तारकमभ्यसेत् ।
वाह्यान्तर्मध्यलक्ष्येषु ब्रह्मदर्शनतत्परः ॥ १३० ॥

1) स्थिरतेजसोः

दृष्टादृष्टस्वरूपाणि ननु तानि विलोकय ।
मूलकन्दाद् दण्डलग्नां ब्रह्मनाडीं शशिप्रभाम् ॥ १३१ ॥

तस्य मध्ये तटित्कोटिनिभां तामूर्ध्वगामिनीम् ।
मनसा लक्षयेन्मूर्तिं सदृशीं विसतन्तुना ॥ १३२ ॥

आब्रह्मरन्ध्रं सुभगां गतां सिद्धिप्रदां स्मरेत् ।
ललाटोर्ध्वेऽथवा लक्ष्ये योगी गोलाटमण्डले ॥ १३३ ॥

विस्फुरत्तारकाकारं मनसा लक्षयेत् सदा ।
अथवा कर्णयोद्वारे तर्जनीभ्यां निरोधयेत् ॥ १३४ ॥

श्रीषष्ठे मस्तके नादं 1) घुंघुकारं शृणोति च ।
चक्षुर्मध्येऽथवा नीलज्योतीरूपं विचिन्तयेत् ॥ १३५ ॥

अन्तर्लक्ष्यमिति ज्ञेयं बहिर्लक्ष्यमतः शृणु ।
नासाग्रदेशे चतुष्षडष्टौ तथा दश द्वादशसंख्ययांगुलेः ।
बहिस्स्मरेन्नीलसुधूम्ररक्ततरङ्गपीतानि सुतत्त्वपञ्चकम् ॥ १३६ ॥

अथवा सम्मुखाकारं स्थिरं दृष्ट्या विलक्षयेत् ।
ज्योतिर्मयूखा दृश्यन्ते योगिभिर्धीरमानसैः ॥ १३७ ॥

दृष्ट्यग्रे वाप्यपाङ्गे वा तप्तकाञ्चनसन्निभाम् ।
भूमिं संलक्षयेद् दृष्टिः स्थिरा भवति योगिनः ॥ १३८ ॥

अथवा शिरसश्चोर्ध्वे द्वादशांगुलसम्मिते ।
ज्योतिःपुञ्जं निराकारं लक्षयेन्मुक्तिदं भवेत् ॥ १३९ ॥

यत्र यत्राथवा योगी तत्र तत्र विलक्षयेत् ।
आकाशमिव यत्तत्र चित्तं भवति तादृशम् ॥ १४० ॥

इत्यनेकविधाकारं बहिर्लक्ष्यमुदाहृतम ।
शृणुष्व मध्यलक्ष्यं च कथितं पूर्वसूरिभिः ॥ १४१ ॥

श्वेतान्विवर्णानथ खण्डचन्द्रसौदामिनीवह्निशिखेव बिन्दून् ।
ज्वलन्नभो वा स्थलहीनमेतद्विलक्षयेत्तत् खलु मध्यलक्ष्यम् ॥

निराकारं पश्येद् गुणरहितमाकाशमथवा
तमोरूपं गूढस्फुरमुरुतराकाशमथवा ।
महाकाशं कालानिलमथात्यन्तरुचिरं
परं तत्त्वाकाशं रविशतनिभं सूर्यखमिति ॥ १४३ ॥

व्योमपञ्चकमेतद्धि तद्बाह्याभ्यन्तरे स्थितम् ।
यः पश्यति नभो लक्ष्ये स व्योमसदृशो भवेत् ॥ १४४ ॥

तारणाच्च गुरुशिष्ययोर्द्वयोस्तारकोऽयमिति योग ईरितः ।
तारकं भवमहाब्धितारकं तत्त्वमेव परिशीलनं कुरु ॥ १४५ ॥

फलमेतद् द्विधा चर्यं यथार्थं सांख्यतारयोः ।
उपाधिरहितस्सांख्यो योगस्सोपाधिकस्त्वयम् ॥ १४६ ॥

पुनश्चातिरहस्यं यज्ज्योतिषां निलयं महत् ।
दिव्यं लिङ्गस्थलं दृष्टमन्तर्लक्ष्यात्मकं शृणु ॥ १४७ ॥

नान्तस्थं न बहिर्व्याप्तमपोरक्षस्वरूपकम् ।
आकाशाभ्यन्तराकाशमन्तर्लक्ष्यं तदेव हि ॥ १४८ ॥

लक्ष्यलीनमनसानिलेन यो वर्तते चलिततारया भवेत् ।
खेचरीयमथ सैव शाम्भवीमुद्रया समतया जगद्गुरोः ॥ १४९ ॥

लोकेऽन्तःखेचरीमुद्रामज्ञात्वा बाह्यखेचरीम् ।
आलम्ब्य सत्वराः केचिज्जिह्वाच्छेदनकर्मणि ॥ १५० ॥

तालुमूलद्वादशान्तामध्यं प्रत्यक्कलात्मकम् ।
यत्तत्तज्ज्योतिषि मनो दत्वा निजहृदि क्रमात् ॥ १५१ ॥

दृष्टिस्तु पूर्णिमा ज्ञेया दृश्यमादौ तमोमयम् ।
तन्मध्ये मनसा पश्येज्ज्योतिर्लिङ्गं सुनिश्चलम् ॥ १५२ ॥

नासाग्रदत्तनिमिषोन्मिषबाह्यदृष्ट्या
लक्ष्येत् सदा शिवविमर्शकगूढदृष्ट्या ।
ज्योतिःस्वरूपममलं हृदि बाह्यहीनं
पश्यन्ति ये त इह संयमिनः कृतार्थाः ॥ १५३ ॥

पश्चिमाभिमुखं लिङ्गमभिन्नवलयाकृति ।
त्वं पूर्वाभिमुखो भूत्वा पश्य पश्य महाद्भुतम् ॥ १५४ ॥

यथापोज्योतिरोङ्कारं ब्रह्मात्मकशिवात्मकम् ।
पश्यन्ति सूरयश्शान्तं तद्विष्णोः परमं पदम् ॥ १५५ ॥

पूर्णेन्दुबिम्ब इव सन्मणिदीपिकेव
मध्याह्नसूर्य इव वह्निशिखेव नित्यम् ।
विद्युत्प्रभेव शिवलिङ्गमहो विचित्रं
लक्ष्यान्तरे ज्वलति पश्यति चक्षुरग्रे ॥ १५६ ॥

आत्मलिङ्गमिदं पश्येत् किमन्यत्कर्मविभ्रमैः ।
अहिंसाद्यष्ट1) पुष्टैस्तन्मानसैरङ्गपूजया ॥ १५७ ॥

पुष्पाण्यहिंसेन्द्रियनिग्रहश्च दयाक्षमाज्ञानसमाह्वयानि ।
ध्यानं तपस्सत्यममीभिरेव प्रपूजयेदात्मनि सिद्धलिङ्गम् ॥ १५८ ॥

यो निमूलदलमीलदम्बको रेचपूरपरिवर्जितानिलः ।
सर्वसंशयविहीनमानसो राजयोगपदभाक् स एव हि ॥ १५९ ॥

शृङ्गाटके यस्तु मनो नियम्य त्रिकोणगामी शशिभास्कराभ्याम् ।
बाह्यान्तराङ्गप्रणवैकगोष्ठविधावधानी हठराजयोगी ॥ १६० ॥

1) घण्टाकारं-

1) पुष्पै.

दृग्दृश्यभावसम्बन्धादुन्मन्यन्ते विचिन्तयेत् ।
शिवयोगस्त्वयं गुह्य जीवन्मुक्तिकरो भवेत् ॥ १६१ ॥

वक्त्रे चापूर्य वायुं हुतवहनिलयेऽपानमाकृष्य दत्वा ।
स्वांगुष्ठाद्यंगुलीभिर्वरकरतलयोष्षड्भिरेवं निरुध्य ॥ १६२ ॥

श्रोत्रे नेत्रे च नासापुटयुगलमथानेन मार्गेण धीराः ।
पश्यन्ति प्रत्ययात् सत्प्रणवबहुविधध्वानसंलीनचित्ताः ॥ १६३ ॥

सर्वास्ववस्थास्त्वकृतप्रयत्नो निश्चिन्तभावो मृतवत्स तिष्ठन् ।
कल्लोलहीनाम्बुधिवन्निवातप्रदीपवत्तत्त्वमयस्सुखी स्यात् ॥ १६४ ॥

ज्ञानज्ञेये ध्यानध्येये लक्ष्यालक्ष्ये भावाभावौ ।
ऊहापोहौ ये दृग्दृश्ये सर्वं त्यक्त्वा जीवन्मुक्तिः ॥ १६५ ॥

शृणु चिज्जीवपूजायाः प्रकारं कथयाम्यहम् ।
रहस्यं सर्वशास्त्रार्थसारं सद्यो विमुक्तिदम् ॥ १६६ ॥

निश्चिन्ता तच्छिवध्यानं निष्क्रिया तस्य पूजनम् ।
प्रदक्षिणं निश्चलत्वं सोऽहंभावो नमस्क्रिया ॥ १६७ ॥

मौनं संकीर्तनं तस्य जपस्तु परिपूर्णता ।
कृत्याकृत्याज्ञता शीलं निर्वाणं समदर्शनम् ॥ १६८ ॥

सर्वेन्द्रियगुणरहिता रूपातीता निरञ्जना शान्ता ।
भावाभावविदूरा सहजावस्थितिरसौ कथिता ॥ १६९ ॥

जाग्रत्स्वप्नस्सुषुप्तिश्च तुरीयं च तथैव च ।
तुर्यातीतं च सहजं न किञ्चिच्चिन्तयेत्ततः ॥ १७० ॥

विहाय कर्माण्यशुभैर्युतानि गृह्णन् हि कर्माणि शुभान्वितानि ।
स्वर्गोन्मुखो यः पुरुषः प्रवृत्तो नैवाधिकारी स तु जागरेपि ॥ १७१ ॥

अलमाखिलपदैरपि चेति कदाचिन्निवृत्तमायो यः ।
स तु जाग्रदवस्थायां तिष्ठन्मोक्षोन्मुखो भवति ॥ १७२ ॥

संसारोत्तरणं ममास्ति कथमित्याचार्य सन्देशनं
विद्वत्सङ्गमिता मता स्मृतिसदाचारं समं मौनताम् ।
वैराग्यं श्रुतिशास्त्रनिश्चितधियः कामाद्यरिध्वंसनं ।
योगाख्यां समुपैति वंशरहितो जाग्रत्स्वभान्वितः ॥ १७३ ॥

मृतो जाग्रदवस्थायां यदि चेदन्यजन्मनि ।
स्वप्नावस्थां गतो याति पूर्वाभ्यासवशाद् भुवि ॥ १७४ ॥

स्वप्नवदखिलं लोकं पश्यन् शरदभ्ररूपमिव चित्ते ।
तिष्ठन् सत्तामात्रे स्वप्नावस्थान्वितश्चरति ॥ १७५ ॥

गते द्वैतभावे स्थिते शान्तदेशे प्रकाशस्वभावे चिदानन्दभानौ ।
वहिर्युक्तियुक्तोऽप्यहो हृत्प्रवृत्तस्सुषुप्तिस्थितश्चित्रवद् भाति योगी ॥
मृतिगतोऽप्यमृतक्षयमानसो विदितशान्ततनुर्निरहंकृतिः ।
गलितगन्धगुणस्स तु तुर्यभाग् भवति जीवनमुक्तिसुखान्वितः ॥

सपूर्णकुम्भ इव वारि निधानमध्ये संशून्यकुम्भ इव विष्णुपदान्तराले ।
अन्तर्वहिः प्रथितपूर्णसुशून्यभावः सच्चित्रदीप इव भाति तुरीययुक्तः ॥

केश्चिद्ब्रह्मेति केश्चिद्धरिरिति शिव इत्येव केश्चिच्चनाना-
भेदैः प्रोक्तस्स शून्यः प्रकृतिपुरुषकालार्थरूपेण केश्चित् ।

लोकैरन्यैर्विकल्पैर्बहुतरवचनैर्देहयुक्तोऽपि नित्यं
युक्तस्स्याद्यस्तुरीयादिकविनुतसमाख्यामवस्थामुपेत्य ॥ १७९ ॥

तस्मात् सर्वप्रयत्नेन क्रमादभ्यासयोगतः ।
तुरीयातीतयावस्थां समासाद्य सुखी भव ॥ १८० ॥

सर्वावस्थां गतो वापि सर्वावस्थां न संस्मर ।
त्यज सङ्गमशेषं च मनोऽन्तर्वहिरन्वितम् ॥ १८१ ॥

निवर्तयान्यकर्माणि शिवयोगं प्रवर्तय ।
सहजाममनस्कां तां मुद्रां संविन्मयीं भज ॥ १८२ ॥

आत्मानं गगनं गत्वा विन्दुं कृत्वा तथैव च ।
द्वयं समरसं कुर्यादमनस्ककला हि सा ॥ १८३ ॥

सचराचरमखिलं यत्किञ्चिदिदं तद् भवेन्मनोदृश्यम् ।
तस्मिन्नमनस्काख्यां यातेऽवस्थां लभेत शिवतत्त्वम् ॥ १८४ ॥

नाद एव लयश्रेष्ठो मुद्राणां खेचरी परा ।
ध्येयः श्रेष्ठो निरालम्बो ह्यवस्थायां मनोन्मनी ॥ १८५ ॥

राजयोगस्य मुद्रां तामेत्य योगी मनोन्मनीम् ।
विचरत्यखिलान् लोकान् वालोन्मत्तपिशाचवत् ॥ १८६ ॥

जीवन्मुक्तिप्रकारस्तु योगादेव न चान्यथा ।
स एव सिद्धिदस्सम्यक् सर्वदर्शनसम्मतः ॥ १८७ ॥

तस्मात् संसेव्य एवंविधहरयमिनां श्रेयसे योगमार्गो
ह्यालस्यं धूर्तसङ्गं स्वजनकुमुदशास्त्रान्धकारांश्च रोगान् ।
जित्वा मूलान्तरायान् पुनरपि च महायोगजैश्वर्यसिद्धी-
स्त्यक्त्वा स्थित्वा सुदेशे सुजनपरिवृतेऽवाधिते धर्मराज्ये ॥ १८८ ॥

एवं योगाभिधा विद्या संग्रहेण प्रदर्शिता ।
एवं वेङ्कटभूपाय योगविद्यां प्रदर्शयन् ॥ १८९ ॥

मातृवत्परदारांश्च परद्रव्याणि लोष्टवत् ।
आत्मवत् सर्वभूतानि यः पश्यति स पश्यति ॥ १९० ॥

वाचमित्यर्थभूयिष्ठां संक्षेपेणोपदिश्य ताम् ।
स्वयं शिवमहीपालश्शिवयोगपरोऽभवत् ॥ १९१ ॥

ततो वेङ्कटभूपालश्शशास धरणीमिमाम् ।
सुताभ्यामर्थकामाभ्यामिव धर्मस्समाहितः ॥ १९२ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारण
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैत
विद्याविशारदश्रीमत्केलदिवसवराजेन्द्रविरचिते
वेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले
योगरहस्योपदेशवर्णनं
नाम पञ्चदशस्तरङ्गः

हरशेखरिकातन्त्रं मेरुतन्त्रं ततः परम् ।
मानसोल्लासमपि कौतुकचिन्तामणिं तथा ॥

वाग्भटं चामृतानन्द[1] कन्दं च दशरूपकम् ।
त्रियानाथकृतिं चैव पुराणानां समुच्चयम् ॥

सामुद्रतिलकं होराशास्त्रं वाराहसंहिताम् ।
वार्हस्पत्यं पालकाप्यं शालिहोत्रं च गारुडम् ॥

नलस्य नकुलस्यापि मतं पाराशरं तथा ।
शिवयोगं शिवालोकं हठयोगप्रदीपिकाम् ॥

एताः कृतीस्समालोक्य ग्रन्थान् संगृह्य तद्गतान् ।
पूरितोऽयं समभवत् कल्लोलस्सप्तमोऽधुना ॥

तरङ्गैः पञ्चदशभिश्शोभमाने विशेषतः ।
एकाशीत्यभ्यधिकया चतुश्शत्या समन्वितम् ॥

सहस्रद्वितयं ग्रन्थाः कल्लोले सप्तमे स्थिताः ॥

श्रीमत्सद्गुणसोमशेखरलसच्चेन्नाम्बिकासूनुना
श्रीदीक्षागुरुचेन्नवीरकरसंजातेन विद्याब्धिना ।
शम्भौ दत्तहृदा सदापि वसवक्षोणीभृता निर्मिते
कल्लोलः परिपूरितः कृतिवरे त्वस्मिन्नभूत् सप्तमः ॥

[1] कृतिं.

श्रीः

श्रीशिवतत्त्वरत्नाकरे

अष्टमकल्लोले

प्रथमस्तरंगः.

भीतं वैयाघ्रकृत्तेर्द्रुतवति वृषभे धारयन्नैभचर्म
द्राक् सिंहं शैलजायास्तदनु गजधिया हन्तुमायाति सैंहम् ।
विभ्राणश्चर्म तस्मादुदितभियि मृगे तच्च मुञ्चन् विलक्षं
दृष्टस्साकं सखीभिर्गिरिवरसुतया शङ्करश्शं करोतु ॥ १ ॥

स्वामिन्! कथितमाश्चर्यं चरितं शिवभूपतेः ।
आकर्ण्य विस्मयानन्दमन्दरं मामकं मनः ॥ २ ॥

नामधेयानुरूपं हि तच्चरित्रं विभावये ।
अधुना श्रोतुमिच्छामि वेङ्कटाख्यमहिपतेः ॥ ३ ॥

चरितं स्फुरितं सम्यक् तन्मह्यं प्रकटीकुरु ।
पुत्र! ते विशदा बुद्धिर्यद् गुरून् श्रोतुमीहसे ॥ ४ ॥

यदभीष्टं तव श्रोतुं तद् ब्रवीमि विभावय ।
शिवभूपात् समासाद्य क्ष्मां स्वसहजक्षमः ॥ ५ ॥

स्वयं शिवमहीपालप्रोक्तधर्मेण सञ्चरन् ।
एकपत्नीव्रतपरः प्रकृतीरनुरञ्जयन् ॥ ६ ॥

सत्यव्रतैकनिरतश्शिवाधिक्यं विभावयन् ।
श्रीवेङ्कटमहीपालो रक्षति स्म महीमिमाम् ॥ ७ ॥

ज्येष्ठसम्पादितं राज्यमवन्नवनिवर्तिनाम् ।
देवानां विविधानां च पूजां पुनरवर्तयत् ॥ ८ ॥

त्यागे चानन्यसामान्ये भोगे च परदुर्लभे ।
यमेकमेव भुवने वदन्त्यप्रतिमं बुधाः ॥ ९ ॥

ये भावनीया गौरीशादभेदेन महत्तराः ।
गुरूणां श्रीजङ्गमानां पूजनार्थं मनोहरम् ॥ १० ॥

पादपूजाह्वयं धर्मं नूतनं पर्यकल्पयत् ।
चरशङ्कररूपाणां परितोषार्थमादरात् ॥ ११ ॥

दासोऽहं नामकं धर्मं महान्तं पर्यकल्पयत् ।
अवन्नेवं वहोः कालदवनीं स्वाग्रजन्मनः ॥ १२ ॥

कुमारमग्रजन्मानं नाम्ना भद्रपनायकम् ।
अभिषिक्तं पदं स्वस्य कारयामास दक्षिणम् ॥ १३ ॥

उपादिशदयं तस्मै व्यवहारक्रमानपि ।
राज्यभारं वहोः कालदूहन् श्रान्तइवाधिकम् ॥ १४ ॥

मतिमान् निदधे तस्मिन् सर्वधूर्वहणक्षमे ।
ततः स्वयमभून्नित्यं शिवयोगैकतत्परः ॥ १५ ॥

ततो महीमहिपतिप्रतिमाने भुजे वहन् ।
भद्रप्पनायको नित्यं भूमण्डलमपालयत् ॥ १६ ॥

वेङ्कटक्षोणिपालेन भद्रभूपाय दर्शितान् ।
व्यवहारक्रमान् ब्रूमः शृणु पुत्र! त्वमादरात् ॥ १७ ॥

व्यवहारान् नृपः पश्येद् विद्वद्भिर्ब्राह्मणैस्सह ।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥ १८ ॥

श्रुताध्ययनसम्पन्ना धर्मज्ञास्सत्यवादिनः ।
राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः ॥ १९ ॥

अपश्यता कार्यवशाद्व्यवहारान् नृपेण तु ।
सभ्यैस्सह नियोक्तव्यो ब्राह्मणस्सर्वधर्मवित् ॥ २० ॥

रागाल्लोभाद्भयाद्वापि स्मृत्यपेताधिकारिणः ।
सभ्याः पृथक् पृथग् दण्ड्याद्विवादाद् द्विगुणं दमम् ॥ २१ ॥

स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः ।
आवेदयति राज्ञे चेद् व्यवहारपदं हि तत् ॥ २२ ॥

प्रत्यर्थिनोऽग्रतो लेख्यं यथा वेदितमर्थिना ।
समामानतदर्थाहर्नामजात्यादिचिह्नितम् ॥ २३ ॥

1) श्रुतार्थश्चोत्तरं लेख्यः पूर्ववेदकसन्निधौ ।
तन्मूर्ध्नि लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम् ॥ २४ ॥

तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा ।
2) चतुष्पाद्व्यवहारोऽयं विवादेषूपवर्णितः ॥ २५ ॥

---

1) श्रुतार्थस्योत्तरं. 2) चतुर्धा.

अभियोगमभिस्तीर्य नैनं प्रत्यभियोजयेत् ।
अभियुक्तं च नान्येन नोक्तं [1] विप्रकृतिं नयेत् ॥ २६ ॥

कुर्यात् प्रत्यभियोगं च कलहे साहसेषु च ।
उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये ॥ २७ ॥

निह्नवे भावितो दद्याद् धनं राज्ञे च तत्समम् ।
मिथ्याभियोगी द्विगुणमभियोगाद् धनं वहेत् ॥ २८ ॥

साहसस्तेयपारुष्यगोऽभिशापान्त्यये स्त्रियाम् ।
विवादयेत् सद्य एव कालोऽन्यत्रेच्छया स्मृतः ॥ २९ ॥

देशाद् देशान्तरं याति सृक्किणी परिलेढि च ।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च ॥ ३० ॥

परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते ।
वाक्चक्षुष्पूजयति नो तथोष्ठं निर्भुजत्यपि ॥ ३१ ॥

स्वभावद् विकृतिं गच्छेन्मनोवाक्कायकर्मभिः ।
अभियोगेऽथ साक्ष्ये वा दुष्टस्स परिकीर्तितः ॥ ३२ ॥

सन्दिग्धार्थं स्वतन्त्रोऽयं साधयेद्यश्च निष्पतेत् ।
न चाहूतो वदेत् किञ्चिद्धीनो दण्ड्यश्च संस्मृतः ॥ ३३ ॥

साक्षिषूभयतस्सत्सु साक्षिणः पूर्ववादिनः ।
(पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः)
सपणश्चेद् विवादस्स्यात्तत्र हीनं तु दापयेत् ॥ ३४ ॥

दण्डं च स्वपणं चैव धनिने धनमेव च ।
छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ॥ ३५ ॥

भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ।
निह्नुते लिखितं नैकमेकदेशविभावितः ॥ ३६ ॥

दाप्यस्सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः ।
स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः ॥ ३७ ॥

अर्थशास्त्रात्तु बलवद् धर्मशास्त्रमिति स्थितिः ।
प्रमाणं लिखितं भुक्तिस्साक्षिणश्चेति निश्चितम् ॥ ३८ ॥

एषामन्यतमाभावे दिव्यान्यतममुच्यते ।
सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया ॥ ३९ ॥

आदौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ।
पश्यतो ब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी ॥ ४० ॥

परेण भुज्यमानाया धनस्य दशवार्षिकी ।
अनागमं तु यो भुंक्ते बहून्यब्दशतान्यपि ॥ ४१ ॥

1) विप्रकर्षी.

चोरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः ।
आधिसीमोपनिक्षेपजडबालधनैर्विना ॥ ४२ ॥

तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि ।
आध्यादीनां विहर्तारं धनिने दापयेद् धनम् ॥ ४३ ॥

दण्डं च तत्समं राज्ञे शक्त्यपेक्षमथापि वा ।
आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात् ॥ ४४ ॥

आगमोऽपि बलं नैव भुक्तिस्स्तोकापि यत्र नो[1] ।
आगमस्तु कृतो येन सोऽभि[2] युक्तस्तमुद्धरेत् ॥ ४५ ॥

न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ।
योऽभियुक्तः परेतस्स्यात्तस्य [3] रीक्षितमुद्धरेत ॥ ४६ ॥

न तत्र कारणं भुक्तिरागमेन विना कृता ।
नृपेणाधिकृताः पूगाः श्रेणयोऽथ बलानि च ॥ ४७ ॥

पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणाम् ।
बलोपधिविनिर्वृत्तान् व्यवहारान् निवर्तयेत् ॥ ४८ ॥

स्त्री[4] सक्तमन्तरागारबहिश्शत्रुकृतांस्तथा ।
मत्तोन्मत्तार्तव्यसनिबलभीतादियोजितः ॥ ४९ ॥

असम्बन्धकृतश्चैव व्यवहारो न सिध्यति ।
प्रणष्टाधिगतं देयं नृपेण धनिने धनम् ॥ ५० ॥

विभावयेन्न चेल्लिङ्गैस्तत्समं दण्डमर्हति ।
राजा लब्ध्वा निधिं दद्याद् द्विजेभ्योऽर्धं द्विजः पुनः ॥ ५१ ॥

विद्वानशेषमादत्ते स सर्वस्य प्रभुर्यतः ।
इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् ॥ ५२ ॥

अनिवेदितविज्ञातो दाप्यस्तद्दण्डमेव च ।
देयं चोरहृतं द्रव्यं राज्ञा जानपदाय च ॥ ५३ ॥

अददद्धि समाप्नोति किल्बिषं तस्य यस्य तत् ।
अशीतिभागो वृद्धिस्स्यान्मासि मासि सबन्धके ॥ ५४ ॥

वर्णक्रमाच्छतं द्वित्रिचतुः पञ्चकमन्यथा ।
कान्तारगास्तु दशकं सामुद्रा विंशतिं शतम् ॥ ५५ ॥

दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ।
सन्ततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा ॥ ५६ ॥

वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा ।
प्रपन्नं साधयन्नर्थं [5] नावाच्यो नृपतिर्भवेत् ॥ ५७ ॥

1) सा. 2) मुक्त. 3) तीर्थे सं. 4) स्त्री नक्त.
5)नवाच्यो नृपतेर्भवेत्.

साध्यमानो नृपं गच्छन् दण्डो दाप्यश्च तद्धनम् ।
गृहीतानुक्रमाद् दाप्यो धनिनामधमर्णिकः ॥ ५८ ॥
दत्त्वा तु ब्राह्मणायैव नृपतिस्तदनन्तरम् ।
राज्ञाधमर्णिको दाप्यस्साधिताद्दशकं शतम् ॥ ५९ ॥
पञ्चकं तु शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः ॥ ६० ॥
हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत् ।
ब्राह्मणस्तु परिक्षीणश्शनैर्दाप्यो यथोदयम् ॥ ६१ ॥
दीयमानं न गृह्णाति प्रयुक्तं यस्स्वकं धनम् ।
मध्यस्थस्थापिते तत् स्याद्वर्धते न ततः परम् ॥ ६२ ॥
अविभक्तैः कुटुम्बार्थे यदृणं हि कृतं भवेत् ।
दद्युस्तदृणिनः प्रेते प्रोषिते वा कुटुम्बिनि ॥ ६३ ॥
न योषित्पतिपुत्राभ्यः न पुत्रेण कृतं पिता ।
दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा ॥ ६४ ॥
सुराकामद्यूतकृतं दण्डशुल्कावशिष्टकम् ।
वृथा दानं तथैवेह पुत्रो दद्यान्न पैतृकम् ॥ ६५ ॥
गोपशौण्डिकशैलूषरजकव्याधयोषिताम् ।
ऋणं दद्यात् पतिस्तासां यस्माद् वृत्तिस्तदाश्रया ॥ ६६ ॥
प्रतिपन्नं स्त्रिया देयं पत्यावा सह यत् कृतम् ।
स्वयं कृतं वा यदृणं नान्यत् स्त्री दातुमर्हति ॥ ६७ ॥
पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽथवा ।
पुत्रैः पौत्रैर्ऋणं देयं निह्नवे साक्षिभावितम् ॥ ६८ ॥
रिक्थग्राही ऋणं दाप्यो योषिद्ग्राहस्तदैव च ।
पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः ॥ ६९ ॥
भ्रातृणामथरं पत्युः पितुः पुत्रस्य चैवहि ।
प्रतिभाव्यमृणं साक्ष्यमविभक्तेन तु स्मृतम् ॥ ७० ॥
दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते ।
आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ॥ ७१ ॥
दर्शनं प्रतिभूर्यत्र मृतः प्रत्ययिकोऽपि वा ।
न तत्पुत्रा ऋणंदद्यु दद्युर्दानाय यस्स्थितः ॥ ७२ ॥
वहवस्स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनम् ।
एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि ॥ ७३ ॥
प्रतिभूर्दापितो यस्तु प्रकाशं धनिनां धनम् ।
द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत् ॥ ७४ ॥
सन्ततिः स्त्रीपशुष्वेव धान्यं त्रिगुणमेव च
वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणस्तथा ॥ ७५ ॥

आधिः प्रणश्येद् द्विगुणे धने यदि न मोक्ष्यते ।
कालोऽकालकृतो नश्येत् फल[1] भाग्यो न नश्यति ॥ ७६ ॥
गोप्याधियोगे नो वृद्धिस्सोपकारेऽथ[2] ह्रापिते ।
नष्टो देयो विनष्टश्च राजदेवकृतादृते ॥ ७७ ॥
आधेः स्वीकरणात् सिद्धी रक्ष्यमाणोऽप्यसारताम् ।
यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत् ॥ ७८ ॥
चरित्रवन्धककृतं सवृद्धया दापयेद् धनम् ।
सत्यकारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥ ७९ ॥
उपस्थितस्य मोक्तव्य आधिस्तेनान्यथा भवेत् ।
प्रयोजके सति धनं कुलेऽन्यस्याधिमाप्नुयात् ॥ ८० ॥
तत्कालकृतमूल्ये वा तत्र तिष्ठेदवृद्धिकः ।
विना धारणिकाद्वापि विक्रीणीत ससाक्षिकम् ॥ ८१ ॥
यदा तु द्विगुणीभूतमृणमादौ तदा खलु ।
मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने ॥ ८२ ॥
यदि प्रकर्षितं तत् स्यात्तदा न धनभाग्धनी ।
ऋणी न लभते वद्धं परस्परमतं विना ॥ ८३ ॥
वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते ।
द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत् ॥ ८४ ॥
नादाप्योपहृतं तत्तु राजदैविकतस्करैः ।
भ्रष्टश्चेन्मार्गिते दत्ते दाप्यो दण्डं च तत्समम् ॥ ८५ ॥
[3] आजीवन् स्वेच्छया दण्ड्यो दाप्यस्तं चापि सोदयम् ।
याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः ॥ ८६ ॥
तपस्विनो दानशीलाः कुलीनास्सत्यवादिनः ।
धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः ॥ ८७ ॥
त्र्यवरास्साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः ।
यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ॥ ८८ ॥
स्त्रीवालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः ।
रङ्गावतारिपाखण्डिकूटकृद्विकलेन्द्रियाः ॥ ८९ ॥
पतितापार्थिसम्बन्धिसहायरिपुतस्कराः ।
साहसी दृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिणः ॥ ९० ॥
उभयानुमतस्साक्षी भवत्येकोऽपि धर्मवित् ।
सर्वस्साक्षी संग्रहणे चौर्यपारुष्यसाहसे ॥ ९१ ॥
साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगान् ।
ये पातकीकृता लोका महापातकिनां तथा ॥ ९२ ॥

1) भोगो. 2) पोषिते. 3) आजीवं.

अग्निदानां च ये लोका ये च स्त्रीबालघातिनाम् ।
स तान् सर्वानवाप्नोति यस्साक्ष्यमनृतं वदेत् ॥ ९३ ॥
सुकृतं यत्त्वया किञ्चिज्जन्मान्तरशतैः कृतम् ।
तत्सर्वं तस्य जानीहि यं पराजयसे मृषा ॥ ९४ ॥
अब्रुवन् हि नरस्साक्ष्यमृणं सदशबन्धकम् ।
राज्ञा सर्वं प्रदाप्यस्स्यात् षट्चत्वारिंशकेऽहनि ॥ ९५ ॥
न ददाति हि यस्साक्ष्यं जानन्नपि नराधमः ।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि ॥ ९६ ॥
द्वैधे बहूनां वचनं समेषु गुणिनां तथा ।
गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तराः ॥ ९७ ॥
यस्योचुस्साक्षिणस्सत्यं प्रतिज्ञां स जयी भवेत् ।
अन्यथा वादिनो यस्य ध्रुवस्तस्य पराजयः ॥ ९८ ॥
उक्तेऽपि साक्षिभिस्साक्ष्ये यदन्ये गुणवत्तमाः ।
द्विगुणा वान्यथा ब्रूयुः कूटास्युस्सर्वसाक्षिणः ॥ ९९ ॥
पृथक् पृथग्दण्डनीयाः कूटकृत्साक्षिणस्तथा ।
विवादाद् द्विगुणं दण्डं विवास्यो ब्राह्मणस्तथा ॥ १०० ॥
यस्साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत्तमोवृतः ।
स दाप्योऽष्टगुणं दण्डं ब्राह्मणं तु विवासयेत् ॥ १०१ ॥
वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ।
[1]तत्पावानायनिर्याप्यश्चतुस्सारस्वतो द्विजैः ॥ १०२ ॥
यः कश्चिदर्थो निष्णातः स्वरुच्यातु परस्परम् ।
लेख्यं तु साक्षिमत्कार्यं तस्मिन् धनिकपूर्वकम् ॥ १०३ ॥
समामासतदर्धाहर्नामजातिस्वगोत्रकैः ।
सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम् ॥ १०४ ॥
समाप्तेऽर्थे ऋणी नम स्वहस्तेन निवेशयेत् ।
मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम् ॥ १०५ ॥
साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम् ।
अत्राहममुकस्साक्षी लिखेयुरिति ते समाः ॥ १०६ ॥
उभयाभ्यर्थितेऽन्येतन्मया ह्यमुकसूनुना ।
लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत् ॥ १०७ ॥
विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत् ।
तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते ॥ १०८ ॥
ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु ।
आधिस्तु भज्यते तावद्यावत्तन्न प्रदीयते ॥ १०९ ॥

देशान्तरस्थे दुर्लभ्ये नष्टोन्मृष्टे हृते तथा ।
भिन्ने दग्धेऽथवा च्छिन्ने लेख्यमन्यत्तु कारयेत् ॥ ११० ॥
सन्दिग्धे लेख्यशुद्धिः स्यात् स्वहस्तलिखितादिभिः ।
युक्तिप्राप्तिक्रियाचिह्नसम्बन्धागमहेतुभिः ॥ १११ ॥
लेख्यस्य पृष्ठेऽभिलिखेद् दत्वा [1]'दत्वार्णिको धनम् ।
धनी चोपगतं दद्यात् स्वहस्तपरिचिह्नितम् ॥ ११२ ॥
तद्दत्वर्णं पाटयेल्लेख्यं शुद्ध्यै चान्यत्तु कारयेत् ।
साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससाक्षिकम् ॥ ११३ ॥
तुलाग्न्यापो विषं कोशो दिव्यानिह विशुद्धये ।
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥ ११४ ॥
रुच्या वान्यतरः कार्यो वर्तयेदितरश्शिरः ।
विनाऽपि शीर्षकात् कुर्यान्नृपद्रोहेऽथ पातके ॥ ११५ ॥
सचेलं स्नातमाहूय सूर्योदय उपोषितम् ।
कारयेत् सर्वदिव्यानि नृपब्राह्मणसन्निधौ ॥ ११६ ॥
तुलास्त्रीबालवृद्धान्धपंगुब्राह्मणरोगिणीम् ।
अग्निर्जलं वा शूद्रस्य यवास्सप्त विषस्य वा ॥ ११७ ॥
ना सहस्राद्धरेत्फालं न विषं न तुलां तथा ।
नृपार्थेष्वभिशापे च वहेयुश्शुचयस्तथा ॥ ११८ ॥
तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो रेखां कृत्वावतारितः ॥ ११९ ॥
त्वं तुले! सत्यधामासि पुरा देवैर्विनिर्मिता ।
तत्सत्यं वद कल्याणि! संशयान्मां विमोचय ॥ १२० ॥
यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय ।
शुद्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमन्त्रयेत् ॥ १२१ ॥
तुलितो यदि वर्धेत शुद्धः स्यान्नात्र संशयः ।
समो वा हीयमानो वा न विशुद्धो भवेन्नरः ॥ १२२ ॥
कक्ष्यच्छेदे तुलभङ्गे घटकर्कटयोस्तथा ।
रज्जुवेधेऽक्षभङ्गे च तथैवाशुद्धिमादिशेत् ॥ १२३ ॥
करौ विमृदितव्रीहेर्लक्षयित्वा ततो न्यसेत् ।
सप्ताश्वत्थस्य पर्णानि तावत्सूत्रेण वेष्टयेत् ॥ १२४ ॥
त्वमग्ने! सर्वभूतानामन्तश्चरसि पावकः ।
साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं कवे! मम ॥ १२५ ॥
तस्येत्युक्तवतो लौहं पञ्चाशत्पलिकं समम् ।
अग्निवर्णं न्यसेत् पिण्डं हस्तयोरुभयोरपि ॥ १२६ ॥

1) तत्तवानायनिर्वाप्यः ?

1) तत्पार्ष्णिको.

स तमादाय सप्तैव मण्डलानि शनैर्व्रजेत् ।
षोडशांगुलकं ज्ञेयं मण्डलं तावदन्तरम् ॥ १२७ ॥
मुक्त्वाग्निं मृदितव्रीहिरदग्धश्शुद्धिमाप्नुयात् ।
अन्तरा पतिते पिण्डे सन्देहे वा पुनर्हरेत् ॥ १२८ ॥
सत्येन माभिरक्षस्व वरुणेत्यभिशाप्यकम् ।
नाभिदघ्नोदकस्थस्य [1] गृहीत्वा रूध्रकं दिशेत् ॥ १२९ ॥
समकालमिषुं मुक्तमानीयान्यो जवी नरः ।
गते तस्मिन्निमग्नाङ्गं पश्येच्चेच्छुद्धिमाप्नुयात् ॥ १३० ॥
त्वं विष ब्रह्मणः पुत्र ! सत्यधर्मे व्यवस्थितः ।
त्रायस्वास्मादभीशापान् सत्येन भव मेऽमृतम् ॥ १३१ ॥
एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजम् ।
यस्य वेगैर्विना जीर्येच्छुद्धिं तस्य विनिर्दिशेत् ॥ १३२ ॥
देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाचरेत् ।
संश्राव्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयम् ॥ १३३ ॥
अर्वाक् चतुर्दशादह्नो यस्य नो राजदैविकम् ।
व्यसनं जायते घोरं स शुद्धस्स्यान्न संशयः ॥ १३४ ॥
विभागं चेत् पिता कुर्यादिच्छया विभजेत् सुतान् ।
ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा समभागिनः ॥ १३५ ॥
यदि कुर्यात् समानंशान् पत्न्यः कार्यास्समांशकाः ।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा ॥ १३६ ॥
शक्तस्यानीहमानस्य किञ्चिद् दत्वा पृथक्क्रिया ।
न्यूनाधिकविभक्तानां धर्मः पितृकृतः स्मृतः ॥ १३७ ॥
विभजेरन् सुताः पित्रोरूर्ध्वं रिक्थमृणं समम् ।
मातुर्दुहितरश्शेषमृणात्ताभ्यो ऋतेऽन्वयः ॥ १३८ ॥
पितृद्रव्याविरोधेन यदन्यत् स्वयमार्जितम् ।
मैत्रमौद्वाहिकं चैव दायादानं न तद्भवेत् ॥ १३९ ॥
क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः ।
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥ १४० ॥
सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः ।
अनेकपितृकाणां तु पितृतो भागकल्पना ॥ १४१ ॥
भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा ।
तत्र स्यात् सदृशं स्वाम्यं पितुः पुत्रस्य चैवहि ॥ १४२ ॥
विभक्तेषु सुतो जातस्सवर्णायां विभागभाक् ।
दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात् ॥ १४३ ॥
पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत् ।
पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत् ॥ १४४ ॥
असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः ।
भगिन्यश्च निजादंशाद्दत्वांशं तु तृतीयकम् ॥ १४५ ॥
चतुस्त्रिद्व्येकभागास्स्युर्वर्णशो ब्राह्मणात्मजाः ।
क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः ॥ १४६ ॥
अन्योन्यापहृतं द्रव्यं विभक्ते यत्र दृश्यते ।
तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः ॥ १४७ ॥
औरसो धर्मपत्नीजस्तत्सुतः पुत्रिकासुतः ।
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥ १४८ ॥
गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः ।
कानीनः कन्यकाजातो मातामहसुतो मतः ॥ १४९ ॥
अक्षतायां क्षतायां वा जातः पौनर्भवो भवेत् ।
दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् ॥ १५० ॥
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात् स्वयं कृतः ।
दत्तात्मा तु स्वयं दत्तो गर्भे विन्नस्सहोढजः ॥ १५१ ॥
उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः ।
पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ॥ १५२ ॥
सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः ।
पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ॥ १५३ ॥
तत्सुता गोत्रजा बन्धुश्शिष्यस्सब्रह्मचारिणः ।
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः ॥ १५४ ॥
स्वर्यातस्याप्यपुत्रस्य सर्ववर्णेष्वयं विधिः ।
वानप्रस्थयतिब्रह्मचारिणो रिक्थभागिनः ॥ १५५ ॥
क्रमेणाचार्यतच्छिष्यधर्मभ्रात्रेकतीर्थिनः ।
संसृष्टिनस्तु संसृष्टस्सोदरस्य तु सोदरः ॥ १५६ ॥
दद्यादपहरेच्चांशं जातस्य च मृतस्य च ।
अन्योदर्यस्तु संसृष्टिनान्योदर्यधनं हरेत् ॥ १५७ ॥
असंसृष्टयपि चादध्यात् संसृष्टोऽनन्यमातृजः ।
क्लीबोऽथ पतितस्तत्याज्यः पंगुरुन्मत्तको जडः ॥ १५८ ॥
अन्धोऽचिकित्स्यरोगाद्या भर्तव्यास्स्युर्निरंशकाः ।
औरसाः क्षेत्रजास्त्वेषां निर्दोषा भागहारिणः ॥ १५९ ॥
सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात् कृताः ।
अपुत्रा योषितश्चैषां भर्तव्यास्साधुवृत्तयः ॥ १६० ॥

[1] गृहीतोरूद्कं.

निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च ।
पितृमातृपतिभ्रातृदत्तमध्यमुपागतम् ॥ १६१ ॥
आधिवेदनिकार्यं च स्त्रीधनं परिकीर्त्तितम् ।
बन्धुदत्तं यथा शुल्कमन्वाधेयिकमेव च ॥ १६२ ॥
अतीतायामप्रजसि बान्धवास्तदवाप्नुयुः ।
अप्रजस्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्ष्वपि ॥ १६३ ॥
दुहितॄणां प्रजाता चेच्छेषेषु पितृगामि तत् ।
दत्वा कन्यां हरन् दण्ड्यो व्ययं दाप्यश्च सोदयम् ॥ १६४ ॥
मृतायां दत्तमादद्यात् परिशोध्योभयव्ययम् ।
दुर्भिक्षे धर्मकार्ये च व्याधौ सप्रतिरोधके ॥ १६५ ॥
गृहीतः स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति ।
अधिविन्नस्त्रियै दद्यादाधिवेतनिकं समम् ॥ १६६ ॥
न दत्तं स्त्रीधनं यस्यै दत्तेत्वर्धं प्रकीर्त्तितम् ।
विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखनैः ॥ १६७ ॥
विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतुकैः ।
सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरादयः ॥ १६८ ॥
गोपास्सीमाकृषाणा ये सर्वे च वनगोचराः ।
नयेयुरेते सीमानं स्थलाङ्गारतुषद्रुमैः ॥ १६९ ॥
सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षिताः ।
सामन्ता वा [1] चतुर्ग्रामाश्चत्वारोऽष्टौ दशापि वा ॥ १७० ॥
रक्तस्रग्वसनां सीमां नयेयुः क्षितिधारिणः ।
अनृते तु पृथग्दण्ड्यो राज्ञामध्यमसाहसम् ॥ १७१ ॥
अभावे ज्ञातृचिह्नानां राज्ञा सीमा प्रवर्त्तिता ।
आरामायतनग्रामनिपानोद्यानवेश्मसु ॥ १७२ ॥
एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु ।
मर्यादायाः प्रभेदे तु सीमातिक्रमणे तथा ॥ १७३ ॥
क्षेत्रस्य हरणे दण्ड्या अधमोत्तममध्यमाः ।
न निषेधोऽल्पबाधस्तु सेतुः कल्याणकारकः ॥ १७४ ॥
परभूमिं हरन् कूपः स्वल्पक्षेत्रो बहूदकः ।
स्वामिने योऽनिवेद्यैव क्षेत्रे स्वे तु प्रवर्त्तयेत् ॥ १७५ ॥
उत्पन्ने स्वामिनो भागस्तदभावे महीपतेः ।
फलहृतमपि क्षेत्रं न कुर्याद्यो न कारयेत् ॥ १७६ ॥
न प्रदाप्य कृष्टफलं फलमन्येन कारयेत् ।
सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणीम् ॥ १७७ ॥
क्षेपं करोति चेद्दण्ड्यः पणानर्धत्रयोदशान् ।
अभिगन्तास्मि भगिनीं मातरं वा तवेति हि ॥ १७८ ॥
शपन्तं दापयेद्राजा पञ्चविंशतिकं दमम् ।
अर्धो दमेषु द्विगुणं परस्त्रीषूत्तमेषु च ॥ १७९ ॥
दण्डप्रणयनं कार्यं वर्णजात्युत्तराधरैः ।
प्रातिलौम्यापवादेषु द्विगुणस्त्रिगुणो दमः ॥ १८० ॥
वर्णानामानुलोम्येन तस्मादर्धार्धहानितः ।
बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः ॥ १८१ ॥
शक्यस्तदर्धकः पादनासाकर्णकरादिषु ।
अशक्तस्तु वदन्नेवं दण्डनीयः पणान् दश ॥ १८२ ॥
तथाशक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु ।
पतनीये कृते क्षेपे दण्डो मध्यमसाहसः ॥ १८३ ॥
त्रैविद्यनृपदेवानां क्षेप उत्तमसाहसः ।
मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः ॥ १८४ ॥
परगात्रेष्वभिद्रोहे हस्तपादायुधादिभिः ।
भस्मादिभिश्चोपघातो दण्डपारुष्यमुच्यते ॥ १८५ ॥
असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च ।
द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृतो भयात् ॥ १८६ ॥
भस्मपुञ्जरजस्स्पर्शे दण्डो दश पणाः स्मृतः ।
अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणस्ततः ॥ १८७ ॥
समेष्वेवं परस्त्रीषु द्विगुणस्तूत्तमेषु च ।
हीनेष्वर्धदमो मोहमदादिभिरदण्डनम् ॥ १८८ ॥
विप्रपीडाकरं भेद्यमङ्गमब्राह्मणस्य तु ।
उद्घूर्णे प्रथमो दण्डस्संस्पर्शे तु तदर्धकः ॥ १८९ ॥
उद्गीर्णे हस्तपादे तु दशविंशतिकौ दमौ ।
परस्परं तु सर्वेषां शस्त्रे मध्यमसाहसः ॥ १९० ॥
पादकेशांशुककराकर्षणेषु पणान् दश ।
पीडाकर्षांशुकावेष्टपदाध्यासे शतं दमः ॥ १९१ ॥
शोणितेन विना दुःखं कुर्वन् काष्ठादिभिर्नरः ।
द्वात्रिंशतं पणान् दण्ड्यो द्विगुणं दर्शनेऽसृजः ॥ १९२ ॥
[1] करपाददतां भङ्गे छेदने कर्णनासयोः ।
मध्यदण्डो व्रणोद्भेदे मृतकल्पे हते तथा ॥ १९३ ॥
चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने ।
कन्धराबाहुसक्थ्नां च भङ्गे मध्यमसाहसः ॥ १९४ ॥

---

1) समग्रामा.

1) करपाददतां.

एकं घ्नतं बहूनां च यथोक्ताद् द्विगुणा दमाः ।
कलहापहृतं देयं दण्डश्च द्विगुणस्ततः ॥ १९५ ॥

दुःखमुत्पादयेद्यस्तु स समुत्थानजं व्ययम् ।
दाप्यो दण्डश्च यो यस्मिन् कलहे समुदाहृतः ॥ १९६ ॥

अभिघाते तथा भेदे च्छेदे कुड्यावपातने ।
पणान् दाप्यः पञ्चदश विंशतिं तद्व्ययं तथा ॥ १९७ ॥

दुःखोत्पादि गृहे द्रव्यं क्षिपन् प्राणहरं तथा ।
षोडशाद्यः पणान् दाप्यो द्वितीयो मध्यमं दमम् ॥ १९८ ॥

दुःखे च शोणितोत्पादे शाखाङ्गच्छेदने तथा ।
दण्डे क्षुद्रपशूनां च द्विगुणप्रभृति क्रमात् ॥ १९९ ॥

लिङ्गस्य छेदने मृत्यौ मध्यमो मौल्यमेव च ।
महापशूनामेतेषु स्थानेषु द्विगुणो दमः ॥ २०० ॥

प्ररोहिशाखिनां शाखास्कन्धसर्वविदारणे ।
उपजीव्यद्रुमाणां च विंशतिर्द्विगुणो दमः ॥ २०१ ॥

चैत्यश्मशानसीमासु पुण्यस्थाने [1] शिवालये ।
जातद्रुमाणां द्विगुणो दमो वृक्षेऽथ विश्रुते ॥ २०२ ॥

गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधाम् ।
पूर्वस्मृतादर्धदण्डः स्थानेषूक्तेषु कर्तने ॥ २०३ ॥

सामान्यद्रव्यप्रसभहरणात् साहसं स्मृतम् ।
तन्मूल्याद् द्विगुणो दण्डो निह्नवे तु चतुर्गुणः ॥ २०४ ॥

यः साहसं कारयति स दाप्यो द्विगुणं दमम् ।
यश्चैवमुक्त्वाहं दाता कारये स चतुर्गुणम् ॥ २०५ ॥

अर्घ्याक्रोशातिक्रमकृद् भ्रातृभार्याप्रहारदः ।
सन्दिष्टस्याप्रदाता च समुद्रगृहभेदकृत् ॥ २०६ ॥

सामन्तकुलिकादीनामपकारस्य कारकः ।
पञ्चाशत्पणिको दण्ड एषामिति विनिश्चयः ॥ २०७ ॥

स्वच्छन्दविधवागामी विक्रुष्टेनाभिधावितः ।
अकारणेन विक्रोष्टा चण्डालश्चोत्तमां स्पृशन् ॥ २०८ ॥

शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः ।
अयुक्तं शपथं कुर्वन् अयोग्यो योग्यकर्मकृत् ॥ २०९ ॥

वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत् ।
साधारणस्यापलापी दासी गर्भविनाशकृत् ॥ २१० ॥

पितृपुत्रस्वसृभ्रातृदम्पत्याचार्यऋत्विजाम् ।
एषामपतितान्योन्यत्यागी च शतदण्डभाक् ॥ २११ ॥

वसानस्त्रीन् पणान् दण्ड्यो नेजकस्तु परांशुकम् ।
विक्रयावक्रयाधानयाचितेषु पणान् दश ॥ २१२ ॥

पितापुत्रविवादेषु साक्षिणस्त्रिगुणो दमः ।
अन्तरे च तयोर्यः स्यात् तस्याप्यष्टगुणो दमः ॥ २१३ ॥

तुलाशासनमानानां कूटकृन्नाणकस्य च ।
एभिश्च व्यवहर्ता यस्स दाप्यो दममुत्तमम् ॥ २१४ ॥

अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकम् ।
स नाणकपरीक्षी तु दाप्य उत्तमसाहसः ॥ २१५ ॥

भिषङ्मिथ्याचरन् दाप्यस्तिर्यक्षु प्रथमं दमम् ।
मानुषे मध्यमं राजमानुषे चोत्तमं दमम् ॥ २१६ ॥

अवध्यं यश्च बध्नाति वध्यं यश्च विमुञ्चति ।
अप्राप्तव्यवहारं च स प्राप्यो दममुत्तमम् ॥ २१७ ॥

मानेन तुलया वापि योंऽशमष्टममाहरेत् ।
दण्डं स द्विशतं दाप्यो वृद्धौ हानौ च कल्पितम् ॥ २१८ ॥

भेषजस्नेहलवणगन्धधान्यगुडादिषु ।
पण्येषु प्रक्षिपन् हीनं पणान् दाप्यश्च षोडश ॥ २१९ ॥

मृच्चर्ममणिसूत्रायःकाष्ठवल्कलवाससाम् ।
अजातौ जातिकरणे विक्रेयाष्टगुणो दमः ॥ २२० ॥

समुद्गपरिवर्तं च सारभाण्डं च कृत्रिमम् ।
आदानं विक्रयं वापि नयतो दण्डकल्पना ॥ २२१ ॥

भिन्ने पणे तु पञ्चाशत् पणे तु शतमुच्यते ।
द्विपणो द्विशतो दण्डो मूल्यवृद्धौ च वृद्धिमान् ॥ २२२ ॥

सम्भूय कुर्वतामर्थं साबाधं कारुशिल्पिनाम् ।
अर्थस्य ह्रासवृद्धिं वा जानतां दण्ड उत्तमः ॥ २२३ ॥

संभूय वणिजां पण्यमनर्घेणोपरुन्धताम् ।
विक्रीणतां वा विहितो दण्ड उत्तमसाहसः ॥ २२४ ॥

राज्ञा तु स्थापितो योऽर्घः प्रत्यहं तेन विक्रयः ।
क्रयो वा निस्रवस्तस्माद्वणिजां लाभकृन्मतः ॥ २२५ ॥

स्वदेशपण्ये तु शते वणिग्गृह्णीत पञ्चकम् ।
दशकं परदेशीये यस्सद्यः क्रयविक्रयी ॥ २२६ ॥

पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम् ।
अर्घोऽनुग्रहकृत् कार्यः क्रेतुर्विक्रेतुरेव च ॥ २२७ ॥

उपायैर्विविधैरेषां छलयित्वापकर्षणम् ।
सुप्तमत्तप्रमत्तेभ्यस्स्तेयमाहुर्मनीषिणः ॥ २२८ ॥

[1] सुरालये.

ग्राहकैर्गृह्यते चोरो लोप्त्रेणाथपणेन वा ।
पूर्वकर्मापराधी च तथा चाशुद्धवासकः ॥ २२९ ॥
अन्ये च शङ्कया ग्राह्या जातिनामादिनिह्नवैः ।
द्यूतस्त्रीपानसक्ताश्च शुष्कभिन्नमुखस्वराः ॥ २३० ॥
परद्रव्यगृहाणां च पृच्छका गूढचारिणः ।
निरायव्ययवन्तश्च विनष्टद्रव्यविक्रयाः ॥ २३१ ॥
गृहीतश्शङ्कया चौर्ये नात्मानं चेद्विशोधयेत् ।
दापयित्वा हृतं द्रव्यं चोरदण्डेन दण्डयेत् ॥ २३२ ॥
चोरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैः ।
सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत् ॥ २३३ ॥
1) घातितेऽपहृतो दोषो ग्रामभर्तुरनिर्गते ।
निवीतभर्तुस्तु पथि चारोद्धर्तुरवीतके ॥ २३४ ॥
स्वसीम्नि दद्याद् ग्राम्यस्तु [illegible] यत्र गच्छति ।
पञ्चग्रामी बहिः कोशाद् दशग्राम्यथवा पुनः ॥ २३५ ॥
बन्दिग्रहांस्तथा वाजिकुञ्जराणां च हारिणः ।
प्रसह्य घातिनश्चैव शूलमारोपयेन्नरान् ॥ २३६ ॥
उत्क्षेपकग्रन्थिभेदौ करसंदंशहीनकौ ।
कार्यौ द्वितीयापराधे करपादैकहीनकौ ॥ २३७ ॥
क्षुद्रमध्यमहाद्रव्यहरणे सारतो दमः ।
देशं कालं वयश्शक्तिः सञ्चिन्त्यं दण्डकर्मणि ॥ २३८ ॥
सुवर्णरजतादीनामुत्तमानां च वाससाम् ।
रत्नानां चैव सर्वेषां शतादप्यधिके वधः ॥ २३९ ॥
पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते ।
पुरुषाणां कुलीनानां नारीणां च विशेषतः ॥ २४० ॥
रत्नानां चैव सर्वेषां हरणे वधमर्हति ।
सन्धिं भित्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः ॥ २४१ ॥
तेषां छित्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत् ।
भक्तावकाशाग्न्युदकमन्त्रोपकरणव्ययात् ॥ २४२ ॥
दत्वा चोरस्य हन्तुर्वा जानतो दम उत्तमः ।
शस्त्रावपाते गर्भस्य पातने चोत्तमो दमः ॥ २४३ ॥
विप्रदुष्टां स्त्रियं चैव पुरुषघ्नीमगर्भिणीम् ।
सेतुभेदकरीं चाप्सु शिलां बध्वा प्रवेशयेत् ॥ २४४ ॥
विषाग्निदां पतिगुरुनिजापत्यप्रमापणीम् ।
विकर्णकरनासोष्ठीं कृत्वा गोभिः प्रमापयेत् ॥ २४५ ॥

क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः ।
राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना ॥ २४६ ॥
पुमान् संग्रहणे ग्राह्यः केशाकेशिपरस्त्रियाः ।
सद्यो वा कामजैश्चिह्नैः प्रतिपत्तौ द्वयोस्तथा ॥ २४७ ॥
नीवीस्तनप्रावरणसक्थिकेशावमर्शनम् ।
आदेशः कालसंभाषं सहैकस्थानमेवच ॥ २४८ ॥
स्त्री निषेधे शतं दद्यात् द्विशतं तु दमं पुमान् ।
प्रतिषेधे तयोर्दण्डो यथा संग्रहणे तथा ॥ २४९ ॥
सजाता उत्तमा दण्डा अनुलोमे तु मध्यमाः ।
प्रातिलोम्ये वधः पुंसां नार्याः कर्णादिकर्तनम् ॥ २५० ॥
अलंकृतां हरन् कन्यामुत्तमं त्वन्यथा दमम् ।
दण्डं दद्यात् सवर्णासु प्रतिलोमे वधः स्मृतः ॥ २५१ ॥
दूषणे तु करच्छेद उत्तमाया वधस्तथा ।
पशून् गच्छन् शतं दाप्यो हीनां स्त्रीं गां च मध्यमः ॥ २५२ ॥
अवरुद्धासु दासीषु भुजिष्यासु तथैव च ।
गम्यास्वपि पुमान् दाप्यः पञ्चाशत्पणकं दमम् ॥ २५३ ॥
अन्त्याभिगमने त्वङ्क्यः कुबन्धेन प्रवासयेत् ।
शूद्रस्तथान्त्य एव स्यादन्त्यस्यार्यागमे वधः ॥ २५४ ॥
राज्ञोऽनिष्टप्रवक्तारं तस्यैवाक्रोशकारकम् ।
तन्मन्त्रस्य च भेत्तारं छित्वा जिह्वां प्रवासयेत् ॥ २५५ ॥
ऊनं वाप्यधिकं वापि लिखितो राजशासनम् ।
पारदारिकचोरं वा मुञ्चतो दण्ड उत्तमः ॥ २५६ ॥
अभक्ष्येण द्विजं दूष्य दण्ड्य उत्तमसाहसः ।
मध्यमं क्षत्रियं वैश्यं प्रथमं शूद्रमर्धिकम् ॥ २५७ ॥
कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी ।
अङ्गहीनस्तु कर्तव्यो दाप्यश्चोत्तमसाहसः ॥ २५८ ॥
चतुष्पादे कृतो दोषो नापैतीह प्रजल्पतः ।
काष्ठलोष्टेषुपाषाणबाहुयुग्मकृतस्तथा ॥ २५९ ॥
छिन्ननस्येन यानेन तथा भग्नयुगादिना ।
पश्चाच्चैवापसरता हिंसने स्वाम्यदोषभाक् ॥ २६० ॥
शक्तोऽप्यमोक्षयन् स्वमी दंष्ट्रिणां शृङ्गिणां तथा ।
प्रथमं साहसं दद्याद्विक्रुष्टे द्विगुणं तथा ॥ २६१ ॥
जारं चोरेत्यभिवदन् दाप्यः पञ्चशतं दमम् ।
उपजीव्य धनं मुञ्चन् तदेवाष्टगुणीकृतम् ॥ २६२ ॥

1) पूरितेऽपहृते.

मृताङ्गलम्बविक्रेतुर्गुरोस्ताडयितुस्तथा ।
राजयानासनारोढुर्दण्ड उत्तमसाहसः ॥ २६३ ॥
द्विनेत्रभेदिनो राजद्विष्ट्रादेशकृतस्तथा ।
विप्रत्वेन च शूद्रस्य जीवतोऽष्टादशो दमः ॥ २६४ ॥
अदृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान्नृपेण तु ।
सभ्यास्यजयिनो दण्ड्या विवादाद् द्विगुणं दमम् ॥ २६५ ॥
यो मन्येताजितोऽस्मीति न्यायेनापि पराजितः ।
तमायान्तं पुनर्जित्वा दापयेद् द्विगुणं दमम् ॥ २६६ ॥
राज्ञा न्यायेन यो दण्ड्यो गृहीतो [1] तरुणीयुतम् ।
विवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद् गुणीकृतम् ॥ २६७ ॥

व्यवहारपदान्येवं संप्रोक्तानि यथास्मृति ।
एवं शास्त्रविनिर्दिष्टान् व्यवहारान् प्रवर्तयन् ॥ २६८ ॥
अतिष्ठद्भद्रभूपालो नयन्नाज्ञावशं भुवम् ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारण
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदीबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातत्त्वसारभूते
श्रीशिवतत्त्वरत्नाकरे अष्टमकल्लोले
व्यवहारपदनिरूपणं नाम प्रथमस्तरङ्गः

[1] वरुणायतम्.

अथ द्वितीयस्तरंगः

गुरो! यस्सम्प्रति प्रोक्तो व्यवहारपदक्रमः ।
स श्रुतो मामके चित्ते नियतं परिवर्तते ॥ १ ॥
अन्यद् भद्रमहीपालचरित्रं श्रोतुमीहितम् ।
तद् ब्रूहि विदिताशेषविशेषकरुणानिधे ॥ २ ॥
पुत्र! ते संप्रवक्ष्यामि चरित्रं तस्य संशृणु ।
एवमस्मिन् वहोः कालादवति क्षितिमण्डलम् ॥ ३ ॥
पूर्वस्यां दिशि सामन्ते राज्याक्रमणकांक्षिणि ।
सीमोपान्तस्थितान् दुर्गप्राकारान् प्रतिरुन्धति ॥ ४ ॥
सेनाप्रधानमुखतस्तं जित्वाऽयं न्यवर्तयत् ।
द्विजवच्चैव सन्तुष्येत् स्वतः प्राप्तेन भूपतिः ॥ ५ ॥
इति नीत्या शात्रवीयराज्याक्रमणकांक्षया ।
निर्गत्य षड्विधैस्साकं बलैराक्रम्य चाभितः ॥ ६ ॥
भस्मशून्यमुखानेष प्राकारान् सहसाग्रहीत् ।
ततः शौर्यस्थितांश्चापि शौर्यतः परिकल्पयन् ॥ ७ ॥
ततश्चोत्तरसामन्ते कण्टकत्वमुपेयुषि ।
स्थानमाक्रम्य शरणागतायास्मै यथापुरम् ॥ ८ ॥

भ्रष्टराज्याय तत् स्थानमदिशत् कीर्त्तिवृद्धये ।
स्वस्थानक्रमणक्लेशप्रतीकारचिकीर्षया ॥ ९ ॥
विजयाख्यपुरस्थायी म्लेच्छानामधिनायकः ।
आनीतस्सहसा तेन साहाय्यकविधौ युधि ॥ १० ॥
भद्रभूपो न चास्माभिर्विजेतुं शक्यते युधि ।
इत्यालोच्यामुना सन्धिं विधाय स्वपुरं ययौ ॥ ११ ॥
अनन्तरं भद्रभूपस्तीर्थराजपुरस्थले ।
दानं हिरण्यगर्भाख्यमकरोदीशतुष्टये ॥ १२ ॥
ततश्शरावतीतीरे रामचन्द्रपुरस्थले ।
तुलापुरुषदानं स सौवर्णं समकल्पयत् ॥ १३ ॥
पितृनाम्नाग्रहारं च शिवरामपुराभिधम् ।
भुवं विसृज्य विपुलां विशेषेण व्यवर्धयत् ॥ १४ ॥
पितृव्यनाम्नाप्यकरोद्वेंकटापुरनामकम् ।
स्वनाम्नाप्यकरोद्रम्यं भद्रराजपुराह्वयम् ॥ १५ ॥
उडुपक्षेत्रकृष्णस्य सुब्रह्मण्ये गुहस्य च ।
कोटीश्वरेशितुः श्रीशङ्करनारायणस्य च ॥ १६ ॥

इष्टदैवतमूकाम्बानाम्न्याश्शक्त्या महेशितुः ।
देवानामेतदादीनामभिवर्ध्य च पूजनम् ॥ १७ ॥
भूरुद्राणां मठान् कृत्वा तेभ्यः क्षेत्राणि चादिशत् ।
एवं धर्मेण वसुधां वहोः कालात् प्रपालयन् ॥ १८ ॥
स्वानुजं प्रौढवयसं राज्यधूर्वहनक्षमम् ।
सोमशेखरनामानं मनसा सम्प्रधारयन् ॥ १९ ॥
सविशेषं धनुर्विद्यामुपदिश्य सविस्तरम् ।
तस्मिन् राज्यं निचिक्षेप दक्षे भद्रमहीपतिः ॥ २० ॥
विद्यामाख्याय विदितामुपदेष्टुं विशिष्यताम् ।
जिज्ञासुरिव सान्निध्यं परमस्य गुरोरगात् ॥ २१ ॥
योपदिष्टा धनुर्विद्या तां तुभ्यं वर्णयाम्यहम् ।
एकोऽपि यत्र नगरे प्रसिद्धः स्याद्धनुर्धरः ॥ २२ ॥
ततो यान्त्यरयो दूरं मृगास्सिंहगृहादिव ।
आचार्येण धनुर्देयं ब्राह्मणे सुपरीक्षिते ॥ २३ ॥
लुब्धे धूर्ते कृतघ्ने च मन्दबुद्धौ न दीयते ।
ब्राह्मणाय धनुर्देयं खड्गं वै क्षत्रियाय च ॥ २४ ॥
वैश्याय दापयेत् कुन्तं गदां शूद्राय दापयेत् ।
धनुश्चक्रं च कुन्तं च खड्गं च छुरिका गदा ॥ २५ ॥
सप्तमं बाहुयुद्धं चेत्येवं युद्धानि सप्तधा ।
आचार्यस्सप्तयुद्धस्स्याच्चतुर्युद्धस्तु भार्गवः ॥ २६ ॥
द्वाभ्यां चैव भवेद्योद्धा [1] नैकेन गुणको भवेत् ।
[2] सर्पः पुनर्वसुः पुष्यं रोहिणी चोत्तरात्रयम् ॥ २७ ॥
अनूराधाश्विनी चैव रेवती दशमी तथा ।
तृतीया पञ्चमी चैव सप्तमी दशमी तथा ॥ २८ ॥
त्रयोदशी द्वादशी च तिथयस्स्युस्समा [3] हिताः ।
सूर्यवारश्शुक्रवारो गुरुवारस्तथैव च ॥ २९ ॥
एतद्वारत्रयं शस्तं प्रारम्भे शस्त्रकर्मणि ।
एभिर्दिनैस्तु शिष्याय गुरुश्शस्त्राणि दापयेत् ॥ ३० ॥
सन्तर्प्य होमदानाभ्यां सुरान् वेदविधानतः ।
ब्राह्मणान् भोजयेत्तत्र कुमारीश्चाप्यनेकधा ॥ ३१ ॥
तापसानर्चयेद्भक्त्या ये चान्ये शिवयोगिनः ।
गन्धमाल्यैर्भूषणाद्यैर्गुरुं तत्रैव पूजयेत् ॥ ३२ ॥
कृतोपवासश्शिष्यस्तु धौतवस्त्रपरिग्रहः ।
बद्धाञ्जलिपुटस्तत्र याचयेद् गुरुतो धनुः ॥ ३३ ॥

[1] ह्येकेन. [2] हस्तः [3] मताः

शिष्याय दद्याच्चापं स धनुर्मन्त्राभिमन्त्रितम् ।
प्रथमं पुष्पवेधं च फलहीनेन पत्रिणा ॥ ३४ ॥
ततः फलयुतेनैव [1] मत्स्यवेधं च कारयेत् ।
मांसवेधं ततः कुर्यादिवं वेधो भवेत्त्रिधा ॥ ३५ ॥
एभिर्वेधैः कृतैः पुंसां शरास्स्युस्सर्वसाधकाः ।
वेधने चैव मांसादेश्शरपातो यदा भवेत् ॥ ३६ ॥
पूर्वदिग्भागमाश्रित्य तदा स्याद्विजयी सुखी ।
दक्षिणे कलहो घोरो विदेशगमनं पुनः ॥ ३७ ॥
पश्चिमे धनधान्यं च सर्वं चैवोत्तरे शुभम् ।
ऐशान्यां पतनं दुष्टं विदिशोऽन्याश्च शोभनाः ॥ ३८ ॥
एवं वेधत्रयं कुर्वन् शंखदुन्दुभिनिस्वनैः ।
ततः प्रणम्य गुरवे धनुर्बाणान्निवेदयेत् ॥ ३९ ॥
वरः प्राणाधिको धन्वी नतु प्राणाधिकं धनुः ।
धनुषा पीड्यमानस्तु धन्वी लक्ष्यं न पश्यति ॥ ४० ॥
ततो निजबलान्न्यूनं चापं स्याच्छुभदं नृणाम् ।
देवानामुत्तमं चापं ततो न्यूनं च मानुषम् ॥ ४१ ॥
सार्धपञ्चकहस्तं तु श्रेष्ठं चापं प्रकीर्तितम् ।
तद् विज्ञेयं धनुर्दिव्यं शङ्करेण धृतं पुरा ॥ ४२ ॥
तस्मात् परशुरामेण ततो द्रोणेन धरितम् ।
द्रोणाद् गृहीतं पार्थेन ततस्सात्यकिना धृतम् ॥ ४३ ॥
चतुर्विंशांगुलो हस्तश्चतुर्हस्तं धनुस्स्मृतम् ।
तद्भवेन्मानवं चापं सर्वलक्षणसंयुतम् ॥ ४४ ॥
त्रिपर्वं पञ्चपर्वाथ सप्तपर्वसमन्वितम् ।
नवपर्वं तु कोदण्डं चतुर्धा शुभकारकम् ॥ ४५ ॥
चतुः पर्वं च षट्पर्वं साष्टपर्वं च वर्जयेत् ।
अपक्वमतिजीर्णं च जातिघृष्टं तथैव च ॥ ४६ ॥
दग्धं छिद्रं न कर्तव्यं बाह्याभ्यन्तरहस्तकम् ।
गुणहीनं घुणाक्रान्तं काण्डदोषसमन्वितम् ॥ ४७ ॥
गलग्रन्थि न कर्तव्यं [2] तलग्रन्थि तथैव च ।
अपक्वं भङ्गमायाति बहुजीर्णं तु कर्कशम् ॥ ४८ ॥
जातिघृष्टं च सोद्वेगं कलहो बान्धवैस्सह ।
दग्धेन दह्यते वेश्म छिद्राद् युद्धविनाशनम् ॥ ४९ ॥
बाह्यैर्लक्ष्यं न लभ्येत तथैवाभ्यन्तरे तथा ।
हीनं तु संहिते वाणे संग्रामे भङ्गकारकम् ॥ ५० ॥

[1] मत्स्यं. [2] तदग्रन्थि.

आक्रान्ते तु पुनः क्वापि न लक्ष्यं प्राप्यते दृढम् ।
गलग्रन्थि तलग्रन्थि धनहानिकरं धनुः ॥ ५१ ॥
एभिर्दोषैर्विनिर्मुक्तं सर्वकार्यकरं स्मृतम् ।
शार्ङ्गं पुनर्धनुर्दिव्यं विष्णोः परममायुधम् ॥ ५२ ॥
वितस्तिसप्तकोन्मानं निर्मितं विश्वकर्मणा ।
पौरुषेयं तु तच्छार्ङ्गं बहुवत्सरशोषितम् ॥ ५३ ॥
वितस्तिभिस्सार्धषड्भिर्मितं सर्वार्थसाधनम् ।
प्रायो योग्यं धनुश्शार्ङ्गं गजारोहाश्वसादिनाम् ॥ ५४ ॥
रथिकानां पदातीनां वांशश्चापः प्रकीर्तितः ।
गुणानां लक्षणं वक्ष्ये यादृशं कारयेद् गुणम् ॥ ५५ ॥
पट्टसूत्रैर्गुणः कार्यः कनिष्ठामानसंयुतः ।
सुप्रमाणश्च निस्सन्धिश्शुद्धैस्त्रिगुणतन्तुभिः ॥ ५६ ॥
वर्तितस्स्याद् गुणश्लक्ष्णस्सर्वकर्मसहो युधि ।
अभावे पट्टसूत्रस्य हरिणीस्नायुरुच्यते ॥ ५७ ॥
गुणार्थमथवा ग्राह्यास्स्नायवो महिषीगवाम् ।
पक्ववंशत्वचः कार्यो गुणस्त्वव्रणको दृढः ॥ ५८ ॥
पट्टसूत्रेण सन्नद्धस्सर्वकर्मसहो युधि ।
प्राप्ते भाद्रपदे मासि त्वगर्कस्य प्रशस्यते ॥ ५९ ॥
तस्यास्तदा गुणः कार्यः पवित्रः प्रवरो दृढः ।
[1]वृतार्कसूत्रतन्तूनां हस्तास्त्वष्टादश स्मृताः ॥ ६० ॥
तद्वृत्तं त्रिगुणं कार्यं प्रमाणोऽयं गुणे स्मृतः ।
अतः परं प्रवक्ष्यामि शराणां लक्षणं शुभम् ॥ ६१ ॥
न स्थूलं नातिसूक्ष्मं च नापक्वं न कुभूमिजम् ।
हीनग्रन्थि विदीर्णं च वर्जयेदीदृशं शरम् ॥ ६२ ॥
पूर्णग्रन्थि सुपक्वं च पाण्डरं समयाहृतम् ।
कठिनं वर्तुलं काण्डं गृह्णीयात् सुप्रदेशजम् ॥ ६३ ॥
द्वौ हस्तौ मुष्टिहीनौ च दैर्घ्ये स्थौल्ये कनिष्ठिका ।
विधेया शरमानेषु यन्त्रेष्वाकर्षयेत्ततः ॥ ६४ ॥
कङ्कहंसबकादीनां मत्स्यादक्रौञ्चकेकिनाम् ।
गृध्राणां कुररा‍णां च पक्षा एते मनोहराः ॥ ६५ ॥
एकैकस्य शरस्यापि चतुःपक्षाणि योजयेत् ।
षडंगुलप्रमाणेन पक्षच्छेदं तु कारयेत् ॥ ६६ ॥
दशांगुलमिताः पक्षाश्शार्ङ्गचापस्य मार्गणे ।
योज्या दृढाश्चतुस्संङ्ख्यास्सन्नद्धास्स्नायुतन्तुभिः ॥ ६७ ॥

शराश्च त्रिविधा ज्ञेया स्त्री पुमांश्च नपुंसकः ।
अग्रे स्थूला भवेन्नारी पश्चात् स्थूलो भवेत् पुमान् ॥ ६८ ॥
समं नपुंसकं ज्ञेयं तल्लक्ष्यार्थं प्रशस्यते ।
दूरापातं युवत्या च पुरुषो भेदयेद् दृढम् ॥ ६९ ॥
फलं तु शुद्धलोहस्य सुधारं तीक्ष्णमक्षतम् ।
योजयेद्वज्रलेपेन शरे पक्षानुमानतः ॥ ७० ॥
आरामुखं क्षुरप्रं च गोपुच्छं चार्धचन्द्रकम् ।
सूचीमुखं च भल्लं च वत्सदन्तं द्विवल्लकम् ॥ ७१ ॥
कर्णिकं काकतुण्डं च तथान्यान्यप्यनेकशः ।
फलानि देशे देशे च भवन्ति बहुरूपतः ॥ ७२ ॥
आरामुखेन वै चर्म क्षुरप्रेण च कार्मुकम् ।
सूचीमुखेन कवचमर्धचन्द्रेण मस्तकम् ॥ ७३ ॥
भल्लेन हृदयं वेध्यं द्विभल्लेन गुणश्शरः ।
लोहं च काकतुण्डेन लक्ष्यं गोपुच्छकेन च ॥ ७४ ॥
फलस्य पायनं वक्ष्ये दिव्यौषधिविलेपनैः ।
येन दुर्भेद्यवर्माणि भेदयेत्तरुपर्णवत् ॥ ७५ ॥
पिप्पलीसैन्धवं कुष्ठं गोमूत्रेण तु पेषयेत् ।
ततो निर्वापितं तैले लोहं तत्र प्रशस्यते ॥ ७६ ॥
पञ्चभिर्लवणैः पिष्टैर्मधुसिक्थैस्ससर्षपैः ।
एभिः प्रलेपयेच्छस्त्रं लिप्तं चाग्नौ प्रतापयेत् ॥ ७७ ॥
शिखिग्रीवानुवर्णाभं तप्तपीतं तदौषधम् ।
ततस्तु विमलं तोयं पाययेच्छस्त्रमुत्तमम् ॥ ७८ ॥
सर्वलोहास्तु ये बाणा नाराचास्ते प्रकीर्त्तिताः ।
पञ्चभिः पृथुलैः पक्षैर्युक्ताःसिद्ध्यन्ति कस्यचित् ॥ ७९ ॥
नालीकाल्लघवो बाणा नलयन्त्रेण चोदिताः ।
अत्युच्चदूरपातेषु दुर्गयुद्धेषु ते मताः ॥ ८० ॥
स्थानान्यष्टौ विधेयानि योजने भिन्नकर्मणाम् ।
मुष्टयः पञ्चसङ्ख्याता व्यायाः पञ्च प्रकीर्त्तिताः ॥ ८१ ॥
अग्रतो वामपादं च दक्षिणं जानुकुञ्चितम् ।
आलीढं तु प्रकर्तव्यं हस्तद्वयसविस्तरम् ॥ ८२ ॥
प्रत्यालीढे तु कर्तव्यं सव्यं वै जानुकुञ्चितम् ।
दक्षिणं च पुरस्तद्वद्दूरपाते विशिष्यते ॥ ८३ ॥
पादौ सविस्तरौ कार्यौ समौ हस्तप्रमाणतः ।
विशाखस्थानकं ज्ञेयं कूटलक्ष्यस्य वेधने ॥ ८४ ॥

1) घृतार्क.

समपादे समौ पादौ निष्कम्पौ च समं गतौ ।
असमे च पुरो वामो [1] हस्तमात्रेण तद्वपुः ॥ ८५ ॥

आकुञ्चितौ भुजौ यत्र जानुभ्यां धरणिं गतौ ।
दर्दुरक्रममित्याहुस्स्थानकं दृढभेदने ॥ ७६ ॥

सव्यं जानुं स्थितं भूमौ दक्षिणं च सकुञ्चितम् ।
अग्रतो यत्र दातव्यं तं विद्याद् गरुडक्रमम् ॥ ८७ ॥

पद्मासनं सुप्रसिद्धमुपविश्य यथाक्रमम् ।
धन्विना तत्तु विज्ञेयं स्थानकं शुभलक्षणम् ॥ ८८ ॥

पताका वज्रमुष्टिश्च सिंहकर्णी तथैव च ।
मुत्सरी काकतुण्डी च योजनीया यथाक्रमम् ॥ ८९ ॥

दीर्घा तु तर्जनी यत्र चाश्रितांगुष्ठमूलकम् ।
पताका सा तु विज्ञेया नलिका दूरमोक्षिणी ॥ ९० ॥

तर्जनीमध्यमामध्यमंगुष्ठो विशते यदि ।
वज्रमुष्टिस्तु सा ज्ञेया स्थूलनाराचमोक्षणे ॥ ९१ ॥

अङ्गुष्ठपीडितं कुर्यात् तर्जनीनखरं तले ।
अङ्गुलीत्रितयं स्थाप्य मुष्टिः स्यात् सिंहकर्णिका ॥ ९२ ॥

अङ्गुष्ठनखमूले तु तर्जन्यग्रं सुसंस्थितम् ।
मुच्चटी सा तु विज्ञेया चित्रलक्ष्यस्य वेधने ॥ ९३ ॥

अङ्गुष्ठाग्रे तु तर्जन्या मुखं यत्र निवेशितम् ।
काकतुण्डी तु सा ज्ञेया सूक्ष्मलक्ष्येषु योजिता ॥ ९४ ॥

सन्धानं त्रिविधं प्रोक्तमधऊर्ध्वं समं तथा ।
योजयेत्त्रिप्रकारं च कार्येष्वपि यथाक्रमम् ॥ ९५ ॥

अधस्सुदूरपातित्वं समे लक्ष्ये सुनिश्चलम् ।
दृढास्फोटं प्रकुर्वीत चोर्ध्वसन्धानयोगतः ॥ ९६ ॥

कैशिकः केशमूले च शिरश्शृङ्गे च सात्विकः ।
श्रवणे वत्सकर्णश्च ग्रीवायां भरतो भवेत् ॥ ९७ ॥

अंशके स्कन्धवामा च व्यायाः पञ्च प्रकीर्त्तिता ।
कैशिकश्चित्रयुद्धेषु त्वधोलक्ष्येषु सात्विकः ॥ ९८ ॥

वत्सकर्णश्च भरतो विज्ञेयो दृढभेदने ।
दृढभेदे च दूरे च स्कन्धनामा प्रकीर्तितः ॥ ९९ ॥

आत्मानं सुस्थिरं कृत्वा लक्ष्यं चैव स्थिरं बुधः ।
वेधयेदवधानेन स्थिरवेधस्स उच्यते ॥ १०० ॥

चलं तु वेधयेद्यस्तु चात्मना स्थिरसंस्थितः ।
चललक्ष्यं तु तत्प्रोक्तमाचार्येण सुधीमता ॥ १०१ ॥

धन्वी तु चलते यत्र स्थिरलक्ष्ये समाहितः ।
चलाचलं भवेत्तत्र ह्यप्रमेयमनिन्दितम् ॥ १०२ ॥

उभावेव चलौ यत्र लक्ष्यं चापि धनुर्धरः ।
एतच्च द्विचलं ज्ञेयं श्रमेणैवहि साध्यते ॥ १०३ ॥

श्रमेणास्खलितं लक्ष्यं दूरं च बहुभेदनम् ।
श्रमेण कठिना कुष्टिश्शीघ्रं सन्धानमाप्यते ॥ १०४ ॥

श्रमेण चित्रयोधित्वं श्रमेण प्राप्यते जयः ।
तस्माद् गुरुसमक्षं हि श्रमः कार्यो विजानता ॥ १०५ ॥

प्रथमं वामहस्तेन यः श्रमं कुरुते नरः ।
तस्य चापि क्रियासिद्धिरचिरादेव जायते ॥ १०६ ॥

वामहस्ते तु संसिद्धः पश्चाद् दक्षिणभाग्भवेत् ।
उभाभ्यां च श्रमं कुर्यान्नाराचैश्च शरैस्तथा ॥ १०७ ॥

वामेनैव श्रमं कुर्यात् सुसिद्धे दक्षिणे करे ।
विशिखे चासने चैव तथा व्याये च कैशिके ॥ १०८ ॥

उदिते भास्करे लक्ष्यं पश्चिमायां निवेशयेत् ।
अपराह्णे तु कर्तव्यं लक्ष्यं पूर्वदिगाश्रितम् ॥ १०९ ॥

उत्तरेण सदा कार्यं प्रशस्यमविरोधकम् ।
सङ्ग्रामेण विना कार्यं न लक्ष्यं दक्षिणामुखम् ॥ ११० ॥

षष्टिधन्वन्तरे लक्ष्यं श्रेष्ठं लक्ष्यं प्रकीर्तितम् ।
चत्वारिंशन्मध्यमं च विंशतिश्च कनिष्ठकम् ॥ १११ ॥

लक्ष्यं च पुरुषोन्मानं कुर्याच्चन्द्रकसंयुतम् ।
ऊर्ध्ववेधी भवेज्ज्येष्ठो नाभिवेधी च मध्यमः ॥ ११२ ॥

यः पादवेधी लक्ष्यस्य स कनिष्ठो मतो मम ।
क्रियाकलापान् वक्ष्यामि श्रमसाध्यान् धनुष्मताम् ॥ ११३ ॥

येषां विज्ञानमात्रेण सिद्धिर्भवति नान्यथा ।
प्रथमं चापमारोप्य चूलिकां बन्धयेत्ततः ॥ ११४ ॥

स्थानकं तु ततः कृत्वा बाणोपरि करं न्यसेत् ।
तोलनं धनुषश्चैव कर्तव्यं वामपाणिना ॥ ११५ ॥

आदानं च ततः कृत्वा सन्धानं च ततः परम् ।
सकृदाकृष्टचापेन भूमिवेधं च कारयेत् ॥ ११६ ॥

नमस्कुर्याच्छित्रं विघ्नराजं गुरुधनुश्शरान् ।
याचितव्या गुरोराज्ञा बाणस्याकर्षणं प्रति ॥ ११७ ॥

प्राणवायुं प्रयत्नेन बाणेन सह पूरयेत् ।
कुन्तकेन स्थिरं कृत्वा हुंकारेण विसर्जयेत् ॥ ११८ ॥

---

[1] हस्तमात्रे नतं वपुः,

इत्यभ्यासक्रिया कार्या धन्विना सिद्धिमिच्छता ।
षण्मासाद् बध्यते मुष्टिश्शरास्संवत्सरेणतु ॥ ११९ ॥
नाराचास्तस्य सिद्ध्यन्ति यस्य तुष्टो महेश्वरः ।
पुष्पवद्धारयेद् वाणं सर्पवत्पीडयेद्धनुः ॥ १२० ॥
1) धनुषश्चिन्तयेल्लक्ष्यं यदीच्छेत् सिद्धिमात्मनः ।
क्रियामिच्छन्ति चाचार्या दूरमिच्छन्ति भार्गवाः ॥ १२१ ॥
राजानो दृढमिच्छन्ति लक्ष्यमिच्छन्ति चेतरे ।
जनानां रञ्जनं येन लक्ष्यभूतात्प्रजायते ॥ १२२ ॥
हीनेनापीषुणा तस्मात् प्रशस्तं लक्ष्यवेधनम् ।
विशाखस्थानके स्थित्वा समसन्धानमाचरेत् ॥ १२३ ॥
गोपुच्छमुखवाणेन सिंहकर्णाख्यमुष्टिना ।
आकर्षेत् कैशिकव्यायें न शिखां चालयेत्ततः ॥ १२४ ॥
पूर्वापरौ समौ कार्यौ समांसौ निश्चलौ करौ ।
चक्षुषी स्पन्दयन्नैव दृष्टिं लक्ष्ये निवेशयेत् ॥ १२५ ॥
मुष्टिना छादितं लक्ष्यं शरस्याग्रे नियोजयेत् ।
मनो दृष्टिगतं कृत्वा ततः काण्डं विसर्जयेत् ॥ १२६ ॥
स्खलत्येवं कदाचिन्न लक्ष्ये यो यो जितश्रमः ।
आदानं चैव तूणीरात् सन्धानं कर्षणं तथा ॥ १२७ ॥
क्षेपणं च त्वरायुक्तो वाणस्य कुरुते च यः ।
नित्याभ्यासवशात्तस्य शीघ्रसन्धानता भवेत् ॥ १२८ ॥
स्कन्धव्यायेन वर्ज्यस्य मुष्ट्या पुंसा गुणेन च ।
अत्यन्तसौष्ठवाद्बाहोर्जायते दृढभेदिता ॥ १२९ ॥
प्रत्यालीढे कृते स्थानेऽप्यधस्सन्धानमाचरेत् ।
मुष्ट्या पताकया वाणं स्त्रीचिह्नं दूरपातनम् ॥ १३० ॥
सूचीमुखा मीनपुच्छा भ्रमकारी तृतीयका ।
शराणां गतयस्तिस्रः प्रशस्ताः कथिता बुधैः ॥ १३१ ॥
सूचीमुखा गतिस्तस्य सायकस्य प्रजायते ।
पत्रं विलोकितं यस्य हीनपत्रमथापि वा ॥ १३२ ॥
कर्कशेन तु चापेन यः कृष्टोहीनमुष्टिना ।
मत्स्यपुच्छा गतिस्तस्य सायकस्य प्रकीर्तिता ॥ १३३ ॥
भ्रमरी कथिता ह्येषा सद्भिस्तु भ्रमकर्मणि ।
गुरुत्वेन विना याति क्षिप्यमाणस्तु सायकः ॥ १३४ ॥
वामगा दक्षगाश्चैवमधोगाश्चोर्ध्वगास्तथा ।
चतस्रो गतयः प्रोक्ता वाणस्खलनहेतवः ॥ १३५ ॥

1) धनवश्चिन्तयेल्लक्ष्यं.

कम्पते गुणमुष्टिश्च मार्गणस्य हि पृष्ठतः ।
सम्मुखी स्याद्धनुर्मुष्टिस्तस्य वामे गतिर्भवेत् ॥ १३६ ॥
ग्रहणं शिथिलं यस्य ऋजुत्वेन च वर्जितम् ।
पार्श्वे तु दक्षिणं याति सायकोऽस्य न संशयः ॥ १३७ ॥
ऊर्ध्वं भवेच्चापमुष्टिर्गुणमुष्टिरधो भवेत् ।
संमुक्तो मार्गणो लक्ष्यादूर्ध्वं याति न संशयः ॥ १३८ ॥
मोक्षणे चैव वाणस्य चापमुष्टिरधो भवेत् ।
गुणमुष्टिर्भवेदूर्ध्वं तथाधोगामिनी गतिः ॥ १३९ ॥
लक्ष्यवाणाग्रदृष्टीनां सङ्गतिस्तु यदा भवेत् ।
तदानीमुज्झितो वाणो लक्ष्यं न स्खलति ध्रुवम् ॥ १४० ॥
स्वाकृष्टस्तूज्झितो यस्तु स शुद्धो गाढमुज्झितः ।
नरनागाश्वकायेषु न स तिष्ठति मार्गणः ॥ १४१ ॥
वाणास्तृणसमा यस्य यस्येन्धनसमं धनुः ।
यस्य प्राणसमा मौर्वी स धन्वी धन्विनां वरः ॥ १४२ ॥
अयश्चर्म घटश्चैव मृत्पिण्डं च चतुष्टयम् ।
योऽभिस्तिरहितस्येषुर्वज्रेणापि न धार्यते ॥ १४३ ॥
अर्धाङ्गुलप्रमाणेन लोहपत्राणि कारयेत् ।
तानि भित्त्वैकवाणेन 1) दृढघाती भवेन्नरः ॥ १४४ ॥
चतुर्विंशति2) चर्माणि यो भिनत्तीषुणा नरः ।
तस्य वाणो गजेन्द्रस्य कायं निर्भिद्य गच्छति ॥ १४५ ॥
भ्राम्यन् जलघटो वेध्यश्चक्रे मृत्पिण्डकं तथा ।
भ्रमन्तं वेधयेद्यो हि दृढवेधी स उच्यते ॥ १४६ ॥
अयस्तु काकतुण्डेन चर्म चारमुखेन तु ।
मृत्पिण्डं च घटं चैव विध्येत् सूचीमुखेन हि ॥ १४७ ॥
वाणभङ्गं करावर्तं काष्ठवेधनमेव च ।
विन्दुकं गोलकयुगं यो वेत्ति स जयी भवेत् ॥ १४८ ॥
लक्ष्यस्थाने धृतं काण्डं सम्मुखं भेदयेत् ततः ।
तिर्यङ्मुष्टिं विधाय स्वां तिर्यग्विवलितेषुणा ॥ १४९ ॥
सम्मुखं वा समायान्तं तिर्यग्वायान्तमम्बरे ।
शरान् शरेण यश्छिन्द्याद् वाणभेदी स जायते ॥ १५० ॥
काष्ठे स्वकेशं संयम्य यस्त्ववबध्वा वराटिकाम् ।
हस्तेन भ्राम्यमाणां च यो हन्ति स धनुर्धरः ॥ १५१ ॥
लक्ष्यस्थाने न्यसेत् काष्ठं सार्द्रं गोपुच्छसन्निभम् ।
यश्छिन्द्यात् तत् क्षुरप्रेण काष्ठच्छेदी स जायते ॥ १५२ ॥

1) दृढगात्री. 2) चार्घाणि.

लक्ष्यदेशे न्यसेच्छुभ्रविन्दुं वन्धूकपुष्पवत् ।
हन्ति तं विन्दुकं यस्तु चित्रवेधी स जायते ॥ १५३ ॥

काष्ठगोलयुगं क्षिप्तं दूरमूर्ध्वं पुरः स्थितैः ।
असंप्राप्तं धरापृष्ठे तद्गोपुच्छमुखेन हि ॥ १५४ ॥

यो हन्ति शरयुग्मेन शीघ्रं सन्धानयोगतः ।
स स्याद्धनुर्भृतां श्रेष्ठः पूजितस्सर्वपार्थिवैः ॥ १५५ ॥

लक्ष्यस्थाने न्यसेत् कांस्यपात्रं हस्तद्वयान्तरे ।
ताडयेच्छर्कराभिस्तच्छब्दस्संजायते यथा ॥ १५६ ॥

यत्रैवोत्पद्यते शब्दस्तं सम्यक् तत्र चिन्तयेत् ।
कर्णेन्द्रियमनोयोगाल्लक्ष्यं निर्धारणं नयेत् ॥ १५७ ॥

पुनश्शर्करया तच्च ताडयेच्छब्दहेतवे ।
ततः किञ्चित्कृतं दूरं नित्यं नित्यं विधानतः ॥ १५८ ॥

लक्ष्यं समभ्यसेद् ध्वान्ते शब्दवेधनहेतवे ।
ततो वाणेन हन्यात्तदवधानेन तीक्ष्णधीः ॥ १५९ ॥

एतच्च दुष्करं कर्म भाग्यैः कस्यापि सिद्ध्यति ।
षोडशांगुललक्ष्यं तु स्थूललक्ष्यमुदाहृतम् ॥ १६० ॥

अङ्गुलद्वितयं सूक्ष्मं परं गुञ्जाशिरोरुहम् ।
स्तम्भस्योपरि विन्यस्तचक्रयन्त्रेषु कीलितम् ॥ १६१ ॥

वायुप्रेरितचक्रैस्तु भ्राम्यमाणं दृढं झषम् ।
पात्रमध्यस्थिते तोये वीक्ष्य विध्येच्छरेण तम् ॥ १६२ ॥

एकसन्धानयुक्ताभ्यां वाणाभ्यां लक्ष्ययुग्मकम् ।
आविध्य दर्शयेच्चित्रं यमलार्जुनसंज्ञकम् ॥ १६३ ॥

सन्धितस्सायकस्त्वेको द्वितीयस्संमुखस्थितः ।
द्वाविमावेकमोक्षेण पुरः पश्चाच्च गच्छतः ॥ १६४ ॥

पूर्वापरस्थितं लक्ष्यं शराभ्यां वेधयेत्ततः ।
एवमादीनि चित्राणि धनुर्विद्यागतानि च ॥ १६५ ॥

अभ्यसेद् बुद्धिमान् यस्तु स सर्वत्र जयी भवेत् ।
ततोऽथारं समादाय चक्रं षडरमेव वा ॥ १६६ ॥

मुष्टिभिस्सिंहकर्णाद्यैर्लक्ष्यवेधं समभ्यसेत् ।
ईषत्कुञ्चिततर्जन्या भ्रामयेद्वामदक्षिणम् ॥ १६७ ॥

उत्क्षिप्योत्क्षिप्य वेगेन पञ्च सप्त प्रचारयेत् ।
पर्यायेण तथैकैकं चित्रमेवं समभ्यसेत् ॥ १६८ ॥

सप्तारत्निर्भवेद् भूमौ षडरत्निस्तु वाजिनि ।
वारणे तु नवारत्निः कुन्तदण्डास्त्रयः स्मृताः ॥ १६९ ॥

फलमग्रे भवेदेकविंशत्यंगुलमानतः ।
अशनिर्मूलदेशे तदायतिर्मुकुलाकृतिः ॥ १७० ॥

भूमिकुन्तं समादाय दक्षिणेन च पाणिना ।
अशनेरग्रतो हस्तमात्रेऽप्युत्तानमुष्टिना ॥ १७१ ॥

संगृह्य कुन्तं नाम्रेन स्थानकेन चरेल्लघु ।
चालयन् मणिवन्धेन कङ्कणावर्तमाचरेत् ॥ १७२ ॥

स्कन्धे चावर्तयेत् कुन्तं कण्ठावर्तं समभ्यसेत् ।
पृष्ठे च भ्रामयेत् कुन्तं पृष्ठावर्तं समभ्यसेत् ॥ १७३ ॥

तत्र तत्र प्रदर्शे तु तत्तदावर्तमभ्यसेत् ।
फलेन दर्शयेदाशां परवेधात्मिकां ततः ॥ १७४ ॥

हननाशा[1] मथान्यां च दर्शयेत् कुन्तकोविदः ।
गदां लोहमयीं कुर्याद् दारुसारमयीं ततः ॥ १७५ ॥

घनेन निर्मितां वापि रत्नकाञ्चनभूषिताम् ।
यवोदरीं च शूलाग्रां समदण्डां परां शुभाम् ॥ १७६ ॥

भ्रामयेत् करयुग्मेन करेणैकेन वा पुनः ।
विचरेन्मण्डलैश्चित्रैस्सव्यैश्चैवापसव्यकैः ॥ १७७ ॥

धनुर्विद्यादिकेष्वेवं क्रमोऽभ्यासस्य चोदितः ।
इत्यभ्यस्यन्नसामान्यं धनुराद्यस्त्रकौशलम् ॥ १७८ ॥

एकधन्विपदं प्राप्तस्सोमशेखरनायकः ।
विविधेषु विनोदेषु कौतुकी खुरलीश्रमम् ॥ १७९ ॥

वितन्वन्मल्लकलितैर्विनोदैरास हर्षितः ॥ १८० ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारणचिदम्बर-
शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे अष्टमकल्लोले
धनुश्चक्रकुन्तगदालक्षणतत्साधनक्रमनिरूपणं
नाम द्वितीयस्तरङ्गः

[1] मशन्या.

अथ तृतीयस्तरंगः

गुरो! कौतुकसन्धात्र मल्ललीलापरम्परा ।
या सम्प्रतीरिता सा तु निरूप्या प्रेमवैभवात् ॥ १ ॥

विनोदमथ मल्लानां ब्रवीमि शृणु नन्दन! ।
मल्लाश्च त्रिविधा ज्ञेया उत्तमाधममध्यमाः ॥ २ ॥

उत्तमो ज्येष्ठिको नामान्तरज्येष्ठस्तु मध्यमः ।
कनिष्ठो गोवलो ज्ञेयः कायप्राणगुणान्तरात् ॥ ३ ॥

आ विंशतो वत्सरेभ्यो भविष्णुर्मल्ल उच्यते ।
तत ऊर्ध्वं त्रिंशदब्दात् प्ररूढः परिकीर्त्तितः ॥ ४ ॥

ततः परं हीयमानो नियुद्धे न क्षमो भवेत् ।
ज्येष्ठिकः कथ्यते मल्लो विद्याकायबलाधिकः ॥ ५ ॥

अर्धेन ज्येष्ठमल्लस्य कायप्राणगुणैस्तु यः ।
हीयमानो भवेन्मल्लो नाम्ना सोऽन्तरज्यैष्ठिकः ॥ ६ ॥

ततोऽपि हीयमानश्चेदेतैरेव गुणैस्तु यः ।
गोवलो नाम मल्लोऽसौ नियुद्धे वेगवान् वरः ॥ ७ ॥

पोषार्थं द्रविणं तेभ्यो दत्वा पश्चाद्विसर्जयेत् ।
भविष्णवः प्रवृद्धश्च पुष्टा वृंहणभोजनैः ॥ ८ ॥

माषैर्मांसैस्तथा दध्ना पिष्टैः क्षीरविमिश्रितैः ।
घृतेन सितया चैव विदार्या वाजिगन्धया ॥ ९ ॥

घृतेन भृष्टैः कूष्माण्डैश्चूर्णितैस्सितयान्वितैः ।
योषितां दर्शनस्पर्शसल्लापात् सङ्गमादपि ॥ १० ॥

संरक्ष्या यत्नतो मल्ला विशेषेण भविष्णवः ।
एकान्तरं दिने कुर्यादविस्मरणहेतवे ॥ ११ ॥

पृथक् पृथक् स्वगेहेषु निजैर्गोवलिकैस्सह ।
स्थानकानि च चत्वारि कल्पयेत् सुदृढानि च ॥ १२ ॥

विज्ञानानि च सर्वाणि तैश्च साकमशेषतः ।
वक्ष्यामि स्थानकानां च विज्ञानानां च लक्षणम् ॥ १३ ॥

कच्छे पूर्वापरे धृत्वा प्रोत्तानपतितस्य हि ।
तत्कपोलं स्वपार्श्वेन संपीड्यार्धाङ्गकं भजेत् ॥ १४ ॥

पुरः कच्छान् समादाय पूर्ववत्पतितस्य हि ।
मूर्ध्ना कूर्मासनं वध्वा भजेद् व्याप्यैकपादकम् ॥ १५ ॥

उत्तानप्रतिमल्लस्य निवार्य चरणद्वयम् ।
उदरस्योपरि स्थानं स्थानकं चम्बलं स्मृतम् ॥ १६ ॥

स्वयमुत्तानपतितो जठरागमनोद्धतम् ।
पादाभ्यां पीडयेन्मध्ये जठरस्थानकं भवेत् ॥ १७ ॥

पराङ्मुखस्य मल्लस्य स्थितस्य पतितस्य च ।
कच्छामाक्रम्य पाश्चात्यां पृष्ठस्थानकमाचरेत् ॥ १८ ॥

उक्तानि स्थानकान्येवं विज्ञानानि प्रचक्ष्महे ।
स्वरूपेण तथा नाम्ना विस्तरेण यथागमम् ॥ १९ ॥

अर्धाङ्गस्थानकस्थेन मल्लेन स्थूलवर्ष्मणा ।
पीडना मुखदेशस्य विज्ञानं स्यात्तदेव हि ॥ २० ॥

स्थिरादर्धाङ्गके स्थाने पादस्याकर्षणं वहिः ।
वहिः पणमिति ज्ञेयं विज्ञानं पादमोटनम् ॥ २१ ॥

तस्यैव परिवृत्तस्य मोटने जागुनी भवेत् ।
जङ्घाभ्यां च भुजाक्रान्तौ ताभ्यां शिरसि पीडिते ॥ २२ ॥

पुरः कच्छा समाकृष्य गुडालं प्राणघातनम् ।
ग्रीवायाश्चैव भुजयोः पादेनाक्रमणे सति ॥ २३ ॥

अन्यजान्ववबन्धेन कुर्यादुत्तरडोक्करम् ।
शिरस्स्थितेन मल्लेन विक्षेपायोद्धतं पदम् ॥ २४ ॥

गृहीत्वा सक्थियुग्मेन कक्षं निष्पीड्य पार्ष्णिना ।
उत्तानजानुदेशस्य कटियन्त्रेण पीडनम् ॥ २५ ॥

पट्टिसं नाम विज्ञानं जानुसन्धिप्रभञ्जनम् ।
अनेनैव प्रकारेण वाहुसन्धिप्रपीडनम् ॥ २६ ॥

छडकी नाम विज्ञानं शास्त्रविद्भिः प्रकीर्त्तितम् ।
आदौ विधाय तद्बाह्वोः पूर्ववत्पीडनं यदि ॥ २७ ॥

विज्ञानमर्धछडकी बाहुसन्धिप्रभञ्जनी ।
मन्यां कक्षे विनिक्षिप्य भुजेनैकेन संयुता ॥ २८ ॥

गलं प्रकोष्ठेनापीड्य तत्करेण करान्तरम् ।
सन्धौ प्रगृह्य जठरं सक्थिभ्यां परिपीडयेत् ॥ २९ ॥

हस्तडोक्करकं नाम विज्ञानं जीवघातनम् ।
अर्धाङ्गस्थानके स्थित्वा बाहुभ्यां मध्यमुन्नयेत् ॥ ३० ॥

पार्श्वे संपीडयेत् कण्ठं कर्षन्नूरू प्रजंघया ।
धनुर्यष्टीति विज्ञेयं विज्ञानं मध्यभञ्जनम् ॥ ३१ ॥

शरीरस्थानविज्ञानान्यमून्येकादशैव तु ।
स्थाने करवले स्थित्वा वक्त्रे क्षिप्त्वा निजोदरम् ॥ ३२ ॥

पोगमूभवटं नाम्ना विज्ञानं [1] श्वासपोथनम् ।
उरसा पीडनं तद्वद्विज्ञानं मुखपट्टकम् ॥ ३३ ॥
हस्तद्वयेन वक्त्रस्य पिधानं मुस्तिकाह्वयम् ।
स्थित्वा करतले स्थाने मणिबन्धस्य मोटनम् ॥ ३४ ॥
क्रियते यत्तु तत्प्रोक्तं मुद्राकं करभञ्जकम् ।
बाहुभ्यां मध्यमाक्रम्य जंघामाक्रम्य जंघया ॥ ३५ ॥
बाहुसन्धिविभङ्गार्थं भजेच्चरणपट्टसम् ।
करस्य जानुसन्धौ च करं निक्षिप्य कंचन ॥ ३६ ॥
जङ्घाभ्यामूरुमाक्रम्य विदध्याल्लोलपादकम् ।
जठरस्थानके स्थित्वा बाहोर्यत्र च पीडनम् ॥ ३७ ॥
संदंशाकृतिबाहुभ्यां संदंशं नाम यद्भवेत् ।
जङ्घां विधाय मन्यायां जानुसन्धिनिपीडिताम् ॥ ३८ ॥
चूडां वा पूर्वकच्छां वा कर्षन् डोकरमाचरेत् ।
ऊरुभ्यां पादमाक्रम्य पादौ निक्षिप्य कक्षयोः ॥ ३९ ॥
आविध्य बाहुना जंघे कुर्याज्जवलशङ्खकम् ।
सारो जवलशङ्खस्य पादस्यैकस्य पीडनात् ॥ ४० ॥
एवं वक्षः पट्टनाम विज्ञानं पदभञ्जनम् ।
सर्वाङ्गं पीडयेद्यत्र मध्यमाक्रम्य पृष्ठतः ॥ ४१ ॥
[2] सुमरिर्नाम विज्ञानं सङ्कोचादङ्गसाधनम् ।
ऊरुभ्यां मध्यमाक्रम्य मन्यां कक्षान्तरे क्षिपेत् ॥ ४२ ॥
ज्ञेयं गुण्डगुली नाम विज्ञानं कण्ठमोटनम् ।
पृष्ठस्थानकमास्थाय बाहू कक्षान्तनिर्गतौ ॥ ४३ ॥
मन्यायां संगतं कृत्वा करशाखानिबन्धनात् ।
ताभ्यां संपीडयेन्मन्यां कुर्वन्नधोमुखं शिरः ॥ ४४ ॥
ऊरुभ्यां मध्यमाक्रम्य युञ्ज्याद्गरुडपक्षकम् ।
पृष्ठस्थः प्रतिमल्लस्य पृष्ठपृष्ठे भुजं बलात् ॥ ४५ ॥
आकृष्य वर्तयन् कुर्याद्विज्ञानं वेपणिं बुधः ।
जानुसन्धौ क्षिपन् जङ्घां पतितस्याप्यवाङ्मुखम् ॥ ४६ ॥
उरसा पीडयेत्पादं तदङ्गचलनं भवेत् ।
मन्यां वक्षोऽन्तरे कुर्वन् बाहुं गरुडपक्षवत् ॥ ४७ ॥
मध्यपीडनयोगेन भवेन्मकुटबन्धनम् ।
एकद्वित्र्यंगुलं मुक्त्वा करशाखाचतुष्टयम् ॥ ४८ ॥
भज्यतेऽङ्गुष्ठवर्जं तद्विज्ञानं चतुरंगुलम् ।
बाहुना बाहुमाविध्य धृतं बान्येन मुद्रकम् ॥ ४९ ॥
मोट्यते मणिबन्धो यत्तद् विज्ञानं तथाऽभिधम् ।
हस्तौ पादौ च शीर्षं च पद्भ्यामावेष्ट्य पीडनात् ॥ ५० ॥
विज्ञानं तत्समाख्यातं डोक्करं कुकुडुम्बकम् ।
विज्ञानान्येवमुक्तानि बन्धमोचनकारणम् ॥ ५१ ॥
वक्ष्यामि बन्धनोपायान् विविधान् वज्रमुष्टिभिः ।
स्थलक्ष्यौ तु प्रयुक्तायां भूमिपातंनिषेधयेत् ॥ ५२ ॥
स्थिरस्थानगतं मध्यं बाहुभ्यामुत्क्षिपेद् बलात् ।
पादाभ्यामुपकर्षेद्वा देहं वा वर्तयेज्जवात् ॥ ५३ ॥
स्थितं करवरं स्थाने जयेच्छुं प्रतिमल्लकम् ।
पश्चात् पूर्वान्तरं न्यस्तं पादांगुष्ठेन कर्षयेत् ॥ ५४ ॥
अवश्यं चेत्तदाकृष्टमूरुभ्यां तस्य सक्थिकम् ।
निपीड्य धारयेन्मल्लं यथान्योन्यं क्षमो भवेत् ॥ ५५ ॥
जयेदुत्तानसंलग्नं पुरः कच्छां विधाय च ।
कूर्पराभ्यां निपीड्याथ अपसृत्य विमोचयेत् ॥ ५६ ॥
तथा मोचयमानस्य जंघे धृत्वा निजांघ्रिणा ।
नाभिदेशे निरुध्याथः पातयेद् धरणीतले ॥ ५७ ॥
पात्यमानस्ततो मल्लः पादं पश्चात् प्रसार्य च ।
निश्चित् स्थैर्यं समालम्ब्य यथानपगतः क्षितौ ॥ ५८ ॥
उपपादनियुध्याख्यः श्रम एवं प्रदर्शितः ।
स च प्रभाते कर्तव्यो विस्थानोपायसिद्धिदः ॥ ५९ ॥
उत्थाय विवसंत् प्रातर्वालुकावृतकोणिकाम् ।
बाहुभ्यामुत् क्षिपेच्छक्त्या पादाभ्यां च मुहुर्मुहुः ॥ ६० ॥
भारसोढा च कर्तव्यो ज्येष्ठमल्लो विशेषतः ।
भारश्रमोऽयमाख्यातो गात्रप्राणविवर्धनः ॥ ६१ ॥
भ्रमणार्थं ततो गच्छेत् क्रोशमात्रं बहिः पुरात् ।
निवर्तेत तथा तूर्णं श्रमोऽयं भ्रमणाभिधः ॥ ६२ ॥
पुष्करिण्यां तटाके च कूपे वा प्रविशेज्जलम् ।
कण्ठदघ्नं ततस्तोयं बाहुभ्यां परिलोलयेत् ॥ ६३ ॥
आश्लेषयोग्यं सुश्लक्ष्णमूर्ध्वबाहुतलोत्थितम् ।
दृढं निखातितं स्तम्भं चर्चितं चन्दनादिना ॥ ६४ ॥
उत्प्लुत्याक्रम्य सक्थिभ्यां बाहुभ्यां चैव वक्षसा ।
दृढं संपीडितं स्तम्भं पद्भ्यामूर्ध्वं समाश्रयेत् ॥ ६५ ॥
बाहुभ्यां च ततो मह्या आवर्तपरिवर्तने ।
अधश्चोर्ध्वं च संश्लिष्य स्तम्भे विश्रममारभेत् ॥ ६६ ॥

---

1) श्वासरोधनम्. 2) मुवति.

एवं जितश्रमा मल्ला हृष्टाः पुष्टास्समागताः ।
विज्ञापयेयुर्भूपालं बलाध्यक्षपुरस्सरम् ॥ ६७ ॥
बाल्यात् पुष्टा नृप ! स्वाङ्के पोषितास्तनुजा इव ।
जितश्रमा वयं जाता नियोजय महीपते! ॥ ६८ ॥
इति विज्ञाप्यमानस्तु गुणांस्तेषां विचारयेत् ।
भेदैर्द्वादशभिर्युक्ता मिथस्ते स्युर्नियोधने ॥ ६९ ॥
महाकायस्तु यो मल्लो भारी स परिकीर्त्तितः ।
बलाढ्यः कथ्यते प्राणी चोत्थानी चास्त्रशिक्षितः ॥ ७० ॥
स्वस्थाननिरतो ज्ञेयो यः स्थानेषु स्थिरासनः ।
यो न श्रमं याति युद्धे बहुयोधी स कथ्यते ॥ ७१ ॥
विज्ञानेनागृहितोऽपि यो मुञ्चाति न भाषते ।
आस्फालयति हस्तेन स लघुः परितो भवेत् ॥ ७२ ॥
दलनं सहते यस्तु स भवेद्दलने हितः ।
यो रक्षति हितज्ञानं मल्लो रक्षणको मतः ॥ ७३ ॥
आशु प्रयुङ्क्ते विज्ञानं तदपायं चरेद् द्रुतम् ।
स मल्लश्लक्ष्णः ख्यातश्शीघ्रविज्ञानकारकः ॥ ७४ ॥
परप्रयुक्तविज्ञानं पररन्ध्रं च पश्यति ।
दर्शनाख्यक्रियायोगान्मल्लो दर्शक उच्यते ॥ ७५ ॥
उत्प्लुत्य यो लगेत् कण्ठे स सद्योगमनो भवेत् ।
मर्यादापालके युद्धे नियतः परिकीर्तितः ॥ ७६ ॥
एवं गुणयुतान् मल्लान् समकायबलाबलान् ।
नियुद्धे योजयेद्राजा करास्फालनपूर्वकम् ॥ ७७ ॥
चलणं परिधायाथ दृढां कच्छां विवेष्ट्य च ।
नियुद्धे तावुभौ मल्लौ योधनप्रतियोधनौ ॥ ७८ ॥

प्रकोष्ठधारणैश्चैव मणिबन्धविमोचनैः ।
बाहुसंघट्टनैश्चैव तथा पादोरुघट्टनैः ॥ ७९ ॥
आश्लेषैः पीडनैश्चैव विश्लेषैरपसर्पणैः ।
उत्प्लुत्य लंघनैः कण्ठे जठरे पृष्ठतः स्थितः ॥ ८० ॥
भ्रमणैर्भ्रामणैश्चैव चलनैर्वर्तनैस्तथा ।
सन्निपातावधूतैश्च तोलनास्फालनैस्तथा ॥ ८१ ॥
नानाविधैश्च विज्ञानैर्विविधैर्बन्धमोचनैः ।
श्रान्ताश्चोत्तानपतिताः खेदाधिक्तविग्रहाः ॥ ८२ ॥
कर्दमालिप्तसर्वाङ्गाः कुड्मलीकृतलोचनाः ।
मुञ्चन्तः श्वासफूत्कारं दृश्यन्ते ये समाकुलाः ॥ ८३ ॥
द्वावप्येवंविधौ दृष्ट्वा समीकुर्याद्विचक्षणः ।
अश्रमस्य जयं दद्यान्मोटनाच्च विशेषतः ॥ ८४ ॥
एवं नियोजितान् मल्लान् मानयन् भूमिकाञ्चनैः ।
वस्त्रैराभरणैर्ग्रामैर्वाहैश्च परितोषयेत् ॥ ८५ ॥
एवं मल्लविनोदस्तु साम्प्रतं परिकीर्तितः ।
एवमन्येपि विद्यन्ते विनोदाः पशुपक्षिणाम् ॥ ८६ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारण-
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्र-
सारभूते श्रीशिवतत्त्वरत्नाकरे अष्टमकल्लोले
मल्लयुद्धविनोदनिरूपणं नाम तृतीयस्तरङ्गः

अथ चतुर्थस्तरंगः

1) सन्त्यनेके विनोदार्थैत्युक्त्या कौतुकितं मनः ।
तेषामिह विनोदानां श्रवणं संप्रतीहते ॥ १ ॥

तन्मह्यमधुनाख्याहि गुरो! मे पूरयेप्सितम् ।
पुत्र! ते सम्प्रवक्ष्यामि यच्छ्रोतुं समभीप्सितम् ॥ २ ॥

ताम्रचूडविनोदस्तु तत्रादौ परिकीर्त्यते ।
कुक्कुटाहवमिच्छद्भिर्ज्ञातव्या जातयः पुरा ॥ ३ ॥

आयोधनप्रकारश्च व्यवस्थाश्च जयाजये ।
कुक्कुटानामिदं ज्ञात्वा पश्चात् कुर्यात्तदाहवम् ॥ ४ ॥

पादौ सितौ सिताग्रौ च नखराः पाण्डराश्शुभाः ।
लोचने च तथा शुक्ले शुभा घोणा विशेषतः ॥ ५ ॥

शङ्खध्वनिनिभो नादस्तीक्ष्णाग्रा पिञ्छसन्ततिः ।
कम्बुग्रन्थिनिभं शीर्षं यस्यासौ शङ्खजातिकः ॥ ६ ॥

चरणौ पाण्डरच्छायौ दीर्घाश्चांगुल्यः कृशाः ।
दीर्घो देहस्तथा कार्श्यं 2) चञ्चौ दीर्घा च नासिका ॥ ७ ॥

मृदुप्रहारसंयुक्तं मन्दयुद्धं भवेच्चिरम् ।
यस्यासौ स भवेज्जात्या कुक्कुटोऽगरुसन्निभः ॥ ८ ॥

उन्मतस्सितवृत्तांघ्रिः पृथुवक्षस्स्थलो महान् ।
अकामो युद्धयते शूरः पंगुजातिः प्रकीर्तितः ॥ ९ ॥

सूक्ष्मोरुश्शोणपादश्च सितशुक्तिसमन्वितः ।
शुक्लाक्षो दीर्घवालोऽयं जात्याकारः प्रकीर्तितः ॥ १० ॥

हारिद्रौ चरणौ वापि सितौ वा कृष्णविन्दुकौ ।
कांस्यवर्णो भवेद्देहः प्रियंगुकणविन्दुकः ॥ ११ ॥

कृष्णाश्च नखरा यस्य सिता वा चित्रिताश्च वा ।
रक्ते दृशौ स्खलच्छब्दो गृध्रजातिस्स कुक्कुटः ॥ १२ ॥

श्यामलाश्शुत्कयो यस्य किञ्चित्पाण्डरतां श्रिताः ।
कृष्णाग्रयुतवालढयो जात्या तेगुस्स कथ्यते ॥ १३ ॥

कृष्णवर्णोऽतिदीर्घाग्रिश्शुक्लतुण्डोऽरुणेक्षणः ।
बृहन्नादो महाकायो जात्या द्रोणिः प्रकीर्तितः ॥ १४ ॥

कृष्णवर्णो रक्तनेत्रः कृष्णपञ्चातिदीर्घकः ।
वर्धयन् स शिरो युद्धे सर्पजातिः प्रकीर्तितः ॥ १५ ॥

चरणौ हरितच्छायौ चले शुक्ले च लोचने ।
आकारो वर्तुलो यस्य तं विद्यात् कूर्मजातिकम् ॥ १६ ॥

एवं विविधजात्युत्थान् तद्ज्ञैस्तान् परिपोषयेत् ।
उष्णोदनैर्घृतोपेतैर्दध्ना च परिमिश्रितैः ॥ १७ ॥

एवं संरक्षितं मुञ्चेत् कुक्कुटं युद्धकर्मणि ।
नानाविधाभिश्चेष्टाभिरुहनीयौ जयाजयौ ॥ १८ ॥

दक्षिणेन पदेनाङ्गं स्पृशन् युद्धेऽरिघातुकः ।
दक्षिणोन्नतचेष्टाभिरादिशेज्जयमात्मनः ॥ १९ ॥

ग्रीवामाकुञ्च्य रसनां दर्शयन् यदि जृम्भते ।
उत्क्षेपैश्च मुहुर्दर्शी सांख्यायाविषयो हि सः ॥ २० ॥

दक्षिणं पादमुद्धृत्य मुष्टिं वध्वावतिष्ठते ।
उत्क्षिपन् दक्षिणोरुं च जयमाप्नोति निश्चितम् ॥ २१ ॥

प्रसार्य दक्षिणं पादं सपक्षेण च कुक्कुटः ।
अस्पृश्य तु समाकर्षन् जयं शंसत्यवारितः ॥ २२ ॥

युद्धाय वीक्षमाणानां पक्षिणां जयवादिनाम् ।
दीपोत्थकज्जलेनैषां शिखरे तिलकं न्यसेत् ॥ २३ ॥

निदाघत्रुटिताः पक्षा आषाढे सम्भवन्ति ते ।
यावदाश्वयुजो मासस्तावत्तिष्ठन्ति रोमशाः ॥ २४ ॥

तत ऊर्ध्वं दृढाः पक्षास्ततो युद्धं प्रकल्पयेत् ।
योधयेत् फाल्गुनो यावत्तत ऊर्ध्वं न योधयेत् ॥ २५ ॥

कृष्णः कृष्णांघ्रिको ज्ञेयः श्वेतश्श्वेतांघ्रिकस्तथा ।
पादाभ्यां मिश्रवर्णाभ्यां कुक्कुटो मिश्र उच्यते ॥ २६ ॥

मिश्रपादो जयेच्छ्वेतं श्वेतो जयति मेचकम् ।
मिश्रपादो जयेत् कृष्णमेवं ज्ञात्वा परैस्सह ॥ २७ ॥

योधयेत् कुक्कुटौ तौ द्वौ मुञ्चेन्नीराजितौ रणे ।
विकीर्णकेसरदलौ मध्ये च नतकन्धरौ ॥ २८ ॥

परस्परं वीक्षमाणौ किञ्चिच्चलितमस्तकौ ।
उत्प्लुत्य प्रहरन्तौ तौ वञ्चयन्तौ परस्परम् ॥ २९ ॥

कियत्यपि गते काले कोपसम्मिलिताबुभौ ।
परस्परं दारयन्तौ चञ्चुकोणेन मस्तकम् ॥ ३० ॥

कृकाटीकेसरं चूडां चुबुकं लम्बकूर्चकम् ।
पृष्ठं पुच्छं तथा चञ्च्वा धृत्वा पादप्रहारिणौ ॥ ३१ ॥

---

1) सन्त्यन्येऽपि विनोदा इत्युक्त्या. 2) चञ्चुर्दीर्घा.

मुखदेशं विभिन्दन्तावाराघातैः परस्परम् ।
वमन्तौ रुधिरं वक्त्रात् स्रवच्छोणितमस्तकौ ॥ ३२ ॥
मुहुर्मुहुर्वार्यमाणौ मार्जकैः पायितोदकौ ।
वाससा वीज्यमानौ तु मुच्यमानौ पुनः पुनः ॥ ३३ ॥
धावन्तावनुगच्छन्तौ भ्रमन्तावपि चक्रवत् ।
सरोषौ पुनरायान्तौ प्रकूजन्तौ [1] परस्परम् ॥ ३४ ॥
पक्षान्तस्स्थितवक्त्रौ च मिथस्संश्लिष्टकन्धरौ ।
घटिताविव तिष्ठन्तौ चेष्टाहीनौ च कुक्कुटौ ॥ ३५ ॥
पोषणीयौ तथाभूतौ मार्गिकैस्तद्विचारकैः ।
आच्छाद्य वाससा वक्त्रं कुक्कुटस्य च मार्गिकः ॥ ३६ ॥
स्वेदयेत् मुखशीतोष्णैर्निश्वासैस्तु मुखोद्गतैः ।
उद्धरेत् पतितं शीघ्रं वक्त्रं च ऋजुतां नयेत् ॥ ३७ ॥
श्रमार्थं पाययेद्वारि मार्गिकानामयं विधिः ।
योधयेत् कुक्कुटानेवं जयावधि महीपतिः ॥ ३८ ॥
इदानीं कथ्यते रम्यो विनोदो लावकाश्रयः ।
कच्छेलः खापडीकश्च गेरजो वीगरस्तथा ॥ ३९ ॥
पांसुलो वेरसश्चेति षड्विख्यातास्तु जातयः ।
कच्छमण्डलसंजातः कच्छेलः परिकीर्तितः ॥ ४० ॥
तद्देश्यास्तु गृहोत्पन्नाः खापडीका भवन्तिते ।
विन्ध्ये सह्ये च संभूता लावकाश्शोणमस्तकाः ॥ ४१ ॥
गेरजा इति विख्याता युद्धकर्मणि मध्यमाः ।
[2] खारणीकेन संयोगाद् गेरज्ज्यां जायते तु यः ॥ ४२ ॥
वीरगस्स समाख्यातो मिश्रजातिसमुद्भवः ।
कच्छदेशं समुत्सृज्य येऽन्यदेशसमुद्भवाः ॥ ४३ ॥
आशोणमस्तकास्सर्वे लावका पांसुला मताः ।
खारडे पांसुलायोगाल्लावस्ससुपजायते ॥ ४४ ॥
वेरसो नाम स ज्ञेयः पांसुलानामयं बली ।
आश्विनात् फाल्गुनो यावत् प्रसूयन्ते तु लावकाः ॥ ४५ ॥
तिलपुष्पागमे जाता अग्रजाः परिकीर्तिताः ।
मधूकपाते सञ्जाताः पाश्चात्या इति विश्रुताः ॥ ४६ ॥
तस्मादाश्वयुजे तेषां यत्नं कुर्वीत सन्ततेः ।
तत्पञ्जरेषु निक्षिप्य पोषयेच्च प्रयत्नतः ॥ ४७ ॥
गोधूमपिष्टं सुश्लक्ष्णं मत्स्यमांससमन्वितम् ।
कवोष्णं स्वेदितं तैले मृदितं करपल्लवे ॥ ४८ ॥

1) चलच्छिखौ. 2) खापडीकेन.

अङ्गुष्ठतर्जनीयोगात् सेवाः कुर्याद्‌वाकृतीः ।
तामिस्तान् पोषयेद्[1] त्वाद्वाद्नालैश्च कोद्रवैः ॥ ४९ ॥
प्रियङ्गुतण्डुलैस्तद्वन्मुद्गानां द्विदलैरपि ।
करीषसान्द्रचूर्णेन मृत्तिकामिश्रितेन च ॥ ५० ॥
प्रियङ्गुधान्यमिश्रेण [2] तद्विहारं प्रकल्पयेत् ।
पृथक् पृथक् ते कर्तव्याः पञ्जरेषु विचक्षणैः ॥ ५१ ॥
ततस्संवत्सरादूर्ध्वं युद्धयोग्या भवन्ति ते ।
अन्योन्यं न सहन्ते ते घर्षं क्रोधसमन्विताः ॥ ५२ ॥
ततः श्रमं कारयेत लावकान् युद्धसिद्धये ।
लावीं पञ्जरके लावं निक्षिपेत्तमधस्तले ॥ ५३ ॥
आकृष्य पञ्जरे लावं निक्षिपेत्तमधस्तले ।
शलाकाकुड्मलाकारनिर्मिते कलशान्विते ॥ ५४ ॥
अधस्तरे तथा चान्यं निक्षिपेल्लावकं बुधः ।
दर्शयेत्तस्य कोपार्थं लावकं दर्पकूजितम् ॥ ५५ ॥
अधस्तरे तथोद्घृष्य वस्त्रवेणीं तदन्तरे ।
पिधाय योधयेत्तं तु वस्त्रवेण्यां तु लावकम् ॥ ५६ ॥
अधस्तरे तथा चान्यं वस्त्रेणाच्छाद्य शिक्षितम् ।
लाविकांधरणीरज्वा लम्बितां दर्शयेत् पुरः ॥ ५७ ॥
धावेच्छनैश्शनैस्तज्ज्ञो लावकं चाथ धारयन् ।
उत्क्षिपेच्च तथा चोर्ध्वं पक्षयोर्दार्ढ्यसिद्धये ॥ ५८ ॥
पुष्टं च तं समं शूरं योधयेत् प्रतियोधिनम् ।
धात्रीफलसमाकारमस्तकं स्थूलकन्धरम् ॥ ५९ ॥
आपाण्डरभ्रुवं ह्रस्वलोचनं कुब्जचञ्चुकम् ।
खराभपिञ्छसंयुक्तं स्थूलोरुं वृत्तजङ्घकम् ॥ ६० ॥
विशालांघ्रियुतं दीर्घचरणांगुलिसंयुतम् ।
पृथुत्रिकं महाकायं युद्धकर्मविशारदम् ॥ ६१ ॥
एकां च योधयेन्नाडीमेकां विश्रामयेत्तथा ।
एवं च योधयेत् सप्त नव वारान् यथाक्रमम् ॥ ६२ ॥
हीनं मध्यं तथा ज्येष्ठं लावकं धरणीपतिः ।
खारडं खारडीकेन वीगरं वीगरेण च ॥ ६३ ॥
वेसरं वेसरेणैव कच्छलं कच्छलेन च ।
नवनाडीकृतां सङ्ख्यां पूरयेद्यदि लावकः ॥ ६४ ॥
तस्यैव विजयो ज्ञेयो लावमेवं नियोधयेत् ।
एवं महिषसारङ्गप्रमुखान् परिपोषितान् ॥ ६५ ॥

1) दारनालैश्च. 2) तुदाहरं प्रकल्पयेत्.

योधयेत् तद्विधानज्ञो विनोदोऽयं नृपोचितः ।
एवं पोष्या विनोदाय न युद्धाय शुकादयः ॥ ६६ ॥

सितो रक्तस्तथा पीतस्तथा गारुत्मतप्रभः ।
विप्रादिकं तथा ज्ञेयं शुके जातिचतुष्टयम् ॥ ६७ ॥

कृशाङ्गो विस्वरो दीनो विवर्णो दारुखण्डनः ।
एतद्गुणयुताः कीरा वर्जनीया नृपालये ॥ ६८ ॥

श्वेताङ्गश्श्वेतनेत्रश्च दूर्वाश्यामलचञ्चुकः ।
उदयास्ते भाषमाणश्शुको विप्रः प्रकीर्तितः ॥ ६९ ॥

रक्ताङ्गः श्वेतचञ्चुश्च पीताङ्गः कृष्णचञ्चुकः ।
गारुत्मताङ्गो रक्तास्यः क्षत्रो वैश्यस्तुरीयजः ॥ ७० ॥

वर्णपञ्चकसंयुक्तो मिश्रजातिः प्रकीर्तितः ।
पुष्टाङ्गश्शुद्धवर्णश्च मन्द्रस्वरसमन्वितः ॥ ७१ ॥

एतद्गुणयुतः कीरो राजकीरः प्रकीर्तितः ।
एवमादीन् विचित्राङ्गान् राजयोग्यान् पतत्रिणः ॥ ७२ ॥

परिपाल्य तदालापक्रीडाभिर्हर्षमावहेत् ।
छागीदुग्धं पायितास्ते पुष्टास्स्युर्मधुरस्वराः ॥ ७३ ॥

छागशुभाशुभलक्षणमभिधास्ये नवदशाष्टदन्तास्ते ।
धन्यास्स्थाप्या वेश्मनि संत्याज्यास्सप्तदन्ता ये ॥ ७४ ॥

स्तनइव गले लम्बति यश्छागानां मणिस्स विज्ञेयः ।
एकमणिश्शुभफलकृद् हीनफला द्वित्रिमणयो ज्ञेयाः ॥ ७५ ॥

पुण्ड्रास्सर्वे शुभदास्सर्वसितास्सर्वकृष्णदेहाश्च ।
अर्धसिता असितार्धा धन्याः कपिलार्धकृष्णाश्च ॥ ७६ ॥

विचरति यूथस्याग्रे प्रथमं चाम्भोऽवगाहते योऽजः ।
स शुभस्सितमूर्धा वा मूर्धनि वा कालिमा यस्य ॥ ७७ ॥

सपृषतकण्ठशिरा वा तिलपुष्पनिभश्च ताम्रदृक् शस्तः ।
कृष्णचरणस्सितो वा कृष्णो वा श्वेतचरणो यः ॥ ७८ ॥

यः कृष्णाण्डः श्वेतो मध्ये कृष्णेन भवति पट्टेन ।
यो वा चरति सदा सशब्दं मन्दं च स शोभनश्छागः ॥ ७९ ॥

कृष्णशिरोरुहपादो यो वा प्राक् पाण्डुरपरतो नीलः ।
स भवति शुभकृच्छागस्सोऽपि शुभो वामनो यश्च ॥ ८० ॥

अथाप्रशस्ताः खरतुल्यनादा प्रदीप्तपुच्छाः कुनखा विवर्णाः ।
निकृत्तकर्णा द्विपमस्तकाश्च भवन्ति ये चासिततालुजिह्वाः ॥ ८१ ॥

कर्णैः प्रशस्तैर्मणिभिश्च युक्ता मुण्डाश्च ये ताम्रविलोचनाश्च ।
ते पूजिता वेश्मसु मानवानां सौख्यानि कुर्वन्ति यशश्श्रियं च ॥

दक्षिणपार्श्वे मण्डलमसितं शुक्लस्य शुभफलं भवति ।
ऋक्षनिभः कृष्णलोहितवर्णानां श्वेतमेति शुभदम् ॥ ८३ ॥

पादाः पञ्चनखास्त्रयोऽग्रचरणष्षड्भिर्नखैर्दक्षिण-
स्ताम्रोष्ठाग्रनसो मृगेश्वरगतिर्जिघ्रन् भुवं याति यः ।
लांगूलं ससटं दृगृक्षसदृशी कर्णौ च लम्बौ मृदू
यस्य स्यात् स करोति पोष्टुरचिरात् पुष्टां श्रियं श्वा गृहे ॥ ८४ ॥

पादे पादे पञ्च पञ्चाग्रपादे वामे यस्याष्षण्णखा मल्लिकाक्षी ।
वक्त्रं पुच्छं पिङ्गलालम्बकर्णी श्रेष्ठोरस्का कुक्कुरी पाति पुष्टा ॥ ८५ ॥

एवं युद्धोपयुक्तानां विहारेषूपयोगिनाम् ।
नृपः क्रीडाभिरेतेषां कुतुकी समवर्तत ॥ ८६ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारण
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदीबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातत्त्वसारभूते
श्रीशिवतत्त्वरत्नाकरे अष्टमकल्लोले
कुक्कुटलावकयुद्ध छागशुनकलक्षणानुवर्णनं
नाम चतुर्थस्तरङ्गः

अथ पञ्चमस्तरंगः

एवं विनोदान् भजतस्सोमशेखरभूपतेः ।
अनन्तरं प्रवृत्तं किं चरितं विजयादिकम् ॥ १ ॥

तन्मे वदस्व भगवन्! [1] श्रोतुं तत् कांक्षते मनः ।
नन्दनाकर्णयैतस्य वृत्तं कर्णरसायनम् ॥ २ ॥

अनीतिसंकुलं राज्यं सोमशेखरनायके ।
शासत्यनीतिरल्पापि न क्वचित् पर्यदृश्यत ॥ ३ ॥

व्यञ्जयन् विषमेषुत्वं कामिनीष्विव शत्रुषु ।
विग्रहेण स्वकीयेन प्रदिशत्यतिरिक्तताम् ॥ ४ ॥

अस्मिन् कतिपयं कालं परिपालयति क्षितिम् ।
एनं प्रकोप्य सीमान्तप्राकारावरणान्नृपः ॥ ५ ॥

सामन्तो हरिणस्सिंहमिव तस्याभजत् फलम् ।
पुनः क्षुद्रनृपान् कांश्चित् गलिताहंकृतीन् व्यधात् ॥ ६ ॥

कांश्चिच्च शरणायातान् तत्तत्स्थानेष्ववर्धयत् ।
पुरोपान्ते मठं रम्यं भूरुद्राणामकल्पयत् ॥ ७ ॥

अनुग्रहं प्राप्तुकामो महान्तं सुमहात्मनाम् ।
पुरोपान्ते तथान्यत्र विरक्तानां मठं दृढम् ॥ ८ ॥

लिङ्गाङ्गसङ्गिनां तुष्ट्यै कारयामास भक्तितः ।
तटाकं तस्य पुरतो महान्तं पर्यकल्पयत् ॥ ९ ॥

मधुरेणाप्यशोष्येण जलेन परिपूरितम् ।
तटाकं परितश्चैव वृक्षोद्यानमकल्पयत् ॥ १० ॥

प्ररूढे यौवने स्वस्य विवाहकरणेच्छया ।
सदृशीं रूपरेखायां गुणेष्वपि कुले तथा ॥ ११ ॥

स्त्रियमप्राप्य चोद्वाहे व्यलम्बत शिवो यथा ।
मूकाम्बिकांशसंभूतां चेन्नाम्बाख्यां मनोहराम् ॥ १२ ॥

परिणीय विचिक्रीड तथा रत्येव मन्मथः ।
मधुराङ्गविलासाढ्या कुन्तलश्रीविराजिता ॥ १३ ॥

भूषिता सा द्वितीयेव राज्यश्रीर्हृद्यतामगात् ।
एवं तया समं कालं कियन्तमतिवाहयन् ॥ १४ ॥

चेन्नाम्बाख्यां कदाचित् स्वां वधूं प्रत्येवमुक्तवान् ।
शृणु प्रिये! पुरा देवान् परिभूय सुरारयः ॥ १५ ॥

तत्तत्स्थलानि समाक्रम्य तेषां बाधां वितेनिरे ।
तदा मूकाम्बिका देवी निगृह्य दितिसंभवान् ॥ १६ ॥

देवानामभयं प्रादात् सर्वेषामिति [1] विश्रुतम् ।
तथा कलियुगे दैत्यरूपैर्म्लेच्छैरुपद्रुतात् ॥ १७ ॥

पुण्यस्थलात् समस्ताच्च धर्महासमवापितात् ।
निर्गत्य सन्तस्सर्वेऽपि देशमस्माकमाश्रिताः ॥ १८ ॥

सुखेनैवोपजीवेयुः पुण्यदेशधियस्सदा ।
अनन्तरं कियत्कालादेतद्देशमुपागतान् ॥ १९ ॥

म्लेच्छान् पराजितान् कृत्वा लोकानामभयं कुरु ।
सर्वदेवशिरोरत्नेऽचिन्त्यरूपे महेश्वरे ॥ २० ॥

भक्तिं सदापि कुर्वाणा भूतिं भूतिविवर्द्धिनीम् ।
बिभ्राणा सर्वदा काये धृतरुद्राक्षमालिका ॥ २१ ॥

शिवभक्तानर्चयन्ती शैवोक्ताचारवर्तिनी ।
त्वं प्रिये! निवसेत्युक्त्वा सोमशेखरभूपतिः ॥ २२ ॥

शिवपूजाविधानं च साङ्गं तस्या उपादिशत् ।
तत्प्रकारमहं वक्ष्ये शृणु नन्दन! देहिनाम् ॥ २३ ॥

यस्य श्रवणमात्रेण पुरुषार्थाः करस्थिताः ।
इदं रहस्यं हृदये गोपनीयं प्रयत्नतः ॥ २४ ॥

कृत्वा स्नानं विधानेन धानोद धौतवाससी ।
प्राङ्मुखोऽन्तर्बहिश्शुद्धस्सुखासनमुपाश्रितः ॥ २५ ॥

त्रिपुण्ड्रं धारयन् भूत्या रुद्राक्षाणां च मालिकाम् ।
अनन्यमानसो देवदेवं शङ्करमर्चयेत् ॥ २६ ॥

तत्र चादौ प्रवक्ष्यामि भस्मनो विधिमुत्तमम् ।
भवन्ति पञ्चनामानि कारणैः पञ्चभिर्भृशम् ॥ २७ ॥

ऐश्वर्यकरणाद् भूतिर्भस्म सर्वाघभक्षणात् ।
भासनाद् भसितं प्रोक्तं क्षारणात् क्षारमापदाम् ॥ २८ ॥

भूतप्रेतपिशाचादिग्रहेभ्यो रक्षणादपि ।
रक्षा स्याच्चोरसर्पेभ्यो व्याघ्रादिभ्यश्च सर्वदा ॥ २९ ॥

नन्दा भद्रा च सुरभिस्सुशीला सुमनास्तथा ।
तासां गर्तेषु संजाता विभूत्याद्या भवन्ति हि ॥ ३० ॥

---

1) श्रोतुमुत्कण्ठितं मनः

1) नः श्रुतम्.

कपिला कृष्णधवला धूम्रा रक्ता तथैव च ।
नन्दादीनां गवां वर्णाः क्रमेण परिकीर्तिताः ॥ ३१ ॥
सद्योजाताद्विभूतिश्च वामाद् भसितमेव च ।
अघोराद् भस्म संजातं पुरुषात् क्षारमेव च ॥ ३२ ॥
रक्षा चैशानवक्त्राच्च सर्वलोकहिताय वै ।
पञ्चवक्त्रमिति ज्ञात्वा महेशस्याखिलात्मनः ॥ ३३ ॥
तत्तद्वक्त्रेण संयोज्य स रुद्रो नात्र संशयः ।
धारयेन्नित्यकार्येषु विभूतिं च प्रयत्नतः ॥ ३४ ॥
नैमित्तिकेषु भसितं रक्षां रक्षासु सर्वदा ।
प्रायश्चित्तेषु सर्वेषु भस्मनाम यथाविधि ॥ ३५ ॥
क्षारं च मोक्षकार्येषु प्रयोक्तव्यं सदा बुधैः ।
कार्त्तिके मार्गशीर्षे वा माघे वाश्वयुजेऽपि वा ॥ ३६ ॥
वैशाखे श्रावणे वापि भस्मसंग्रहणं विदुः ।
1) भक्तिमुक्तिदमाग्नेयं स्नानं शुद्धेन भस्मना ॥ ३७ ॥
स्नानं चतुर्विधं तत्र भवेत् कल्पादिभेदतः ।
कल्पं चैवानुकल्पं च ह्युपकल्पमकल्पकम् ॥ ३८ ॥
तेष्वाद्यतममुत्कृष्टं पूर्वाभावे भवेत् परम् ।
कपिलामग्निवर्णां वा स्वर्णवर्णामथापि वा ॥ ३९ ॥
पूर्वस्मिन् दिवसे बद्ध्वा कोमलांश्च तृणांकुरान् ।
दत्वा स्तुत्वा प्रणम्याथ ग्रासमुष्टिं प्रदापयेत् ॥ ४० ॥
अग्निकुण्डसमुद्भूते! सर्वदेवमये! शुभे! ।
संसारार्णवमग्नं मां गौर्मातस्त्रातुमर्हसि ॥ ४१ ॥
यदेनः कर्मणा वाचा मनसा वा कृतं मया ।
तत्सर्वं क्षीयतामाशु प्रदक्षिणकृतेन मे ॥ ४२ ॥
गावो मे मातरस्सर्वाः पितरश्चापि गोवृषाः ।
ग्रासमुष्टिं मया दत्तां प्रतिगृह्णीत मातरः! ॥ ४३ ॥
इत्यादिभिर्मन्त्रवरैर्ग्रासं दत्वा पुनः पुनः ।
धूपदीपैस्समभ्यर्च्य रात्रौ संपूज्य भक्तितः ॥ ४४ ॥
अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
तृणमुष्टिप्रदानेन 2) फलमेतदुदीरितम् ॥ ४५ ॥
- एतत्फलं परगवां तद्द्विर्वं स्वगवां स्मृतम् ।
कृत्वा जागरणं रात्रौ गोमयग्रहणाय च ॥ ४६ ॥
- भूमिसंस्पर्शनात् पूर्वं गोमयं धारयेद् बुधः ।
रविवारेन्दुवारे वा श्रोणार्द्रादिवसेऽपि वा ॥ ४७ ॥
मन्दवारे तु रोहिण्यां कारयेद् भस्मसञ्चयम् ।
गृहीत्वा गोमयं शोध्य शुष्कं कृत्वार्कगोगुणैः ॥ ४८ ॥
अग्निं तत्र प्रतिष्ठाप्य ह्यालिप्ते गोमयाम्भसा ।
तत्रावाह्य शिवं भक्त्या संपूज्य शुचिमानसः ॥ ४९ ॥
रुद्रसूक्तेन होमं च कुर्याद् भक्तिविनम्रधीः ।
तत्र गोमयपिण्डं च दग्ध्वा संशोध्य पाथसा ॥ ५० ॥
आलोड्य पञ्चगव्येन पञ्चब्रह्मोद्भवेन च ।
श्रीसूक्तेन समामन्त्र्य रुद्रसूक्तं प्रजाप्य च ॥ ५१ ॥
शोषयेत् सूर्यसूक्तेन दुर्गासूक्तेन पूजयेत् ।
1) शक्तिपञ्चाक्षरीविद्ययावाह्याभ्यर्च्य वाग्यतः ॥ ५२ ॥
प्राणप्रतिष्ठां कुर्वीत शैवागमविधानतः ।
एवं सम्यग्विधानेन भस्म संग्राह्यमुत्तमम् ॥ ५३ ॥
तद्भस्म धारयेद्भक्त्या महापातकशान्तये ।
कल्प्यं तद्भस्म विज्ञेयमनुकल्पं तथोच्यते ॥ ५४ ॥
शुष्कं वनगतं यत्तु गोमयं चूर्णितं तथा ।
निर्दग्धमनुकल्पाख्यमपाकादिगतं च यत् ॥ ५५ ॥
वस्त्रेणोद्गालितं भस्म गोमूत्रावद्धपिण्डितम् ।
दग्धं प्रागुक्तविधिना भवेद्भस्मोपकल्पकम् ॥ ५६ ॥
अन्यैरापादितं भस्मह्यकल्पमिति कल्पितम् ।
तेष्वेकतममादाय पात्रेषु कलशादिषु ॥ ५७ ॥
त्रिसन्ध्यमाचरेत् स्नानं यथासंभवतोऽथवा ।
स्नपनोपक्रमे पादौ करौ प्रक्षाल्य वाग्यतः ॥ ५८ ॥
ततो मूलेन भसितमष्टकृत्वोऽभिमन्त्र्य च ।
ईशानेन शिरोदेशं मुखं तत्पुरुषेण च ॥ ५९ ॥
उरोदेशमघोरेण गुह्यं वामेन लेपयेत् ।
सद्येन पादौ सर्वाङ्गं प्रणवेनैव संचयेत् ॥ ६० ॥
आग्नेयं भस्मना स्नानं यतीनां तु विधीयते ।
भस्मस्नानं जलस्नानादसङ्ख्येयगुणाधिकम् ॥ ६१ ॥
तस्माद्वारुणमुत्सृज्य स्नानमाग्नेयमाचरेत् ।
वारुणं वारिणा स्नानमाग्नेयं भस्मना भवेत् ॥ ६२ ॥
वृष्ट्या सातपया दिव्यं वायव्यं रजसा गवाम् ।
मानसं ब्रह्मतादात्म्यं स्नानान्येतानि वै विदुः ॥ ६३ ॥
दिव्यवारुणवायव्यब्रह्माग्नेयेष्वनुत्तमम् ।
इति मत्वा शिवो भस्मस्नानमादौ ह्यकल्पयत् ॥ ६४ ॥

1) मुक्ति. 2) फलमाप्नोति दुर्लभम्.

1) शक्तिपञ्चाक्षरीमन्त्रेणावाह्य प्रयतश्शुचिः.

ब्रह्माथ देवा ऋषयो गन्धर्वा यक्षकिन्नराः ।
मरुद्गणाः पितृगणास्सर्वे भूतगणा अपि ॥ ६५ ॥

नित्यं च सर्वयत्नेन भस्मस्नानं प्रकुर्वते ।
तस्मादेतच्छिवस्नानमाग्नेयं यस्समाचरेत् ॥ ६६ ॥

1) भवेत्पापाच्च निर्मुक्तश्शिवलोके महीयते ।
यदाऽकार्यसहस्राणि कृत्वा यस्स्नाति भस्मना ॥ ६७ ॥

तत्सर्वं कुरुते भस्म यथाग्निस्तेजसा वनम् ।
सर्वतीर्थेषु यत् पुण्यं सर्वयज्ञेषु यत्फलम् ॥ ६८ ॥

तत्फलं कोटिगुणितं भस्मस्नानाद् भजेन्नरः ।
भस्मस्नानाद्विशुद्धात्मा जितक्रोधो जितेन्द्रियः ॥ ६९ ॥

मत्समीपमुपागम्य न भूयो विनिवर्तते ।
पञ्चाक्षरेण मन्त्रेण प्रणवेन युतेन च ॥ ७० ॥

उद्धूलनं त्रिपुण्ड्रं च नित्यं भक्त्या समाचरेत् ।
नमश्शिवायेति भस्म कृत्वा सप्ताभिमन्त्रितम् ॥ ७१ ॥

उद्धूलयेच्छरीरं तु त्रिपुण्ड्रं चापि धारयेत् ।
स्थानभेदं प्रवक्ष्यामि मूर्धा निटिलमेव च ॥ ७२ ॥

कर्णौ च चक्षुषी चैव नासिके चास्यमुत्तमम् ।
ग्रीवा स्कन्धौ च बाहू च कूर्परौ मणिबन्धकौ ॥ ७३ ॥

हृत्पार्श्वे नाभिमेढ्रपायू च सक्थिजङ्घे च जानुनी ।
गुल्फौ पादद्वयं चैव पृष्ठभागद्वयं तथा ॥ ७४ ॥

द्वात्रिंशत् स्थानमित्युक्तं भस्मना लेपयेत्ततः ।
रुद्राध्यायी सदा भस्मलिप्ताङ्गो मुच्यते नरः ॥ ७५ ॥

कुष्ठक्षयादिनिष्ठाङ्गस्तेजोराशिर्भवेत् पुनः ।
शिवेन विष्णुना चैव ब्रह्मणा वज्रिणा तथा ॥ ७६ ॥

देवताभिर्धृतं भस्म त्रिपुण्ड्रोद्धूलनात्मना ।
उद्धूलनं त्रिपुण्ड्रं च श्रद्धया नाचरन्ति ये ॥ ७७ ॥

तेषां नास्ति विनिर्मोक्षस्संसाराज्जन्मकोटिभिः ।
भस्मनोद्धूलनं यच्च तथा तिर्यक्त्रिपुण्ड्रकम् ॥ ७८ ॥

प्रमादादपि मोक्षार्थी न त्यजेदिति हि श्रुतिः ।
वामहस्ततले भस्म क्षिप्त्वाच्छाद्यान्यपाणिना ॥ ७९ ॥

अग्निरित्यादिमन्त्रेण स्पृशन् सप्ताभिमन्त्र्य च ।
ततोऽष्टकृत्वो मूलेन चाभिमन्त्र्यावकुण्ठ्य च ॥ ८० ॥

त्रिपुण्ड्रं धारयेद्धीमान्मूर्धादिककुदन्तकम् ।
एकादश त्रिपुण्ड्रस्य स्थानान्याहुश्शरीरके ॥ ८१ ॥

1) पञ्चपातकनिर्मुक्तश्शिवसायुज्यमाप्नुयात्.

शिरो ललाटं श्रवणद्वयं ग्रीवा भुजद्वयम् ।
वक्षो नाभिः पृष्ठभागः ककुदेकादशैव तु ॥ ८२ ॥

स्थानानि च त्रिपुण्ड्रस्य विज्ञेयानि मनीषिभिः ।
शिवो महेश्वरो रुद्रश्श्रीकण्ठश्शम्भुरीश्वरः ॥ ८३ ॥

महादेवः पशुपतिश्शङ्करो 1) वृषभध्वजः ।
परमात्मेत्यमी रुद्राः स्थानेष्वेषु यथाक्रमम् ॥ ८४ ॥

त्रिपुण्ड्रयुक्तस्थानेषु दध्यात् सजलभस्मना ।
शुद्धशीतजलेनैव भस्मना च त्रिपुण्ड्रकम् ॥ ८५ ॥

यो धारयेत् परं ब्रह्म स प्राप्नोति न संशयः ।
अकारोऽनामिका प्रोक्ता ह्युकारो मध्यमांगुलिः ॥ ८६ ॥

मकारस्तर्जनीस्थाने त्रिभिः कुर्यात् त्रिपुण्ड्रकम् ।
मध्यांगुलित्रयेणैव स्वदक्षिणकरेण तु ॥ ८७ ॥

षडंगुलायतं मानमथवालिकमानकम् ।
नेत्रयुग्मप्रमाणेन फाले दद्यात् त्रिपुण्ड्रकम् ॥ ८८ ॥

मध्यमानामिकांगुष्ठैरनुलोमविलोमतः ।
धारयेद्यस्त्रिपुण्ड्राङ्कं स रुद्रो नात्र संशयः ॥ ८९ ॥

ऋजु श्वेतमनुत्थानं स्निग्धं श्रोत्रप्रमाणकम् ।
एवं सुलक्षणोपेतं त्रिपुण्ड्रं सर्वसिद्धिदम् ॥ ९० ॥

प्रातःकाले च मध्याह्ने सायाह्ने च त्रिपुण्ड्रकम् ।
कदाचिद् भस्मना कुर्यात् स रुद्रो नात्र संशयः ॥ ९१ ॥

भस्म धार्यं त्रिसन्ध्यं च गृहस्थैर्जलसंयुतम् ।
सर्वकाले भवेत् स्त्रीणां यतीनां जलवर्जितम् ॥ ९२ ॥

वानप्रस्थस्य कन्याया दीक्षाहीननृणां तथा ।
माध्याह्नात् प्राग्जलैर्युक्तं परतो जलवर्जितम् ॥ ९३ ॥

षडंगुलप्रमाणेन ब्राह्मणानां त्रिपुण्ड्रकम् ।
नृपाणां चतुरंगुल्यो वैश्यानामंगुलद्वयम् ॥ ९४ ॥

शूद्राणामथ सर्वेषामेकांगुल्या त्रिपुण्ड्रकम् ।
भस्मना वेदमन्त्रेण त्रिपुण्ड्रस्य च धारणम् ॥ ९५ ॥

महापातकसम्भूततमसश्चण्डभास्करः ।
सत्यं शौचं तपो यज्ञस्तीर्थदेवाग्निपूजनम् ॥ ९६ ॥

सर्वं तस्य भवेद् व्यर्थं यस्त्रिपुण्ड्रं न धारयेत् ।
किमत्र बहुनोक्तेन वर्ण्यते च पुनः पुनः ॥ ९७ ॥

1) वृषकेतनः

मुक्त्वा त्रिपुण्ड्रं मोक्षस्य कारणं न हि विद्यते ।
एवं विभूतेरुत्पत्तिः क्रिया वैभवमीरितम् ॥ ९८ ॥

यदा कदा यत्रच कुत्र संभवं भस्मोद्धृतं स्यादिह येन केन वा ।
न तेन तुल्योभगवानजोऽपि वा विभूतिधारी स स तु केवलं शिवः ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारणचिदम्बर-
शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे अष्टमकल्लोले
सोमशेखरभूपचारित्रविभूतिविधानक्रमनिरूपणं नाम पञ्चमस्तरङ्गः

अथ षष्ठस्तरंगः

पूर्वं भूतेस्त्रिपुण्ड्रादिविधिस्सम्यङ् निरूपितः ।
उत्पत्त्यादिप्रपञ्चश्च रुद्राक्षाणामथोच्यते ॥ १ ॥

त्रिपुरस्य वधार्थाय देवानां रक्षणाय च ।
धनुर्वेदमयं गृह्य वेदानां मातरं पराम् ॥ २ ॥

गायत्रीं बाणमुद्धृत्य सर्ववेदमये रथे ।
दिव्यवर्षसहस्रं तु चक्षुरुन्मीलितं तथा ॥ ३ ॥

पुटाभ्यां चारुपद्माभ्यां निपेतुर्जलविन्दवः ।
तदम्बुविन्दवो जाता महारुद्राक्षवृक्षकाः ॥ ४ ॥

सुरासुरगणानां च वन्दनीया यथा शिवः ।
अवध्यस्सर्वभूतानां रुद्रवद्विचरेद् भुवि ॥ ५ ॥

यस्तु रुद्राक्षवृक्षस्य फलान्यङ्गेषु धारयेत् ।
बभूवुस्ते च रुद्राक्षा अष्टत्रिंशत्प्रभेदिनः ॥ ६ ॥

सूर्यनेत्रसमुद्भूताः कपिला द्वादश स्मृताः ।
सोमनेत्रोद्भवाः श्वेता तथा षोडशधा स्मृताः ॥ ७ ॥

वह्निनेत्रोद्भवाः कृष्णा दशभेदा भवन्ति हि ।
रुद्राक्षाणां च बृहतां धारणे स्यान्महाफलम् ॥ ८ ॥

धात्रीफलसमानं तु श्रेष्ठमेतदुदाहृतम् ।
बदरीफलमात्रं तु मध्यमं प्रोच्यते बुधैः ॥ ९ ॥

अधमं चणमात्रं स्यात् प्रक्रियैषामथोच्यते ।
ब्राह्मणाः क्षत्रिया वैश्याश्शूद्राश्चेति शिवाज्ञया ॥ १० ॥

वृक्षा जाताः पृथिव्यां ते तज्जातीयास्सुशोभनाः ।
श्वेतास्तु ब्राह्मणा ज्ञेयाः क्षत्रिया रक्तवर्णकाः ॥ ११ ॥

पीता वैश्यास्तु विज्ञेयाः कृष्णाश्शूद्रास्तथा स्मृताः ।
ब्राह्मणो बिभृयाच्छ्वेतं रक्तं राजा तु धारयेत् ॥ १२ ॥

पीतं वैश्यस्तु बिभृयात् कृष्णं शूद्रस्तु धारयेत् ।
ताम्राः स्निग्धा दृढाः स्थूलाः कण्टकैस्संयुताश्शुभाः ॥ १३ ॥

क्रिमिदष्टं भिन्नछिन्नं कण्टकैर्हीनमेव च ।
व्रणयुक्तमवृत्तं च षड् रुद्राक्षांश्च वर्जयेत् ॥ १४ ॥

स्वयमेव द्वारयुक्तं रुद्राक्षं स्यादिहोत्तमम् ।
यत्तु पौरुष यत्नेन कृतं तन्मध्यमं भवेत् ॥ १५ ॥

समान् स्निग्धान् दृढान् पक्वान् क्षौमसूत्रेण संयुतान् ।
धारयेत् सर्वगात्रेषु समास्यांश्च विचक्षणः ॥ १६ ॥

निकषे हेमरेखाभा यस्य रेखा प्रदृश्यते ।
तदक्षमुत्तमं विद्यात्तद्धार्यं शिवपूजकैः ॥ १७ ॥

पृष्ठे ब्रह्मा हरिर्नाले तदग्रे च सदाशिवः ।
केसरे सर्वदेवाश्च तस्माद्रुद्राक्षमुत्तमम् ॥ १८ ॥

रुद्राक्षं कण्ठदेशे दशनपरिवृत्तं मूर्ध्नि षड्त्रिंशदेवं
षट् षट् कर्णप्रदेशे करयुगलपदे द्वादश द्वादशैव ।
बाह्वोरिन्दोः कलाभिः पृथगुदितमथैकास्यमेकं शिखायां
वक्षस्यष्टोत्तरं यः कलयति शतकं स स्वयं नीलकण्ठः ॥ १९ ॥

एकवक्त्रं तु रुद्राक्षं परतत्त्वस्वरूपकम् ।
तद्धारणात् परे तत्त्वे लीयते विजितेन्द्रियः ॥ २० ॥

द्विवक्त्रं तु मुनिश्रेष्ठा ! अर्धनारीश्वरात्मकम् ।
धारणादर्धनारीशः प्रीयते तस्य निश्चितम् ॥ २१ ॥

त्रिवक्त्रमनलस्साक्षात् स्त्रीहत्यां हन्ति तत् क्षणात् ।
चतुर्वक्त्रं स्वयं ब्रह्मा नरहत्यां व्यपोहति ॥ २२ ॥

पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगम्यागमनाच्चैवमभक्ष्यस्य च भक्षणात् ॥ २३ ॥
मुच्यते सर्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ।
षड्वक्त्रं कार्त्तिकेयस्तु धारयेद्दक्षिणे करे ॥ २४ ॥
ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयः ।
सप्तवक्त्रं तथा सूर्यो धारयेद्दक्षिणे करे ॥ २५ ॥
सुवर्णस्तेयगोहत्यां नाशयेन्नात्र संशयः ।
विघ्नास्तस्य विनश्यन्ति [1] वसुवक्त्रस्य धारणात् ॥ २६ ॥
नवास्यो भैरवः प्रोक्तो भ्रूणहत्यां व्यपोहति ।
दशवक्त्रो देवदेवस्साक्षात् स्वमी जनार्दनः ॥ २७ ॥
नश्यन्ति सर्वपापानि दशवक्त्रस्य धारणात् ।
एकादशास्यो रुद्राक्षो रुद्र एकादशस्स्मृतः ॥ २८ ॥
शिरसा धारयेन्नित्यं तस्य पुण्यफलं शृणु ।
धेनुकोटिसहस्रस्य दत्तस्य फलमश्नुते ॥ २९ ॥
रुद्राक्षं द्वादशमुखं कण्ठदेशे तु धारयेत् ।
आदित्यस्स भवेन्नित्यं द्वादशात्मा शिवस्स्वयम् ॥ ३० ॥
स एव वामदेवः स्यात् सर्वकामप्रदायकः ।
माता पिता ततो बन्धुर्भ्रातरोऽथ तदात्मनः ॥ ३१ ॥
मुच्यन्ते सर्वपापेभ्यस्त्रयोदश मुखस्य तु ।
चतुर्दशमुखैर्युक्तं रुद्राक्षं यदि लभ्यते ॥ ३२ ॥
धारयेत् सततं मूर्ध्ना स रुद्रो नात्र संशयः ।
किंपुनर्बहुनोक्तेन पुण्येनैवहि लभ्यते ॥ ३३ ॥
अधुना संप्रवक्ष्यामि जपस्य विधिमुत्तमम् ।
गृहे जपं समं विद्याद् गोष्ठे शतगुणं भवेत् ॥ ३४ ॥
नद्यां शतसहस्रं चाप्यनन्तं शिवसन्निधौ ।
समुद्रतीरे प्रासादे गिरौ देवालयेषु च ॥ ३५ ॥
पुण्याश्रमेषु सर्वेषु जपः कोटिगुणो भवेत् ।
शिवस्य सन्निधौ चापि सूर्यस्याग्नेर्गुरोरपि ॥ ३६ ॥
दीपस्याधो जलस्यापि जपकर्म प्रशस्यते ।
तत्पूर्वाभिमुखं वश्यं दक्षिणं चाभिचारकम् ॥ ३७ ॥
पश्चिमं धनदं विद्यादुत्तरं शान्तिकृद्भवेत् ।
महात्म्यं वाचिकस्यैवं जपयज्ञस्य कीर्तितम् ॥ ३८ ॥
उपांशु स्याच्छतगुणं सहस्रं मानसस्स्मृतः ।
यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः ॥ ३९ ॥

[1] धारणादष्टवक्त्रिणः

मन्त्रमुच्चारयेद् वाचा जपयज्ञस्य वाचकः ।
शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयेत् ॥ ४० ॥
किञ्चित्कर्णगतं विद्यादुपांशु स जपस्स्मृतः ।
धिया यदक्षरश्रेण्या वर्णाद्वर्णं [1] पदात्परम् ॥ ४१ ॥
शब्दार्थं चिन्तयेद् भूयस्स [2] उक्तो मानसस्स्मृतः ।
त्रयाणां जपयज्ञानां श्रेयस्स्यादुत्तरोत्तरम् ॥ ४२ ॥
अतिह्रस्वे व्याधिपीडा चातिदीर्घे तपःक्षयः ।
अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत् ॥ ४३ ॥
भवेद्यद्व विशेषेण वैशिष्ट्यं तत्फलस्य च ।
मनस्संहरणं शौचं मौनं मन्त्रार्थचिन्तनम् ॥ ४४ ॥
अव्यग्रत्वमनिर्वेदो जपसिद्धेस्तु हेतवः ।
शृणुध्वं सर्वयज्ञेषु जपयज्ञो विशिष्यते ॥ ४५ ॥
जपेन देवता नित्यं स्तूयमाना प्रसीदति ।
प्रसन्नाभिमुखान् भोगान् दद्यान्मुक्तिं च शाश्वतीम् ॥ ४६ ॥
यक्षरक्षःपिशाचाश्च ग्रहास्सर्वेऽतिभीषणाः ।
अभितो नोपसर्पन्ति भयभीतास्समन्ततः ॥ ४८ ॥
जपेन पापं क्षपयेदशेषं यत्तत्कृतं जन्मपरम्परासु ।
जपेन रोगान् जयते च मृत्युं जपेन सिद्धिं लभते च मोक्षम् ॥
अथ वक्ष्येऽक्षमालाया लक्षणं घटनाक्रमम् ।
जपे फलविशेषं च स्नपनं कमलासन! ॥ ५० ॥
घटिता मालिका या सा प्रशस्ता सा शिखामणिः ।
शिखामणिरियं ब्रह्मन्! सीमा भूतो न संशयः ॥ ५१ ॥
रुद्राक्षस्य विशेषोऽस्ति मणिमालाकृतौ मनाक् ।
तथैवाम्बुरुहाक्षस्य कुशग्रन्थेश्च सुव्रताः! ॥ ५२ ॥
ब्राह्मणाः क्षत्रिया वैश्याश्शूद्राश्चेति चतुर्विधाः ।
श्वेता रक्तास्सुवर्णाभाः कृष्णवर्णाः क्रमात् स्मृताः ॥ ५३ ॥
एतेषु ब्राह्मणः श्रेष्ठो जपमालाविधौ भृशम् ।
अलाभे तु त्रिजातीनामपि वा स्वस्वजातयः ॥ ५४ ॥
कार्पासतन्तुना चैव निर्मितं ग्रन्थिवर्जितम् ।
त्रिगुणं त्रिगुणीकृत्य गुणत्रयसमन्वितम् ॥ ५५ ॥
प्रक्षाल्य पञ्चगव्येन तत्सूत्रं परिपूजयेत् ।
श्रीवृक्षपर्णैर्नवभिः पद्माकारेण कल्पयेत् ॥ ५६ ॥
सूत्रं मणींश्च गन्धादीन् कपिलां तत्र निक्षिपेत् ।
तारं शक्तिं मातृकां च सूत्रे चैव मणे तथा ॥ ५७ ॥

[1] पदात् पदम्. [2] जपो.

विन्यस्य पूजयेत्तत्र जुहुयाच्चैव मन्त्रतः ।
मणिमेकैकमादाय सूत्रे तत्रैव योजयेत् ॥ ५८ ॥

मुखं मुखेन संयोज्य पृष्ठं पृष्ठेन योजयेत् ।
प्रोक्तसंख्यान्यमेकाक्षं मेरुत्वे परिकल्पयेत् ॥ ५९ ॥

एकैकमणिमध्ये तु ग्रन्थिं तत्र प्रकल्पयेत् ।
अन्योन्याघर्षसिद्ध्यर्थं घर्षो जपविनाशकृत् ॥ ६० ॥

मणौ यदुन्नतं स्थानं मुखं पृष्ठं तु निम्नकम् ।
कमलाक्षस्य सूक्ष्मांशं सबिन्दुद्वितयं मुखम् ॥ ६१ ॥

सबिन्दुकश्च स्थूलांशः पृष्ठभाग इति स्मृतः ।
एवं ज्ञात्वाननं पृष्ठं मणिं सूत्रे निवेशयेत् ॥ ६२ ॥

कृत्वैवमथसंस्कारं यथाविधि समाचरेत् ।
प्रक्षाल्य पञ्चगव्येन तथा पञ्चामृतेन च ॥ ६३ ॥

संस्नाप्य तीर्थतोयेन शिवकुम्भस्थितेन च ।
सकृच्च मूलमन्त्रेण गन्धपुष्पाक्षतादिभिः ॥ ६४ ॥

धूपदीपनिवेद्यादि दत्वा चाष्टशतं न्यसेत् ।
मूलमन्त्रजपात् पश्चाद्दण्डवत्प्रणमेद्बुधः ॥ ६५ ॥

एवं या संस्कृता माला जपकर्मणि सर्वदा ।
अभीष्टदा सदात्यर्थं सा सर्वाघविनाशिनी ॥ ६६ ॥

मध्यमानामिकांगुष्ठै रक्षमालामणीन् स्पृशेत् ।
मध्यमायां न्यस्तमालां ज्येष्ठेनावर्तयेत् क्रमात् ॥ ६७ ॥

अङ्गुष्ठेन तु मोक्षाय तर्जनी शत्रुनाशिनी ।
मध्यमा धनदा शान्तिं करोत्येषा ह्यनामिका ॥ ६८ ॥

कनिष्ठा रक्षणी शस्ता जपकर्मणि शोभना ।
अङ्गुष्ठेन जपेज्जप्यं मध्यैरंगुलिभिस्सह ॥ ६९ ॥

अङ्गुष्ठेना विना कर्म कृतं यदफलं भवेत् ।
मोक्षार्थं पञ्चविंशत्या पौष्टिके सप्तविंशतिः ॥ ७० ॥

त्रिंशाच्च धनसंपत्त्यै पञ्चदश्याभिचारिके ।
जप्त्वाक्षमालां सकलां भ्रामयेच्च शिखामणिम् ॥ ७१ ॥

प्रदक्षिणं पुनर्वक्त्रं प्रारभ्यैवं समाचरेत् ।
स्वयं वामेन हस्तेन जपमालां न संस्पृशेत् । ॥ ७२ ॥

न धारयेत्करे मूर्ध्नि कण्ठे च जपमालिकाम् ।
जपकाले जपं कृत्वा सदा शुद्धजले न्यसेत् ॥ ७३ ॥

अलाभे जपमालायाः करशाखासु पर्वभिः ।
मध्यांगुल्यग्रपर्वादिप्रादक्षिण्यक्रमेण तु ॥ ७४ ॥

अथवा करशाखाभिर्जप्तव्यो जापकैर्जपः ।
तत्रांगुलीजपं कुर्वन् सांगुष्ठांगुलिभिर्जपेत् ॥ ७५ ॥

मध्यमानामिकामध्यपर्वद्वितयसंयुतम् ।
मेरुं प्रदक्षिणं कुर्वन्ननामामूलपर्वतः ॥ ७६ ॥

आरभ्य मध्यमामूलपर्वान्तं गणना क्रमात् ।
अङ्गुलीजपसंख्यानमेकमेकमुदाहृतम् ॥ ७७ ॥

रेखयाष्टगुणं विद्यात् पुत्रजीवैर्दशाधिकम् ।
शतं स्याच्छंखमणिभिः प्रवालैस्तु सहस्रकम् ॥ ७८ ॥

स्फाटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते ।
दशलक्षं च पद्माक्षैस्सौवर्णैः कोटिरुच्यते ॥ ७९ ॥

कुशग्रन्थ्या च रुद्राक्षैरनन्तगुणितं भवेत् ।
प्रदक्षिणनमस्कारौ जपश्चेति त्रयोऽपि च ॥ ८० ॥

सङ्ख्याहीनं कृतं सर्वं राक्षसेभ्यस्समर्पितम् ।
(मन्त्रहीना च या पूजा यच्च दानं विनोदकम् ॥ ८१ ॥
असङ्ख्यातं तु यज्जप्तं तत्सर्वं निष्फलं स्मृतम्) ।
अतश्च सङ्ख्यया विद्वान् जपेत् तत्फलसिद्धये ॥ ८२ ॥

जपमालाविधिस्त्वेवं प्रोक्तः कमलसंभव ! ।
एवं जपन् शिवं ध्यायेद्हृदये जगदीश्वरम् ॥ ८३ ॥

द्विधा प्रोक्तं शिवध्यानं सगुणं निर्गुणं तथा ।
आदौ सगुणमाश्रित्य पश्चान्निर्गुणमाश्रयेत् ॥ ८४ ॥

हृत्पद्मं शिवधर्मकन्दसहितं सुज्ञाननालं तथा
नित्यैश्वर्यदलाष्टकं शशिनिभं वैराग्यसत्कर्णिकम् ।
श्रीरुद्राश्रितकेसरान्वितमिदं सञ्चिन्त्य तन्मध्यमे
सूर्येन्दूज्ज्वलवह्निमण्डलगतं ध्यायेच्च् छिवं चिन्मयम ॥ ८५ ॥

प्रसन्नवदनं शान्तं द्व्यष्टवर्षीयमुज्ज्वलम् ।
अनेककोटिकन्दर्पसमलावण्यविग्रहम् ॥ ८६ ॥

चतुर्भुजं मृगीटङ्कवरदाभयपाणिकम् ।
चन्द्रलेखावरोत्तंसं शरच्चन्द्रायुतद्युतिम् ॥ ८७ ॥

दिव्याम्बरधरं देवं दिव्यगन्धानुलेपनम् ।
दिव्याभरणशोभाढ्यं दिव्यपुष्पैरलंकृतम् ॥ ८८ ॥

त्रिणेत्रं त्रिगुणाधारं त्रिमलक्षयकारणम् ।
सर्वमङ्गलया देव्या निजवामाङ्कशोभितम् ॥ ८९ ॥

भास्वत्कल्पतरोर्मूले फलपुष्पैरलंकृते ।
वेदिकायां सुखासीनं नवरत्नमयासने ॥ ९० ॥

अद्वैतमच्युतं विष्णुं नित्यं गीर्वाणगोचरम् ।
शिवं परं हृदि ध्यायेन्निश्चलीभूतमानसः ॥ ९१ ॥

धरण्यां सुखसम्पत्ति दा र्भाग्यस्तासने ।
तृणासने यशोहानिः पल्लवे चित्तविभ्रमः ॥ ९२ ॥
अभिचारादिके नीलं रक्तं वश्यादिके भवेत् ।
वस्त्रासने दरिद्रः स्यात् पाषाणे व्याधिपीडनम् ॥ ९३ ॥
दर्भासने तपोवृद्धिः प्रजावृद्धिश्च रत्नके ।
सर्वान् कामानवाप्नोति मनुष्यः कम्बलासने ॥ ९४ ॥
कृष्णाजिने भवेज् ज्ञानं मोक्षश्रीर्व्याघ्रचर्मणि ।
कृष्णाजिनं तु यत्नेन वर्जयेत् पुत्रवान् गृही ॥ ९५ ॥
एतेष्वेकं समास्थाय प्रशस्ततरमासनम् ।
धृत्वा विभूतिं सर्वाङ्गे धृत्वा रुद्राक्षमालिकाम् ॥ ९६ ॥
जप्त्वा पञ्चाक्षरीमन्त्रं ततो लिङ्गं प्रपूजयेत् ।
एवं नित्यं कर्म कृत्वा ततो विद्यां विचिन्तयेत् ॥ ९७ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणचिदम्बर-
शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे अष्टमकल्लोले
रुद्राक्षधारणजपविधिवर्णनं नाम षष्ठस्तरङ्गः

अथ सप्तमस्तरंगः

कीर्तितं भस्मनश्चैव रुद्राक्षाणां च वैभवम् ।
तद्धारणे च नियमो जपस्यापि विधिस्तथा ॥ १ ॥
प्रधानाङ्गानि मेधाया एतान्युक्तानि साम्प्रतम् ।
शिवपूजाविधिं स्वामिन्! ब्रूहि मे करुणार्णव! ॥ २ ॥
पुत्र! ते महिता बुद्धिर्यत् पृच्छसि शिवार्चनम् ।
शृणु तत्कथयिष्यामि यद् ज्ञातुं त्वमिहेच्छसि ॥ ३ ॥
यदेव गुरुणा दत्तमिष्टं लिङ्गं विधारितम् ।
सज्जिकास्थापितं तत्तु भक्तियुक्तः प्रपूजयेत् ॥ ४ ॥
यस्तु संपूजयेल्लिङ्गं नित्यं त्रिभुवनेशितुः ।
स स्वर्णमोक्षभाग्यस्य नित्यं भवति भाजनम् ॥ ५ ॥
इन्द्रनीलमयं लिङ्गं विष्णुरर्चयते सदा ।
विष्णुत्वं प्राप्तवांस्तेन साद्भुतैकं सनातनम् ॥ ६ ॥
ब्रह्मा पूजयते नित्यं लिङ्गं चैव शिलामयम् ।
तस्य संपूजनात्तेन प्राप्तं ब्रह्मत्वमुत्तमम् ॥ ७ ॥
शक्रोऽपि देवराजेन्द्रो लिङ्गं मणिमयं शुभम् ।
शैवं पूजयते नित्यं तेन शक्रत्वमाप्तवान् ॥ ८ ॥
लिङ्गमन्नमयं नित्यमग्निर्यजति भावितः ।
अग्नित्वं प्राप्तवांस्तेन तेजोभूतमनिन्दितम् ॥ ९ ॥
स्फाटिकं निर्मलं लिङ्गं वरुणोऽर्चयते सदा ।
तेन तद्वरुणत्वं हि प्राप्तं बुद्धिबलान्वितम् ॥ १० ॥
वायुः पूजयते भक्त्या लिङ्गं पित्तलजं शुभम् ।
वायुत्वं तेन संप्राप्तमनौपम्यगुणान्वितम् ॥ ११ ॥
लिङ्गं हेममयं पूतं धनदोऽर्चयते सदा ।
तेनासौ धनदो देवो धनदत्वमवाप्तवान् ॥ १२ ॥
ताम्रलिङ्गं सदाकालं भक्त्या देवो दिवाकरः ।
यजते विधिवत्तेन प्राप्तं सूर्यत्वमुत्तमम् ॥ १३ ॥
मुक्ताफलमयं लिङ्गं सोमः पूजयते सदा ।
तेन सोमोऽपि संप्राप्तः सोमत्वं सततोज्ज्वलम् ॥ १४ ॥
विश्वे देवा महात्मानो रौप्यलिङ्गं मनोहरम् ।
यजन्ते विधिवद् भक्त्या तेन विश्वत्वमाप्नुयुः ॥ १५ ॥
वसवः कांस्यलिङ्गं तु पूजयन्ति विधानतः ।
प्राप्तवन्तो महात्मानो वसुत्वं सुमहोदयम् ॥ १६ ॥
अश्विनौ पार्थिवं लिङ्गं यजन्तौ सुविधानतः ।
तेन तावश्विनौ देवौ दिव्यदेहं गतावुभौ ॥ १७ ॥
सर्वलोहमयं लिङ्गं यजन्ते मातरस्सदा ।
प्रापुस्तास्तेन मातृत्वं सर्वलोकेषु दुर्लभम् ॥ १८ ॥

कृष्णायसमयं लिङ्गं पूजयन्त्यसुरोत्तमाः ।
राक्षसाश्च महात्मानस्तेन तेऽमितविक्रमाः ॥ १९ ॥

त्रपुसीसमयं लिङ्गं पिशाचाः पूजयन्ति ते ।
दिव्यैश्वर्यसमायुक्ताः प्रयान्ति परमं पदम् ॥ २० ॥

लोहत्रयमयं लिङ्गं यजन्ते गुह्यकादयः ।
तेन योगबलोपेताः प्रयान्ति परमं पदम् ॥ २१ ॥

प्रवालरचितं लिङ्गं यजन्ते पन्नगोत्तमाः ।
तेन नागास्सुभोगाढ्याः प्राप्तास्ते परमं पदम् ॥ २२ ॥

एवं देवास्सगन्धर्वा राक्षसोरगयक्षपाः ।
पूजयन्ति सदाकालमीशानं सुरनायकम् ॥ २३ ॥

ये वाञ्छन्ति महाभोगान् राज्यं वा त्रिदशालयम् ।
तेऽर्चयन्ति सदा भक्त्या हरस्य चरणाम्बुजम् ॥ २४ ॥

विद्या रूपं धनं सौख्यं सत्कुलं हीनरोगता ।
स्वर्गवैराग्यमोक्षाश्च शिवपूजाविधेः फलम् ॥ २५ ॥

यो न पूजयते मोहाल्लिङ्गं त्रिभुवनेशितुः ।
न स स्वर्गस्य मोक्षस्य वैराग्यस्य च भाजनम् ॥ २६ ॥

यो ददाति गवां लक्षं दोग्ध्रीणां वेदपारगे ।
1) एकाहमर्चयेल्लिङ्गं तस्य पुण्यं ततोऽधिकम् ॥ २७ ॥

येऽर्चयन्ति सदा शम्भुं न ते प्राकृतमानुषाः ।
रुद्रलोकात् परिभ्रष्टास्ते रुद्रा नात्र संशयः ॥ २८ ॥

पापघ्नास्सर्वमर्त्यानां दर्शनात् स्पर्शनादपि ।
तस्मादेकमना भूत्वा यावज्जीवप्रतिज्ञया ॥ २९ ॥

शिवपूजाविधिं कुर्याद् यदीच्छेद् भूतिमात्मनः ।
लिङ्गे सदाशिवो देवस्साक्षान्नित्यं व्यवस्थितः ॥ ३० ॥

अनुग्रहाय लोकानां तस्माल्लिङ्गं प्रपूजयेत् ।
हन्यात् क्रुद्धोऽपि चाकाशं क्षुधार्तः खादयोच्छिला: ॥ ३१ ॥

त्यक्त्वा लिङ्गार्चनं मूढो मुक्त्यर्थी त्रितयं वृथा ।
यत्पुण्यं प्रतिमार्चायां 2) युगकोटिशतैरपि ॥ ३२ ॥

तत्फलं लभते मर्त्यो लिङ्गे तु घटिकार्धके ।
नियमाद्यस्तु कुर्वीत भक्तिं वा द्रोहमेव वा ॥ ३३ ॥

तस्यापि च प्रसन्नोऽसौ फलं यच्छति वाञ्छितम् ।
रुद्रं किञ्चित्समादाय क्षुल्लकं जलमेव वा ॥ ३४ ॥

यो दत्ते नियमेनासौ तस्मै दत्ते जगत्त्रयम् ।
चन्दनं बिल्वकाष्ठं च पुष्पाणि वनजान्यपि ॥ ३५ ॥

फलान्यारण्यकान्येव तस्य प्रीतिकराणि वै ।
वन्येषु यादृशी प्रीतिर्वर्तते परमेशितुः ॥ ३६ ॥

उत्तमेष्वपि नास्त्येव तादृक्षु ग्रामजेष्वपि ।
न कालनियमस्तत्र न देशस्य स्थलस्य वा ॥ ३७ ॥

यत्रास्य चित्तं रमते तत्र ध्यानेन केवलम् ।
स्वात्मन्येवं शिवेप्येवं शिवसायुज्यकारणम् ॥ ३८ ॥

अतिस्वल्पतरायुश्श्रीभूतेशांशाधिपो हि यः ।
स तु राजाहमस्मीति वादिनं हन्ति सान्वयम् ॥ ३९ ॥

कर्तापि सर्वलोकानां सुमहैश्वर्यवानपि ।
शिवश्शिवोऽहमस्मीति वादिनं यं च कं चन ॥ ४० ॥

आत्मना सह तादात्म्यात् कुरुते भागिनं भृशम् ।
उपचारानथो वक्ष्ये पुराणश्रुतिसम्मतान् ॥ ४१ ॥

उपचारास्त्रयः प्रोक्ताः पञ्चाष्टौ दश षोडश ।
द्वात्रिंशच्च चतुर्विंशत्युपचारा गृहोदिताः ॥ ४२ ॥

स्नानं पूजा च नैवेद्यमुपचारास्त्रयः स्मृताः ।
प्रदक्षिणनमस्कारौ पञ्चैते सम्प्रकीर्तिताः ॥ ४३ ॥

पार्थिवाद्यैश्च सद्यादिपञ्चमन्त्रैस्समर्चनम् ।
पञ्चोपचारमित्युक्तं ब्रह्मणा परमेष्ठिना ॥ ४४ ॥

सङ्गीतवाद्यनृत्तैस्तैरुपचाराष्टकं मुने ! ।
अर्घ्यं पाद्यं चाचमनं मधुपर्काचमौ तथा ॥ ४५ ॥

स्नानादयो निवेदान्ता उपचारा दश क्रमात् ।
आवाहनासने पाद्यमर्घ्यमाचमनीयकम् ॥ ४६ ॥

स्नानमाचमनं वस्त्रं तथाचामोपवीतके ।
आचामो गन्धपुष्पे च धूपो दीपं निवेदनम् ॥ ४७ ॥

प्रदक्षिणं नमस्कारा आत्मन्यारोपणं तथा ।
उपचाराष्षोडशोक्ताः स्कन्देनैते महात्मना ॥ ४८ ॥

आवाहनासने पाद्यमर्घ्यमाचमनीयकम् ।
स्नानं वस्त्रं चोपवीतमक्षता गन्धपुष्पकम् ॥ ४९ ॥

धूपो दीपं च नैवेद्यं फलं ताम्बूलकं स्तुतिः ।
प्रदक्षिणं नमस्कारो वाद्यं शय्या च गीतकम् ॥ ५० ॥

नृत्तं चात्मारोपणं च चतुर्विंशतिरित्यमी ।
आवाहनासने पाद्यमर्घ्यमाचमनीयकम् ॥ ५१ ॥

स्नानं वस्त्रं चोपवीतं भूषणं चानुलेपनम् ।
तिलाक्षताः पुष्पधूपदीपनैवेद्यकानि च ॥ ५२ ॥

1) सकृल्लिङ्गार्चनाद् धीमान् भजेत्. 2) कल्पकोटिशतैरपि.

मुखवासननीराजदर्पणं च फलानि च ।
प्रदक्षिणं च ताम्बूलं नमस्कारस्तुती तथा ॥ ५३ ॥
पुराणपठनं छत्रं व्यजनं चामरं तथा ।
शय्या सङ्गीतनृत्ते च वाद्यानि च ततः परम् ॥ ५४ ॥
आत्मन्यारोपणं चेति द्वात्रिंशदुपचारकाः ।
आवाहनं च यः कुर्यात् स तु क्रतुफलं भजेत् ॥ ५५ ॥
आसनं रुचिरं दत्वा शक्रत्वं समवाप्नुयात् ।
पाद्येन पातकं हन्यादर्घ्येणाप्नोत्यनर्घ्यताम् ॥ ५६ ॥
ततश्चाचमनं दत्वा शुचित्वं सौख्यमाप्नुयात् ।
स्नानं विधिभयं हन्याद्वस्त्रमायुष्यवर्धनम् ॥ ५७ ॥
उपवीतप्रदानेन ब्रह्म साक्षात् समश्नुते ।
भूषणानि च यो दद्याद् गाणापत्यमवाप्नुयात् ॥ ५८ ॥
नानापुष्पप्रदानेन स्वर्गराज्यमवाप्नुयात् ।
धूपो दहति पापानि दीपो मृत्युविनाशकः ॥ ५९ ॥
1)सर्वकामैस्तु नैवेद्यं दत्वा तृप्तिरतो भवेत् ।
मुखवासनदानेन कीर्तिमान् भवति ध्रुवम् ॥ ६० ॥
नीराजनेन शुद्धात्मा दर्पणेन प्रकाशवान् ।
फलदः पुत्रवान् मर्त्यस्ताम्बूलात् स्वर्गमाप्नुयात् ॥ ६१ ॥
प्रदक्षिणं ततः कुर्यात् पापं हन्ति पदे पदे ।
दण्डप्रणामं यः कुर्याद्देवमुद्दिश्य सन्निधौ ॥ ६२ ॥
वर्षाणि वसति स्वर्गे देहतो रेणुसङ्ख्यया ।
स्तोत्रेण दिव्यदेहोऽपि वाग्मी भवति कीर्तनात् ॥ ६३ ॥
पुराणपठनेनैव सर्वपापक्षयो भवेत् ।
छत्रं दत्वा महेशाय नन्दीश्वरसमो भवेत् ॥ ६४ ॥
तालवृन्तेन संवीज्य वायुलोके महीयते ।
मयूरचामरं दत्वा मयूरगणराड् भवेत् ॥ ६५ ॥
दत्वा तु चामरं यस्तु देवस्याग्रे प्रवीजयेत् ।
युगकोटिशतं स्वर्गे स्थित्वान्ते राज्यमाप्नुयात् ॥ ६६ ॥
मृदुशय्याप्रदानेन चाक्षयं पदमश्नुते ।
गीतं नृत्तं च यः कुर्यात् सर्वक्रतुफलं भजेत् ॥ ६७ ॥
सुखश्रवणतां गच्छेद्वाद्येन शिवसन्निधौ ।
हृत्पङ्कजे शिवं स्थाप्य शिवत्वं प्राप्नुयाद् ध्रुवम् ॥ ६८ ॥
एवं संक्षिप्य कथिता उपचारा अनुत्तमाः ।
अन्यानप्युपचारांस्तु मूलमन्त्रेण दापयेत् ॥ ६९ ॥

एवं नानाविधैर्बाह्यैरर्चयित्वोपचारकैः ।
इष्टलिङ्गं प्राणलिङ्गमेकीकृत्य समर्चयेत् ॥ ७० ॥
अन्तर्गतं चेदाकारं लिङ्गं शिवमयं परम् ।
पूजयेद् भवपुष्पैर्यत् प्राणलिङ्गार्चनं हि तत् ॥ ७१ ॥
अन्तः पवनसम्पृष्टसुसूक्ष्माम्बरशोभिते ।
मूर्धन्यचन्द्रविगलत्सुधासेकातिशीतले ॥ ७२ ॥
बद्धेन्द्रियनवद्वारे बोधदीपे हृदालये ।
पद्मपीठे समासीनं चेल्लिङ्गं 1) शिवरूपकम् ॥ ७३ ॥
भावयित्वा सदाकालं पूजयेद् भावशुद्धितः ।
क्षमाभिषेकसलिलं विवेको वस्त्रमुच्यते ॥ ७४ ॥
सत्यमावरणं प्रोक्तं वैराग्यं पुष्पमालिका ।
गन्धश्शमादिसम्पत्तिरक्षता निरहंकृतिः ॥ ७५ ॥
श्रद्धा धूपो महाज्ञानं जगद्भासिप्रदीपिका ।
भ्रान्तिं मूलप्रपञ्चस्य नैवेद्यं तन्निवेदनम् ॥ ७६ ॥
मौनं घण्टापरिस्पन्दस्ताम्बूलं विषयार्पणम् ।
विषयभ्रान्तिराहित्यं स्यात् प्रदक्षिणकल्पना ॥ ७७ ॥
बुद्धेस्तदात्मकत्वं तु नमस्कारक्रिया मता ।
एवं विधैर्भावपुष्पैरुपचारैरदूषितैः ॥ ७८ ॥
प्रत्यङ्मुखमना भूत्वा पूजयेल्लिङ्गमान्तरम् ।
अन्तः क्रियारतस्यास्य प्राणलिङ्गार्चनक्रमैः ॥ ७९ ॥
शिवात्मध्यानसम्पत्तिस्समाधिरिति कथ्यते ।
सर्वतत्त्वोपरिगतं सच्चिदानन्दभासुरम् ॥ ८० ॥
स्वप्रकाशमनिर्देश्यमवाङ्मानसगोचरम् ।
उमाख्यया पराशक्त्या दीपितं चित्स्वरूपया ॥ ८१ ॥
हंसरूपं परात्मानं सोऽहंभावेन चिन्तयेत् ।
तदेकतानतासिद्धिस्समाधिरिति कथ्यते ॥ ८२ ॥
पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः ।
जपकोटिसमं ध्यानं ध्यानकोटिर्मनोलयः ॥ ८३ ॥
एवं पूजाविधिः प्रोक्तो बाह्यश्चाभ्यन्तरस्तथा ।
इत्यनेन प्रकारेण सोमशेखरभूपतिः ॥ ८४ ॥
अब्रवीच्चेन्नमाम्बायै शिवपूजाविधिं परम् ।
अस्माकं च विधानेन कृत्वा पट्टाभिषेचनम् ॥ ८५ ॥
अयं कुमारो बसवप्पनायक इति स्मृतः ।
प्रगल्भतां भजेयावद् राज्यभारविचारणे ॥ ८६ ॥

1) सर्वकामांस्तु नैवेद्यं.

1) शिवविग्रहम्.

तावन्महीमवन्त्येनां प्रजानां कुरु पालनम् ।
इत्युदीर्य प्रियां राजा सोमशेखरनायकः ॥ ८७ ॥

स्वनामधेययोग्यं स प्राप्तः परशिवास्पदम् ।
अनन्तरं चेन्नमाम्बाप्यष्टैश्वर्यसमन्विता ॥ ८८ ॥

प्राणप्रियसमाभिष्टसदाचारैकवर्त्तिनी ।
अशिषत् सकलामुर्वीमुर्वीधरसुता यथा ॥ ८९ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारण चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद श्रीमत्केलदीबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातत्त्वसारभूते श्रीशिवतत्त्वरत्नाकरे अष्टमकल्लोले

शिवपूजाक्रमनिरूपणं नाम सप्तमस्तरङ्गः

अथ अष्टमस्तरंगः

कथितं चरितं रम्यं सोमशेखरभूपतेः ।
शिवपूजाविधानं च दुर्विज्ञेयंतरं नृणाम् ॥ १ ॥

एतद् द्वयं समाकर्ण्य कर्णद्वयसुधोपमम् ।
सन्तुष्टहृदयः स्वामिन् जातोऽभवमतः परम् ॥ २ ॥

चेन्नाम्बिकायाश्चरितं श्रोतुमस्ति कुतूहलम् ।
तदाख्याहि त्रिभुवने विख्यातगुणवारिधे! ॥ ३ ॥

कुमार! चरितं तस्या अमानुषजनोचितम् ।
आकर्णय समाकर्ण्य विस्मयानन्ददायकम् ॥ ४ ॥

सामादिभिरुपायैश्च गुणैष्षड्भिस्त्रिशक्तिभिः ।
सप्तांगैस्सहिते राज्ये सर्वदैव च जाग्रति ॥ ५ ॥

शिवधर्मानाचरन्ती राज्यं नीत्या चकार सा ।
अस्माकं सर्वविद्यासु कारयन्ती परिश्रमम् ॥ ६ ॥

विवाहमङ्गलमपि सवैभवमकारयत् ।
कीर्त्या धर्मेण विक्रान्त्या रक्षन्त्या धरणीमिमाम् ॥ ७ ॥

सर्वसन्नाहयुक्तेषु सामन्तेषु कदाचन ।
सीमोपान्तसमाक्रान्त्यै यतमानेषु (दस्युषु) ॥ ८ ॥

सेनामुख्यान् सहबलैः प्रेषयित्वा बलाधिकान् ।
निगृह्य तद्बलं सर्वं विरचय्य पलायितम् ॥ ९ ॥

चलाद्रिसुभगान् नागानश्वान् विश्वातिशायिनः ।
नानाविधानि वित्तान्यतिमुख्यानि विद्विषाम् ॥ १० ॥

आजहार निजोत्कर्षं ख्यापयन्ती दिगन्तरे ।
एवं क्षुद्रान् समुद्वृत्तान् सामन्तान् विनिगृह्णती ॥ ११ ॥

चकार शासनाधीनं सर्वं सामन्तमण्डलम् ।
ततश्च सर्वयवनसार्वभौमपदं गते ॥ १२ ॥

नृपश्रेष्ठान् द्विपञ्चाशत्सङ्ख्याकान् बलवत्तरान् ।
उन्मूल्य वैरितां प्राप्तुं छत्राधिपतिशब्दितम् ॥ १३ ॥

रामराजनृपं जित्वा गृहीतुमभिवाञ्छति ।
म्लेच्छे वरङ्गखानाख्ये समायाति बलीयसि ॥ १४ ॥

कालं प्रतीक्षमाणाथ निर्गत्य स सुधीस्ततः ।
चरित्वा तत्र तत्रापि नृपो मार्गवशागतः ॥ १५ ॥

समागतोऽभवद्देशमिमं च सपरिच्छदः ।
स्वदेशं समुपायान्तं रामराजं विभाव्य सा ॥ १६ ॥

महतामपि शूराणां बलिनां नीतिवेदिनाम् ।
पराभवस्तत्र तत्र पूर्वेषामपि [1] दृश्यते ॥ १७ ॥

हरिश्चन्द्रश्च नहुषो नलो दाशरथिस्तथा ।
धर्मात्मजस्तथान्ये च नृपास्तत्र निदर्शनम् ॥ १८ ॥

सम्पदो महतामेव महतामेव चापदः ।
हीयते वर्धते चन्द्रो नैवं नक्षत्रतारकाः ॥ १९ ॥

तस्मादुपागतायास्मै संमाननमिहोचितम् ।
इत्यालोच्य निजैस्सार्धं मन्त्रयित्वा च मन्त्रिभिः ॥ २० ॥

महार्हवस्त्रभूषाद्यैर्मानयामास मानितम् ।
अनुधाव्य तमायान्तमुद्धतं म्लेच्छनायकम् ॥ २१ ॥

[1] श्रूयते.

वर्ण्यमानेनाब्धिनेव स्वबलेनानुधावितम् ।
स्वाम्याज्ञाचण्डवातेन प्रेर्यमाणेन वेगिना ॥ २२ ॥

ज्वलन्तमधिकं भूयो महतामर्षवह्निना ।
सेनाप्रधानमुखतः पराजयमवापयत् ॥ २३ ॥

तद्बलं चानयत् सर्वं यावनं शमनालयम् ।
अमेयबलपूर्णस्य समस्तधरणीशितुः ॥ २४ ॥

यवनाधिपतेस्सैन्यं जेतुं कोऽप्यत्र न क्षमः ।
एषा विजितवत्यासीत् सैन्यं तस्यापि च स्वयम् ॥ २५ ॥

असाधारणविक्रान्तिरियमित्यखिलैस्स्तुता ।
आसेतुहिमवत्पादं कीर्तिं प्राप सुनिर्मलाम् ॥ २६ ॥

एतां वार्तामुपश्रुत्य यवनाधिपतेस्ततः ।
सन्तुष्टान्नागतुरगग्रासोऽलङ्कारपूर्वकम् ॥ २७ ॥

सम्मानं प्राप्य धरणीमपालयदशात्रवाम् ।
पुनः क्षुद्रांश्च सामन्तान् गलिताहंकृतीन् व्यधात् ॥ २८ ॥

पुरातनकृतान् धर्मान् भूसुरैरन्ववर्धयत् ।
ततो विशेषसंवार्थं मूकाम्बायाः स्वभक्तितः ॥ २९ ॥

भूमिं वितीर्य पर्याप्तां स्वनामपरिचिह्निताम् ।
अग्रहारं च चेन्नाम्बापुरमित्यतिविश्रुतम् ॥ ३० ॥

निर्माप्य क्षितिदेवानां सद्वृत्तीः परिकल्प्य च ।
भूद्धाणां कारयित्वा मठांश्च सुबहून् वरान् ॥ ३१ ॥

धर्मान्नूत्नांश्चिरत्नांश्च वर्धयन्ती विशेषतः ।
वितन्वानेष्टलिङ्गार्चां तथा श्रीजङ्गमार्चनम् ॥ ३२ ॥

कुर्वाणा भक्तितः स्वीयैः कारयन्ती च तद्द्वयम् ।
भूद्धाणां षण्णवतिसहस्रोत्तरलक्षकम् । ॥ ३३ ॥

भोजयामास रुचिरैर्भोज्यैष्षड्रसमिश्रितैः ।
आनन्दितानां तेषां च लेभे भूयोऽप्यनुग्रहम् ॥ ३४ ॥

इदं सर्वेषु धर्मेषु समुत्कृष्टतमं मतम् ।
सन्तर्पणं परं भक्त्या यच्छैवानामभीप्सितैः ॥ ३५ ॥

तस्मादतिथिमायान्तमभिगच्छेत् कृताञ्जलिः ।
अभ्युत्थानाभिगमनं स्वागतं चासनं प्रियम् ॥ ३६ ॥

पादोदकमनुव्रज्य स्वर्गसोपानसप्तकम् ।
आसनाभ्यञ्जनस्नानवस्त्रधान्याज्ञनादिभिः ॥ ३७ ॥

पूजयेच्छिवभक्तं यस्स याति परमां गतिम् ।
उपपातककोट्यश्च ब्रह्महत्यायुतानि च ॥ ३८ ॥

दहत्यशेषपापानि शिवभक्तस्य दर्शनम् ।
भक्तानां दर्शनादेव नृणां स्वर्गादयो द्विजाः ॥ ३९ ॥

न दुर्लभा न सन्देहो भक्तानां किंपुनस्तथा ।
गङ्गास्नानादिकं पुण्यं दर्शनाच्छिवयोगिनाम् ॥ ४० ॥

सर्वतीर्थाभिषेकाश्च तत्संभाषणमुत्तमम् ।
शिवभक्तमथायान्तं दृष्ट्वापि सुमुखः प्रियः ॥ ४१ ॥

प्रणामादि करोत्येव महादेवं यथा तथा ।
स वै भक्त इति ज्ञेयः पुनाति च जगत्त्रयम् ॥ ४२ ॥

मनः प्रसन्नतां याति पूज्य माहेश्वरं तथा ।
अकुलः कुलयुक्तः स्यान्नमस्कारपुरस्सरम् ॥ ४३ ॥

शिवभक्तमथायान्तं दृष्ट्वैव गृहसंस्थिताः ।
क्रीडन्त्योषधयस्सर्वा यास्यामः परमां गतिम् ॥ ४४ ॥

हस्तपादादिसाधर्म्यान्मर्त्यान् रुद्रवपुर्धरान् ।
शिवलिङ्गे शिलाबुद्धिं कुर्वाण इव पातकी ॥ ४५ ॥

स्थावरं जङ्गमं चैव द्विविधं लिङ्गमुच्यते ।
जङ्गमस्यावमानेन स्थावरं निष्फलं भवेत् ॥ ४६ ॥

शिवाश्रमगतो भक्तश्शिवभक्तं प्रपूजयेत् ।
स्वागतासनदानेन पाद्यार्घ्याद्यभिवादनैः ॥ ४७ ॥

यस्तु महेश्वरो नित्यं जातमात्रोपजीवकः ।
उत्तमस्सर्वपात्राणां तस्मै दत्तं यदक्षयम् ॥ ४८ ॥

शिवयोगिशरीरे तु नित्यं सन्निहितश्शिवः ।
योगीन्द्रं पूजयेत्तस्मात् साक्षात्संपूजितश्शिवः ॥ ४९ ॥

अकल्मषमतिस्तस्मात् पूजयेच्छिवशासनम् ।
गुणवत्पात्रपूजाया वरं शासनपूजनम् ॥ ५० ॥

पात्रशासनयोर्मध्ये शासनं तु विशिष्यते ।
नित्यं नैमित्तिकं काम्यं विमलं च चतुर्विधम् ॥ ५१ ॥

हरस्य प्रीणनार्थं यच्छिवभक्त्या विधीयते ।
दानं तद्विमलं प्रोक्तं केवलं मोक्षसाधनम् ॥ ५२ ॥

युगपच्छिवलिंगैक्यपादस्पृष्टरजांसि च ।
पतन्ति मस्तके यस्य स मुक्तो नात्र संशयः ॥ ५३ ॥

पादप्रक्षालनं यस्तु कुरुते शीतलोदकैः ।
वीरमाहेश्वरस्यासौ चतुरम्बुधिराड् भवेत् ॥ ५४ ॥

यस्तु मृद्वासनं दद्याच्छिवभक्तस्य सादरम् ।
धृतलिङ्गस्य स पुमान् सप्तद्वीपाधिपो भवेत् ॥ ५५ ॥

वस्त्रं शीतापनोदार्थं यो दद्याच्छिवयोगिने ।
स सर्वभोगसंयुक्तो लभते ब्रह्मणः पदम् ॥ ५६ ॥

यावत्तद्वस्त्रतन्तूनां परिसङ्ख्या च यावती ।
तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥ ५७ ॥

छत्रं चोपानहं यस्तु चामरव्यजनानि च ।
दद्याल्लिङ्गार्चकायासावैन्द्रं पदमवाप्नुयात् ॥ ५८ ॥

धनं दद्याद्यथाशक्ति यो महाशिवयोगिने ।
स धनेशत्वमाप्नोति सर्वभोगसमन्वितः ॥ ५९ ॥

कारयित्वा गृहं सम्यक् सर्वोपकरणान्वितम् ।
लिङ्गाङ्गसंगिने दद्याद्यस्स शैवं पदं व्रजेत् ॥ ६० ॥

सकृल्लिङ्गार्चके दत्वा भूमिं गोचर्ममात्रकीम् ।
भूलोकाधिपतिर्भूत्वा शिवेन सह मोदते ॥ ६१ ॥

सकृल्लिङ्गार्चके दत्वा धेनुं बहुपयोधराम् ।
रुद्रलोके स वसति यावद्रोमाणि तत्पशोः ॥ ६२ ॥

फलं मूलं च भक्ताय शाकानि विविधानि च ।
भक्तिपूर्वं तु यो दद्यात् स याति परमां गतिम् ॥ ६३ ॥

यद्यदात्महितं लोके तत्तद् द्रव्यमवञ्चयन् ।
शिवलिङ्गार्चके दद्यात्तेन तुष्यामि पार्वति! ॥ ६४ ॥

शिवयोगी गृहे यस्य भिक्षां गृह्णाति सत्कृतः ।
कुलं तारयते तेन सप्त सप्त च सप्त च ॥ ६५ ॥

यस्ताम्रपात्रं सुकृतं प्रदद्याच्छिवयोगिने ।
सुवर्णपात्रदानस्य फलं प्राप्नोति मानवः ॥ ६६ ॥

रौप्यं सौवर्णपात्रं वा निवेद्य शिवयोगिने ।
कोटिकोटिं च कल्पानां शिवलोके महीयते ॥ ६७ ॥

कलशं कर्करीं वापि वस्त्रपूताम्बुपूरितम् ।
प्रदद्याच्छिवभक्तेभ्यो तस्य पुण्यफलं शृणु ॥ ६८ ॥

शुद्धस्फटिकसंकाशैर्विमानैस्सार्वकामिकैः ।
संप्राप्य शाङ्करपुरं कोटिवर्षं प्रमोदते ॥ ६९ ॥

सुशीतलेन तोयेन शिवभक्तं पिपासितम् ।
तर्पयित्वा शैवलोके वर्षकोटिं प्रमोदते ॥ ७० ॥

नैवेद्यं पुरतो न्यस्तं दर्शनात् स्वीकृतं मया ।
रसान् भक्तस्य जिह्वाग्रादश्नामि कमलोद्भव! ॥ ७१ ॥

शिवस्य नित्यतृप्तस्य किं नाम क्रियते जनैः? ।
यत्कृतं शिवभक्तानां तेन प्रीतो भवेच्छिवः ॥ ७२ ॥

येन केन प्रकारेण शिवभक्तस्य जायते ।
मनस्तुष्टिस्तथा कुर्यात् पूजासैव मयोदिता ॥ ७३ ॥

संसारसागरेऽगाधे दुःखावर्तशताकुले ।
मज्जतां मानवानां वै पूजामाहेश्वरस्य नौः ॥ ७४ ॥

एवं स्वरूपं विज्ञाय महिमानं फलं तथा ।
लिङ्गजङ्गमयोः पूजां कुर्वाणा भक्तिसंयुता ॥ ७५ ॥

अस्माकमेतदखिलं दुर्विज्ञेयं न्यरूपयत् ।
ततः परं मयि प्रेम्णा करणीयं समादिशत् ॥ ७६ ॥

उक्तं त्वं नान्यथा ब्रूयाः क्वापि कार्यं न संत्यज ।
मा मुञ्च मधुरालापं न ब्रूया हृदयं शठे ॥ ७७ ॥

अमार्गे न पदं कुर्याः स्वेषु भेदं न कारय ।
पापं विमुञ्च सुकृतं कुरु शम्भोः पदं भज ॥ ७८ ॥

भज भूतेषु करुणां संश्रितान् परिपालय ।
न निन्दां रचयान्येषां न स्वैरमिह संचर ॥ ७९ ॥

जय कामादिकान् दोषान् जुगुप्सां च भवे कुरु ।
व्यसने भयमुन्मुञ्च जहीहि विभवे मदम् ॥ ८० ॥

संप्रधारय तत्त्वानि भावयाद्वैतमान्तरम् ।
नातिवर्तस्व समयं वेदज्ञांश्च समर्चय ॥ ८१ ॥

स्वप्नं भावय संसारं कोहमित्यनुचिन्तय ।
हसेरहसनीयस्त्वं ब्रूहि वाक्यमनुत्तमम् ॥ ८२ ॥

जनस्तुतिपदं जीवेरनावृत्तिगतिं भजेः ।
शिवं प्रसाद्य बहुधा संततानन्दभाग्भव ॥ ८३ ॥

कदाचिदमुमर्थं त्वं मा विस्मार्षीरिति स्वयम् ।
उदीर्य विद्यास्सकला नानाभेदान्निरूप्य मे ॥ ८४ ॥

तथाप्युपदिशाशेषमित्याज्ञाप्य च मां प्रति ।
वियुक्ता प्राणनाथेन सोमशेखरभूभुजा ॥ ८५ ॥

पुनस्तं मार्गमाणेव तत्पदं यातुमैहत ।
सालोक्यादीन्यतिक्रम्य चत्वार्यपि पदानि च ॥ ८६ ॥

स्वयं शिवपदेनैक्यं प्राप्यानन्दमविन्दत ।
तदनन्तरमप्यस्मद्वंशजानां महीभृताम् ॥ ८७ ॥

प्राचीनानां चरित्रेषु शौर्यादिषु गुणेषु च ।
एकमंशं सहस्रान्तरनुवर्तामहे वयम् ॥ ८८ ॥

क्वाहं क्व च नराः पूर्वे पुत्रेदं संप्रधारय ।
आत्मप्रशंसनं सद्भिर्नकर्तव्यं कदाचन ॥ ८९ ॥

इत्यस्मिन् विषये स्वामिन्नुचितैषोपसंहृतिः ।
श्रीमतां ज्ञानविभवं धर्माचरणनिष्ठताम् ॥ ९० ॥

कीर्तिः प्रताप औदार्यं गाम्भीर्यं धैर्यमित्यपि ।
एवमादींस्तु सुगुणान् प्रस्तोतुं किं क्षमोऽस्म्यहम्? ॥ ९१ ॥

आननानां सहस्रेण वक्तुं शेषोऽपि न क्षमः ।
तथाप्येतेषु सर्वेषु दृश्यन्ते खलु साक्षिणः ॥ ९२ ॥

निर्लेपता च विषये ज्ञानवैभवसाक्षिणी ।
धर्मोदासोऽन्नसत्रादिधर्मनिष्ठा निदर्शनम् ॥ ९३ ॥

आगच्छन्तः प्रतिकल्पमर्थिनो हरिदन्तरात् ।
कीर्तौ वः स्फूर्तिमत्यास्ते साक्षिणः प्रतिभान्ति मे ॥ ९४ ॥

प्रत्यर्थिपीडनाल्लेशानभिज्ञं जनमण्डलम् ।
राज्ये यत्त्वत्प्रतापस्य साक्षि नित्यं विजृम्भणे ॥ ९५ ॥

विद्वांसोऽनितरापेक्षास्साक्षिणो दानवैभवे ।
सर्वविद्यास्वभिज्ञत्वे साक्षिणीयं कृतिः कृता ॥ ९६ ॥

किमत्र बहुनोक्तेन? गुणास्सर्वेऽपि च त्वयि ।
अन्यदस्ति मम श्रोतुमपेक्षा हृदि सद्गुरो! ॥ ९७ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारण
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैत
विद्याविशारदश्रीमत्केलदिवसवराजेन्द्रविरचिते
वेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे सप्तमकल्लोले
चेन्नाम्बिकाचरित्रमांहेश्वरमहिमतद्दान
फलातिशयादिवर्णनं
नामाष्टमस्तरङ्गः

पाराशरं मानवं च याज्ञवल्क्यकृतिं तथा ।
मतं परशुरामस्य द्रोणाचार्यमतं तथा ॥
वाराहीं संहितां चैव वातुलं पारमेश्वरम् ।
आगमांश्चोपनिषदो जाबालाख्यं ततः परम् ॥

शिवागमं च संगृह्य कल्लोलः पूरितोऽष्टमः ॥

एकादशाधिकं त्वत्र सहस्रं ग्रन्थसम्मितिः ।
तरङ्गैरष्टसङ्ख्याकैरस्मिन् समुपलक्षिते ॥

श्रीमत्सद्गुणसोमशेखरलसच्चेन्नाम्बिकासूनुना
श्रीदीक्षागुरुचेन्नवीरकरसंजातेन गौरीपतौ ॥

देवे दत्तहृदा सदापि बसवक्षोणीभृता निर्मिते
कल्लोलः परिपूरितः कृतिवरे त्वस्मिन्नभूदष्टमः ॥

श्रीः

श्रीशिवतत्त्वरत्नाकरे

नवमकल्लोले

प्रथमस्तरंगः.

मातर्वारिजकुड्मलावुरसि ते नाप्तौ विकासं कुतः?
तातस्तत्र नखेन चन्द्रकलिकां दत्ते विलासाय किम्? ।
ग्लानिं तत्करसम्पुटेन मृदितौ नेतश्च किं? तद्वदे-
त्याख्यात्यद्रिसुतां सुते नतमुखीं श्लिष्यन् शिवोऽस्तु श्रिये ॥ १ ॥

स्वामिन्! वंशेऽत्र जातानां नृपाणां पुण्यजन्मनाम् ।
चरितानि विचित्राणि संश्रुत्यानन्दितोऽभवम् ॥ २ ॥

स्थूलोंऽश एव ब्रह्माण्डं पिण्डाण्डं सूक्ष्मरूपकम् ।
इति पूर्वं समाख्याय प्रोक्तो ब्रह्माण्डविस्तरः ॥ ३ ॥

परिभावयतो मे तत् पुरोवर्तीव लक्ष्यते ।
अधुना वद पिण्डाण्डक्रमं विस्तरतः प्रभो! ॥ ४ ॥

पुत्र! ते तत्प्रवक्ष्यामि यत् पुनश्श्रोतुमिच्छसि ।
केवलं पुण्यपापाभ्यां तयोस्संमिश्रणेन च ॥ ५ ॥

उपभोगसहं कर्मफलानां गृह्यते वपुः ।
तत्र धर्मेण चैकेन देवानामौपभोगिकम् ॥ ६ ॥

सद्यः प्रजायते दिव्यं शरीरं भूतसारतः ।
अथ नारकिणां पुंसामधर्मादिव केवलात् ॥ ७ ॥

क्षणमात्रेण भूतेभ्यश्शरीरमुपजायते ।
कर्मणाप्यभिमिश्रेण यच्छरीरमिहात्मनः ॥ ८ ॥

तद्भूतपरिणामेन विज्ञेयं हि चतुर्विधम् ।
उद्भिदः स्थावरा ज्ञेयास्तृणगुल्मादिरूपिणः ॥ ९ ॥

क्रिमिकीटपतङ्गाद्याः स्वेदजा नाम देहिनः ।
अण्डजाः पक्षिणस्सर्वे नक्रमत्स्याहिकच्छपाः ॥ १० ॥

जरायुजाश्च विज्ञेया मानुषाश्च चतुष्पदाः ।
जायन्ते स्थावराणां च ततोऽन्नादखिलं जगत् ॥ ११ ॥

तत्र सिक्ता जलैर्भूमिरन्तरूष्मप्रपाचिता ।
वायुना व्यूहमाना च बीजत्वं प्रतिपद्यते ॥ १२ ॥

यथर्तु तानि बीजानि संसिक्तान्यम्भसा पुनः ।
उच्छूनतां मृदुत्वं च मूलभावं व्रजन्ति च ॥ १३ ॥

तन्मूलादंकुरोत्पत्तिरङ्कुरात् पर्णसंभवः ।
पर्णान्नालं ततः काण्डं काण्डाच्च प्रसवः पुनः ॥ १४ ॥

प्रसवाच्च तुषः क्षीरं क्षीरात्तण्डुलसंभवः ।
तण्डुलाच्च ततः पक्वान्म्रियन्त्योषधयस्तथा ॥ १५ ॥

यवाद्याश्शालिपर्यन्ताः श्रेष्ठास्सप्तदश स्मृताः ।
ओषध्यः फलपाकान्ताश्शेषाः क्षुद्राः प्रकीर्तिताः ॥ १६ ॥

च्युता लूना मर्दिताश्च शनैरुत्थाय संस्कृताः ।
सूर्योलूखलयन्त्राद्यैस्स्थाल्यामुदकवह्निना ॥ १७ ॥

षड्विधाहारभेदेन परिणामं व्रजन्ति ताः ।
अन्योन्यरससंयोगादनेकस्वादुतां गताः ॥ १८ ॥

भक्ष्यं भोज्यं च पेयं च लेह्यं चोष्यं च पिच्छिलम् ।
इति भेदास्तु षट् प्रोक्ता मधुराद्याश्च षड्रसाः ॥ १९ ॥

तदन्नं स्थूलकवलैर्ग्रासैर्भुक्तं च देहिभिः ।
अन्तस्थमाशये पूर्वं प्राणं स्थापयते क्रमात् ॥ २० ॥

अपृथग्भूतमाहारं स वायुः कुरुते द्विधा ।
संप्रविश्यान्नमध्ये तु पृथगन्नं पृथग्जलम् ॥ २१ ॥

अग्नेरूर्ध्वं जलं स्थाप्य तदन्नं तु जलोपरि ।
जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमयेच्छनैः ॥ २२ ॥

वायुना ध्मायमानोऽग्निरत्युष्णं कुरुते जलम् ।
तदन्नमुष्णतोयेन समन्तात् पच्यते पुनः ॥ २३ ॥

द्विधा भवति तत्पक्वं पृथक्किट्टं पृथग्रसम् ।
मलैर्द्वादशभिर्भिन्नं किट्टं देहाद् बहिर्व्रजेत् ॥ २४ ॥

कर्णाक्षिनासिकाजिह्वा दन्तशिश्नगुदा नखाः ।
मलाश्रयाः कफस्वेदौ विण्मूत्रे द्वादश स्मृताः ॥ २५ ॥

हृत्पद्मे प्रतिवद्धाश्च सर्वा नाड्यस्समन्ततः ।
तासां मुखेषु तत्सूक्ष्मं प्राणः स्थापयते रसम् ॥ २६ ॥

रसेन तेन ता नाडीः प्राणः पूरयते पुनः ।
प्रत्यर्पयन्ति संपूर्णास्ताश्च देहं समन्ततः ॥ २७ ॥

ततस्स नाडीमध्यस्थश्शरीरेणोष्मणा रसः ।
पच्यते यच्च पानाच्च भवेत्पाकद्वयं ततः ॥ २८ ॥

चर्मविष्टं समन्ताच्च रुधिरं च प्रजायते ।
रक्ताल्लोमानि मांसं च केशाः स्नायुश्च मांसतः ॥ २९ ॥

स्नायोस्सिरास्तथाऽस्थीनि नखमज्जेऽस्थिसंभवे ।
मज्जाकरणवैकल्याच्छुक्लं च प्रसवात्मकम् ॥ ३० ॥

इति द्वादशधान्नस्य परिणामः प्रकीर्तितः ।
अन्नाच्चैव ततश्शुक्लं शुक्राद्देहस्य संभवः ॥ ३१ ॥

ऋतुकाले यदा शुक्लं निर्दोषं योनिसंस्थितम् ।
तदा तद्वायुना स्पृष्टं स्त्रीरक्तेनैकतां व्रजेत् ॥ ३२ ॥

विसर्गकाले शुक्लस्य जीवः करणसंयुतः ।
प्रीत्या प्रविशते योनिं कर्मभिस्स्वैर्नियोजितः ॥ ३३ ॥

स्त्रियस्संसर्गकाले तु यो धर्मं मनसा स्मरेत् ।
तत्पुत्रो धर्मवान् भूयादिति शास्त्रेषु निश्चयः ॥ ३४ ॥

पत्नीसंसर्गकाले तु जारबुद्ध्या रमेत यः ।
तद्गर्भजो भुजङ्गः स्यात् परनारीपरायणः ॥ ३५ ॥

चोरबुद्धिं हृदि स्थाप्य स्वस्त्रीसङ्गरतो यदि ।
चोरस्तद्गर्भजो भूयात् खलो वा स विजायते ॥ ३६ ॥

बहुनात्र किमुक्तेन यद्यन्मनसि भावयेत् ।
तद्गर्भजस्तद्गुणवान् जायते नात्र संशयः ॥ ३७ ॥

ऋतौ पुरुषनक्षत्रे यामादूर्ध्वं रमेत् स्त्रियम् ।
उभावेकमनस्कौ चेज्जायते पुरुषोत्तमः ॥ ३८ ॥

ऋतौ चेत् क्लीबनक्षत्रे संसर्गो जायते यदा ।
तद्गर्भजो भवेत् क्लीबस्सर्वधर्मबहिष्कृतः ॥ ३९ ॥

स्त्रीनक्षत्रे ऋतौ गच्छेन्नारीं स्वां पुरुषो यदि ।
तद्गर्भजा भवेत् कन्या युग्मभे यमलौ भुवि ॥ ४० ॥

यादृशेनैव भावेन नरश्शुक्लं विसर्जयेत् ।
तादृशेनैव भावेन ह्यपत्यं जायते नृणाम् ॥ ४१ ॥

यच्छुक्लं पूतिगन्धि स्यात्तत्पुत्रो व्याधितो भवेत् ।
तिक्तगन्धं यदा शुक्लं यच्छुक्लं मांसगन्धवत् ॥ ४२ ॥

अपुत्रो वा भवेत् सोऽयमथवा मृतपुत्रकः ।
पुष्पगन्धं भवेद्रेतो यस्य पुंसस्सरक्तकम् ॥ ४३ ॥

तदपत्यं भजेद् दीर्घमायुर्वर्षशतं भुवि ।
नीलवर्णं भवेद्रेतश्चाथवा पीतकर्बुरम् ॥ ४४ ॥

तदपत्यं भवेद् भूमौ पत्नीपुत्रविनाशकृत् ।
विन्दूनां पञ्चदशकं योनौ प्रविशते यदि ॥ ४५ ॥

तदपत्यं च कौमारे वयस्येव मृतिं भजेत् ।
दश द्वादश वा योनौ विन्दवो निपतन्ति चेत् ॥ ४६ ॥

अब्दे विंशेऽथवा त्रिंशे मृतिं स समवाप्नुयात् ।
अष्टौ षड्वापि वीर्यस्य विन्दवो योनिसङ्गताः ॥ ४७ ॥

दीर्घायुस्तदपत्यं स्यादारोग्यादिवलान्वितम् ।
पुमान् वीर्येऽधिके स्त्री वै रक्ताधिक्ये प्रजायते ॥ ४८ ॥

उभे समे निषेके तु कुब्जवामनकादयः ।
अर्केन्दुजीवशुक्रैर्वा सर्वैर्वा स्वान्तकोदये ॥ ४९ ॥

भौमदृष्टियुते वापि पुंयोगाः स्युरिमे मताः ।
लग्नस्थस्सुतसंस्थो वा नवमे वा बली गुरुः ॥ ५० ॥

ऋतोर्विरमे स्नातायां यद्युपचयसंस्थश्शशी भवति ।
बलिना गुरुणा दृष्टो भर्त्रा सह सङ्गमश्च तदा ॥ ५१ ॥

राजपुरुषेण रविणा विटेन भैमेन वीक्षिते चन्द्रे ।
सौम्येन चपलमतिना भृगुणा कान्तेन रूपवता ॥ ५२ ॥

भृत्येन सूर्यपुत्रेणायाता स्त्री समायोगम् ।
स्वगृहं त्यक्त्वा सर्वं गच्छति वेश्यापदं युवतिः ॥ ५३ ॥

इन्दुर्जलं कुजोऽग्नी रक्तजलमग्निरेव पित्तं स्यात् ।
एवं रक्ते क्षुभिते पित्तेन रजः प्रवर्तते स्त्रीषु ॥ ५४ ॥

एवं यद्भवति रजो गर्भस्य निमित्तमेव कथितं तत् ।
नाभिमूले स्थितं पद्मं चतुर्दलसमन्वितम् ।
तस्मिन् सर्वाश्च दधते गर्भसंभवकारणम् ॥ ५५ ॥

अधोमुखं स्थितं स्त्रीणां तद्बाल्ये कुड्मलीकृतम् ।
बाल्यात् परवयःप्राप्तौ कुड्मलं विकसद् भवेत् ॥ ५६ ॥

उत्फुल्लकुसुमं स्त्रीषु स्वभावेन स्रवेद्रजः ।
स्नानस्य दिवसादर्वाक् दोषं वक्ष्यामि सङ्गमे ॥ ५७ ॥

प्रथमेऽह्न्यृतौ प्राप्ते निषिञ्चयति यो नरः ।
अचिरान्मृत्युमाप्नोति द्वितीये स्त्री मरिष्यति ॥ ५८ ॥

तृतीयेऽह्नि निषिक्तस्य गर्भस्य मरणं भवेत् ।
चतुर्थे जायते पुत्रस्त्वल्पायुर्धनवर्जितः ॥ ५९ ॥

विद्याहीनः स्थानशून्यो दुःखी चाचारवर्जितः ।
पितुरिन्द्रियनाशश्च चतुर्थं तद्विवर्जयेत् ॥ ६० ॥

पञ्चमे जायते पुत्री षष्ठे पुत्रस्सपौत्रकः ।
सप्तमे त्वप्रजा कन्या चाष्टमे त्वीश्वरः स्मृतः ॥ ६१ ॥

नवमे तु तथा पापा दशमे प्रवरस्सुतः ।
एकादशे च कुलटा द्वादशे पुरुषोत्तमः ॥ ६२ ॥

त्रयोदशे वरा नारी धनाढ्यश्च चतुर्दशे ।
ऋतौ पञ्चदशे कन्या गुणालङ्करणा शुभा ॥ ६३ ॥

षोडशे युवतिश्श्लाघ्यं सर्वज्ञं जनयेत् सुतम् ।
तस्मादुक्तेषु कालेषु ऋतुस्नातां स्त्रियं व्रजेत् ॥ ६४ ॥

सुवृत्तगर्भस्त्वपसव्यकुक्षिगः पुमांस्तु कन्या खलु वामकुक्षिगा ।
मध्योदरस्थश्च नपुंसकः स्यात्कुक्षिद्वयस्थो यमलः प्रजायते ॥ ६५ ॥

लिङ्गं तु सद्यो गर्भाय योन्यां बीजस्य संग्रहे ।
तृप्तिर्गुरुत्वं स्फुरणं शुक्रास्रावसुबन्धनम् ॥ ६६ ॥

हृदयस्पन्दनं तन्द्रा तृड्ग्लानिर्लोमहर्षणम् ।
क्षामता गरिमा कुक्षिर्मूर्छा छर्दिररोचकम् ॥ ६७ ॥

जृम्भः प्रसेकस्सदनं रोमराज्याः प्रकाशकम् ।
आम्रेष्टकास्तनौ पीनौ प्रोन्नतौ कृष्णचूचुकौ ॥ ६८ ॥

पादशोफो विदोहोऽन्याः श्रद्धाश्च विविधात्मिकाः ।
मृद्भक्षणं च पाण्डुत्वं गर्भिण्या लक्ष्म चेदृशम् ॥ ६९ ॥

मातृजिह्वस्य हृदयं मातुश्च हृदयेन तत् ।
संबद्धं तेन गर्भिण्या नेष्टं श्रद्धावमाननम् ॥ ७० ॥

दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुयात् ।
वैरूप्यं मरणं चापि तस्मात् कार्यं प्रियं स्त्रियाः ॥ ७१ ॥

देयमप्यहितं तस्माद्धितोपहितमल्पकम् ।
अतिव्यवायमायासं भारं प्रावरणं गुरु ॥ ७२ ॥

अकालजागरास्वप्नकठिनान्नं विदाहि च ।
कुक्कुटासनकं निन्दा प्रलापो निष्ठुरं वचः ॥ ७३ ॥

शोकक्रोधभयोद्वेगवेगश्रद्धाविघातनम् ।
उपवासाध्वतीक्ष्णोष्णं गुरु विष्टम्भि भोजनम् ॥ ७४ ॥

रक्तं विवसनं श्वभ्रकूपेक्षा मद्यमामिषम् ।
उत्तानशयनं यच्च स्त्रियो नेच्छन्ति तत्त्यजेत् ॥ ७५ ॥

एभिर्गर्भस्स्रवेदामः कुक्षौ शुष्येन्म्रियेत वा ।
तच्छुक्ररक्तमेकस्थमेकाहात् कललं भवेत् ॥ ७६ ॥

पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत् ।
बुद्बुदं सप्तरात्रेण मांसपेशी भवेत् पुनः ॥ ७७ ॥

द्विसप्ताहाद्भवेत्पेशी रक्तमांसचिता दृढा ।
बीजस्यैवांकुराः पेश्याः पञ्चविंशतिरात्रितः ॥ ७८ ॥

भवन्ति मासमात्रेण पञ्चधा जायते पुनः ।
ग्रीवा शिरश्च स्कन्धश्च पृष्ठवंशस्तथोत्तरम् ॥ ७९ ॥

पाणिपादं तथा पार्श्वं कटिर्गात्रं तथैव च ।
मासद्वयेन सर्वाणि क्रमशस्संभन्ति हि ॥ ८० ॥

त्रिभिर्मासैः प्रजायन्ते सर्वाङ्गांकुरसन्धयः ।
मासैश्चतुर्भिरंगुल्यः प्रजायन्ते तथा क्रमात् ॥ ८१ ॥

मुखं नासा च कर्णौ च जायन्ते पञ्चभिः पुनः ।
दन्तपंक्तिस्तथा गुह्यं जायन्ते च नखाः पुनः ॥ ८२ ॥

कर्णयोर्भवति छिद्रं षण्मासाभ्यन्तरेण तु ।
पायुर्मेढ्रमुपस्थं च नाभिश्चाप्युपजायते ॥ ८३ ॥

सन्धयो येच गात्रेषु जायन्ते माससप्तके ।
अङ्गप्रत्यङ्गसम्पूर्णश्शिरःकेशसमन्वितः ॥ ८४ ॥

विभक्तावयवः स्पष्टः पुमान्मासाष्टकेन तु ।
पुनर्गर्भं पुनर्धात्रीमोजस्तत्र प्रधावति ॥ ८५ ॥

अष्टमं मास्यतो गर्भो जातः प्राणैर्वियुज्यते ।
हृदि तिष्ठति यच्छुद्धमीषच्छुक्कं सपीतकम् ॥ ८६ ॥

ओजश्शरीरे तत् ख्यातं यन्नाशान्नाशमृच्छति ।
मातुराहारवीर्येण षड्विधेन रसेन च ॥ ८७ ॥

नाभिसूत्रनिभद्धेन वर्धते स दिने दिने ।
ततः स्मृतिं भजेज्जीवस्संपूर्णोऽस्मिन् शरीरके ॥ ८८ ॥

सुखं दुःखं विजानाति निद्रां स्वप्नं पुराकृतम् ।
पाल्यन्तरितहस्ताभ्यां श्रोत्ररन्ध्रे पिधाय सः ॥ ८९ ॥

उद्विग्नो गर्भसंबन्धादास्ते गर्भाशयान्वितः ।
मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः ॥ ९० ॥

नानायोनिसहस्राणि मया दृष्टानि भूयसा ।
अधुना जातमात्रोऽहं प्राप्तसंस्कार एव च ॥ ९१ ॥

ततच्छ्रेयः करिष्यामि येन गर्भे न संभवः ।
गर्भस्थश्चिन्तयत्येवमहं गर्भाद्विनिर्गतः ॥ ९२ ॥

अध्येष्यामि शिवज्ञानं संसारविनिवर्तकम् ।
एवं गर्भे सुदुःखेन महता परिपीडितः ॥ ९३ ॥

जीवः कर्मवशादास्ते मोक्षोपायं विचिन्तयन् ।
यथा गिरिवराक्रान्तः कश्चिद् दुःखेन जीवति ॥ ९४ ॥

लोहकुम्भे यथा न्यस्तः पच्यते कश्चिदग्निना ।
गर्भकुम्भे तथा क्षिप्तः पच्यते जाठराग्निना ॥ ९५ ॥

सूचीभिरग्निवर्णाभिर्निर्भिन्नस्य निरन्तरम् ।
यद्दुःखमुपजायेत तद्गर्भेऽष्टगुणं भवेत् ॥ ९६ ॥

नवमे दशमे वापि प्रबलैस्सूतिमारुतैः ।
निस्सार्यते बाण इव यन्त्रच्छिद्रेण सत्वरम् ॥ ९७ ॥

इत्येतद्गर्भदुःखं हि प्राणिनां परिकीर्तितम् ।
बाह्येन वायुना स्पृष्टो विस्मरत्यात्मनः स्थितिम् ॥ ९८ ॥

गर्भात् कोटिगुणं दुःखं योनियन्त्रप्रपीडनात् ।
संमूर्छा जायते तस्य जायमानस्य देहिनः ॥ ९९ ॥

तिलवत् पीड्यमानस्य यन्त्रेणेव समन्ततः ।
यथैव ताड्यमानस्य यन्त्रमुद्गरकोटिभिः ॥ १०० ॥

तथा निष्क्राम्यमाणस्य प्रबलैस्सूतिमारुतैः ।
जायते सुमहद् दुःखं परित्राणमविन्दतः ॥ १०१ ॥

एवं गर्भात् प्रजातस्य वपुषो रूपमीर्यते ।
अस्थ्नां षष्ट्युत्तरं देहे शतानां त्रितयं स्मृतम् ॥ १०२ ॥

स्थालैस्सह चतुष्षष्टिर्दन्ता वै विंशतिर्नखाः ।
पाणिपादशलाकाश्च तेषां स्थानचतुष्टयम् ॥ १०३ ॥

षष्ट्यङ्गुलीनां द्वे पार्ष्णी गुल्फेषु च चतुष्टयम् ।
चत्वार्यरत्निकास्थीनि जङ्घयोस्तावदेव तु ॥ १०४ ॥

द्वे द्वे जानुकपोलोरुफलकांससमुद्भवे ।
अक्षतालूषके श्रोणीफलके च विनिर्दिशेत् ॥ १०५ ॥

भगास्थ्येकं तथा पृष्ठे चत्वारिंशच्च पञ्च च ।
ग्रीवा पञ्चदशास्थि स्याज्जत्र्वेकं तथा हनुः ॥ १०६ ॥

तन्मूले द्वे ललाटाक्षिगण्डे नासा घनस्थिका ।
पार्श्वकाः स्थालकैस्सार्धमर्बुदैश्च द्विसप्ततिः ॥ १०७ ॥

द्वौ शंखकौ कपालानि चत्वारि शिरसस्तथा ।
उरस्सप्तदशास्थीनि पुरुषस्यास्थिसंग्रहः ॥ १०८ ॥

गन्धरूपरसस्पर्शशब्दाश्च विषयाः स्मृताः ।
नासिका लोचनं जिह्वा त्वक्छ्रोत्रं चेन्द्रियाणि च ॥ १०९ ॥

हस्तौ पायुरुपस्थं च जिह्वा पादौ च पञ्चकम् ।
कर्मेन्द्रियाणि जानीयान्मनस्तत्रोभयात्मकम् ॥ ११० ॥

नाभिरोजो गुदं शुक्रं शोणितं शङ्खिका तथा ।
मूर्धांसकण्ठहृदयं प्राणस्यायतनानि तु ॥ १११ ॥

वपावसावहननं नाभिक्लोमयकृत् प्लिहा ।
क्षुद्रान्त्रवृक्कको वस्तिः पुरीषाधानमेव च ॥ ११२ ॥

आमाशयोऽथ हृदयं स्थूलान्त्रं गुदएव च ।
उदरं गुदकोष्ठौ च विस्तारोऽयमुदाहृतः ॥ ११३ ॥

कनीनिके चाक्षिकूटे शष्कुली कर्णपत्रिका ।
गुदौ शंखौ भ्रुवौ दन्तावेष्टावोष्ठौ ककुन्दरौ ॥ ११४ ॥

वंक्षणौ वृषणौ वृक्का श्लेष्मसंघातकस्तनौ ।
उपजिह्वास्फिजौ बाहू जंघोरुषु च पिण्डका ॥ ११५ ॥

तालूदरं वस्तिशीर्षं चुबुकं गल्लतुण्डिके ।
अवटुश्चैवमेतानि स्थानान्यत्र शरीरके ॥ ११६ ॥

अक्षे चर्मचतुष्कं च पर्यस्तहृदयानि च ।
नव छिद्राणि तान्येव प्राणस्यायतनानि च ॥ ११७ ॥

सिराशतानि सप्तैव नवस्नायुशतानि च ।
धमनीनां शते द्वे तु पञ्च पेशीशतानि च ॥ ११८ ॥

षट्पञ्चाशच्च जानीयात् सिरा धमनिसंज्ञिकाः ।
त्रयो लक्षाश्च विज्ञेयाश्श्मश्रुकेशाश्शरीरिणाम् ॥ ११९ ॥

सप्तोत्तरं मर्मशतं द्वे च सन्धी शते तथा ।
रोम्णां कोट्यस्तु पञ्चाशच्चतस्रः कोट्य एव च ॥ १२० ॥

सप्तषष्टिस्तथा लक्षास्सार्धास्स्वेदायनैस्सह ।
रसस्य नव विज्ञेया जलस्याञ्जलयो दश ॥ १२१ ॥

सप्तैव तु पुरीषस्य रक्तस्याष्टौ प्रकीर्तिताः ।
षट्छ्लेष्म पञ्चपित्तं च चत्वारो मूत्रमेव च ॥ १२२ ॥

वसात्रयो द्वौ तु मेदो मज्जैकार्धं तु मस्तके ।
श्लेष्मोजसस्तावदेव रेतसस्तावदेव तु ॥ १२३ ॥

भावास्तु षड्विधास्तस्य मातृजाः पितृजास्तथा ।
रसजा आत्मजास्सत्वसंभवास्सात्विकास्तथा ॥ १२४ ॥

मृदवश्शोणितम्मेदो (?) मज्जा प्लीहा यकृद् गुदम् ।
हृन्नाभीत्येवमाद्यास्तु भावा मातृभवा मताः ॥ १२५ ॥

श्मश्रु लोम कचाः स्नायुशिराधमनयो नखाः ।
दशनाश्शुक्रमस्थ्याद्यास्सिराः पितृसमुद्भवाः ॥ १२६ ॥

देहो भूतात्मकस्तस्मादादत्ते तद्गुणानिमान् ।
शब्दं श्रोत्रं सुषिरतां वैचित्र्यं सूक्ष्मबोधताम् ॥ १२७ ॥

बलं च गगनाद्वायोः स्पर्शो च स्पर्शनेन्द्रियम् ।
उत्क्षेपणमपक्षेपाकुञ्चने गमनं तथा ॥ १२८ ॥
प्रसारणमितीमानि पञ्चकर्माणि रूक्षता ।
अग्नेस्तु लोचनं रूपं पित्तं पाकं प्रकाशिता ॥ १२९ ॥
अमर्षं तैक्ष्ण्यमूष्माणमोजस्तेजश्च शूरताम् ।
मेधादीनि तथादत्ते जलात्तु रसनं रसम् ॥ १३० ॥
शौर्यं स्वेदं द्रवं स्नेहं गात्रादिमृदुतामपि ।
भूमेर्घ्राणेन्द्रियं गन्धं स्थैर्यं धैर्यं च गौरवम् ॥ १३१ ॥
श्मश्रुकेशनखान् दन्तानस्थ्याद्यं यच्च कर्कशम् ।
गुदलिङ्गान्तरे चक्रमाधाराख्यं चतुर्दलम ॥ १३२ ॥
परमस्सहजस्तद्वदानन्दो वीरपूर्वकः ।
योगानन्दश्च तस्य स्यादैशान्यादिदले फलम् ॥ १३३ ॥
अस्ति कुण्डलिनी ब्रह्मशक्तिराधारपञ्चके ।
आ ब्रह्मरन्ध्रमृजुतां नीतेयममृतप्रदा ॥ १३४ ॥
स्वाधिष्ठानं लिङ्गमूले षट्पत्रं चक्रमस्ति च ।
पूर्वादिषु दलेष्वाहुः फलान्येतान्यपि क्रमात् ॥ १३५ ॥
प्रश्रयः क्रूरता गर्वो नाशो मूर्छा ततः परम् ।
अवज्ञा स्यादविश्वासः कामशक्तेरिदं गृहम् ॥ १३६ ॥
नाभौ दशदलं चक्रं मणिपूरकसंज्ञकम् ।
सुषुप्तिरत्र तृष्णा स्यादीर्ष्या पिशुनता तथा ॥ १३७ ॥
लज्जा भयं घृणा मोहः कषायोऽथ विषादिता ।
क्रमात् पूर्वादिपत्रेषु स्याद् भानुभवनं च तत् ॥ १३८ ॥
हृदयेऽनाहतं चक्रं शिवस्य प्रणवाकृतेः ।
पूजास्थानं तदिच्छन्ति दलैर्द्वादशभिर्युतम् ॥ १३९ ॥
लौल्यं प्रणाशं कापट्यं वितर्कोऽप्यनुतापिता ।
आशा प्रकाशश्चिन्ता च समीहा समता तथा ॥ १४० ॥
क्रमेण दम्भो वैकल्यं विवेकोऽहङ्कृतिस्तथा ।
फलान्येतानि पूर्वादिदलान्यस्यात्मनो जगुः ॥ १४१ ॥
कण्ठेऽस्ति भारतीस्थानं विशुद्धिष्षोडशच्छदम् ।
तत्र प्रणव उद्गीथो हुं फट् वौषट् वषट् स्वधा ॥ १४२ ॥
स्वाहा नमोऽमृतं सप्तस्वराष्षड्जादयो विषम् ।
इति पूर्वादिपत्रेषु फलान्यात्मनि षोडश ॥ १४३ ॥
ललनाख्यं घण्टिकायां चक्रं द्वादशपत्रकम् ।
मदो मानस्तथा स्नेहश्शोको मेदश्च लुब्धता ॥ १४४ ॥

अरतिस्संभ्रमश्चोर्मिश्श्रद्धा तोषोऽपराधिता ।
फलानि ललनाचक्रे पूर्वादिषु दलेष्विह ॥ १४५ ॥
भ्रूमध्ये [1] त्रिदलं चक्रमाज्ञासंज्ञाफलात्मकम् ।
आविर्भावास्सत्वरजस्तमसां क्रमशो मताः ॥ १४६ ॥
ततोऽप्यस्ति मनश्चक्रं षट्दलं तत्फलानि तु ।
स्वप्नो रसोपयोगश्च घ्राणं रूपोपलम्भनम् ॥ १४७ ॥
स्पर्शनं शब्दबोधश्च पूर्वादिषु दलेष्विति ।
ततोऽपि षोडशदलं सोमचक्रमितीरितम् ॥ १४८ ॥
दलेषु षोडशस्वस्य कलाष्षोडश संस्थिताः ।
कृपा क्षमार्जवं धैर्यं वैराग्यधृतिसम्मदाः ॥ १४९ ॥
हास्यं रोमाञ्चनिचयो ध्यानं सुस्थिरता ततः ।
गाम्भीर्यमुद्यमस्सत्वमौदार्यैकाग्रते क्रमात् ॥ १५० ॥
फलान्युशन्ति जीवस्य पूर्वादिदलसंहतौ ।
चक्रे सहस्रपत्रं तु ब्रह्मरन्ध्रे सुधामयम् ॥ १५१ ॥
तत्सुधासारधाराभिरभिवर्धयते तनुम् ।
ब्रह्माण्डे ये पदार्थास्स्युस्ते शरीरे व्यवस्थिताः ॥ १५२ ॥
पातालं भूधरा लोकास्तथान्ये द्वीपसागराः ।
आदित्यादिग्रहास्सर्वे पिण्डमध्ये व्यवस्थिताः ॥ १५३ ॥
पादादधस्तादतलं पादोर्ध्वे वितलं तथा ।
जंघयोस्सुतलं ज्ञेयं प्रतलं जानुनोर्द्वयोः ॥ १५४ ॥
तलातलमथोर्वोस्तु गुह्यस्थाने रसातलम् ।
पातालं कटिसन्धौ तु पादादीन् लक्षयेद् बुधः ॥ १५५ ॥
भूलोको नाभिमध्ये तु भुवर्लोको हृदि स्थितः ।
स्वर्लोकः कण्ठदेशे तु महर्लोकस्तु तालुके ॥ १५६ ॥
जनलोकस्तदूर्ध्वे तु तपोलोको ललाटके ।
सत्यलोकश्शिरस्येवं भुवनानि चतुर्दश ॥ १५७ ॥
त्रिकोणे संस्थितो मेरुरधःकोणे तु मन्दरः ।
कैलासो दक्षिणे कोणे वामकोणे हिमालयः ॥ १५८ ॥
निषधश्चोर्ध्वभागे च दक्षिणे गन्धमादनः ।
विन्ध्यस्तु रोमरेखायां सप्तैते कुलपर्वताः ॥ १५९ ॥
अस्थिषु व्याप्रतो जम्बूर्मेदस्स्थः प्लक्षसंज्ञकः ।
मांसे स्थितः कुशद्वीपो क्रौञ्चद्वीपस्सिरासु च ॥ १६० ॥
त्वचि स्याच्छाल्मलीद्वीपो गोमेदो रोमसञ्चये ।
नखस्थं पुष्करं विन्द्यात् सागरास्तदनन्तरम् ॥ १६१ ॥

[1] द्विदलं.

क्षारोदश्च तथा मूले रसे क्षीरोदसागरः ।
दध्यर्णवः श्लेष्ममध्ये मज्जायां सर्पिरर्णवः ॥ १६२ ॥
रसोदधिर्वसान्ते च शोणिते च सुरोदधिः ।
स्वादूदो लम्बिकास्थाने गर्भोदस्सप्तसागरः ॥ १६३ ॥
नादचक्रे स्थितस्सूर्यो विन्दुचक्रे तु चन्द्रमाः
नेत्रयोश्च कुजो ज्ञेयो हृदये च बुधः स्थितः ॥ १६४ ॥
गुह्यस्थाने गुरुं विन्द्याच्छुक्रे शुक्रस्समाश्रितः ।
नाभिस्थाने स्थितो मन्दो मुखान्ते राहुराश्रितः ॥ १६५ ॥
नादस्थाने स्थितः केतुरश्विन्याद्यास्त्रयस्त्रयः ।
विभवश्च समाख्यात आपादतलमस्तकम् ॥ १६६ ॥
हृदि स्थाने स्थितो ब्रह्मा कण्ठे विष्णुस्समाश्रितः ।
भ्रूमध्ये संस्थितो रुद्रस्तदूर्ध्वे च स्वरस्स्मृतः ॥ १६७ ॥
सदाशिवो ललाटान्ते पश्चैते भूतनायकाः ।
एवं ब्रह्माण्डसंस्थानं पिण्डाण्डेऽपि व्यवस्थितिः ॥ १६८ ॥
शरीरमीदृशं कर्मवशात् समुपजायते ।
तत्फलानुभवार्थं हि देवेनैव विनिर्मितम् ॥ १६९ ॥
ईदृक् छरीरमासाद्य यस्तु तत्त्वं विभावयेत् ।
तस्यैव च परानन्दः परेषां दुःखसन्ततिः ॥ १७० ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारण-
चिदम्वरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्र-
सारभूते श्रीशिवतत्त्वरत्नाकरे नवमकल्लोले
पिण्डोत्पत्तिनिरूपणं नाम प्रथमस्तरङ्गः

अथ द्वितीयस्तरंगः

भगवन्! गर्भवासे च निर्गमे चापि देहिनः ।
जायते सुमहद् दुःखमिति पूर्वं निरूपितम् ॥ १ ॥
अतः परं वा वाल्यादिस्थविरान्तवयस्स्वपि ।
सुखस्यानुभवो लोके नराणां विद्यते न वा? ॥ २ ॥
अधुना संशयो भूयानस्ति मे मनसि प्रभो!
निरूपयेदं सर्वं मे संशयं विनिवर्तय ॥ ३ ॥
यत्पृष्टं भवता पुत्र! तद् ब्रवीमि पुनः शृणु ।
पुंसां वर्षशतं ह्यायुस्तत्रार्धं निद्रया गतम् ॥ ४ ॥
तरङ्गवद्वारिराशेः सम्पदः क्षणभंगुराः ।
दिनानि त्रीणि चत्वारि नराणां यौवनं स्मृतम् ॥ ५ ॥
दुःखं जन्म जरा दुःखं दुःखं मृत्युः पुनः पुनः ।
एवंविधस्य जीवस्य सुखस्यानुभवः कुतः ॥ ६ ॥
अव्यक्तेन्द्रियवृत्तित्वाद्बाल्ये दुःखं महत् पुनः ।
इच्छन्नपि न शक्नोति वक्तुं कर्तुं च तत्क्रियाम् ॥ ७ ॥
दन्तोत्थाने महद् दुःखं मूढेन व्याधिना ततः ।
वालरोगैश्च विविधैः पीडा वालग्रहैरपि ॥ ८ ॥
तृड्वुभुक्षापरीताङ्गः क्वचित्तिष्ठति चारटन् ।
विण्मूत्रभक्षणाद्यं च मोहाद्बालस्समाचरेत् ॥ ९ ॥
कौमारे कर्णवेधेन मातापित्रोश्च ताडनात् ।
अक्षराध्ययनाद्यैश्च दुःखं स्याद् गुरुशासनात् ॥ १० ॥
प्रमत्तेन्द्रियवृत्तित्वात् कामरोगप्रपीडनात् ।
रागोद् वृत्तस्य सततं कुतस्सौख्यं हि यौवने? ॥ ११ ॥
नेत्रस्य क्षुभितस्येव रागो दुःखाय केवलम् ।
न रात्रौ विन्दते निद्रां कामाग्निपरिपीडितः ॥ १२ ॥
दिवा चापि कुतस्सौख्यमर्थोपार्जनचिन्तया ।
स्त्रीष्वायाससमेतस्य ये पुंसश्शुक्रविन्दवः ॥ १३ ॥
न ते सुखाय मन्तव्यास्स्वेदजा इव विन्दवः ।
क्रिमिभिस्तुद्यमानस्य कुष्ठिनः पामनस्य वा ॥ १४ ॥
कण्डूयनाग्नितापाभ्यां यत्सुखं स्त्रीषु तद्विदुः ।
यादृशं विद्यते सौख्यं कण्डूपूयविनिर्गमे ॥ १५ ॥
तादृशं स्त्रीषु विज्ञेयं नाधिकं तासु विद्यते ।
ग्रन्थेस्तु वेदना यद्वत् स्फुटितस्य निवर्तते ॥ १६ ॥

तद्वत् स्त्रीष्वपि विज्ञेयं न सौख्यं परमार्थतः ।
वर्चोमूत्रविसर्गात्तु सुखं भवति यादृशम् ॥ १७ ॥
तादृशं स्त्रीषु विज्ञेयं नाधिकं तासु विद्यते ।
नारीष्ववस्तुभूतासु सर्वदोषाधिकासु च ॥ १८ ॥
न चाणुमात्रमप्येवं सुखमस्ति विचारतः ।
सन्मानं चावमानेन वियोगेनेष्टसंगमम् ॥ १९ ॥
यौवनं जरया ग्रस्तं क्व सौख्यमनुपद्रवम् ? ।
वलीपलितरोगार्तिरश्रीकृतदेहयोः ॥ २० ॥
दम्पत्योर्यौवने रूपं यच्चान्योन्यं प्रियं पुरा ।
तदेव जरया ग्रस्तमुभयोरपि न प्रियम् ॥ २१ ॥
अपूर्ववत् स्वमात्मानं जरया परिवर्जितम् ।
यः पश्यन्न विरज्येत कोऽन्यस्तस्मादचेतनः ? ॥ २२ ॥
जराभिभूतपुरुषः पत्नीपुत्रादिबान्धवैः ।
अशक्तत्वाद् दुराचारैर्भृत्यैश्च परिभूयते ॥ २३ ॥
धर्मश्चार्थश्च कामश्च मोक्षश्चैव न जीर्यता ।
शक्यास्साधयितुं तस्माद् युवा धर्मं समाचरेत् ॥ २४ ॥
वातपित्तकफादीनां वैषम्यं व्याधिरुच्यते ।
वातादीनां समूहश्च देहोऽयं परिकीर्त्यते ॥ २५ ॥
तस्माद् व्याधिमयं ज्ञेयं शरीरमिदमात्मनः ।
रोगैर्नानाविधैर्याति देहो दुःखान्यनेकधा ॥ २६ ॥
तान्येव स्वात्मवेद्यानि किमन्यत् कथयाम्यहम् ? ।
एकोत्तरं मृत्युशतमस्मिन् देहे प्रतिष्ठितम् ॥ २७ ॥
तत्रैकः कालसंज्ञः स्याच्छेषास्त्वागन्तुकाः स्मृताः ।
ये चात्रागन्तुकाः प्रोक्तास्ते च शाम्यन्ति भेषजैः ॥ २८ ॥
जपहोमप्रदानैश्च कालमृत्युर्न शाम्यति ।
विविधा व्याधयश्शस्त्र सर्पाद्याः प्राणिनस्तथा ॥ २९ ॥
विषाणि चाभिचारश्च मृत्योर्द्वाराणि देहिनाम् ।
पीडितं सर्पशस्त्राद्यैरपि धन्वन्तरिः स्वयम् ॥ ३० ॥
स्वस्थीकर्तुं न शक्नोति कालप्राप्तं हि देहिनम् ।
नौषधं न तपो दानं न मन्त्रा न च बान्धवाः ॥ ३१ ॥
शक्नुवन्ति नरं त्रातुं कालमृत्युप्रपीडितम् ।
रसायनतपोजप्ययोगसिद्धैर्महात्मभिः ॥ ३२ ॥
कालमृत्युरपि प्राप्तो जीयतेऽनलसैर्नरैः ।
नास्ति मृत्युसमं दुःखं नास्ति मृत्युसमं भयम् ॥ ३३ ॥

सद्भार्या पुत्रमित्राणि राज्यैश्वर्यसुखानि च ।
आवद्धानि च वैराणि मृत्युस्सर्वं विनाशयेत् ॥ ३४ ॥
भो ! जनाः ! किं न पश्यध्वं ? सहस्रेष्वपि मध्यतः ।
जनाश्शतायुषः पञ्च भवन्ति न भवन्ति वा ॥ ३५ ॥
अशीतिकाश्च विंशेरन् केचित् सप्ततिका नराः ।
परमायुस्स्थितिष्वष्टिस्तदप्यायुर्न निश्चितम् ॥ ३६ ॥
यस्य यावद् भवेदायुर्देहिभिः पूर्वकर्मभिः ।
तस्यार्धमायुषो रात्रिर्हरतेऽत्र मृतोपमा ॥ ३७ ॥
बालभावे च मोहेन वार्धके जरया तथा ।
वर्षाणां विंशतिर्याति धर्मकामार्थवर्जिताः ॥ ३८ ॥
आगन्तुकैर्भवैः पुंसां व्याधिशोकैरनेकधा ।
हीयतेऽर्धं च तत्रापि यच्छेषं तद्धि जीवितम् ॥ ३९ ॥
जीवितान्ते च मरणं महाघोरमवाप्नुयात् ।
पुनः पुनः कर्मवशात् कोटियोनिषु जायते ॥ ४० ॥
देहभेदेन यः पुंसां वियोगः कर्मसंक्षयात् ।
मरणं तद् विनिर्दिष्टं न नाशः परमार्थतः ॥ ४१ ॥
महारामः ? प्रविष्टः स्याच्छिद्यमानेषु मर्मसु ।
यद् दुःखं मरणे जन्तोर्न तस्येह समं क्वचित् ॥ ४२ ॥
हा मातः ! हा पितः ! कान्ते ! क्रन्दत्येवं सुदुःखितः ।
मण्डूक इव सर्पेण ग्रस्यते मृत्युना जगत् ॥ ४३ ॥
बान्धवैश्च परिष्वक्तः प्रियैश्च परिवारितः ।
निश्वसन् दीर्घमुष्णं च मुखेन परिशुष्यता ॥ ४४ ॥
चतुर्ष्वन्तेषु खट्वायाः परिवृत्य मुहुर्मुहुः ।
सम्मूढः क्षिपतेत्यर्थं हस्तपादमितस्ततः ॥ ४५ ॥
खट्वाया वाञ्छते भूमिं भूमेः खट्वां ततो महीम् ।
विवस्त्रस्त्यक्तलज्जश्च मूलविष्ठापरिप्लुतः ॥ ४६ ॥
याचमानश्च सलिलं शुष्ककण्ठास्यतालुकः ।
चिन्तयानश्च वित्तानि कस्यैतानि मृते मयि ॥ ४७ ॥
नखाग्रैश्च खनन् भूमिं कालपाशेन कर्षितः ।
म्रियते पश्यतामेव गले घुरघुरायते ॥ ४८ ॥
जीवस्तृणजलूकावद् देहाद्देहं विशेदसौ ।
संप्राप्योत्तमवंशे च देहं त्यजति पौर्विकम् ॥ ४९ ॥
मरणात् प्रार्थनादुःखमधिकं हि विवेकिनः ।
क्षणिकं मरणे दुःखमनन्तं प्रार्थनाकृतम् ॥ ५० ॥

जगतां पतिरर्थित्वाद् विष्णुर्वामनतां गतः
अधिकः कः परस्तस्माद् यो न यास्यति लाघवम्? ॥ ५१ ॥

न परं प्रार्थयेद् भूयस्तृष्णा लाघवकारणम्
आदौ दुःखं तथा मध्ये दुःखमन्ते सुदारुणम् ॥ ५२ ॥

निसर्गात् सर्वभूतानामिति दुःखपरम्परा ।
वर्तमानान्यतीतानि दुःखान्येतानि यानि तु ॥ ५३ ॥

नरास्स्वभावं यन्त्यज्ञा न विरज्यन्ति तेन ते ।
अत्याहारान्महद् दुःखमनाहारान्महद्भयम् ॥ ५४ ॥

क्षुधा हि सर्वरोगाणां व्याधिः श्रेष्ठतमो मतः ।
स चान्नौषधयोगेन क्षणमात्रेण शाम्यति ॥ ५५ ॥

क्षुद्व्याधिवेदना तीव्रा निश्शेषबलकृन्तनी
तयाभिभूतो म्रियते यथान्यैर्व्याधिभिर्नरः ॥ ५६ ॥

षड्रसेनापि किं तेन जिह्वान्तःपरिवर्तिना ।
यत् क्षणार्धार्धकालेन कण्ठं प्राप्यातिवर्तते ॥ ५७ ॥

इति क्षुद्व्याधितप्तानामन्नमौषधवत् स्मृतम् ।
न तत् सुखाय मन्तव्यं पण्डितैः परमार्थतः ॥ ५८ ॥

मृतोपमश्च यश्शेते सर्वकार्यविवर्जितः ।
तस्यापि च कुतस्सौख्यं तमसा भावितात्मनः ॥ ५९ ॥

कृषिवाणिज्यसेवाश्वगोरक्षादिपरिश्रमैः
प्रातर्मूत्रपुरिषाद्यैर्मध्याह्ने क्षुत्पिपासया ॥ ६० ॥

तृप्ताः कामेन बाध्यन्ते निद्रया निशि जन्तवः ।
शीतेन दुःखं हेमन्ते ग्रीष्मे तापेन दारुणम् ॥ ६१ ॥

वर्षासु वातवर्षाभ्यां कालेऽप्येव कुतस्सुखम्? ।
अर्थानामर्जने दुःखमार्जितानां च रक्षणे ॥ ६२ ॥

आये दुःखं व्यये दुःखं कथमर्थास्सुखावहाः ।
चोरेभ्यस्सलिलादग्नेस्स्वजनात् पार्थिवादपि ॥ ६३ ॥

भयमर्थवतां नित्यं मृत्युर्देहभृतामिव ।
खे यथा पक्षिभिर्मांसं श्वापदैर्भुवि भक्ष्यते ॥ ६४ ॥

जले च भक्ष्यते मत्स्यैस्तथा सर्वत्र वित्तवान् ।
विमोहयन्ति सम्पत्सु तापयन्ति विपत्तिषु ॥ ६५ ॥

क्लेशयन्त्यार्जने काले कदा ह्यर्थास्सुखावहाः? ।
यश्चार्थपतिरुद्विग्नो यश्च सर्वार्थनिस्पृहः ॥ ६६ ॥

तयोरर्थपतिर्दुःखी सुखी सर्वार्थनिस्पृहः ।
विवाहावसरे दुःखं तद्गर्भोद्वहनेषु च ॥ ६७ ॥

प्रसवेऽपत्यदोषे च दुःखं विघ्नादिकर्मभिः ।
दन्तादिरोगे पुत्रस्य हा! कष्टं! किं करोम्यहम्? ॥ ६८ ॥

गावो नष्टा, कृषिर्भग्ना काप्यश्वाः प्रपलायिताः ।
अहो! प्राहुणिकाः प्राप्ता भग्नं छिद्रं च मे गृहम् ॥ ६९ ॥

बालापत्या च मे भार्या कः करिष्यति साधनम्? ।
प्रदानकालः कन्यायास्सदृशः को वरो भवेत्?
इति चिन्ताभिभूतानां कुतस्सौख्यं कुटुम्बिनाम् ॥ ७० ॥

कुटुम्बचिन्ताकुलितस्य पुंसः श्रुतं च शीलं च गुणाश्च सर्वे
अपक्वकुम्भे निहिता इवापः प्रयान्ति देहेन समं विनाशम् ॥ ७१ ॥

सजातीयाद् भयं प्रायस्सर्वेषामेव देहिनाम्
एकद्रव्याभिलाषित्वाच्छुनामिव परस्परम् ॥ ७२ ॥

नाप्यदृश्यबलः कश्चिन्नृपः ख्यातोऽस्ति भूतले ।
निखिलं यस्तिरस्कृत्य सुखं तिष्ठति निर्भयः ॥ ७३ ॥

राज्येऽपि सुमहद् दुःखं सन्धिविग्रहचिन्तया ।
पुत्रादपि भयं यत्र तत्र सौख्यं हि कीदृशम्? ॥ ७४ ॥

एकं वस्त्रयुगं राज्ञः प्रस्थात् पात्रान्नभोजनात् ।
यानं शय्यासनं चैकं शेषं दुःखाय केवलम् ॥ ७५ ॥

सार्वभौमोऽपि भवने खट्वाप्रान्तपरिग्रहः ।
प्रत्यूषे तूर्यनिर्घोषस्समः पुरनिवासिनः ॥ ७६ ॥

राज्ञोऽभिमानमात्रं हि ममायं विद्यते गृहे ।
सर्वमाभरणं भारस्सर्वमालेपनं मलम् ॥ ७७ ॥

सर्वं गीतं प्रलपितं नृत्तमुन्मत्तचेष्टितम् ।
इत्येवं राज्यभोगेषु कुतस्सौख्यं विचारतः? ॥ ७८ ॥

नृपाणां व्यग्रचित्तानामन्योन्यविजिगीषया ।
प्रायेण श्रीमदालेपान्नहुषाद्या महाबलाः ॥ ७९ ॥

स्वर्गं प्राप्यापि पतिताः कश्श्रिया विन्दते सुखम्? ।
स्वर्गेऽपि हि कुतस्सौख्यं दृष्ट्वा दीप्तां वरश्रियम्? ॥ ८० ॥

उपर्युपरि देवानामन्योन्यातिशयेच्छया ।
नरैः पुण्यफलं स्वर्गे मूलच्छेदेन भुज्यते ॥ ८१ ॥

न चान्यत् क्रियते कर्म तत्र वासस्सुदारुणः ।
छिन्नमूलस्तरुर्यद्वदवश्यं पतति क्षितौ ॥ ८२ ॥

क्षीणे पुण्यफले तद्वद् गां विशन्ति दिवौकसः ।
सुखाभिलाषनिष्ठानां दुःखं भोगार्थसंप्लवात् ॥ ८३ ॥

अकस्मात् पतनात् सर्वं कष्टं दुःखं दिवौकसाम् ।
इति स्वर्गेऽपि देवानां नास्ति सौख्यं विचारतः ॥ ८४ ॥

स्वर्गक्षयाददतिशयात् स्वर्गभोगीयकर्मणि ।
ततः कष्टं महद् दुःखं नरकाग्निषु देहिनाम् ॥ ८५ ॥

घोरैश्च विविधैः पापैर्वाङ्मनःकायसंभवैः ।
कुठारैश्छेदनं तीव्रं सकलानां च भक्षणम् ॥ ८६ ॥

पर्णशाखाफलानां च पातनं चण्डवायुना ।
उन्मूलनं प्रमर्दश्च गजैरन्यैश्च जन्तुभिः ॥ ८७ ॥

दावाग्निपातदोषैश्च दुःखं स्थावरजातिषु ।
वर्षशीतातपैर्दुःखं तिरश्चां प्राणिनामपि ॥ ८८ ॥

क्षुत्तृट्क्लेशेन महता ताडनैर्बन्धनैरपि ।
वेणुकुन्तादिनिगलमुद्गराशुगबाधनम् ॥ ८९ ॥

भारोद्वहनसंक्लेशशिक्षा युद्धादिपीडनम् ।
आत्मयूथवियोगश्च वनानयनबन्धनम् ॥ ९० ॥

पशुनागादिजन्तूनामेवं दुःखान्यनेकधा ।
इत्येवमादिभिर्दुःखैर्जगद् व्याप्तं चराचरम् ॥ ९१ ॥

व्याधीनां भेषजं यद्वत् प्रतिपक्षं स्वभावतः ।
तद्वत् संसारदुःखानां प्रतिपक्षश्शिवः स्मृतः ॥ ९२ ॥

तस्मादात्मविचारेण भवदोषविवर्जितः ।
तत्त्वानामान्तरज्ञानान्न स्यादात्मविचारणा ॥ ९३ ॥

विचारायात्मना ज्ञानं तत्त्वानामप्यपेक्षितम् ।
शिवज्ञानयुतं शान्तं महापातकनाशनम् ॥ ९४ ॥

प्रणिपत्य गुरुं तस्मात् प्रार्थयेद् हितमात्मनः ।
इति ज्ञानरहस्यं स प्रोवाच निजसूनवे ॥ ९५ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारण चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद श्रीमत्केलदीबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातत्त्वसारभूते श्रीशिवतत्त्वरत्नाकरे नवमकल्लोले संसारनिरसनं नाम द्वितीयस्तरङ्गः

अथ तृतीयस्तरंगः

आत्मज्ञाने तु तत्त्वानां ज्ञानं मुख्यमितीरितम् ।
कानि तानि च तत्त्वानि किं रूपाणि कियन्ति वा? ॥ १ ॥

तन्ममाचक्ष्व भगवन्! यदि मय्यस्त्यनुग्रहः ।
कुमार! यत्प्रश्नयसे तद् ब्रूमोऽवहितः शृणु ॥ २ ॥

देहस्थूलो जातिवर्णाद्यभिमानास्पदं हि यः ।
पृथिव्यप्तेजसां वायोर्व्योम्नश्च समवायजः ॥ ३ ॥

प्राचीनपुण्यपापानुरूपाद्रूप्यं दशोः प्रियम् ।
इन्द्रियाणां पाटवं च बिभ्रतो नियतायुषः ॥ ४ ॥

दधाना ब्राह्मणादींश्च वर्णभेदाननेकधा ।
भजन्तः कर्मजन्यानि फलानि नियुतानि च ॥ ५ ॥

आत्मानो जीवनामानो वहुवैचित्र्यशालिनः ।
एतेषामिह जीवानां भोगे नियतसाधनम् ॥ ६ ॥

पृथिव्यादीनि तत्त्वानि कलातत्त्वावधीनि च ।
त्रिंशत्तत्त्वानि विद्यन्ते प्रतिजीवं पृथक् पृथक् ॥ ७ ॥

कृतानां पुण्यपापानामाश्रयोऽन्योस्ति देहिनः ।
नित्यज्ञानक्रियारूपो व्यापको मूर्त्तिवर्जितः ॥ ८ ॥

अणुताकार्ममायेयविन्दुरोधाख्यशक्तिभिः ।
पञ्चभिर्बध्यमानस्तु संसारी पुरुषो मतः ॥ ९ ॥

अस्य भोगे साधनानि तत्त्वानीमानि चक्ष्महे ।
पृथ्व्यादिगगन्तानि पञ्च भूतान्यतः परम् ॥ १० ॥

गन्धो रसश्च रूपं च शब्दस्स्पर्शश्च पञ्चमः ।
पञ्चतन्मात्रसंज्ञानि कार्याण्येतानि वै दश ॥ ११ ॥

वाक् च पाणिश्च पादश्च पायुश्चोपस्थमित्यपि ।
कर्मेन्द्रियाणि पञ्चैषां गुणाः पञ्च प्रकीर्त्तिताः ॥ १२ ॥

व्याहारादानगमनविसर्गानन्दनामकाः ।
श्रोत्रं हित्वग् दृष्टिरसने घ्राणं ज्ञानेन्द्रियाणि ॥ १३ ॥

शब्दस्पर्शौ रूपरसगन्धाश्च विषया इह ।
करणत्वेन विज्ञेया मनोऽहङ्कारबुद्धयः ॥ १४ ॥

क्रियाः प्रवर्तयन्त्यन्तः स्थितत्वान्तःकरणं ततः ।
संकल्पनं तथार्थानां श्रोत्रादीनां बहिः स्थिते ॥ १५ ॥

प्रवर्तनं च विषये मनसो वृत्तिरिष्यते ।
अभिमानः प्रेरणं च वायूनां देहवर्त्तिनाम् ॥ १६ ॥

अहङ्कर्तृगुणो बुद्धेर्गुणस्त्वध्यवसायकः ।
इदं रजतमेवेति निश्चयोऽध्यवसायकः ॥ १७ ॥

एवमुक्तानि तत्त्वानि त्रयोविंशतिसङ्ख्यया ।
एतेषु बुद्धितत्त्वात् स्यादहङ्कारस्त्रिरूपवान् ॥ १८ ॥

सात्त्विको राजसश्चेति नामसश्चेति भेदतः ।
सात्त्विकादप्यहङ्कारान्मनोज्ञानेन्द्रियोद्भवः ॥ १९ ॥

राजसादपि वागादिकर्मेन्द्रियसमुद्भवः ।
तामसादपि तन्मात्रपञ्चकस्य समुद्भवः ॥ २० ॥

तन्मात्रेभ्यश्च पञ्चभ्यः पञ्चभूतसमुद्भवः ।
धृतिस्समूहीकरणं दाहोऽव्ययत्रयोजनम् ॥ २१ ॥

अवकाशप्रदानं च भूतपञ्चकवृत्तयः ।
पृथ्व्याश्शब्दस्पर्शरूपरसास्साधारणा गुणाः ॥ २२ ॥

गन्धो वैशेषिकोऽपां तु शब्दः स्पर्शश्च रूपकम् ।
साधारणगुणा एते रसो वैशेषिको गुणः ॥ २३ ॥

रूपं तेजस्यसामान्यं [1]शब्दस्पर्शावतादृशौ ।
वायोस्साधारणश्शब्दः स्पर्शो वैशेषिको गुणः ॥ २४ ॥

आकाशे शब्द एवैको [2]न वर्णात्मा प्रतिध्वनिः ।
द्वाविंशतेः परस्यास्य बुद्धितत्त्वस्य कारणम् ॥ २५ ॥

गुणतत्त्वमिदं सत्त्वं रजस्तम इति त्रिधा ।
सुखदुःखविमोहानां त्रयाणां कारणं हि तत् ॥ २६ ॥

अत्र प्रकृतितत्त्वं तु गुणतत्त्वस्य कारणम् ।
गुणतत्त्वं चतुर्विंशं प्रकृतिः पञ्चविंशकम् ॥ २७ ॥

स्वभिन्ना वस्त्वबुद्ध्यादि त्रयोविंशतितत्त्वके ।
सुखे दुःखे च मोहे च गुणतत्त्वं च कारणम् ॥ २८ ॥

अशुद्धाद्वेति भूम्यादिप्रकृत्यङ्गस्य नामहि ।
अत ऊर्ध्वं रागतत्त्वं तस्य चैतत्प्रयोजनम् ॥ २९ ॥

प्रकृत्युद्भूतवस्तूनामात्मने यत्प्ररोचनम् ।
अत ऊर्ध्वं नियत्याख्यं तत्त्वं स्यात्सप्तविंशकम् ॥ ३० ॥

कृतानि स्वेन कर्माणि स्वस्यानुभवसाधनम् ।
नापरस्येति नियमस्तस्य ज्ञेयं प्रयोजनम् ॥ ३१ ॥

अतः परं कालतत्त्वं तस्य चैतत्प्रयोजनम् ।
भोगेषु यः परिच्छेदो ह्रस्वो दीर्घोऽयमित्यपि ॥ ३२ ॥

अतः परं तु विन्दाख्यं तत्त्वमीरितमुत्तमम् ।
विषयेषूपरक्तो यो बुद्धिग्रहणकारणम् ॥ ३३ ॥

तस्मात् परं कालतत्त्वं ताम्रे नैल्यं यथा स्थिरम् ।
तथात्म निर्मलं स्वच्छमिति धीस्तत्प्रयोजनम् ॥ ३४ ॥

मायातत्त्वस्य कार्येऽस्मिन् तत्त्वे प्रकृतिरागयोः ।
विद्यायाश्च समुत्पत्तिः कलासंज्ञे व्यवस्थिता: ॥ ३५ ॥

नियतेः कालकलयोर्मायातत्त्वे समुद्भवः ।
कलाविद्याकालरागा नियतिः पञ्चकञ्चुकम् ॥ ३६ ॥

एतद्वृतस्य बोध्यस्य पुंस्वरूपमलावृतेः ।
पुरुषव्यपदेशोऽत आत्मनो जडरूपता ॥ ३७ ॥

आरागादाकलतत्त्वमिश्राद्याख्यं तु पञ्चकम् ।
एकत्रिंशदिमानेव सूक्ष्माङ्गं देहिनां पृथक् ॥ ३८ ॥

एतेषामपि सर्वेषां कारणत्वेन कीर्तितम् ।
अशुद्धमायातत्त्वं तु नित्यं व्यापकमेव च ॥ ३९ ॥

सर्वात्मकर्मसम्बन्धं स्ववृत्तिद्वारतोऽखिलम् ।
प्रकाशयेदपि स्वैरं मोहकं जगतामिदम् ॥ ४० ॥

ततः परं च द्वात्रिंशं विद्यातत्त्वमितीरितम् ।
ततः परं त्रयस्त्रिंशमुदितं तत्त्वमैश्वरम् ॥ ४१ ॥

शुद्धविद्याख्यतत्त्वेऽस्मिन् मन्त्राणां सप्त कोटयः ।
अष्टाविंशतिसङ्ख्याकाः कामिकाद्याश्च संहिताः ॥ ४२ ॥

नन्द्यादयोऽष्टौ गणपास्सिद्धाद्यैः परिपूजिताः ।
इन्द्रादिलोकपालाश्च वज्रादीन्यायुधानि च ॥ ४३ ॥

ईश्वराख्ये तु विद्येशाः सङ्कर्षानन्तपूर्वकाः ।
एतासां चापि विद्यानां विद्यातत्त्वनिवासिनाम् ॥ ४४ ॥

अन्येषां चेश्वरोऽनन्तो मायाक्षोभकरश्च सः ।
मायेयतत्त्वभुवनसृष्टिकर्ता स एव हि ॥ ४५ ॥

अयमेकमलश्चैव भिन्नश्च परमेश्वरात् ।
जायन्ते मलपाकेशा ईशानुग्रहगोचराः ॥ ४६ ॥

रुद्रास्त्वाणवकार्माख्या मलद्वितयसंयुताः ।
अनेन सृष्टिप्रलया कलाख्ये चात्मसञ्चये ॥ ४७ ॥

मलपाकयुताश्चाष्टादशाभ्यधिकतां गताः ।
शतं रुद्रास्तु परमेश्वरानुग्रहगोचराः ॥ ४८ ॥

[1] शब्दस्पर्शौ न तादृशौ. [2] स वर्णात्मा.

रुद्रेष्वपि च रुद्रेषु(?) रुद्रः श्रीकण्ठनामकः ।
प्रलयान्ते प्रकृत्याख्यादर्वाक् तत्त्वेषु संस्थितः ॥ ४९ ॥

भुवनानां च निर्माता चाणवादित्रिपाशिनाम् ।
आत्मनां सकलाख्यानां सञ्चयेऽध्ययनादिभिः ॥ ५० ॥

उपास्यमानो ब्रह्मादिपदनिर्वाहकस्तथा ।
मध्यमप्रलये चास्य रागतत्त्वे व्ययस्थितिः ॥ ५१ ॥

सृष्टिकाले त्वशुद्धाध्वसृष्टिपूर्वकमेव हि ।
ब्रह्मविष्णोरधिष्ठाता ततोऽर्वाग्भुवनेश्वरान् ॥ ५२ ॥

त्रयस्त्रिंशत्कोटिदेवान् ब्रह्माण्डं च सृजत्यसौ ।
अण्डे चतुर्दशैतस्मिन् भुवनानि वसन्ति हि ॥ ५३ ॥

ते लोका जीवराशीनां निवासस्थलमीरिताः ।
पूर्वोक्तेषु च रुद्रेषु रुद्रास्तु शतसङ्ख्यकाः ॥ ५४ ॥

पाञ्चभौतिकमुन्मुच्य ब्रह्माण्डं क्षितितत्त्वकं ।
स्थित्वा ब्रह्माण्डसंरक्षां रचयन्ति समन्ततः ॥ ५५ ॥

गुणाख्ये ब्रह्मविष्णुभ्यां रुद्रभट्टारकः स्थितः ।
मध्यप्रलयपर्यन्तमधिकारं विधाय सः ॥ ५६ ॥

ब्रह्मविष्णू च संहृत्य मिश्राध्वपदगोचरम् ।
स्वयं रागाभिधानं तु तत्त्वमाश्रित्य तिष्ठति ॥ ५७ ॥

अनेन सह रुद्रेण वीरभद्रश्च तिष्ठति ।
प्रकृतेर्मस्तके चाष्टकलाया मस्तके तथा ॥ ५८ ॥

श्रीकण्ठवीरभद्रौ द्वावष्टकत्रितयाधिपौ ।
एवमष्टादशान्ये च शतं ब्रह्माण्डरक्षकाः ॥ ५९ ॥

ईश्वरेणानुगृह्यन्ते शतमष्टादशाधिकम् ।
आत्मकर्तृकसद्ज्ञानयोगाभ्यासबलेन तु ॥ ६० ॥

ब्रह्मविष्ण्वादिपदवीमपि संपादयन्ति ते ।
एतेषामपि रुद्राणां फलस्य परिपाकतः ॥ ६१ ॥

पदप्राप्तिर्दीक्षयानुग्रहान्माहेश्वराद् भवेत् ।
प्रसादादीश्वराच्छुद्धविद्यातत्त्वनिवासिनाम् ॥ ६२ ॥

फलस्य परिपाकेषु पदप्राप्तिः प्रजायते ।
विद्येश्वराणामेतेषां स्वरूपं स्यात्तु वैन्दवम् ॥ ६३ ॥

एतेषामिह रुद्राणां मायेयं स्याच्छरीरकम् ।
ब्रह्मविष्ण्वादिकानां तु शरीरं प्राकृतं मतम ॥ ६४ ॥

उदीरितानां रुद्राणां विद्येशानामशेषतः ।
स्वरूपमिह रूपं तु ध्येयं पूज्यं महेशितुः ॥ ६५ ॥

ब्रह्मणश्चापि विष्णोश्च पदं स्यात्पशुभूमिका ।
ऐश्वरं चापि रौद्रं च पतिभूमिरिदं द्वयम ॥ ६६ ॥

अस्मादीश्वरतत्त्वात् स्यात् परं तत्त्वं सदाशिवम् ।
ततः परं शक्तितत्त्वं शिवतत्त्वमतः परम् ॥ ६७ ॥

अस्मिंश्च तत्त्वत्रितये भिन्नानि परमेशितुः ।
न विद्यन्ते कर्तृभूतान्यस्मिन्नात्मान्तराणि च ॥ ६८ ॥

लयभोगाधिकारेषु श्रद्दधानाः पदेषु च ।
दीक्षया दीक्षिता मन्त्रास्साधकाः परमेशितुः ॥ ६९ ॥

प्रसादतस्तानि तानि भुवनान्यधिगम्यते ।
महासंहारपर्यन्तं वैराग्यान्तमथापि वा ॥ ७० ॥

स्थित्वा विध्येशवन्मुक्ताश्शिवात्मानो भवन्ति हि ।
अकारादिक्षकारान्ता वर्णाः पञ्चाशदेव हि ॥ ७१ ॥

अष्टाविंशतिसङ्ख्याकाः कामिकाद्याश्च संहिताः ।
वैखरीरूपमापन्ना विद्यातत्त्वे व्यवस्थिताः ॥ ७२ ॥

प्रणवस्यैश्वरे तत्त्वे वसेत्सादाख्यवस्तुनि ।
बिन्दुश्च सकलस्तद्वन्नादश्च सकलो भवेत् ॥ ७३ ॥

शक्तितत्त्वेऽभिसूक्ष्माभिधेयबुद्धेस्तु कारणम् ।
प्रत्यात्मं च पृथग्भूत्वा सूक्ष्मं नादात्मकं भवेत् ॥ ७४ ॥

पुर्यष्टकं च बिन्दुश्च नियतं तत्र तिष्ठति ।
शिवतत्त्वं च बिन्दोश्च न भेदव्यपदेशनम् ॥ ७५ ॥

अधितिष्ठन् स तु सदाशिवशक्तिशिवाभिधम् ।
तत्त्वत्रयमवाप्नोति नामान्येतानि वै शिवः ॥ ७६ ॥

तत्राद्यस्सकलो ज्ञेयस्ततस्सकलनिष्कलः ।
निष्कलश्च ततोऽव्यक्तो व्यक्ताव्यक्तस्ततः परम् ॥ ७७ ॥

अव्यक्तश्च महेशश्च सदाशिवशिवाविति ।
एतेष्वपि च षट्त्रिंशत्तत्त्वेषु व्यापको ध्रुवः ॥ ७८ ॥

अमूर्तः परमेशस्य नित्याधिष्ठेयतां गतः ।
शब्दार्थरूपो नादादिद्वारात्मज्ञानकारणम् ॥ ७९ ॥

अमोहकश्च भवति बिन्दुस्सच जडात्मकः ।
मायेयव्यतिरिक्तानां स चोपादानकारणम् ॥ ८० ॥

पृथिवीतत्त्वमारभ्य शिवतत्त्वावधीनि च ।
तानि तत्त्वानि षट्त्रिंशत्तत्त्वाद्वेत्यभिधीयते ॥ ८१ ॥

अधः कालाग्निभुवनमारभ्या शिवविष्टपम् ।
द्विशतं भुवनानि स्युः पञ्चत्रिंशत्समन्वितम् ॥ ८२ ॥

भुवनाध्वपदेनेदं सर्वमेवाभिधीयते ।
अकारादिक्षकारान्तवर्णा वर्णाध्वनामका: ॥ ८३ ॥

व्योम व्यापीत्यादिकस्तु सैकाशीति: पदाध्वका: ।
मूलब्रह्माङ्गरूपेण मन्त्राद्येकादशात्मक: ॥ ८४ ॥

निवृत्तिप्रमुखा: पञ्च कलाध्वेति समीरिता: ।
एतेषु च कलातत्त्वभुवनाख्यास्त्रयस्तु ते ॥ ८५ ॥

अध्वानोऽध्वस्वरूपा: स्युरथाध्वानस्तत: परं ।
मन्त्रवर्णपदात्मानस्त्रयश्शब्दस्वरूपका: ॥ ८६ ॥

तत्त्वाध्वानमुपाश्रित्य भुवनाध्वावतिष्ठते ।
कलाध्वानं तु तत्तत्त्वाद् भुवनाध्वा तु तं श्रित: ॥ ८७ ॥

त्रयोऽध्वानो वर्णपदमन्त्रात्मानो भवन्ति ये ।
ते वर्तन्ते भुवनजशरीराणां व्यपेक्षया ॥ ८८ ॥

षण्णामप्यध्वनामेषां परमं कारणं तु यत् ।
उच्यते शुद्धविद्येति ब्रह्म कुण्डलिनीति च ॥ ८९ ॥

एतेऽपि च षडध्वानस्संसार: सकलात्मनाम् ।
षडध्वव्यतिरिक्ताश्च व्यापकाश्चेतना ध्रुवा: ॥ ९० ॥

प्रतिदेहं विभिन्नाश्च मलिना: कर्मकारिण: ।
किञ्चिद्ज्ञास्सेश्वरा जीवास्स्वकर्मफलभागिन: ॥ ९१ ॥

सकलाकलविज्ञाना: कलाश्च प्रलया: कला: ।
इति संज्ञां लभन्ते ते पाशभेदवशेन तु ॥ ९२ ॥

सर्वेषामात्मनां पाशा: पञ्चधा परिकीर्तिता: ।
कलादिकपृथिव्यन्तभुवनादिस्वरूपवान् ॥ ९३ ॥

बन्धो मायेयसंज्ञस्तु विद्वद्भि: परिकीर्तित: ।
ज्योतिष्टोमब्रह्महत्यादुत्पन्नोऽपूर्वसंज्ञक: (?) ॥ ९४ ॥

संस्कार: कर्मशब्देन बन्धोऽन्य: परिकीर्त्यते ।
पुर्यष्टकान्तरगतं बुद्धितत्त्वमुपाश्रित: ॥ ९५ ॥

सुखदु:खविमोहादिफलयुक्तश्च जायते ।
बन्धो मलाभिधानस्तु स्वरूपाण्यात्मानां पृथक ॥ ९६ ॥

ज्ञानं क्रियां च सततं समावृत्य व्यवस्थित: ।
नित्यश्च व्यापकश्चैव भवेदपि जडात्मक: ॥ ९७ ॥

विद्याविद्येश्वरादीनां शरीराणां च कारणम् ।
सूक्ष्मादिवैखर्यन्तस्य कारणं वैन्दवाभिध: ॥ ९८ ॥

मायेयमाणवं कार्मं वैन्दवं च चतुष्टयम् ।
पाशानां कारणीभूता तेषु बन्धेषु मा पुन: ॥ ९९ ॥

सा शक्तिरैश्वरी रोध: पाशश्चेति निगद्यते ।
शुद्धाध्ववर्तिनां बिन्दुरोधौ पाशावुभौ मतौ ॥ १०० ॥

मिश्राध्ववर्तिनामुक्तौ द्वौ द्वौ कार्माणवाभिधौ ।
एवमातद्विवद्धानां (?) चतुष्टयमुदाहृतम् ॥ १०१ ॥

मायेयसहितास्ते च पञ्चाशुद्धाध्ववर्तिनाम् ।
त्रिष्वध्वस्वमिष्वेतेषु शुद्धाध्वविनिवासिनाम् ॥ १०२ ॥

मुक्तानामिव दु:खेनास्पृष्टा सुखपरम्परा ।
न सन्ति लेशतस्तत्र दु:खमोहादयोऽपि च ॥ १०३ ॥

अत एव हि शुद्धाध्वेत्यसौ समभिधीयते ।
मिश्राध्ववासिलोकानां सर्पहत्वे च सत्यपि (?) ॥ १०४ ॥

सुखं दु:खं च मोहश्च मिश्रमेव प्रवर्तते ।
अशुद्धाध्वस्थितानां तु किञ्चिद्ज्ञत्वाल्पकर्तृके ॥ १०५ ॥

सुखं दु:खं च मोहश्चेत्यमी तत्रैव सन्ति हि ।
अत एव स्वयं तद्ज्ञैरशुद्धाध्वेति मीयते ॥ १०६ ॥

अत्र वैन्दवमायेयपाशावागन्तुकावुभौ ।
अनादिराणव: पाश: स्वपाकान्ते महेशितु: ॥ १०७ ॥

प्रसादप्राप्तया शैवदीक्षयैव निवर्तते ।
कार्मस्तु पातश्चिद्ज्ञानयोगसंन्यसनैश्च वा ॥ १०८ ॥

भोगेन तदभावे वा क्षीणभावं समश्नुते ।
पशु: पाश: पतिश्चेति त्रयस्त्वेवं प्रकीर्तिता: ॥ १०९ ॥

एवं तत्त्वप्रपञ्चस्तु शैवे सम्यक् प्रदर्शित: ।
शिवप्रभृति पृथ्व्यन्तसृष्टिक्रम उदीर्यते ॥ ११० ॥

शिवतत्त्वाच्छक्तितत्त्वं शक्तितत्त्वात् सदाशिव: ।
सदाशिवादीश्वरश्च शुद्धविद्या तथेश्वरात् ॥ १११ ॥

माया च शुद्धविद्याख्यात् कला मायाख्यतत्त्वत: ।
कालतत्त्वं कलातत्त्वान्नियति: कालतत्त्वत: ॥ ११२ ॥

विद्यातत्त्वं नियत्याख्याद्रागो विद्याख्यतत्त्वत: ।
रागतत्त्वाच्च पुरुष: पुरुषात् प्रकृतिस्तत: ॥ ११३ ॥

प्रकृतेश्च गुणस्तस्मात् बुद्धिर्बुद्धेरहङ्कृति: ।
अहङ्कारच्च चित्ताख्यं चित्ताद् ज्ञानेन्द्रियाणि तु ॥ ११४ ॥

तेभ्य: कर्मेन्द्रियाणि स्युस्तेभ्यस्तन्मात्रपञ्चकम् ।
तन्मात्रेभ्यश्च भूतानि क्रमेणैव प्रजज्ञिरे ॥ ११५ ॥

पञ्चीकृतैस्तु तैर्भूतैर्ब्रह्माण्डं समजायत ।
शतकोटिप्रविस्तीर्णस्स च ब्रह्माण्डगोलक: ॥ ११६ ॥

कपालमर्बुदस्थौल्यं ब्रह्मणोऽडस्य योजनैः ।
जलाद्यव्यक्ततत्त्वान्तं दशवृद्धि यथोत्तरम् ॥ ११७ ॥
अव्यक्ताद्रागतत्त्वं तु शतधा व्याप्य संस्थितम् ।
रागतत्त्वाच्च विद्याख्यप्रशुद्धपशुमोचनम् ॥ ११८ ॥
सहस्रं वृद्धिविख्यातं शिवेन शिवशासने ।
ततः कालनियत्याख्यं सम्पुटं व्याप्य लक्षधा ॥ ११९ ॥
कालतत्त्वकला ज्ञेया लक्षायुतपरिच्छदा ।
तदूर्ध्वे तु भवेन्मायाकोटिं व्याप्य स्थिता द्विधा ॥ १२० ॥
ततो विद्या च या शुद्धा हरिकोट्या युता मता ।
ततश्चेश्वरसंज्ञं तच्छतकोटिगुणं भवेत् ॥ १२१ ॥
सहस्रकोटियावृद्धिस्तत्त्वे सादाशिवे मता
शक्तिः स्यादर्बुदगुणः शिवे मानं न विद्यते ॥ १२२ ॥
देहिनां कर्मजालानि भोक्तुं सर्वासु योनिषु ।
भ्रमतां कर्मविश्रान्त्यै शिवेन प्रश्रयः कृतः ॥ १२३ ॥
शिवाद् विश्वं ततस्सृष्टिर्लयस्तत्प्रतिलोमतः ।
तन्मात्रेषु च भूतानि तन्मात्राणीन्द्रियेषु च ॥ १२४ ॥
इन्द्रियाणि लयं यान्ति दशान्तःकरणे तथा ।
गुणे तदन्तःकरणं स गुणः प्रकृतावपि ॥ १२५ ॥
रागादिपञ्चके सा च मायायां तच्च पञ्चकम् ।
विशुद्धाध्वनि सा माया विन्दौ सोऽध्वा च लीयते ॥ १२६ ॥
पुनः प्रवर्तते विश्वं जगदारभ्य विन्दुतः ।
भगवन्निह पूर्वोक्ततत्त्वराशेरशेषतः ॥ १२७ ॥
शिवतत्त्वं प्राप्यभूमिरेकमेवेति कीर्त्तितम् ।
तादृशशिवतत्त्वस्य प्राप्यभूर्वर्तते न वा? ॥ १२८ ॥
निरूप्यमेतद्विज्ञानवेद्यजातं सविस्तरम् ।
दुर्विज्ञेयं च देवानां पृच्छ्यमानं मयास्ति यत् ॥ १२९ ॥
तत्करोषि विशेषेण करामलकसन्निभम् ।
सन्देहजालतिमिरं मन्देहारातिसन्निभ! ॥ १३० ॥
श्रीमद्वागमृतासेकश्चित्तं सप्रमदांकुरम् ।
भोः पुत्र! यस्तत्र प्रश्नो योगिनामपि दुष्करः ॥ १३१ ॥
तस्योत्तरमहं वक्ष्ये समाहितमनाः शृणु ।
शिवस्वरूपमाख्यातुं चतुरास्योऽपि न क्षमः ॥ १३२ ॥
तत्स्वरूपं तु निगमागमोक्तं वर्णयामहे ।
यत् पृष्टं शिवतत्त्वं तत्परविद्यादिनामभाक् ॥ १३३ ॥
परविद्या च कुटिला कुण्डलीशब्दतत्त्वकम् ।
शुद्धब्रह्मपरो नादो बीजं चैव षडध्वनाम् ॥ १३४ ॥
शुद्धमाया सुमाया चानाहतं सुमनास्तथा ।
वागीश्वरी परो विन्दुः कलामलिनिका तथा ॥ १३५ ॥
योगपीठं मन्त्रपीठं विन्दुपीठं तृतीयकम् ।
क्रियाशक्तिः क्रियाशक्तिश्शक्तिश्चान्यापरिग्रहा ॥ १३६ ॥
ब्रह्मा चैव महालिङ्गमितिपर्यायनामभिः ।
शिवतत्त्वस्वरूपं तु सर्वत्र प्रतिपाद्यते ॥ १३७ ॥
तदेवं च महालिङ्गं पराचीनप्रवृत्तिमत् ।
निष्कलाख्यं तु लिङ्गं स्यात्पूर्वोक्तव्युत्क्रमेण तु ॥ १३८ ॥
तदेव निष्कलं लिङ्गं शून्यलिङ्गाभिधं भवेत् ।
तदेव शून्यलिङ्गं तु स्यान्निरञ्जनजङ्गमम् ॥ १३९ ॥
हृत्पद्मकर्णिकामध्ये तन्निरञ्जनजङ्गमम् ।
प्रकाशयन्निहानादिभक्त इत्यभिधीयते ॥ १४० ॥
नित्यमुक्तं परं ब्रह्म सच्चिदानन्दरूपकम् ।
निष्कर्मकं च निर्दोषं निर्मायावरणं तथा ॥ १४१ ॥
निराश्रयं निरुपमं निस्सङ्गं नित्यनिर्मलम् ।
निर्गुणं चैव निर्द्वन्द्वं निर्लेपं चान्तवर्जितम् ॥ १४२ ॥
परमात्मेत्यादिशब्दैस्तदेव प्रतिपाद्यते ।
शैवशास्त्रोक्तरीत्यैवं पदार्थाः प्रतिपादिताः ॥ १४३ ॥
शास्त्रान्तरेषु विबुधाः पदार्थान् ब्रुवतेऽन्यथा ।
तस्माच्छिवाद् वेद्यमन्यन्नास्ति लोकेषु किञ्चन ॥ १४४ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारणचिदम्बर-
शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे नवमकल्लोले
शैवतत्त्वप्रतिपादनं नाम तृतीयस्तरङ्गः

अथ चतुर्थस्तरंगः

स्वामिन्! शास्त्रान्तराण्यत्र सन्तीति प्रतिपादितम् ।
नानाभेदं भवेद्यत्र पदार्थप्रतिपादनम् ॥ १ ॥

कियन्ति तानि शास्त्राणि? निर्मितान्यत्र तानि कैः? ।
किं तत्रात्मस्वरूपं वा पदार्थस्थितयोऽपि वा? ॥ २ ॥

मुक्तेर्वापि क्रमस्तेषु कीदृशस्तद्? वदस्व मे ।
एतद्विचारणे भूयो वर्ततेऽभ्यधिका स्पृहा ॥ ३ ॥

गूढान् प्रकाशयस्यर्थान् भास्वानिव विशेषतः ।
न तवाविदितं किञ्चिदीश्वरस्येव विद्यते ॥ ४ ॥

जिज्ञासितं ममाख्याहि प्रख्यातमहिमोन्नत! ।
कुमार! यस्तव प्रश्नः कुमारस्येव सूक्ष्मगः ॥ ५ ॥

तत्रोत्तरं वयं ब्रूमः क्रमादवहितः शृणु ।
सौरं वैनायकं ब्राह्मं शाक्तेयं शैववैष्णवे ॥ ६ ॥

एतानि दर्शनान्याहुः षड्दैवतसमाश्रयात् ।
शैवं पाशुपतं कालमुखं कापालिकं तथा ॥ ७ ॥

बौद्धमार्हतकं चेति समयाष्षडुदीरिताः ।
लकुलीशोदितं शैवं श्रीकण्ठोदितमित्यपि ॥ ८ ॥

सामान्यात्समयश्शैवो द्विधैव परिपठ्यते ।
तत्र पाशुपतं कालरुद्रकं माहाव्रतं त्विति ॥ ९ ॥

लकुलीशोदितं त्रेधा दर्शनं भिद्यते पृथक् ।
वैखानसं पाञ्चरात्रं तथा भागवताभिधम् ॥ १० ॥

वैष्णवं दर्शनं त्रेधा तत्तन्त्रज्ञैरुदीरितम् ।
साङ्ख्यं निरीश्वरं चैव जैनं लोकायतं मतम् ॥ ११ ॥

सामुद्रं वास्तुरत्नादिशास्त्रं विद्याः कलाश्रयाः ।
वणिग्गोरक्षकृष्यादि शास्त्रं लौकिकमिष्यते ॥ १२ ॥

शब्दो वैशेषिको न्यायो मीमांसा धर्मगोचरा ।
सांख्ययोगश्च वेदान्त इति वैदिकमुच्यते ॥ १३ ॥

अक्षपादः कणादश्च कपिलो जैमिनिस्तथा ।
व्यासः पतञ्जलिश्चेति वैदिकाश्शास्त्रकारकाः ॥ १४ ॥

सङ्ग्रहात् पञ्च शास्त्राणि लौकिकं वैदिकं तथा ।
आध्यात्मिकातिमार्गे द्वे मान्त्रिकं चेति नामतः ॥ १५ ॥

यद् दृष्टफलकं शास्त्रं तदेव स्यात्तु लौकिकम् ।
शास्त्रं वेदैकगम्यानां बोधकं वैदिकं स्मृतम् ॥ १६ ॥

तस्मिंश्च प्रतिपाद्यानामर्थानां निर्णयाय ये ।
मुनिप्रणीते शास्त्रे द्वे न्यायवैशेषिकाभिधे ॥ १७ ॥

सांख्यं पातञ्जलं चैव वेदान्तं चेति शास्त्रकम् ।
उद्दिश्योपनिषद्भागं प्रणीतं यन्मुनीश्वरैः ॥ १८ ॥

आत्मज्ञानोपयुक्तं तदाध्यात्मिकमिति त्रयम् ।
रुद्रप्रणीतं यच्छास्त्रमतिमार्गं तदीरितम् ॥ १९ ॥

शिवप्रणीतं सिद्धार्थं शास्त्रमात्रं प्रकीर्तितम् ।
मीमांसायाः प्रणेता तु भगवान् जैमिनिर्मतः ॥ २० ॥

तस्मिन् शास्त्रे तु विषयः प्रपञ्चस्यास्य नित्यता ।
श्रुतेरपौरुषेयत्वमिष्टापूर्ताद्यनुष्ठितिः ॥ २१ ॥

कर्मानुष्ठानमेवैकमनुष्ठातुः फलप्रदम् ।
भौतिकेभ्यश्शरीरेभ्य इति येभ्यो विलक्षणाः ॥ २२ ॥

आत्मानो विभवा नैकं न तेभ्योऽस्ति विलक्षणः ।
कश्चिदत्रेश्वरो नाम लोके कर्मफलप्रदः ॥ २३ ॥

अदृष्टमेव निखिलप्रपञ्चारम्भकं भवेत् ।
प्रत्यक्षमनुमानं चोपमानं च तथागमः ॥ २४ ॥

अर्थापत्त्यनुपलब्धी चेत्येवं मानानि षड् जगुः ।
श्रुतिलिङ्गादिभिर्मान्यैर्न्यायैरन्यैरनेकधा ॥ २५ ॥

मीमांसित्वाथ वेदार्थं धर्मं स्वोचितमाचरन् ।
तत्त्वविज्ञानयोग्यत्वमात्मनः प्रतिपाद्यते ॥ २६ ॥

देही तादात्म्यविज्ञानाद् धर्माधर्ममयेऽखिले ।
संसारमूले संक्षीणे मुच्यते भवबन्धनात् ॥ २७ ॥

एवं पदार्था मीमांसाशास्त्रे दिङ्मात्रमीरिताः ।
शास्त्रे वैशेषिके तावत् प्रतिपाद्यमथ ब्रुवे ॥ २८ ॥

द्रव्यं गुणः कर्म जातिर्विशेषस्समवायकः ।
इति भावाः पदार्थाष्षट् कणादेन प्रदर्शिताः ॥ २९ ॥

गुणानामाश्रयो द्रव्यं कारणं समवायि वा ।
स्पन्दत्वरहितास्सन्तो जातिमात्राश्रया गुणाः ॥ ३० ॥

कुर्याद्विभागसंयोगौ यत्तत्कर्मसमुच्चितौ ।
नित्याभिन्नेष्वनुस्यूतधीहेतुर्जातिरुच्यते ॥ ३१ ॥

भेदकेषु प्रसिद्धेषु यत्रासत्सु त्रिभिन्नधीः ।
द्रव्येषु तेषु नित्येषु विशेषा भेदधीकराः ॥ ३२ ॥

समवायस्तु नित्यस्स्यात् सम्बन्धोऽयुतसिद्धयोः ।
अभावस्सप्तमोह्यर्थो निषेधमतिगोचरः ॥ ३३ ॥

नवैव तत्र द्रव्याणि तत्र गन्धवती मही ।
जरायुजाण्डजोद्भिज्जस्वेदजास्स्युस्तदुद्भवाः ॥ ३४ ॥

शरीरं मिश्रकर्मोत्थं योनिजायोनिजात्मकम् ।
केवलेनैव पापेन यातनार्थमयोनिजम् ॥ ३५ ॥

तीव्रानन्दसहस्तद्वत् स्वर्गिणां पुण्यमात्रतः ।
मृत्पाषाणस्थावरात्मा विषयो घ्राणमिन्द्रियम् ॥ ३६ ॥

सांसिद्धिकद्रवा आपो देहो वरुणलोकजः ।
नदीकरकवाद्यादिर्विषयो रसनेन्द्रियम् ॥ ३७ ॥

उष्णं तेजोऽग्निसूर्यादिलोके देहसमुद्भवः ।
स्वर्णादितारकान्तानि विषयश्चक्षुरिन्द्रियम् ॥ ३८ ॥

अपाकस्पर्शवान् वायुः धृत्याद्यैरनुमीयते ।
देहस्तज्जो मरुल्लोके वृक्षाद्या विषयाः स्मृताः ॥ ३९ ॥

द्व्यणुकं परमाणुभ्यां निमिस्तैस्त्र्यणुकं भवेत् ।
एवमन्त्यावयव्यन्तं पूर्वैरारभ्यते परम् ॥ ४० ॥

व्योम शब्दाश्रयस्तत् स्याददृष्टाच्छ्रोत्रमिन्द्रियम् ।
अतीन्द्रियं च विभ्वेकं मूर्तानामवकाशदम् ॥ ४१ ॥

पूर्वापरत्वकृत् कालो दिक्च दूरान्तिकत्वकृत् ।
आत्मा ज्ञानाश्रयो नानासुखदुःखाद्यसङ्करात् ॥ ४२ ॥

देहे भिन्नाप्यवस्थाभिर्यत्राहमिति धीस्फुटे ।
देहान्तरग्रहो यस्य स चात्मा कर्मबन्धनः ॥ ४३ ॥

सुखादिविषयं ज्ञानमपरोक्षं यतो भवेत् ।
मनस्तु नित्यमणु च युगपद्वृत्त्यनुद्भवात् ॥ ४४ ॥

अभावस्तेजसो ध्वान्तं न द्रव्यान्तरमिष्यते ।
कार्ष्ण्यमारोपितं तत्र स्मृतं शुक्ले विरोधतः ॥ ४५ ॥

एवं नवैव द्रव्याणि प्रोक्तान्यथ गुणान् ब्रुवे ।
गुणा रूपादयस्तेतु चतुर्विंशतिरीरिताः ॥ ४६ ॥

तत्र रूपं रसो गन्धः स्पर्शाश्चेति गुणाः क्रमात् ।
जातिमत्वेऽक्षिरसनघ्राणत्वक्छ्रोत्रगोचराः ॥ ४७ ॥

पाकजाः पृथिवीनिष्ठा जलादिस्थास्त्वपाकजाः ।
कार्यद्रव्यं हि भिन्दानं तेजोरूपरसादिकम् ॥ ४८ ॥

नाशयेज्जनयेद्वातस्तत्पाकाः परमाणुषु ।
एकादिव्यवहाराणामसाधारणकारणम् ॥ ४९ ॥

सङ्ख्या द्वेधा श्रिता द्रव्यमपेक्षाबुद्धिजेति च ।
आद्यैकत्वद्वित्रिमुख्यपदार्थान्ता परा मता ॥ ५० ॥

मानधीर्व्यवहाराणामसाधारणकारणम ।
परिमाणं चतुर्धा तन्महत्तत्र द्विधा मतम ॥ ५१ ॥

मध्यं च परमं चेति द्वयं मूर्तेषु खादिषु ।
कार्यं नित्यमणु द्वेधा तत्राद्यं द्व्यणुके स्थितम ॥ ५२ ॥

पारिमाण्डिल्यमित्येतदन्यत्तत्परमाणुषु ।
ह्रस्वं तद् द्व्यणुकेष्वेव महत्स्वेव च दीर्घता ॥ ५३ ॥

इदमस्मात् पृथगिति पृथक्त्वं व्यवहारकृत ।
संयोगः प्राप्तयोः प्राप्तिर्विभागस्तद्विनाशकः ॥ ५४ ॥

परापरत्वे कालोत्थे पुराणनवपिण्डगे ।
दिग्ये दूरान्तिकार्थस्था ह्यपेक्षाबुद्धिजन्मनि ॥ ५५ ॥

प्रथमे पातने हेतुर्गुरुत्वं स्यन्दने द्रवः ।
गुणस्सङ्ग्रहकृत्स्नेहः शब्दः श्रोत्रैकगोचरः ॥ ५६ ॥

यज्जातीयस्समुत्पाद्यस्तज्जातीयस्य कारणम् ।
स्वयं विजातिरदृष्टस्संस्कारस्सगुणो भवेत ॥ ५७ ॥

बुद्धेरर्थप्रकाशः स्याद् द्विविधा सा प्रमाप्रमा ।
प्रमा प्रत्यक्षमनुमा स्मृतिरार्षमिति स्थिता ॥ ५८ ॥

अप्रमा संशयभ्रान्तिस्वप्नानध्यवसायिनी ।
अनुकूलान्तराहेतुरनुकूलं सुखं स्वतः ॥ ५९ ॥

प्रतिकूलं स्वतो दुःखमिच्छाशक्तिस्सुखादिषु ।
द्वेषस्स्यादसहिष्णुत्वमुत्साहो यत्न इष्यते ॥ ६० ॥

विहितात् कर्मणो धर्मो निषिद्धादप्यधर्मकः ।
क्रियाकालात्परे काले कारणं सुखदुःखयोः ॥ ६१ ॥

पञ्चधा कर्म तत्रोर्ध्वमधश्च द्रव्ययोजितम् ।
उत्क्षेपणमधःक्षेपस्तिर्यक् चोर्ध्वं प्रसारणम् ॥ ६२ ॥

द्रव्यास्योराभिमुख्यं परमाकुञ्चनं मतम् ।
नानादिग्देशसम्बन्धकारणं गमनं विदुः ॥ ६३ ॥

प्रवेशो निर्गमस्स्पन्दो भ्रमणादिरनेकधा ।
जातिः परापरा द्वेधा सत्तार्थत्रयगा परा ॥ ६४ ॥

द्रव्यत्वगोत्वभूत्वादेरपराल्पार्थवृत्तितः ।
विशेषसमवायौ द्वौ पदार्थौ प्राङ् निरूपितौ ॥ ६५ ॥

विवेकेन पदार्थानां बुध्वात्मानं यथार्थतः ।
योगस्थो दुःखविध्वंसमात्यन्तिकमुपाश्नुते ॥ ६६ ॥

एवं वैशेषिकमतं नैयायिकमथोच्यते ।
प्रमाणं प्रमया व्याप्तं यथार्थानुभवः प्रमा ॥ ६७ ॥

तत्रेन्द्रियार्थसम्बन्धप्रत्यक्षं मानमिष्यते ।
स्वरूपमात्रधीहेतुर्निर्विकल्पं तदुच्यते ॥ ६८ ॥

नामजात्यादियुक्तार्थधीहेतुस्सविकल्पकम् ।
योगिनां च प्रकाशादिसापेक्षं तत्प्रकाशकम् ॥ ६९ ॥

योगिनां योगजाद् धर्मात् सूक्ष्मातीतादिगोचरम् ।
कारणं यत्परोक्षायः (?) प्रमितेर्व्याप्तिबोधतः ॥ ७० ॥

अनुमानमिदं व्याप्तिस्सम्बन्धो निरुपाधिकः ।
साधनाव्यापकत्वे यस्साध्यस्य व्यापको भवेत् ॥ ७१ ॥

उपाधिस्स हि विज्ञेयो हेत्वाभासस्य कारणम् ।
दृष्टं सामान्यतो दृष्टमनुमानमिति द्विधा ॥ ७२ ॥

पूर्वं प्रत्यक्षयोगार्थं तदयोगार्थमुत्तरम् ।
अन्वयव्यतिरेक्येकमन्वयिव्यतिरेकि च ॥ ७३ ॥

हितैषिणः पदार्थोक्तिर्यथार्थादृष्टवासिनः ।
आगमो लौकिको वेदो वेदमूलश्च स त्रिधा ॥ ७४ ॥

श्रुतातिदेशवाक्यस्य सादृश्यं क्वचिदीक्षितम् ।
शब्दसङ्केतधीहेतुरुपमानं परं तु यत् ॥ ७५ ॥

अयमेवाविनाभावादर्थापत्तेश्च संभवः ।
अभावधीः स्यादग्न्यादेरैतिह्यासत्यमागमः ॥ ७६ ॥

आत्मादिकं प्रमेयं तु तत्र द्वादशधोदितम् ।
आत्माहम्प्रत्ययग्राह्यस्संसारी कर्मबन्धनात् ॥ ७७ ॥

तद्भोगायतनं देहस्साक्षाद्धीहेतुरिन्द्रियम् ।
भूतानि सगुणान्यर्थो बुद्धेरर्थप्रकाशनम् ॥ ७८ ॥

साक्षाद्धियस्सुखादीनां करणं मन इन्द्रियम् ।
प्रवर्तनात्मका दोषा रागद्वेषमदादयः ॥ ७९ ॥

प्रवृत्तिस्तु क्रिया श्रुत्या विहितप्रतिषिद्धयोः ।
देहाद् देहान्तरप्राप्तिः प्रेत्यभाव इहात्मनः ॥ ८० ॥

फलं तु कर्मणां साध्यं दुःखं तु प्रातिकूल्यवत् ।
दुःखात्यन्तसमुच्छेदो मोक्षस्तद्धेतुभिस्सदा ॥ ८१ ॥

अनुमानैरिदं सर्वं बुध्वा श्रुत्यविरोधिभिः ।
मोक्षमार्गान् परानेतैर्बोधयेत् संशयच्छिदे ॥ ८२ ॥

पक्षलिङ्गादिनिर्णीत्यै प्रत्यक्षादिचतुष्टयम् ।
वेदितव्यं तु मोक्षाय मेयं द्वादशधोदितम् ॥ ८३ ॥

अनुमानप्रवृत्त्यङ्गं संशयाद्यथ कथ्यते ।
तत्रानवधृतिज्ञानं संशयस्य त्रिधा मतः ॥ ८४ ॥

साधर्म्याद्वाथ वैधर्म्याद्वादिविप्रतिपत्तितः ।
प्रयोजनं यदुद्देश्यं दृष्टान्तस्संप्रतिस्थलम् ॥ ८५ ॥

मानैरभिमतैस्सिद्धस्सिद्धान्तस्स चतुर्विधः ।
स सर्वतन्त्रसिद्धान्तो यस्सर्वैरभ्युपेयते ॥ ८६ ॥

स्वशास्त्रमात्रे यस्सिद्धस्सशास्त्र्यभ्युपगमो मतः ।
एकार्थसिद्धयोर्वान्यस्सिद्धेशद्वार एव सः ॥ ८७ ॥

शास्त्रान्तरात् स्वीकृतो यः प्रतितन्त्रागतस्तु सः ।
स्वस्वप्रतीतये यत्तु लिङ्गं तत्स्वार्थमुच्यते ॥ ८८ ॥

परार्थं परबोधाय तत्पञ्चावयवं मतम् ।
प्रतिज्ञाख्यास्त्ववयवाः पञ्च व्याप्त्यादिबोधकाः ॥ ८९ ॥

एतैरवयवैर्लिङ्गं पञ्चरूपं प्रतीयते ।
तद्रूपसाधने पक्षधर्मतादिकमुच्यते ॥ ९० ॥

पञ्चरूपोपपन्नेऽस्मिन्ननुमाने निरूपिते ।
पञ्चावयववाक्येन जिज्ञासुस्साध्यसिद्धिभाक् ॥ ९१ ॥

पक्षे साध्यान्वयं वा यस्सपक्षे वा प्रयोजकः ।
शङ्कतास्मै प्रयोज्यस्स्यात्तर्कोऽनिष्टप्रयोजकः ॥ ९२ ॥

प्रामाणिकपरित्यागो निष्प्रमाणपरिग्रहः ।
इत्यनिष्टं द्विधा प्रोक्तं यस्य तर्कप्रसंज्ञकः ॥ ९३ ॥

सहकार्यनुमानस्य न केवलमसौ मतः ।
किं तु सर्वस्य मानस्य वारयत्येव दुःस्थितम् ॥ ९४ ॥

तर्कोपकरणान्मानान्निर्णयोऽर्थावधारणम् ।
वादिनः स्वस्य पक्षस्य प्रकटीकरणं तथा ॥ ९५ ॥

यत्र निर्णयमात्रार्थादनुमानं प्रयुज्यते ।
तर्केण च परक्षेपो वादोऽसौ वीतरागयोः ॥ ९६ ॥

जयार्थं यत्र वादिभ्यां मानजातिच्छलादयः ।
प्रयुज्यन्ते स जल्पः स्यात् पक्षयोः स्थापनेच्छया ॥ ९७ ॥

दूषणं कथ्यते यत्र केवलं प्रतिवादिना ।
न स्थाप्यते स्वपक्षस्तु वितण्डा सा कथा मता ॥ ९८ ॥

स्वयं व्यञ्जयितुं बुध्वा प्रोक्तं व्यञ्जयितुं परैः ।
मिथः कथावसानाय हेत्वाभासा निरूपिताः ॥ ९९ ॥

असिद्धः प्रथमस्तत्र ज्ञातः पक्षी भवेन्नयः ।
पक्षाभावे प्रयुक्तोऽयमाश्रयासिद्ध उच्यते ॥ १०० ॥

न स्वयं विद्यते यस्य स्वरूपासिद्ध ईरितः ।
साध्येन योगस्सोपाधिर्यस्यासौ व्याप्तिसिद्धिमान् ॥ १०१ ॥

परैर्ज्ञायमानोऽसावज्ञानासिद्ध उच्यते ।
हेत्वाभासो विरुद्धस्तु साध्याभावैकगोचरः ॥ १०२ ॥

साध्ये च तदभावे च यस्सोऽनैकान्तिको मतः ।
साध्याच्च तदभावाच्च व्यावृत्तोऽपि स उच्यते ॥ १०३ ॥

मानान्तरैरपहृते धर्मे तत्सिद्धये कृतः ।
कालात्ययापदिष्टोऽसौ प्रत्यक्षादिविरोधतः ॥ १०४ ॥

यस्तु हेतुः परोक्तेन तद्विरुद्धार्थवृत्तिना ।
रुद्धस्समवलेनैव भवेत् स प्रतिपक्षकः ॥ १०५ ॥

साधकेन प्रयुक्तास्ते हेत्वाभासतयोदिताः ।
छलजात्यादिसंज्ञाः स्युः प्रोक्ता दूषणवादिना ॥ १०६ ॥

साधकेनानभिमतं कल्पयित्वैव दूष्यति ।
येन तच्छलमुद्दिष्टमसिद्धं दोषसाधनम् ॥ १०७ ॥

स्वभो दूषणहेतुस्तु व्याप्तिर्यत्र न विद्यते ।
तज्जात्युत्तरमित्युक्तमशक्तं दूष्यदूषणे ॥ १०८ ॥

पराजयनिमित्तं तु निग्रहस्थानमुच्यते ।
कथावसानं तेनैकनिर्णयो वा जयो मतः ॥ १०९ ॥

प्रतिज्ञाहीनसन्न्यासभेदहेत्वन्तरादिभिः ।
विक्षेपाप्रतिभाद्यैश्च रूपैस्तद् बहुधा स्थितम् ॥ ११० ॥

इति वेदैकवेद्यानां धर्माधर्मेश्वरात्मनाम् ।
विचारो यदधीनोऽसौ न्यायस्साङ्गो निरूपितः ॥ १११ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारण-
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्र-
सारभूते श्रीशिवतत्त्वरत्नाकरे नवमकल्लोले
शास्त्रविभागमीमांसावैशेषिकन्यायमतनिरूपणं
नाम चतुर्थस्तरङ्गः

अथ पञ्चमस्तरंगः

मीमांसान्यायकाणादशास्त्रीयार्थाः प्रदर्शिताः ।
साङ्ख्यशास्त्रे तु विषयस्सम्प्रति प्रतिपाद्यते ॥ १ ॥

प्रमाणं त्रितयं चात्र प्रत्यक्षं च समागमः ।
पुरुषाः प्रथमं तत्त्वं चिन्मात्रास्सङ्गवर्जिताः ॥ २ ॥

निर्विकारा अकर्तारः प्रधानोपाधिबन्धनाः ।
प्रधानं विषयस्साम्यं गुणानां प्रसवक्रियाः ॥ ३ ॥

तमस्सत्वं रजस्ते स्युर्मोहशर्मार्तिहेतवः ।
आचारकं तमस्तत्र सत्वं चैव प्रकाशनम् ॥ ४ ॥

रजश्चलं सङ्ग्रहकृत् पुमर्थास्ते मिथोऽन्विताः ।
कार्यस्य त्र्यात्मकस्यैवं यत्र साक्ष्येन वर्तनम् ॥ ५ ॥

तत्प्रहारं यतस्सर्वं जगदुत्पत्तुमर्हति ।
तस्माज्जातं महत्तत्त्वं तत्त्वाधिक्यात्सतत्त्वकम् ॥ ६ ॥

तस्मादजन्यहङ्कारो येनाहंकुरुते कृते ।
सत्वाधिकादहङ्कारादिन्द्रियाणि प्रजज्ञिरे ॥ ७ ॥

तन्मात्रात्तामसात्तत्त्वाद्राजसात्तत्प्रवृत्तयः ।
तन्मात्रेभ्यो मिथो योगादाकाशादीनि जज्ञिरे ॥ ८ ॥

एतैराध्यात्मिकी सृष्टिर्भोगाय प्रतिपूरुषम् ।
क्रियते तत्प्रभूतेभ्यो नानादेहात्सुरात्मनाम् ॥ ९ ॥

महत्तत्त्वं तु बुध्याख्या विकृतिं प्रतिपद्यते ।
ततः प्रभृति मोक्षान्तं विपर्यासादिवृत्तिभिः ॥ १० ॥

तमो मोहमहामोहतामिस्राध्यात्मिकाः क्रमात् ।
विभ्रमोऽसावविद्याख्या पञ्चपर्वा प्रकीर्त्यते ॥ ११ ॥

भ्रमस्त्वतस्मिन् तद्बुद्धिरविद्येति च कथ्यते ।
तन्मात्रबुद्ध्यहङ्कारमनोयोगात्तदष्टधा ॥ १२ ॥

मोहोऽभिमानोऽस्मित्वं तदैश्वर्यविषयोऽष्टधा ।
संक्तीरागो महामोहास्तन्मात्रा भूतगोचराः ॥ १३ ॥

विषयैश्वर्यविध्वंसकारिषु द्वेषसंज्ञितः ।
ज्वलनात्मैव तामिस्रस्सङ्ख्ययाष्टादशात्मकः ॥ १४ ॥

तेषां विनाशतो भीतिस्तावदेवान्ध्यमुच्यते ।
एवं द्विषष्टिभेदोऽसौ पञ्चपर्वाविपर्ययः ॥ १५ ॥

एकादशेन्द्रियैश्वर्यं नव तुष्टीर्विषादतः ।
अष्टाविंशतिधा प्राहुरसक्तिं बुद्धिवृत्तिषु ॥ १६ ॥

मोक्षाशाहेतुतत्कालभोग्यभोगविरक्तिजाः ।
तुष्ट्यो नव बुद्धेस्स्युर्वृत्तयश्शास्त्रदर्शनात् ॥ १७ ॥

सर्जने रक्षणे नाशे भोगे च परहिंसने ।
दोषान् भावयतः पञ्च तुष्टयोऽत्र विरक्तिजाः ॥ १८ ॥

उषाध्ययनमीमांसासुहृत्सत्वविवृद्धयः ।
त्रयो दुःखविघाताश्च सिद्धयोऽष्टौ सुपुण्यजाः ॥ १९ ॥

अम्बा च सलिलाघा च भाग्या पारा सुपारिका ।
सुनेत्रा सुकुमारीति तुष्टयोऽत्तोत्तमेति च ॥ २० ॥

तारा तारतरा सिद्धिस्सुतारा रम्यकेति च ।
सदा प्रमुदिता मोदा मुदिता मोदमानिका ॥ २१ ॥

धर्मो ज्ञानं विरागित्वमैश्वर्यं तद्विपर्ययः ।
बुद्धे रूपाष्टकमिदं क्रमात् सात्त्विकतामसम् ॥ २२ ॥

अत्राविवेकतो बन्धस्तद्विवेकाद्विमुच्यते ।
विवेकश्च प्रसङ्ख्यानात् तच्च सच्छास्त्रलाभतः ॥ २३ ॥

विवेकख्यातिलाभे तु प्रकृतिः कृतकृत्यताम् ।
प्राप्ता निवर्तते पुंसः कृतनृत्तेव नर्तकी ॥ २४ ॥

स्वप्रकाशचिदेकात्मा निस्सङ्गः क्लेशवर्जितः ।
अविवेकविघातेन मुक्ता चैकावभासते ॥ २५ ॥

प्रणेता चास्य शास्त्रस्य भगवान् कपिलो मुनिः ।
आदौ हिरण्यगर्भेन योगं तं विस्तरोदितम् ॥ २६ ॥

अध्यायेनैव भगवाननन्वगृह्णात् पतञ्जलिः ।
चित्तवृत्तिनिरोधोऽत्र योगशब्देन कीर्तितः ॥ २७ ॥

चित्तस्य वृत्तयः पञ्च पमाणाद्यास्समासतः ।
प्रत्यक्षादिप्रमाणं स्यान्मिथ्याज्ञानं विपर्ययः ॥ २८ ॥

विकल्पो वस्तुना शून्यशब्दोत्थं ज्ञानमिष्यते ।
निद्रा वृत्त्यन्तराभावहेत्वन्तरमुपाश्रिता ॥ २९ ॥

असम्प्रमोषः स्मरणमनुभूतस्य वस्तुनः ।
एतन्निरोधस्त्वभ्यासात् प्रणिधानात्तथेश्वरे ॥ ३० ॥

क्लेशाद्यैरपरामृष्ट ईश्वरः परमः पुमान् ।
सार्वज्ञ्यकारणं तस्य स्वप्रकाशचिदात्मनः ॥ ३१ ॥

विशुद्धस्य नरेशस्य जगदर्थं प्रवर्तते ।
वैराग्याद्वेयदोषोत्थादभ्यासादेकतत्त्वगात् ॥ ३२ ॥

ईश्वरानुग्रहाच्च स्याच्चित्तं हि परिकर्मवत् ।
दोषपाकच्युते चित्ते समाधिर्योगसंज्ञितः ॥ ३३ ॥

सम्प्रज्ञातस्तदन्यात्मा द्वेधा स्थैर्यं व्रजेत् क्रमात् ।
तत्राद्यस्सवितर्काख्यो भूतसूक्ष्मावलम्बनः ॥ ३४ ॥

आनन्दानुगताख्यस्स्याद् बुद्धिस्तवैकसंश्रय ।
स तु गृह्णन् गृहीतारमस्मिन्नेतान् गतो भवेत् ॥ ३५ ॥

ततो गुणेषु वैराग्ये पुरुषः ख्यातितः परः ।
असम्प्रज्ञातसंज्ञस्स्यात् समधिस्त्वेकगोचरः ॥ ३६ ॥

ससंस्कारस्सबीजस्स्यान्निर्बीजस्तन्निरोधतः ।
विवेकख्यातिजननान्मोक्षमार्गस्स उच्यते ॥ ३७ ॥

समाधिमेनं निर्बीजं यमाद्यष्टाङ्गसम्पदा ।
साधयन् स्फिङ्ख्यसक्तश्च कैवल्याय प्रकल्पते ॥ ३८ ॥

इत्थं संयतचित्तस्य सम्यग्वस्तुषु तत्त्वधीः ।
जातिस्मृतिश्च सार्वज्ञ्यं भूमिर्मधुमती हि सा ॥ ३९ ॥

भूतेषु संयमात्तेषां जयस्तत्राणिमादयः ।
मधुप्रदीपा भूमिस्स्यादिन्द्रियेषु च तज्जयात् ॥ ४० ॥

तन्मात्रासु मनोबुद्धिसुखेषु क्रमतोऽत्वधेः ।
पैशाचपूर्वमैश्वर्यमाब्रह्म याति संयमी ॥ ४१ ॥

भूमिमेनां विशोकाख्यां प्राप्तो देवैश्च पूज्यते ।
चक्रशूलादियुक्तेषु परमेश्वरमूर्तिषु ॥ ४२ ॥

संयमात्तत्सलोकत्वसारूप्यैश्वर्यभाग्भवेत् ।
योगी तत्परवैराग्याद्योगं निर्बीजमाश्रयेत् ॥ ४३ ॥

विवेकख्यातिलाभेन कैवल्यं पदमश्नुते ।
एवं पातञ्जले शास्त्रे पदार्थक्रम ईरितः ॥ ४४ ॥

वेदान्तिनस्तु शास्त्रज्ञैश्चतुर्धा परिकीर्त्तिताः ।
मायावादपराः केचिद्भास्करीयास्तथा परे ॥ ४५ ॥

शब्दं ब्रह्म वदन्त्यन्ये क्रीडा ब्रह्म तथापरे ।
तत्रादौ वर्ण्यतेऽस्माभिर्मायावादजुषां मतम् ॥ ४६ ॥

निष्प्रपञ्चं परं ब्रह्म सदखण्डसुखात्मकम् ।
अद्वितीयं चिदानन्दं निस्सङ्गं ब्रह्म निर्गुणम् ॥ ४७ ॥

यज्ञदानादिभिः पूतो युक्तश्शमदमादिभिः ।
मननध्यानयुक्तेन श्रवणेनैक्यमश्नुते ॥ ४८ ॥

श्रवणं श्रुतितात्पर्यनिर्णयार्थं विचारणा ।
श्रौतार्थासंभवं क्षेप्तुं मननं चिन्तनं मुहुः ॥ ४९ ॥

विक्षेपक्षतये तस्मिन्नैकाग्र्यं ध्यानमिष्यते ।
ब्रह्मात्मैक्यापरोक्षं स्याद् वृत्त्या वाक्योत्थया तदा ॥ ५० ॥

तत्पदेन समस्तात्मा त्वंपदेनाहमाश्रितः ।
उच्यते न तयोरैक्यं युक्तं स्वर्णायसोरिव ॥ ५१ ॥

ततस्त्यक्त्वा विरुद्धांशौ लक्षिते शोधितात्मना ।
तत्तेदं ते विरोधिन्यौ सोऽयमित्यादिके यथा ॥ ५२ ॥

जीवस्य चेश्वरस्यापि भेदं संसिद्धमीदृशम् ।
छेत्तुमैक्यपरिच्छित्तिं करोत्यसिपदं स्फुटम् ॥ ५३ ॥

ब्रह्मायमात्मा तयोऽहमित्यादीन्यपराणि च ।
न्यायेनानेन वाक्यानि व्याख्येयानीति मीयताम् ॥ ५४ ॥

चैतन्यप्रतिविम्बत्वाज्जीवश्चेतन एव सः ।
जीवस्तु प्रतिविम्बोऽसौ स्वप्रकाशोऽप्यविद्यया ॥ ५५ ॥

न शक्तो भासनेऽर्थानामरणिस्थ इवानलः ।
अधिष्ठानमुरादोषसंस्काराख्यत्रिकारणः ॥ ५६ ॥

सत्यमिथ्यार्थसंभेदात्सोऽध्यासः परिकीर्तितः ।
यतस्सोऽयं ससंस्कारो भवेद्यत्रैव लीयते ॥ ५७ ॥

सास्त्यनादिरविद्यैषा तत्त्वव्यामोहदायिनी ।
मूढोऽहमित्यनुभवात् स्वप्रकाशचिदाकृतेः ॥ ५८ ॥

श्रुतैर्मोक्षोपदेशाच्च मूलाविद्याभ्युपेयते ।
मामन्यं च न जानेऽहमिति स्वान्यधियामपि ॥ ५९ ॥

अविद्या विद्यमाना हि भवरूपैव गम्यते ।
जीवोन्तःकरणे तत्र प्रतिविम्बत्वमागतः ॥ ६० ॥

अनीतधर्मबुद्धिस्थैः कामाद्यैरपि दूषितः ।
ममैव मुखमित्येवमादर्शस्थे प्रतीतितः ॥ ६१ ॥

प्रतिविम्बस्य भेदस्तु विम्बात्तत्त्वेन नेष्यते ।
विम्बत्वाद् ब्रह्मणा दैवमाविलत्वमविद्यया ॥ ६२ ॥

न हि स्याल्लोहमालिन्यं विम्बस्याभिभवक्षमम् ।
निरध्यासतता शुद्धो जीवस्साक्षीव शिष्यते ॥ ६३ ॥

भेदमात्रमिवाध्यस्तं ब्रह्मात्मैक्यावृतेः पुरा ।
तद्दर्शनार्थश्रवणात् तदैव च निवर्तते ॥ ६४ ॥

एतद्दर्शनमुद्दिश्य वेदान्तोक्त्येकगोचरः ।
मननादिसहायोऽत्र विचारोयं विधीयते ॥ ६५ ॥

वेदान्तविषयात्मैक्यप्रतिवन्धनिरासतः ।
विचारोऽयं सविषयस्सप्रयोजन मुच्यते ॥ ६६ ॥

ब्रह्मात्मैक्यपरत्वेन श्रुतीनां विषयोऽहि तत् ।
प्रयोजनं च तद्बोधः कृत्स्नाविद्यानिवर्तकः ॥ ६७ ॥

तस्माच्छमादियुक्तानां नित्यानित्यविवेकिनाम् ।
विरक्तानां मुमुक्षूणां विचारोऽयं विधीयते ॥ ६८ ॥

अविद्यावृत्तयस्स्वात्मसुखज्ञानादयो यथा ।
तथा माया महेशस्य सर्वनिर्वाहकारिणी ॥ ६९ ॥

एषाविद्या च माया च मोहामोहविभेदतः ।
नामरूपप्रपञ्चस्य वीजं सद् ब्रह्म चिन्मयम् ॥ ७० ॥

सदैव लोके सर्वत्र कारणत्वेन दृश्यते ।
तदवस्थाविशेषो हि कार्यमित्यभिधीयते ॥ ७१ ॥

कार्यमेतत् समस्तं च ब्रह्मण्यं दृश्यते जगत् ।
सति स्फुरति निस्सङ्गे सङ्गर्धानामरूपयोः ॥७२ ॥

अतस्मिंस्तन्मतित्वेन भ्रान्तिरित्यभिधीयते ।
एवं प्रपञ्चितोऽध्यासस्स विलासस्य कारणम् ॥ ७३ ॥

ब्रह्मात्मैक्यपरिज्ञानाद्वेदान्तोत्थान्निवर्तते ।
तन्निवृत्तौ स्वयं तिष्ठेत् परमानन्दचिद्घनः ॥ ७४ ॥

इयमेव ब्रह्मभावव्यक्तिर्मुक्तिरुदीर्यते ।
जडाजडात्मकस्सर्वो वस्तुराशिरदोषतः ॥ ७५ ॥

ब्रह्मणः परिणामोऽयं तद्रूपस्यानुवर्तनात् ।
एतेषु सच्चिदानन्दरूपत्वं परिदृश्यते ॥ ७६ ॥

एतद्विकारस्त्वज्ञानात् संसारः परिवर्तते ।
तद्ज्ञानान्मुक्तिरित्येव भास्करीयाः प्रचक्षते ॥ ७७ ॥

एकमेव हि ते ब्रूयुरशब्दब्रह्मत्ववादिनः ।
मुख्यशब्दः परामृश्यस्तद्बोध्यं ब्रह्म चिन्मयम् ॥ ७८ ॥

तादात्म्यमनयोर्योगस्तद्बोधात्तत्त्वविन्मतः ।
स्वप्रभुत्वादकर्मैव वचने कर्तृतां श्रयेत् ॥ ७९ ॥

स्थितमर्थात्मनस्तत्वादभेदेनैव वाचकम् ।
अर्थोऽपि प्रतिभाकार्यो बुद्धौ स्फुरति भिन्नवत् ॥ ८० ॥

आदर्शमुखवद्योगस्तयोस्तत्त्वावभासते ।
यश्च गामानयेत्यादौ वृद्धानां व्यवहारतः ॥ ८१ ॥

सङ्केतस्सोऽपि शब्दार्थावभिन्नौ दर्शयत्यलम् ।
शब्दार्थयर्थव्यवहृतिस्सामानाधिकरण्यतः ॥ ८२ ॥

सर्वत्र दृश्यते नित्यं तेनाध्यासस्तयोर्मिथः ।
वर्णोपाधिविभिन्नं तच्छब्दतत्त्वं तु वाचकम् ॥ ८३ ॥

वाच्यं तु सिद्धसाध्यात्मा निरंशं ब्रह्म तत्वतः ।
एवं ज्ञानं तु मोक्षस्य साक्षात् कारणमुच्यते ॥ ८४ ॥

स्वेनैव सृष्टे जगति प्रतिबिम्बात्मनात्मना ।
जीवेनाविश्य तत्रेशो व्याकर्ता नामरूपयोः ॥ ८५ ॥

भवामीतिच्छया ब्रह्म क्रीडतीत्यवबोधनम् ।
मोक्षस्य साधनमिति केचिदत्र प्रचक्षते ॥ ८६ ॥

एतेषां ब्रह्मवादानां प्रणेता व्यास एवहि ।
वैदिकानीति शास्त्राणि दर्शितानि क्रमेण षट् ॥ ८७ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणचिदम्बर-
शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे नवमकल्लोले
सांख्ययोगवेदान्तमतनिरूपणं नाम पञ्चमस्तरङ्गः

अथ षष्ठस्तरंगः

पूर्वं वैदिकशास्त्राणि संग्रहाद्दर्शितानि षट् ।
अवैदिकानि शास्त्राणि साम्प्रतं वर्णयामहे ॥ १ ॥

तानि लोकायतं बौद्धमार्हतं चेति वै त्रिधा ।
तत्रादौ संग्रहत्वेन लोकायतमतं ब्रुवे ॥ २ ॥

मानं प्रत्यक्षमेवैकं मेयं क्ष्मादिचतुष्टयम् ।
आत्मा देहो मृतिर्मुक्तिरिति लोकायते स्थितिः ॥ ३ ॥

धूमादिदर्शनाल्लोके यदग्न्याद्यनुमीयते ।
न तत्प्रमाणं कुत्रापि व्यभिचारस्य संभवात् ॥ ४ ॥

रागद्वेषभ्रमादिभ्यो वदन्ति जगति क्षिताः ।
तस्मान्न शब्दप्रामाण्यं विस्रम्भादुपलभ्यते ॥ ५ ॥

पृथिवी सलिलं तेजो वायुश्चेति चतुष्टयम् ।
प्रमेयं न न भीस्तस्य प्रत्यक्षेणानिरीक्षणात् ॥ ६ ॥

वस्तूनां गोघटादीनां जन्मध्वंसौ स्वभावतः ।
अग्निरुष्णो जलं शीतं समस्पर्शस्तथानिलः ॥ ७ ॥

केनेदं निर्मितं तस्मात् स्वभावत्तद्व्यवस्थितिः ।
सुखं देहान्तरे भोक्तुं दुःखं वा देहतः परम् ॥ ८ ॥

न स्यादुत्क्रममाणस्य मृतिकालेऽप्यदर्शनात् ।
देह एव हि चैतन्यं तद्धर्मैस्सह दृश्यते ॥ ९ ॥

अन्यत्र तद्दृष्टेश्च न ततोऽन्योऽस्ति चेतनः ।
स्वाभाविकी मनुष्याणां तिरश्चामिव या मृतिः ॥ १० ॥

स एव मोक्षो निर्यत्नात्सिद्धः पुनरनुद्भवात् ।
अतः परं तु बौद्धानां मतस्थितिरुदीर्यते ॥ ११ ॥

प्रत्यक्षानुमिती माने प्रमेयं स्कन्धपञ्चकम् ।
बन्धो विकल्पस्तन्मुक्तिर्मुक्तिरित्यभिधीयते ॥ १२ ॥

साक्षात्त्वमनुमेयत्वं ज्ञानाकारत्वशून्यता ।
पृथग्वदद्भिरर्थस्य स्थितं बौद्धं चतुर्विधम् ॥ १३ ॥

आद्यो वैभाषिको बुद्धशिष्यस्सौत्रान्तिकः परः ।
योगाचारस्तृतीयोऽन्न तुर्यो माध्यमिकस्तथा ॥ १४ ॥

अर्थो ज्ञानान्वितो वैभाषिकेण बहुमन्यते ।
सौत्रान्तिकेन प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः ॥ १५ ॥

आकारसहिता बुद्धिर्योगाचारस्य सम्मता ।
न सन्नासन्न सदसन्नपि नाप्युदयात्मकम् ॥ १६ ॥

चतुः कोटिविनिर्मुक्तं शून्यं माध्यमिको जगौ ।
एतेषां सुगतो देवो विश्वं च क्षणभंगुरम् ॥ १७ ॥

प्रत्यक्षमनुमानं च प्रमाणद्वितयं तथा ।
दुःखमायतनं चैव ततस्समुदयो मतः ॥ १८ ॥

मार्गश्चेत्यपि तत्त्वानि चत्वारि क्रमतो ब्रुवे ।
दुःखसंस्कारिणस्कन्धास्ते च पञ्च प्रकीर्तिताः ॥ १९ ॥

स्कन्धाः स्युस्सुगतेनोक्ता रूपविज्ञानवेदिनः ।
संज्ञास्संस्कार इत्येवं ते कथ्यन्तेऽत्र लेशतः ॥ २० ॥

शब्दस्पर्शादयो रूपं संविद्विज्ञानमिष्यते ।
वेदना सुखदुःखादिसंज्ञावस्त्वभिधायिनी ॥ २१ ॥

संसारो वासनानादिः पूर्ववेद्यानुभूतिमान् ।
पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्चमानसम् ॥ २२ ॥

धर्मायतनमेतानि द्वादशायतनानि तु ।
रागादीनां गुणो यस्मात् समुदेति नृणां हृदि ॥ २३ ॥

आत्मात्मीयस्वभावाख्यः स स्यात्समुदयः स्मृतः ।
क्षणिकास्सर्वसंस्कारा इति या वासना स्थिरा ॥ २४ ॥

स मार्ग इति विज्ञेयस्स च मोक्षोऽभिधीयते ।
तदेतत् क्षणिकं सर्वं सत्वादर्थक्रियाकृतेः ॥ २५ ॥

अर्थक्रियासमर्थत्वं सत्वं वस्तुषु निश्चितम् ।
ज्ञानसन्तानमात्मानं विचित्राकारदर्शनैः ॥ २६ ॥

वाधमानो विकल्पोऽयं वाधात्मा समुदीरितः ।
तस्माद् बुद्धोपदेशात्तैरहिंसाक्षजयादिभिः ॥ २७ ॥

आत्मानं विमलीकुर्वन्नभ्यसेत् तत्र भावनाः ।
दुःखं स्वलक्षणं शून्यं निरात्मेति च भावयेत् ॥ २८ ॥

निर्मलज्ञानसन्तानरूपस्सन् मुक्त उच्यते ।
जडाजडात्मनोर्योगमयुक्तं वाह्यतद्धियोः ॥ २९ ॥

दधतः केचिदाचख्युर्ज्ञानेद्धप्रतिविम्बनम् ।
रागाद्यज्ञानसन्तानवासनोच्छेदसंभवः ॥ ३० ॥

चतुर्णामपि वौद्धानां मुक्तिरेषा प्रकीर्तिता ।
अथ जैनमतं वक्ष्ये तस्यार्हस्तु प्रवर्तकः ॥ ३१ ॥

स्पष्टास्पष्टे विधौ माने प्रमेयं सप्ततत्त्वकम् ।
वन्धनं कर्म तन्मुक्तिर्मुक्तिरित्याद्युदाहृतिः ॥ ३२ ॥

स्पष्टं प्रत्यक्षमित्युक्तमस्पष्टमनुमेष्यते ।
आप्तो देशानसुप्तस्य वुद्धिस्सार्थानुमीयते ॥ ३३ ॥

जीवेऽजीवो वास्तवश्च निर्जरस्सुर्वरोभवः ।
मोक्षश्चेत्यत्र तत्त्वानि सप्तोक्तानि जिनागमे ॥ ३४ ॥

जीवोऽत्र चेतनस्थायी भिन्नोऽभिन्नश्च संविदा ।
बद्धमुक्तानादिसिद्धभेदात्स त्रिविधो मतः ॥ ३५ ॥

अजीवः पुद्गलाकाशः पुण्यापुण्यात्मना स्थितः ।
सर्वोऽप्यसावस्थिकायो यतोऽस्तीत्येव शब्दिते ॥ ३६ ॥

पुद्गलाः क्ष्मा पयस्तेजो वायुस्थावरजङ्गमाः ।
पूरणाद् गलनात् स्वाङ्गैरेते पुद्गलसंज्ञकाः ॥ ३७ ॥

आकाशस्त्ववकाशात्मा स लोको नेति स द्विधा ।
विहितार्थवशो धर्मो निषिद्धार्थवशः परः ॥ ३८ ॥

आत्मानं सङ्गमैर्यर्थैस्सततं स्रावयन्ति याः ।
आस्रवा इति ताःख्याताश्चक्षुरादिप्रवृत्तयः ॥ ३९ ॥

निषेधेभ्यो यथाक्षाणां प्रत्याहारोऽपि रागजः ।
स तत्प्रवृत्तिराख्याता सती संवरसंज्ञया ॥ ४० ॥

अनादिदोषकलुषं या शोधयति चेतनम् ।
तपश्चर्यात्मिका सोक्ता प्रवृत्तिर्निर्जराभिधा ॥ ४१ ॥

चतुष्टयद्वयं वन्धः कर्मणा घात्यघातिनाम् ।
मोक्षस्य परिपन्थ्यर्थमनुकूलं परं पुनः ॥ ४२ ॥

न सम्यज् ज्ञानतो मोक्षो न ह्यतो वस्तु जायते ।
इति धीर्येन तज्ज्ञानावरणीयमिहोच्यते ॥ ४३ ॥

नार्हताद्दर्शनान्मुक्तिरिति भ्रान्तिर्यथा भवेत् ।
दर्शनावरणीयं तत्कर्मघात्युक्तमर्हता ॥ ४४ ॥

नानातीर्थकरोक्तीनां विशेषानवधारणम् ।
येन तन्मोहनीयाख्यं कर्म सन्देहमज्जनात् ॥ ४५ ॥

सन्मोक्षमार्गनिष्ठानामन्तरायो यदा भवेत् ।
तदान्तरायकं कर्म मोक्षोपायविधायकम् ॥ ४६ ॥

शुक्लादेर्देहमूलस्य पुद्गलस्य प्रवर्तकम् ।
वन्धो विमुक्त्यघातीतं कर्मोक्तं वेदनीयकम् ॥ ४७ ॥

कुलनाद्यात्मतां तस्य कुर्वन्नामिक उच्यते ।
गोत्रिकं सुखदुःखादिभुक्तौ सूक्ष्मं पुरातनम् ॥ ४८ ॥

एतावदायुरस्येति यन्नियच्छति देहिनः ।
तदायुष्कमिति प्रोक्तमष्टधा कर्मवन्धकम् ॥ ४९ ॥

वर्धमानादिभिः प्रोक्तं धर्ममुत्तममाचरन् ।
सर्वस्मिन् कर्मणि क्षीणे तत्त्वविन्मुच्यते भवात् ॥ ५० ॥

स्वाभाविकस्य सावज्ञे व्यक्ते पुंसो निरावृतेः ।
सततोर्ध्वगतिर्मुक्तिरलोकाकाशताधरा ॥ ५१ ॥

देह एवात्मविज्ञानादन्यत्र तदवोधतः ।
देहप्रमाणतामस्य सङ्गिरन्ते जिनाश्रिताः ॥ ५२ ॥

अवैदिकानि शास्त्राणि त्रीण्येतानि समासतः ।
पञ्चरात्रे वासुदेवप्रणीते विषया इमे ॥ ५३ ॥

भगवान् चिदचिच्चेति त्रयोऽर्था वैष्णवे स्थिताः ।
मुक्तिश्चाविद्यकाच्छन्दात् प्रयात्युद्भूतविद्यया ॥ ५४ ॥

सत्यं ज्ञानमनन्तं च सुखं निर्दोषकल्मषम् ।
षाड्गुण्यसंभृतं ब्रह्म भगवान् विष्णुरुच्यते ॥ ५५ ॥

तस्य स्वात्मपरामर्शो जाड्यहारी सदोदितः ।
स्वभावाच्चित्रशक्तिर्हि शब्दब्रह्मेति गीयते ॥ ५६ ॥

सैव देवी महालक्ष्मीरिच्छाज्ञानक्रियागुणा ।
चिन्मयीकृततत्त्वौघा पूर्णाहन्ता हरेरसौ ॥ ५७ ॥

सैवोन्मिषति शब्दार्थसमन्वितपुरीश्वरी ।
करणीभूय देवस्य निर्वहत्यखिलाः क्रियाः ॥ ५८ ॥

ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि षड् गुणाः ।
प्रादुर्बभूवुः प्रथमं लक्ष्मीनारायणात्मनः ॥ ५९ ॥

स्वान्यप्रकाशकत्वे या शक्तिस्तद् ज्ञानमिष्यते ।
प्रकृतित्वं समस्तस्य जगतश्शक्तिरुच्यते ॥ ६० ॥

तदा सृष्ट्यादिकरणेऽप्यश्रमत्वं बलं मतम् ।
इच्छाविघातराहित्यमैश्वर्यं तस्य सर्वगम् ॥ ६१ ॥

प्रकृतित्वेऽपि जगतां वीर्यं स्यान्निर्विकारता ।
पराभिभवसामर्थ्यं तेजोदुर्ग्रहताथवा ॥ ६२ ॥

यत्रैते स्तिमिताष्षट् च वासुदेवः परो हि सः ।
समसुन्मिषितास्ते चेद्वासुदेवस्तु सोऽपरः ॥ ६३ ॥

तत्र ज्ञानबलोद्रेके स सङ्कर्षण उच्यते ।
वीर्यैश्वर्यसमुन्मेषे प्रद्युम्नाख्यां प्रपद्यते ॥ ६४ ॥

अनिरुद्धस्स तु भवेदाधिक्ये शक्तितेजसोः ।
शब्दं सिसृक्षुर्नादाख्यमुन्मेषं श्रीस्समश्नुते ॥ ६५ ॥

ततो बिन्दुस्ततश्शक्तिस्ततो वर्णास्समुद्गताः ।
वाचः पराद्या नादास्स्युर्वासुदेवादिवाचकाः ॥ ६६ ॥

व्यूहेश्वरेभ्यस्सञ्जाता मूर्तयः केशवादिकाः ।
अवताराश्च मत्स्याद्यास्तेभ्यो रक्षार्थमुद्गताः ॥ ६७ ॥

विभवाः पद्मनाभाद्या एतस्मात् सकृदुद्गताः ।
क्षीरार्णवादिस्थानेषु प्राकृतेष्वपि ते स्थिताः ॥ ६८ ॥

विष्वक्सेनखगेन्द्राद्याः परिवारा इमे हरेः ।
इत्थं हि भगवानर्थस्सप्रपञ्चो निरूपितः ॥ ६९ ॥

चित्क्षत्माथ द्वितीयोऽर्थो वर्ण्यते शास्त्रदर्शितः ।
अनाद्यविद्यया बद्धाश्रितो भगवदंशकाः ॥ ७० ॥

जीवा विलीनषाड्गुण्याः कर्माशयविपाकिनः ।
अविद्या पञ्चपर्वोक्ता तमोमोहादिविग्रहाः ॥ ७१ ॥

कर्माशयविपाकाश्च साङ्ख्यप्रवचने पुरा ।
मायया संकुचद्ज्ञाना अशक्तेरणवश्च ते ॥ ७२ ॥

अस्मान्निर्यान्ति सृष्ट्यादौ जीवा लीना लये पुरा ।
तस्य स्फुरत्ता सा लक्ष्मीश्शक्तिसंज्ञा तदोद्गता ॥ ७३ ॥

अचिदर्थस्ततो जातो नियत्यादिरनेकधा ।
ततः प्रसूतिर्ब्रह्मादिजननात् सैव कथ्यते ॥ ७४ ॥

लक्ष्मीः पुरुषशक्त्याख्या भारत्या नियतिस्थया ।
सार्धं कालस्थया काल्या विदधे मिथुनत्रयम् ॥ ७५ ॥

शक्तिर्लक्ष्मीश्चतुर्वक्त्रा भारत्याख्या पिनाकिना ।
उमा विष्णुर्महाकाल्या प्रसूता प्रापिता जनुः ॥ ७६ ॥

वाग्विधी श्रीहरी गौरीहरौ दाम्पत्यमापितौ ।
क्रमात् सृष्टौ स्थितौ ध्वंसे नियुक्तौ प्राकृताध्वनि ॥ ७७ ॥

गुणत्रयात्मिका माया पुंसो भोग्येन्द्रियप्रसूः ।
प्रकृतिस्तन्निदानत्वात् सौक्ष्म्याच्चासुक्तमुच्यते ॥ ७८ ॥

महदादिपृथिव्यन्ततत्त्वानामावलिस्तथा ।
इत्थमर्थास्त्रयः प्रोक्ताः परबोधार्णवोर्मयः ॥ ७९ ॥

पाञ्चरात्रोदितां दीक्षां सुकृती प्राप्य सद्गुरोः ।
ब्रह्मज्ञत्वात् पदं शुद्धं याति त्यक्ताध्वनोऽशुचीन् ॥ ८० ॥

विष्णुस्तत्त्वं पञ्चविंशं सतु स्वातन्त्र्यवान् मतः ।
परस्य वासुदेवस्य ज्ञानं सन्मुक्तिसाधनम् ॥ ८१ ॥

एकत्र ध्यानसक्तास्तु व्यूहेषु विभवेषु वा ।
अधिकारानुसारेण तत्सालोक्याद्यवाप्नुयुः ॥ ८२ ॥

प्राप्ता दिव्यं नभोरूपं तद्विष्णोः परमं पदम् ।
तत्त्वानाम्रतबोधत्वादिन्द्रियाद्यनपेक्षिणः ॥ ८३ ॥

षाड्गुण्यविग्रहास्स्वात्मसुखतृप्ता निराशयाः ।
अपुनर्भाविनो विष्णुं सदा पश्यन्ति सूरयः ॥ ८४ ॥

इतिहासपुराणानामयं तु विषयो मतः ।
वैदिकानां च धर्माणां साङ्ख्ययोगानुसारिणाम् ॥ ८५ ॥

शैवपाशुपतानां च पाञ्चरात्रप्रवर्तिनाम् ।
वंशमन्वन्तराणां च सृष्टिसंहारयोरपि ॥ ८६ ॥

अन्येषामपि धर्माणां प्रपञ्चस्तत्र दृश्यते ।
शास्त्रे पाशुपते त्वेवं प्रमेयानां व्यवस्थितिः ॥ ८७ ॥

बहवो व्यापिनो नित्या आत्मानो निर्मलास्तथा ।
आणवं त त्फलं तेषामात्मा नादीह विद्यते ॥ ८८ ॥

मायाकर्मजपाशाभ्यां खिद्यमानाश्चिरं नराः ।
सुखं दुःखं च संसारं सर्वदानुभवन्ति हि ॥ ८९ ॥

विरक्तौ तु प्रवृत्तायां शास्त्रोक्तेन क्रमेण तु ।
दीक्षितेष्वीश्वरज्ञानगुणः संक्रान्तिभाग्भवेत् ॥ ९० ॥

कुटुम्बभारं पुत्रेषु सन्न्यसन्निव चेतनः ।
सङ्क्रमय्यात्मसु ज्ञानमीश्वरः स्वाधिकारतः ॥ ९१ ॥

भजत्युपरतिं चान्ते ततश्च स्वयमीदृशः ।
महाव्रते त्वाणवादित्रिमलानां शरीरिणाम् ॥ ९२ ॥

ज्ञानशक्तिरिवैकैव न क्रियाशक्तिसंभवः ।
दीक्षायुक्ताविधानेन सर्वथैवास्थिधारिणः ॥ ९३ ॥

शास्त्रोक्तचर्यानिरता मुक्तिमश्नुवतेऽखिलाः ।
ते मुक्ताः केवलज्ञानशक्तिमन्तो भवन्ति हि ॥ ९४ ॥

ज्ञानक्रियाख्यशक्ती तु वर्तेते परमेश्वरे ।
एवं महाव्रते रीतिः कापालेत्वथ कथ्यते ॥ ९५ ॥

महाव्रतोक्तरीत्यैव ज्ञेयं वन्धात्मलक्षणम् ।
शास्त्रोक्तरीत्या दीक्षां तु कृत्वैकध्वजसंयुते ॥ ९६ ॥

देशे क्वचिच्च निवसन् भिक्षां नित्यमटन्नपि ।
तिष्ठन्महाव्रत इव मुक्तिरत्रापि कीर्तिता ॥ ९७ ॥

कापालपाशुपतयोर्महाव्रतमतस्य च ।
मायाविद्यातत्त्वसंस्थास्त्रयो रुद्राः प्रवर्तकाः ॥ ९८ ॥

मुख्यैश्चतुर्भिर्देवस्य सद्योजातादिनामभिः ।
चत्वारोऽनुगृहीता ये तत्तन्नामसमन्विताः ॥ ९९ ॥

अधः स्रोतांसि चत्वारि तैस्तन्त्राणि प्रजज्ञिरे ।
गारुडं दक्षिणं वामं भूतं चेति विभागतः ॥ १०० ॥

तत्र गारुडतन्त्रे तु ब्रह्म तत्पुरुषात्मकम् ।
पूजयित्वा विशेषेण ध्यातव्यमिति कीर्त्यते ॥ १०१ ॥

तन्त्रेणानेन सर्पादिविषाणां च चिकित्सने ।
मन्त्रौषधानि प्रोक्तानि विशेषेण परिस्फुटम् ॥ १०२ ॥

तन्त्रे तु दक्षिणेघोरं ब्रह्मेति परिभाव्य च ।
पूजयित्वा तदेवैकं साक्षात्कार्यमितीरितम् ॥ १०३ ॥

मन्त्राः प्रयोगास्तत्रोक्ताश्शत्रूणां विजयावहाः ।
भूततन्त्रे तु कथितं सद्योजातस्य वैभवम् ॥ १०४ ॥

भूतप्रेतपिशाचादिशान्त्यै मन्त्रौषधानि च ।
शाक्तं तु तन्त्रं केनापि शक्तितत्त्वनिवासिना ॥ १०५ ॥

आत्मना सम्प्रणीतं तु भास्करीयमतानुगम् ।
तत्त्वानि तन्त्रे शाक्तेये षट्त्रिंशत् पुरुषाः पृथक् ॥ १०६ ॥

देवीप्रसादतो भक्ता मुच्यन्त इति कीर्तितम् ।
जडाजडात्मकं तस्य परिणाम इति स्थितिः ॥ १०७ ॥

अधः स्रोतांसि चत्वारि तन्त्राण्येतान्यनुक्रमात् ।
साक्षादेव प्रणीतानि शम्भुना परमेष्ठिना ॥ १०८ ॥

कौलादिगीततन्त्राणि मत्स्येन्द्राद्यैश्च मानुषैः ।
सिद्धैरेवोपदिष्टानि तत्त्वविद्भिः पुरातनैः ॥ १०९ ॥

सिद्धान्तशास्त्रं द्विविधं शिवरुद्रविभेदतः ।
विन्दुशक्तेर्नादविन्दुप्रणवात्मकताजुषः ॥ ११० ॥

अनन्तरं परिणते शिवानन्देशसङ्ख्यया ।
ततो माया द्विविज्ञानकेवलाख्याभृतां तथा ॥ १११ ॥

ईश्वरानुग्रहात्तासां कामिकादिसमाख्यया ।
सद्योजाताद्वामदेवमुखाच्च दश जज्ञिरे ॥ ११२ ॥

ईशोपदिष्टज्ञानानामष्टाधिकदशात्मनाम् ।
रुद्राणां पुरुषाघोरेशानाख्यैर्वदनैस्तदा ॥ ११३ ॥

जयादिसंज्ञयोक्तानि रुद्रभेदाह्वयानि तु ।
अष्टादश मिलित्वा तान्यष्टाविंशतिकोटयः ॥ ११४ ॥

एकैकं तत्र शास्त्रं तु कोटिग्रन्थसमन्वितम् ।
एतेषामपि शास्त्राणां नाम सिद्धान्त इत्यपि ॥ ११५ ॥

जयं ज्ञानक्रियायोगचर्याभिः स्याच्चतुष्पदः ।
ज्ञानपादे महेशस्य स्वरूपं प्रतिपाद्यते ॥ ११६ ॥

विज्ञानाकलनाम्नश्च प्रलयाकलकस्य च ।
सकलाकलनाम्नश्च स्वरूपाण्यात्मनामपि ॥ ११७ ॥

पाशानामपि पञ्चानां स्वरूपमपि विस्तरात् ।
सृष्टेः प्रकारश्शक्तेश्च स्वरूपमपि विस्फुटम् ॥ ११८ ॥

परमेश्वरमारभ्य भुवनानां पृथक् पृथक् ।
इयन्ति योजनानीति परिमाणक्रमस्तथा ॥ ११९ ॥

भुवनानां तदीशानां रूपमप्यविशेषतः ।
तत्तत्प्रलयतः पश्चात् सृष्टेश्चापि प्रवर्तनम् ॥ १२० ॥

महाव्रतादिशास्त्राणां प्रमेयनियमस्तथा ।
एवमाद्यानि बहुधा प्रतिपाद्यानि तत्र हि ॥ १२१ ॥

क्रियापदे तु मन्त्राणामुद्धारस्तु प्रकीर्त्यते ।
सन्ध्यावन्दनपूजादिजमहोमाश्च सर्वशः ॥ १२२ ॥

समयानां विशेषश्च निर्वाणानां च संस्क्रिया ।
आचार्यस्याभिषेकश्च दीक्षा चैव सुखप्रदा ॥ १२३ ॥

योगपादे तु षट्त्रिंशत् तत्त्वानि च तदीश्वरा: ।
इच्छतामैहिकीं सिद्धिमणिमादेश्च संभव: ॥ १२४ ॥

मूलाधारादिचक्राणामवस्थानां च कथ्यते ।
चर्यापादे तु सर्वत्र पवित्रारोपणं तथा ॥ १२५ ॥

प्रतिष्ठा चैव देवानां व्यक्तानां लक्षणानि च ।
प्रायश्चित्तक्रियाश्चापि स्कन्दसन्ध्यादिलक्ष्म च ॥ १२६ ॥

लक्षणं जपमालानामन्त्येष्ट्यादिक्रमा अपि ।
एवं चतुर्षु पादेषु प्रतिपाद्यार्थ ईरित: ॥ १२७ ॥

प्रायो मतान्तराण्येवं वर्णितानि क्रमान्मया ।
तत्त्वेषु तूपविश्रान्तिस्तत्तन्मतनिषेविणाम् ॥ १२८ ॥

अधुना कथ्यते सम्तक् सर्वेषामपि तं शृणु ।
उद्भित्स्वेदोद्भवाण्डोत्थजरायुजदिवौकस: ॥ १२९ ॥

तन्मात्रोद्भूतभूवारिवह्निवातवियन्मया: ।
गन्धो रसश्च रूपं च शब्द: स्पर्श इति स्फुटम् ॥ १३० ॥

भूताद्यहंकृतेर्जातं तन्मात्रं जन्तुजीवनम् ।
कर्मेन्द्रियं तु वाक्पाणिपादोपस्थगुदाभिधम् ॥ १३१ ॥

वैकारिकाहंकृतेश्च जातमेषां गुणा अपि ।
वचनादानगमनानन्दत्यागास्तदात्मसु ॥ १३२ ॥

चिल्लिका कपिकस्तूरीमृगश्वगवया हता: ।
श्रोत्रत्वङ्नेत्ररसनघ्राणज्ञानेन्द्रियाह्वयम् ॥ १३३ ॥

तैजसाहंकृतेर्जातमेषां ग्राह्यगुणा अपि ।
स्थूलस्पर्शरसशब्दरूपगन्धास्तदात्मसु ॥ १३४ ॥

एणमातङ्गशलभमत्स्यभृङ्गा वशीकृता: ।
प्रत्यक्षमानाश्चार्वाका मनसा चारुभोगिन: ॥ १३५ ॥

गर्वपर्वतकाश्चैव: पञ्चानुव्रतमानिन: ।
बौद्धा विचित्रबुद्धिस्था ग्रन्थैष्षोडशलक्षणै: ॥ १३६ ॥

अव्यक्ततत्त्वसम्भूतगुणतत्त्वं त्रिधा स्थितम् ।
सत्वं रजस्तमस्सौख्यदु:खमोहाश्च तद्गुणा: ॥ १३७ ॥

गौण: पुराणनिकर: स ब्रह्माच्युतरुद्रभू: ।
गुणिनो विधिवैकुण्ठरुद्रभक्ता: पुराणिका: ॥ १३८ ॥

साङ्ख्या: स्यु: पुम्प्रकृत्याढ्या: कापिलाश्छान्दसा मता: ।
वैशेषिका: स्यु: काणादा नैरुक्ता रागरञ्जिता: ॥ १३९ ॥

विद्याढ्याश्शाब्दिकास्साक्षपादा नैयायिका मता: ।
शैक्षा: कालोन्नता नेशसांख्या: पातञ्जलान्विता: ॥ १४० ॥

मीमांसका जैमिनीया निमित्ताकल्पकारिण: ।
कापालिका ज्यौतिषिका: कालस्था: कालवासिन: ॥ १४१ ॥

वैदिका व्याससंसिद्धा मायाढ्या ब्रह्मवादिन: ।
षण्मताङ्गाष्षडङ्गाढ्यास्ते मायावादिनो मता: ॥ १४२ ॥

इत्याद्यज्ञानमूढानां मतमाश्रित्य दुर्धिय: ।
अपवर्गमभीच्छन्ति खद्योतात् पावकार्थिन: ॥ १४३ ॥

यत्कैवल्यं पुंप्रकृत्योर्विवेकाद्वा सर्वं ब्रह्म मत्वा विराम: ।
या वा काश्चिन्मुक्तय: पाशजन्यास्तास्तास्सर्वा भेदमायान्ति सृष्टौ ॥

विधेश्वरसदेशाख्यशक्तितत्त्वचतुष्टयम् ।
क्रमाद् बिन्दुजचित्कर्मचित् क्रियाषट्सरोजगम् ॥ १४५ ॥

वीरसिद्धान्तवेदान्तशैवषट्स्थलमार्गकम् ।
इच्छाज्ञानक्रियायोगचतुष्पादरहस्यगम् ॥ १४६ ॥

यथा वृषं चतुष्पादा अन्योन्यापेक्षया स्थिता: ।
यथा त्रयीतन्त्रवृक्षे चतु:पादास्समार्थगा: ॥ १४७ ॥

यथा मुक्तिस्त्वेकरूपा तच्चतुष्पादसंभवा ।
ज्ञानात् सायुज्यमुक्ति: स्याद्विद्यातत्त्वविवेकिनाम् ॥ १४८ ॥

तथा श्रीशिवसङ्कल्पोपनिषत् प्राह सादरम् ॥ १४९ ॥

अचिन्त्यं चाप्रमेयं च व्यक्ताव्यक्तपरं च यत् ।
सूक्ष्मात् सूक्ष्मतरं ज्ञेयं तन्मे मनश्शिवसङ्कल्पमस्तु ॥ १५० ॥

तथा श्रीमत्सुप्रभेदमहातन्त्रे प्रकाशते ।
संयोजितं पञ्चरूपं सायुज्यमिति कथ्यते ॥ १५१ ॥

ज्ञानात् सायुज्यमेवं हि तोये तोयं यथा तथा ।
तथा दीक्षाक्रमान्मुक्तिरीशतत्त्वविवेकिनाम् ॥ १५२ ॥

तथा मैत्रेय्योपनिषद्येव मुक्ति: प्रकाश्यते ।
अपामपोऽग्निरग्नौ वा व्योम्नि व्योमैव लक्षयेत् ॥ १५३ ॥

एवमन्तर्गतं चित्तं पुरुष: परिमुच्यते ।
तथा श्रीमद्रौरवाख्यमहातन्त्रे प्रकीर्त्यते ॥ १५४ ॥

जले जलं यथा क्षिप्तं क्षीरे क्षीरमिवार्पितम् ।
तथैव ह्येकतां याति दीक्षामन्त्रेण मन्त्रवित् ॥ १५५ ॥

मुक्तिस्सदेशवसतां समचित्कर्मचर्यया ।
तथा दत्तात्रेयसीतोपनिषत् प्राह सादरम् ॥ १५६ ॥

यथाग्निरग्नौ संक्षिप्तस्समानत्वमनुव्रजेत् ।
तथा समाधावैक्यं तु जीवात्मपरमात्मनोः ॥ १५७ ॥
तथाश्रीमत्सुप्रभेदमहातन्त्रे प्रकाश्यते ।
घृतात् पृथग्व्यवहितं घृते लीनं घृतं तथा ॥ १५८ ॥
तत्त्वे लीनस्तथा योगी पृथग्भावं न विन्दति ।
विद्यातत्त्वादिशक्त्यन्तकारणं विन्दुतत्त्वकम् ॥ १५९ ॥
चतुर्वेदवदोङ्कारो वृषभेषु स्वरूपकम् ।
चतुर्वाक्यषडध्वाढ्यं शिवाधिष्ठानरूपकम् ॥ १६० ॥
नादविन्दुकलारूपं योगमार्गैकगोचरम् ।
तत्र स्थितानां मुक्तिस्तु समानैक्यस्वरूपिणी ॥ १६१ ॥
तथा श्रीकण्ठवल्ल्युपनिषदाह महत्तरा ।
ऊर्ध्वमूलो ह्यधश्शाख एषोऽश्वत्थस्सनातनः ॥ १६२ ॥
तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते ।
तस्मिन् लोकाः श्रितास्सर्वे तदु नात्येति कश्चन ॥ १६३ ॥
तथा प्रकाश्यते तन्त्रे सर्वज्ञानोत्तराह्वये ।
सर्वशून्यं निराभासं सामरस्यं तथा भवेत् ॥ १६४ ॥
शैवस्सिद्धो मूर्ध्नि भातीतरेषां मुक्तः स्रष्टौ पुंवराख्योऽति नाथः ।
विश्वानर्थान् स्वेन विश्रम्भ्य धाम्ना सर्वेशानामीशितुस्सर्वदास्ते ॥
मुक्तिर्निर्वाणदीक्षायां क्रियायां स्यान्न चान्यथा ।
तस्माद्दीक्षां प्रकुर्वीत शैवीं पाशविमुक्तये ॥ १६६ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारण
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदीवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातत्त्वसारभूते
श्रीशिवतत्त्वरत्नाकरे नवमकल्लोले
चार्वाकादितन्त्रतत्तन्मतप्राप्यस्थानवर्णनं नाम षष्ठस्तरङ्गः

अथ सप्तमस्तरंगः

या दीक्षा सर्वलोकस्य भवबन्धनिवारिणी ।
उदीरिताऽभवत्तस्याः कथं हि ग्रहणक्रमः ? ॥ १ ॥
को वा तद्ग्रहणे कालः ? किं वा तस्यामपेक्षितम् ?
केन वा सा प्रदातव्या ? ग्राह्या सा कीदृशेन वा ? ॥ २ ॥
एतत्सर्वं समाख्याहि गुरो ! ख्यातगुणाम्बुधे !
'पुत्र ! या भवता दीक्षा सुधीः ! श्रोतुमभीप्सिता । ॥ ३ ॥
तां सदभ्यर्हितां तुभ्यं ब्रवीमि च सुविस्तरम् ।
सर्वमाकर्णयानन्यसामान्यं धिषणानिधे ! ॥ ४ ॥
दीयते लिङ्गसम्बन्धः क्षीयते च मलत्रयम् ।
दीयते क्षीयते येन सा दीक्षेति निगद्यते ॥ ५ ॥
सेयं दीक्षा द्विधा भिन्ना साधाराधारवर्जिता ।
आचार्यमन्तरेणैव क्रियते शङ्करेण या ॥ ६ ॥
विज्ञानाकलनाम्नश्च प्रलयाकलकस्य च ।
तीव्रशक्तिनिपातेन दीक्षा साधारवर्जिता ॥ ७ ॥
गुरुमूर्तिं समाश्रित्य मन्दशक्तिनिपातनात् ।
कुरुते सकलस्येशः साधारां तामिमां विदुः ॥ ८ ॥
सा दीक्षा त्रिविधा प्रोक्ता सवीजावीजचिन्मया ।
यथाक्रमं कर्मशक्तिज्ञानकाण्डेषु ताः स्फुटाः ॥ ९ ॥
अथ निर्वीजदीक्षाया द्वेधा भेदो निगद्यते ।
सद्यो निर्वाणदा विद्या चिरनिर्वाणदा परा ॥ १० ॥
प्रारब्धसञ्चितागामि कर्मजालं विशोध्यते ।
अतितीव्रेण पातेन शरीरादि जुगुप्स्यताम् ॥ ११ ॥
भयात्यन्तविरक्तानां सद्यो निर्वाणदा तु सा ।
प्रारब्धकर्मणां भोगे यया मुक्तिमनन्तरम् ॥ १२ ॥
यान्ति वालादयस्सेयं चिरं निर्वाणदा भवेत् ।
शिवस्यानुग्रहाद् दीक्षा लभ्यते कृतिनां भुवि ॥ १३ ॥
सा चानेकविधा प्रोक्ता तत्प्रपञ्चोऽयमुच्यते ।
समासाच्च द्विधैवेयं दीक्षा तदङ्गैरिहेष्यते ॥ १४ ॥
एका भवेद् ज्ञानवती क्रिया कृत्यपराङ्मुखा ।
विनेज्यादिककर्माणि मनोव्यापारमात्रतः ॥ १५ ॥
दीक्षा ज्ञानवती प्रोक्ता सम्यत्कत्त्वावबोधजा ।
इज्यानवलती यातु क्रिया कौशलसंभवा ॥ १६ ॥

क्रियावत्यथ सा द्वेधा निर्वीजा च सबीजका ।
तत्र निर्वीजका या सा जननीपुत्रयोर्वरम् ॥ १७ ॥

सबीजा च भवेद्दीक्षा बालकाचार्ययोरपि ।
अथ निर्वीजका दीक्षा प्रोक्ता सा द्विप्रकारका ॥ १८ ॥

एका निर्वाणदा साद्या द्वितीया देहपातिनी ।
बालबालिशवृद्धस्त्रीभोगभुक्त्यभिलाषिणाम ॥ १९ ॥

भवेन्निर्वीजका दीक्षा समयाचारशुद्धिदा ।
विदुषां च समर्थानां सबीजा परिकीर्तिता ॥ २० ॥

सबीजा च द्विधा भिन्ना प्रथमा शिवधर्मिणी ।
आचार्यगोचरे प्रोक्ता साधिका लोकधर्मिणी ॥ २१ ॥

धर्माधर्मात्मकं कर्म प्रागागामि विचित्रकम् ।
संस्कृत्य शोधते यत्र सैवैका शिवधर्मिणी ॥ २२ ॥

यत्र रुद्रपदे योगो योगो यद्वेश्वरे पदे ।
अधर्म सञ्चितं सर्वं कर्मागामि विशोध्यते ॥ २३ ॥

धर्मावरोधतो यत्र सा दीक्षा लोकधर्मिणी ।
भौतिकी नैष्ठिकी चेति द्विधा सा शिवधर्मिणी ॥ २४ ॥

व्रतमोक्षसमायुक्ता भौतिकीति निगद्यते ।
भौतिकः काम्य इत्युक्तस्सत्सन्तानक एव हि ॥ २५ ॥

शरीरपातपर्यन्तव्रता सा नैष्ठिकी मता ।
चाक्षुषी स्पर्शदीक्षा च वाचकी मानसी तथा ॥ २६ ॥

शास्त्री च योगदीक्षा च होत्रीत्यादिरनेकधा ।
चक्षुरुन्मीलयन् तत्त्वं ध्यात्वा शिष्यं समीक्षयेत् ॥ २७ ॥

पाशबन्धविमोक्षाय दीक्षेयं चाक्षुषी भवेत् ।
निधाय दक्षिणे हस्ते शिवं सर्वाङ्गसंयुते ॥ २८ ॥

संस्पृशेच्छिष्यमूर्धादि स्पर्शदीक्षा भवेदियम् ।
तत्त्वे चित्तं समाधाय बृह्मितान्तरचेतसा ॥ २९ ॥

उच्चरेत् संहितामन्त्रान् वाग्दीक्षेयं समीरिता ।
मनस्सन्निधिमात्रेण मानसीत्यभिधीयते ॥ ३० ॥

शास्त्रस्य सम्प्रदानेन शास्त्रदीक्षा प्रकीर्तिता ।
योगेन योगदीक्षा स्याच्छिवत्वे सा व्यवस्थिता ॥ ३१ ॥

राज्ञः कुण्डवती होत्री सा द्विभेदा किलोदिता ।
शक्तिपातविभेदेन पाशभेदेन सा भवेत् ॥ ३२ ॥

शक्तिपातविभेदानां वक्ष्यते लक्षणं पृथक् ।
अधर्मधर्मयोस्साम्ये जाते शक्तिः पतत्यसौ ॥ ३३ ॥

अहोपमादिभेदेन सा पुनस्सप्तधा भवेत् ।
गुर्वाज्ञापालने दीक्षा सा चाज्ञेति प्रकीर्तिता ॥ ३४ ॥

पूर्वेषां समयाचारसदृशी चोपमा स्मृता ।
आरोप्य स्वस्तिकं शिष्यं गुरोर्दीक्षणकर्मणा ॥ ३५ ॥

स्वस्तिकाकलशस्नानादभिषेकाक्षया च सा ।
भूतिपद्ममयी दीक्षा भस्मना या प्रकीर्तिता ॥ ३६ ॥

शिष्यस्य फाले गुरुणा समयाचारमागतः ।
अचार्यो लिङ्गमादाय स्वयमर्च्य यथाविधि ॥ ३७ ॥

शिष्यस्यालोकनं सम्यगायता परिकीर्तिता ।
प्रह्वीभूय ततश्शिष्यो लिङ्गं स्वीकृत्य भक्तितः ॥ ३८ ॥

गुरोस्स्वागतमित्युक्तं स्वोत्तमाङ्गादिधारणम् ।
सा दीक्षा त्रिविधा ज्ञेया वेदमन्त्रक्रियात्मिका ॥ ३९ ॥

शिवासनमिति ध्यात्वा शिष्यमूर्ध्नि यथार्णवम् ।
यच्छिवत्वसमावेशो वेदुदीक्षेति सा मता ॥ ४० ॥

मन्त्रदीक्षेति सा प्रोक्ता मन्त्रमालोपदेशिनी ।
लिङ्गोपदेशिनी प्रोक्ता क्रिया दीक्षाक्रियोत्तरा ॥ ४१ ॥

रसविद्धं यथा ताम्रं ताम्रभावाद् विमुच्यते ।
सुवर्णेन सहैकत्वं यद्वयाति च हेमताम् ॥ ४२ ॥

नवनीतं यथा तप्तं पूर्वभावं परित्यजेत् ।
घृतस्वभावमापन्नं न याति नवनीतताम् ॥ ४३ ॥

यथा शुक्तिगतं तोयं मौक्तिकं जायते ध्रुवम् ।
न पुनस्तोयतां याति मौक्तिकत्वं न मुञ्चति ॥ ४४ ॥

एवं स शिवतां प्राप्तो न पुनर्जीवतां व्रजेत् ।
शिवत्वान्न च हीयेत विमुक्तो दीक्षया भवेत् ॥ ४५ ॥

सा दीक्षा गुरुणा कार्या स गुरुः कथ्यतेऽधुना
आश्रमाणां समस्तानां गृही स्यादुत्तमो गुरुः ॥ ४६ ॥

यथाहं सर्वलोकानां गुरुरम्बिकया सह ।
ब्रह्मचारी द्विधा प्रोक्तो नैष्ठिको भौतिकस्त्विति ॥ ४७ ॥

नैष्ठिको मध्यमो ज्ञेयो भौतिकस्तु ततोऽधमः ।
आकौमाराद् ब्रह्मचारी यावज्जीवं स नैष्ठिकः ॥ ४८ ॥

व्यवस्थीकृत्य कालान्तं ब्रह्मचारी पुनर्गृही ।
स भौतिक इति ज्ञेयस्तौ गुरू मध्यमाधमौ ॥ ४९ ॥

वानप्रस्थयतीनां तु गुरुत्वं नेष्यते क्वचित् ।
स्वयमेव यतीनां तु यतिर्गुरुरथापि वा ॥ ५० ॥

वानप्रस्थो द्विधा प्रोक्तस्साग्निकोऽनग्निकस्तथा ।
सदारस्साग्निको ज्ञेयस्त्वदारोऽनग्निकः स्मृतः ॥ ५१ ॥

साग्निकस्य गुरुत्वं स्यान्नेष्यतेऽनग्निकस्य तत् ।
मठस्थलसमुत्पन्नश्शास्त्रश्चैवागमार्थवित् ॥ ५२ ॥

अनूचानः प्रसन्नात्मा शिवदीक्षाभिषेचितः ।
शिवागमज्ञो मतिमाञ्छिवपूजापरायणः ॥ ५३ ॥

रुद्राक्षमालां बिभ्राणस्त्रिपुण्ड्राङ्कितमस्तकः ।
विशुद्धदेहः कुलजश्शीलाचारसमन्वितः ॥ ५४ ॥

तस्माद् धूलनिष्णातो भस्मतत्त्वविवेकवान् ।
वर्णाश्रमक्रियानिष्ठो वेदविच्छास्त्रकोविदः ॥ ५५ ॥

मिताशी मितनिद्रश्च मितवाग्योगतत्परः ।
जितेन्द्रियो जितद्वन्द्वस्तपोदानदयापरः ॥ ५६ ॥

स्थिरबुद्धिस्स्थिरारम्भस्थानपूजादिकर्मवित् ।
सत्यवागूर्जितः प्राज्ञो मेधावी नियतश्शुचिः ॥ ५७ ॥

लिङ्गाङ्गस्थलभेदज्ञष्षट्स्थलज्ञानतत्परः ।
वयष्षोडशकादूर्ध्वं सप्ततेरध इष्यते ॥ ५८ ॥

न्यासमुद्राविधानज्ञोऽप्यंकुरार्पणतत्त्ववित् ।
शिवसिद्धान्ततत्त्वज्ञष्षडध्वज्ञानतत्परः ॥ ५९ ॥

नित्याधिकारकुशलो नैमित्तिकविचक्षणः ।
काम्याधिकारचतुरो दीक्षाकर्मविशारदः ॥ ६० ॥

मण्डले मण्टपे कुण्डे प्रासादे प्रतिमासु च ।
लिङ्गपीठे शिलायां च परीक्षानिपुणोऽग्रणीः ॥ ६१ ॥

निग्रहानुग्रहे दक्षस्सर्वदोषविवर्जितः ।
मठस्थलविलीनस्य गुरुपट्टं न चेश्वरि ! ॥ ६२ ॥

न भवेत् पतिपत्न्योश्च गुरुरन्यो वरानने ! ।
गुरुद्वयं च लिङ्गं च द्वयमेव भवेत्तदा ॥ ६३ ॥

तथा दीक्षा द्विधा चैव प्रसादश्च द्विधा भवेत् ।
यथा द्वयमिदं देवि ! विशेषं पातकं भवेत् ॥ ६४ ॥

पतिपत्नीभ्रातृपुत्रदासीदासानुवर्तिनाम् ।
एकदीक्षा भवेद् देवि ! विशेषाद् भक्तिवर्धिनी ॥ ६५ ॥

गुरुलक्षणमित्युक्तं शिष्यलक्षणमुच्यते ।
द्विजातिर्वा तथा शूद्रः स्वस्वोक्ताचारवान् शुचिः ॥ ६६ ॥

सत्यवाग्गुरुभक्तश्च दम्भाहङ्कारवर्जितः ।
रागद्वेषविनिर्मुक्तश्शान्तस्सर्वजनप्रियः ॥ ६७ ॥

अहिंसको दयायुक्तो नित्यमुद्युक्तमानसः ।
गुरुशुश्रूषणरतो मनोवाक्कायकर्मभिः ॥ ६८ ॥

बहिरन्तश्चरैः प्राणैर्गुरुभक्तियुतो नरः ।
गुरुणापि स्वयं शिष्यो वर्षमेकं परीक्षितः ॥ ६९ ॥

गुर्वाज्ञाचकितस्सौम्यश्शिष्य इत्यभिधीयते ।
परीक्ष्य परितश्शिष्यं नीचं चोत्तमकार्यतः ॥ ७० ॥

उत्तमं नीचकार्येण ततो दीक्षां समाचरेत् ।
एवं संग्रहतः प्रोक्तं लक्षणं गुरुशिष्ययोः ॥ ७१ ॥

धारणार्हस्य लिङ्गस्य लक्षणं त्वथ कथ्यते ।
स्फाटिकं शैलजं वापि चन्द्रकान्तमयं तु वा ॥ ७२ ॥

पाषाणं सूर्यकान्तं वा लिङ्गमेकं समाहरेत् ।
नादेयं शैलसंभूतं पुण्यक्षेत्रसमुद्भवम् ॥ ७३ ॥

गङ्गोद्भवं सागरजं लिङ्गं सन्मम सम्मतम् ।
यद्देवि ! शिवनाभाख्यं लिङ्गं तदहमेव हि ॥ ७४ ॥

काम्यान्यन्यानि लिङ्गानि तत्तदिष्टार्थदानि हि ।
श्रीशैलजं महादेवि ! ऐहिकामुष्मिकप्रदम् ॥ ७५ ॥

सर्वोत्तमोत्तमं लिङ्गं सर्वाभीष्टार्थदायकम् ।
यद्दत्तं गुरुणा देवि ! लिङ्गं तदहमेव हि ॥ ७६ ॥

श्वेतं रक्तं तथा पीतं कृष्णं चेति चतुर्विधम् ।
विप्रादीनां तु वर्णानां लिङ्गं धार्यं यथाक्रमम् ॥ ७७ ॥

लिङ्गवृत्तसमं पीठं दैर्घ्ये विस्तार एव च ।
तदर्धं गोमुखं चैव प्रोक्तं लिङ्गस्य लक्षणम् ॥ ७८ ॥

सपीठस्य च लिङ्गस्य लक्षणं तु तदुच्यते ।
एकादित्र्यन्तमंगुल्यं शरलिङ्गं सदैर्घ्यकम् ॥ ७९ ॥

लिङ्गस्य सदृशं पीठं पीठार्धं गोमुखं भवेत् ।
लिङ्गदीर्घं चतुर्भागं द्विभागं शक्तिसंयुतम् ॥ ८० ॥

द्विभागं च चतुर्भागमेकं भागं च बन्धनम् ।
अङ्गुलं तु त्रिधा भज्य तस्मान्मन्दासमाचरेत् ॥ ८१ ॥

लिङ्गमस्तकविस्तारं लिङ्गोच्छ्रायसमन्वितम् ।
वेदभागवशान्मानविस्तारं मस्तकस्य तु ॥ ८२ ॥

अभागं परिणाहस्य तद्वत्पीठे च विस्तृतिः ।
एकं नाहं त्रिधा भज्य भागेनैकेन हीनकम् ॥ ८३ ॥

एकहीनं प्रकर्तव्यं द्विहीनं वा समाचरेत् ।
लिङ्गाधिक्ये भवेन्मृत्युश्शक्त्याधिक्ये धनक्षयः ॥ ८४ ॥

लिङ्गरुक्मयोस्समत्वं हि भोगमोक्षफलप्रदम् ।
लाक्षासर्जरसैस्सिक्तं कुरुविन्दं च गुग्गुलम् ॥ ८५ ॥

गैरिकं कुडतैलेन चाष्टबन्धमिति स्मृतम् ।
अनेन च दृढीकुर्याल्लिङ्गं पीठे सुसंस्थितम् ॥ ८६ ॥

आदिष्टो गुरुणा शिष्यः प्रभाते पुण्यवासरे ।
विधाय मङ्गलस्नानं धौतवस्त्रपरिच्छदः ॥ ८७ ॥

ललाटादिक्रमेणैव कुर्यात् त्रैपुण्ड्रकं मुदा ।
शिवक्षेत्रशिवारामसमीपे वा शुभे गृहे ॥ ८८ ॥

शिवालयसमीपे वा देशिकस्य गृहेऽपि वा ।
उपेत्याचार्यपादाब्जे प्रणम्य तदनन्तरम् ॥ ८९ ॥

पूजयेत् स्वर्णपुष्पाद्यैर्भक्त्या शक्त्यनुसारतः ।
सर्वानलंकृतान् शुद्धवाससो ऋत्विजस्तथा ॥ ९० ॥

पुष्पाक्षतविभूत्याद्यैश्चतुरस्तान् प्रपूजयेत् ।
एको भवेदिहाचार्यश्शिवभक्तिपरायणः ॥ ९१ ॥

चत्वारो ऋत्विजस्तत्र शिवाचार्यस्य सम्मताः ।
रेवको रेवणो रुद्रो मुनिर्नीलो महेश्वरः ॥ ९२ ॥

घण्टासिद्धश्च सारङ्गो वृद्धोऽगस्त्यगुरुर्मतः ।
त्रिशिखोऽष्टजटः पञ्चवर्णकस्सिद्धशासनः ॥ ९३ ॥

इत्यादयो महाभागा महापूरुषसन्निभाः ।
पूर्वदिक्कुलजाधीशास्शुद्धयज्ञोपवीतिनः ॥ ९४ ॥

मृत्कन्थाबिल्वदण्डाश्च षट्त्रिंशज्जटिलाः पराः ।
गुरुधर्मभिक्षां देहि मुद्राशब्दविराजिताः ॥ ९५ ॥

द्वादशानां सहस्राणां जङ्गमानामधीश्वराः ।
शैवपञ्चाक्षरीसक्ता गृहस्थाश्रमपालकाः ॥ ९६ ॥

घनलिङ्गा महान्तोऽपि निग्रहानुग्रहाशयाः ।
कृतप्रभृति तिष्यान्तं पावयिष्यन्ति भूतलम् ? ॥ ९७ ॥

दारुको मरुलो मायश्चालवाण्डो महातपाः ।
ज्योतिर्मदिर्गुरुश्चिक्को व्याघ्रकन्थो वृहद्वधः ॥ ९८ ॥

नारकन्थः पत्स्यकन्थो मुक्ताकन्थो महामुनिः ।
एकादशशिखो योगी मल्लिकार्जुननामवान् ॥ ९९ ॥

एतत्प्रभृतयोऽघोरविग्रहा मम शङ्करि ! ।
अथर्वाध्ययनोपेता याम्यदिक्कुलशाधिपाः ॥ १०० ॥

षट्सहस्रचरणां च गुरवोऽधीतिमूर्तयः ।
वानप्रस्थाश्रमाध्यक्षा हंसपञ्चाक्षरीजपाः ॥ १०१ ॥

एकादशशिखा व्याघ्रकन्थोदुम्बरदण्डकाः ।
सन्तो दयाधर्मभिक्षां देहिमुद्राविराजिताः ॥ १०२ ॥

त्रेतादितिष्यपर्यन्तं पावयिष्यन्ति भूतलम् । ?
घण्टाकर्णस्तथैकश्च रामो मुण्डीरुहेश्वरः ॥ १०३ ॥

सुतारस्तारको मुक्तो नूपुरश्च पुराणकः ।
सिद्धबुद्धस्सिद्धवीरो जानघ्नाभिधकन्थकः ॥ १०४ ॥

काचकन्थोऽप्ययःकन्थः कूर्पासाभिधकन्थकः ।
एतत्प्रभृतयस्सद्योजातरूपा निरामयाः ॥ १०५ ॥

लिङ्गार्पिताभिधां भिक्षां देहिमुद्राविराजिताः
ऋग्वेदाख्या एकशिखाः प्रणवाख्यानतत्पराः ॥ १०६ ॥

कूर्पासकन्थका वेणुदण्डाः पश्चिमकुण्डपाः ।
त्रयाणां च सहस्राणां जङ्गमानामधीश्वराः ॥ १०७ ॥

विरक्ताश्रमरक्ताश्च विरक्ताः परमर्षयः ।
आद्वापराच्च तिष्यान्तं पावयिष्यन्ति भूतलम् ? ॥ १०८ ॥

गजकर्णो त्रिरंगुष्ठो मञ्चमस्सङ्गमोऽव्ययः ।
कल्याणपण्डितः केशी माधवः श्रीपतिः प्रभुः ॥ १०९ ॥

मल्लिकार्जुन इत्याद्या ब्रह्मचर्याश्रमान्विताः ।
गायत्रीजापका वामदेव्याश्शुद्धोपवीतिनः ॥ ११० ॥

स्वर्णकन्थाः पञ्चशिखा जङ्गमा नैकपण्डिताः ।
पालाशदण्डा भवति भिक्षां देहीतिमुद्रिकाः ॥ १११ ॥

उदक्कलशनेतारः पावयिष्यन्ति तिष्यजान् ।
विभूतिं शिवभक्तेभ्यस्सर्वेभ्यस्तदनन्तरम् ॥ ११२ ॥

वृद्धानुक्रमतो दत्वा पुष्पाद्यैस्सम्यगर्चयेत् ।
अथ तेभ्यस्समस्तेभ्यो देशिकेन्द्रपुरस्सरम् ॥ ११३ ॥

यथाप्रदक्षिणं कृत्वा ताम्बूलादि समर्पयेत् ।
शुभे काले शुभे मासे तिथौ शुद्धे शुभेऽहनि ॥ ११४ ॥

शुभप्रदे च नक्षत्रे गृह्णीयादुपदेशकम् ।
मन्त्रारम्भस्तु चैत्रे च बहुदुःखफलप्रदः ॥ ११५ ॥

वैशाखे रत्नलाभश्च ज्येष्ठे च मरणं ध्रुवम् ।
आषाढे बन्धुनाशश्च पूर्णायुः श्रावणे भवेत् ॥ ११६ ॥

प्रजानाशो भाद्रपदे सर्वतश्शुभमाश्विने ।
कार्तिके मन्त्रसिद्धिश्च मार्गशीर्षश्शुभावहः ॥ ११७ ॥

पुष्ये तु मन्त्रहानिः स्यान्माघे मेधाविवर्धनम् ।
फाल्गुने सर्वसिद्धिः स्यादिति मन्त्रविदो विदुः ॥ ११८ ॥

शुक्लपक्षे शुभा दीक्षा कृष्णे चापञ्चमीतिथि ।
कृष्णपक्षे बुभुक्षूणां मुमुक्षूणां वलर्क्षके ॥ ११९ ॥

चतुर्थीं नवमीं षष्ठीमष्टमीं च चतुर्दशीम् ।
पौर्णमासीं विना शेषा हितास्सुस्तिथयो यतः ॥ १२० ॥

रविमङ्गलमन्दाश्च त्याज्यास्त्वन्ये शुभावहाः ।
रोहिणी मृगशीर्षे च मघा पुष्यपुनर्वसू ॥ १२१ ॥

हस्तस्वात्यावनूराधा श्रवणं रेवती तथा ।
त्रीण्युत्तराणि मूलं च नक्षत्राणि चतुर्दश ॥ १२२ ॥

व्याघातं परिघं वज्रं व्यतीपातं च वैधृतिम् ।
गण्डातिगण्डशूलानि विष्कम्भं नव वर्जयेत् ॥ १२३ ॥

बवादिवणिजान्तानि शुभानि करणानि षट् ।
वृषभो वाथ कुम्भो वा वृश्चिकस्सिंह एव वा ॥ १२४ ॥

मिथुनं चापि कन्या वा धनुर्वा मीन एव वा ।
एते हि राशयः प्रोक्ताश्चरराशिं च वर्जयेत् ॥ १२५ ॥

गुरूदयं वा कुर्वीत शुक्रोदयमथापि वा ।
बुधोदयं वा कुर्वीत त्यजेत्पापेन संयुतम् ॥ १२६ ॥

अष्टमस्था ग्रहास्सर्वे नेष्टा द्वादशस्थिताः ।
एवं विचार्य सर्वं च ततो दीक्षां समाचरेत् ॥ १२७ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारण-
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिवसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्र-
सारभूते श्रीशिवतत्त्वरत्नाकरे नवमकल्लोले
दीक्षाभेदगुरुशिष्यर्त्विक्कालदेशादिनिरूपणं नाम सप्तमस्तरङ्गः

अथ अष्टमस्तरंगः

दीक्षाभेदो लक्षणं च गुरोश्शिष्यस्य चैव हि ।
ऋत्विजां देशकालानां क्रमेण प्राक् प्रदर्शितम् ॥ १ ॥

अधुना मण्टपादीनां लक्षणानि प्रचक्ष्महे ।
तत्रादौ कथ्यते सम्यग् दीक्षालक्षणमण्टपम् ॥ २ ॥

हस्तमात्रं खनेद् भूमिं पूरयेत्तत्र पांसुना ।
अधिका चेदुत्तरस्यां मध्यमा समपांसुना ॥ ३ ॥

अधमा हीनपांसुः स्यादधमामिह वर्जयेत् ।
भस्माङ्गारतुषान् केशांस्तस्यामुद्धारयेत्ततः ॥ ४ ॥

पञ्चगव्येन सम्प्रोक्ष्य शिवमन्त्रेण दीक्षितः ।
पञ्चरत्नं क्षिपेत्तत्र भूशुद्धिं परिकल्पयेत् ॥ ५ ॥

ततो भूमितले शुद्धे तुषाङ्गारविवर्जिते ।
पुण्याहं वाचयित्वाथ मण्टपं रचयेच्छुभम् ॥ ६ ॥

कनिष्ठं चाष्टहस्तं तु नवहस्तं तु मध्यमम् ।
दशैकादशहस्तं वा द्वादशं चोत्तमोत्तमम् ॥ ७ ॥

खदिरः क्रमुकश्चैव शाखावेणुस्तथैव च ।
षोडशस्तम्भसंयुक्तं द्वादशस्तम्भमेव वा ॥ ८ ॥

षोडशस्तम्भसंयुक्ते चत्वारस्तेषु मध्यगाः ।
अष्टहस्तसमुच्छ्रायं स्थापयेद् द्वादशाभितः ॥ ९ ॥

पञ्चहस्तप्रमाणान् वा निश्छिद्रांश्च ऋजून् शुभान् ।
तत्पञ्चमांशं निखनेन्मेदिन्यां तन्त्रवित्तमः ॥ १० ॥

नालिकेरैः पूगवंशैश्छादयेत् कायमानकम् ।
द्वारेषु तोरणानि स्युः क्रमात् क्षीरमहीरुहः ॥ ११ ॥

देव्युच्छ्रायः स्मृतस्तेषां सप्तहस्तः पृथक् पृथक् ।
दशांगुलप्रमाणेन तत्परीणाह ईरितः ॥ १२ ॥

तिर्यक् फलकमानं स्यात् स्तम्भानामर्धमानतः ।
शूलानि कल्पयेन्मध्ये तोरणे हस्तमानतः ॥ १३ ॥

दिक्षु ध्वजान्निबध्नीयाल्लोकपालसमप्रभान् ।
वितानं चोर्ध्वमाच्छाद्य घण्टाचामरभूस्थितम् ॥ १४ ॥

दर्भरज्जुपरिक्षिप्तं पुष्पमालावलम्बितम्
फलपल्लवगन्धाढ्यं धूपदीपसमन्वितम् ॥ १५ ॥

चतुरश्रं चतुर्द्वारं चतुस्तोरणभूषितम् ।
दर्भमालासमायुक्तं दिग्गजैरुपशोभितम् ॥ १६ ॥

उत्कैस्त्यैश्च शोभाढ्यैरलं कुर्वीत मण्टपम् ।
तन्मध्यमण्टपे क्षेत्रेऽरत्निमात्रसमुन्नताम् ॥ १७ ॥
चतुरश्रां प्रचारव्यायामां वेदीं प्रकल्पयेत् ।
वेदी चतुर्विधा तत्र चतुरश्रा च पद्मिनी ॥ १८ ॥
कृत्वा तु स्थण्डिलं तत्र पद्ममष्टदलं लिखेत्
पञ्च स्वर्णादिकलशानाचार्यः स्थापयेन्नवान् ॥ १९ ॥
मृण्मयान् वापि कलशान् पक्वबिम्बफलोपमान् ।
अच्छिद्रान् परमन्तस्स्थपाषाणस्फोटवर्जितान् ॥ २० ॥
अग्निना च समं तप्तान् कालमण्डलवर्जितान् ।
चतस्रो वीक्षणाद्याश्च कर्तव्याश्शुद्धयः क्रमात् ॥ २१ ॥
एवं मध्ये चतुष्कोणे चतुरस्तान्निधापयेत् ।
ईशानं कर्णिकामध्ये पुरुषं पूर्वतोमुखम् ॥ २२ ॥
अघोरं दक्षिणे देशे वामदेवं तथोत्तरे
सद्यं च पश्चिमे देशे विन्यसेत्कलशान् गुरुः ॥ २३ ॥
ह्रां ह्रीं ह्रूं च ततो ह्रैं ह्रौं बीजैरोङ्कारपूर्वकैः ।
ईशानादिनमोऽन्तैस्तु प्रोक्षयेत् कलशान् क्रमात् ॥ २४ ॥
प्रत्येकं नववस्त्रेण वेष्टयेद् देशिकोत्तमः ।
नवभिस्तन्तुभिश्शुद्धैः पञ्च तान् परिवेष्टितान् ॥ २५ ॥
गङ्गादिसर्वतीर्थानामम्भांसि परमो गुरुः ।
संपूर्य पञ्च कलशानिमम्य इति मन्त्रतः ॥ २६ ॥
तेषु तीर्थाम्बुपूर्णेषु निदध्यादाम्रपल्लवान् ।
दूर्वाङ्कुरान् सपूगानि नागवल्लीदलान्यपि ॥ २७ ॥
तेषु स्वर्णानि रत्नानि क्षिप्त्वा सम्यक् प्रपूजयेत् ।
कलशे शान्त्यतीताख्याच्छान्तिः पूर्वेऽथ दक्षिणे ॥ २८ ॥
विद्या सौम्ये प्रतिष्ठा स्यान्निवृत्तिः पश्चिमे क्रमात् ।
शान्त्यतीतादिभिर्मन्त्रैः कलशान् पञ्च तान् गुरुः ॥ २९ ॥
तत्तत्क्रियोचितैर्द्रव्यैः पूरयेद्यतमानसः ।
अथ तत्कलशस्थानामम्भसामभिमन्त्रणम् ॥ ३० ॥
श्रीमत्पञ्चाक्षरीमन्त्रेणाचार्यः प्रतिपादयेत् ।
ईशान्यस्य कलापं च मन्त्रमुच्चारयेद् गुरुः ॥ ३१ ॥
आचार्यो मण्टपस्स्यार्चां कुर्यात् पुष्पाक्षतादिभिः ।
ऋत्विजः प्रीतमनसो विदध्युरितरार्चनम् ॥ ३२ ॥
तस्मादीशानदिग्भागे स्थण्डिलं तु समाचरेत् ।
एकैकरात्रं कुम्भेषु त्रिषु पूर्णेषु वारिणा ॥ ३३ ॥

तत्राधिवासयेल्लिङ्गमेकैकं याममेव वा ।
नवहस्तप्रमाणेन वस्त्रं कुर्याद्विचक्षणः ॥ ३४ ॥
तत्रैव नवधान्यैश्च स्थण्डिलानि प्रकल्पयेत् ।
पञ्चाढकप्रमाणेन स्थण्डिलानि पृथक् पृथक् ॥ ३५ ॥
श्यामाकश्च प्रियंगुश्च गोधूमव्रीहिमुद्गकाः ।
निष्पावमाषचणकतिलाश्चैव क्रमेण तु ॥ ३६ ॥
उपर्युपरि संस्थाप्य तद्वस्त्रोपरि विन्यसेत् ।
पद्ममष्टदलं लेख्यं तन्मध्ये कर्णिकां तथा ॥ ३७ ॥
धान्योपरि न्यसेल्लिङ्गं यामं धान्याधिवासनम् ।
नववस्त्रेण संवेष्ट्य गन्धपुष्पाक्षतादिभिः ॥ ३८ ॥
नैवेद्यं दापयेत् पश्चात् ताम्बूलं दापयेत्ततः ।
अर्चनानन्तरं शिष्यं कृपया वीक्ष्य देशिकः ॥ ३९ ॥
तस्य दक्षिणदिग्भागे स्वस्तिकं तत्र कारयेत् ।
तन्मध्ये स्थापयेच्छिष्यमुत्तराभिमुखं गुरुः ॥ ४० ॥
स्वयं च प्राङ्मुखो भूत्वा शिवैकाहितमानसः ।
एवं शिष्यं समारोप्य स्वस्तिकं तत्र कारयेत् ॥ ४१ ॥
भूतादिकोशपर्यन्तं शुद्धिं तस्य समाचरेत् ।
पृथिवीति च मन्त्रेण पञ्चकोशविशोधनम् ॥ ४२ ॥
वाङ्मनश्चेतिमन्त्रेण पञ्चेन्द्रियविशोधनम् ।
अन्तःकरणशुद्धिः स्यान्मन इत्यभिमन्त्रणात् ॥ ४३ ॥
त्वगित्यनेन मन्त्रेण धातुशुद्धिं समाचरेत् ।
अन्नेतिमनुना कोशपञ्चकस्य विशोधनम् ॥ ४४ ॥
प्राणापानेतिमन्त्रेण पञ्च प्राणान् विशोधयेत् ।
अभिषेकं ततः कुर्यात् कलशान्तस्थवारिणा ॥ ४५ ॥
अभिषिञ्चेत् स्वयं प्राज्ञश्चोद्धृत्य कलशान् गुरुः ।
हृदयादिषु चाङ्गेषु हरस्याङ्गैर्यथा क्रमम् ॥ ४६ ॥
प्रोक्षयेदथ ऋत्विग्भिस्सदूर्वाङ्कुरपल्लवैः ।
केचिदुद्धृत्य कलशानभिषिञ्चन्ति देशिकाः ॥ ४७ ॥
उद्धृत्य वा ततः कुर्यात् प्रोक्षणं शिष्यमूर्धनि ।
सम्प्रोक्ष्य पञ्च कलशान् सदूर्वाङ्कुरपल्लवान् ॥ ४८ ॥
स्वस्वस्थानेषु कलशान् सन्निधाय यथापुरा ।
उद्धृत्य च यथापूर्वं कुर्वीत प्रोक्षणं बुधः ॥ ४९ ॥
स्थापयित्वा पुनस्तांस्तान् कलशान् स्वस्वभूमिषु ।
उद्धृत्य पूर्ववत् कुर्यात् प्रोक्षणं शिष्यमूर्धनि ॥ ५० ॥

इत्थं त्रिवारमाचार्यः कृत्वा तस्याघमर्षणम् ।
अङ्गत्वक्कलभेदान् पञ्च ब्रह्माणि विन्यसेत् ॥ ५१ ॥

शिरोवदनहृद्गुह्यपादेष्वेतानि कल्पयेत् ।
ईशानस्य कलाः पञ्च पञ्चस्वेतेषु च क्रमात् ॥ ५२ ॥

ततश्चतुर्षु वक्त्रेषु पुरुषस्य कला अपि ।
चतस्रः प्रणिधातव्याः पूर्वादिक्रमयोगतः ॥ ५३ ॥

हृत्कण्ठदेशे नाभौ च कुक्षौ पृष्ठे च वक्षसि ।
अघोरस्य कलाश्चाष्टौ योजनीया यथाक्रमम् ॥ ५४ ॥

पश्चात् त्रयोदश कलाः पायुमेढ्रोरुजानुषु ।
जङ्घास्फिक्कटिपार्श्वेषु वामदेवस्य भावयेत् ॥ ५५ ॥

सद्यस्य च कला अष्टौ पादयोरपि हस्तयोः ।
घ्राणे शिरसि बाह्वौ च कल्पयेत् कल्पवित्तमः ॥ ५६ ॥

अष्टत्रिंशत्कलान्यासमेवं कृत्वानुपूर्व्यशः ।
आचार्यो दक्षिणे हस्ते साङ्गं संपूज्य सासनम् ॥ ५७ ॥

शिवं ध्यात्वा चिदानन्दं विदध्याच्छिष्यमस्तके ।
सव्यं प्रक्षाल्य हस्तं तु कृत्वा गन्धैरलंकृतम् ॥ ५८ ॥

न्यसेद्ब्रह्माणि शाखासु तासु पञ्चस्वनुक्रमात् ।
गन्धमण्डलकं कृत्वा वामांगुष्ठेन मध्यतः ॥ ५९ ॥

विन्यसेत्तत्र देवेशं योगिराजं परं शिवम् ।
पूजयेदर्घ्यपाद्यैस्तं गन्धद्रुमपवित्रकैः ॥ ६० ॥

शिवहस्त इति प्रोक्तः पाशानां नाशने बुधैः ।
शिवतेजोमयं पाणिं शिवमन्त्रमुदीरयेत् ॥ ६१ ॥

शिवहस्तं निधायाथ शिष्यस्य शिरसि न्यसेत् ।
ततश्शिवासनं ध्यात्वा शिष्यमूर्ध्नि च देशिकः ॥ ६२ ॥

नादबिन्दुयुतं पीठं चिन्तयेन्मनसा गुरुः ।
तत्रावाह्य यथान्यायमर्चयेन्मनसा शिवम् ॥ ६३ ॥

ज्वलत्कालानलाभासा तटित्कोटिसमप्रभा ।
तस्योर्ध्वे च शिखा सूक्ष्मा चिद्रूपा परमा कला ॥ ६४ ॥

यथा कला तथा भावो यथा भावस्तथा मनः ।
यथा मनस्तथा दृष्टिर्यथा दृष्टिस्तथा स्थलम् ॥ ६५ ॥

सकला परमा सूक्ष्मा तत्त्वानां बोधिनी परा ।
तामाकृष्य यथान्यायं लिङ्गे समुपवेशयेत् ॥ ६६ ॥

सपुष्पं सकुशं पाणिं न्यस्य लिङ्गस्य मस्तके ।
पञ्चवारं जपेन्मन्त्रं मूलेनाष्टोत्तरं शतम् ॥ ६७ ॥

लिङ्गं संस्थाप्य पादांबुना प्रक्षाल्य चरणस्य ।
तल्लिङ्गस्य प्रसादं च भोजयित्वा विधानतः ॥ ६८ ॥

पश्चाच्छिष्यकरे दत्वा मूलपञ्चाक्षरीं स्मरेत् ।
उत्तमाङ्गे गले वापि कक्षे वक्षस्स्थलेऽपि वा ॥ ६९ ॥

तथा हस्ततले वापि प्राणलिङ्गं बृहत्सुधीः ।
गच्छन् तिष्ठन् स्वपन् जाग्रदुन्मिषन्निमिषन्नपि ॥ ७० ॥

शुचिर्वाप्यशुचिर्वापि लिङ्गं सर्वत्र धारयेत् ।
प्रार्थयेत् प्राञ्जलिर्देव! नित्यमत्र स्थिरो भव ॥ ७१ ॥

इति विज्ञाप्य तं शम्भुं तेजसा भास्वरं स्मरेत् ।
तल्लिङ्गं स्थाप्य तच्छिष्ये प्राणलिङ्गमिदं तव ॥ ७२ ॥

एवमुक्तस्सदा लिङ्गं न कदाचिद्विमोचयेत् ।
कर्णे शिष्यस्य शनकैर्मूलमन्त्रमुदीरयेत् ॥ ७३ ॥

आचार्यो मूलमन्त्रेण कर्ममायामलापहम् ।
मूलमन्त्रमपि स्पष्टं घण्टानादविमिश्रितम् ॥ ७४ ॥

नानारत्नप्रतीकाशवर्णराजिविराजितम् ।
चरद्विद्युल्लताकारं द्वादशान्ताद्विनिर्गतम् ॥ ७५ ॥

सानन्दं निर्गतं तस्माच्छिष्यश्रोत्रे समुच्चरेत् ।
मूलमन्त्रं समुच्चार्य त्रिवारं श्रावयेच्छिवम् ॥ ७६ ॥

तन्मन्त्रमहसोत्फुल्लशिष्यलोचनबन्धनम् ।
उन्मुच्य क्षेपयेत् पुष्पमकामो लिङ्गमूर्धनि ॥ ७७ ॥

मन्त्रतेजःप्रफुल्लाक्षो दृष्ट्वा तं प्रणमेच्छिवम् ।
सर्वलक्षणसम्पन्ने तस्मिन् लिङ्गे विशोधिते ॥ ७८ ॥

पीठस्थितेऽभिषिक्ते च गन्धपुष्पादिपूजिते ।
मन्त्रपूते कलां शैवीं योजयेद्विधिना गुरुः ॥ ७९ ॥

शिष्यस्य प्राणमादाय लिङ्गे तत्र निधापयेत् ।
प्राणवद्धारणीयं तु प्राणलिङ्गमिदं तव ॥ ८० ॥

कदाचित् कुत्रचिद्वापि न विमोचय देहतः ।
यदि प्रमादात् पतति लिङ्गं देहान्महीतले ॥ ८१ ॥

प्राणं विमुञ्च सहसा प्राप्तये मोक्षसम्पदः ।
इति संबोधितशिष्यो गुरुणा शास्त्रवेदिना ॥ ८२ ॥

धारयेच्छाङ्करं लिङ्गं शरीरे प्राणयोगतः ।
लिङ्गस्य धारणं पुण्यं सर्वपापप्रणाशनम् ॥ ८३ ॥

वीरशैवाभिषिक्तानां भक्तानामर्हणास्पदम् ।
गर्भावरणमीशस्य सूच्यते सूक्ष्मरूपतः ॥ ८४ ॥

पञ्चब्रह्मशिवांगैश्च पूजयेत् पूर्वतत्त्ववत् ।
एकावरणमेवोक्तं पूजयेद्देशिकस्तथा ॥ ८५ ॥
यदा शिवकलायुक्तं लिंगं दद्यान्महागुरुः ।
तदारभ्य शिवस्तत्र तिष्ठत्याह्वानमात्रकम् ॥ ८६ ॥
ससंस्कृतेषु लिंगेषु सदा सन्निहितश्शिवः ।
तदाह्वानं न कर्तव्यं प्रतिपत्तिविरोधतः ॥ ८७ ॥
नाह्वानं न विसर्गं च स्वेष्टलिंगेषु कारयेत् ।
लिङ्गनिष्ठापरो नित्यमिति शास्त्रविनिश्चयः ॥ ८८ ॥
यथा विश्वेशनिकटे गङ्गास्त्युदकवर्जिता ।
अथ वक्ष्ये विशेषेण शिवलिङ्गार्चनक्रमम् ॥ ८९ ॥
पूजोपचारविधिना षट्त्रिंशद्भेदभेदितम् ।
नमश्शब्द उमा साक्षाच्छिवशब्दश्शिवस्स्वयम् ॥ ९० ॥
आशब्दस्तयोर्योगस्सोमं तं समुपास्महे ।
शिवो लिङ्गमुखेनाङ्गमनया सहितस्स्वयम् ॥ ९१ ॥
पूजा द्वादशधा प्रोक्ता शिवसिद्धान्ततत्परैः ।
उपचारास्तथा चैव चतुर्विंशतिधा स्मृताः ॥ ९२ ॥
विभूत्याभ्युक्षणं लिंगं करणं स्नपनं तथा ।
अङ्गारतापनं चैव धूपनं वीजनं ततः ॥ ९३ ॥
धूमप्रसारणं चैव ततो गन्धावतंसनम् ।
अक्षतारोपणं चैव पुष्पोपहरणं तथा ॥ ९४ ॥
दीपप्रसारणं चैव नैवेद्यस्य समर्पणम् ।
ताम्बूलस्य प्रदानं च वस्त्रप्रावरणं ततः ॥ ९५ ॥
एवं द्वादशधा प्रोक्ता शिवलिङ्गार्चनक्रिया ।
आसनाह्वानमर्घ्यं य पाद्यमाचमनं ततः ॥ ९६ ॥
यज्ञोपवीतमाल्यानुलेपनाभरणानि च ।
छत्रं च चामरं चैव तालवृन्तं च दर्पणम् ॥ ९७ ॥
घण्टा शंखं च गीतं च वाद्यं नृत्तं प्रदक्षिणम् ।
नमस्कारस्तुतिर्यज्ञो विज्ञप्तिश्च विसर्जनम् ॥ ९८ ॥
इत्येवमुपचारास्तु चतुर्विंशतिधा स्मृताः ।
समर्चनोपचाराणां योगे षट्त्रिंशदीरिताः ॥ ९९ ॥
षट्त्रिंशतत्त्वमय्येषां शैवी स्थितिरिति श्रुतिः ।
अथार्चनोपचाराणां योगक्रम उदीर्यते ॥ १०० ॥
तस्मात् स्नानादिभिश्शुद्धीकरणं विधिवत्ततः ।
कलाब्जपीठरूपेण तत आवाहनं परम् ॥ १०१ ॥
आनीयाङ्गस्थलिंगोपवेशनं तत्र चासने ।
विभूत्यभ्युक्षणं पूर्वं समन्त्रकमतः परम् ॥ १०२ ॥
अर्घ्यादिश्चैवमाचामस्ततस्स्नपनकर्म च ।
अङ्गारतापनादीनि दशोक्तानि च पूर्ववत् ॥ १०३ ॥
ततो यज्ञोपवीतादिविज्ञप्त्यन्ता यथाक्रमम् ।
विसर्जनं करस्थस्य लिङ्गस्यांगे निवेशनम् ॥ १०४ ॥
एवं लिङ्गार्चनं यस्तु कुरुते भक्तिपूर्वकम् ।
सोपचारविधानेन सशिवार्पणविद्भवेत् ॥ १०५ ॥
अर्चनार्पणयोर्भेदो नात्यन्तमिह विद्यते ।
क्रियाविशेषतो भेदस्तयोरीषत्प्रदर्श्यते ॥ १०६ ॥
अर्चनार्पणसापेक्षा वर्तते द्रव्यशुद्धये ।
अर्पणद्रव्यशुद्धिः स्यात्प्रसादस्तदनन्तरम् ॥ १०७ ॥
विभूत्यभ्युक्षणाल्लिङ्गे पृथिवी परिशुध्यति ।
आपश्च स्नपनात्तद्वद्वह्निरङ्गोपतापनात् ॥ १०८ ॥
वायुस्तथा शिवोद्दिष्टधूपव्यजनकर्मणा ।
धूपधूमेन चाकाशश्चन्द्रो गन्धावलेपनात् ॥ १०९ ॥
ज्योत्स्ना कर्पूरदीपेन नक्षत्राण्यक्षतैश्शुभैः ।
सूर्याः पुष्पोपहारेण घृतदीपेन चातपः ॥ ११० ॥
छायाः पश्चात् पुरस्ताच्च पार्श्वतो दीपचालनात् ।
शीतोष्णादीनि पूर्वोक्ततत्तद्दशोद्भवादिभिः ॥ १११ ॥
आत्मा नैवेद्यरूपेण ताम्बूलं त्रिगुणव्ययम् ।
अस्त्रप्रावरणादेव विशुध्यन्ति दिशो दश ॥ ११२ ॥
एवमर्पणसापेक्षैरर्चयन् शिवमर्चनैः ।
द्रव्यशुद्धिं परां लब्ध्वा प्रसादसुखमश्नुते ॥ ११३ ॥
शान्तिर्वारि सुखं शमस्सुमनसः श्रीखण्डपिण्डोऽक्षताः ।
ज्ञानं केसरमात्मनैव कुसुमं धूपोऽभवत्सौरभम् ॥ ११४ ॥
दीपं कान्तिरथार्चना रतिरथो नैवेद्यरूपं ततः ।
ताम्बूलं निजभक्तिरागरस इत्यष्टाङ्गधा पूजनम् ॥ ११५ ॥
अतः परं क्रमेणैव वीरशैवार्चनक्रमम् ।
षट्स्थलात्मकरूपेण प्रवक्ष्यामि समासतः ॥ ११६ ॥
भक्तः स्थले सुखासीनो भूतिरुद्राक्षधारणम् ।
कृत्वा भक्त्या सुभूतात्मा ततो माहेश्वरस्थले ॥ ११७ ॥
षडक्षरं परं मन्त्रमनुष्ठेयात्मनिष्ठया ।
प्रसादिस्थलमादाय लिङ्गहस्तेऽवधानतः ॥ ११८ ॥

प्राणलिङ्गस्थले पूजां विधाय स्वानुभूतितः ।
ततश्शिवार्पणं कृत्वा स्वानन्दाचरणस्थले ॥ ११९ ॥
ऐक्यस्थले प्रसादोपभोगतृप्तिमवाप्य च ।
एवं समरसाद् भावात् षडङ्गस्थलयोगतः ॥ १२० ॥
क्रियते सर्वदा सोऽयं वीरशैवार्चनक्रमः ।
विशब्दोऽत्र विकल्पार्थो रशब्दो रहितार्थकः ॥ १२१ ॥
विकल्परहितं सर्वं वीरशैवमिति स्मृतम् ।
एकमेवाद्वितीयं यदविकल्पं परं पदम् ॥ १२२ ॥
तद्वीरशैवमित्युक्तं नैतत्सत्वविकल्पकम् ।
एवं समासतः प्रोक्तश्शिवलिङ्गार्चनक्रमः ॥ १२३ ॥
भूतन्ते परमप्रकाश उत रुद्राक्षं द्वितीयं मुखं
श्रीपञ्चाक्षरमन्त्र एव भवदीयं दिव्यनाम स्फुटम् ।
लिंगं मूर्तिरुमापते! तव परानन्दामृतं पारदं
प्राश्नन् यत्त्वदभूत् प्रसाद इति भक्तिस्त्वां भजत्यस्तिमे ॥ १२४ ॥
मानसवाचिककायिककर्माण्येधांसि पापपुण्यानि ।
शैवानि हवींषि मम ज्ञानाग्नौ हूयते मया होमः ॥ १२५ ॥
नित्यं समर्पणकलानिपुणं प्रसन्नं यद्भक्तिरूपममलं निजभावसिद्धम् ।
निर्लेपभोगरसिकं निरहंममत्वं तत्कर्म शैवमुभयातिगमाहुरार्याः ॥
अधस्ताच्चोर्ध्वतः कृत्वा पुण्यपापेन्धनद्वयम् ।
निर्मन्थे मथचिह्नैः पुनस्तैरेव निर्दहेत् ॥ १२७ ॥
एवं समासतः प्रोक्तश्शिवलिङ्गार्चनक्रमः ।
शिवानुभवसूतेऽस्मिन् शिवसिद्धान्तशासने ॥ १२८ ॥

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणचिदम्बर-
शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारद
श्रीमत्केलदिबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे नवमकल्लोले
दीक्षाविधानमण्टपलक्षणादिनिरूपणं नामाष्टमस्तरङ्गः.

अथ नवमस्तरंगः

वीरशैवे लिङ्गपूजाविधानमुपवर्णितम् ।
श्रुत्वास्म्यहं कृती श्रोतुं षट् स्थलान्यस्ति मे स्पृहा ॥ १ ॥
कानि तानि स्थलानि स्युष्षट्सङ्ख्याकानि? भो गुरो!
तेषां भेदं स्वरूपं च स्वामिन्! मह्यं निरूपय ॥ २ ॥
तत्ते कुमार! वक्ष्यामि यत् पृष्टं साम्प्रतं त्वया ।
संवादश्शिवपार्वत्योरस्मिन्नर्थेऽवतिष्ठते ॥ ३ ॥
भगवन्! सर्वलोकेश! करुणाकर! शङ्कर!
शैवभेदस्वरूपं च वीरशैवं विशेषतः ॥ ४ ॥
तदाचारस्वरूपं च श्रुतं त्वत्कृपया विभो!
तत्र लिङ्गाङ्गसम्बन्धज्ञानं मोक्षैकसाधनम् ॥ ५ ॥
इत्युक्तं भवता सम्यक् तद्ज्ञानमुपदिश्यताम् ।
शिवः ॥
यत् पृष्टं हि त्वया देवि! रहस्यमिदमुत्तमम् ॥ ६ ॥
षट्स्थलात्मकमेतच्च श्रूयतां सावधानतः ।
प्रथमं गुरुलिंगं स्यात्तत आचारलिङ्गकम् ॥ ७ ॥
तत्र प्रसादलिंगं स्याच्चरलिङ्गमतः परम् ।
शिवलिङ्गमतो ज्ञेयं महालिंगं ततः परम् ॥ ८ ॥
एवं षड्विधलिङ्गानां स्वरूपं शृणु शङ्करि! ।
दीक्षा शिक्षा प्रभावश्च गुरुलिंगं त्रिधा भवेत् ॥ ९ ॥
कुण्डमण्टपहोमाद्यैन्यासैरध्वकलादिभिः ।
मन्त्रोपदेशसहिता क्रिया दीक्षेति कथ्यते ॥ १० ॥
दीयते लिङ्गसम्बन्धः क्षीयते कर्मसंचयः ।
दीयते क्षीयते यस्माद्दीक्षेति कथिता बुधैः ॥ ११ ॥
गुरुलिङ्गचराख्यानां लिङ्गानामेकरूपकम् ।
यद् ज्ञानं बोधितं सद्भिस्सा शिक्षेति निगद्यते ॥ १२ ॥
संस्कारैः प्राक्तनैर्देवि! स्वकीयसुकृतार्जनैः ।
भक्तिश्रद्धार्चनाद्यैर्यदनुभावस्स उच्यते ॥ १३ ॥
स्थलमाचारलिङ्गस्य त्रिविधं श्रूयतां क्रमात् ।
सदाचारस्तु नियतो गणचारस्ततः परम् ॥ १४ ॥

सज्जनशिवभक्तश्च येन मार्गेण सर्वदा ।
तुष्टस्तोषयते देवि! सदाचारस्स वै स्मृतः ॥ १५ ॥

यस्तु स्वकृतमाचारं न त्यक्ष्येऽहं तदत्यये ।
त्यजाम्यसूनिति स वै नियताचार ईरितः ॥ १६ ॥

गुरुलिङ्गादिविषयं न श्राव्यं दूषणं यदि ।
श्रुतवान् शिक्षयामीति गणाचारस्स विश्रुतः ॥ १७ ॥

प्रसादलिङ्गत्रैविध्यमपि शृणु वरानने!
शुद्धं सिद्धं प्रसिद्धं च भेदश्चैषामथोच्यते ॥ १८ ॥

आदौ गुरुत्रयं ज्ञात्वा ततस्तद्दास्यभावतः ।
तद्भुक्तशेषभोगी यस्स शुद्धः परिकीर्त्तितः ॥ १९ ॥

ज्ञात्वा लिङ्गत्रयं सम्यक् तदैक्यं च वरानने ।
लिङ्गार्पितप्रसादोऽयं सिद्ध इत्याहुरास्तिकाः ॥ २० ॥

यतो लिङ्गचरणामदधात् भक्तिसंयुतः ।
यः परित्यक्तविषयः प्रसिद्धस्स उदाहृतः ॥ २१ ॥

चरलिङ्गस्थलस्यास्य स्वरूपं कथयामि ते ।
स्वयं चरं परं चेति त्रैविध्यं समुपागतम् ॥ २२ ॥

लिङ्गलाञ्छनसंयुक्तो बहिः कृत्यविवर्जितः ।
केवलानन्दरूपो यस्स स्वयंलिङ्गमीरितः ॥ २३ ॥

स्वच्छन्दचारी स्वाभिन्नलिङ्गरूपो निराकुलः ।
लिङ्गन्यस्तकलाशुद्धिः स्तचरं लिङ्गमुच्यते ॥ २४ ॥

निर्द्वन्द्वो हि सदा स्थाणुर्गमागमविवर्जितः ।
ज्योतिर्लिङ्गस्वरूपोऽयं परलिङ्गमुदाहृतः ॥ २५ ॥

त्यक्तदेहेन्द्रियगुणशिवार्पितनिजान्तरः ।
शिव एव मनो लीनं प्राणलिङ्गं तदुच्यते ॥ २६ ॥

जाग्रदादिष्ववस्थासु ज्योतिर्लिंगैकमानसम् ।
अज्ञानविनिवृत्तं यद्भावलिङ्गं तदुच्यते ॥ २७ ॥

महालिङ्गस्थलं चापि त्रिधा भिन्नं शृणु प्रिये!
पिण्डजं प्रथमं प्रोक्तमण्डजं च ततः परम् ॥ २८ ॥

विन्द्वाकाशं ततो ज्ञेयमेषां लक्षणमुच्यते ।
देहो देवालयः प्रोक्तो जीवो देवस्सदाशिवः ॥ २९ ॥

इति निश्चितसद्भावः पिण्डजं लिङ्गमुच्यते ।
पीठिका पृथिवीलिङ्गमाकाशं सृष्टिकारणम् ॥ ३० ॥

निस्सन्दोहमिदं ज्ञानमण्डजं लिङ्गमीरितम् ।
ध्यात्वात्मानमथाकाशे ध्यात्वाकाशं तथात्मनि ॥ ३१ ॥

आत्माकाशमयं लिङ्गं विन्द्वाकाशमुदाहृतम् ।

देव्युवाच ॥

एषु लिङ्गेषु देवेश! कथं पूजादिकं भवेत्? ॥ ३२ ॥

सदाचारास्तु को वात्र? प्रसादः कीदृशो भवेत्? ।
एतत्सर्वं समासेन कृपया वद मे प्रभो! ॥ ३३ ॥

महादेव उवाच ॥

अङ्गस्थलं समासेन वक्ष्ये षड्विधमादितः ।
भुक्तो माहेश्वरश्चैव प्रसादी प्राणलिङ्गकः ॥ ३४ ॥

शरणश्शिवलिङ्गैक्यं षड्स्थलं मम पार्वति! ।
अथैषां लक्षणं वक्ष्ये शृणुष्व सुसमाहिता ॥ ३५ ॥

त्यक्ताभिमानो देहादौ भक्त इत्युच्यते बुधैः ।
तच्चित्तममलं यस्य सवै माहेश्वरः स्मृतः ॥ ३६ ॥

चित्तशुद्धिर्भवेद्यस्य स प्रसादो भवत्यसौ ।
त्यक्तजीवभ्रमश्चायं लिङ्गात्मा प्राणलिङ्गकः ॥ ३७ ॥

शिवनित्यत्वनिश्चिन्तस्सानन्दश्शरणो भवेत् ।
शिवजीवोभयभ्रान्तिरहितश्चैक्यमुच्यते ॥ ३८ ॥

गुरुभक्तो लिङ्गभक्तश्चरभक्तस्तथैव च ।
एवं भेदसमायुक्तस्स भक्तस्त्रिविधो भवेत् ॥ ३९ ॥

मोही भक्तः पूजकश्च वीरशैवप्रसादवान् ।
प्राणी च गुरुलिङ्गादिष्वेवं भक्तोऽपि षड्विधः ॥ ४० ॥

त्यक्तवित्तादिमोहस्सन् गुरुलिङ्गैकमोहवान् ।
एवं यो वर्तते देवि! स तन्मोहीति कथ्यते ॥ ४१ ॥

लौकिकान् बान्धवांस्त्यक्त्वा गुरुलिङ्गैकबान्धवः ।
हर्षपूर्णो महादेवि! स तद्भक्त इति स्मृतः ॥ ४२ ॥

पूजामन्यां परित्यज्य गुरुलिङ्गैकपूजनः ।
अतिनिष्ठापरो यस्तु स वै तत्पूजकः स्मृतः ॥ ४३ ॥

गुरूपदिष्टमेवाथ समाचरणमाचरन् ।
यश्च त्यक्तेतराचारो गुरुवीरस्स उच्यते ॥ ४४ ॥

यो वै न लङ्घयेद् देवि! कदाचिद् गुरुशासनम् ।
स वै गुरुप्रसादी स्यान्निवृत्तेतरशासनः ॥ ४५ ॥

सेवामन्यां परित्यज्य गुरुलिंगैकसेवकः ।
वर्तते यः स्थिरतरो गुरुप्राणी स हि स्मृतः ॥ ४६ ॥

एवं भेदैश्च मां देवि! गुरुमूर्तिधरं शिवम् ।
भजेतानन्यचित्तो यस्स मुक्तः स्यान्न संशयः ॥ ४७ ॥

एवमाचारलिंगेऽपि षड् भेदास्संभवन्ति हि ।
मोहं त्यक्त्वा कलत्रादौ मोहित्वाचार एव हि ॥ ४८ ॥

शिवाचारविरुद्धांश्च त्यजेदपि सुतादिकान् ।
अथवाचारमोही स्यादन्याचार विवर्जितः ॥ ४९ ॥

पूर्वाचारं परित्यज्य शिवाचारं समाश्रितः ।
आचारलिङ्गभक्तः स्याद्विरुद्धाचारवर्जितः ॥ ५० ॥

अन्यपूजां परित्यज्य लिङ्गपूजैकतत्परः ।
शिवाचारपरो यस्तु स स्यादाचारपूजकः ॥ ५१ ॥

अपि प्राणात्यये देवि! स्वाचारं न परित्यजेत् ।
आचारवीरस्स भवेदाचारैकपरायणः ॥ ५२ ॥

शुचित्वमशुचित्वं चेत्यादिसन्देहवर्जितः ।
ग्राह्याग्राह्यादिरहितः स्यादाचारप्रसादकः ॥ ५३ ॥

परैः कृतां भक्तिनिन्दां श्रुणुयान्नहि कुत्रचित् ।
इति बुध्या सदाचारलिङ्गप्राणीति कथ्यते ॥ ५४ ॥

एवमाचारलिंगैकतत्परो मां समाश्रयेत् ।
प्रतिपद्य स नित्यत्वं गाणापत्यमवाप्नुयात् ॥ ५५ ॥

एवं प्रसादलिङ्गस्य स्थलं च श्रुणु तत्त्वतः ।
अन्यद्रव्यरुचिं त्यक्त्वा पूर्वतो ज्यादिवर्जितः ॥ ५६ ॥

प्रसादलिङ्गमोही स्यादन्यमोहविवर्जितः ।
प्रसादलिङ्गभक्तस्तु पूर्वाहारनिरासकः ॥ ५७ ॥

देवि! प्रसादलिङ्गस्य पूजकोऽनन्यपूजकः ।
परवित्तं परस्त्रीं च परमैत्रीं पराश्रयम् ॥ ५८ ॥

त्यक्त्वा प्रसादलिंगैकपरः स्यान्निस्पृहस्सदा ।
आदानार्थं च दानार्थं करौ नैव प्रसारयेत् ॥ ५९ ॥

नैव किञ्चित्प्रसादः स्यात्प्रसादी क्वापि संस्पृशेत् ।
न कुर्याज्जीवहिंसां च परैर्वा नापि कारयेत् ॥ ६० ॥

प्रसादलिङ्गप्राणी स्यात्स भवेदात्मबाधकः ।
इत्थं प्रसादलिंगैकपरो भूतदयान्वितः ॥ ६१ ॥

यः पूजयति मां देवि! मत्सायुज्यमवाप्नुयात् ।
चरलिङ्गस्थलेऽप्येवं भक्तस्याचरणं श्रुणु ॥ ६२ ॥

कुलं चैव कुलाचारं नियमं च विवर्जयेत् ।
चरलिंगैकमोही स्यादन्यमोहविवर्जितः ॥ ६३ ॥

त्यक्ताभिमानो देहादौ जङ्गमैकाभिमानवान् ।
चरलिंगैकभक्तः स्यादन्यभक्तिविवर्जितः ॥ ६४ ॥

अन्यपूजां परित्यज्य चरलिंगं प्रपूजयेत् ।
स्वयं च चरलिङ्गस्य पूजको नान्यपूजकः ॥ ६५ ॥

अथ प्राणादिकं सर्वं प्रीत्या कुर्याच्चरार्पितम् ।
चरलिंगैकवीरः स्यादन्यां भूयोऽपि न स्मरेत् ॥ ६६ ॥

सर्वं चरार्पितं कृत्वा तत्प्रसादं विशेषतः ।
यो भुंक्ते चरलिङ्गस्य प्रसादी नान्यलोलुपः ॥ ६७ ॥

शिवलाञ्छनसंयुक्तान् विन्द्यद्वैतमदात्मकान् ।
अयं तु चरलिंगैकप्राणी स्यान्नान्यमानसः ॥ ६८ ॥

एवं मद्रूपतापन्नं चरलिंगं समर्चयन् ।
गणत्वं प्राप्य सुचिरं मोदते घनलीलया ॥ ६९ ॥

शिवलिङ्गस्थलेऽप्येवं षड्विधं व्रतमाचरेत् ।
शिवलिंगैकमोही स्यादन्यमोहविवर्जितः ॥ ७० ॥

अनन्यदेवपूजः स्याच्छिवलिंगैकपूजकः ।
शिवलिंगैकवीरः स्यात् पुण्यक्षेत्रादिनिस्पृहः ॥ ७१ ॥

शिवलिङ्गप्रसादी स्यान्निर्द्वन्द्वोऽन्यानपेक्षकः ।
यस्सदा शिवलिंगैकप्राणी भोगविवर्जितः ॥ ७२ ॥

एवं भेदेन मां देवि! पूजयेल्लिङ्गरूपिणम् ।
गाणापत्यं भवेत्तस्य दुर्लभं प्राकृतात्मनाम् ॥ ७३ ॥

महालिङ्गस्थलेऽप्येवं विभेदः कथ्यतेऽधुना ।
त्यक्तलोकसमाचारो लिङ्गनिष्ठैकमानसः ॥ ७४ ॥

स महालिङ्गमोही स्याल्लिङ्गमोहविवर्जितः ।
पूर्वभक्तस्थलं त्यक्त्वा पूर्वकर्मादिभिर्यजेत् ॥ ७५ ॥

स महालिङ्गभक्तः स्यादन्यभक्तिविवर्जितः ।
त्यजेत्संसर्गमन्येषां सहवासादिकं त्यजेत् ॥ ७६ ॥

शुद्धसत्त्वाश्रयो यस्तु स महालिङ्गपूजकः ।
सृष्टिस्थितिलयाद्यं यज्जीववृत्तिं न च स्मरेत् ॥ ७७ ॥

स महालिङ्गवीरः स्यान्नान्यचित्तसमाश्रयः ।
पूर्ववासादिकं सर्वमन्तर्लिंगे निवेशयेत् ॥ ७८ ॥

महालिङ्गप्रसादी स्यात् पंक्तिभोजनवर्जितः ।
बाह्यार्चनाद्यं सन्त्यज्य भवेदान्तरपूजकः ॥ ७९ ॥

आत्मार्पणान्महालिङ्गप्राणी भवति पार्वति! ।
महालिङ्गस्थलेऽप्येवं मानसैरुपचारकैः ॥ ८० ॥

अर्चयेद्यस्तु मां नित्यं मत्सायुज्यमवाप्नुयात् ।
एवं लिङ्गस्थलं देवि! तदङ्गस्थलयोगतः ॥ ८१ ॥

एकैकं षड्विधं प्रोक्तं तेन षट्त्रिंशदात्मकम् ।
पूर्वपूजासमायोगादुत्तरोत्तरमाश्रयेत् ॥ ८२ ॥

तस्मादेकं परं लिंग नामरूपक्रियात्मना ।
संस्थितं ज्ञानकर्मभ्यामंगेऽस्मिन् षट्स्थलात्मके ॥ ८३ ॥

इष्टं लिंगं तु वाह्यांगे प्राणलिंगं तथान्तरे ।
आत्मनि स्याद्भावलिङ्गमेवं ज्ञेयं नगात्मजे ! ॥ ८४ ॥

जिह्वाग्रे च सदाचारं ज्योतिर्ह्निर्नासिकाग्रके ।
प्रसादलिंगं श्रोत्रांगे त्वगंगे चरलिङ्गकम् ॥ ८५ ॥

दृगंगे शिवलिंगं स्यान्महालिंगं हृदि स्थितम् ।
एवं कर्मेन्द्रियांगेषु लिंगयोगं विदुर्बुधाः ॥ ८६ ॥

आचारलिंगं यत्प्रोक्तं शिवलाञ्छनसंयुतम् ।
आचारलिंगसम्वन्धि गुरुलिंगमुदाहृतम् ॥ ८७ ॥

गुरुलिंगोपदिष्टं यच्छिवलिङ्गमुदाहृतम् ।
शिवलिङ्गमुखं यच्च चरलिङ्गमुदाहृतम् ॥ ८८ ॥

चरलिङ्गोपलब्धं च तत्प्रसादाङ्गमुच्यते ।
प्रसादानुग्राहकं स्यान्महालिंगमितिक्रमात् ॥ ८९ ॥

गुरुलिंगस्थलादीनां सम्वन्धं चोत्तरोत्तरम् ।
ज्ञात्वा लिंगांगयोरर्थं तत्सम्वन्धं च पार्वति ! ॥ ९० ॥

गुरूक्तेनैव मार्गेण जानीयात् सूक्ष्मभावतः ।
एवं लिंगांगसम्वन्धज्ञानं गोप्यं सुदुर्लभम् ॥ ९१ ॥

उपदिष्टं तव प्रीत्या मोक्षमार्गैकसाधनम् ।
वीरशैवपरो भूत्वा यजेन्मां लिंगरूपिणम् ॥ ९२ ॥

स एव सर्वतत्त्वज्ञो ज्ञेयस्सर्वोत्तमोत्तमः ।
क्रिमिकीटपतंगेभ्यः पशवः प्रज्ञयाधिकाः ॥ ९३ ॥

पशुभ्यो हि नराः श्रेष्ठास्तेषु श्रेष्ठा द्विजातयः ।
द्विजातिष्वधिका विप्रा विप्रेषु कृतबुद्धयः ॥ ९४ ॥

कृतबुद्धिषु कर्तारस्तेभ्यस्सन्न्यासिनोऽधिकाः ।
तेषु विज्ञानिनः श्रेष्ठास्तेषु शङ्करपूजकाः ॥ ९५ ॥

तेषु श्रेष्ठा महाभागा महालिंगांगसंगिनः ।
लिंगांगसंगिष्वधिकः षट्स्थलज्ञानवान्नरः ॥ ९६ ॥

तस्मादभ्यधिको नास्ति त्रिषु लोकेषु सर्वदा ।
एवं षट्स्थलभेदाश्च तत्स्वरूपं च कीर्त्तितम् ॥ ९७ ॥

पूर्वोक्तानादिभक्तस्य सत्यनिर्मलताजुषः ।
एतानि षट् स्थलान्येव त्वं जानीहि षडंगकम् ॥ ९८ ॥

इदमेवं परं ब्रूमो हितं तव विशेषतः ।
यज् ज्ञात्वा मुच्यते लोको जन्मसंसारवन्धनात् ॥ ९९ ॥

एतादृशं मनसि तत्त्वमनादिभक्तशब्देन कीर्तितमुपास्य च सर्वकालम् ।
आचन्द्रतारमवनीपतिसेविताङ्घ्रिपङ्केरुहो मम कुमार ! सुखी भव त्वम् ॥

यत्पादपङ्कजमतीव सुदुस्तरं तन्निर्धूय बोधमयदीपमपि प्रबोध्य ।
निर्वापितामितमहाहृदयान्धकारविद्यासुखार्णव गुरो ! शरणं मम स्याः ।
दैत्याप्सरस्सुरनरोरगतर्कवेदनानागमानुगपुराणमतादिभिश्च ।
यन्मृग्यते जगति तादृशतत्त्वदर्शिन् !
विद्यासुखार्णव ! गुरो ! शरणं मम स्याः ॥ १०२ ॥

पञ्चाध्वनामुपरि यास्ति कला तदूर्ध्वं विद्योतमानगगनामलशक्त्यतीते ।
योगप्रदातरि विनीतपरस्वरूपे विद्यासुखार्णव ! गुरो ! शरणं मम स्याः ॥

इति श्रीमदनाथनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानविन्दुकारण
चिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैत
विद्याविशारदश्रीमत्केलदिवसवराजेन्द्रविरचिते
वेदागमान्तर्गतविविधविद्यातन्त्रसारभूते
श्रीशिवतत्त्वरत्नाकरे नवमकल्लोले
षट्स्थलज्ञाननिरूपणं
नाम नवमस्तरङ्गः

शरीराख्योपनिषदं गर्भोपनिषदं तथा ।
पुराणानि कृतिं चैव शैवसिद्धान्तदीपिकाम् ॥

मीमांसान्यायकाणादयोगवेदान्तसाङ्ख्यगाः ।
बौद्धचार्वाकजैनीयाः कृतीश्चागमविस्तरम् ॥

आलोक्यायं सङ्गृहीतः कल्लोलो नवमोऽभवत् ।
तरङ्गैर्नवभिर्युक्ते ग्रन्थानां मितिरत्र तु ॥

पञ्चविंशत्यभ्यधिकशतोपेतसहस्रकम् ॥

श्रीमत्सद्गुणसोमशेखरलसच्चेन्नाम्बिकासूनुना
श्रीदीक्षागुरुचेन्नवीरकरसञ्जातेन विद्याब्धिना ।
गौरीभर्तृकृपास्पदेन बसवक्षोणीभृता निर्मिते
कल्लोलो नवमस्त्वयं कृतिवरे त्वस्मिन्नभूत् पूरितः ॥

श्रीवीरभद्रकरुणासमुपार्जितश्रीसाम्राज्यवैभवपराक्रमकीर्तिभाजा ।
सौराष्ट्रतौलवसकेरलमल्लराष्ट्रान्तर्गतदेशपरिपालनदक्षिणेन ॥

परयडवमुरारिकोटेकोलाहलेन प्रविचलितविशुद्धाद्वैतसिद्धान्तभूम्ना ।
असियुगलभृता चवैरिसप्तांगलक्ष्मीहरहरितपटोद्यत्केतनश्रीयुतेन ॥

चौडप्पनायकसमुन्मिषितान्ववायदुग्धाब्धिवृद्धिकरकैरववान्धवेन ।
एकांगवीररणरंगविहारधीरदोनेजपश्चिमसरेस्वदधीश्वरेण ॥

स्वाभीष्टदायिकेलदीस्थितवीरभद्रमुद्रावलेन परिपाल्यता धरित्रीम् ।
राजाधिराजकेलदीबसवक्षितीन्द्ररत्नेन संविरचितेति कृतिः प्रपूर्णा ॥

श्रीमत्युन्नतशालिवाहनशके चन्द्राग्निऋतुक्ष्मामिते
वर्षे विश्रुतसर्वधारिणि तथा मासे नभस्याह्वये ।
वारे निर्जरवैरिणामपि गुरोः श्रीपौर्णिमासीतिथौ
ग्रन्थोऽयं परिपूर्णतामवहत प्रख्यातसारार्थयुक् ॥

अनुत्तरगभीरिमा वहुतरङ्गकल्लोलवा-
नुदित्वरकलाश्रयो महितरत्नलक्षान्वितः ।
अयं जनितधीसुधः स शिवतत्त्वरत्नाकरः
क्षितौ विजयतां चिरं कृतिवरोऽखिलाश्चर्यकृत् ॥

शक्यस्तरीतुं न भवेत् परैर्य आदेयतामप्यखिलस्य दत्ते
स एष भूयश्शिवतत्त्वरत्नाकरस्सतां कौतुकमातनोतु ॥

दोषैरेष विवर्जितो घनगुणैरालिंगितस्सप्रभः
सद्वृत्तो वहुलार्थयुङ् नवलसत्कल्लोलरत्नान्वितः ।
ग्रन्थोऽयं मणिहारवत्तव शतेनाष्टोत्तरेणाधुना
गौरीनाथ ! भवेत्तरंगमणिभिर्विभ्राजितो भूषणम् ॥

एतच्छास्त्रं ये पठन्ति शृण्वन्ति विलिखन्ति वा ।
अयुरारोग्यवृद्धिश्च पुत्रपौत्रादिसम्पदः ॥

धनधान्यसमृद्धिश्च सौभाग्यमपि चाधिकम् ।
प्रतिक्षणं सम्भवन्ति तरंगा इव वारिधेः ॥

साम्राज्यादिसुखानीह समासाद्य ततः परम् ।
शिवलिंगैक्यसम्पत्त्या परानन्दं भजन्ति ते ॥

इति श्रीशिवतत्त्वरत्नाकरस्सम्पूर्णः

शुभं भूयात्

श्रीः



GENERAL INDEX.

- अक्षतारोपणम् 315
- अक्षपादः 421a
- अक्षरस्वीकरणकालः 313
- अक्षौहिणी 159
- अगदतन्त्रम् 251a
- अगस्त्यः 55, 425
- अग्निगणः 290
- अग्निलोकवर्णनम् 59
- अङ्कः 163, 311
- अङ्कुशाखानः 134
- अङ्गपञ्चकम् 128
- अङ्गभेदेन नाडीस्थितिः 253
- अङ्गरक्षकः 164
- अङ्गरागनिर्माणप्रकारः 221a
- अङ्गस्फुरणविचारः 132
- अङ्गाङ्गिभावसङ्करः 307
- अङ्गारक ग्रहरथादिवर्णनम् 57
- अङ्गारपोलिका 240
- अङ्गारेयः 332
- अङ्गिरस् 3
- अङ्गुलादि प्रमाणभेदः 22, 170
- अङ्गुलीयक भेदाः 227a
- अग्निकलाः 141
- अभिजारविधिः 267
- अग्न्यभिशापः 368a
- अण्डजाः 398
- अंशहारिणः 369a
- अच्युतरायः 106a
- अजपायोगः 360
- अजभूपशककालः 74a
- अजवीथी 55
- अजहल्लक्षणा 297
- अजितागमः 3a
- अजीर्णादिक्षयान्ता रोगाः 59
- अज्ञानासिद्धलक्षणम् 414
- अतललोकः 9a
- अतिकृच्छ्रस्वरूपम् 39a
- अतिथिसत्कारः 79
- अतिमात्रम् 304
- अतिवर्णाश्रमी 84a
- अत्रिः 3
- अत्रितीर्थम् 108a
- अथर्ववेदस्वरूपम् 5a
- अदृश्यकरणमन्त्रः 109, 112
- अदृष्टस्वरूपम् 411
- अद्भुतरसलक्षणम् 300
- अद्रवद्रव्यमानम् 262a
- अधमनायकलक्षणम् 301a
- अधराभिनयस्तद्भेदाः 178
- अधिकपदम् 303a, 304
- अधिकारिवर्गः 287a
- अधिकोपमा 304, 305
- अधीरा 302
- अनध्यायाः 77a
- अनभिवन्द्या अभिवन्द्याश्च के? 83
- अनादिभक्तलक्षणम् 8
- अनावृष्टियोगाः 48, 50
- अनाहतस्वरूपम् 9a, 402
- अनादिवीरशैवाचारसंग्रहः 21a
- अनिरुद्धः 419
- अनीकिनी 159
- अनुकूलनायकः 301
- अनुगाथिन्यः 174a
- अनुचितार्थः 303a
- अनुपलब्धिः 411
- अनुमानस्वरूपम् 411
- अनुवत्सरः 54, 73a
- अनैकान्तिकस्वरूपम् 414
- अन्तःपुरपरिचारकाः 164
- अन्तरज्यैष्ठिकः 379
- अन्तर्मुद्रा 360a
- अन्नदोषाः 236
- अन्नपरीक्षाप्रकारः 245a
- अन्नपाचनक्रमः 236
- अन्नप्राशनम् 312, 313
- अन्नभोगः 235
- अन्वयव्यतिरेकिलक्षणम् 413
- अपक्रमः 304
- अपदस्थसमासदोषः 304
- अपराह्णस्वरूपम् 54
- अपविद्धः 369a
- अपाकजगुणाः 412
- अपानः 359a
- अप्रजस्त्रीधनव्यवहारः 370
- अप्रतीतदोषः 303a
- अप्रमालक्षणम् 412a
- अप्रयुक्तदोषः } अप्रसिद्धोपमा } 303a
- अप्सरोगणः 52
- अभक्ष्यद्रव्याणि 82
- अभक्ष्यभक्षणप्रायश्चित्तम् 88a
- अभिनयाध्यायः 175-184
- अभिनववीराम्बापुरम् 219a
- अभिनिष्क्रमणकालः 312. 313
- अभियोगवर्णनम् 366
- अभिवादनप्रकारः 83
- अभिशापः 368a
- अभिसारिकालक्षणम् 302
- अभ्यङ्गकालः } नैलादिकं च } 220a

अभ्रकवैकान्तम् 265a
अमनस्कयोगः 360a
अमरवारुणी 361
अमरावती 32a
अमरी 109a
अमात्यादिलक्षणम् 287
अमित्रबलम् 126a
अमृतजीवितम् 79
अमृतलता 237
अयस्कान्तः 425a
अरीतिदोषः 304
अरुन्धती 110, 359
अर्कः 337
अर्जुनः 173
अर्थदण्डः 370
अर्थदोषाः 304
अर्थभेदाः 297a
अर्थवादः 5a
अर्थशास्त्रम् 6, 366
अर्थापत्तिः 41
अर्थालङ्काराः 305-307
अर्धगुच्छः 227
अर्धचन्द्रकः 375a
अर्धचन्द्रव्यूहः 159
अर्धनारीश्वर रसः 262
अर्धसमवृत्तम् 296a
अर्धासनम् 358a
अलङ्कारभेदाः 187, 305-308
अलम्बुसा 253, 359a
अलर्कविषहरमन्त्रः 283a
अवन्ती 331a
अवन्तिकामिनी 212a
अवमर्शसंधिः 308
अवयवः 413
अवाचकदोषः 303a
अविद्यापञ्चकम् 20
अविमृष्टविधेयांशः 303a
अव्यवस्थितलक्षणम् 193a
अशुद्धद्रव्यशुद्धिः 83a
अश्लीलदोषः 303, 304
अश्वः 164a
अश्वजातिभेदाः 337
अश्वतरः 339
अश्वदोषाः 341
अश्वमेधदत्तः 90
अश्वमेधार्हतुरगः 341
अश्वरथगोलक्षणम् } 348 to
तच्चिकित्साप्रकाराश्च } 353
अश्वव्यूहः 158a
अश्वशास्त्रम् 338—345
अश्वस्य सर्वदेवमयत्वम् 350, 351
अश्वनामावर्तादिफलम् 341, 351
अश्विनीमतम् 285
अश्वोत्पत्तिकथादिः 338, 351
अष्टत्रिंशत्कलाः 16
अष्टदिक्पालपुर्यादिवर्णनम् 32a, 52
अष्टदिक्स्थरुद्रगणाः 66, 67
अष्टदिग्गजाः 30
अष्टभैरवाः 61
अष्टमूर्त्तिः 39a
अष्टषष्टिपुण्यक्षेत्राणि 72
,, वनौषध्यः 268
अष्टाङ्गयोगः 358
अष्टादशपुराणानि 3a, 6a
,, योगपीठाः 72
अष्टाविंशत्कोटिनरकाः 24
अष्टौ नागाः 227
,, विग्रहाः 144
,, विवाहाः 78
,, स्थायिभावदृष्टयः 175
असम्प्रज्ञातसमाधिः 36a
असिद्धम् 414
अस्त्रपरीक्षा 314
अस्थानसमासदोषः 303a
अस्वरो गायकः 193a
अहोरात्रप्रमाणम् 54
आकाशलक्षणम् 412
आकाशसिद्धिः 64
आख्यायिका 296
आगमः 3a, 6a, 44
आग्नेयपुराणम् 3a
आग्नेयस्नानम् 386a
आग्नेयसिद्धिः 64
आचमनविधिः 81a
आचारपञ्चकम् 9
आचारलक्षणम् 9
आचारलिङ्गस्थलादिः 430, 433
आचार्यलक्षणम् 313a
आचार्यः 374
आचार्यादिवधप्रायश्चित्तम् 86
आज्ञाचक्रम् 402a
आज्यभेदाः 244
आटविकबलम् 126a
आढकीयूषादिः 239a
आत्मलक्षणम् 412
आत्मायत्तो राजा 128
आदिभक्तः 8
आदिभरतः 285
आधमर्णिकः 367
आधारपञ्चकम् 402
आधिः 367
आधोरणः 338
आनद्धम् 200a
आनाहः 170
आन्दोलनोत्सवः 312a
आन्ध्रस्त्रीलक्षणम् 212
आपस्तम्बः 3
आप्यसिद्धिः 63
आभीरः 345
आभीरीलक्षणम् 212
आम्रः 241a
आयाः 316
आयुधप्राशस्त्यम् 127a
आयुर्वेदः 251, 6, 63

आरद्वः 345
आरभटी 303
आरामुख: 375a
आरुणेश: 4
आर्द्रकम् 237
आर्यावर्त: 71
आर्हतक: 711
आर्हतशास्त्रम् 417
आलवट्टः 425
आलम्बनविभावाः 298. 299
आलिङ्गनक्रम: 214, 215
आवरणाष्टकम् 9
आवर्तक: 187a
आवहवायु: 45a
आश्रयासिद्ध: 413a
आसनभेदाः 146, 147, 358
आसन्नभृत्यलक्षणम् 287a
आवन्तिका 302a
आसन्नलेखक: 163a
इक्केरी 142. 165, 219, 284
इक्षुसमुद्र: 32a
इच्छालक्षणम् 412a
इडा 253, 359
इड्डलिकापाक: 240
इतिहास: 311
इदावत्सर: 54, 73a
इन्द्रछन्द: 227
इन्द्रजालप्रदर्शनम् 283, 295
इन्द्रनील: 61
इन्द्रनीलोत्पत्तिगुणदोषपरीक्षादि: 232
इन्द्रप्रस्थ: 134
इन्द्रलोकवर्णनम् 58
इन्द्रसिद्धि: 64
इन्द्रवास: 35
इम्मडिसदाशिवनायक: 124
इलावृतवर्णनम् 37
ईशानलोकवर्णनम् 61
ईश्वरत्रयम् 20
ईश्वरस्वरूपवर्णनम् 415
ईश्वरी 359
ईहामृग: 311
उच्चाटनतन्त्रम् 51, 23
उच्चैःश्रवा: 58
उज्जयिनी 1
उडुपी 373a
उड्डामरेश्वरतन्त्रम् 164a
उत्तमनायक: 301a
उत्तमर्ण: 367
उत्तमाश्वलक्षणम् 340a
उत्तरकुरुवर्णनम् 38
उत्तरदेशीयतोलनम् 76a
उत्तरमार्ग: 55
उत्तरा 173
उत्तरायणम् 53
उत्थानिन: 381
उत्पलपरिमल: 285
उत्पातभेदाः तच्छान्तिश्च 102, 103
उत्साहशक्ति: 128
उत्सेध: 170
उदान: 395a
उद्दीपनविभावाः 298, 299
उद्धत: 308
उद्भिद: 398
उद्वत्सर: 54, 73a
उन्मानम् 179
उन्मनी 360a
उपचाराः 429
उपचारफलम्, भेदश्च 392, 393
उपकारसन्धि: 144
उपदंशप्रकाराः 244, 245
उपनयनकाल: 76, 77, 314
उपनिषद: 2a
उपपुराणानि 3a
उपमानम् 170. 411, 413
उपरसाः 265
उपरागा: 57, 187
उपलोल: 187a
उपवननिर्माणादि: 200—205
उपवेदा: 6
उपवेशनकाल: 313
उपसंहरणसन्धि: 308
उपस्मृतय: तत्कर्तारश्च 3
उपहारसन्धि: 144
उपाङ्गानि 3, 6a
उपाधि: 148, 413
उपावृत्त 345
उभयलक्षणा 297a
उभयायत्त: 128
उलूखलादिलक्षणम् 235a
उल्लासितम् 178a
उशना: 3
उष्ट्रग्रीव: 193a
ऊर्ध्वनाडी 253
ऊर्ध्वपातनम् 270a
ऊर्ध्वलोकवर्णनम् 45
ऊर्ध्वविधिन: 376a
ऊर्वभिनय: 182
ऊर्वश्याद्यप्सरोगण: 52, 58
ऋक्षगिरिसम्भवानद्य: 71
ऋग्वेदस्वरूपवर्णनम् 5
ऋणिनि प्रेते पुत्रादि: प्रतिभू: 367
ऋतजीवितम् 79
ऋतुभेदेन पानीय भेदाः 247
,, भोजनभेदाः 246
,, शय्याभेदाः 250
ऋषभस्वर: 188
ऋषभतीर्थम् 108a
ऋषिचान्द्रायणम् 89a
ऋषिमण्डलवर्णनम् 57--58
ऋष्यंशसम्भूतस्त्री लक्षणम् 212
एकराम: 1
एकवाक्यानुप्रवेशसङ्कर: 307
एकशाललक्षणम् 167a

एकादश रुद्राः 19
,, मध्यानि 86a
एकादिपरार्धान्तसङ्ख्या 163
एकार्थदोष: 304
एतद्ग्रन्थनिर्माणकाल: 434
ऐन्द्रजालिकमन्त्राः 289—295
ऐन्द्रियिकसर्गः 22a
ऐरावतः 58, 331
औडवगीति: 138a
औदुम्बरः 79a
औरसस्तनय: 369a
औषधसिद्धिः 109
ककुभा 191
कक्षः 160
कङ्कणवन्धनम् 315
कंकुष्ठः 266
कङ्गु: 241
कच्छलः 383
कटकः 227a
कट्यभिनयः 182
कठवल्ली 422
कणादः 411
कण्टकासुरः 96
कदा के रागाः गातव्याः 193
कनकपावगुणाः 235
कनिष्ठा 302
कन्दसारः 256a
कन्यका 301
कपिलः 193, 215
कपिलधारातीर्थम् 357
कमण्डलुतीर्थम् 108a
कमलव्यूहः 159
कम्पः 188
कम्पकः 193a
कम्पमानः 170
कम्भावती 190a
करडा 200a
करादानक्रमः 125, 126
कराली 193
करिणीलक्षणम् 337—338
करुणरसस्वरूपम् 299a
करूशः 332
कर्कटः 238a
कर्णभूषणम् 227
कर्णवेधनकालः 312a
कर्णाटमही 95
कर्णाटः 174, 191
कर्णाटदेशवर्णनम् 113, 114
कर्णाटस्त्रीलक्षणम् 212
कर्णिका 375
कर्मदः 36a
कर्मलक्षणम् 411a 412
कर्मसीमांसा 6a
कर्मेन्द्रियपञ्चकम् 401, 406
कर्षोपकरणानि 76a
कलहान्तरिता 302
कलाः 7, 54, 94
कलान्यासः 141
कलापञ्चकम् 9, 20
कलाभिव्यञ्जकव्यापाराः 210
कलास्थानानि 210
कलिङ्गः 332
कलिधर्माः 99—101
कलियुगप्रमाणम् 74
कलुबुरगी 121
कलौ शकाधिपाः 74
कल्पः 6, 74
कल्पप्रमाणम् 74
कल्याणपुरी (Kalyan) 121
कल्याणपञ्चकः 341
कल्याणपण्डितः 425a
कल्युत्पाताः 102—104
कविभेदाः 297
कश्यपः 73, 331
कषायाः 257
कस्मिन्युगे के के धर्मा अनुष्ठेयाः 75
,, केषां पावनत्वम् 75
काकतुण्डी 375 376a
काकपदवन्धः 305
काकरुतादिफलम 131a
काकिनीप्रमाणम् 76a
काकी 193a
काः कानद्यः कस्मात्पर्वतात्समुद्भूताः 71
काचकन्थः 425a
काणादशास्त्रम् 421
कात्यायनः 3
कानि रत्नानि कदा धार्याणि 234
कानीनः 369a
कापालिकः 411
कापिलशास्त्रम् 421
काप्याश्वतीर्थम् 108a
कामदहनासनम् 358a
कामधेनुः 58
कामन्दकीयम् 164a
कामरूपस्त्रीलक्षणम् 212a
कामशास्त्रम् 209—218
कामसचिवाः 301a
काम्पिल्लः 345
काम्बोजः 1
काम्बोजः (जी) 127a, 191a
काम्भोजिकालक्षणम् 212a
कायकृच्छ्रम् 88
कायतन्त्रम् 251a
कारणागमः 3a
कारूशकः 331a
कार्तवीर्यशकप्रमाणम् 74a
कालज्ञानम् 110, 59
कालप्रभेदवर्णनम् 73
कालमुखः 411
कालवञ्चनं, मन्त्रः 109—110
कालाश्वः 340a
कालिङ्गः 331
कालीपुराणम् 3a
कावेरी 138

काव्यकारणत्रयम् 297
काव्यदोषाः 303a
काव्यलक्षणम् 296
काशी 108, 124, 136, 356, 357
काश्मीरमण्डलम् 134
काश्मीरस्त्रीलक्षणम् 212
काश्यपीयम् 4a
काष्ठच्छेदी 377
काष्ठासनम् 358a, 84
कांस्यगुणाः 235
काहलवाद्यम् 200
किणः 339
किन्नरांशसंभवालक्षणम् 212
किम्पुरुषवर्षः 37
किराताः 105
किलिकिञ्चितम् 302
किंषष्ठः 339
कुक्कुटजातिभेदा. तत्संरक्षणं, विनोदश्च 382
कुक्कुटरुतादिफलम् 132
कुक्कुटासनम् 358
कुञ्जरासनम् 358
कुञ्जाभः 341
कुटजाद्रिवर्णनम् 108, 112
कुटिलाङ्गी 359
कुटीचकः 80
कुटुम्बपोषणार्थऋणप्रदानम् 367
कुट्टकारः 194
कुट्टमितम् 302
कुडुक्का 200
कुडुवः 86a
कुण्डलिनीस्वरूपम् 7, 359, 402
कुन्तयुद्धम् 374
कुन्तलक्षणम् 378
कुन्तलकामिनी 287
कुबेरलोकवर्णनम् 61
कुबेराक्षी 237
कुमाराध्यक्षः 161
कुमारिकाखण्डः 67, 440
कुम्भवेसे 218
कुम्भकलक्षणम् 359
कुम्भसम्भवः 113
कुम्भी 237, 238
कुरुक्षेत्रम् 134, 332
कुरुलः 185
कुरुविन्दोत्पत्त्यादिः 231
कुलपर्वताः 10, 71
कुलत्थाः 239a
कुशद्वीपः वर्णनं च 32, 41
कुशावती 124
कुस्तुम्बरी 237
कुष्ठः 253, 359
कूटसाक्षिदण्डः 368
कूचिमारः 210
कूडलिक्षेत्रम् 97
कूपलक्षणादिः 120, 205
कूर्पासकन्थः 425
कूर्मासनम् 358
कृच्छ्रातिकृच्छ्रलक्षणम् 89
कृतयुगप्रमाणम् 73a, 74
कृतादियुगव्यवस्था 369
कृमिकीटादीनामायुःपरिमितिः 75
कृष्णमुण्डी 109a
कृष्णरायः 106a
केके मेत्राः कदा दर्शन्ति 48, 49
कृष्णलः 87
केतारराग: 191
केदारः 356
केदारेशः 134
केन्द्रम् 316
केरलम् 356, 434
केरलाधिपः 122
केलदी 2, 113, 136, 142, 357
केलदी चौडप्पनायकः 118
केशिन् 425
केष्वङ्गेषु चिकित्सा कर्तव्या 251
केसराचलाः 34, 35
कैलासः 37, 61, 95
कैलासकः 139
कैशिकः 376
कोटाचक्रलक्षणम् 353—356
कोटीश्वरः 373a
कोटे कोलाहलः 121a
कोणपालकाः 46
कोदण्डलक्षणम् 374a
कोशसंग्रहक्रमः 126
कोसलाः 331
कोसलकामिनीलक्षणम् 212
कोहलकः 285
कौरवदुर्गम् 134, 219
कौर्मम् 44, 67
क्रतुः 3
क्रथकः 345
क्रमः 296
क्रमभ्रष्टः 304
क्रियागुप्तः 305
क्रियापरः 194a
क्रियापादः 6, 420a
क्रीतस्तनयः 369a
क्रूर (ग्रहाः) 167, 316 354
क्रोशः 22
क्रौञ्चद्वीपवर्णनम् 32, 42
क्रौञ्चासनम् 358
क्लिष्टम् 303a
क्षत्रियधर्माः 76
क्षयः 167a
क्षारार्णवः 32
क्षीरपाकः 240
क्षुतफलानि 130
क्षुद्रघण्टा 200
क्षुरप्रस्वरूपम् 375
क्षेत्रजस्सुतः 369a
क्षेत्रव्यवहारः 370
क्षेमकः 90
क्षौरकालः 82

खड्गयुद्धम् 374
खड्गलक्षणादिः 134, 135
खड्गासनम् 358a
खण्डिता 302
खनिशास्त्रम् 285
खरशकुनम् 130a
खर्परी 266
खर्वडलक्षणम् 165
खापडीकः 383
खेचरीमुद्रा 363
खेचरीयोगः 360, 361
खेटकलक्षणम् 165
खण्डीस्थानम् 356
खरजातिभेदः 339
खल्वप्रमाणादिः 274
गङ्गा (म्वा) 98, 134
गजजातिभेदाः आयुःप्रमाणं च 332—335a
गजजिह्वानाडी 253
गजपूजनकालः 338
गजमदोद्भवस्थलानि 335
गजशास्त्रम् 331—338
गजव्यूहः 158
गडाधिपः 354
गणः 159, 296
गणकः 163
गणिका 301
गणितशास्त्रम् 163
गण्डाभिनयः 177a
गदायुद्धम् 374
गदालक्षणम् 378a
गद्यलक्षणम् 296
गद्याणकः 76a
गन्धमादनः 34, 61
गन्धयुक्तिनिरूपणम् 223—235
गन्धर्वगणः 50
गन्धर्वसिद्धिः 64
गन्धवती 32a
गन्धशालिः 241
गन्धहस्तिलक्षणम् 335
गन्धाश्वलक्षणम् 339
गन्धोपभोगः 221
गमकलक्षणम् 188
गरुडक्रमः 376
गरुडलोकः 35
गरुडासनम् 358
गर्गः 345
गर्भगेहः 167
गर्भसन्धिः 308
गर्भस्थजीवविचारः 400 401
गर्भाधाने लग्नादिः 399a
गर्भिणीलक्षणम् 312; 400
गर्भिणीत्याज्यकर्माणि 400
गर्भोत्पत्तिक्रमः 399
गाजनूरु 218a
गाथा 296a
गान्धारः 188, 345
गान्धारस्त्रीलक्षणम् 212a
गान्धारिका 359a
गान्धारी 253
गान्धर्ववेदः 6
गायकलक्षणम् तद्भेदाः 193
गायत्रीजपविधिः 82
गारुडतन्त्रम् 420
गिरिदुर्गम् 126a 356
गिरिसिन्दूरलक्षणादिः 266a
गीतरत्नाकरः 285
गीतस्वरूपम् 184
गुञ्जामाषनिष्कादिः 76
गुणलक्षणम् 411a 412
गुणीभूतव्यङ्ग्यम् 305
गुण्डक्रियारागः 191
गुत्ति 121
गुरुकुलवासः 314
गुरुतल्पगमनप्रायश्चित्तम् 87
गुरुत्वलक्षणम् 412a
गुरुदक्षिणा 314
गुरुपदस्वामी 1
गुरुमतम् 164
गुरुलिङ्गस्थलादिः 430—432
गुरुभार्गवमतम् 128a
गुरुषु गृहमेधिनः श्रेष्ठाः 423
गुर्जरीलक्षणम् 192a, 212
गुल्मगणः 159, 202
गुल्मव्यूहः 159
गुह्यस्थम् 356a
गुह्यकलोकवर्णनम् 51—53
गूढजः 369a
गूर्जरः 173a
गृहनिर्माणविषयः 166, 167
गृहस्थधर्माः, तद्भेदः 78, 76
गृहस्थादीनां शौचविधिः 81
गृहस्थोपभोगाः 220
गेरज्ञः 383
गेरसवे (Gerusoppa) 161
गैरिकादिः 266a
गोकर्णक्षेत्रम् 356
गोचिकित्सा 352, 353
गोणी (शाकवर्गः) 239
गोदावरी 138
गोधूमाः 240
गोपतिलक्षणम् 351a
गोपुच्छम् 375
गोविलः 3
गोमती 138
गोमुखासनम् 358
गोमूत्रिकाबन्धः 305
गोमेदोत्पत्तिपरीक्षादिः 233
गोलकः 12, 170, 174
गोलक्षणम् 352
गोवापुराधीशः 129
गौडकामिनीलक्षणम् 212, 331
गौडी 86, 190, 302
गौणकापुत्रः 285
गौणार्थः 297

गौतमः 3
गौरीपाषाणम् 266a
गौरीमतम् 285
गौलीशकुनम् 130a
ग्रन्थकर्तुर्वंशानुक्रमणिका 434
ग्रहगणः तल्लोकाश्च 46, 47
ग्रहगतिनिरूपणम् 57
ग्रहणनिर्णयः 57
ग्रहतन्त्रम् 251
ग्रहदशाभुक्तिफलम् 316—319
ग्रहदृष्टिः 364
ग्रहाविष्टाः 47
ग्रामः 165, 184
ग्रामादीनां परिणाहः 165
ग्राम्यदोषः 303
घण्टा 200
घण्टासिद्धः 425
घनवाद्यम् 200
घूकरुतादिफलम् 132
घूर्जरी 287
घृतादीनां शुद्धिः 83a
घृतान्नपाकः 244
चक्रतीर्थम् 108
चक्रनगरम् 105
चक्रयुद्धम् 374
चक्रलक्षणं—भेदाश्च 378
चक्रवर्तशाकः 238, 239
चक्रवाटी 32a
चक्रव्यूहः 159
चणकाः 236
चण्डपाणिः 90
चतुःपञ्चाशद्देशजाश्वाः 345—351
चतुरुपायाः 148—150
चतुर्दशभुवनानि 402
चतुर्भद्रः 166
चतुर्विधनायकाः 301
चतुर्विधवलम् 126—127
चतुर्विधभूलक्षणम् 138
चतुर्वेदाः 9
चतुष्ककः 166
चतुष्पाद्व्यवहारः 365
चतुष्षष्टिकलाः 7
चतुष्षष्टियोगिनीगणः 62
चन्द्रकलाः 56, 141
चन्द्रकान्तः 233
चन्द्रदर्शनकालः 312
चन्द्रप्रभाहृदः 33
चन्द्रभागा 138
चन्द्रमौलीशः 105
चन्द्रलोकवर्णनम् 56
चन्द्रवंशः 73
चन्द्रापीडः 51
चमूः 159
चम्पकसरः 219
चरलक्षणम् ७
चरलिङ्गस्थलादिः 430—432
चर्यापादः 6, 421
चातुर्वर्ण्यधर्माः 76
चान्द्रमानम् 73
चान्द्रायणम् 87, 89
चापप्रमाणम् 22
चापलक्षणं तद्दोषाः 374, 375
चारणाः 51
चारिभेदाः 183
चार्वाकादिमतानि 422
चालिनीतन्त्रम् 235
चिक्कः 425
चिक्कसङ्कणणनायकः 121, 124, 161, 219
चिच्छक्तिः 10
चित्रकाव्यम् (बन्धः) 395
चित्ररथः 90, 173
चित्रलेखनाध्यायः 168—172
चित्रवीर्यशकप्रमाणम् 74
चित्रवेधिलक्षणम् 378
चित्रिणीलक्षणम् 209
चित्रेऽङ्गादीनां प्रमाणम् 169
„ मूर्तिप्रमाणम् 170
चिदम्बरम् 9, 10
चिन्मयदीक्षा 422
चुम्बनक्रमः 215
चुल्लीलक्षणादिः 235
चूडाकर्मकालः 313a
चेटलक्षणम् 301
चेदिदेशः 331
चेन्नवीरः 1, 21, 44, 67, 164, 434
चेन्नमाम्बा 1, 21, 44, 67, 164, 385, 434
चेन्नाम्बाकृतराजनीत्युपदेशः 396, 397
चेन्नाम्बाचरितम् 394
चेन्नाम्बापुरम् 395
चेन्नाम्बाराज्यभारक्रमः 394, 395
चोराश्वलक्षणम् 341
चौडप्पनायकः 114, 434
चौडपचरितवर्णनम् 114—119
च्युतसंस्कृति 303
छन्दश्शास्त्रम् 6, 296a
छर्दिनीगणः 256
छललक्षणम् 413
छागभेदाः 384
छुरिकायुद्धम् 374
छेकानुप्रासः 305
जगज्झम्पा 356a
जगन्नाथेश्वरः 357
जङ्गमसृष्टिक्रमः 10a
जङ्घाभिनयः 182
जठराभिनयः 181
जनपदनामानि 69, 70
जनमेजयः 73, 90
जनलोकः 9, 45, 62
जन्मादेर्दुःखमयत्ववर्णनम् 403
जपः 167
जपयोग्यस्थलमालालक्षणादिः 389
जपसङ्ख्यानियमः 390

जपे आसनभेदास्तत्फलम् 391
जम्बीरफलम् 239, 241
जम्बुकेश्वरः 357
जम्बूद्वीपवर्णनम् 32
जम्बूनदीवर्णनम् 34
जम्बूरु 129
जया 95
जरायुजाः 398
जलदुर्गम् 126a
जलनाडीपरीक्षा 201—204
जलपानक्रमः 247
जललक्षणम् 412
जलस्नानम् 386
जलाभिशापः 369
जलूकाविषवैद्यम् 283
जल्पः 413
जहदजहल्लक्षणा 297a
जह्नुतनया 138
जाठराग्निप्रमाणम् 252a
जातकर्मकालादिः 312
जातिस्तत्प्रभेदाः 188
जातिलक्षणम् 412a
जात्यादिकाङ्गगायकलक्षणम् 194
जान्वभिनयः 183
जाबालोपनिषद् 397
जाम्ब्वाश्वः 341
जारदण्डः 372
जालिहाळु 124
जीरकाः 239
जीवनभेदाः 79
जीविकानिर्णयः 313
जिह्वास्तम्भनम् 122a, 123
जीत्रीमल्लरु 129a
जैनमतनिरूपणम् 418
जैमिनिः 411a
जैमिनीयम् 421
ज्ञानपादः 6a
ज्ञानयोगः 361
ज्ञानरहस्योपदेशः 403—406
ज्ञानशक्तिः 10a
ज्येष्ठा 302
जलभूमिपरीक्षा 201—205
जातूकर्ण्यः 3
जाबालिः 3
ज्यैष्ठिकः 379
ज्योतिर्भिदिगुरुः 425
ज्यौतिषिकः 163
ज्यौतिषार्णवः 164a
ज्वरभेदास्तल्लक्षणानि 205
झल्लरी 200a
टक्कारागः 192
टङ्कणम् 381
डमरुकलक्षणम् 200a
डिमः 311
डिण्डी (ढक्कः) 134, 135
डोलायन्त्रम् 271
ढक्का 200a
तक्रगुणादिः 245
तटाकः 120
तण्डुः 173
ततवाद्यम् 200
तन्त्रनामानि 4
तन्त्राष्टकम् 9
तपोलोकस्तद्वर्णनं च 9, 45, 62
तप्तकृच्छ्रम् 87
तरुचिकित्सा 205—209
तलातललोकः 9a
ताण्डवम् 173, 308
तानम् 184a
तामससृष्टिः 22
ताम्बूलगुणाः 248, 249
ताम्बूलचर्वणविधिः 82a, 249
ताम्रचूडविनोदः 382
ताम्रपात्रगुणाः 235
तारकब्रह्मयोगः 361, 362
तारकासङ्ख्या 45a
ताराकान्तः 233
तालकभेदाः 266
ताललक्षणम् 170
तालवादनं प्रस्तारादिः 197—200
तालादिवाद्यस्वरूपनिरूपणम् 195—200
तिग्मः 90
तिङन्तम् 295a
तिथिभेदेन चन्द्रकलापालकम्: 56a
तिरिपुः 188a
तिर्यक्सृष्टिः 22a
तिलपत्रम् 237
तीर्थराजपुरम् 373
तीर्थलक्षणम् 9
तुङ्गभद्रा 106, 113, 138, 218a, 356a
तुरगाणां लक्षणजातिभेदादिः 127, 238—251
तुम्बुरुः 51
तुलापुरुषदानम् 373a
तुलाभारः (मानं) 76
तुलाभिशापः 368a
तेगुः 382
तेजोलक्षणम् 412
तेजोवती 32
तैलादीनां शुद्धिः 84
तोडीरागस्वरूपम् 190
तौलवदेशः 122, 434
त्याज्यदोषाः 83
त्रयस्त्रिंशद्भावाः 298
त्रयोदशमहीपालाः 106
त्रसरेणुः 22, 87
त्रिकूटाद्रिः 331
त्रिदोषप्रकोपादिः 254
त्रिपथगा 38
त्रिपदासनम् 353
त्रिपुण्ड्रधारणम् 84a, 387
त्रिपुरी 331
त्रिपलानि 257

त्रिमूर्तिलोकवर्णनम् 35
त्रियम्वकः 356
त्रिलिङ्गदेशः 345
त्रिविधकाव्यम् 296
त्रिविष्टपम् 139
त्रिंशत्तत्त्वानि 406
त्रिस्कन्धवैद्यम् 252
त्रेतायुगप्रमाणं शकभूपाः 74
त्रैगर्तदेशः 434
त्रैलोक्यचिन्तामणिः 261
त्र्यम्बकः 357
त्वक्सारः 257
दक्षिणतन्त्रम् 420
दक्षिणनायकः 301
दक्षिणलोकः 55
दक्षिणायनम् 53
दण्डनीतिः 158—161, 167
दण्डकः 296
दण्डधरः 163
दण्डयात्रा 144, 145
दण्डोपायभेदाः 148, 149
दत्तकः 369
दत्तात्रेयोपनिषत् 421
दत्तिलः 285
दधिभेदाः 243
दधिसमुद्रः 32
दधीचिः 106
दन्तकाष्ठलक्षणम् 247
दम्पत्योः प्रीत्युत्कर्षोपायाः 213
दर्दुरः 61
दर्दुरक्रमः 376
दर्वीलक्षणादिः 235
दशानीकिनी 159
दशालक्षणम् 299
दर्शकः 381
दशरथशककालः 74
दशविधनादः 358
दशविधपुत्राः 369a
दशविधसन्न्यासिनः 79
,, सुवर्णम् 162
दशार्णदेशः 331, 332
दष्टस्य द्रव्याद्यगदाः 280, 281
दंशकालभेदेन विषारोहणादिनिर्णयः 274
दंशभेदाः 278
दानिवास 218
दानोपायस्तद्भेदाः 148
दाम 76
दायविभागविषयः 369
दारुकः 425
दारुदुर्गम् 126, 356
दिग्गणः 296
दिग्लक्षणम् 412
दिनरात्रिप्रमाणे ह्रासदैर्घ्यादिविमित्तम् 53a
दिलीपशकप्रमाणम् 74
दिव्यशुद्धिः 368a
दिव्यमानम् 386
दिव्यौषधेरानयनप्रकारः 284
दीक्षाक्रमः भेदाश्च 7, 426—429
दीक्षानिर्वचनम् 422, 430
दीक्षाप्रदाने गुरुतारतम्यं तल्लक्षणं च 423
दीक्षामण्टपलक्षणं ऋत्विजश्च 426
दीक्षास्वीकारकालः 425, 426
दीपकरागः तत्स्वरूपम् 191
दीपलक्षणं, तद्गुणाः 251
दीर्घिकालक्षणम् 120
दुःखलक्षणम् 412
दुर्गभेदाः, लक्षणं च 126, 353
दुर्दमनः 90
दुर्मुखः 167
दुष्टा गावः 353
दुस्स्वप्नफलम् 115, 116
दुष्टस्यान्नस्य शुद्धिः 84
दुष्यन्तशकप्रमाणम् 74
दूतलक्षणम् 164
दूतचेष्टया दष्टस्यावस्थानिर्णयः 280
दूतीलक्षणम् 214
दृढवेधिलक्षणम् 377
दंशरेखया सर्पपरिज्ञानम् 278, 279
दृष्टान्तः 413
देवगन्धर्वाः 51
देवच्छन्दः 227
देवदत्तवायुः 359
देवप्रतिष्ठाकालादिः 136—142
देवयानम् 55
देवरायः 106a
देवशैलः 331
देवसर्गः 22
देवालयनिर्माणादिः 137—140
देशकारी 192
देशाक्षी 191
देशी 191a
दैवमानम् 73
दोड्डसङ्कण्णनायकः 121, 124, 129, 161
दोहदचिह्नानि 400
दोहदशास्त्रम् 206—209
दोहस्यावश्यं सम्पादनीयता 400
दौवारिकः 286
द्रमिडदेशः 174, 331
द्रवद्रव्यमानम् 262a
द्रविडकामिनीलक्षणम् 212, 287
द्रव्यलक्षणं, भेदाः 411, 412
द्रव्यगुणाः 258, 259
द्रव्यगुणमहारसादयः 263
द्रव्यपरिमाणम् 76
द्राक्षापाकः 303
द्रुतमेरुः 198
द्रुमगणः 201
द्रोणलक्षणम् 165
द्रोणाचार्यः 344, 397
द्रौणिः 382
द्वात्रिंशन्नरकाः 22a
द्वात्रिंशन्मूर्तिभेदाः 142
द्वादश कलाः 55
द्वादश भावास्तत्फलानि 316—319

द्वादशविधपूजा 429
द्वापरप्रमाणं, तत्र शकभूपाश्च 74
द्वारावती 331
द्विपञ्चाशन्मूर्तिभेदाः 18, 19
द्विमल्लकः 375
द्वीपाः 40
द्वेषलक्षणम् 412
द्वैधीभावः 146—147
धटकः 76
धनश्रीः 192
धनञ्जयवायुः 359
धन्यकः 167
धन्वन्तरिमतम् 285
धर्मदेशः 71
धर्मशास्त्रम् 6
धनुर्धरः 377
धनुर्युद्धम् 371
धनुर्लक्षणं, अभ्यासकालादिः 374
धनुर्वेदः, गुरुपरम्परा 6, 374—378
धनुस्तोलनक्रमः 376
धन्विभेदाः 377
धान्यभेदाः 236
धान्यकम् 237
धान्यमानसाधनानि 76
धारणा 360
धारणार्हलिङ्गलक्षणम् 424
धार्तराष्ट्रः 284
धीरललितः, धीरशान्तश्च 301
धीरा, धीरेतरा 302
धीरासनम् 358
धीरोदात्तः, धीरोद्धतश्च 301
धूपपिण्डनिर्माणप्रकारः 250
धूपोपभोगः 221, 250
धृष्टनायकः 301
धैवतस्वरः 188
ध्यानम् 360
ध्रुवः 45, 53, 58, 110, 167
ध्वनिभेदाः 194, 305
नक्षत्रमण्डलवर्णनम् 57
नक्षत्रमाला 227
नगरनिर्माणक्रमः 165—167
नञ्जुण्डेश्वरः 357
नटनम् 173
नद्युत्पत्तिस्थानानि 40
नन्दः 167
नन्दीश्वरप्रादुर्भावादिः 91, 93, 285
नन्द्यावर्तः 166
नरकप्रभेदाः 23
नरकयातनावर्णनम् 24—27
नरदुर्गम् 126, 356
नरपतिसिंहासनोत्पत्तिः 98, 105, 106
नरपशुपक्षिशरीरेषु नाडीसङ्ख्या 254
नर्तकलक्षणम् 173, 174
नर्मदा 138
नलभूपतिः, तच्छकश्च 74
नलमतम् 285
नवखण्डविभागः 36—40
नव ग्रहाः 405
नव द्रव्याणि 412
नव दुर्गाणि 126
नव निधयः 61
नवविधप्रतिष्ठा 139a
नवविधा रतिः 210
नव शक्तयः 142
नश्यगणः 256
नष्टोद्दिष्टगणना 297
नहुषशकप्रमाणम् 74
नाक्षत्रमानम् 73
नागपाशबन्धः 305
नागवल्लीभेदाः 248
नागवायुः 359
नागवीथी 55
नागाम्बा 98
नागार्जुनः 74, 108
नागार्जुनशकप्रमाणम् 74
नागासनम् 358
नाटरागस्वरूपम् 91, 174
नाटकलक्षणं, तद्भेदाः 296, 308—310
नाटकशालानिर्माणप्रकारः 168
नाट्यशालायां नृपादीनामुपवेशक्रमः 173
नाटकीयचतुष्षष्ट्यङ्गानि 308—311
नाट्यक्रमनिरूपणम् 173, 174
नाट्यारम्भविधिः 174
नाट्यस्थानषट्कम् 174
नाट्योपाङ्गानि 174
नाडीपरीक्षा, तद्भेदाः 253
नादः, नादकलाश्च 141, 142, 184
नादचक्रम् 403
नादपञ्चकं, तद्भेदाः 9, 358
नादादिगमकान्तनिरूपणम् 184—188
नादोत्पत्तिः 185
नानानदीनामानि 69
नान्दीश्राद्धम् 314
नाभिवेधी 376
नामकरणं, तत्कालः 312
नायकनायिकाभेदादिः 301—304
नारकन्थः 425
नारदः (दीयम्) 3, 51
नारिकेलपाकः 303
नालीकयन्त्रं, तदभ्यासक्रमः 375
नासाभिनयवर्णनम् 177
नासिका 357
नाहुषतीर्थम् 108
निग्रहस्थानानि 414
निधयः, तल्लक्षणम् 61, 117
निधिज्ञानार्थमञ्जनादिः 117, 118
निधिप्रदीपिका 164
निधौ स्वाम्यनिर्णयः 366
निमिः 90
निमीलनम् 193
नियमस्तद्भेदाः 358
नियतिषट्कम् 20
निरञ्जनजङ्गमः 8
निरर्थकम् 303

निराधारदीक्षा 422
निरालम्बस्वरूपम् 9a
निरीश्वरः 411
निरुक्तम् 6
निरुपाधिकः 413
निर्ऋतिलोकवर्णनम् 60
निर्बीजदीक्षा 422
निषधः 37
निषादः 188
निष्कः 76
निष्कललिङ्गस्वरूपम् 8, 11
निष्क्रमणकालः 312
नीलः 425
नीलपर्वतवर्णनम् 37
नीललम्बिनिका 227
नीलाश्वलक्षणम् 341
नीवाराः 241
नृचक्षुः 90
नृत्तलक्षणम् 308
नृत्तयोग्याः स्त्रियः 173
नृत्तयोग्यं वयः 174
नृत्यम् 173, 308
नृपञ्जयः 90
नृपयोषितां राजसभाप्रवेशयोग्यालङ्कारादिः 286—287
नृपाद्यधिक्षेपे दण्डः 370
नेत्राभिनयवर्णनम् 175
नेपालदेशः 134
नेयार्थम् 303a
नैयायिकमतम् 413
नैष्ठिकदीक्षा 423
नौसञ्चारप्रमाणम् 40
न्यायः 3, 6, 411, 414
न्यूनोपमा 304
पक्षः, पक्षधर्मता 413
पक्षमासर्तुभेदाः 59, 73
पक्षिणामायुःपरिमितिः 75
पङ्गुः 382
पञ्चगव्यविधिः 89
पञ्चतन्मात्राणि 406
पञ्चदशसंस्काराः 312—315
पञ्चनदः 332
पञ्चप्राणवायवः 60
पञ्चब्रह्माणः तन्मन्त्राः 76
पञ्चमः 188
पञ्चमहापातकानि 86
पञ्चयज्ञाः 79
पञ्चविधाः पाकाः 245
पञ्चविंशतिमहेशलीलाः 19
पञ्चविंशतिशिवतत्त्वानि 17
पञ्चव्यायाः 376
पञ्चसादाः 10
पञ्चाक्षरी 9
पञ्चाचारस्वरूपम् 8
पञ्चानलः 332
पञ्चावयववाक्यम् 413
पञ्चीकरणप्रकारः 21
पटवल्ली 136
पटहः 200
पटोली 237
पट्टाभिषेचनविधिः 143
पट्टाभिषेचने लग्नादिः 143
पणः 76
पण्यव्यवहारः 371
पण्डिताचार्यः 1
पतगासनम् 358
पतत्प्रकर्षम् 303, 304
पतिः 7
पत्तनलक्षणम् 165
पत्तिः 159
पत्रवेधः 374
पत्रशाकः 237
